SANSKRIT TEXTS FROM KASHMIR

VOLUME 7

LOKESH CHANDRA

Printed at the Jayyed Press, Delhi 110006
Published by Mrs. Sharada Rani, New Delhi 110016
1984

SANSKRIT TEXTS FROM KASHMIR

VOLUME 7

reproduced by

LOKESH CHANDRA

NEW DELHI, 1984

ŚATA-PIṬAKA SERIES

INDO-ASIAN LITERATURES

Volume 333

Reproduced in original scripts and languages
Translated, annotated and critically evaluated by specialists of the East and the West

Founded by
RAGHU VIRA *M.A., Ph.D., D. Litt. et Phil.*

आचार्य-रघुवीर-समुपक्रान्तं

जम्बुद्वीप-राष्ट्राणां
(भारत-नेपाल-गान्धार-शूलिक-तुरुष्क-पारस-ताजक-भोट-चीन-मोंगोल-मञ्जु-
उदयवर्ष-सिंहल-सुवर्णभू-श्याम-कम्बुज-चम्पा-द्वीपान्तरादीनां)

एकैकेषां समस्रोतसां संस्कृति-साहित्य-समुच्चय-
सरितां सागरभूतं

शतपिटकम्

PREFACE

This volume contains the reproduction of ritual texts from Kashmir, printed in Devanagari script, in the years 1921, 1933, 1936 and 1940. These texts supplement the reproduction of Sharada manuscripts in the earlier six volumes. They are indispensable for the decipherment of manuscripts in the Sharada script. They provide primary source-material for studying the ritual of Kashmir. The illustrations of diagrams on pages 128-133, 192, 194, and mudrās on pages 283-286 can form a basis for comparison with similar configurations in Japan and Bali (Indonesia).

The numbers of the first 176 pages have been omitted by the oversight of the printers. The page numbers of this edition commence with 177. In the contents we had to cite the page numbers of the original in brackets (). Thus 185(205) in the contents refers to p.185 of this edition and p.205 of the original print.

Kashmir is the land of creative spans, the vale of wisdom, whence have flowed new streams of the profound, constantly renewing the spirit in the endless journey of man. The Sanskrit texts from Kashmir are the symbol of this eternity.

Lokesh Chandra

CONTENTS

1(1) Viṣṇu-budha-sūkta
15(29) Prāyaścitta-sthānaka (cf. p.50 colophon: iti śrīmad-Yajuṣi Kāṭhake Caraka-śākhāyāṁ orimikāyāṁ prāyaścittir nāma sthānakaṁ sampūrṇaṁ)

VEDA-KALPADRUMA

30(1) I Samid-ann-ājya-bhāga: ṛcaka, 41(36) ekacakra, 42(39) graheṣṭa-brāhmaṇa, 43(42) nakṣatra-yajña
45(46) II Yava-tila-taṇḍula-bhāga: Gāyatrī-brāhmaṇa, 47(53) Agny-āditya-sūkta, 50(61) Varuṇa-candramaḥ-sūkta, 51(65) Kumāra-bhauma-sūkta, 53(70) Viṣṇu-budha-sūkta, 54(74) Indra-bṛhaspati-sūkta, 55(77) Sarasvatī-śukra-sūkta, 56(80) Prajāpati-śanaiścara-sūkta, 58(85) Gaṇapati-rāhu-sūkta, 59(88) Rudra-ketu-sūkta, 59(90) Brahma-dhruva-sūkta, 60(93) Anant-āgastya-sūkta, 61(96) Vāstoṣpati-sūkta, 62(97) Kṣetrapāla-sūkta, 62(99) Sarva-daivata-sūkta, 63(101) Rātri-sūkta, 63(102) Ṣaḍ-ṛtu-sūkta, 65(106) Abhiṣeka-mantra, 67(112) Kalaśa-grahayoḥ sthāpanādi, 69(118) Graha-bali-vidhāna, 69(120) Grahādīnāṁ kṣamā-puṣpāni, 71(125) Graha-śānti, 72(128) Gaṇḍāntādi-śānti, 74(135) Veṣma-pratiṣṭhā-vidhāna, 82(157) Pañca-gavya-vidhi, 82(159) Śaṅku-pratiṣṭhā
III Ājya-bhāga
84(1) Viṣṇu-pañcaka: Puruṣa-sūkta, 84(2) Bṛhat-puruṣa-sūkta, 84(8) Lakṣmī-sūkta, 85(11) Āyuṣya-sūkta, 85(12) Mahālakṣmī-sūkta
88(15) Rudra-pañcaka: Rudra-mantra-sūkta, 92(25) Camānuvāka-sūkta, 95(34) Saumā-rudra-sūkta, 96(37) Dīkṣā-mantra-sūkta, 97(41) Śatādhyāya-sūkta
99(46) Devī-pañcaka: asya-vāmākhyaṁ Durgā-devī-sūktam, 101(53) Tripurā-devī-sūkta, 102(55) Sārikā-devī-sūkta, 102(57) Rājñī-devī-sūkta, 103(58) Jvālā-devī-sūkta
104(62) Rakṣoghna-mantrā-khyam mahauṣadhi-sūktam
105(64) Uda-kalaśa
105(66) Kūṣmāṇḍ-arṣa
106(69) Kūṣmāṇḍa-mantra
110(79) Kalaś-āvāhana
111(83) Agnikuṇḍa-pūjā
112(87) Prāyaścitta-sthānaka
118(103) Āṣāḍha-māgha-kārtika-vaiśākha-māsa-vrat-odyāpana
120(110) Tulā-dāna-vidhi
122(117) Kanyā-saṁskāra-vidhi

KARMAKĀṆḌA

128(1-24) Diagrams

134(1) Kāraṇa-sūkta: Viṣṇu-kāraṇa, 135(5) Brahma-kāraṇa, 135(7) Śiva-kāraṇa, 136(10) Yama-kāraṇa, 138(18) Pitṛ-kāraṇa

141(31) Iśe-tvā-brāhmaṇa, 141(32) svādhyāya-brāhmaṇa, 143(39) pratigraha-brāhmaṇa, 143(40) sandhyā-brāhmaṇa, 144(41) pāvamānya-brāhmaṇa, 145(46) mali-mluca-brāhmaṇa, 145(48) Mārtaṇḍa-brāhmaṇa

148(58) Viṣṇu-budha-sūkta, 149(61) Brahma-dhruva-sūkta, 149(64) Rudra-ketu-sūkta, 151(69) Prajāpati-śanaiścara-sūkta, 152(73) Ṛtu-nārāyaṇa-sūkta

154(81) Viṣṇu-bali-vidhāna: prāyaścitta-vidhi, 155(88) Viṣṇu-kriyā-vidhi, 158(97) Viṣṇu-śrāddha-vidhi, 167(136) pūyamāna-brāhmaṇa

168(140) Sūrya-bali-vidhāna: prāyaścitta-vidhi, 172(155) bharga-kriyā-vidhi, 175(166) bharga-śrāddha-vidhi

185(205) Śiva-nirvāṇa-vidhi: 186(209) vaidika antyeṣṭi, 186(211) tāntrika antyeṣṭi, 207(293) daśāhnika-preta-kriyākaṇḍa-vidhi, 208(299) Śiva-kriyā-vidhi, 212(313) Śiva-śrāddhe 'nnapūri-pūjā, 218(338) Śivāṣṭaka, 222(354) Śiv-anvaṣṭakā-vidhi (śākta śrāddha), 223(358) sāṁvatsarika-Śiva-śrāddha-vidhi, 228(377) Ekoddiṣṭa-Śiva-śrāddha-vidhi, 231(391) Śaivī sapiṇḍīkaraṇaṁ, 236(410) Śiva-dīpa-śrāddha (śākta śrāddha), 246(452) Śaiva-vaiśvadeva-vidhi

NITYA-KARMA-VIDHI

249 Introduction

257 (1) Snāna-vidhi

263(13) Sandhy-opāsana

283(1-8) Mudrās

GARBHĀDHĀNĀDI-SAṀSKĀRA-VIDHI (specially upanayana-vidhi)

288(1) saṁskāra-anupūrvī, 290(5) kalaś-ārcana, 299(24) agnikuṇḍādi-pūjana, 307(39) sīmant-onnayana, 308(41) puṁ-savana, 309(43) jātakaraṇa, 311(47) nāmakaraṇa, 313(51) sūrya-darśana, 315(56) candra-darśana, 316(58) anna-prāśana, 317(60) cūḍākaraṇa, 319(64) upāyana, 331(88) traividyaka, 333(92) upākarma 335(96) cāturhotṛka, 339(103) pravargya-vrata, 348(122) aruna-vrata,

352(129) aupaniṣada-vrata, 356(138) go-dāna, 359(143) apavarge traividya -kaṁ, 360(146) snāna-vrata-mantra, 365(155) trikā-homa, 367(159) agneḥ kṣamā-puṣpāni, 367(160) kalaśa-cchidraṁ, 369(163) ṛṣi-visarjana

370(1) prāstāvika (introduction to the aforesaid)

403 VIVĀHA-VIDHI

ॐ

ॐ नमो नारायणाय

विष्णुबुधसूक्तम् ॥

ॐ उद्यत्प्रद्योतनशतरुचिं तप्तहेमावदातं
पार्श्वद्वन्द्वे जलधिसुतया विश्वधात्र्या च जुष्टम् ।
नानारत्नोल्लसितविविधाकल्पमापीतवस्त्रं
विष्णुं वन्दे दरकमलकौमोदकीचक्रपाणिम् ॥

प्र ते महे विदथे शंसिषं हरी प्र ते वन्वे वनुषो हर्यतं मदम् ।
घृतं न यो हरिभिश्चारु सेचत आ त्वा विशन्तु हरिवर्पसं गिरः
॥ १ ॥ हरिं हि योनिमभि ये समस्वरन्हिन्वन्तो हरी दिव्यं य-
था सदः । आ यं पृणन्ति हरिभिर्न धेनव इन्द्राय शूषं हरिव-
न्तमर्चत ॥ २ ॥ सो अस्य वज्रो हरितो य आयसो हरिर्निकामो

हरिरा गभस्त्योः । द्युम्नी सुशिप्रो हरिमन्युसायक इन्द्रे नि रूपा हरिता मिमिक्षिरे ॥ ३ ॥ दिवि न केतुरधि धायि हर्यतो विव्यचद्वज्रो हरितो न रंह्या । तुददहिं हरिशिप्रो य आयसः सहस्रशोका अभवद्धरिम्भरः ॥ ४ ॥ त्वन्त्वमहर्यथा उपस्तुतः पूर्वेभिरिन्द्र हरिकेश यज्वभिः । त्वं हर्यसि तव विश्वमुक्थ्यमसामि राधो हरिजात हर्यतम् ॥ ५ ॥ ता वज्रिणं मन्दिनं स्तोम्यं मद इन्द्रं रथे वहतो हर्यता हरी । पुरूण्यस्मै सवनानि हर्यत इन्द्राय सोमा हरयो दधन्विरे ॥ ६ ॥ अरं कामाय हरयो दधन्विरे स्थिराय हिन्वन्हरयो हरी तुरा । अर्वद्भिर्यो हरिभिर्जोषमीयते सो अस्य कामं हरिवन्तमानशे ॥ ७ ॥ हरिश्मशारुर्हरिकेश आयसस्तुरस्पेये यो हरिपा अवर्धत । अर्वद्भिर्यो हरिभिर्वाजिनीवसुरति विश्वा दुरिता पारिषद्धरी ॥ ८ ॥ स्रुवेव यस्य हरिणी विपेततुः शिप्रे वाजाय हरिणी दविध्वतः । प्र यत्कृते चमसे मर्मृजद्धरी पीत्वा मदस्य हर्यतस्यान्धसः ॥ ९ ॥ उत स्म सद्म हर्य-

तस्य पस्त्यो रत्यो न वाजं हरिवाँ अचिक्रदत् । मही चिद्धि धि-
षणाहर्यदोजसा बृहद्वयो दधिषे हर्यतश्चिदा ॥ १० ॥ आ रोद-
सी हर्यमाणो महित्वा नव्यं नव्यं हर्यसि मन्म नु प्रियम् ।
प्र पस्त्यमसुर हर्यतं गोराविष्कृधि हरये सूर्याय ॥ ११ ॥ आ
त्वा हर्यन्तं प्रयुजो जनानां रथे वहन्तु हरिशिप्रमिन्द्र । पिबा
यथा प्रतिभृतस्य मध्वो हर्यन्यज्ञं सधमादे दशोणिम् ॥ १२ ॥
अपाः पूर्वेषां हरिवः सुतानामथो इदं सवनं केवलं ते । ममद्धि
सोमं मधुमन्तमिन्द्र सत्रा वृषञ्जठर आ वृषस्व ॥ १३ ॥

अयं ते अस्तु हर्यतः सोम आ हरिभिः सुतः । जुषाण
इन्द्र हरिभिर्न आगह्या तिष्ठ हरितं रथम् ॥ १ ॥ हर्यन्नुषस-
मर्चयः सूर्यं हर्यन्नरोचयः । विद्वांश्चिकित्वान्हर्यश्व वर्धस इन्द्र
विश्वा अभि श्रियः ॥ २ ॥ द्यामिन्द्रो हरिधायसं पृथिवीं ह-
रिवर्पसम् । अधारयद्धरितोर्भूरि भोजनं ययोरन्तर्हरिश्चरत् ॥३॥
जज्ञानो हरितो वृषा विश्वमा भाति रोचनम् । हर्यश्वो हरितं

धत्त आयुधमा वज्रं बाह्वोर्हरिम् ॥ ४ ॥ इन्द्रो ह्यन्तमर्जुनं वज्रं शुक्रैरभीवृतम् । अपावृणोद्धरिभिरद्रिभिः सुतमुद्गा हरिभिराजत ॥ ५ ॥ आ मन्द्रैरिन्द्र हरिभिर्याहि मयूररोमभिः । मा त्वा के चिन्नि यमन्विं न पाशिनोऽति धन्वेव ताँ इहि ॥ १ ॥ वृत्रखादो वलंरुजः पुरां दर्मो अपामजः । स्थाता रथस्य हर्योरभिस्वर इन्द्रो दृळ्हा चिदारुजः ॥ २ ॥ गम्भीराँ उदधीँरिव क्रतुं पुष्यसि गा इव । प्र सुगोपा यवसं धेनवो यथा ह्रदं कुल्या इवाशत ॥ ३ ॥ आ नस्तुजं रयिं भरांशं न प्रतिजानते । वृक्षं पक्वं फलमङ्कीव धूनहीन्द्र सम्पारणं वसु ॥ ४ ॥ स्वयुरिन्द्र स्वराळसि स्मद्दिष्टिः स्वयशस्तरः । स वावृधान ओजसा पुरुष्टुत भवा नः सुश्रवस्तमः ॥ ५ ॥

परो मात्रया तन्वा वृधान न ते महित्वमन्वश्नुवन्ति । उभे ते विद्म रजसी पृथिव्या विष्णो देव त्वं परमस्य वित्से ॥ १ ॥ न ते विष्णो जायमानो न जातो देव महिम्नः परम-

न्नामाप । उदस्तभ्ना नाकमृष्वं बृहन्तं दाधर्थ प्राचीं ककुभं पृ-
थिव्याः ॥ २ ॥ इरावती धेनुमती हि भूतं सूयवसिनी मनुषे
दशस्या । व्यस्तभ्ना रोदसी विष्णवेते दाधर्थ पृथिवीमभितो म-
यूखैः ॥ ३ ॥ उरुं यज्ञाय चक्रथुरु लोकं जनयन्ता सूर्यमुषास-
मग्निम् । दासस्य चिद्वृषशिप्रस्य माया जघ्नथुर्नरा पृतनाज्येषु ॥ ४ ॥
इन्द्राविष्णू दृंहिताः शम्बरस्य नव पुरो नवतिं च श्नथिष्टम् ।
शतं वर्चिनः सहस्रं च साकं हथो अप्रतिसुरस्य वीरान् ॥ ५ ॥
इयं मनीषा बृहती बृहन्तोरुक्रमा तवसा वर्धयन्ती । ररे वां
स्तोमं विदथेषु विष्णो पिन्वतमिषो वृजनीष्विन्द्र ॥ ६ ॥ व-
षट् ते विष्णवास आ कृणोमि तन्मे जुषस्व शिपिविष्ट हव्यम् ।
वर्धन्तु त्वा सुष्टुतयो गिरो मे यूयं पात स्वस्तिभिः सदा नः
॥ ७ ॥ नू मर्तो दयते सनिष्यन्यो विष्णव उ-
रुगायाय दाशत् । प्र यः सत्राचा मनसा यजात एतावन्तं न-
र्यमाविवासात् ॥ १ ॥ त्वं विष्णो सुमतिं विश्वजन्यामप्रयुतामे-

वयावो मतिं दाः । पर्वो यथा नः सुवितस्य भूरेरश्वावतः पुरुश्चन्द्रस्य रायः ॥ २ ॥ त्रिर्देवः पृथिवीमेष एतां वि चक्रमे शतर्चसं महित्वा । प्र विष्णुरस्तु तवसस्तवीयान्त्वेषं ह्यस्य स्थविरस्य नाम ॥ ३ ॥ वि चक्रमे पृथिवीमेष एतां क्षेत्राय विष्णुर्मनुषे दशस्यन् । ध्रुवासो अस्य कीरयो जनास उरुक्षितिं सुजनिमा चकार ॥ ४ ॥ प्र तत्ते अद्य शिपिविष्ट नामार्यः शंसामि वयुनानि विद्वान् । तं त्वा गृणामि तवसमतव्यान्क्षयन्तमस्य रजसः पराके ॥ ५ ॥ किमित्ते विष्णो परिचक्ष्यं भूत्प्र यद्ववक्षे शिपिविष्टो अस्मि । मा वर्पो अस्मदप गूह एतद्यदन्यरूपः समिथे बभूथ ॥ ६ ॥ वषट्ते विष्णवास आ कृणोमि तन्मे जुषस्व शिपिविष्ट हव्यम् । वर्धन्तु त्वा सुष्टुतयो गिरो मे यूयं पात स्वस्तिभिः सदा नः ॥ ७ ॥

उदुबुध्यध्वं समनसः सखायः समग्निमिन्ध्वं बहवः सनीळाः । दधिक्रामग्निमुषसं च देवीमिन्द्रावतोऽवसे नि ह्वये वः ॥ १ ॥

मन्द्रा कृणुध्वं धिय आ तनुध्वं नावमरित्रपरणीं कृणुध्वम् ।
इष्कृणुध्वमायुधारं कृणुध्वं प्राञ्चं यज्ञं प्र णयता सखायः ॥ २ ॥
युनक्त सीरा वि युगा तनुध्वं कृते योनौ वपतेह बीजम् । गि-
रा च श्रुष्टिः सभरा असन्नो नेदीय इत्सृण्यः पक्वमेयात् ॥ ३ ॥
सीरा युञ्जन्ति कवयो युगा वि तन्वते पृथक् । धीरा देवेषु सु-
म्नया ॥ ४ ॥ निराहावान्कृणोतन सं वरत्रा दधातन । सिञ्चा-
महा अवतमुद्रिणं वयं सुषेकमनुपक्षितम् ॥ ५ ॥ इष्कृताहाव-
मवतं सुवरत्रं सुषेचनम् । उद्रिणं सिञ्चे अक्षितम् ॥ ६ ॥ प्र-
ीणीताश्वान्हितं जयाथ स्वस्तिवाहं रथमित्कृणुध्वम् । द्रोणाहा-
वमवतमश्मचक्रमंसत्रकोशं सिञ्चता नृपाणम् ॥ ७ ॥ व्रजं कृणुध्वं
स हि वो नृपाणो वर्म सीव्यध्वं बहुला पृथूनि । पुरः कृणुध्व-
मायसीरधृष्टा मा वः सुस्रोच्चमसो दृंहता तम् ॥ ८ ॥ आ वो
धियं यज्ञियां वर्त ऊतये देवा देवीं यजतां यज्ञियामिह । सा
नो दुहीयद्यवसेव गत्वी सहस्रधारा पयसा मही गौः ॥ ९ ॥

आ तू षिञ्च हरिमीं द्रोरुपस्थे वाशीभिस्तक्षताश्मन्मयीभिः ।
परिष्वजध्वं दश कक्ष्याभिरुभे धुरौ प्रति वह्निं युनक्त ॥ १० ॥
उभे धुरौ वह्निरापिब्दमानो ऽन्तर्योनेव चरति द्विजानिः । वन-
स्पतिं वन आस्थापयध्वं नि षू दधिध्वमखनन्त उत्सम् ॥११॥
कपृन्नरः कपृथमुद्दधातन चोदयत खुदत वाजसातये । निष्टिग्र्यः
पुत्रमा च्यावयोतय इन्द्रं सबाध इह सोमपीतये ॥ १२ ॥
पिबा सोममिन्द्र मंदतु त्वा यं ते सुषाव हर्यश्वाद्रिः ।
सोतुर्बाहुभ्यां सुयतो नार्वा ॥ १ ॥ यस्ते मदो युज्यश्चारुरस्ति
येन वृत्राणि हर्यश्व हंसि । स त्वामिन्द्र प्रभूवसो ममत्तु ॥२॥
बोधा सु मे मघवन्वाचमेमां यां ते वसिष्ठो अर्चति प्रशस्तिम् ।
इमा ब्रह्म सधमादे जुषस्व ॥ ३ ॥ श्रुधी हवं विपिपानस्याद्रेर्बो-
धा विप्रस्यार्चतो मनीषाम् । कृष्वा दुवांस्यन्तमा सचेमा ॥४॥
न ते गिरो अपि मृष्ये तुरस्य न सुष्टुतिमसुर्यस्य विद्वान् ।
सदा ते नाम स्वयशो विवक्मि ॥ ५ ॥ भूरि हि ते सवना

मानुषेषु भूरि मनीषी हवते त्वामित् । मारे अस्मन्मघवञ्ज्योक्कः ॥ ६ ॥ तुभ्येदिमा सवना शूर विश्वा तुभ्यं ब्रह्माणि वर्धना कृणोमि । त्वं नृभिर्हव्यो विश्वधासि ॥ ७ ॥ नू चिन्नु ते मन्यमानस्य दस्मोदश्नुवन्ति महिमानमुग्र । न वीर्यमिन्द्र ते न राधः ॥ ८ ॥ ये च पूर्व ऋषयो ये च नूत्ना इन्द्र ब्रह्माणि जनयन्त विप्राः । अस्मे ते सन्तु सख्या शिवानि यूयं पात स्वस्तिभिः सदा नः ॥ ९ ॥

उदु ब्रह्माण्यैरत श्रवस्येन्द्रं समर्ये महया वसिष्ठ । आ यो विश्वानि शवसा ततानोपश्रोता म ईवतो वचांसि ॥ १ ॥ अयामि घोष इन्द्र देवजामिरिरज्यन्त यच्छुरुधो विवाचि । नहि स्वमायुश्चिकिते जनेषु तानीदंहांस्यति पर्ष्यस्मान् ॥ २ ॥ युजे रथं गवेषणं हरिभ्यामुप ब्रह्माणि जुजुषाणमस्थुः । वि बाधिष्ट स्य रोदसी महित्वेन्द्रो वृत्राण्यप्रती जघन्वान् ॥ ३ ॥ आपश्चित्पिप्युः स्तर्यो न गावो नक्षन्नृतं जरितारस्त इन्द्र । याहि वायुर्न नियुतो

नो अच्छा त्वं हि धीभिर्दयसे वि वाजान् ॥ ४ ॥ ते त्वा मदा इन्द्र मादयन्तु शुष्मिणं तुविराधसं जरित्रे । एको देवत्रा दयसे हि मर्तानस्मिञ्छूर सवने मादयस्व ॥ ५ ॥ एवेदिन्द्रं वृषणं वज्रबाहुं वसिष्ठासो अभ्यर्चन्त्यर्कैः । स नः स्तुतो वीरवत्पातु गोमद्यूयं पात स्वस्तिभिः सदा नः ॥ ६ ॥

सं वां कर्मणा समिषा हिनोमीन्द्राविष्णू अपसस्पारे अस्य । जुषेथां यज्ञं द्रविणं च धत्तमरिष्टैर्नः पथिभिः पारयन्ता॥ १ ॥ या विश्वासां जनितारा मतीनामिन्द्राविष्णू कलशा सोमधाना । प्र वां गिरः शस्यमाना अवन्तु प्र स्तोमासो गीयमानासो अर्कैः ॥ २ ॥ इन्द्राविष्णू मदपती मदानामा सोमं यातं द्रविणो दधाना । सं वामञ्जन्त्वक्तुभिर्मतीनां सं स्तोमासः शस्यमानास उक्थैः ॥ ३ ॥ आ वामश्वासो अभिमातिषाह इन्द्राविष्णू सधमादो वहन्तु । जुषेथां विश्वा हवना मतीनामुप ब्रह्माणि शृणुतं गिरो मे ॥ ४ ॥ इन्द्राविष्णू तत्पनयाय्यं वां सो-

मस्य मद उरु चक्रमाथे । अकृणुतमन्तरिक्षं वरीयोऽप्रथतं जीवसे नो रजांसि ॥ ५ ॥ इन्द्राविष्णू हविषा वावृधानाग्राद्वाना नमसा रातहव्या । घृतासुती द्रविणं धत्तमस्मे समुद्रः स्थः कलशः सोमधानः ॥ ६ ॥ इन्द्राविष्णू पिबतं मध्वो अस्य सोमस्य दस्रा जठरं पृणेथाम् । आ वामन्धांसि मदिराण्यग्मन्नुप ब्रह्माणि शृणुतं हवं मे ॥ ७ ॥ उभा जिग्यथुर्न परा जयेथे न परा जिग्ये कतरश्चनैनोः । इन्द्रश्च विष्णो यदपस्पृधेथां त्रेधा सहस्रं वि तदैरयेथाम् ॥ ८ ॥

युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः । वि होत्रा दधे वयुनाविदेक इन्मही देवस्य सवितुः परिष्टुतिः ॥ १ ॥ विश्वा रूपाणि प्रति मुञ्चते कविः प्रासावीद्भद्रं द्विपदे चतुष्पदे । वि नाकमख्यत्सविता वरेण्योऽनु प्रयाणमुषसो वि राजति ॥ २ ॥ यस्य प्रयाणमन्वन्य इद्ययुर्देवा देवस्य महिमानमोजसा । यः पार्थिवानि विममे स एतशो रजांसि

देवः सविता महित्वना ॥ ३ ॥ उत यासि सवितस्त्रीणि रोचनोत सूर्यस्य रश्मिभिः समुच्यसि । उत रात्रीमुभयतः परीयस उत मित्रो भवसि देव धर्मभिः ॥ ४ ॥ उतेशिषे प्रसवस्य त्वमेक इदुत पूषा भवसि देव यामभिः । उतेदं विश्वं भुवनं वि राजसि श्यावाश्वस्ते सवितः स्तोममानशे ॥ ५ ॥

तत्सवितुर्वृणीमहे वयं देवस्य भोजनम् । श्रेष्ठं सर्वधातमं तुरं भगस्य धीमहि ॥ १ ॥ अस्य हि स्वयशस्तरं सवितुः कच्चन प्रियम् । नमिनन्ति स्वराज्यम् ॥ २ ॥ स हि रत्नानि दाशुषे सुवाति सविता भगः । तं भागं चित्रमीमहे ॥ ३ ॥ अद्या नो देव सवितः प्रजावत्सावीः सौभगम् । परा दुःष्वप्न्यं सुव ॥ ४ ॥ विश्वानि देव सवितर्दुरितानि परा सुव । यद्भद्रं तन्न आ सुव ॥ ५ ॥ अनागसो अदितये देवस्य सवितुः सवे । विश्वा वामानि धीमहि ॥ ६ ॥ आ विश्वदेवं सत्पतिं सूक्तैरद्या वृणीमहे । सत्यसवं सवितारम् ॥ ७ ॥ य इमे उभे अहनी पुर

एत्यप्रयुच्छन् । स्वाधीदर्वे सविता ॥ ८॥ य इमा विश्वा जाता-
न्याश्रावयति श्लोकेन । प्र च सुवाति सविता ॥ ९ ॥

दूतं वो विश्ववेदसं हव्यवाहममर्त्यम् । यजिष्ठमृञ्जसे गिरा
॥ १ ॥ स हि वेदा वसुधितिं महाँ आरोधनं दिवः । स देवाँ
एहवक्षति ॥ २ ॥ स वेद देव आनमं देवाँ ऋतायते दमे ।
दाति प्रियाणि चिद्वसु ॥ ३ ॥ स होता सेदु दूत्यं चिकित्वाँ
अन्तरीयते । विद्वाँ आरोधनं दिवः ॥ ४ ॥ ते स्याम ये अग्नये
ददाशुर्हव्यदातिभिः । य ईं पुष्यन्त इन्धते ॥ ५ ॥ ते राया ते
सुवीर्यैः ससवांसो वि शृण्विरे । ये अग्ना दधिरे दुवः ॥ ६ ॥
अस्मे रायो दिवेदिवे सं चरन्तु पुरुस्पृहः । अस्मे वाजास ईर-
ताम् ॥ ७ ॥ स विप्रश्चर्षणीनां शवसा मानुषाणाम् । अति
क्षिप्रेव विध्यति ॥ ८ ॥ अग्ने मृळ महाँ असि
य ईमा देवयुं जनम् । इयेथ बर्हिरासदम् ॥ १ ॥ स मानुषी-
षु दूळभो विक्षु प्रावीरमर्त्यः । दूतो विश्वेषां भुवत् ॥ २ ॥

स सद्म परि णीयते होता मन्द्रो दिविष्टिषु । उत पोता नि षीदति ॥ ३ ॥ उत ग्ना अग्निरध्वर उतो गृहपतिर्दमे । उत ब्रह्मा नि षीदति ॥ ४ ॥ वेषि ह्यध्वरीयतामुपवक्ता जनानाम् । हव्या च मानुषाणाम् ॥ ५ ॥ वेषीद्वस्य दूत्यं यस्य जुजोषो अध्वरम् । हव्यं मर्तस्य वोळ्हवे ॥ ६ ॥ अस्माकं जोष्यध्वरमस्माकं यज्ञमङ्गिरः । अस्माकं शृणुधी हवम् ॥ ७ ॥ परि ते दूळभो रथोऽस्माँ अश्नोतु विश्वतः । येन रक्षसि दाशुषः ॥ ८ ॥

॥ इति ऋग्वेदसूक्तानि ॥

अथ यजुर्वेदसूक्तानि ॥

अग्नेस्तनूरसि विष्णवे त्वा सोमस्य तनूरसि विष्णवे त्वातिथेरातिथ्यमसि विष्णवे त्वाग्नये त्वा रायस्पोषदे विष्णवे त्वा श्येनाय त्वा सोमभृते विष्णवे त्वापतये त्वा परिपतये गृह्णामि तनूनप्त्रे शाक्मने शाक्कराय शक्मन्नोजिष्ठायानाधृष्टमस्यनाधृष्यं देवानामोजोऽभिशस्तिपा अनभिशस्तेन्यमञ्जसा सत्यमुपागां सुविते

मा धा अग्ने व्रतपा अस्मे व्रतपास्त्वे व्रतपाः पुनर्व्रतपा व्रतिनां व्रतानि याग्ने मम तनूरेषा सा त्वयि या तव तनूरियं सा मयि सह नौ व्रतपा व्रतिनां व्रतानि ॥

या ते अग्ने रुद्रिया तनूस्तया नः पाहि तस्यै ते स्वाहांशुरंशुस्ते देव सोमाप्यायतामिन्द्रायैकधन आ तुभ्यमिन्द्रः प्यायतामा त्वमिन्द्राय प्यायस्वाप्यायय सखीन्सन्या मेधया स्वस्ति ते देव सोम सुत्यामशीय स्वस्त्योहन्त्यमेष्टा राय एष्टा वामानि प्रेषे भगायर्तमृतवादिभ्यो नमो दिवे नमः पृथिव्यै या ते अग्नेऽयाशया तनूर्वर्षिष्ठा गह्वरेष्ठा वर्षिष्ठा गह्वरेष्ठा उग्रं वचोऽपावधीस्त्वेषं वचोऽपावधीत्स्वाहा या ते अग्ने रजाशया हराशया तनूर्वर्षिष्ठा गह्वरेष्ठा वर्षिष्ठा गह्वरेष्ठा उग्रं वचोऽपावधीत्त्वेषं वचोऽपावधीत्स्वाहा ॥ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे नार्यसीदमहं रक्षसो ग्रीवा अपिकृन्तामीदमहं यो नस्समानो योऽसमानोऽरातीयति तस्य ग्रीवा

अपिकृन्तामि तप्तायन्यसि वित्तायन्यस्यवतान्मा नाथितमवतादू व्यथितमग्ने अङ्गिरो योऽस्यां पृथिव्यामस्यायुना नाम्नेहि यत्तेऽनाधृष्टं नामानाधृष्यं तेन त्वादधेऽग्नेऽङ्गिरो यो द्वितीयस्यां यस्तृतीयस्यां पृथिव्यामस्यायुना नाम्नेहि यत्तेऽनाधृष्टं नामानाधृष्यं तेन त्वादधे विदेदग्निर्नभो नाम सिंहयसि महिष्यसि देवेभ्यः प्रथस्व देवेभ्यः कल्पस्व देवेभ्यः शुन्धस्व देवेभ्यः शुम्भस्व ॥ विभ्राड् बृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञपता अविह्रुतम् । वातजूतो यो अभिरक्षति त्मना प्रजाः पिपर्ति बहुधा विराजति॥

इन्द्रघोषास्त्वा वसवः पुरस्तात्पान्तु मनोजवास्त्वा पितरो दक्षिणतः पान्तु प्रचेतास्त्वा रुद्रैः पश्चात्पातु विश्वकर्मा त्वादित्यैरुत्तरात्पातु त्वष्टा त्वा रूपैरुपरिष्टात्पातु सिंहयसि सपत्नसाही स्वाहा सिंहयसि रायस्पोषवनिस्स्वाहा सिंहयसि सुप्रजावनिस्स्वाहा सिंहयस्यादित्यवनिस्स्वाहा सिंहयस्यावह देवान्देवायते यजमानाय स्वाहा भूतेभ्यस्त्वा विश्वायुरसि पृथिवीं स्कभाना-

च्युतश्चिदस्यन्तरिक्षं स्कभान ध्रुवश्चिदसि दिवं स्कभानाग्नेः कुलायमस्यग्नेः पुरीषमसि यज्ञः प्रत्यष्ठात् ॥ मनुष्वत्त्वा निधीमहि मनुष्वत्समिधीमहि । अग्ने मनुष्वदङ्गिरो देवान्देवयते यज ॥

युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः । वि होत्रा दधे वयुनाविदेक इन्मही देवस्य सवितुः परिष्टुतिः ॥ देवश्रुतौ देवेष्वाघोषेथाम् ॥ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पांसुरे ॥ इडावती धेनुमती हि भूतं सूयवसिनी मानुषे यशस्ये । व्यष्टभ्ना रोदसी विष्ण एते दाधर्थ पृथिवीमभितो मयूखैः ॥ वैष्णवमसि विष्णुस्त्वोत्तभ्नातु ॥ दिवो वा विष्ण उत वा पृथिव्या महो वा विष्ण उरोरन्तरिक्षात् । हस्तौ पृणस्व बहुभिर्वसव्यैराप्रयच्छ दक्षिणादोत सव्यात् ॥ विष्णोर्नु कं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसि । यो अस्कभायदुत्तरं सधस्थं विचक्रमाणस्त्रेधोरुगायः ॥ विष्णोः पृष्ठमसि विष्णो रराटमसि विष्णोश्श्नप्त्रे स्थो विष्णोस्स्यूरसि वि-

ष्णोर्ध्रुवोऽसि वैष्णवमसि विष्णवे त्वा ॥ प्र तद्विष्णुस्तवते वी- र्येण मृगो न भीमः कुचरो गिरिष्ठाः । यस्योरुषु त्रिषु विक्रम- णेष्वधिक्षियन्ति भुवनानि विश्वा ॥

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्या- माददे इदमहं रक्षसो ग्रीवा अपिकृन्तामीदमहं यो नस्समानो योऽसमानोऽरातीयति तस्य ग्रीवा अपिकृन्तामि बृहन्नसि बृहद्- ग्रावा बृहतीमिन्द्राय वाचं वद रक्षोहणं वलगहनं वैष्णवीमिद- महं तान्वलगानुद्वपामि यान्नस्समानो यानसमानो निचखानेद- महं तान्वलगानुद्वपामि यान्नस्सबन्धुर्यानसबन्धुर्निचखानेदमहं तान्वलगानुद्वपामि यान्नस्सनाभिर्यानसनाभिर्निचखानेदमहं ता- न्वलगानुद्वपामि यान्नस्त्वो यानरणो निचखान राडसि विराडसि सम्राडसि स्वराडसि गायत्रेण छन्दसावबाढो यं द्विष्मस्त्रैष्टुभे- न जागतेनानुष्टुभेन पाङ्क्तेन छन्दसावबाढो यं द्विष्मः ॥

किमत्र भद्रं तन्नौ सह निरस्तो वलगोऽवबाढो दुरस्यू र-

क्षोघ्नो वलगघ्नः प्रोक्षामि वैष्णवान्रक्षोघ्नो वलगघ्नोऽवसिञ्चामि वै-
ष्णवान्रक्षोघ्नो वलगघ्नोऽवस्तृणामि वैष्णवान्रक्षोहणौ वलगहनौ
प्रोक्षामि वैष्णवी रक्षोहणौ वलगहना उपदधामि वैष्णवी रक्षो-
हणौ वलगहनौ पर्यूहामि वैष्णवी रक्षोहा त्वा वलगहा प्रोक्षा-
मि वैष्णवं रक्षोहा त्वा वलगहा स्तृणामि वैष्णवं रक्षोघ्नो वल-
गघ्नस्संसादयामि वैष्णवान् ॥

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्या-
माददे इदमहं रक्षसो ग्रीवा अपिकृन्तामीदमहं यो नस्समानो
योऽसमानोऽरातीयति तस्य ग्रीवा अपिकृन्तामि दिवे त्वान्तरि-
क्षाय त्वा पृथिव्यै त्वा शुन्धन्तां लोकाः पितृषदना यवोऽसि
यावयास्मद्द्वेषं यावयारातिं पितृषदनं त्वा लोकमास्तृणाम्युद्दिवं
स्तभानान्तरिक्षं पृण दृंहस्व पृथिव्यां नितानस्त्वा मारुतो निह-
न्तु मित्रावरुणयोर्ध्रुवेण धर्मणा ॥

ब्रह्मवनिं त्वा क्षत्रवनिं देववनिं सजातवनिं रायस्पोषवनिं

पर्यूहामि ब्रह्म दृंह क्षत्रं दृंह प्रजां दृंह रायस्पोषं दृंह घृतेन द्यावापृथिवी आ पृणेथां विश्वजनस्य च्छायासीन्द्रस्य स्यूरसीन्द्रस्य ध्रुवोऽस्यैन्द्रमसीन्द्राय त्वा ॥ परि त्वा गिर्वणो गिर इमा भवन्तु विश्वतः । वृद्धायुमनु वृद्धयो जुष्टा भवन्तु जुष्टयः ॥

विभूरसि प्रवाहणो वह्निरसि हव्यवाहनश् श्वात्रोऽसि प्रचेतास्तुथोऽसि विश्ववेदा उशिगसि कविरङ्घारिरसि बम्भारिरवस्युरसि दुवस्वाञ्छुन्ध्युरसि मार्जालीयस्सम्राडसि कृशानुः परिषद्योऽस्यास्तव्यो नभोऽसि प्रतक्वा संमृष्टोऽसि हव्यसूदन ऋतधामासि स्वर्ज्योतिस्समुद्रोऽसि विश्वव्यचा अजोऽस्येकपादहिरसि बुध्न्यः कव्योऽसि कव्यवाहनो रौद्रेणानीकेन पाहिमाग्ने पिपृहि माग्ने नमस्ते अस्तु मा मा हिंसीः ॥

आ नो मित्रावरुणा प्र बाहवा० ॥ इन्द्रावरुणयोरहं सम्राजोरव आवृणे । ता नो मृडात ईदृशे ॥ नू न इन्द्रावरुणा गृणाना पृङ्क्तं रयिं सौश्रवसाय देवा । इत्था गृणन्तो महिनस्य

शर्धोऽपो न नावा दुरिता तरेम ॥ त्वं नो अग्ने० स त्वं नो अग्ने० शं नो भवन्तु० वाजे वाजे० ॥ विश्वाहेन्द्रो अधिवक्ता नो अस्त्वपरिह्वृताःसनुयाम वाजम् । तन्नो मित्रो वरुणो मामहन्तामदितिस्सिन्धुः पृथिवी उत द्यौः ॥ एनाङ्गूषेण वयमिन्द्रवन्तोऽभिष्याम वृजने सर्ववीराः । तन्नो मित्रो वरुणो मामहन्तामदितिस्सिन्धुः पृथिवी उत द्यौः ॥ अग्निर्मूर्धा० ॥ प्र सो अग्ने तवोतिभिस्सुवीराभिस्तिरते वाजभर्मभिः । यस्य त्वं सख्यमावरः ॥ अग्ने वाजस्याग्ने त्री ते० ॥ सं वां कर्मणा समिषा हिनोमीन्द्राविष्णू अपसस्पारे अस्य । जुषेथां यज्ञं द्रविणं च धत्तमरिष्टैर्नः पथिभिः पारयन्ता ॥ उभा जिग्यथुर्न पराजयेथे न पराजिग्ये कतरश्चनैनोः । इन्द्रश्च विष्णो यदपस्पृधेथां त्रेधा सहस्रं वि तदैरयेथाम् ॥ इषं दुहन्सुदुघां विश्वधायसं यज्ञप्रिये यजमानाय सुन्वते । अग्ने घृतस्नुस्त्रिर्ऋतानि दीद्यद्वर्तिर्यज्ञं परियन्सुक्रतूयसि ॥ त्रीण्यायूंषि तव जातवेदः० ॥

दूतं वो विश्ववेदसं हव्यवाहममर्त्यम् । यजिष्ठमृञ्जसे गिरा॥ स हि वेदा वसुधितिं महाँ आरोधनं दिवः । स देवाँ एह वक्षति ॥ स वेद देव आनमं देवाँ ऋतायते दमे । दाति प्रियाणि चिद्वसु ॥ स होता सेदु दूत्यं चिकित्वाँ अन्तरीयते । विद्वाँ आरोधनं दिवः ॥ ते स्याम ये अग्नये ददाशुर्हव्यदातिभिः । य ईं पुष्यन्त इन्धते ॥ ते राया ते सुवीर्यैस्ससवाँसो विशृण्विरे। ये अग्ना दधिरे दुवः ॥ अभि त्वा शूर नोनुमस्त्वामिद्धि हवामहे ॥ यद् द्याव इन्द्र ते शतँ शतं भूमीरुत स्युः । न त्वा वज्रिन्सहस्रँ सूर्या अनु न जातमष्ट रोदसी ॥ बोधा सु मे मघवन्वाचमेमां यां ते वसिष्ठो अर्चति प्रशस्तिम् । इमा ब्रह्म सधमादे जुषस्व ॥ ता अस्य नमसा सहो रेवतीर्न० इमं मे वरुण० तत्त्वायामि० ॥ रदत्पथो वरुणः सूर्याय प्रार्णांसि समुद्रिया नदीनाम् । सर्गो न सृष्टो अर्वतीर्ऋतायश्चकार महीरवनीरहभ्यः ॥ प्र सम्राजे बृहदर्चा गभीरं ब्रह्म प्रियं वरुणाय श्रुताय । वि यो

जघान शमितेव चर्मोपस्तिरे पृथिवीं सूर्याय ॥ उपेमसृक्षि वाजयुर्वचस्यां चनो दधीत नाद्यो गिरो मे । अपां नपादाशुहेमा कुवित्स सुपेशसस्करोति जोषिषद्धि ॥ इमँ स्वस्मै हृद आ सुतष्टं मन्त्रं वोचेम कुविदस्य वेदत् । अपां नपादसुर्यस्य मह्ना विश्वान्यर्यो भुवना जजान ॥ आपोरेवतीः० ॥ आपः पृणीत भेषजं वरूथं तन्वे मम । ज्योक् च सूर्यं दृशे ॥

वेत्था हि वेधो अध्वनः पथश्च देवाञ्जसा । अग्ने यज्ञेषु सुक्रतो ॥ अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान् । युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेम ॥ आ तू न इन्द्र वृत्रहन्नस्माकमर्धमागहि । महान्महीभिरूतिभिः॥ त्वं महाँ इन्द्र तुभ्यँ ह क्षा अनु क्षत्रं मँहना मन्यत द्यौः । त्वं वृत्रँ शवसा जघन्वान्सृजः सिन्धूँरहिना जग्रसानान् ॥ ऋतावानं वैश्वानरम्० ॥ वैश्वानरस्य सुमतौ स्याम० ॥ अग्ने दा दाशुषे रयिं वीरवन्तं परीणसम् । शिशीहि नस्सूनुमतः ॥ त्वद्धि

पुत्र सहसो वि पूर्वीर्देवस्य यन्त्यूतयो वि वाजाः । त्वं देहि स-
हस्रिणं रयिं नोऽद्रोघेन वचसा सत्यमग्ने ॥ दीर्घस्ते अस्त्वङ्कुशो
येना वसु प्रयच्छसि । यजमानाय सुन्वते ॥ आ तू भर मा-
किरेतत्परिष्ठाद्विद्मा हि त्वा वसुपतिं वसूनाम् । इन्द्र यत्ते मा-
हिनं दत्रमस्त्यस्मभ्यं तद्धर्यश्व प्रयन्धि ॥ प्र तत्ते अद्य शिपिवि-
ष्ट नामार्यः शँसामि वयुनानि विद्वान् । तं त्वा गृणामि तव-
समतव्यान्क्षयन्तमस्य रजसः पराके ॥ वषट् ते विष्णव आस
आ कृणोमि तन्मे जुषस्व शिपिविष्ट हव्यम् । वर्धन्तु त्वा सु-
ष्टुतयो गिरो मे यूयं पात स्वस्तिभिस्सदा नः ॥ त्वामग्ने वा-
जसातमं विप्रा वर्धन्ति सुष्टुतम् । स नो रास्व सुवीर्यम् ॥
अयं नो अग्निर्वरिवः कृणोत्वयं मृधः पुर एतु प्रभिन्दन् । अयं
वाजं जयतु वाजसाता अयँ शत्रूञ्जयतु जर्हृषाणः ॥ त्वमग्ने व्र-
तपा असि० ॥ यद्वो वयम्० ॥

उदु त्वा विश्वे देवा अग्ने भरन्तु चित्तिभिः । स नो भव

शिवस्त्वं सुप्रतीको विभावसुः ॥ प्रेदग्ने ज्योतिष्मान्याहि शिवेभिरर्चिभिष्ट्वम् । बृहद्भिर्भानुभिर्भासन्मा हिंसीस्तन्वा प्रजाः ॥ अक्रन्ददग्निस्तनयन्निव द्यौः क्षामा रेरिहद्वीरुधस्समञ्जन् । सद्यो जज्ञानो वि हीमिद्धो अख्यदा रोदसी भानुना भात्यन्तः ॥ अन्नपते अन्नस्य नो देह्यनमीवस्य शुष्मिणः । प्र प्र दातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पदे ॥ समिधाग्निं दुवस्यत घृतैर्बोधयतातिथिम् । आस्मिन्हव्या जुहोतन ॥ प्र प्रायमग्निर्भरतस्य शृण्वे वि यत्सूर्यो न रोचते बृहद्भाः । अभि यः पूरुं पृतनासु तस्थौ दीदाय दैव्यो अतिथिश्शिवो नः ॥ आपो देवीः प्रतिगृह्णीत भस्मैतत्स्योने कृणुध्वं सुरभा उ लोके । तस्मै नमन्तां जनयस्सुपत्नीर्मातेव पुत्रं बिभृता स्वेनम् ॥ अप्स्वग्ने सधिष्टव सौषधीरनु रुध्यसे । गर्भे संजायसे पुनः ॥ गर्भो अस्योषधीनां गर्भो वनस्पतीनाम् । गर्भो विश्वस्य भूतस्याग्ने गर्भो अपामसि ॥ प्रसद्य भस्मना योनिमपश्च पृथिवीमग्ने । संसृज्य मातृभिष्ट्वं

ज्योतिष्मान्पुनरासदः ॥ पुनरासद्य सदनमपश्च पृथिवीमग्ने । शेषे मातुर्यथोपस्थेऽन्तरस्यां शिवतमः ॥ पुनरूर्जा० सह रय्या० ॥ बोधा मे अस्य वचसो यविष्ठ मंहिष्ठस्य प्रभृतस्य स्वधावः । निन्दति त्वो अनु त्वो गृणाति वन्दारुं ते तन्वं वन्दे अग्ने ॥ स बोधि सूरिर्मघवा वसुदावा वसुपतिः । युयोध्यस्मद् द्वेषांसि ॥

उरु विष्णो विक्रमस्वोरु क्षयाय नस्कृधि । घृतं घृतयोने पिब प्र प्र यज्ञपतिं तिर ॥ स्वाहात्यन्यानगां नान्यानुपागां याम्नाजुजोषं परि तानवृजमर्वाक्त्वा परेभ्योऽविदं परोऽवरेभ्यस्तं त्वा जुषामहे वनस्पते देवयज्यायै जुष्टं विष्णवे विष्णवे त्वा देवस्त्वा सविता मध्वानक्त्वोषधे त्रायस्वैनं स्वधिते मैनं हिंसीर्द्यां मा लेखीरन्तरिक्षं माहिंसीः पृथिव्या संभव ॥ वनस्पते शतवल्शो विरोह सहस्रवल्शा वि वयं रुहेम ॥ यं त्वायं स्वधितिस्तेतिजानः प्रणिनाय महते सौभगाय । अच्छिन्नरायं सुवीरः ॥

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ता-

भ्यामाददे इदमहं रक्षसो ग्रीवा अपिकृन्तामीदमहं यो नस्स-
मानो योऽसमानोऽरातीयति तस्य ग्रीवा अपिकृन्तामि पृथिव्यै
त्वान्तरिक्षाय त्वा दिवे त्वा शुन्धन्तां लोकाः पितृषदना यवो-
ऽसि यावयास्मद् द्वेषं यावयारातिं पितृषदनं त्वा लोकमास्तृ-
णामि स्वावेशोऽस्यग्रेगा नेतॄणां वनस्पतिस्त्वाधिष्ठास्यति तस्य
वित्ताद् घृतेन द्यावापृथिवी आपृणेथां देवस्त्वा सविता मध्वा-
नक्तु सुपिप्पला ओषधीस्कृधि द्यामग्रेणास्पृक्ष आन्तरिक्षं म-
ध्येनाप्राः पृथिवीमुपरेणादृंहीः ॥ ता वां वास्तून्युश्मसि गमध्यै
यत्र गावो भूरिशृङ्गा अयासः। अत्राह तदुरुगायस्य विष्णोः
परमं पदमवभाति भूरि ॥ विष्णोः कर्माणि पश्यत यतो व्रता-
नि पस्पृशे। इन्द्रस्य युज्यः सखा ॥ ब्रह्मवनिं त्वा क्षत्रवनिं दे-
ववनिं सजातवनिं रायस्पोषवनिं पर्यूहामि ब्रह्म दृंह क्षत्रं दृंह
प्रजां दृंह रायस्पोषं दृंह ॥ तद्विष्णोः परमं पदं सदा पश्यन्ति
सूरयः। दिवीव चक्षुराततम् ॥ परिवीरसि परि त्वा दैवीर्विशो

व्ययन्तां परीमं रायो मनुष्यमन्तरिक्षस्य सानूपेष द्यां ते धूमो गच्छत्वन्तरिक्षमर्चिः पृथिवीं भस्म स्वाहा ॥

पृथिवीं विष्णुर्व्यक्रंस्त गायत्रेण छन्दसा निर्भक्तो यं द्विष्मो ऽन्तरिक्षं विष्णुर्व्यक्रंस्त त्रैष्टुभेन छन्दसा निर्भक्तो यं द्विष्मो दिवं विष्णुर्व्यक्रंस्त जागतेन छन्दसा निर्भक्तो यं द्विष्मो दिशो विष्णुर्व्यक्रंस्तानुष्टुभेन छन्दसा निर्भक्तो यं द्विष्मो ऽगन्म स्वस्सं ज्योतिषाभूम सूर्यस्यावृतमन्वावर्त इदमहं योऽस्मान्द्वेष्टि यं च वयं द्विष्मस्तस्य प्राणं निवेष्टयामि तेजोऽसि तेजो मयि धेहि समहं प्रजया सं मया प्रजा समहं रायस्पोषेण सं मया रायस्पोषो ऽग्नेस्तेजसा तेजस्वी भूयासं वायोरायुषायुष्मान्भूयासं सूर्यस्य वर्चसा वर्चस्वी भूयासमिन्द्रस्येन्द्रियेणेन्द्रियावान्भूयासं धाता मे धाम्ना सुधां दधातु प्रजापतेः प्रजया प्रजावान्भूयासमग्ने गृहपते सुगृहपतिरहं त्वया गृहपतिना भूयासं सुगृहपतिर्मया त्वं गृहपतिना भूया अस्थूरि णौ गार्हपत्यं

दीदायच्छ्रुतं हिमाद्रावायू ॥

इति विष्णुबुधसूक्तानि भूदेवोपकृतये सदा भूयासुः ॥

ॐ

ॐनमो नारायणाय ॥

प्रायश्चित्तस्थानकम् ॥

श्रीनारायणमात्मरूपममलं ब्रह्मादिभिः संस्तुतं
शङ्खं चक्रगदाम्बुजानि दधतं दोर्भिश्चतुर्भिः सदा ।
लक्ष्म्या भूषितवामभागममले पद्मे निषण्णं महा-
पापानामभिसंहरन्तमनघं दोषापनुत्त्यै भजे ।

भद्रं कर्णेभिरिति चतसृभिः, स्योनाम इत्यच्छिद्रस्य भ्रुवो-मित्रावरुणयोरन्तेवासिनः, पंक्तिरयातयानेन्द्रक्रतुमिति, शक्तेर्वा-सिष्ठस्य, प्रायश्चित्तानि सर्वान्तीयानि शिशुशैशवयोः, प्रजापति-मनसीत्यादि मित्रोजनानित्यन्तं वैप्रुषः सन्ततीनां वसिष्ठपुत्राणां स्वर्गतानां वाग्वै सरस्वती विंशानुवाकौ प्रायश्चित्तेति वैतानि ह-वींषि पापविमोचनम् ॥ यजुः ॥ ॐ भद्रं कर्णेभिश्शृणुयाम देवा भद्रं पश्येमाक्षिभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः ॥ स्वस्ति न इन्द्रो वृद्धश्रवास्स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिस्स्वस्ति नो बृहस्पतिर्द-धातु ॥ पृषदश्वा मरुतः पृश्निमातरश्शुभं यावानो विदथेषु ज-ग्मयः । अग्निजिह्वा मनवस्सूरचक्षसो विश्वे मा देवा अवसाग-मन्निह ॥ शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरसं तनू-नाम् । पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषता-युर्गन्तोः ॥ प्रेद्धो अग्ने दीदिहि पुरो नोऽजस्रया सूर्म्या यविष्ठ।

त्वां शश्वन्त उपयन्ति वाजाः ॥ श्रुत्कर्णाय कवये वेद्याय वचोभिर्नाकमुपयामि शंसन् । यतो भयमभयन्त्वं नो अस्त्वग्ने देवानामव हेड इद्व ॥ अग्निं वो देवमग्निभिस्सजोषा यजिष्ठं दूतमध्वरे कृणुध्वम् । यो मर्त्येषु निध्रुविर्ऋतावा तपुर्मूर्धा घृतान्नः पावकः ॥ घृतप्रतीको घृतपृष्ठो अग्निर्घृताहवनो घृतमस्य धाम । घृतप्रुषो हरितस्त्वावहन्तु घृतं पिबन्यजताद्देव देवान् ॥ १ ॥

इमो अग्ने वीततमानि हव्याजस्रा वक्षि देवतातिमच्छ । प्रति न ईं सुरभीणि व्यन्तु ॥ सप्त ते अग्ने समिधः सप्त जिह्वाः सप्तर्षयः सप्त धाम प्रियाणि । सप्त होत्रा अनुविद्वान्सप्त योनीरापृणस्व घृतेन ॥ त्रयस्त्रिंशत्तन्तवो यान्वितन्वत इमं यज्ञं स्वधया ये ददन्ति । तेषां छिद्रं प्रतिदध्मो यदत्र स्वाहायं यज्ञो अप्येतु देवान् ॥ यन्मे मनसश्छिद्रं यद्वाचो यच्च मे हृदः । अयं देवो बृहस्पतिः सं तत्सिञ्चतु राधसा ॥ विश्वकर्मा हविरिदञ्जुषाणः सन्तानैर्यज्ञं समिमन्तनोतु । या व्युष्टा उषसो याश्च नि-

स्रुचस्ताः सन्दधातु हविषा घृतेन ॥ अग्निं युनज्मि शवसा घृतेन दिव्यं सुपर्णं वयसा बृहन्तम् । तेन वयं पतेम ब्रध्नस्य विष्टपं स्वो रुहाणा अधि नाक उत्तमे ॥ इन्धानास्त्वा शतं हिमा द्युमन्तः समिधीमहि । वयस्वन्तो वयस्विनं यशस्वन्तो यशस्विनम् । सुवीरासो अदाभ्यमग्ने सपत्नदम्भनम् ॥ अग्निर्न ईडित ईडितव्यैर्देवैः पार्थिवैः पातु वायुर्न ईडित ईडितव्यैर्देवैरन्तरिक्ष्यैः पातु सूर्यो न ईडित ईडितव्यैर्देवैर्दिव्यैः पातु विष्णुर्न ईडित ईडितव्यैर्देवैर्दिश्यैः पात्वग्निर्यजुर्भिः पूषा स्वगाकारैस्त इमं यज्ञमवन्तु ते मामवन्त्वनु व आरभेऽनु मारभध्वम् ॥ २ ॥

पृथिवि विभूवरि सिनीवाल्युरंध आचित्ते मनस्ते भुवो विवस्ते य ऊर्मिर्हविष्य इन्द्रियावांस्तं व ऋध्यासं सोमस्याज्यमसि हविषो हविर्ज्योतिषो ज्योतिर्विश्वेषां देवानां भागधेयीस्थ देववीतये वो गृह्णामि ॥ सं वस्सिञ्चतु मरुतस्सं पूषा सं धाता समिन्द्रस्सं बृहस्पतिः । सं वोऽयमग्निस्सिञ्चतु प्रजया च धनेन च ।

आयुष्मन्तं कृणोत मा ॥ मान्दा वशाश्शुन्ध्युवोऽजिरा उन्दती-
स्सुफेना ज्योतिष्मतीस्तमस्वतीर्मित्रभृतः क्षत्रभृतस्सुराष्ट्रा इह
मावत ॥ आपो देवीर्घृतमिदाप आसन्नग्नीषोमौ बिभ्रत्याप इत्ताः।
तीव्रो रसो मधुपृचामरंगम आ मा प्राणेन सह वर्चसागन् ॥
आदित्पश्याम्युत वा शृणोम्या मा घोषो गच्छति वाङ्म आ-
साम्। मेने भेजानो अमृतस्य तर्हि हिरण्यवर्णा अतृपं यदा वः॥
समन्या यन्त्युप यन्त्यन्यास्समानमूर्वं नद्यः पृणन्ति । तमू शुचिं
शुचयो दीदिवांसमपां नपातं परितस्थुरापः ॥ आपो हि ष्ठा म-
योभुवस्ता न ऊर्जे दधातन । महे रणाय चक्षसे ॥ यो वश्शिश-
वतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः ॥ तस्मा-
अरं गमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः॥
स ईं वृषा जनयंस्तासु गर्भं स ईं शिशुर्धयति तं रिहन्ति ।
सो अपां नपादूर्जयन्नप्स्वन्तर्वसुधेयाय विधते विभाति ॥ इह
गावः प्रजायध्वमिहाश्वा इह पूरुषाः । इहो सहस्रदक्षिणो राय-

स्पोषः प्रजायताम् ॥ अयं यज्ञो वर्धतां गोभिरश्वैरियं वेदिस्स्वपत्या सुवीरा । इदं बर्हिरति बर्हींष्यन्येमं यज्ञं विश्वे अवन्तु देवाः ॥ स आ दमे सुदुघा यस्य धेनुस्स्वधां पीपाय सुभ्वन्नमत्ति । सो अपां नपादनभिम्लातवर्णो ऽन्यस्येवेह तन्वा विवेष ॥३॥

स्कन्ना द्यौस्स्कन्ना पृथिवी स्कन्नं विश्वमिदं हविः । स्कन्नादो विश्वा भूतानि प्र स्कन्नं जायतां हविः ॥ इह गावः प्रजायध्वमिहाश्वा इह पूरुषाः । इहो सहस्रदक्षिणो रायस्पोषः प्रजायताम् ॥ अयं यज्ञो वर्धतां गोभिरश्वैरियं वेदिस्स्वपत्या सुवीरा । इदं बर्हिरति बर्हींष्यन्येमं यज्ञं विश्वे अवन्तु देवाः ॥ पयस्वतीराप ओषधयः पयस्वन्मामकं वचः । अपां पयस्वद्यत्पयस्तेन नस्सह वर्धताम् ॥ यदवामृत्तच्छकुनिर्मुखेन निर्ऋते तव । अग्निष्टत्सर्वं शुन्धतु हव्यवाड् घृतसूदनः ॥ यदवामृत्तच्छपान्मुखेन निर्ऋते तव । अग्निष्टत्सर्वं शुन्धतु हव्यवाड् घृतसूदनः ॥ भूतिर्दध्ना घृतेन वर्धतां यज्ञं यज्ञाय मुञ्चतु स्वाहा घृतेन वर्धतां भूतिर्मु-

श्चेमं यज्ञं मुञ्च यज्ञपतिमंहसः स्वाहा ॥ यास्ते अग्ने समिधो अप्स्वन्तर्वर्ष्मन्पृथिव्या उप सूर्ये याः । तास्ते गच्छन्त्वाहुतीर्घृतस्य देवाव्ये यजमानाय शर्म ॥ ४ ॥

यज्ञस्य हि स्थ ऋत्विजा इन्द्राग्नी कल्पना युवम् । हुताहुतस्य तृम्पतमहुतस्य हुतस्य च ॥ हुतस्य चाहुतस्य चाहुतस्य हुतस्य च । पीतापीतस्य सोमस्यास्य हव्यस्येन्द्राग्नी वीतं पिबतमागतम् ॥ मेमं यज्ञं तमो विदन्मर्त्विजो मो इमाः प्रजाः। मा यः सोमं पिबादिमं संसृष्टमुभयं कृतम् ॥ मा नो ध्वारिषुः पितरो मोत देवा मा नः सबन्धुरुत वान्यबन्धुः । मा नो दुश्शंसो अघशंस ईशताहुतो ऽयं यज्ञो अप्येतु देवान् ॥ सप्तर्त्विजस्सप्त सदांस्येषां दश क्षिपो अश्विना पञ्चवाजा। प्राणो व्यानो ऽपानो मन आकूतमग्निस्स्वाहा देवा हविरिदं जुषन्ताम् ॥ ५ ॥

आत्मा यज्ञस्य रंह्या सुष्वाणः पवते सुतः। प्रत्नानि पाति काव्यः ॥ गोषा इन्दो नृषा अस्यश्वसा वाजसा उत । आत्मा

यज्ञस्य पूर्व्यः ॥ आत्मन्वन्नभो दुह्यते घृतं पय ऋतस्य योनिरमृतं विजायते । समीचीनास्सुदानवः प्रीणन्ति तन्नरो हितमवमेहन्ति पेरवः ॥ देवा देवेषु श्रयन्तां प्रथमा द्वितीयेषु श्रयन्तां द्वितीयास्तृतीयेषु श्रयन्तां ये स्थ त्रय एकादशास्त्रयश्च त्रिंशच्च त्रयश्च त्री च शता च त्रयश्च त्री च सहस्रा त इमं यज्ञमवन्तु ते मामवन्त्वनु व आरभेऽनु मारभध्वम् ॥ ६ ॥

वसवस्त्वोदीरयन्तु रुद्रास्त्वोदीर्पयन्त्वादित्यास्त्वोच्छ्रयन्तु विश्वे त्वा देवा दृंहन्तु ॥ ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवं विश्वमिदं जगत् । देवा ह धर्मणा ध्रुवा यजमानः पशुभिर्ध्रुवः ॥ दिवि दिव्यान्दृंहान्तरिक्षेऽन्तरिक्ष्यान्दृंह पृथिव्यां पार्थिवान्दृंह ॥ आ त्वाहार्षमन्तरभूर्ध्रुवस्तिष्ठाविचाचलत् । विशस्त्वा सर्वा वाञ्छन्तु मा त्वद्यज्ञो अधिभ्रशत् ॥ ध्रुवं ध्रुवेण हविषा हविरव सोमं नयामसि । यथा नः इन्द्रः केवलीर्विशो बलिहृतस्करत् ॥ स्वाहा दिव आप्यायस्व स्वाहान्तरिक्षादाप्यायस्व स्वाहा पृथिव्या आप्याय-

स्वायुर्धा असि ध्रुवायुर्मे धेहि वयोधा असि ध्रुव वयो मे धेहि तनूपा असि ध्रुव तन्वं मे पाहि चक्षुष्पा असि ध्रुव चक्षुर्मे पाहि वर्चोधा असि ध्रुव वर्चो मे धेहि ॥ अध्वर्यो ऽयं यज्ञो अस्तु देवा ओषधीभ्यः पशुभ्यो मे धनाय । विश्वस्मै भूताय ध्रुवो अस्तु देवास्स पिन्वस्व घृतवद्देव यज्ञ ॥ इहैवैधि माप च्योष्ठाः पर्वत इवाविचाचलत् । इन्द्र इवेह ध्रुवस्तिष्ठेह यज्ञमु धारय ॥ इममिन्द्रो अदीधरद् ध्रुवं ध्रुवेण हविषा हविः । तस्मै सोमो अधिब्रुवत्तस्मा उ ब्रह्मणस्पतिः ॥ ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवासः पर्वता इमे । ध्रुवं विश्वमिदं जगद् ध्रुवो राजा विशामसि ॥ ७ ॥

असवे स्वाहा वसवे स्वाहा वसुधेयाय स्वाहा भूपतये स्वाहा भुवनपतये स्वाहा भूतानां पतये स्वाहा भूताय स्वाहा ॥ द्रप्सश्चस्कन्द पृथिवीमनु द्यामिमं च योनिमनु यश्च पूर्वः । समानं योनिमनु संचरन्तं द्रप्सं जुहोम्यनु सप्त होत्राः ॥ यस्ते द्रप्सस्स्कन्दति यस्ते अंशुर्बाहुच्युतो धिषणाया उपस्थे । अध्वर्यो-

र्वा परि वा यः पवित्रात्तत्ते जुहोमि मनसा वषट्कृतम् ॥ यो द्रप्सो अंशुः पतितः पृथिव्यां परिवापात्पुरोडाशात्करम्भात् । धानासोमान्मन्थिन इन्द्र शुक्रात्स्वाहाकृतमिन्द्राय तं जुहोमि ॥ यस्ते द्रप्सो मधुमां इन्द्रियावान्स्वाहाकृतः पुनरप्येति देवान् । अध्वर्योर्वा परि वा यः पवित्रात्तत्ते जुहोमि मनसा वषट्कृतम्॥ यस्ते द्रप्सस्स्कन्दति यस्ते अंशुरवश्च यः परो दिवः। अयं देवो बृहस्पतिस्सं तत्सिञ्चतु राधसा ॥ ८ ॥

विसृष्टधेनास्सलिला घृतश्च्युतो वसन्तो ग्रीष्मो मधुमन्ति वर्षाः । शरद्धेमन्त ऋतवो मयोभुव उदप्रुतो नभसी संवसन्ताम्॥ आ नः प्रजां जनयतु प्रजापतिर्धाता दधातु सुमनस्यमानः। संवत्सर ऋतुभिश्चाक्लृपानो मयि पुष्टिं पुष्टिपतिर्दधातु ॥ आ देवानामपि पन्थामगन्म यच्छक्नवाम तदनु प्रवोढुम्। अग्निर्विद्वान्स यजात्सेदु होता सो अध्वरान्स ऋतून्कल्पयाति ॥ त्वमग्ने व्रतपा असि देव आ मर्त्येष्वा। त्वं यज्ञेष्वीड्यः ॥ यद्वो वयं

प्रमिनाम व्रतानि विदुषां देवा अविदुष्टरासः । अग्निष्टद्विश्वमापृणाति विद्वान्येभिर्देवां ऋतुभिः कल्पयाति ॥ मधुश्च माधवश्च वासन्तिका ऋतू शुक्रश्च शुचिश्च ग्रैष्मा ऋतू नभश्च नभस्यश्च वार्षिका ऋतू इषश्चोर्जश्च शारदा ऋतू सहश्च सहस्यश्च हैमन्तिका ऋतू तपश्च तपस्यश्च शैशिरा ऋतू त इमं यज्ञमवन्तु ते मामवन्त्वनु व आरभे ऽनु मारभध्वम् ॥ ६ ॥

असवे स्वाहा वसवे स्वाहा विभवे स्वाहा विवस्वते स्वाहा शूषाय स्वाहा संसर्पाय स्वाहा मलिम्लुचाय स्वाहा गणश्रिये स्वाहा चन्द्राय स्वाहा ज्योतिषे स्वाहाभिभवे स्वाहाधिपतये स्वाहा दिवापतये स्वाहेन्द्रस्य ग्रहो ऽस्यगृहीतो ग्राह्यो देवानां पूरसि तां त्वा प्रविशामि तां त्वा प्रपद्ये सह गृहैस्सह प्रजया सह पशुभिस्सहर्त्विग्भिस्सह सदस्यैस्सह सोम्यैस्सह दक्षिणीयैस्सह यज्ञेन सह यज्ञपतिना ॥ इन्द्राग्नी परिधी मम वाता देव पुरा कृता तत्त्वेन्द्र ग्रह प्रपद्ये सगुस्साश्वस्सपूरुषस्सह यन्मे

ऽस्ति तेन ॥ अरिष्ट्या अव्यथ्यै संवेशायोपवेशाय गायत्र्यै छन्द-
सेऽभिभुवे स्वाहारिष्ट्या अव्यथ्यै संवेशायोपवेशाय त्रिष्टुभे
जगत्या अनुष्टुभे छन्दसे ऽभिभुवे स्वाहा ॥ १० ॥

द्यौश्च त्वा पृथिवी च श्रीणीतामहश्च त्वा रात्री च श्री-
णीतां वाक् च त्वा मनश्च श्रीणीतामापश्च त्वौषधयश्च श्रीण-
न्त्वृक् च त्वा साम च श्रीणीतां स्तोमश्च त्वा युजश्च श्रीणीतां
बृहच्च त्वा रथंतरं च श्रीणीतां यज्ञश्च त्वा दक्षिणा च श्रीणीतां
सूर्यश्च त्वा चन्द्रमाश्च श्रीणीतां दर्शश्च त्वा पूर्णमासश्च श्री-
णीतां ब्रह्म च त्वा क्षत्रं च श्रीणीतामर्कश्च त्वाश्वमेधश्च श्री-
णीतां श्रीतस्त्वं श्रीतो ऽहमिन्दुरिन्दुमवागंस्तस्य त इन्द इन्द्रि-
यावत इन्द्रपीतस्य सर्वगणस्सर्वगणस्योपहूत उपहूतस्य भक्षया-
मि ॥ ११ ॥ विश्वा अग्ने त्वया वयं धारा
उदन्या इव । अतिगाहेमहि द्विषः ॥ या देव्यष्टकास्यपसामप-
स्तमा स्वपा असि । तस्यै त एना हविषा विधेम त्वं यज्ञे वरु-

णस्त्वावया असि ॥ शुल्कर्णाय कवये वेद्याय वचोभिर्वाकमुपयामि शँसन् । यतो भयमभयं तन्नो अस्त्वग्ने देवानामव हेड इ-द्दव ॥ अनुमते ऽनुमन्यस्व न इदं यद्भेषजं कृणुमहे तनूषु । यन्नो तोकेषु तनुषु प्रजासु यन्नोष्वोषधीष्वप्सु ॥ १२ ॥

हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् । स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥ त-दित्पदं न विचिकेत विद्वान्यन्मृतः पुनरप्येति जीवान् । त्रिवृद् भुवनं यद्रथवृज्जीवो गर्भो न मृतस्स्वाहा ॥ आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम् । भवा वाजस्य सङ्गथे ॥ सं ते प-यांसि समुयन्तु वाजः सं वृष्ण्यान्यभिमातिषाहः । आप्यायमा-नो अमृताय सोम दिवि श्रवांस्युत्तमानि धिष्व ॥ आप्यायस्व मदिन्तम सोम विश्वेभिरंशुभिः । भवा नस्सुश्रवस्तमस्सखा वृधे ॥ १३ ॥ अप्स्वग्ने सधिष्टव सौषधीरनु रुध्यसे गर्भे संजायसे पुनः ॥ तपोऽप्स्वग्ने अन्तरां अमित्रान्तपा शंसम-

रुषः परस्य । तपो वसो चिकितानो अचित्तान्वि ते तिष्ठन्ता-
मजरा अयासः ॥ यो नस्सनुत्यो अभिदासदग्ने यो अन्तरो मि-
त्रमहो वनुष्यात् । तमजरेभिर्वृषभिस्तव स्वैस्तपा तपिष्ठ तपसा
तपस्वान् ॥ स स्मा कृणोतु केतुमा नक्तं चिद् दूर आ सते ।
पावको यद्वनस्पतीन्प्र स्मा मिनात्यजरः ॥ न हि ते अग्ने तन्वः
क्रूरमानाश मर्तः । कपिर्बभस्ति तेजनं स्वं जरायु गौरिव ॥ मेष
इव यदुप च वि च चर्वति यद्प्सरद्रूपरस्य खादति । शीर्ष्णा
शिरो वप्सा वप्स एजयन्नंशुं बभस्ति हरितेभिरासभिः ॥ सुपर्णा
वाचमक्रतोप द्यव्याखरे कृष्णा इषिरा अनर्तिषुः । न्यङ् निय-
न्त्युपरस्य निष्कृतं पुरू रेतो दधिरे सूर्यश्वितः (श्रितः) ॥१४॥

अग्निना तपोऽन्वाभवत्सूर्येण तेजो वायुना प्राणा इन्द्रेण
देवा यमेन पितरस्सरस्वत्या मनुष्यास्सप्तदशेन स्तोमा वामदे-
व्येन सामानि गायत्र्या छन्दांसि मण्या रूपाणि हिरण्येन व-
र्पांसि तिरश्चिराजिना सर्पा अजगरेणाप्सव्याश्श्येनेन पतत्रिणो

ऽयाग्रेणारण्याः पशवस्सुपर्णेन वयांस्यश्वत्थेन वनस्पतय ओदने-
नान्नानि यवेनौषधयो ऽश्ववृषेणैकशफाः पशवो वृषभेण गावो
वृष्णिनावयो बस्तेनाजाश्चन्द्रमसा नक्षत्राणि ब्राह्मणेन वाचो वा-
चा देवतास्त्रिया विराड् ग्राव्णा पर्वतास्समुद्रेणापोऽद्भिस्सत्यं
सत्येनर्तमृतेन तपस्तपसा परमेष्ठी परमेष्ठिना मृत्युर्मृत्युना प्र-
जाः प्रजाभिस्सगरस्तनूभिः प्रजापतिस्तैर्देवैरन्वाभूतिरनु च भू-
यासमति च भूयासं ब्राह्मणानां श्रेष्ठश्च भूयासम् ॥ १५ ॥

यस्य द्रोणकलश उपदस्यति कलशमेव तस्योपवायन्तं प्रा-
णो ऽनूपदस्यति प्राणो हि सोमस्तदाहुः पयो ऽवनयेदित्यथो
खल्वाहुरन्तर्हितमिव वा एतद्यत्पयो हिरण्यमेवापो ऽभ्यवनये-
द्धिरण्यमभ्युन्नयेदमृतं वा आप आयुर्हिरण्यममृतादेवाध्यायुरा-
त्मन्धत्ते चत्वारो वरा देया ब्रह्मण उद्गात्रे होत्रेऽध्वर्यव एते वै
यज्ञस्येन्द्रास्तानेव प्रीणाति सैव तत्र प्रायश्चित्तिर्यस्य चमस उ-
पदस्यति चमसमेव तस्योपवायन्तं प्राणो ऽनूपदस्यति प्राणो हि

सोमो यमध्वर्युरन्तमं ग्रहं गृह्णीयात्तस्य संपातमवनयेत्प्रायश्चित्यै वै सोमो गृह्यते प्रायश्चित्त्यैवास्मै प्रायश्चित्तिं करोति सर्वमायुरेति सैव तत्र प्रायश्चित्तिर्यस्य ग्रावापिशीर्यते पशुभिर्व्यृध्यते पशवो हि ग्रावाणो द्युतानस्य मारुतस्य ब्रह्मसामेन स्तुवीरन्पशवो वै द्युतानो मारुतस्स्वेनैवैनं साम्ना संदधाति पशुमान्भवति सैव तत्र प्रायश्चित्तिः प्रजापतये स्वाहेत्यभक्षणीयानुपरवेष्ववनयेत्प्राजापत्यो वै सोमः प्रतिष्ठामेवैनं गमयति सैव तत्र प्रायश्चित्तिर्यस्य सोममभिदहेद् ग्रहानध्वर्युस्स्पाशयेत स्तोत्राण्युद्गाता शस्त्राणि होताथ यथापूर्वं यज्ञेन चरेयुः पञ्च वरा देयाः पांक्तो यज्ञो यज्ञमेवावरुन्द्धे ऽवभृथं गत्वा पुनरुदेत्य पुरा द्वादश्याः पुनर्दीक्षेत यद् द्वादशीमतिनयेदन्तर्धीयेत तत्र ता दक्षिणा दद्याद्याः पूर्वस्मिन्दास्यन्भवति सैव तत्र प्रायश्चित्तिः ॥ १६ ॥

सर्वान्वा एषो ऽग्नौ कामान्प्रवेशयते यो ऽग्निमन्वाधाय व्रतमुपैति स यदनिष्ट्वा प्रयायादकामप्रीता एनं कामा नानु प्रया-

युरतेजा अवीर्यस्स्यात्स प्रयास्यञ्जुहुयात् ॥ तुभ्यं ता अंगिरस्तम विश्वास्सुक्षितयः पृथक् । अग्ने कामाय येमिरे ॥ इति कामानेवास्मिन्दधाति कामप्रीता एनं कामा अनु प्रयान्ति तेजस्वी वीर्यवान्भवति संततिर्वा एषा यज्ञस्य यो ऽग्निमन्वाधाय व्रतमुपैति स यदनिष्ट उद्वायाद्विच्छित्तिरेवास्य सा प्राञ्चमुद् धृत्य मनसोपतिष्ठेत मन इव वै प्रजापतिः प्राजापत्यो यज्ञो यज्ञमेव संतनोति भूरिति व्याहरेद् भूतो वै प्रजापतिर्भूतिमेवोपैत्यायुषा वा एष वीर्येण व्यृध्यते यस्याहिताग्नेरग्निरपक्षायति स यावच्छम्यया पराविध्येद्यदि तावदपक्षायेत्तं संभरेत् ॥ इदं त एकं पर ऊ त एकं तृतीयेन ज्योतिषा संविशस्व । संवेशनस्तन्वे चारुरेधि प्रियो देवानां परमे जनित्रे ॥ इति ब्रह्मणैवैनं संभरति सैव तत्र प्रायश्चित्तिर्यदि परस्तरामपक्षायेदनुप्रयाय वसेत्सैव तत्र प्रायश्चित्तिरोषधीर्वा एतस्य पयः पशून्प्रविशति यस्य हविषे ऽपाकृता वत्सा धयन्ति वायव्या यवागूं निर्वपेद्वायुर्वै पयसः

प्रदाता तमेव भागधेयेनोपधावति सो ऽस्मै पयः प्रयच्छत्यथोत्तरस्मै हविषे वत्सानपावर्तयेत्सैव तत्र प्रायश्चित्तिः ॥ १७ ॥

अर्धं वा एतस्य यज्ञस्य मीयते यस्य सायं दुग्धं हविरार्तिमार्छतीन्द्राय व्रीहीन्निरुप्योपवसेत्पयो वा ओषधयः पय एवारभ्योपवसति यत्प्रातस्स्यात्तच्छृतं कुर्युरैन्द्र इतरः पुरोडाशस्स्यात्पयो वा ओषधयः पयसैवास्मै पयः प्रदापयत्यथोत्तरस्मै हविषे वत्सानपावर्तयेत्सैव तत्र प्रायश्चित्तिरुभयान्वा एष देवान्भागधेयेन व्यर्धयति ये यजमानस्य सायं च प्रातश्च गृहमागच्छन्ति यस्य सायं प्रातर्दुग्धं हविरार्तिमार्छत्योदनं पञ्चशरावं निर्वपेदग्निदेवतानां प्रथमं यजेदग्निमुखा एव देवताः प्रीणात्यग्निं वा अन्वन्या देवता इन्द्रमन्यास्ता एवोभयीः प्रीणात्यथोत्तरस्मै हविषे वत्सानपावर्तयेत्सैव तत्र प्रायश्चित्तिर्यत्कीटावपन्नेन जुहुयादप्रजा अपशुर्यजमानस्स्याद्यदनायतने निनयेदनायतनस्स्यान्मध्यमेन पर्णेन द्यावापृथिव्ययर्चान्तः परिधि निनयेत् द्यावापृथिवी वै

यज्ञस्य प्रतिष्ठा प्रतिष्ठामेवैनं गमयति सैव तत्र प्रायश्चित्तिर्य-
त्प्रयाजेष्वनिष्टेषु प्राङङ्गारस्स्कन्देदध्वर्यवे च यजमानाय चार्कं
स्याद्यद्दक्षिणा ब्रह्मणे च यजमानाय चार्कं स्याद्यत्प्रत्यङ् होत्रे च
पत्न्यै चार्कं स्याद्यदुदङङ्ग्निधे च यजमानस्य च पशुभ्यो ऽर्कं
स्यात्तं प्रहरेत् ॥ सहस्रशृङ्गो वृषभो जातवेदास्तोमपृष्ठो घृतवा-
न्सुप्रतीकः । मा मा हासीन्नाधितो नेत्त्वा जहानि सहस्रपोषस्स
(– पोषं मे) गोपोषं च यच्छ ॥ इति ब्रह्मणैवैनं प्रहरति सैव
तत्र प्रायश्चित्तिरर्धं वा एतस्य यज्ञस्य मीयते यस्य व्रते ऽहन्प-
त्न्यनालम्बुका भवति तामपरुध्य यजेत सर्वेणैव यज्ञेन यजते
तामिष्ट्वोपह्वयेत ॥ सा त्वमस्यमो ऽहममो ऽहमस्मि सा त्वम् ।
ता एहि संरभावहै पुंसे पुत्राय कर्तवे । रायस्पोषाय सुप्रजा-
स्त्वाय सुवीर्याय ॥ इत्यर्ध एवैनामाभजति सैव तत्र प्रायश्चि-
त्तिः ॥ १८ ॥ यदवृष्टेन जुहुयादपरूपमस्या-
त्मञ्जायेत यत्प्रत्येयात्पापीयान्स्याद्यन्न जुहुयादार्तिमार्छेत् ॥ मित्रो

जनान्यातयति प्रजानन्मित्रो दाधार पृथिवीमुत द्याम् । मित्रः कृष्टीरनिमिषाभिचष्टे मित्राय हव्यं घृतवद्विधेम ॥ इति मैत्र्यर्चा समिधमाधाय होतव्यं मित्रो वै यज्ञस्य शान्तिर्मित्रेणैवैनच्छमयति तद् धुत्वाथान्यां दुग्ध्वा पुनर्होतव्यं सैव तत्र प्रायश्चित्तिर्यत्कीटावपन्नेन जुहुयादप्रजा अपशुर्यजमानस्स्याद्यन्न जुहुयादार्तिमार्छेत्प्राजापत्ययर्चा वल्मीकवपायामवनयेत्प्राजापत्यो वै वल्मीको यज्ञः प्रजापतिर्यज्ञ एव यज्ञं प्रतिष्ठापयति तद् धुत्वाथान्यां दुग्ध्वा पुनर्होतव्यं सैव तत्र प्रायश्चित्तिः ॥ यदि पूर्वस्यामाहुत्यां हुतायामुत्तराहुतिस्स्कन्देद् द्विपाद्भिः पशुभिर्यजमानो व्यृध्येत यदभिजुहुयाच्चतुष्पाद्भिः पशुभिर्यजमानो व्यृध्यते ॥ यत्र वेत्थ वनस्पते देवानां गुह्या नामानि । तत्र हव्यानि गामय ॥ इति वानस्पत्ययर्चा समिधमाधाय होतव्यं वनस्पतिर्नैवास्यार्तां चानार्तां चाहुती विदाधार तद् धुत्वाथान्यां दुग्ध्वा पुनर्होतव्यं सैव तत्र प्रायश्चित्तिः ॥ १९ ॥

देवाश्च वा असुराश्चास्मिंल्लोक आसन्स प्रजापतिरकामयत प- रासुरान्नुदेय प्रजास्सृजेयेति स एतानि चातुर्मास्यान्यपश्यत्स चातुर्मास्यैरेवासुरान्प्राणुदत चातुर्मास्यैः प्रजा असृजत य एवं विद्वांश्चातुर्मास्यैर्यजते परा भ्रातृव्यं नुदते प्र प्रजया प्र पशुभि- र्जायते ऽग्निष्टोमाद्वैश्वदेवं यज्ञक्रतुं निर्माय प्रजापतिः प्रजा असृ- जतोक्थ्याद्वरुणप्रघासान्यज्ञक्रतुं निर्माय प्रजा वरुणेनाग्राहयद- तिरात्रात्साकमेधान्यज्ञक्रतुं निर्मायेन्द्रो वृत्रमहन्वैश्वदेवेन वै सो ऽसुरान्प्राणुदत वैश्वदेवेन प्रजा असृजत ॥ सृष्टा वा अन्याः प्रजा आसन्नसृष्टा अन्या अथ प्रजापतिरकामयत प्रजास्सृजेयेति संव- त्सरो वै यज्ञो यज्ञः प्रजापतिस्स एते आत्मनो ऽधि पयसी निरमिमीतोधन्यं च वध्यं चाथैताभ्यो देवताभ्य एतानि हवींषि भागं निरवपत्तैः प्रजा असृजतर्तुभ्यो वै ताः प्रजाः प्राजायन्त- र्तव एतानि पञ्च हवींषि पञ्च ह्यृतवस्तत एव प्रजायते ऽग्निरेव प्रावापयत्सोमो रेतो ऽदधान्मिथुनं वा अग्निश्च सोमश्च सविता

प्रासुवत्संवत्सरो वै सविता द्वादश मासास्संवत्सरस्तस्माद् द्वादशकपालो ऽथो वैश्वदेवत्वायैव द्वादशकपाल उपांशु यजत्यनिरुक्तो हि संवत्सरस्सरस्वत्येव सृष्टासु वाचमदधात्पूषणं प्रतिष्ठामभ्यसृजन्त ॥ (आज्येन) ॥ वाग्वै सरस्वती पशवः पूषा मिथुनं वाक् च पशवश्च मध्यतो वै प्रजा विसृज्यन्ते ऽन्ततो मिथुनाद्विषूचीः प्रजायन्ते तदेतत्प्रजापतेरेवाधि मध्यतः प्रजा विसृज्यन्ते ऽथादो ऽन्ततो मिथुनादुभयतो विषूचीः प्रजायन्ते (तेजोसि) वार्त्रघ्नानि वा एतानि हवींष्यग्निना वा अनीकेनेन्द्रो वृत्रमहन्सोमेन राज्ञा सवित्रा प्रसूतस्सरस्वत्या चैत्र्यां पूषा वीर्यैरन्वतिष्ठत विजितिरेवैतानि हवींषि ॥ २० ॥

इति श्रीमद्यजुषि काठके चरकशाखायामोरिमिकायां
प्रायश्चित्तिर्नाम स्थानकं संपूर्णम् ॥

प्रायश्चित्तं पठेद्यो वै प्रातरुत्थाय मानवः ।
अश्वमेधसहस्राणां फलं सर्वशुभप्रदम् ॥
हुनेद्यो वै तथा मर्त्यो यज्ञे नैमित्तिके परम् ।
नित्ये पापाद्विनिर्मुक्तिर्याज्ञिकस्य द्विजस्य च ॥
तस्मात्पठेद्-धुनेन्मर्त्यो नित्ये नैमित्तिके तथा ।
अगम्यगमनादिभ्यो मुक्तो याति परं पदम् ॥

अनेन मंत्रहोमेन आत्मनो० भगवान् वासुदेवः प्रीयतां प्रीतो ऽस्तु ॥

विष्णुबुधसूक्तों में जो जो मंत्र संक्षिप्त दिखाये हैं, वह सारे पृष्ठसंख्या के अनुसार यहां पर संपूर्ण लिखे गये हैं ॥

(२० पृ०) आ नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतम् । मध्वा रजांसि सुक्रतू ॥ प्र बाहवा सिसृतं जीवसे न आ नो गव्यूतिमुक्षतं घृतेन । आ नो जने श्रवयतं युवाना श्रुतं मे मित्रावरुणा हवेमा ॥

(२१ पृ०) त्वं नो अग्ने वरुणस्य विद्वान्देवस्य हेळोऽव यासिसीष्ठाः। यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषांसि प्रमुमुग्ध्यस्मत् ॥ स त्वं नो अग्नेऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ । अव यक्ष्व नो वरुणं रराणो वीहि मृळीकं सुहवो न एधि ॥ शन्नो भवन्तु वाजिनो हवेषु देवताता मितद्रवस्वर्काः । जम्भयन्तो हि वृकं रक्षांसि सनेम्यस्मद्युयवन्नमीवाः ॥ वाजे वाजेऽवत वाजिनो नो धनेषु विप्रा अमृता ऋतज्ञाः । अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैः ॥ अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् । अपां रेतांसि जिन्वति ॥ अग्ने वाजस्य गोमत

ईशानः सहसो यहो । अग्ने धेहि जातवेदो महि श्रवः ॥ अग्ने त्री ते वाजिना त्री षधस्था तिस्रस्ते जिह्वा ऋतजात पूर्वीः । तिस्र उ ते तन्वो देववातास्ताभिर्नः पाहि गिरो अप्रयुच्छन् ॥ त्रीण्यायूंषि तव जातवेदस्तिस्र आजानीरुषसस्ते अग्ने । ताभिर्देवानामवो यक्षि विद्वानथा भव यजमानाय शं य्योः ॥

(२२ पृ०) ता अस्य नमसा सहस्सपर्यन्ति प्रचेतसः । व्रतान्यस्य सश्चिरे पुरूणि पूर्वचित्तये वस्वीरनु स्वराज्यम् ॥ रेवतीर्नस्सधमाद इन्द्रे सन्तु तुविवाजाः । क्षुमन्तो याभिर्मदेम ॥ इमं मे वरुण श्रुधी हवमद्या च मृळय । त्वामवस्युराचके ॥ तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः । अहेळमानो वरुणेह बोध्युरुशंस मा न आयुः प्र मोषीः ॥

(२३ पृ०) आपो रेवतीः क्षयथा हि वस्वः क्रतुं च भद्रं बिभृथामृतं च । रायश्च स्थ स्वपत्यस्य पत्नीस्सरस्वती तद् गृणते वयोधात् ॥ ऋतावानं वैश्वानरमृतस्य ज्योतिषस्पतिम् । अजस्रं घर्ममीमहे ॥ वैश्वानरस्य

सुमतौ स्याम राजा हि कं भुवनानामभि श्रीः । इतो जातो विश्वमिदं विचष्टे वैश्वानरो यतते सूर्येण ॥

(२४ पृ०) त्वमग्ने व्रतपा असि देव आ मर्त्येष्वा । त्वं यज्ञेष्वीड्यः ॥ यद्वो वयं प्रमिनाम व्रतानि विदुषां देवा अविदुष्टरासः । अग्निष्टद्विश्वमापृणाति विद्वान्येभिर्देवां ऋतुभिः कल्पयाति ॥

(२६ पृ०) पुनरूर्जा निवर्तस्व पुनरग्न इषायुषा । पुनर्नः पाह्यंहसः ॥ सह रय्या निवर्तस्वाग्ने पिन्वस्व धारया । विश्वप्स्न्या विश्वतस्परि ॥

* ओ३म् *

उद्यापनाद्युपयोगीनि विष्णुबुधसूक्तानि

श्रीमद्यजुषि काठके चरकशाखान्तर्गतं

प्रायश्चित्तस्थानकं चेत्येतद् द्वयमेव

राजकीयपाठशाला-भूतपूर्व-मुख्याध्यापक-

कक्षेत्युपाह्व-पण्डितनाथरामशास्त्रिसंस्कृतं

तदेतत्

पं० माधवराम-केशवरामाभ्यां

श्रीनगरान्तर्वर्ति-कोठीबागस्थित-

स्वकीय-मार्कण्टायल-मुद्रणालये

मुद्रितं प्रकाशितं च

भूदेव-मनस्तोषाय भूयात् ॥

विक्रम संवत् १९९७

काश्मीरीयत्रैवर्णोपयोगी लौगाक्षिमुनि-
प्रक्लृप्तः

नोनरग्रामपाठशालाध्यक्षेण
ज्योतिर्विदा
पण्डितकेशवभट्टकेन
संस्कृतः शोधितश्चायं प्रथमाधतो

वेदकल्पद्रुमः

मुम्बय्यां
निर्णयसागराख्ययंत्रालये अङ्कयित्वा
प्रकाशितः

सप्तर्षि सं० ४९९७, विक्रमीये १९७८.

परोपकाराय भूयात्

समिदन्नाज्यभागः १।

अथ ऋचकम्।

आदौ स्वस्त्ययनम्।

ॐश्रीगणेशाय नमः॥ ॐकारो यस्य मूलं क्रमपदजठरं छन्दविस्तीर्णशाखा ऋक्पत्रं सामपुष्पं यजुरुचिरफलं स्यादऽथर्वा प्रतिष्ठा। यज्ञच्छायासुशीतो द्विजगणमधुपैर्गीयते यस्य नित्यं शक्तिः सन्ध्या त्रिकालं दुरितभयहरः पातु नो वेदवृक्षः॥ १॥ सुच्छायः स्थिरधर्ममूलवलयः पुण्यालवालान्वितो धीविद्याकरुणाक्षमादिविलसद्विस्तीर्णशाखाश्रितः। सन्तोषोज्ज्वलपल्लवः शुचियशःपुष्पः सदा सत्फलः सर्वाशापरिपूरको विजयते श्रीवेदकल्पद्रुमः॥ २॥ मूलाधाराद्धुतवहकलामिश्रितं

भूर्भुवः स्वर्ब्रह्मस्थानात्परमगहनात्तत्सवितुर्वरेण्यम् । भर्गो देवः शशिकलमयी धीमहीत्येकरूपं धियो यो नः पिबतममृतं चोदयान्नः परं तत् ॥ ३ ॥ मुक्ताविद्रुमहेमनीलधवलच्छायैर्मुखैस्त्रीक्षणैर्युक्तामिन्दुनिबद्धरत्नमुकुटां तत्त्वात्मवर्णात्मिकाम् । गायत्रीं वरदाभयाङ्कुशकरां शूलं कपालं गुणं शङ्खं चक्रमथारविन्दयुगलं हस्तैर्वहन्तीं भजे ॥ ४ ॥ आयातु वरदा देवी त्र्यक्षरा ब्रह्मवादिनी । गायत्रि! छन्दसां मातर्ब्रह्मयोने! नमोस्तु ते ॥ ५ ॥ (ॐओजोसीति गायत्रीमावाह्य । देवानामार्षम् ॥) ओजोऽसि सहोसि बलमसि भ्राजोऽसि देवानां धामनामासि विश्वमसि विश्वायुः सर्वमसि सर्वायुरभिभूः ॐभूः ॐभुवः ॐस्वः ॐमहः ॐजनः ॐतपः ॐसत्यं ॐतत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥ ३ ॥ (स्वस्त्यात्रेयः पांक्त्यन्तमग्नेः पञ्चोनाश्चतस्रो गायत्र्यः षडुष्णिहस्तिस्रो जगत्योऽन्त्यानुष्टुभौ बृहती च ॥) स्वस्ति नो मिमीतामश्विना भगः स्वस्ति देव्यदितिरनर्वणः । स्वस्ति पूषा असुरो दधातु नः स्वस्ति द्यावापृथिवी सुचेतुना ॥१॥ स्वस्तये वायुमुपब्रवामहै सोमं स्वस्ति भुवनस्य यस्पतिः । बृहस्पतिं सर्वगणं स्वस्तये स्वस्तय आदित्यासो भवन्तु नः ॥२॥

विश्वेदेवा नो अद्या स्वस्तये वैश्वानरो वसुरग्निः स्वस्तये । देवा अवंत्वृभवः स्वस्तये स्वस्तिनो रुद्रः पात्वंहसः ॥ ३ ॥ स्वस्ति मित्रावरुणा स्वस्ति पथ्ये रेवति । स्वस्ति न इन्द्रश्चाग्निश्च स्वस्ति नो अदिते ! कृधि ॥ ४ ॥ स्वस्ति पन्थामनु चरेम सूर्याचन्द्रमसाविव । पुनर्ददता घ्नता जानता सङ्गमेमहि ॥ ५ ॥ स्वस्त्ययनं तार्क्ष्य-मरिष्टनेमिं महद्भूतं वायसं देवतानाम् । असुरघ्नमिन्द्रसखं समत्सु बृहद्यशो नावमिवारुहेम ॥ ६ ॥ अंहोमुचमाङ्गिरसं गयं च स्वस्त्यात्रेयं मनसा च तार्क्ष्यम् । प्रयतपाणिः शरणं प्रपद्ये स्वस्ति सम्बाधेष्वभयं नो अस्तु । कल्याणमस्तु ॥ ७ ॥ (इति कल्याणभद्रम् ॥) "(ॐअग्निर्वायुश्च सूर्यश्च वरुणः साम एव च । ब्रह्म राज्ञ रथश्चैवमष्टौ भद्राः प्रकीर्तिताः)" ॥ अग्नये समनमत्पृथिव्यै समनमद्यथाग्निः पृथिव्या समनमदेवं मह्यं भद्राः सन्नतयः संनमन्तु ॥ १ ॥ वायवे समनमद-न्तरिक्षाय समनमद्यथा वायुरन्तरिक्षेण समनमदे० ॥ २ ॥ सूर्याय समनमद्दिवे समनमद्यथा सूर्यो दिवा समनमदे० ॥ ३ ॥ वरुणाय समनमदऽद्भ्यः समनमद्यथा वरुणोद्भिः समनमदेव० ॥४॥ साम्ने समनमदृचे समनमद्यथा सामर्चा समनमदे०

॥५॥ ब्रह्मणे समनमत्क्षत्राय समनमद्यथा ब्रह्म क्षत्रेण समन० ॥६॥ राज्ञे समनमत् विशे समनमद्यथा राजा विशा समन० ॥७॥ रथाय समनमदश्वेभ्यः समनमद्यथा रथोऽश्वै० ॥ ८ ॥ (इति अग्निभद्रम् ॥) (कनिक्रदत्तृचं प्रदक्षिणिज्जागतं मध्येऽतिशक्वर्यष्टिर्वैताभ्यामृषिरध्वरे वाशमानं शकुन्तं तुष्टाव कुशिकस्त्वैषीरथिरिन्द्रतुल्यं पुत्रमिच्छंस्तपस्तेपे तस्येन्द्र इव गाधिपुत्रो जज्ञे गाथिनो विश्वामित्रः स तृतीयं मण्डलमपश्यत्) ॥ कनिक्रदज्जनुषं प्रब्रुवाण इयर्ति वाचमरितेव नावम् । सुमङ्गलश्च शकुने भवासि मा त्वा काचिदभिभा विश्व्या विदत् ॥ १ ॥ मा त्वा श्येन उद्वधीन्मा सुपर्णो मा त्वा विददिषुमान्वीरो अस्ता । पित्र्यामनु प्रदिशं कनिक्रदत्सुमङ्गलो भद्रवादी वदेह ॥ २ ॥ अव क्रन्दन्दक्षिणतो गृहाणां सुमङ्गलो भद्रवादी शकुन्ते । मा नः स्तेन ईशत माघशंसो बृहद्वदेम विदथे सुवीराः ॥३॥ ॐप्रदक्षिणिदभि गृणन्ति कारवो वयो वदन्त ऋतुथा शकुन्तयः । उभे वाचौ वदति सामगा इव गायत्रं च त्रैष्टुभं चानु राजति ॥ ४ ॥ उद्गातेव शकुने साम गायसि ब्रह्मपुत्र इव सवनेषु शंससि । वृषेव वाजी शिशुमतीरपीत्या सर्वतो नः शकुने भद्रमा वद विश्वतो नः शकुने

पुण्यमा वद ॥ ५ ॥ भद्रं वद दक्षिणतो भद्रमुत्तरतो वद । भद्रं पुरस्तान्नो वद भद्रं पश्चात्कपिञ्जल ॥ ६ ॥ भद्रं वद पुत्रैर्भद्रं वद गृहेषु च । भद्रमस्माकं वद भद्रं नो अभयं वद ॥ ७ ॥ भद्रमधस्तान्नो वद भद्रमुपरिष्टान्नो वद । भद्रं भद्रन्न आवद भद्रन्नः सर्वतो वद ॥ ८ ॥ असपत्नं पुरस्तान्नः शिवं दक्षिणतस्कृधि । अभयं सततं पश्चाद्भद्रमुत्तरतो गृहे ॥ ९ ॥ योऽवनानि महयसि जिग्युषामिव दुन्दुभिः । शकुन्तक प्रदक्षिणं शतपत्राऽभि नो वद ॥ १० ॥ आवदंस्त्वं शकुने भद्रमा वद तूष्णीमासीनः सुमतिं चिकिद्धि नः । यदुत्पतन्वदसि कर्करिर्यथा बृहद्वदेम विदथे सुवीराः ॥ ११ ॥ (इति कनिक्रदत्सूक्तं नाम, शकुनिभद्रम् ॥ ऐन्द्रवायव्ये द्यावापृथिव्यावन्त्यस्तृचो हविर्धाने वा तस्य तृतीयः पादो वाग्नेयोऽम्बितममानुष्टुभं बृहती च ॥) इन्द्रश्च मृळयाति नो न नः पश्चादघं नशत् । भद्रम्भवाति नः पुरः ॥ १ ॥ इन्द्र आशाभ्यस्परि सर्वाभ्यो अभयं करत् । जेता शत्रून्विचर्षणिः ॥ २ ॥ विश्वे देवास आगत शृणुता म इमं हवम् । एदं बर्हिर्निषीदत ॥ ३ ॥ तीव्रो वो मधुमाँ अयं शुनहोत्रेषु मत्सरः । एतं पिबत काम्यम् ॥ ४ ॥ इन्द्रज्येष्ठा मरुद्गणा देवासः पूषरातयः ।

विश्वे मम श्रुता हवम् ॥ ५ ॥ अम्बितमे नदीतमे देवितमे सरस्वति । अप्रशस्ता इव स्मसि प्रशस्तिमम्ब ! नस्कृधि ॥ ६ ॥ त्वे विश्वा सरस्वति श्रितायूंषि देव्याम् । शुनहोत्रेषु मत्स्व प्रजां देवि दिदिड्ढि नः ॥ ७ ॥ इमा ब्रह्म सरस्वति जुषस्व वाजिनीवति । या ते मन्म गृत्समदा ऋतावरि प्रियान्देवेषु जुह्वति ॥ ८ ॥ प्रेतां यज्ञस्य शम्भुवा युवामिदा वृणीमहे । अग्निं च हव्यवाहनम् ॥ ९ ॥ द्यावा नः पृथिवी इमं सिध्रमद्य दिविस्पृशम् । यज्ञं देवेषु यच्छताम् ॥ १० ॥ आ वामुपस्थमद्रुहा देवाः सीदन्तु यज्ञियाः । इहाद्य सोमपीतये ॥ ११ ॥ (इतीन्द्रभद्रम् ॥ आ नो दश वैश्वदेवन्तु द्वि त्रिष्टुबन्तं षष्ठी विराट्स्थाना) ॥ आ नो भद्राः क्रतवो यन्तु विश्वतोऽदब्धासो अपरीतास उद्भिदः । देवा नो यथा सदमिद्वृधे असन्नप्रायुवो रक्षितारो दिवे दिवे ॥ १ ॥ देवानां भद्रा सुमतिर्ऋजूयतां देवानां रातिरभि नो नि वर्तताम् । देवानां सख्यमुप सेदिमा वयं देवा न आयुः प्रतिरन्तु जीवसे ॥ २ ॥ तान्पूर्वया निविदा हूमहे वयं भगं मित्रमदितिं दक्षमस्रिधम् । अर्यमणं वरुणं सोममश्विना सरस्वती नः सुभगा मयस्करत् ॥ ३ ॥ तन्नो वातो मयोभु वातु भेषजं तन्माता

पृथिवी तत्पिता द्यौः । तद्ग्रावाणः सोमसुतो मयोभुवस्तदश्विना शृणुतं धिष्ण्या युवम् ॥ ४ ॥ तमीशानं जगतस्तस्थुषस्पतिं धियंजिन्वमवसे हूमहे वयम् । पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये ॥ ५ ॥ स्वस्ति न इन्द्रो वृद्ध-श्रवाः स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृह-स्पतिर्दधातु ॥ ६ ॥ पृषदश्वा मरुतः पृश्निमातरः शुभं यावानो विदथेषु जग्मयः । अग्निजिह्वा मनवः सूरचक्षसो विश्वे नो देवा अवसा गमन्निह ॥ ७ ॥ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेम देव-हितं यदायुः ॥ ८ ॥ शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम् । पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोः ॥ ९ ॥ अदितिर्द्यौ-रदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः । विश्वे देवा अदितिः पञ्च जना अ-दितिर्जातमदितिर्जनित्वम् ॥ १० ॥ (इत्यानो भद्रम् ॥) भद्रो नो अग्निः सुहवो विभावसुर्भद्र इन्द्रः पुरुहूतः पुरुष्टुतः । भद्रः सूर्य उरुचक्षा उरुव्यचा भद्रश्चन्द्रमाः समिथेषु जागृविः ॥ १ ॥ भद्रः प्रजा अजनयन्नः प्रजापतिर्भद्रः सोमः पावमानो

वृषा हरिः । भद्रस्त्वष्टा विदधद्रूपाण्यद्भुतो मिन्द्रो नो धाता वरिवस्यतु प्रजाः ॥२॥ भद्रस्तार्क्ष्यः सुप्रजास्त्वाय नो महानरिष्टनेमिः पृतना युधा जयन् । भद्रो वायुर्मातरिश्वा नियुत्पतिर्वेनो गयस्फान उशन्सदा स्तु नः ॥ ३ ॥ भद्रो मित्रो वरुणो रुद्र इद्वृधा भद्रोऽहिर्बुध्न्यो भुवनस्य रक्षिता । भद्रो नो वास्तोष्पतिरस्त्वमीवहा भद्रः क्षेत्रस्य पतिर्विचर्षणिः ॥ ४ ॥ भद्रो विभुर्विश्वकर्मा बृहस्पतिर्भद्रो द्विषस्तपनो ब्रह्मणस्पतिः । भद्रः सुपर्णो अरुणो मरुत्सखा भद्रो नो वातो अभिवातु भेषजीः ॥ ५ ॥ (व० १) भद्रो दधिक्रा वृषभः कनिक्रदद्भद्रः पर्जन्यो बहुधा विराजति । भद्रा सरस्वाँ उत नः सरस्वती भद्रो वशी भद्र इन्द्रः पुरूरवः ॥ ६ ॥ भद्रो नः पूषः सविता यमो भगो भद्रोऽग्रज एकपादऽर्यमा मनुः । भद्रो विष्णुरुरुगायो वृषा हरिर्भद्रो विवस्वाँ अभिवातु नस्त्मना ॥ ७ ॥ भद्रा गायत्री ककुबुष्णिहा विराड्भद्रानुष्टुब् बृहती पङ्क्तिरस्तु नः । भद्रा नस्त्रिष्टुब्जगती पुरुप्रिया भद्रातिच्छन्दा बहुधा विभूवरी ॥ ८ ॥ भद्रा नो राकानुमतिः कुहूः सुहृद्भद्रा सिनीवाल्यदितिर्मही ध्रुवा । भद्रा नो द्यौरन्तरिक्षं मयस्करं भद्रोशो दक्षस्तनयाय नस्तुजे ॥ ९ ॥

भद्रो नः प्राणः सुमनाः सुवागसद्भद्रो अपानः सतनोः सहात्मना। भद्रं चक्षुर्भद्र-
मिच्छ्रोत्रमस्तु नो भद्रं न आयुः शरदो भसच्छताम् ॥ १० ॥ (व० २) भद्रे-
न्द्राग्नी नो भवतामृतावृधा भद्रा नो मित्रा वरुणा धृतव्रता । भद्राश्विना नो भ-
वतां नवेदसा भद्रा द्यावापृथिवी विश्वशम्भुवा ॥ ११ ॥ भद्रा न इन्द्रावरुणा
रिशादसा भद्रा न इन्द्रा भवतां बृहस्पती। भद्रेन्द्राविष्णू सवनेष्वयावृधा भद्रेन्द्रा-
सोमा युधि दस्युहन्तमा ॥ १२ ॥ भद्राग्नाविष्णू विदथस्य प्रसाधना भद्रा नोऽग्नी-
न्द्रा वृषभा दिवस्पती। भद्रा नो अग्नीवरुणा प्रचेतसा भद्राग्नीषोमा भवता नवे-
दसा ॥ १३ ॥ भद्रा सूर्याचन्द्रमसा कविक्रतू भद्रा सोमा भवतां पूषणा नः।
भद्रेन्द्रवायू पृतनास्वसासही भद्रा सूर्याग्नी अजिता धनञ्जया ॥ १४ ॥ भद्रा नः
सन्तु वसवो वसुप्रजा भद्रा रुद्रावृत्रहणा पुरन्धरा। भद्रा आदित्याः सुपसः सुनी-
तयो भद्रा राजानो मरुतो विरप्शिनः ॥ १५ ॥ (व० ३) भद्रा न ऊमा सुहवाः
शतश्रियो विश्वेदेवा मनवश्चर्षणीधृतः। भद्राः साध्या अभिभवः सूरचक्षसो भद्रा
नः सन्त्वृभवो रत्नधातमाः ॥ १६ ॥ भद्राः सर्वे वाजिनो वाजसातयो भद्रा ऋषयः

पितरो गभस्तयः । भद्रा भृगवोऽङ्गिरसः सुदानवो भद्रा गन्धर्वाप्सरसः सुदंससः ॥ १७ ॥ भद्रा आपः शुचयो विश्वभृत्तमा भद्राः शिवा यक्ष्मनुदो न ओषधीः ॥ भद्रा गावः सुरभयो वयोवृधो भद्रा योषा उशतीर्देवपत्नयः ॥ १८ ॥ भद्राणि सामानि सदा भवन्तु नो भद्रा अथर्वाण ऋचो यजूँषि नः । भद्रा नक्षत्राणि शिवानि विश्वा भद्रा आशा अहुताः सन्तु नो हृदि ॥ १९ ॥ संवत्सरा न ऋतवो मयोभुवो यो वा आयुवाः सुसराण्युत क्षपाः । मुहूर्ताः काष्ठाः प्रदिशो दिशश्च सदा भद्राः सन्तु द्विपदे चतुष्पदे ॥ २० ॥ भद्रं पश्येम प्रचरेम भद्रं भद्रं वदेम शृणुयाम भद्रम् । तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः (व० ४ ॥ इत्यशीतिभद्रं । स्वस्त्ययनं समाप्तम् ॥) **अथ कलशस्थापनम् ॥** (कलशे पुष्पम्) ॥ आग्नेय्यौ द्वे देवीनामेकेन्द्राणी वरुणान्यग्नायीनां द्यावापृथिव्यौ पार्थिवी षड्वैष्णव्योऽतो देवा दैवी वा ॥) अभि नो देवीरवसा महः शर्मणा नृपत्नीः । अच्छिन्नपत्राः सचन्ताम् ॥ १ ॥ इहेन्द्राणीमुपह्वये वरुणानीं स्वस्तये । अग्नायीं सोमपीतये ॥ २ ॥ मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम् । पिपृतां नो

शरीमभिः ॥ ३ ॥ तयोरिद्घृतवत्पयो विप्रा रिहन्ति धीतिभिः । गन्धर्वस्य ध्रुवे पदे
॥ ४ ॥ स्योना पृथिवि भवानृक्षरा निवेशनी । यच्छा नः शर्म सप्रथः ॥ ५ ॥
(व० १) अतो देवा अवन्तु नो यतो विष्णुर्वि चक्रमे । पृथिव्याः सप्तधामभिः
॥ ६ ॥ इदं विष्णुर्वि चक्रमे त्रेधा निदधे पदम् । समूढमस्य पांसुरे ॥ ७ ॥ त्रीणि
पदा वि चक्रमे विष्णुर्गोपा अदाभ्यः । अतो धर्माणि धारयन् ॥८॥ विष्णोः कर्माणि
पश्यत यतो व्रतानि पस्पशे । इन्द्रस्य युज्यः सखा ॥९॥ तद्विष्णोः परमं पदं सदा
पश्यन्ति सूरयः । दिवीव चक्षुराततम् ॥ १० ॥ तद्विप्रासो विपन्यवो जागृवांसः
समिन्धते । विष्णोर्यत्परमं पदम् ॥ ११ ॥ (व० २ इति विष्णुभद्रम्) ॐभ्यायाम्यै
नमः ॐभुर्भुवः० ॥ ३ ॥ (क्षेत्रपाल्योरक्षतम् ॥) अश्वमेधे घोराणामार्षम्) द्रष्ट्रे नम
उपद्रष्ट्रे नमोऽनुद्रष्ट्रे नम ख्यात्रे नम उपख्यात्रे नमोऽनुख्यात्रे नमः शृण्वते नम
उपशृण्वते नमः सते नमोऽसते नमो जाताय नमो जनिष्यमाणाय नमो भूताय
नमो भविष्यते नमश्चक्षुषे नमः श्रोत्राय नमो मनसे नमो वाचे नमो ब्रह्मणे नमः
श्रान्ताय नमस्तपसे नमः ॥ भूतं भव्यं भविष्यद्वषट् स्वाहा नम ऋक्सामयजुर्वषट्

स्वाहा नमो गायत्री त्रिष्टुब्जगती वषट् स्वाहा नमः पृथिव्यन्तरिक्षं द्यौर्वषट् स्वाहा नमोऽन्नं कृषिर्वृष्टिर्वषट् स्वाहा नमः पिता पुत्रः पौत्रो वषट् स्वाहा नमः प्राणो व्यानोऽपानो वषट् स्वाहा नमो भूर्भुवःस्वर्वषट् स्वाहा नमः ॥ (कलशे पुजनम्) यो विश्वचक्षुरुत विश्वतो मुखो विश्वतो हस्त उत विश्वतस्पात् । सम्बाहुभ्यां धमति सम्पतत्रैर्द्यावापृथिवी जनयन्देव एकः ॥ ॐआ ब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतामस्मिन्राष्ट्रे राजन्य इषव्यः शूरो महारथो जायतां दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतां निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् ॥ (इषे त्वोर्जे त्वेति ब्रह्मणः सर्ववेदो ब्रह्मणः यजुः) इषे त्वोर्जे त्वा वायवः स्थोपायवः स्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे, आप्यायध्वमघ्न्या देवभागं प्रजावतीरनमीवा अयक्ष्मा मा वः स्तेन ईशत माघशंसः, परि वो रुद्रस्य हेतिर्वृणक्तु ध्रुवा अस्मिन्गोपतौ स्यात बह्वीर्यजमानस्य पशून्पाहि यजमानस्य पशुपा असि ॥, देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे, गोष-

कृसि प्रत्युष्टं रक्षः प्रत्युष्टारातिः प्रेयमगाद्धिषणा, बर्हिरच्छ मनुना कृता स्वधया वितष्टा उर्वन्तरिक्षं वीहीन्द्रस्य, परिषूतमसि माभो मोपरि पप्त ऋक्णा स मा च्छेता ते मा रिषत्, देवबर्हिः शतवल्शं विरोह सहस्रवल्शा वि वयं रुहेम, आदित्या रास्नासीन्द्राण्याः सन्नहनं पूषा ते ग्रन्थिं ग्रथ्नातु, स ते मा स्थादिन्द्रस्य त्वा बाहुभ्यामुद्यच्छे बृहस्पतेस्त्वा मूर्ध्ना हरामि, देवङ्गममसि तदाहरन्ति कवयः पुरस्ताद्देवेभ्यो जुष्टमिह बर्हिरासदे ॥ वसोः पवित्रमसि शतधारं वसूनां पवित्रमसि सहस्रधारमऽयक्ष्मा वः प्रजया संसृजामि रायस्पोषेण बहुला भवन्तीः, मधुमद्घृतवत्पिन्वमाना जीवा जीवन्तीरुप वः सदेम, मातरिश्वानो घर्मोऽसि द्यौरसि पृथिव्यसि विश्वधायाः परेण धाम्ना हुतासि मा ह्वाः सा विश्वायुः सा विश्वव्यचाः सा विश्वधायाः, हुतस्तोको हुतो द्रप्सोऽग्नये बृहते नाकाय स्वाहा, द्यावापृथिवीभ्यां सम्पृच्यध्वमृतावरी ऊर्मिणा मधुमत्तमा मान्द्रा धानस्य सातयः, इन्द्रस्य त्वा भागं सोमेनातनच्म्यदस्तमसि विष्णवे विष्णो हव्यं रक्षस्वापो जागृत ॥ महित्रीणामवोऽस्तु, द्युक्षं मित्रस्यार्यम्णः, दुराधर्षं वरुणस्य, नहि तेषाममा चन, नाध्वसु वारणेषु,

रिपुरघशंसः, यस्मै पुत्रासो अदितेः, प्रजीवसे मर्त्याय, ज्योतिर्यच्छन्त्यजस्रम्, सोमानं स्वरणं, कृणुहि ब्रह्मणस्पतिः, कक्षीवन्तं य औशिजः, यो रेवान्यो अमीवहा वसुवित्पुष्टिवर्धनः, स नः सिषक्तु यस्तुरः, मा नः शंसो अररुषो धूर्तिः प्रणङ्मर्त्यस्य । रक्षा णो ब्रह्मणस्पते ॥ (प्रणीतपात्रे पुष्पत्रयम्) । सं व्वः सृजामि हृदयं संसृष्टं मनो अस्तु वः । सं सृष्टास्तन्वः सन्तु वः संसृष्टः प्राणो अस्तु वः ॥ संय्यावः प्रियास्तन्वः संप्रिया हृदयानि वः । आत्मा वो अस्तु सं प्रियः सं प्रियास्तन्वो मम ॥ (तद्दिष्टरेण कलशे जीवाधानम्) अग्नेरायुरसि तस्य ते मनुष्या आयुष्कृतस्तेनास्मा अमुष्मा आयुर्धेहि ॥ १ ॥ इन्द्रस्य प्राणः स ते प्राणं ददातु यस्य प्राणस्तस्मै ते स्वाहा ॥ २ ॥ पितॄणां प्राणस्ते ते प्राणन्ददतु येषां प्राणस्तेभ्यो वः स्वाहा ॥ ३ ॥ मरुतां प्राणस्ते ते० ॥ ४ ॥ विश्वेषां देवानां प्राणस्ते ते० ॥ ५ ॥ प्रजापतेः परमेष्ठिनः प्राणस्तौ ते प्राणन्दत्तां ययोः प्राणस्ताभ्यां वां स्वाहा ॥ ६ ॥ यदऽसर्पस्तत्सर्पिरभवो यन्नवमैस्तन्नवनीतमभवो यदभ्रियथास्तद्घृतमभवः ॥ ७ ॥ घृतस्य धारामममृतस्य पन्थामिन्द्रेण दत्तं प्रयतं मरुद्भिः, तत्त्वा विष्णुरन्वपश्यत्तत्तेळा

गव्यैरयत् ॥ ८ ॥ पावमानेन त्वा स्तोमेन गायत्र्या वर्तन्या पाँशोर्वीर्येणोद्धराम्य-
सौ ॥ ९ ॥ बृहता त्वा रथन्तरेण त्रिष्टुभा वर्तन्या शुक्रस्य वीर्येणोत्सृजाम्यसौ
॥ १० ॥ अग्नेस्त्वा मात्रया जगत्या वर्तन्या देवस्त्वा सवितोन्नयतु जीवातवे जीव-
नस्यायासौ ॥ ११ ॥ देवा आयुष्मन्तस्तेऽमृतेनाऽयुष्मन्तस्तेषामयमायुषाऽयुष्मान-
स्त्वसौ ॥ १२ ॥ ब्रह्मायुष्मत्तद्ब्राह्मणैरायुष्मत्तस्यायमा० ॥ १३ ॥ अग्निरायुष्मान्स
वनस्पतिभिरायुष्माँस्तस्यायमा० ॥ १४ ॥ यज्ञ आयुष्मान्स दक्षिणाभिरायुष्माँस्त-
स्याय० ॥ १५ ॥ सोम आयुष्मान्स ओषधीभिरायुष्माँस्तस्या० ॥ १६ ॥ ओषधय
आयुष्मतीस्ता अद्भिरायुष्मतीस्तासामय० ॥ १७ ॥ इममग्ने आयुषे वर्चसे कृधि
तिग्ममोजो वरुण सं शिशाधि । मातेवास्मा अदिते शर्म यच्छ विश्वे देवा जरदष्टि-
र्यथा सत् ॥ १८ ॥ अश्विनोः प्राणस्तौ ते प्राणं दत्तां तेन जीव, मित्रावरुणयोः
प्राणस्तौ ते प्राणं दत्तां तेन जीव, बृहस्पतेः प्राणः स ते प्राणं ददातु तेन जीव
॥ १९ ॥ (मण्डपदिक्षु रक्षोघ्नमंत्रैस्तिलार्घक्षेपणं । पूर्वे ॥) ये देवाः पुरःसदोऽग्निनेत्रा
रक्षोहणस्ते नः पान्तु ते नोऽवन्तु तेभ्यः स्वाहा ॥ १ ॥ (दक्षिणे) ये देवा दक्षि-

णात्सदो यमनेत्रा रक्षोह० ॥ २ ॥ (पश्चिमे) ये देवाः पश्चात्सदो मरुन्नेत्रा र० ॥ ३ ॥ (उत्तरे) ये देवा उत्तरात्सदो मित्रावरुणनेत्रा रक्षो० ॥ ४ ॥ (ऊर्ध्वे) ये देवा उपरिषदः सोमनेत्रा अवस्वद्वन्तो रक्षोह० ॥ ५ ॥ (आग्नेये) इदमहं रक्षोभिः समूहाम्यग्ने सन्दह रक्षः सन्दग्धं रक्षोऽग्नये पुरःसदे रक्षोघ्ने स्वाहा ॥ ६ ॥ (नैर्ऋते) यमाय दक्षिणात्सदे रक्षोघ्ने स्वाहा ॥ ७ ॥ (वायवे) मरुद्भ्यः पश्चात्सद्भ्यो रक्षोहभ्यः स्वाहा ॥ ८ ॥ (ईशाने) मित्रावरुणाभ्यामुत्तरात्सद्भ्यां रक्षोहभ्यां स्वाहा ॥ ९ ॥ (अधः) सोमायोपरिषदे वस्वहते रक्षोघ्ने स्वाहा० ॥ १० ॥ (द्रव्यशुद्ध्यर्थं प्रणीतपात्रजलालोडनम्) रथः पञ्चवाही दक्षिणा ॥ (तद्विष्टरेण जलेशुद्धिः) आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन, महे रणाय चक्षसे ॥ यो वः शिवतमो रसस्तस्य भाजयते ह नः । उशतीरिव मातरः ॥ तस्मा अरङ्गमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ॥ (अर्घे) आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम् । भवा वाजस्य सङ्गथे (पुष्पे) पुष्पवतीः प्रसुमतीः फलिनीरफला उत । अश्वा इव सजित्वरीर्वीरुधः पारयिष्णवः (गन्धे) गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।

ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् (दर्भे) कर्मणे वां वानस्पत्यमसि प्रत्युष्टं रक्षः प्रत्युष्टारातिः उर्वन्तरिक्षं वीहि (धूपे) धूरसि धूर्व धूर्वन्तं योऽस्मान्धूर्वति तं धूर्वय वयं धूर्वामस्तं च धूर्व। देवानामसि वह्नितमं सस्नितमं पप्रितमं जुष्टतमं देवहूतमम् । विष्णोः क्रमोऽसि अहुतमसि हविर्धानं दृंहस्व मा ह्वार्मित्रस्य त्वा चक्षुषा प्रेक्षे उरु त्वा वाताय। वसवस्त्वा धूपयन्तु गायत्रेण छन्दसाङ्गिरस्वत्, रुद्रास्त्वा धूपयन्तु त्रैष्टुभेन छन्दसाङ्गिरस्वत्, आदित्यास्त्वा धूपयन्तु जागतेन छन्दसाङ्गिरस्वत्, विश्वे त्वा देवा वैश्वानरा धूपयन्त्वानुष्टुभेन छन्दसाङ्गिरस्वत्। इन्द्रस्त्वा धूपयतु, वरुणस्त्वा धूपयतु, विष्णुस्त्वा धूपयतु (सूर्ये) उद्वयं तमसस्परि ज्योतिष्पश्यन्त उत्तरम्। देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् (दीपे) तेजोऽसि शुक्रमसि ज्योतिरसि धामासि प्रियं देवानामनाधृष्टं देवयजनं देवताभ्यस्त्वा देवताभ्यो गृह्णामि यज्ञेभ्यस्त्वा-यज्ञेभ्योगृह्णामि (स्वललाटे तिलकं) अध्वर्योऽयं यज्ञो अस्तु देवा ओषधीभ्यः पशुभ्यो मे धनाय । विश्वस्मै भूताय ध्रुवो अस्तु देवाः प्र पिन्वस्व घृतवद्देव यज्ञ (अर्धपुष्पौ) इहैवैधि मापच्योष्ठाः पर्वता इवाविचाचलित्। इन्द्र इवेह ध्रुवस्तिष्ठेह यज्ञमुदारय

(स्वासने दर्भद्वयम्) इममिन्द्रो अदीधरद्ध्रुवं ध्रुवेण हविषा हविः । तस्मै सोमो अधि ब्रुवत्तस्मा उ ब्रह्मणस्पतिः (भूमौ आसनम्) ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवासः पर्वता इमे । ध्रुवं विश्वमिदं जगद्ध्रुवो राजा विशामसि (गन्धार्घपुष्पाणि) मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम् । पिपृतां नो भरीमभिः (आकाशे गन्धादि) बळित्था पर्वतानां खेत्रं बिभर्षि पृथिवि । प्रया भूमिं प्रवत्वति मह्ना जिनोषि महिनि (होमविषये अथ समिदाज्यभागः १) तत्रादौ समिद्विचारः ॥ (संक्रान्तौ रविवारे च जन्माहे पितृयज्ञके । प्रायश्चित्ते विष्णुश्राद्धे मातृकेष्टे न कारयेत् ॥१॥ अन्येषामेव होमानां समिदादौ विधीयते । समिद्विशीर्णा द्विदला वक्रा स्थूला कृशा द्विधा ॥ २ ॥ क्रिमिदुष्टा च दीर्घा च निस्त्वक्च परिवर्जयेत् । सक्षीरा नाधिकन्यूना समिद्ध सर्वकामदा ॥ ३ ॥ आर्द्र-त्वचा समिच्छेद्या तर्जन्यङ्गुलवर्तुला । ईदृशीं होमयेत्प्राज्ञः प्राप्नोति विपुलां श्रियम् ॥ ४ ॥ शतषट्कंप्रमाणेन समिधश्चाहरेद्बुधः । विना होमेन समिधां सर्वं भवति निष्फलम् ॥ ५ ॥ प्रथमं सर्वहोमानां समिद्धोमो विधीयते । स्वाहाकारं न कुर्वीत कर्म चात्र विलुप्यते ॥ ६ ॥ द्वादशाङ्गुलमानं तु समिधां प्रोदितं द्विजैः । होमकाले घृताक्ते तु द्वे द्वे च समिधौ हुनेत् ॥७॥

वैश्वानरं स्थितं ध्यायेत्समिद्धोमेषु देशिकः । शयानमाज्यहोमेषु निषण्णं शेषवस्तुषु ॥८॥) कलशस्थापने । श्रीर्देवशिल्पी स्कन्दश्च गणेशोप्यैशानतः क्रमात् । मध्ये वाणी च लक्ष्मीश्च पूज्या द्वार्देवता बुधैः ॥ वायवे महागणपतये गन्धादि) निषुसीद गणपते गणेषु त्वामाहुर्विप्रतमं कवीनाम् । न ऋते त्वत्क्रियते किञ्चनारे महामर्कं मघवञ्चित्रमर्च (नैरृते कुमाराय) कुमारं माता युवतिः समुब्धं गुहा बिभर्ति न ददाति पित्रे । अनीकमस्य न मिमजनासः पुरा पश्यन्ति निहितमरतौ (ईशान्ये श्रियै) अश्वपूर्वां रथमध्यां हस्तिनादप्रमोदिनीम् । श्रियं देवीमुपह्वये श्रीर्मा देवी जुषताम्! (मध्ये सरस्वत्यै) इयं शुष्मेभिर्बिसखा इवारुजत्सानु गिरीणां तविषेभिरूर्मिभिः । पारावतघ्नीमवसे सुवृक्तिभिः सरस्वतीमा विवासेम धीतिभिः (मध्ये लक्ष्म्यै च) कांस्यस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम् । पद्मे स्थितां पद्मवर्णां तामिहोपह्वये श्रियम् (आग्नेयें विश्वकर्मणे) विश्वकर्मा विश्वदेवो विश्वजिद्विश्वदर्शितः । ते त्वा घृतस्य धारया अष्टधाय समसूषत (अष्टदलस्थकुम्भे) ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणाम् । श्येनो गृध्राणां स्वधितिर्वनानां सोमः पवित्रमत्येति रेभन् ॥ १ ॥ अ

प्र तद्विष्णुः स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः । यस्योरुषु त्रिषु विक्रमणे-
ष्वधिक्षियन्ति भुवनानि विश्वा ॥ २ ॥ यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो
वनस्पतिषु । यो रुद्रो विश्वा भुवना विवेश तस्मै रुद्राय नमो अस्तु देवाः ॥ ३ ॥
अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्, होतारं रत्नधातमम् ॥१॥ इषे त्वोर्जे त्वा
वायवः स्थो पायवः स्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे ॥ २ ॥ अग्न
आ याहि वीतये गृणानो हव्यदातये । निहोता सत्सि बर्हिषि ॥ ३ ॥ शन्नो देवी-
रभीष्टय आपो भवन्तु पीतये । शंयोरभि स्रवन्तु नः ॥ ४ ॥ आहं पितॄन् सुविदत्राँ
अवित्सि नपातं च विक्रमणं च विष्णोः । बर्हिषदो ये स्वधया सुतस्य भजन्त
पित्वस्त इहागमिष्ठाः ॥५॥ वषट् ते विष्णवास आ कृणोमि तन्मे जुषस्व शिपिविष्ट
हव्यम् । वर्धन्तु त्वा सुष्टुतयो गिरो ये यूयं पात स्वस्तिभिः सदा नः ॥ ६ ॥ (स्वे-
ष्टदेवप्रधानानि ॥) तद्विष्णोः परमं० । वासुदेवाय नमः ॥ ७ ॥ यो रुद्रो अग्नौ०
भवाय देवाय नमः ॥ ८ ॥ गणानां त्वा ग० । विनायकाय नमः ॥ ८ ॥ चित्रं
देवानां० ह्रां ह्रीं सः सूर्याय नमः ॥ ८ ॥ जातवेदसे० अग्नये नमः ॥ ८ ॥ व्रत

इन्द्रं भयामहे० अभयङ्करीदेव्यै नमः। पूर्वादितो दिक्पालानां गन्धादि। ग्रहाणां स्थापनं
कुर्याद्दिक्पालानां च वै क्रमात्। जातीफलैरक्षोटैर्वा पद्मबीजैस्तथापि वा । द्वौ द्वौ फलौ
ग्रहाणां वै ह्येकमेकं दिशाभुजाम् ॥ इन्द्रापर्वता बृहता रथेन वामीरिष आवहतं सु-
वीराः । वीतं हव्यान्यध्वरेषु देवा वर्धेथां गीर्भिरिळया मदन्ताम् ॥ १ ॥ अग्निः
सप्तिं वाजम्भरं ददात्यग्निर्वीरं श्रुत्यं कर्मनिष्ठाम् । अग्नी रोदसी विचरत्समञ्जन्नग्नि-
र्नारीं वीरकुक्षिं पुरन्धिम् ॥ २ ॥ यमो दाधार पृथिवीं यमो द्यामुत सूर्यम् । यमाय
सर्वमित्तस्थे यत्प्राणद्वायुरक्षितम् ॥ ३ ॥ यं ते देवी निर्ऋतिराबबन्ध पाशं ग्रीवा-
स्वविचर्त्यम् । तन्ते विष्याम्यायुषो नु मध्येथा विपितः पित्तमद्धि प्रसूतः ॥ ४ ॥
उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय । अथा वयमादित्य व्रते तवा-
नागसो अदितये स्याम ॥ ५ ॥ वायवायाहि दर्शतेमे सोमा अरंकृताः । तेषां
पाहि श्रुधी हवम् ॥ ६ ॥ सोमो धेनुं सोमो अर्वन्तमाशुं सोमो वीरं कर्मण्यं द-
दाति । सादन्यं विदथ्यं सभेयं पितृश्रवणं यो ददाशदस्मै ॥ राजाधिराजाय प्रसह्य
साहिने नमो वयं वैश्रवणाय कुर्महे । स मे कामान्कामकामाय मह्यं कामेश्वरो

वैश्रवणो ददातु । कुबेराय वैश्रवणाय महाराजाय वै नमो नमः ॥ ७ ॥ ईशानं
त्वा शुश्रुमा वयं धनानां धनंपते गोमदग्ने अश्ववद्भूरिपुष्टं हिरण्यवदन्नवद्देहि मह्यम्॥
सुहास्ते द्यौः पृथिवी पयो अजगरस्त्वा सोदको विसर्पतु । प्रजापतिनात्मानमाप्रीणे-
ऽरिक्तो म आत्मा ॥ यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो वनस्पतिषु । यो
रुद्रो विश्वा भुवना विवेश तस्मै रुद्राय नमो अस्तु देवाः ॥ ८ ॥ ब्रह्म जज्ञानं प्रथमं
पुरस्ताद्वि सीमतः सुरुचो वेन आवः । स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिम-
सतश्च विवः ॥९॥ वषट्ते विष्णवास आ कृणोमि तन्मे जुषस्व शिपिविष्ट हव्यम् ।
वर्धन्तु त्वा सुष्टुतयो गिरो मे यूयं पात स्वस्तिभिः सदा नः ॥१०॥ (कल्पे) नमो
अस्तु सर्पेभ्यो ये के च पृथिव्यामधि । ये अन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः
॥ १ ॥ येषु वा यातुधाना ये वा वनस्पतीरनु । येऽवटेषु शेरते तेभ्यः० २ ये वादो
रोचने दिवो ये वा सूर्यस्य रश्मिषु । येऽप्सु सदांसि चक्रिरे तेभ्यः स० ३ धन्वना
गा धन्वनाजिं जयेम धन्वना तीव्राः समदो जयेम। धनुः शत्रोरपकामं कृणोति ध-
न्वना सर्वाः प्रदिशो जयेम (मध्ये चक्रन्विमस्याक्षोटयोः) अग्निस्तु विश्ववक्षसं तुविब्रह्माण-

सुत्तमम् । अतूर्तं श्रावयत्पतिं पुत्रं ददाति दाशुषे १ आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च । हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ।२। (अन्तराग्नेय्यां चक्रस्याक्षोटयोः) एवा वन्दस्व वरुणं बृहन्तं नमस्या धीरममृतस्य गोपाम् । स नः शर्म त्रिवरूथं वियंसत्पातं नो द्यावापृथिवी उपस्थे ।१। या ते धामानि दिवि या पृथिव्यां या पर्वतेष्वोषधीष्वप्सु । तेभिर्नो विश्वैः सुमना अहेळन्राजन्सोम प्रति हव्या गृभाय २ (दक्षिणे चतुष्कोणस्थयोः) तँ युवां देवावश्विनौ कुमारं साहदेव्यम्, दीर्घायुषं कृणोतन ।१। अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम्, अपां रेतांसि जिन्वति २ (ईशाने त्रिकोणस्थयोः) वषट् ते विष्णवास आ कृणोमि तन्मे जुषस्व शिपिविष्ट हव्यम् । वर्धन्तु त्वा सुष्टुतयो गिरो मे यूयं पात स्वस्तिभिः सदा नः । बोधास्व मे मघवन्वाचमेमां यां ते वसिष्ठो अर्चति प्रशस्तिम्, इमा ब्रह्म सधमादे जुषस्व १ । उत्तरे त्रिकोणस्थयोः । त्रातारमिन्द्रमवितारमिन्द्रँ हवे हवे सुहवं शूरमिन्द्रम् । ह्वयामि शक्रं पुरुहूतमिन्द्रं स्वस्ति नो मघवा धात्विन्द्रः ।१। बृहस्पते अति यदर्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु । यद्दीदयच्छवसर्तप्रजात तदस्मासु द्रविणं

दिवि चित्रम् २ । पूर्वे चतुष्कोणस्थयोः । सरस्वतीं देवयन्तो हवन्ते सरस्वतीमध्वरे तायमाने । सरस्वतीं सुकृतो अह्वयन्ते सरस्वती दाशुषे वार्यं धात् ।१। अन्नात्परिस्रुतो रसं ब्रह्मणा व्यपिबत्क्षत्रम् । ऋतेन सत्यमिन्द्रियं विपानं शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु २ । पश्चिमे जालस्थयोः । प्रजापते न हि त्वदन्य एता विश्वा जातानि परिता बभूव । यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम् ।१। शन्नो देवीरभिष्टये आपो भवन्तु पीतये, शं योरभि स्रवन्तु नः २ । नैर्ऋते मकाकारस्थयोः । गणानां त्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमम् । ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिः सीद सादनम् ।१। कया नश्चित्र आभुवदूती सदा वृधः सखा, कया शचिष्ठया वृता २ । वायवे ध्वजस्थयोः । आ वो राजानमध्वरस्य रुद्रं होतारं देवयजं रोदस्योः । अग्निं पुरा तनयित्नोरचित्ताद्धिरण्यरूपमवसे कृणुध्वम् ।१। केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे, समुषद्भिरजायथाः २ । उत्तरे पक्षिस्थयोः । को अद्य युङ्क्ते धुरि गा ऋतस्य शिमीवतो भामिनो दुर्हृणायून् । आसन्निषून्हृत्स्वसो मयोभून्य एषां भृत्यामृणधत्स जीवात् ।१। ध्रुवा द्यौर्ध्रुवा पृथिवी०

२ । दक्षिणे कुम्भस्थयोः । आदित्यं गर्भं पयसा समञ्जन्सहस्रस्य प्रतिमाँ विश्वरूपम् । परिवृङ्धि हरसा माभिमंस्थाः शतायुषं कृणुहि चीयमानः । अगस्त्यः खनमानः खनित्रैः प्रजामपत्यं बलमिच्छमानः । उभौ वर्णावृषिरुग्रः पुपोष सत्या देवेष्वाशिषो जगाम २ । कलशे । अमीवहा वास्तोष्पते विश्वा रूपाण्याविशन्, सखा सुशेव एधि नः । वास्तोष्पते प्रति जानीह्यस्मान्स्वावेशो अनमीवो भवा नः । यत्त्वेमहे प्रति तन्नो जुषस्व शं नो भव द्विपदे शं चतुष्पदे २ वास्तोष्पते प्रतरणो न एधि गयस्फानो गोभिरश्वेभिरिन्दो । अजरासस्ते सख्ये स्याम पितेव पुत्रान्प्रति नो जुषस्व १ वास्तोष्पते शग्मया शंसदा ते सक्षीमहि रण्वया गातुमत्या । पाहि क्षेम उत योगे वरं नो यूयं पात स्वस्तिभिः सदा नः । क्षेत्रपालयोः । क्षेत्रस्य पतिना वयं हितेनेव जयामसि । गामश्वं पोषयित्वा स नो मृळाती दृशे । क्षेत्रस्य पते मधुमन्तमूर्मिं धेनुरिव पयो अस्मासु धुक्ष्व । मधुश्चुतं घृतमिव सु पूतमृतस्य नः पतयो मृळयन्तु २ मधुमतीरोषधीर्द्याव आपो मधुमन्नो भवत्वन्तरिक्षम् । क्षेत्रस्य पतिर्मधुमान्नो अस्त्वरिष्यन्तो अन्वेनं चरेम १ भूतो भूतेषु चरति प्रविष्टः स भूतानामधिपतिर्ब-

बभूव । तस्य मृत्युश्चरति राजसूयं स राजा राज्यमनुमन्यतामिदम् ॥ ४ ॥ उर्वीरोदसी वरिवः कृणोतु क्षेत्रस्य पत्नीरधिनोवचतं नः । तौ मे द्यावापृथिवी नाथितो जोहवीमि तेनो मुञ्चतमंहसः ॥ ५ ॥ यो ह वै देवान्साध्यान्वेद सिध्यत्यस्मादेमिमावलोकाः । देवाः साध्याः सिद्धं ह्यस्मै सिद्धमस्मै सिद्धममुष्मै य एवं वेद सिद्ध्यत्यस्मै ॥ ६ ॥ (कलशे सर्वदेवस्थापनम्) यो विश्वचक्षुरुत विश्वतो मुखो विश्वतो हस्त उत विश्वतस्पात् । संबाहुभ्यां नमते संपतत्रैर्द्यावापृथिवी जनयन्देव एकः ॥ १ ॥ यस्य व्रतमुप तिष्ठन्त आपो यस्य व्रते पशवो यन्ति सर्वे । यस्य व्रते पुष्टिपतिर्निविष्टस्तं सरस्वन्तमवसे जोहवीमि ॥ २ ॥ गौरीर्मिमाय सलिलानि तक्षत्येकपदी द्विपदी सा चतुष्पदी । अष्टापदी नवपदी बभूवुषी सहस्राक्षरा परमे व्योमन् ॥ ३ ॥ दिव्यं सुपर्णं वायसं बृहन्तमपां गर्भं दर्शतमोषधीनाम् । अभीपतो वृष्टिभिस्तर्पयन्तं सरस्वन्तमवसे जोहवीमि ॥ ४ ॥ सरस्वतीं देवयन्तो हवन्ते सरस्वतीमध्वरे तायमाने । सरस्वतीं सुकृतो आह्वयन्ते सरस्वती दाशुषे वार्यं धात् ॥ ५ ॥ सरस्वत्यभि नो नेषि वस्योमा पस्फरी पयसः मा न आ धक् । जुषस्व नः सख्या वेश्या च मा

त्वत्क्षेत्राण्यरणानि गन्म ॥ ६ ॥ पावका नः सरस्वती वाजेभिर्वाजिनीवती, यज्ञं वष्टु धियावसुः ॥ ७ ॥ चोदयित्री सूनृतानां चेतन्ती सुमतीनाम्, यज्ञं दधे सरस्वती ॥ ८ ॥ महो अर्णः सरस्वती प्रचेतयति केतुना, धियो विश्वा विराजति ॥ ९ ॥ जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः । स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः ॥ १० ॥ त्र्यम्बकं यजामहे सुगन्धिं रयिं पोषणम् । उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ॥ ११ ॥ यत इन्द्र भयावहे ततो नो अभयं कृधि । मघवञ्छग्धि तव तन्न ऊतिभिर्वि द्विषो वि मृधो जहि ॥ १२ ॥ ये देवा दिव्येकादश स्थ पृथिव्यामध्येकादश स्थ । अप्सुषदो महिनैकादश स्थ ते देवासो यज्ञमिमं जुषध्वम् ॥ १३ ॥ स सुष्टुभा स ऋक्वता गणेन बलं रुरोज बलिगं रवेण । बृहस्पतिरुस्रिया हव्यसूदः कनिक्रदद्वावशतीरुदाजत् ॥ १४ ॥ एवा पित्रे विश्वदेवाय वृष्णे यज्ञैर्विधेम नमसा हविर्भिः । बृहस्पते सुप्रजा वीरवन्तो वयं स्याम पतयो रयीणाम् ॥ १५ ॥ ये के च ज्मा महिनो अहिमाया दिवो जज्ञिरे अपां सधस्थे । ते अस्मभ्यमिषये विश्वमायुः क्षप उस्रा

वरिवस्यन्तु देवाः ॥ १६ ॥ रक्षोहणं वाजिनमाजिघर्मि मित्रं प्रथिष्ठमुप यामि शर्म ।
शिशानो अग्निः क्रतुभिः समिद्धः स नो दिवा स रिषः पातु नक्तम् ॥ १७ ॥ प्रत्यग्ने
हरसा हरः शृणीहि विश्वतः प्रति । यातुधानस्य रक्षसो बलं वि रुज वीर्यम् ॥ १८ ॥
अन्विदनुमते त्वं मन्यासै शं च नस्कृधि । इषं तोकाय नो दधः प्राण आयूंषि ता-
रिषः ॥ १९ ॥ यत्ते नाम सुहवं सु प्रणीतेऽनुमतेऽनुमतं सदा नु । तेन त्वं सुम-
तिर्देव्यस्मे इषं पिन्व विश्ववारां सुवीराम् ॥ २० ॥ राकामहं सुहवां सुष्टुती हुवे
शृणोतु नः सुभगा बोधतु त्मना । सीव्यत्वपः सूच्याच्छिद्यमानया ददातु वीरं
शतदायमुक्थ्यम् ॥ २१ ॥ यास्ते राके सुमतयः सुपेशसो याभिर्ददासि दाशुषे
वसूनि । ताभिर्नो अद्य सुमना उपागहि सहस्रपोषं सुभगे रराणा ॥ २२ ॥ सिनी-
वालि पृथुष्टुके या देवानामसि स्वसा । जुषस्व हव्यमाहुतं प्रजां देवि दिदिड्ढि नः
॥ २३ ॥ या सुबाहुः स्वङ्गुरिः सुषूमा बहुसूवरी । तस्यै विश्पत्न्यै हविः सिनीवाल्यै
जुहोतन ॥ २४ ॥ या गुङ्गूर्या सिनीवाली या राका या सरस्वती । इन्द्राणीमह्व ऊ-
तये वरुणानीं स्वस्तये ॥ २५ ॥ इन्द्राणीमासु नारिषु सुपत्नीमहमश्रवम् । नह्यस्या

अपरं च न जरसा मरते पतिर्विश्वस्मादिन्द्र उत्तरः ॥ २६ ॥ नाहमिन्द्राणि रारण
सख्युर्वृषाकपेर्ऋते । यस्येदमप्यं हविः प्रियं देवेषु गच्छति विश्वस्मादिन्द्र उत्तरः
॥ २७ ॥ कुहूमहं सुकृतं विद्मनापसमस्मिन्यज्ञे सुहवां जोहवीमि । या नो ददाति
श्रवणं पितॄणां तस्यै ते देवि हविषा विधेम ॥२८॥ कुहूर्देवानाममृतस्य पत्नी हव्या
नो अस्य हविषः शृणोतु । स्वसा देवानां महयन्त्यस्मे रायस्पोषं चिकितुषे
दधातु ॥२९॥ धाता दधातु नो रयिमीशानो जगतस्पतिः । स नः पूर्णेन वावनत् ॥३०॥
प्रजापतीरमयतु प्रजा इह धाता दधातु सुमनस्यमानः संवत्सर ऋतुभिश्चाक्लृपानो
मयि पुष्टिं पुष्टिपतिर्दधातु ॥ ३१ ॥ (उपहोमदेवाः) (देवासुराणाम्) तव श्रिये
व्यजिहीत पर्वतो गवां गोत्रमुदसृजो यदङ्गिरः । इन्द्रेण युजा तमसा परिवृतं बृहस्पते
निरपामौब्जो अर्णवम् ॥ १ ॥ बृहस्पते अति यदर्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु ।
यद्दीदयच्छवसर्तप्रजात तदस्मासु द्रविणं धेहि चित्रम् ॥ २ ॥ बृहस्पतिः समजयद्व-
सूनि महो व्रजान्गोमतो देव एषः । अपः सिषासन्त्स्वरप्रतीतो बृहस्पतिर्हन्त्यमित्रमर्कैः
॥ ३ ॥ यमो दाधार पृथिवीं यमो द्यामुत सूर्यम् । यमाय सर्वमित्तस्थे यत्प्राण-

द्राघुरक्षितम् ॥ ४ ॥ यथा पञ्च यथा पञ्चथा पञ्चदशर्षयः । यमं यो विद्यात्स ब्रूया
यथैकर्षिर्विजानते ॥ ५ ॥ त्रिकद्रुकेभिः पतति षडुर्वी रेकमिद्बृहत् । गायत्री त्रिष्टु-
प्छन्दांसि सर्वाता यम आहिताः ॥ ६ ॥ मृळा नो रुद्रोत नो मयस्कृधि क्षयद्वी-
राय नमसा विधेमते । यच्छं च योश्च मनुरायेजे पिता तदश्याम तव रुद्र प्रणी-
तिषु ॥ ७ ॥ अश्याम ते सुमतिं देवयज्यया क्षयद्वीरस्य तव रुद्र मीढ्वः । सुम्नाय-
न्निद्विशो अस्माकमा चरारिष्टवीरा जुहवाम ते हविः ॥ ८ ॥ त्वेषं वयं रुद्रं यज्ञसा-
धनमकं कविमवसे निह्वयामहे । आरे अस्मद्दैव्यं हेळो अस्यतु सुमतिमिद्वयमस्या
वृणीमहे ॥ ९ ॥ अव ते हेळो वरुण नमोभिरवयज्ञेभिरीमहे हविर्भिः । क्षयन्नस्म-
भ्यमसुरप्रचेतो राजन्नेनांसि शिश्रथः कृतानि ॥ १० ॥ उदुत्तमं वरुण पाशमस्म-
दवाधमं वि मध्यमं श्रथाय । अथा वयमादित्यव्रते तवानागसो अदितये स्याम
॥ ११ इमं मे वरुण श्रुधी हवमद्या च मृळय त्वामवस्युराचके । तत्त्वायामि ब्र-
ह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः । अहेळमानो वरुणेह बोध्युरुशंस
मा न आयुः प्रमोषीः ॥ १२ ॥ ॐभूर्लोकाय स्वाहा ॥ १३ ॥ ॐभुवोलोकाय०

॥ १४ ॥ ॐस्वर्लोकाय स्वा० ॥ १५ ॥ ॐभूर्भुवः स्वर्लोकाय स्वाहा ॥ १६ ॥ अग्नि-
र्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम्, अपां रेतांसि जिन्वति ॥ १७ ॥ उभा
वामिन्द्राग्नी आहुवध्या उभा राधसः सह मादयध्यै । उभा दाताराविषां रयी-
णामुभा वाजस्य सातये हुवे वाम् ॥ १८ ॥ अयमिह प्रथमो धायि धातृभिर्होता
यजिष्ठो अध्वरेष्वीड्यः । यमप्नवानो भृगवो विरुरुचुर्वनेषु चित्रं विभ्वं विशे विशे
॥ १९ ॥ अयं ते योनिर्ऋत्वियो यतो जातो अरोचथाः । तं जानन्नग्न आरोह तनो
नो वर्धया रयिम् ॥ २० ॥ (स्तोमो देवानाम्) उपप्रयन्तो अध्वरं मन्त्रं वोचेमाग्नये ।
आरे अस्मे च शृण्वते ॥ २१ ॥ अस्य प्रत्नामनु द्युतं शुक्रं दुदुह्रे अह्रयः, पयः सह-
स्रसामृषिम् ॥ २२ ॥ (अरुणेः) कदाच नस्तरीरसि नेन्द्र सश्चसि दाशुषे । उपो-
पेन्नु मघवन्भूय इन्नु ते दानं देवस्य पृच्यते ॥ २३ ॥ परि ते दूळभो रथोऽस्माँ
अश्नोतु विश्वतः । येन रक्षसि दाशुषः ॥ २४ ॥ यौ ते श्वानौ यम रक्षितारौ
चतुरक्षौ पथिरक्षी नृचक्षसौ । ताभ्यामेनं परि देहि राजन्स्वस्ति चास्मा अनमीवं
च धेहि ॥ १ ॥ यत्र वेत्थ वनस्पते देवानां गुह्या नामानि, तत्र हव्यानि गमय

॥ २ ॥ मुञ्चामि त्वा हविषा जीवनाय कमज्ञातयक्ष्मादुत राजयक्ष्मात् । ग्राहिर्जग्राह यदि वैतदेनं तस्या इन्द्राग्नी प्र मुमुक्तमेनम् ॥ ३ ॥ अङ्गादङ्गाल्लोम्नो लोम्नो जातं पर्वणि पर्वणि । यक्ष्मं सर्वस्मादात्मनस्तमिमं विवृधामि ते ॥ ४ ॥ ॐभूर्भुवः स्व० ॥ ६ ॥ ॐतद्विष्णोः परमं० ॥ ऐन्द्राग्नं वर्म बहुलं यदुग्रं विश्वे देवा नाति विध्यन्ति शूराः । तन्नस्त्रायतां तन्वः सर्वतो महदायुष्मन्तो जरामुपगच्छेम जीवाः ॥ (अथ नैवेद्यम्) अमृतेशमुद्रयाऽमृतीकृत्याऽमृतमस्तु अमृतायतां नैवेद्यम् । सावित्राणि सावित्रस्य देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे ॥ महागणपतये, कुमाराय, श्रियै, सरस्वत्यै, लक्ष्म्यै, विश्वकर्मणे द्वार्देवताभ्यः ॥ प्रजापतये, ब्रह्मणे, कलशदेवताभ्यः, ब्रह्मविष्णुमहेश्वरदेवताभ्यः, चतुर्वेदेश्वराय सानुचराय ऋतुपतये नारायणाय (मार्गशीर्षे) रुक्मिणीसहिताय कृष्णाय, श्रीसहिताय केशवाय । (पौषे) श्रियास०, अनन्ताय, वागीश्वरीस० नारायणाय (माघे) प्रीतिस० अच्युताय, कान्ता स० माधवाय (फाल्गुणे) शक्तिस० चक्रिणे, क्रियास० गोविन्दाय (चैत्रे । सिद्धिस० वैकुण्ठाय, मतिस० विष्णवे । वैशाखे ।

शोभास॰ जनार्दनाय, विभूतिस॰ मधुसूदनाय । ज्येष्ठे । महिमास॰ उपेन्द्राय, तुष्ट्यास॰ त्रिविक्रमाय । आषाढे । लक्ष्मीस॰ यज्ञपुरुषाय, धृतिस॰ वामनाय । श्रावणे । कान्तिस॰ वासुदेवाय, रति स॰ श्रीधराय । भाद्रपदे । प्राप्तिस॰ हरये, मायास॰ हृषीकेशाय । अश्वयुजे । प्राकाम्यास॰ योगीश्वराय, धीस॰ पद्मनाभाय । कार्तिके । लघिमास॰ पुण्डरीकाक्षाय, गरिमास॰ दामोदराय । मलिम्लुचे । सत्यभामास॰ नरकारये, निष्कलास॰ महामार्तण्डाय ॥ दुर्गायै त्र्यम्बकाय, वरुणाय, यज्ञपुरुषाय, अग्निष्वात्तादिभ्यः पितृगणयागदेवताभ्यः ॥ भगवते वासुदेवाय, सङ्कर्षणाय, प्रद्युम्नाय, अनिरुद्धाय, सत्याय, पुरुषाय, अच्युताय, माधवाय, गोविन्दाय, सहस्रनाम्ने विष्णवे, लक्ष्मीसहिताय नारायणाय ॥ भवाय देवाय, शर्वाय दे॰, रुद्राय दे॰, पशुपतये दे॰, उग्राय दे॰, भीमाय दे॰, महादेवाय दे॰, ईशानाय दे॰, ईश्वराय दे॰, उमासहि॰, शिवाय, पार्वतीस॰ परमेश्वराय ॥ विनायकाय, एकदन्ताय, कृष्णपिङ्गलाय, गजाननाय, लम्बोदराय, भालचन्द्राय, हेरम्बाय, आखुरथाय, विघ्नेशाय, विघ्नभक्ष्याय, वल्लभास॰ श्रीमहागणेशाय ॥

2 आज्य॰

ह्रींक्रांकुमाराय, षण्मुखाय, मयूरवाहनाय, सेनाधिपतये कुमाराय ॥ ह्रांह्रींसः सूर्याय सप्ताश्वाय, अनश्वाय, एकाश्वाय, नीलाश्वाय, प्रत्यक्षदेवाय, परमार्थसाराय, तेजोरूपाय, प्रभासहिताय आदित्याय ॥ भगवत्यै अमायै, कामायै, चार्वङ्ग्यै, टङ्कधारिण्यै, तारायै, पार्वत्यै, यक्षिण्यै, श्रीशारिकाभगवत्यै, श्रीशारदाभ०, श्रीमहाराज्ञीभ० श्रीज्वालाभ०, श्रीडाभ०, वैखरीभ०, वितस्ताभ०, गङ्गाभ०, यमुनाभ०, कालिकाभ०, सिद्धलक्ष्म्यै, महालक्ष्म्यै, महात्रिपुरसुन्दर्यै, सहस्रनाम्न्यै देव्यै भवान्यै ॥ अभयङ्करीदेव्यै, क्षेमङ्करीभवान्यै, सर्वशत्रुघातिन्यै, इह राष्ट्राधिपतये, अमुकभैरवाय ॥ इन्द्राय वज्रहस्ताय (सुराधिपतये शचीसहिताय)। अग्नये शक्तिह० (तेजोधिप० स्वाहास०)। यमाय दण्डह० (प्रेताधि० यामीस०)। नैर्ऋतये खड्गह० (रक्षोधि० दितिस०)। वरुणाय पाशह० (जलाधि० वारुणीस०)। वायवे ध्वजह० (जीवाधि० प्राणशक्तिस०)। कुबेराय गदाह० (यक्षाधि० यक्षिणीस०)। ईशानाय त्रिशूलह० (सर्वाधि० उमास०)। ब्रह्मणे पद्मह० (वेदाधि० गायत्रीस०)। विष्णवे चक्रह० (त्रैलोक्याधि० लक्ष्मीसहि०)। अनन्तादिभ्यः अष्टाभ्यः कुलनागदेवताभ्यः ॥

अर्यादित्याभ्यां, वरुणचन्द्रमोभ्यां, कुमारभौमाभ्यां, विष्णुबुधाभ्यां, इन्द्राबृहस्प-
तिभ्यां, सरस्वतीशुक्राभ्यां, प्रजापतिशनैश्चराभ्यां, गणपतिराहुभ्यां, रुद्रकेतुभ्यां,
ब्रह्मध्रुवाभ्यां, अनन्तागस्त्याभ्यां ॥ ब्रह्मणे, कूर्माय, ध्रुवाय, अनन्ताय, हरये,
लक्ष्म्यै, कमलायै, शिल्यादिभ्यः पञ्चचत्वारिंशद्वास्तोष्पतिवागदेवताभ्यः ॥ ब्राह्म्या-
दिभ्यो मातृभ्यः, गौर्यादिभ्यो मातृभ्यः, ललितादिभ्यो मातृभ्यः, दुर्गाक्षेत्रगणे-
श्वरदेवताभ्यः, राकादेवताभ्यः, त्रिकादे०, सिनीवालीदे०, यामीदे० कुहूदे०,
रौद्रीदे० ऐन्द्रीदे० वारुणीदे० बार्हस्पत्यदे० ॐभूर्दे० ॐभुवर्दे०, ॐस्वर्दे०,
ॐभूर्भुवःस्वर्दे०, अखण्डब्रह्माण्डदे० । धूम्र्यः, उपधूम्र्यः महागायत्र्यै, सावित्र्यै,
सरस्वत्यै, हेरुकादिभ्यो बटुकादिभ्यः तण्डुलमात्रं दधिमधुपर्कं ॐनमो नैवेद्यं
निवेदयामि नमः ॥ (कलशे पुष्पं ।) हिरण्यगर्भः० १ यः प्राणतो० २ य ओजो-
दा० ३ येन द्यौ० ४ य इमे द्यावा० ५ यस्येमे विश्वे० ६ आपो ह यन्० ७ आ-
नः प्रजां० ८ (बृहत्पुरुषसूक्ते पृष्ठं ८) अर्चन्तस्त्वा हवामहेऽर्चन्तः समिधीमहि ।
अग्ने अर्चत ऊतये ॥१॥ अर्चत प्रार्चत प्रियमेधासो अर्चत । अर्चन्तु पुत्रका उत
पुरं न धृष्णुमर्चत २ ॥ (इति ऋचकं समाप्तम्)

अथैकचक्रम् ॥

अग्निर्हिरण्यं, सोमो हिरण्यमितिचतुर्गृहीतेनोत्तरादक्षिणाघारावाज्यभागौ ॥ ॐअग्नि- र्हिरण्यममृतं हिरण्यमग्निरवरोचनं चित्रभानुः । अग्निर्गरुत्मानपतत्पतत्र्यग्निः पत- ङ्गमनुकृष्णवर्त्मा स्वाहा १ सोमो हिरण्यममृतं हि सोमः सोममपः सोममद्रिर- ग्रज्ञः । सोमो गरुत्मानपतत्पतत्री सोमः पतङ्गमनु शुक्लवर्त्मा स्वाहा २ एकचक्र- मुदयादित्यष्टादशभिः समिधामन्त्रस्याज्यस्य च जुहोति ॥ एकचक्रमुदयाद्भ्राजमानं देव- स्तोमं दृदृशे सूर्यमेकम् । हरिशुकमं विश्वमेजत्सचन्तं तस्मै नो देवाः परिधत्त सूर्याय स्वाहा १ एकविंशं पञ्चभिर्योतयन्तं षड्भिः सूर्यं प्रवता चोद्वता च । त्रिधा वर्धयन्तं भुवनस्य नाभिं अग्रे सूर्यं शुक्रहुतं पुरस्तात्स्वाहा २ श्वेतः शुक्रो वृषभ- श्चर्षणीनां मूर्धा उतन्तूत्वा सुमतिं करिष्ठः । स नो रयिं मे गृहेषु दधात्वानु वीरो वर्धतां द्योतमानः स्वाहा ३ अपां गर्भो विदथस्य प्रसादनमूर्वो तिष्ठत्सिन्धूनाम- नीके । सशेबुधमभिधावत्वन्तरिक्षं शुक्रः शिशुर्दीर्घमायुर्निधत्तां स्वाहा ४ ब्रह्माधिकः प्रथमो जातवेदा बृहस्पतिर्भारतो देवतानाम् । अस्मिन्यज्ञे बर्हिषि मोदमानो

हिरण्यवाशीरिषिरः स्वर्षः स्वाहा ५ शुचिर्देवानामृषभः प्रजानामृभुर्वसूनाममृतस्य नाभिः । अस्मिन्यज्ञे बर्हिषि मोदमानो हिरण्यरेता अभयं कृणोतु स्वाहा ६ बुधः सौम्यो अमृतत्वं बभूवामृतन्देवानामायुः प्रजासु । अस्मिन्यज्ञे सोमशिशुर्युवानः शन्नो भव पयसाप्यायमानः स्वाहा ७ बोधास्व मे मघवन्वाचमे मां बोधास्व मे विश्वभृतो जनित्री । बोधास्व मे मातरिश्वा वचोभिर्बोधास्व मे ब्रह्मणा संशिशाधि स्वाहा ८ अग्निर्मूर्धा० ९ चित्रो हन्ता रोहिदश्वः प्रजानामस्मिन्यज्ञे हविषा मान एतु । स नो वक्रीरभयं कृणोतु विश्वेत्स वामादधते त्वौतः स्वाहा १० शनैश्चरान्मावधीरश्मि वीरान्मानो गृहान्पशून्मा न आयुः । मा नो यूनो भविता नो रथेन मा नः शिशून्गर्भमानः किञ्चन स्वाहा ११ शन्नो भव ऋतुभिः शं समासैः शमर्धमासैः शमुषा अहोभिः । शन्नः काष्टाः प्रदिशो दिशश्च शं चन्द्रसूर्या ज्योतिषि शं च स्वाहा १२ मक्षूधाता मातरिश्वा वचोभिश्चन्द्रो अमृताद्वर्धते जायमानः । आयुः प्रजाममृतं हि सौभगत्वं प्रचन्द्रमास्थिरते दीर्घमायुः स्वाहा १३ भूयो जातो हविषश्चन्द्रमसात्पूर्णः पुरस्तात्पयसो हविर्भिः । पयो गर्भो देवताः पिन्वमा-

नक्षत्रन्द्रो अमृतत्वमभयं कृणोतु स्वाहा १४ धनुनागा धनुनाजिं० १५ उग्रं तमो विश्वरूपं महन्तं स्वर्भानुरजरं महस्वत् । महद्भयात्तमसो मृत्युपाशाद्विमुच्य राहुरभयं कृणोतु स्वाहा १६ केतुं कृण्वन्न केतवे० १७ यज्ञस्य केतुं प्रथमं पुरोहितमग्निर्नरस्त्रिषधस्थे समीधिरे । इन्द्रेण देवैः सरथं स बर्हिषि सीदन्निहोता यजथाय सुक्रतुः स्वाहा १८ इति समिदन्नाज्येन हुत्वा ॥ अथ स्रुवेणाज्येन चोपहोमान् । आदित्य इति । आदित्यस्तेजस्वी तेजोऽस्मिन्यज्ञे यजमाने दधातु स्वाहा १ शुक्रो भ्राजस्वी ओजोऽस्मिन्यज्ञे० २ बृहस्पतिर्वाक्पतिर्वाच्योऽस्मि० ३ बुधो बुद्धिमान्बुद्धिमसि० ४ भारो यशस्वी यशोऽसि० ५ सौरः सुरभिः सुरभिमसि० ६ चन्द्रमा आयुष्मानायुरसि० ८ राहुरभयस्यऽभयमसि० ८ केतुरनुपरोध्यऽनुपरोधमसि० ९ ध्रुवो धैर्यवान्धैर्यमसि० १० अगस्त्यो वीर्यवान्वीर्यमसि० ११ प्रद्धो अग्ने दीदिहि पुरो नो यत्र देवाः पूर्वे पुराणाः । यत्रासो वैश्वानरः स्तोकातिथिस्तत्रेमं यज्ञं यजमानं च देहि स्वाहा १२ इमे अग्ने वीततमानि हव्या प्रेदं हविः प्रमृते मान्स्तोकान् । स्तोकातिथिः स्तोका जूतिः पतन्त्यथा अग्ने अमृतत्वं च धेहि १३

ध्रुवं ते राजा वरुणो० १४ ध्रुवं ध्रुवेण हविषाभि सोमं मृशामसि । अथोत इन्द्र० १५ अगस्त्यः खनमानः खनित्रैः प्रजामपत्यं० । १६ । इत्येकचक्रम् ॥

अथ अद्भुतब्राह्मणम् ।

स्रुवेणाज्यहोमः यजुः ॥ आदित्या रुद्रा वसवो जुषन्ताम् आदित्यो यदादित्यमुपतो य इच्छते दृष्टं क्रियमाणं नवीया नवग्रहणे नवीया न यजते, गृण्वन्तो नो दिव्या वा आदित्यो यदादित्या वनीयमुपयान्त्यर्थं वानां पार्थिवान यजते, सुगोजायद्रोजायता तर्हि यज्ञियाम इति, यज्ञिया वृध्यंते, येन देवानां यज्ञिया यज्ञियानां वा अनावा तद्ब्रह्मवर्चस्वी तवन्यष्टता ऋतस्य इत अमृता ऋध्यंते, तेने रासन्तमुरुगाय मद्य आदित्यो नवग्रहीतव्यन वो ग्रही स्या यजेत यूयं पात स्वस्तिभिः सदा न इति यजमानो वा आयव्यो वृश्चते यत ऋच्छते; यजमानाय वृश्चते प्रजया ऋच्छते य एवं वेद । देवाश्च वा असुराश्च समावदेवा यज्ञं कुर्वंत यदेवादेवा अकुर्वंत तदासुरा अकुर्वंत ते देवा एतानि अद्भु[illegible]पश्यँस्तैरिन्द्रमयाजंस्तदसुरानन्ववायंस्ततो देवा अभवन्पराऽसुरा अभ[illegible]एवं विद्वानेतानि

ग्रहहवींषि यजति भ्रातृव्यस्याऽनन्ववायाय भवति आत्मना परस्य भ्रातृव्यो भवति, आदित्याय घृते चरुं निर्वपेत्तेजस्तेन परिक्रीणाति, शौक्रं चरुं ब्रह्मवर्चसं तेन० बृहस्पतये नैवारं पयसे चरुं वाक्पत्यं तेन०, बुधाय नवकपालं चरुं बुद्धिं तेन०, भौमायैककपालं यशस्तेन० सौराय पलिलमिश्रं घृते चरुं सुरभिं तेन०, चन्द्रमसे पञ्चदशकपालं चरुमायुस्तेन०, राहवे चरुमभयं तेन०, केतवे चरुमनुपरोधं तेन०, ध्रुवाय चरुं धैर्यं तेन०, अगस्त्याय चरुं वीर्यं तेन० इत्येतान्येव सर्वाणि भवन्ति य एवं विद्वानेतया यजेत आज्येनोपहोमाञ्जुहोति आशिषामवरुद्ध्या एतया यजेत, यः कामयेत तेजस्वी भ्राजस्वी वाक्पतिर्बुद्धिमान्यशस्वी सुरभिरायुष्मानऽभय्यऽनुपरोधी धैर्यवान् वीर्यवान् स्यामित्येकचक्रमुदयाद्भ्राजमानमित्यष्टादशयाज्यावाक्यो भवति, सरूपत्वायाग्निर्हिरण्यं सोमो हिरण्यमित्याज्यभागौ, प्रद्धो अग्ने, इमो अग्ने इति संयाज्ये उच्चैर्यजत्येषां वा वाच उत्तममायुरुच्चैरुत्तमः समानानां भवति, आदित्यस्तेजस्वीत्युपहोमाञ्जुहोति, सर्वस्याप्त्यै सर्वस्यावरुद्ध्यै य एवं विद्वानेतया यजेत राजसूयः सवितर्सर्वप्रसवानां सवितादित्यौ

सद्यो देवासुरौ राजर्षीणाम् । स्वयमवपन्ना-या अश्वत्थशाखाया पत्रं भवति श्वेतांश्वे-
तवत्सां दुह्नन्ति तत्स्वयमर्कति स्वयं मथ्यति स्वयं ऽमयत्यथ मैत्रा बार्हस्पत्यं चरुं
श्रृतं कुर्वन्ति, तत्स्वयं तण्डुलान्विभजति ये क्षोदीयां सह-मायाद्वाश्रृतो भवत्यथ
तत्पत्रमाश्वत्थमपिधायापवित्रं वल्याजमानायति तत्स्ववीयस्व आवपति, समात्रं
चरुं स्वयं श्रृतं भवत्यर्धे वेद्यः कुर्वन्त्यर्धं स्वयं कृतमर्धं बर्हिषो दन्त्यार्धं स्वयं दिनं-
मर्धमिध्मस्य कुर्वन्त्यर्धं स्वयं कृतं शितिपृष्ठो बार्हस्पत्यस्य दक्षिणाश्वो मित्रस्य मावै-
चश्वेताश्वेतवाऽस्नये ग्रहपतय आशूनामष्टाकपालः । साबित्रे प्रसवित्रे मतीनां नष्ट-
कपालः, सोमाय वनस्पतये श्यामाकचरुं, बृहस्पतये वाचस्पतये नैवारश्चरुरिन्द्राय
ज्येष्ठ्याय हायनानामेकादशकपालो, मित्राय सत्यस्य पतये । अम्बानां चरुं, वरु-
णाय धर्मणस्पतयेऽयनमत्रयोदशकपालो, रुद्राय पशुपतये गवीधुकश्चरुः सविता
द्वा प्रसवेनां सवितामग्निगार्हस्पत्यानां सोमो वनस्पतीनां बृहस्पतीनां वाचमिन्द्रो
ज्येष्ठानां मित्रा सत्यानां वरुणो धर्मणां रुद्रः पशूनां ते देवानामऽसपत्नमिमां
स्ववध्वं, महते क्षेत्राय महते ज्येष्ठया महते राजाय महते जानराजाय महते

विश्वस्य भुवनस्याधिपतये (तै०) आगस्त्यस्यैतत्सूक्तं कयाशुभीयंतस्य सामिधि-
नीष्वऽप्यनुब्रूयात्तस्य याज्यानुवाक्ये स्यातामगस्त्यो वै मरुद्भ्यः शतमुक्ष्णः पृश्नीः
प्रौक्षत्तानिन्द्रायालभेत तं मारुतः क्रुद्धा वज्रमुद्यत्याभ्यपतत्स एतत्सूक्तमपश्यन्
तेनैनानशमयद्यदेतदनूच्यते शान्त्यै ॥ इति ग्रहेष्टिब्राह्मणं ॥

अथ नक्षत्रयज्ञम् ॥

अग्नेर्देवा इहावह जज्ञानो वृक्तु बर्हिषि, असि होता न ईड्यः १ अगन्म महो नमसा यविष्ठं यो दीदाय, समिद्धः सुदुरोणे २ चित्रभानुं रोदसी अन्तरुर्वी स्वाहुतम्, विश्वतः प्रत्यहुतम् ३ मेधाकारं विदथस्य प्रसाधनमग्निं होतारं, परिभूतसम्मतिम् ४ त्वामर्भस्य हविषा समानमित्त्वा महो वृणते नान्यं त्वत् ५ मनुष्वत्त्वा निधीमहि मनुष्वत्समिधीमहि । अग्ने मनुष्वदङ्गिरो देवान्देवायते यज ६ अग्निर्हि वाजिनं विशे ददाति विश्वचर्षणिः । अग्नेराये स्वाभुवं स प्रीतो बर्हिमिषं स्तोतृभ्य आभर ८ (यजुः) अग्निर्देवता कृत्तिका-नक्षत्रं, प्रजापतिर्देवता रोहिणीनक्षत्रं, मरुतो देवता इल्वकानक्षत्रं, रुद्रो देवता

बाहुर्नक्षत्रं, अदितिर्देवता पुनर्वसुर्नक्षत्रं, बृहस्पतिर्देवता तिष्योनक्षत्रं, सर्पो देवता आश्लेषानक्षत्रं, पितरो देवता मघानक्षत्रं, भगो देवता पूर्वफाल्गुणीनक्षत्रे, अर्यमा देवता उत्तरफाल्गुणीनक्षत्रं सविता देवता हस्तो नक्षत्रं त्वष्टा देवता चित्रानक्षत्रं, वायुर्देवता धनिष्ठानक्षत्रं, इन्द्राग्नीदेवता विशाखानक्षत्रं, मित्रोदेवताऽनूराधानक्षत्रं, इन्द्रोदेवता ज्येष्ठानक्षत्रं, निर्ऋतिर्देवता मूलं नक्षत्रं, आपो देवता पूर्वाषाढानक्षत्रं, विश्वेदेवा देवता उत्तराषाढानक्षत्रं, ब्रह्मा देवता अभिजिन्नक्षत्रं, विष्णुर्देवता अश्वत्थोनक्षत्रं, वसवो देवता श्रविष्ठानक्षत्रं, वरुणो देवता शतभिषङ्नक्षत्रं, अजैकपादेवता प्रोष्ठपदानक्षत्रं, अहिर्बुध्न्योदेवता उत्तरप्रोष्ठपदानक्षत्रं, पूषादेवता रेवतीनक्षत्रं, अश्विनौदेवता अश्विनीनक्षत्रं, यमोदेवता अपभरणी नक्षत्रं (ते०) अग्नेस्त्वः स्थ प्रजापतेः सोमस्य धातुर्भूयासं प्रजनिषीय तेन । ब्रह्मणा तेन च्छन्दसा तया देवतयाऽङ्गिरस्वद्ध्रुवा सीदत स्वाहा ॥ अथ नक्षत्रदेवानामृचः ॥ कृ । अग्निर्मूर्धा० । रो । हिरण्यगर्भः० । मृ । मरुतो यद्धवो दिवः सुम्नायन्तो हवामहे, मरुत् उपगन्तन । आ । मृळानो रुद्रो तन्नो० । पुं । सुत्रा-

त्राणं पृथिवीं द्यामनीहसा सुशर्माणमदितिं सुप्रणीतिम् । दैवीं नावं सुरित्रामना-
गसमस्रवन्तीमारुहेमा स्वस्तये । ति । तव श्रियेव्यजिहीत॰ । अश्ले । नमो अस्तु
सर्पेभ्यो॰ । म । अहं पितॄन्॰ । पूफा । सदा सुगः पितुमाँ अस्तु पन्थामध्वा
देवो ओषधीः संपिपृक्त । भगो मे अग्ने सख्येना मृध्या तद्रायो अस्यां सदनं
पुरुक्षोः । उफा । यत्ते अर्यमन्बहवो देवयानाः । ह । तत्सवितुर्वृणीमहे वयं देवस्य
भोजनम् । श्रेष्ठांसर्वधातमं तुरं भगस्य धीमहि । चि । य इमे द्यावापृथिवी
जनित्री रूपैरपिंशुद्भुवनानि विश्वा । तमद्यहोतरिषितो यजीयान्देवं त्वष्टारमुत
यक्षिविद्वान् । स्वा । वायुरग्रेगा यज्ञप्रीस्साकं गर्मनसा यज्ञम् । शिवोनियुद्भिः
शिवाभिः । वि । इन्द्राग्नी रोचना दिवः परिवाजेषु भूषथः । तद्वांचेति प्रवीर्यम् ।
अनू । मित्रो जनन्यातयति प्रजानां मित्रो दधार पृथिवीमुत द्याम् । मित्रः कृष्टी
रनिमिषाभिचष्टे मित्राय हव्यं घृतवद्विधेम । ज्ये । इन्द्रः सुत्रामा सुवा अवोभिः
सुमृळीको भवतु विश्ववेदाः । बाधतान्द्वेषो अभयं कृणोतु सुवीर्यस्य पतयः स्याम ।
मू । यन्ते देवे निर्ऋति॰ । पूषा । शन्नो देवी॰ । उषा । विश्वे देवा ऋता वृधा

ऋतुभिर्हवनश्रुतः । जुषन्तां युज्यम्पयः । अभि । ब्रह्म जज्ञानं० । भ । यद्द्दते विज्ञ० । ध । आ मे ग्रहा भवन्त्वा प्रजा म, आ मा यज्ञो विशतु वीर्यवान् । आपो देवीर्यज्ञिया मा विशन्तु सहस्रस्य मा माभूमा मामहासीत् । शत । इमं मे वरुण श्रुधी० पूभा । उप प्रागाच्छमानं वाज्यर्वा देवद्रीचा मनसा दीध्यानः । अजः पुरो नीयते नाभिरस्यानु पश्चात्कवयो यन्ति रेभाः । उभा । अहिरिव भोगैः पर्येति बाहुं ज्याया हेतिम्परि बाधमानः । हस्तघ्नो विश्वावयनानि विद्वान्पुमान्पुमांसं परिपातु विश्वतः । रे । पूषा गा अन्वेतु नः पूषा रक्षत्स्वर्वतः । पूषा वाजं सनेतु नः । अश्वि । प्र व-दास्यम्यश्विना अवोचमस्य पतिः स्यां सुगवः सुवीरः । उत पश्यन्नश्नुवन्दीर्घमायुरां स्तमिवेजनिमानअगम्याम् । भ । यमो दाधार० ॥ इति नक्षत्रयज्ञः ॥ इति समिद-ाज्यभागः प्रथमः ॥ १ ॥

अथ यवतिलतण्डुलभागः २।

तत्रादौ गायत्रीब्राह्मणम् ॥ (विद्वान्न प्रणवं युञ्ज्याद्धोममन्त्रेषु सर्वदा । आशीर्वादेऽभिषेके च जपेऽमुं पूर्वमुच्चरेत् १ घृतदधितिलाश्चैव यवशर्करमिश्रिताः । एतत्पञ्चामृतं प्रोक्तं होमे सर्वार्थसिद्धिदम् ॥ २ ॥ ॐप्रजापतेर्भूलोकस्यानुष्टुप्, ककुभापृथ्वी ऋषिः, विराट्छन्दः ब्रह्मा देवता । प्रणवऋषिः । गायत्री छन्दः । परमाग्निर्वायुर्देवता । व्याहृतीनां जमदग्निभारद्वाजभृगव ऋषयः, अग्निवायुसूर्या देवताः सूर्याद्यावाहनार्थे श्रीमहागायत्रीप्रीत्यर्थं होमे विनियोगः)
ॐ कारो यस्य मूलं० (इत्यादि) **ब्रह्मयोने नमोऽस्तु ते** (इत्यन्तं ऋचकपृष्ठे १)
ॐ अग्नये स्वाहा, ॐ भूः स्वाहा, ॐ भुवः०, ॐ स्वः, ॐ भूर्भुवः स्वः स्वा० ॥

ॐ भूः स्वा० ॐ भुवः स्वा० ॐ स्वः स्वा०, ॐ महः स्वा०, ॐ जनः० ॐ तपः० ॐ सत्यं स्वाहा ॥ ॥ ॐ अग्नये स्वाहेत्यग्निः सर्वा देवताः सौख्यं करोत्यसौ वा अग्निः प्रीणाति, ॐ भूः स्वाहेत्ति भूमिं वै उर्वन्तरिक्षमुर्वोर्दीस्तेन प्रीणाति, ॐ भुवः स्वाहेति भुवनानां पतय इत्यक्रुतं तेन प्रीणाति, ॐ स्वः स्वाहेति आप एष इमं लोकं जयतु तेन सोमपः प्रीणाति, ॐ भूर्भुवः स्वः स्वाहेति अग्निं सूर्यं ज्योतिष्मन्तं करोति यजमानो वृद्ध्यते, ॐ भूःस्वाहेति भूमिर्वै द्विपदाश्चैव चतुष्पदस्तेन वृद्ध्यते ॐ भुवः स्वाहेति अन्तरिक्षं वै वायुर्देवतास्तेन वायवः प्रीणाति, ॐ स्वः स्वाहेति वाचो मे प्राणापानौ सम्राट्चक्षुषस्तेन प्रीणाति, ॐ महः स्वाहेति महामनसां महांल्लोकाञ्जयति होतारं तेन प्रीणाति, ॐ जनः स्वाहेति जनानां जनयतिर्जन्तूनामिमं लोकं तेन प्रीणाति, ॐ तपः स्वाहेति तपो वा असावादित्यो द्वादश मासाः संवत्सरस्तेन प्रीणाति, ॐ सत्यं स्वाहेति सत्यमिति वरुणश्चन्द्रमसौ नक्षत्राणि ससार्णवस्तेन प्रीणाति, अथोत्तरस्मै सर्वा देवतास्तेन प्रीणाति तेन सख्यं करोति, यजमानो वृद्ध्यते, सन्तत्यै प्रजावत्या भवति अविच्छिन्नं प्रदीयते य एवं वेद ॥ (इति व्याहृति

ब्राह्मणं) तत्सवितुर्वरेण्यं ॥ ३ ॥ मध्याह्ने वृषवाहना त्रिनयना शुक्लाम्बरालेपना खट्वाङ्गं त्रिशिखं कपालडमरू दोर्भिर्वहन्ती सदा । शुक्ला शुक्लविभूषणा नरशिरोमालासिरावेष्टिता भूयाद्यौवनवत्यसौ त्रिजगतां सर्वार्तिविद्राविणी ॥ तत्सवितुरिति तदादित्यः सविता प्रसविता प्रजया पशुषु प्रतितिष्ठति, वरेण्यमित्यग्निर्वै वरिवः कृणोति, भर्गेति रश्मयः शतं सहस्रमयुतं च प्रतनोति, देवस्य द्योतन परमं कामस्य, धीमहीति धीमान्विश्वस्याप्नोति, धियो योन इति अह्ना रात्रिः सन्ध्यामुपयति, प्रचोदयादिति प्रजापतिर्वा प्रजामुपसृजति, पशुषु प्रतितिष्ठति, तस्माद्गायत्री चतुर्विंशत्यक्षरा भवति, सर्वस्याप्त्यै सर्वस्यावरुद्ध्यै न ब्रह्मचारिणं शतं सहस्रमयुतं च प्रजावान्पशुमॉन्नयिमानायुष्मन्तं करोति, तस्माद्गायत्री आयुरिव परमं कामं गायत्र्यामितिष्ठति, य एवं वेद ॥ (इति तत्सवितुर्ब्राह्मणं) चतुर्भुजामर्कसहस्रकोटिभां त्रिलोचनां हारकिरीटशोभिताम् । चतुर्मुखस्याङ्कगतां महोज्ज्वलां वेदेश्वरीं पञ्चमुखीं नमाम्यहम् ॥ ओजोऽसि सहोसि० ॥ देवाश्च वा असुराश्च संयत्ता आसँस्तान्गायत्र्यन्तरातिष्ठदोजो वै वीर्यमन्नाद्यं परिगृह्य संवत्सरो वा वैनान्सोऽन्तरातिष्ठच्चतुर्विंशति

गायत्र्या अक्षराणि चतुर्विंशति संवत्सरस्यार्धमासास्ते विदुर्यतरान्वा इयमुपवत्स्यति, त इदं भविष्यति तं व्यह्वयन्तदाभीत्यसुरा आह्वयन्विश्वकर्मन्निति देवास्तान्यतरांश्च नोपवर्तत, ते देवा एतद्यजुरपश्यन्नोजोसि सहोसि बलमसि भ्राजोसि देवानान्धाम नामासि विश्वमसि विश्वायुः सर्वमसि सर्वायुरभिभूरिति । स देवानुपावर्तत, ततो देवा अभवन्परासुरा अभवन्नाग्नेय्यमष्टाकपालं निर्वपेद्भ्रातृव्यवान्वा स्पर्धमानो वा तमासाध्यैतै ऋजुरभिमृशेदोजो वै वीर्यं संवत्सर ओज एव वीर्यं भ्रातृव्यस्यवृङ्क्ते सनिर्वीर्यः पराभवति सैषा गायत्री नामेष्टिरथो आहुः क्षेत्रस्य संवर्ग इति (इति ओजोसिब्राह्मणं) ब्राह्मी हंसरथस्थिता मुखसरोज्योतिश्चतुर्वाङ्मयी मुद्रापुस्तक कुण्डलाक्षवलयाधारा चतुर्भिर्भुजैः । रक्ता रक्तविभूषणा प्रहसिता रक्ताम्बरालङ्कृता कौमारी मम जीविताववधि सदा भूयादघध्वंसिनी ॥ अश्वमेधे बोराणामार्षम् । द्रष्ट्रे नम० (ऋ० पृ० ११-९) द्रष्ट्रे नम उपद्रष्ट्रे नमोऽनुद्रष्ट्रे नम, इत्यग्निर्वै द्रष्टा ब्रह्मण उपद्रष्टा वायुरनुद्रष्टा तेभ्य एव नमस्करोति, ख्यात्रे नम उपख्यात्रे नमोऽनुख्यात्रे नम इति, संवत्सरो वै ख्याताऽदित्या उपख्याता चन्द्रमाऽनु-

ख्याता तेभ्य एव नमस्करोति, शृण्वते नम उपशृण्वते नम इति, द्यावा-पृथिवीभ्यामेव नमस्करोति, सते नमोऽसते नम इति, सदसद्भ्यामेव नमस्करोति, जाताय नमो जनिष्यमाणाय नम इति, यज्ञायैव दक्षिणायै च नमस्करोति, भूताय नमो भविष्यते नम इति, ऋक्सामभ्यामेव नमस्करोति, चक्षुषे नमः श्रोत्राय नम इति यथा यजुरेकविंशतिकृत्वो नमस्करोति, पञ्चर्तवो द्वादशमासास्त्रय इमे लोका असावादित्य एकविंश एष स्वर्गो लोकः स्वर्गस्य लोकस्य समष्ट्यै सर्वा वा एतर्ह्येतस्मिन्देवता आशंसन्ती सामभिव्याहरिष्यतीत्यग्निः सर्वा देवता असावादित्योऽग्निर्यदेतैर्नमस्कारैरादित्यमुपतिष्ठते, सर्वाभिरेवैनं देवताभिः समर्धयत्यश्वं वह्वारं ये ते पन्थानः सवितः पूर्व्यास इति वितता अन्तरिक्षे तेभिर्नो अद्य पथिभिः सुगेभिरक्षा चनो अधि च ब्रूहि देव इति स्वर्गस्य लोकस्य समष्ट्यै नमोऽग्नये पृथिवीक्षित इत्यग्निनायतनेषु निदधातीमानेवैनांल्लोकान्गमयति ॥ (इति द्रष्टब्राह्मणम्) ॥

यस्या भूः पाददेशे वसति तदुपरि खं गुदे स्वर्गलोको नाभौ मध्ये महाख्यो जन उरसि गतः कण्ठगामी तपश्च । सत्यं मूर्ध्नीश्वराख्या त्रिगुणविरहिता निष्कला सु-

स्वरूपा सा देवी विश्वरूपा वितरतु विभवं वेदमूला पराख्या ॥ यो विश्वचक्षु० (ऋ० पृ० १२-४) यो विश्वचक्षुरुत इति, विश्वचक्षुर्वै देवानां भवति, विश्वतोमुख इति, विश्वमुखां दर्शयति, विश्वतोहस्त इति, विश्वहस्त उत्तमा भवति, उत विश्वतस्पादिति, विश्वतस्पाद्धार, संबाहुभ्यामिति सर्वबाहुर्वै नमते नमस्कुर्याः कुर्वन्ते, संय्यजत्रैरिति सर्वस्य जित्यै, द्यावापृथिवी इति, द्यावापृथिव्योर्धारयते, जनयन्देव एक इति, जनमिति जनानां जनपतेर्जन्तूनामात्मा वै सर्वान्ध्यायन्ते देव एको भवति स देवः सर्वेभ्यो रक्षांसि भवति य एवं वेद (इति यो विश्वब्राह्मणम् ।) प्रातःकाले कुमारी कुमुदकलिकया जप्यमालां जपन्ती मध्याह्ने प्रौढरूपा विकसितवदना चारुनेत्रा विशाला । सन्ध्यायां वृद्धरूपा गलितकुचयुगा मुण्डमालां वहन्ती सा देवी दिव्यदेहा हरिहरनमिता पातु नो ह्यादिमुद्रा ॥ आ ब्रह्मन्ब्राह्मणो० (ऋ० पृ० १२-५) आ ब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतामित्याह, ब्राह्मण एव ब्रह्मवर्चसं दधाति, तस्मात्पुरा ब्राह्मणो ब्रह्मवर्चसी जायतामऽस्मिन्राष्ट्रे राजन्यः शूर इषव्योऽतिव्यते महारथो जायतामिति, राजन्य एव शौर्यं महिमानं दधाति, तस्मात्पुरा राजन्यः

शूर इषव्योऽतिव्यते महारथो जज्ञे, दोग्ध्री धेनुरिति **धेन्वामेव पयो दधाति, तस्मात्पुरा धेनुर्दोग्ध्री जज्ञे,** वोढानड्वानिति, **अनुडुह्येव बलं दधाति, तस्मात्पुरानुड्वान्वोढा जज्ञे,** आशुः सप्तिरिति, **अश्व एव बलं दधाति, तस्मात्पुराऽशुरश्वोऽजायत,** पुरन्धिर्योषेति, **योषित्येव ज्योतिरिव रूपं दधाति तस्माद्रूपिणी ज्योतिः प्रिया भावुका** जिष्णू रथेष्ठा इति, **राजन्य एव जैत्रं महिमानं दधाति, तस्मात्पुरा राजन्यो जिष्णुर्जज्ञे,** सभेयो युवेति, **एष वै सभेयो युवा यः प्रथमवयसि तस्मात्प्रथम वयसि स्त्रीणां प्रियो युवा पुमान्भावुकः,** अस्य यजमानस्य वीरो जायतामित्याह **वै तत्र यजमानस्यैव प्रजायां वीर्यं दधाति, तस्मात्पुरा राजन्यस्य वीरो जज्ञे,** निकामे निकामे नः पर्जन्यो वर्षत्विति, **निकामे निकामो वै तत्र पर्जन्यो वर्षति यत्रैतेन यज्ञेन यजन्ते,** फलवतीर्न ओषधयः पच्यन्तामिति, **फलवत्यो वै तत्रौषधयः पच्यन्ते, यत्रैतेन यज्ञेन यजन्ते,** योगक्षेमो नः कल्पतामिति, **योगक्षेमो वै तत्र कल्प्यते, यत्रैतेन यज्ञेन यजन्ते, तस्माद्यत्रैतेन यज्ञेन यजन्ते, क्लृप्तप्रजानां योगक्षेमो भवति य एवं वेद ॥** (अनेन मंत्रहोमेना० श्रीमहागायत्रीदेवीसन्तोषणार्थं

यवतिलतण्डुलहोमैः महागायत्री सवित्री सरस्वती प्रीयतां प्रीता भवतु) ॥ **इत्यामब्राह्मणम् ॥ इति गायत्रीब्राह्मणं सम्पूर्णम् ॥**

अध्वर्योयं यज्ञो० (ऋ० पृ० १७–११) **धनुनागा०** इत्यन्तं ॥ **तर्पणं** ॥ अनेन० महागणपतिः । कुमारः, श्रीः, सरस्वती, लक्ष्मीः, विश्वकर्मा, द्वार्देवताः प्रजापतिः ब्रह्मा, कलशदेवताः, ब्रह्मविष्णुमहेश्वरदेवताः, चातुर्वेदेश्वराः, सानुचराः, ऋतुपतिर्नारायणः । दुर्गा, त्र्यम्बकः, वरुणः यज्ञपुरुषः, अग्निष्वात्तादयः पितृगणयागदेवताः । प्रधानदेवताक्रमेण । भगवान्वासुदेवः ८ भवोदेवः ८ विनायकः ८ क्लींकां कुमारः ८ ह्रांह्रीं सः सूर्यः ८ भगवती अमा ८ अभयंकरी देवी० इह राष्ट्राधिपतिरमुकभैरवः । इन्द्रो वज्रहस्तः, अग्निः शक्तिहस्तः, यमो दण्डहस्तः, नैर्ऋतिः खड्गहस्तः, वरुणः पाशहस्तः, वायुर्ध्वजहस्तः, कुबेरो गदाहस्तः, ईशानः त्रिशूलहस्तः, ब्रह्मा पद्महस्तः विष्णुश्चक्रहस्तः अनन्तादयोष्टौ कुलनागदेवताः प्रीयन्तां प्रीताः सन्तु ॥

अथ सूक्तानि ग्रहाणाम् ।

तत्रादौ अग्न्यादित्यसूक्तम् ॥ अग्निस्तुवि० ॥ १ ॥ आ कृष्णेन० २ (ऋ० पृ०

२२–२३) एकोऽनेकः सुसूक्ष्मः सकलजनहृदामन्तरस्थः परोक्षः स्थूलोऽसौ पञ्चवक्त्रो वरभुजवहनः शक्तिहस्तस्त्रिनेत्रः । सप्तार्चिः सप्तजिह्वस्त्रिभुवनजननस्थानसंहारकारी दीप्तः प्रत्यक्षदेवः स भवतु हुतभुक्सर्वकामप्रदो नः ॥ (अग्निर्नवमधुश्छन्दा वैश्वामित्रो, वायो वायव्यैन्द्रवायव, मैत्रावरुणस्तृचा, अश्विना द्वादशा,ऽश्विनैन्द्रवैश्वदेवसारस्वताः सप्तैताः प्रउगदेवताः सर्वप्रकृतिनो दश ॥ अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्, होतारं रत्नधातमम् ॥ १ ॥ अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत, स देवाँ एह वक्षति २ अग्निना रयिमश्नवत्पोषमेव दिवेदिवे, यशसं वीरवत्तमम् ॥ ३ ॥ अग्ने यं यज्ञमध्वरं विश्वतः परिभूरसि, स इद्देवेषु गच्छति ॥४॥ अग्निर्होता कविक्रतुः सत्यश्चित्रश्रवस्तमः, देवो देवेभिरागमत् ॥ ५ ॥ यदङ्ग दाशुषे त्वमग्ने भद्रं करिष्यसि, तवेत्तत्सत्यमङ्गिरः ॥ ६ ॥ उप त्वाग्ने दिवे दिवे दोषावस्तर्धिया वयम्, नमो भरन्त एमसि ॥ ७ ॥ राजन्तमध्वराणां गोपामृतस्य दीदिविम्, वर्धमानं स्वे दमे ॥ ८ ॥ स नः पितेव सूनवेऽग्ने सूपायनो भव, सचस्वा नः स्वस्तये ॥ ९ ॥ (सूक्तं १) वायवा याहि दर्शते मे सोमा अरं कृताः, तेषां पाहि श्रुधी हवम् ॥ १० ॥ वाय उक्थे-

मिर्जरन्ते त्वामच्छा जरितारः, सुतसोमा अहर्विदः ॥ ११ ॥ वायो तव प्रपृञ्चती धेना जिगाति दाशुषे, ऊरूची सोमपीतये ॥ १२ ॥ इन्द्रवायू इमे सुता उप-प्रयोभिरागतम्, इन्दवो वामुशन्ति हि ॥ १३ ॥ वायविन्द्रश्च चेतथः सुतानां वाजिनीवसू, तावा यातमुप द्रवत् ॥ १४ ॥ वायविन्द्रश्च सुन्वत आयातमुप निष्कृतम्, मक्ष्वित्था धिया नरा ॥ १५ ॥ मित्रं हुवे पूतदक्षं वरुणं च रिशादसम्, धियं घृताचीं साधन्ता ॥१६॥ ऋतेन मित्रावरुणावृतावृधावृतस्पृशा । क्रतुं बृहन्तमाशाथे ॥१७॥ कवीनो मित्रावरुणा तुविजाता उरुक्षया, दक्षन्दधाते अपसम् ॥१८॥ (सू०२) अश्विना यज्वरीरिषो द्रवत्पाणी शुभस्पती, पुरुभुजा चनस्यतम् ॥ १९ ॥ अश्विना पुरुदंससा नराशवीरया धिया, धिष्ण्यावनतङ्गिरः ॥ २० ॥ दस्रा युवाकवा सुता नासत्या वृक्तबर्हिषा, आयातं रुद्रवर्तनी ॥२१॥ इन्द्रा याहि चित्रभानो सुता इमे त्वायवः, अण्वीभिस्तना पूतासः ॥ २२ ॥ इन्द्रा याहि धियेषितो विप्रजूतः सुतावतः, उप ब्रह्माणि वाघतः ॥ २३ ॥ इन्द्रा याहि तूतुजान उप ब्रह्माणि हरिवः, सुते दधिष्व नश्चनः ॥ २४ ॥ ओमासश्चर्षणीधृतो विश्वे देवास आगत,

दाश्वांसो दाशुषः सुतम् ॥ २५ ॥ विश्वेदेवासो अप्तुरः सुतमागन्त तूर्णयः । उस्रा इवासुसराणि ॥ २६ ॥ विश्वे देवासो अस्रिध एहि मायासो अद्रुहः, मेधं जुषन्त वह्नयः ॥२७॥ पावका नः सरस्वती वाजेभिर्वाजिनीवती, यज्ञं वष्टुधियावसुः ॥२८॥ चोदयित्री सूनृतानां चेतन्ती सुमतीनां, यज्ञन्दधे सरस्वती ॥२९॥ महो अर्णः सरस्वती प्रचेतयति केतुना, धियो विश्वा विराजति ॥ ३० ॥ (सू० ३) (इत्यृग्वेदेऽग्नि-सू०   अथ यजुरग्निसू०) ॥ यजुर्भागे सर्वत्रऋष्यादेः स्फुटतयानवगमादृचां विभागो नास्ति । अत एव ऋगाभासेप्यच्छिन्नैवाहुतिर्विहिता) । अतो यजुषि आधुनिकै **"अग्निर्मूर्धा"** इत्यादिस्थले यदृग्वेदत ऋक्पूर्त्तिः कृता तत्तु साहसम् । अन्यथा "ज्वलादेवीसूक्तेययजुषि **"अग्न आयूंष्यग्ने पवस्वाग्न पावक रोचिषा"** इत्यादौ सर्वत्र **"अग्न आयूंषि पवस्व"** इति **"अग्ने पवस्व स्वपा"** इत्थमेव ऋक्पूर्तौ अतिव्याप्तिः स्यात् तथा सति लोगाधिकृतेरप्रामाण्यं स्यात् । अतो मया प्राचीनक्रमेणैव लिख्यते ॥) ("ईळे अग्निमित्याङ्गिरसाधाया आग्नेयं गायत्रम्" **ईळे अग्निं विपश्चितं गिरा यज्ञस्य साधनम्, श्रुष्टीवानं धितावानम् । अग्ने शकेम ते वयं यमं देवस्य वाजिनः, अतिद्वेषांसि तरेम । घृतु-**

पाजा अमर्त्यो घृतनिर्णिक्स्वाहुतः, अग्निर्यज्ञस्य हव्यवाट् । तं सबाधो यतस्रुच इत्था
धिया यज्ञवन्तः, आ चक्रुरग्निमूतये । नवं नू स्तोममग्नये दिवः श्येनाय जीजनत्, वस्वः
कुविद्वनाति नः । स्पार्हा यस्य श्रियो दृशे रयिर्वीरवतो यथा, अग्ने यज्ञस्य चेततः ।
उप त्वा रण्वसन्दृशं प्रयस्वन्तः सहस्कृत, अग्ने ससृज्महे गिरः । उप छायामिव
घृणेरगन्म शर्म ते वयम्, अग्ने हिरण्यसन्दृशः । अग्ने मृळ महाँ असि य ईमा देवयु-
ञ्जनम्, इयेथ बर्हिरासदम् । स मानुषीषु दूळभो विक्षु प्रावीरमर्त्यः, दूतो विश्वेषां
भुवत् । और्वभृगुवच्छुचिमप्नवानवदा हुवे, अग्निं समुद्रवाससम् । आसवं सवितुर्यथा
भगस्येव भुजिं हुवे, अग्निं० । हुवे वातस्वनं कविं पर्जन्यक्रन्द्यं सहः, अग्निं० ।
उप त्वा जामयो गिरो देदिशतीर्हविष्कृतः, वायोरनीके अस्थिरन् । यस्य त्रिधा-
त्ववृतं बर्हिस्तस्थावसन्दिनम्, आपश्चिन्निदधा पदम् । अग्निर्मूर्धा । उदग्ने शुच-
यस्तव शुक्रा भ्राजन्त ईरते, तव ज्योतींष्यर्चयः । ईशिषे वार्यस्य हि दात्रस्याग्ने
स्वर्पतिः, स्तोता स्यां तव शर्मणि । त्वामग्ने मनीषिणस्त्वां हिन्वन्ति चित्तिभिः,
त्वां वर्धन्तु नो गिरः । अदब्धस्य सुधावतो दूतस्य रेभतः सदा, अग्ने सख्यं वृणी-

महे । अग्निः शुचिव्रततमः शुचिर्विप्रः शुचिष्कविः, शुचीरोचत आहुतः ॥ (इति यजुरग्निसू० ॥ अथ ऋग्वेदे सूर्यसू०) प्रत्यक्षदेवं विषदं सहस्रमरीचिभिः शोभित-भूमिदेशम् । सप्ताश्वगं सद्ध्वजहस्तमाद्यं देवं भजेऽहं मिहिरं हृदब्जे ॥ (उदुत्यं सप्तोना सौर्य नवाद्या गायत्र्योऽन्त्यस्तृचो रोगघ्नोऽन्त्योऽर्धर्चो द्विषद्वेष उपनिषत्) उदु त्यं जातवेदसं देवं वहन्ति केतवः, दृशे विश्वाय सूर्यम् ॥ १ ॥ अप त्ये तायवो यथा नक्षत्रा यन्त्यक्तुभिः, सूराय विश्वचक्षसे ॥ २ ॥ अदृश्रन्नस्य केतवो विरश्मयो जनाँ अनु, भ्राजन्तो अग्नयो यथा ॥ ३ ॥ तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य, विश्व-माभासि रोचनम् ॥ ४ ॥ प्रत्यङ् देवानां विशः प्रत्यङ्ङुदेषि मानुषान्, प्रत्यङ्विश्वं स्वर्दृशे ॥ ५ ॥ येना पावक चक्षसा भुरण्यन्तं जनाँ अनु । त्वं वरुण पश्यसि ॥ ६ ॥ वि द्यामेषि रजस्पृथ्वहा मिमानो अक्तुभिः, पश्यञ्जन्मानि सूर्य ॥ ७ ॥ सप्त त्वा हरितो रथे वहन्ति देव सूर्य, शोचिष्केशं विचक्षण ॥८॥ अयुक्त सप्त शुन्ध्युवः सूरो रथस्य नप्त्यः, ताभिर्याति स्वयुक्तिभिः ॥ ९ ॥ उद्वयं तमसस्परि ज्योतिष्प-श्यन्त उत्तरम् । देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ॥ १० ॥ उद्यन्नद्य मित्रमह

आरोहन्नुत्तरां दिवम् । हृद्रोगं मम सूर्य हरिमाणं च नाशय ॥ ११ ॥ शुकेषु मे हरिमाणं रोपणाकासु दध्मसि । अथो हारिद्रवेषु मे हरिमाणं निदध्मसि ॥ १२ ॥ उदगादयमादित्यो विश्वेन सहसा सह । द्विषन्तं मह्यं रन्धयन्मो अहं द्विषते रधम् ॥ १३ ॥ समैक्षिषोर्ध्वमहसा आदित्येन महीयसा । अहं व्यशस्विनां ... विश्वा रूपाण्यादधे ॥ १४ ॥ उद्यन्नद्यविनोभज पिता पुत्रेभ्यो यथा दीर्घायुत्वस्य हेषिषे तस्य नो धेहि सूर्य ॥ १५ ॥ उद्यन्तं त्वा मित्रमह आरोहन्तं विचक्षण । पश्येम शरदः शतं जीवेम शरदः शतम् । ॥ १६ ॥ (इत्यृग्वेदे सूर्यसू०) । अथ यजुषि । अच्छिन्नाहुतिर्देया ॥ उदुत्यमिति, षडर्चमादित्यस्यायं नोभ्रेर्ब्राह्मणः ॥ उदु त्यं जातवेदसं देवं वहन्ति केतवः । दृशे विश्वाय सूर्यम् ॥ चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः । आप्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च ॥ द्यां गच्छ स्वर्गच्छ रूपो वो रूपेणाभ्यागां वयसा वयस्तुथो वो विश्ववेदा विभजतु वर्षिष्ठेऽधिनाके एतत्ते अग्ने राध एति सोमच्युतं तन्मित्रस्य पथा नयर्तस्य पथा प्रेत चन्द्रदक्षिणा ब्राह्मणमद्यर्ध्यासं पितृमन्तं पैतृमत्यमृषिमार्षेयँ सुधातुदक्षिणम् ॥

अयं नो अग्निर्वरिवस्कृणोत्वयं मृधः पुर एतु प्रभिन्दन्, अयं शत्रूञ्जयतु जर्हृषाणोऽयं वाजञ्जयतु वाजसातौ ॥ वनेषु व्यन्तरिक्षं ततान वाजमर्वत्सु पयो अघ्न्यासु । हृत्सु क्रतुं वरुणो विक्ष्वग्निं दिवि सूर्यमदधात्सोममद्रौ ॥ वि स्वः पश्य व्यन्तरिक्षं यतस्व सदस्यैरस्मद्दाता मधुमती देवत्रा गच्छ प्रदातारमाविशानवहायास्मान्देवि दक्षिणे देवयानेन पथायती सुकृताल्लोके सीदतन्नौ संस्कृतम् ॥ कदाचन स्तरीरसि नेन्द्र सश्चसि दाशुषे । उपोपेन्नु मघवन्भूय इन्नु ते दानं देवस्य पृच्यते, उपयामगृहीतोस्यादित्येभ्यस्त्वा ॥ १ ॥ कदाचन प्रयुच्छस्युभे निपासि जन्मनी, तुरीयादित्यसवनं त इन्द्रियमातस्थावमृतं दिवि, उपयामगृही० ॥ २ ॥ यज्ञो देवानां प्रत्येति सुम्नमादित्यासो भवता मृळयन्तः । आवोऽर्वाची सुमतिर्ववृत्यादँहोश्चिद्या वरिवोवित्तरासत्, उपयामगृ० ॥ ३ ॥ विवस्वन्नादित्यैष ते सोमपीथस्तस्मिन्मन्दस्व या दिव्या वृष्टिस्तया त्वा श्रीणामि । अदब्धेभिः सवितः पायुभिष्ट्वँ शिवेभिरद्य परिपाहि नो गयम् । हिरण्यजिह्वः सुविताय नव्यसे रक्षा माकिर्नो अघशँस ईशत, उपयामगृहीतोऽसि देवाय त्वा सवित्रे उपयामगृही-

तोसि सुशर्मासि सुप्रतिष्ठानो बृहदुक्षे नम एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः॥ ॥ ॐनम आदित्याय, शिवचर्याधराय, सहस्रकिरणाय, कमलबान्धवाय, ग्रहाधिपतये, यजमानवरप्रदाय स्वाहा ॥ तर्पणं **उदयंस्तु महाभानुस्तेजसा चाभयंकरः। सहस्ररश्मिदीप्तश्च ह्यादित्यः प्रीयतां मम ॥** अनेन मंत्रहोमेन० अग्न्यादित्यौ सानुचरौ प्रीयेतां प्रीतौ मे भवेताम्॥ इत्यग्न्यादित्यसूक्तं ॥

अथ वरुणचन्द्रमःसूक्तम्।

एवा वन्दस्व० १ याते धामानि० २ (ऋ० पृ० २३-३) श्यामं सौम्यरुचिं महामुनिनुतं यादोगणैः संस्तुतं, पाशं दण्डवरं दधानममलं दोर्भ्यां गजस्थं विभुम्। आशापाशशतघ्नमश्चितदृशं मानोन्नतं यादसां राजानं प्रमदान्वितमभयदं देवं भजेहं सदा॥ ॥ **शङ्खप्रभमेणप्रियं शशाङ्कमीशानमौलिस्थितमीड्यरूपम्। तमीपतिमम्बुजयुग्महस्तं ध्याये हृदब्जे शशिनं ग्रहेशम् ॥** स्वादो पञ्चोना: प्रगाथः सौम्यं त्रैष्टुभं पञ्चमी जगती ॥ ॥ **स्वादोरभक्षि वयसः सुमेधाः स्वाध्यो वरिवोवित्तरस्य। विश्वेयं देवा उत मर्त्यासो मधुब्रुवन्तो अभि सञ्चरन्ति ॥ १ ॥** अन्तश्च प्रागा अदितिर्भवास्यवयाता **हरसो**

दैव्यस्य । इन्दविन्द्रस्य सख्यं जुषाणः श्रौष्टीव धुरमनु राय ऋध्याः २ अपाम-
सोममभृता अभूमागन्म ज्योतिरविदाम देवान् । किं नूनमस्मान्कृणवदरातिः किमु
धूर्तिरमृतमर्त्यस्य ३ शन्नोभवहृद आपीत इन्दो पितेव सोम सूनवे सुशेवः ।
सख्येव सख्य उरुशंस धीरः प्राण आयुर्जीवसे सोम तारीः ॥ ४ ॥ इमे मा
पीता यशसा उरुष्यवो रथं न गावः सुमनाह पर्वसु । ते मा रक्षन्तु विस्रस-
श्चरित्रादुत मा स्रामाद्यवयन्त्विन्दवः ॥ ५ ॥ अग्निर्नमा मथितं सन्दिदीपः
प्रचक्षय कृण्वहि वस्यसोनः । अथा हिते मद आ सोम मन्ये रेवाँ इव प्रचरा
पुष्टिमच्छा ॥ ६ ॥ इषिरेण ते मनसा सुतस्य भक्षीमहि पित्र्यस्येव रायः । सोम
राजन्प्राण आयूँषि तारीरहानीव सूर्यो वासराणि ॥ ७ ॥ सोम राजन्मृळया नः
स्वस्ति तव स्मसि व्रत्यास्तस्य विद्धि । अलर्ति दक्ष उत मन्युरिन्दो मा नो अर्यो
अनुकामं परा दाः ॥ ८ ॥ त्वं हि नस्तन्वः सोम गोपा गात्रेगात्रे नृषु सत्था
नृचक्षाः । यत्ते वयं प्रमिनाम व्रतानि स नो मृळ सुषखा देववस्यः ॥ ९ ॥ ऋदू-
दरेण सख्या सचेय यो मा न रिष्येद्धर्यश्वपीतः । अयं यः सोमो न्यधाय्यस्मे

तस्मा इन्द्रं प्रतिरमेम्यायुः ॥ १० ॥ अपत्या अस्थुरनिरा अमीवा निरत्र-
सन्तमिषीचीरभैषुः । आ सोमो अस्माँ अरुहद्विहाया अगन्म यत्र प्रतिरन्त
आयुः ॥ ११ ॥ यो न इन्दुः पितरो हृत्सु पीतोऽमर्त्यो मर्त्याँ आविवेश । तस्मै
सोमाय हविषा विधेम मृळीके अस्य सुमतौ स्याम ॥ १२ ॥ त्वं सोम पितृभिः
संविदानोऽनु द्यावापृथिवी आततन्थ । तस्मै त इन्दो हविषा विधेम वयं स्याम
पतयो रयीणाम् ॥ १३ ॥ त्रातारो देवा अधि वोचता नो मा नो निद्रा ईशत
मोत जल्पिः । वयं सोमस्य विश्वाह प्रियासः सुवीरसो विदथमा विदेम ॥ १४ ॥
त्वं नः सोम विश्वतो वयोधास्त्वं स्वर्विदा विशा नृचक्षाः । त्वं न इन्द ऊतिभिः
सजोषाः पाहि पश्चातादुतवा पुरस्तात् ॥ १५ ॥ इत्यृचि ॥ अथ यजुषि ॥ (प्रवेदसे
इति वेदसो वन्दारोर्वैष्णवस्य शेषस्तिस्रः पाप्मापहस्य) प्रवेदसे कवये वेद्याय वचो
वन्दारु वृषभाय वृष्णे । यतोभयमभयं तन्नो अस्त्वव देवानां यजेहेड्यानि ॥
समिधाग्निं दुवस्यत घृतैर्बोधयतातिथिम् । आस्मिन्हव्या जुहोतन ॥ उदग्ने तव
तद्घृतादर्चीरोचत आहुतम्, निंसानं जुह्वो मुखे ॥ उप त्वा जुह्वो मम घृताचीर्यन्तु

हर्यत, अग्नेहव्या जुषस्व नः ॥ प्रजा अग्ने संवासयाशाश्च पशुभिः सह । राष्ट्राण्यस्मा आधेहि यान्यासन्सवितुः सवे ॥ संव्वः सृजामि हृदयं संसृष्टं मनो अस्तु वः । संसृष्टास्तन्वः सन्तु वः सँसृष्टः प्राणो अस्तु वः । संय्यः वः प्रियास्तन्वः सं प्रिया हृदयाणि वः । आत्मा वो अस्तु सं प्रियः सं प्रियास्तन्वो मम ॥ यो अश्वत्थः शमीगर्भ आरुरोह त्वय्यपि । तत्ते गृह्णामि यज्ञियैः केतुभिः सह ॥ मयि गृह्णाम्यहमग्ने अग्निं रायस्पोषेण सह वर्चसेह देवाः । मयि प्रजां मयि पुष्टिं दधामि मदेमशतहिमाः सुवीराः ॥ योनो अग्निः पितरो हृत्स्वन्तरा मर्त्यो मर्त्यां आविवेश। तमात्मनि परि गृह्णीमहे वयं मैषो अस्मानवहाय परागान्मा वयमेतमवहाय परागम ॥ मही विश्पत्नी सदनी ऋतस्यार्वाची एतं धरुणी रयीणाम् । अन्तर्वती जन्यं जातवेदसमध्वराणां जनयन्तं पुरो गाम् ॥ उत्समुद्राँ मधुमाँ ऊर्मिरागात्साम्राज्याय प्रतरन्दधानः । अमी च ये मघवानो वयं चेषमूर्जं मधुमत्सम्भरेम ॥ इयत्यग्र आसीरदो देवि प्रथमाना पृथग्यत् । देवैर्नुत्ता व्यसर्पो महित्वा अदृंहथाः शर्कराभिस्त्रिविष्टपि ॥ अजयो लोकान्प्रदिशश्चतस्रः । उदेह्यग्ने अधि मातुः पृथिव्या विश

आविश महतः सधस्थात् । आशुन्त्वाजौ दधिरे देवयन्त हव्यवाहं भुवनस्य गोपाम् ॥ यदीदं दिवो यदि वा पृथिव्याः सम्बभूव सुकृत रराणयोः । तयोः पृष्टे सीदतु जातवेदाः प्रजामस्मभ्यं जनयन्नर्यिं च ॥ चन्द्रमग्निं चन्द्ररथँ हरिवृतं वैश्वानरमप्सुषदँ स्वर्विदम् । विगाहं तूर्णिं तविषोभिरावृतं तूर्णिं देवा स इह स्वश्रियन्दधुः ॥ यत्पृथिव्या अनामृतँ सम्बभूवत्वे सचा । तदग्निरग्नये ददत्तस्मिन्नाधीयतामयम् ॥ यदन्तरिक्षस्य यद्दिवो अनामृतँ सम्बभूवत्वेसचा । तदग्नि० ॥ ॐ नमः सोमाय, उमाचर्याधराय, षोडशकलाधिपतये, नक्षत्राधिपतये, कुमुदबान्धवाय, परमामृतधारिणे, यजमानवरप्रदाय स्वाहा । (तर्पणं) द्विजराजो महापुण्यस्तारापतिर्विशेषतः । ओषधीनां च यो राजा स सोमः प्रीयतां मम ॥ अनेन मंत्रहोमेन० वरुणचन्द्रमसौ सानुचरौ प्रीयेतां प्रीतौ मे भवेताम् ॥ इति वरुणचन्द्रमःसूक्तम् ॥

अथ कुमारभौमसूक्तम् ।

तँ युवन्देवा० ॥ १ ॥ अग्निर्मूर्धा० ॥ २ ॥ (ऋ० पृ० २३–६) षड्वक्त्रं दीर्घबाहुं सुरवरनमितं पार्वतीनन्दनं तं दोर्भ्यां शक्तिं वहन्तं ध्वजमपि च सदा दिव्यरूपं कुमा-

रम् । नृत्यन्मत्तमयूरवाहनगतं दैत्यान्तकं सिद्धिदं नानारत्नविभूषितं हरसुतं होमे भजेऽहं सदा ॥ ॥ प्रतप्तगाङ्गेयनिभं ग्रहेशं सिंहासनस्थं कमलासिहस्तम् । सुरासुरैः पूजितपादपद्मं भौमं दयालुं हृदये स्मरामि ॥ अग्निर्होता दशगायत्रं ऋषिर्बोधद्दाभ्यां सोमकं साहदेव्यमभ्यवदत्पराभ्यामस्याश्विनावाऽयुरयाचत ॥ अग्निर्होता नो अध्वरे वाजी सन्परि णीयते, देवो देवेषु यज्ञियः ॥ १ ॥ परि त्रिविष्टयध्वरं यात्यग्नी रथीरिव, आ देवेषु प्रयो दधत् ॥ २ ॥ परि वाजः पतिः कविरग्निर्हव्यान्यक्रमीत्, दधद्रत्नानि दाशुषे ॥ ३ ॥ अयं यः सृञ्जये पुरो दैववाते समिध्यते, द्युमाँ अमित्रदंभनः ॥ ४ ॥ अस्य गा वीर ईवतोऽग्नेरी शीत मर्त्यः, तिग्मजम्भस्य मीळुषः ॥ ५ ॥ तमर्वन्तं न सानसिमरुषं न दिवः शिशुम्, मर्मृज्यन्ते दिवे दिवे ॥ ६ ॥ बोधन्मा हरिभ्यां कुमारः साहदेव्यः, अच्छा न हूत उदरम् ॥ ७ ॥ उत त्या यजता हरी कुमारात्साहदेव्यात, प्रयता सद्य आददे ॥ ८ ॥ एष वां देवावश्विना कुमाराः साहदेव्याः, दीर्घायुरस्तु सोमकः ॥ ९ ॥ तं युवं देवावश्विना कुमारं साहदेव्यम्, दीर्घायुषं कृणोतन ॥ १० ॥इति ऋग्वेदे ॥ अथ यजुषि (जुष्टो दमूना

इत्यनूच्यमानो ब्रह्मणः) जुष्टो दमूना अतिथिर्दुरोण इमं नो यज्ञमुप याहि विद्वान् । विश्वा अग्ने अभियुजो विहत्या शत्रूयतामा भरा भोजनानि ॥ अग्ने शर्ध महते सौभगाय तव द्युम्नान्युत्तमानि सन्तु । सं जास्पत्यं सुयममा कृणुष्व शत्रूयतामभि तिष्ठा महाँसि ॥ सँसमिद्युवसे वृषन्नग्ने विश्वान्यर्य आ । इळस्पदे समिध्यसे स नो वसून्या भर ॥ सखायः सं वः सम्यञ्चमिषँ स्तोमं चाग्नये । वर्षिष्ठाय क्षितीनामूर्जो नप्त्रे सहस्वते ॥ अग्निस्तुविश्रवस्तमं तुवि ब्रह्माणमुत्तमम् । अतूर्तं श्रावयत्पतिं पुत्रं ददाति दाशुषे । अग्निर्ददाति सत्पतिं सासाह यो युधा नृभिः । अग्निरत्यँ रघुष्यदं जेतारमपराजितम् ॥ भद्रो अग्न इमो अग्ने ॥ उत नो ब्रह्मन्नविष उक्थेषु देवहूतमः । शं नः शोचा मरुद्वृधोऽग्ने सहस्रसातमः ॥ नू नो रास्व सहस्रवत्तोकवत्पुष्टिमद्वसु । द्युमदग्ने सुवीर्यम् ॥ वर्षिष्ठमनुपक्षितं त्वां चित्रः श्रवस्तमम् । त्वामग्ने हविष्मन्तो विपाजसा ॥ भवानो अग्ने वितोत गोपा भवावयस्कृदुत नो वयोधाः । रास्वा च नः सुमहो हव्यदातिं त्रास्वोत नस्तन्वो अप्रयच्छन् ॥ हव्यवाहमभिमातिषाहँ रक्षोहनं पृतनासु जिष्णुम् । ज्योतिष्मन्तं दीद्यतं पुरन्धिमग्निं

स्विष्टकृतमाहुवेम ॥ ॥ स्विष्टमऽग्ने अभितद्गृणीहि विश्वाश्च देव पृतना अभिष्याः । सुगं नु पन्थां प्रदिशन्विभाहि ज्योतिष्मद्धेह्यजरं न आयुः ॥ सोमस्य मा तवसंवक्ष्यग्ने वह्निं चकर्थ विदथे यजध्यै देवाँ अच्छा दीद्यद्युञ्जे अद्रिं शमाये अग्ने तन्वँ जुषस्व ॥ श्रीणामुदारः । यच्चिद्धि ते पुरुषत्रा यविष्ठाचित्तिभिश्चकृमा कच्चिदागः । कृधीष्वस्माँ अदितेरनागान्व्येनाँसि शिश्रथो विष्वगग्ने ॥ महश्चिदग्न एनसो अभीक ऊर्वाद्देवानामुत मर्त्यानाम् । मा ते सखायः सदमिद्रिषाम यच्छा तोकाय तनयाय शं योः ॥ ॥ यं त्वा देवापिः शुशुचानो अग्न आर्ष्टिषेणो मनुष्यः समीधे । विश्वेभिर्देवैरनुमद्यमानः प्र पर्जन्यमीरया वृष्टिमन्तम् ॥ अग्ने बाधस्व वि मृधो वि दुर्गहापामीवामप रक्षांसि सेध । अस्मात्समुद्राद्बृहतो दिवो नोऽपां भूमानमुप नः सृजेह ॥ यथा ह त्यद्वसवो गौर्यं चित्पदि षिताममुञ्चता यजत्राः । एवो ष्वस्मन्मुञ्चता व्यँहः प्रतार्यग्ने प्रतरं न आयुः ॥ त्रीण्यायूँषि तव जातवेदस्तिस्र आजानीरुषसस्ते अग्ने । ताभिर्देवानामवो यक्षि विद्वानथा भव यजमानाय शं योः ॥ पिप्रीहि देवाँ उशतो यविष्ठ विद्वाँ ऋतूँ ऋतुपते यजेह । ये दैव्या ऋत्विजस्तेभिरग्ने त्वं

होतॄणामस्या यजिष्ठः ॥ आ देवानामपि पन्थामगन्म यच्छक्नवाम तदनु प्रवोढुम् । अग्निर्विद्वान्स यजात्सेदु होता सो अध्वरान्स ऋतून्कल्पयाति ॥ वि ज्योतिषा बृहता भात्यग्निराविर्विश्वानि कृणुते महित्वा । प्रादेवीर्मायाः सहते दुरेवाः शिशीते शृङ्गे रक्षसे विनिक्षे ॥ स्वाध्वी यकर्देववहूतिर्नो अद्य यज्ञस्य जिह्वामविदाम गुह्याम् । स आयुरागात्सुरभिर्वसानो भद्रामकर्देवहूतिर्नो अद्य ॥ अग्निर्होता न्यसीदद्यजीयानुपस्थे मातुः सुरभा उ लोके । युवा कविः पुरुनिष्ठा ऋतावा धर्ता कृष्टीनामुत मध्य इद्धः ॥ अग्निर्दूतं पुरो दधे हव्यवाहमुपब्रुवे । देवाँ आसादयादिह ॥ अग्निर्होता पुरोहितोऽध्वरस्य विचर्षणिः । स वेद यज्ञमानुषक् ॥ ॐनमोऽङ्गारकाय, कुमारव्रतधारिणे, महोग्रतेजसे तीक्ष्णकिरणाय, धरासुताय, शत्रुक्षयङ्कराय, रुद्रतनूजाय, यजमानवरप्रदाय स्वाहा ॥ (तर्पणं) येनार्जिता जगत्कीर्तिर्भूमिपुत्रेण शाश्वती । शत्रवश्च हता येन भौमेन महितात्मना । स प्रीयतां तु भौमोऽद्य तुष्टो भूयात्सदा मम ॥ अनेन मंत्रहोमेन० कुमारभौमौ सानुचरौ प्रीयेतां प्रीतौ मे भवेताम् ॥ इति कुमारभौमसूक्तम् ॥

अथ विष्णुबुधसूक्तम् ।

वषट्ते विष्ण० ॥ १ ॥ बोधास्व मे० ॥ २ ॥ (ऋ० पृ० २३–८) विष्णुं सर्वजनाश्रयं सुमुकुटं हारादिभूषान्वितं शान्तं श्यामवराननं सुरुचिरं दोर्भिश्चतुर्भिर्युतम् । शङ्खं चक्रमथारबिन्दयुगलं कौमोदकीं बिभ्रतं देवं तं गरुडाश्रयं सुनयनं दिव्याङ्गभूषं भजे ॥ **सोमात्मजं हंसगतं द्विबाहुं शङ्खेन्दुरूपमसिपाशहस्तम् । दयानिधिं भूषणभूषिताङ्गं बुधं स्मरे मानसपङ्कजेऽहम् ॥** विष्णोः षड्वैष्णवं हि प्रवोजागतं त्वैन्द्रश्चाद्यस्तृचो भव पञ्चाबोधि षडाश्विनं त्वन्ते त्रिष्टुभौ ॥ **विष्णोर्नु कं वीर्याणिप्रवोचं यः पार्थिवानि विममे रजांसि । यो अस्कभायदुत्तरं सधस्थं विचक्रमाणस्त्रेधोरुगायः १ प्रतद्विष्णुः स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठः । यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा २ प्र विष्णवे शूषमेतु मन्म गिरिक्षित उरुगायाय वृष्णे । य इदं दीर्घं प्रयतं सधस्थमेको विममे त्रिभिरित्पदेभिः ३ यस्य त्री पूर्णा मधुना पदान्यक्षीयमाणा स्वधया मदन्ति । य उ त्रिधातु पृथिवीमुत द्यामेको दाधार भुवनानि विश्वा ४ तदस्य प्रियमभि पाथो अश्यां नरो यत्र देव-**

नरो मदन्ति । उरुक्रमस्य स हि बन्धुरित्था विष्णोः पदे परमे मध्व उत्सः ५ ता
वाँ वास्तून्युश्मसि गमध्यै यत्र गावो भूरिशृङ्गा अयासः । अत्राह तदुरुगायस्य
वृष्णः परमं पदमव भाति भूरि ६ प्र वः पातमन्धसो धियायते महे शूराय
विष्णवे चार्चत । या सानूनि पर्वतानामदाभ्या महस्तस्थतुरर्वतेव साधुना ७
त्वेषमित्था समरणं शिमीवतोरिन्द्राविष्णू सुतपा वामुरुष्यति । या मर्त्याय प्रति-
धीयमानमित्कृशानोरस्तुरसनामुरुष्यथः ८ ता ई वर्धन्ति मह्यस्य पौंस्यं नि मातरा
नयति रेतसे भुजे । दधाति पुत्रोऽवरं परं पितुर्नाम तृतीयमधि रोचने दिवः ९
तत्तदिदस्य पौंस्यं गृणीमसीनस्य त्रातुरवृकस्य मीळ्हुषः । यः पार्थिवानि त्रिभिरिद्वि-
गामभिरुरु क्रमिष्टोरुगायाय जीवसे १० द्वे इदस्य क्रमणे स्वर्दृशोऽभिख्याय मर्त्यो
भुरण्यति । तृतीयमस्य नकिरा दधर्षति वयश्चन पतयन्तः पतत्रिणः ११ चतुर्भिः
साकं नवतिं च नवभिश्चक्रं न वृत्तँ वृतीँरवीविपत् । बृहच्छरीरो विमिमान ऋक्वभि-
र्युवाकुमारः प्रत्येत्याहवम् ॥ १२ ॥ भवा मित्रो न शेव्यो घृतासुतिर्विभूतद्युम्न
एवया उ सप्रथाः । अधा ते विष्णो विदुषा चिदर्ध्यः स्तोमो यज्ञश्च राध्यो हवि-

ष्मता ॥ १३ ॥ यः पूर्व्याय वेधसे नवीयसे सुमज्जानये विष्णवे ददाशति । यो जातमस्य महतो महि ब्रवत्सेदु श्रवोभिर्युज्यं चिदभ्यसत् ॥ १४ ॥ तमस्तोतारः पूर्व्यं यथा विद ऋतस्य गर्भं जनुषा पिपर्तन । आस्यजानन्तो नाम चिद्विवक्तन महस्ते विष्णो सुमतिं भजामहे ॥ १५ ॥ तमस्य राजा वरुणस्तमश्विना क्रतुं सचन्त मारुतस्य वेधसः । दाधार दक्षमुत्तममहर्विदं व्रजं च विष्णुः सखिवाँ अपोर्णुते ॥ ॥ १६ ॥ आ यो विवाय सचथाय दैव्य इन्द्राय विष्णुः सुकृते सुकृत्तरः । वेधा अजिन्वत्त्रिषधस्थ आर्यमृतस्य भागे यजमानमाभजत् ॥ १७ ॥ अबोध्यग्निर्ज्म उदेति सूर्यो व्यूषाश्चन्द्रा मह्यावो अर्चिषः । आयुक्षातामश्विना यातवे रथँ प्रासावी-द्देवः सविता जगत्पृथक् ॥ १८ ॥ यद्युञ्जाथे वृषणमश्विना रथँ घृतेन नो मधुना क्षत्रमुक्षतम् । अस्माकं ब्रह्म पृतनासु जिन्वतं वयं धना शूरसाता भजेमहि ॥ १९ ॥ अर्वाङ्त्रिचक्रो मधुवाहनो रथो जीराश्वो अश्विनोर्यातु सुष्टुतः । त्रिबन्धुरो मघवा विश्वसौभगः शंन आवक्षद्द्विपदे चतुष्पदे ॥ २० ॥ आ न ऊर्जं वहतमश्विना युवं मधुमत्या नः कशया मिमिक्षतम् । प्रायुस्तारिष्टं नीरपांसि मृक्षतं सेधतं द्वेषो

भवत सचाभुवा ॥ २१ ॥ युवं ह गर्भं जगतीषु धत्थो युवं विश्वेषु भुवनेष्वऽन्तः । युवमग्निं च वृषणावपश्च वनस्पतीं रश्विनावैरयेथाम् ॥ २२ ॥ युवं हस्थो भिषजा भेषजेभिरथो ह स्थो रथ्या रथेभिः । अथो ह क्षत्रमधि धत्थ उग्रा यो वां हविष्मान्मनसा ददाश ॥ २३ ॥ इति ऋग्वेदे ॥ अथ यजुर्वेदे (रथन्तरं रथेन वैष्णवं सर्वे वाजपेयमश्वाः देवानामार्षम्) रथन्तरँ साम भवत्याशीय उज्जित्या इयं वै रथन्तरमस्यामेवाध्यभिषिच्यते, वियोनिर्वै वाजपेयो निरुक्तः सम्प्राजापत्यो निरुक्तसामा तेन वियोनिर्यदनिरुक्ताः प्रातःसवास्तेन स योनिरनिरुक्ताः प्रातःसवा अनिरुक्तः प्रजापतिः प्रजापतिमेवाप्नोति, वाजवतीभिर्मध्यन्दिने स्तुवन्त्यन्नं वै वाजोऽन्नाद्यस्यावरुद्ध्यै चित्रवतीभिरार्भवे पावमाने स्वर्गस्य लोकस्य समष्ट्या । आद्दुदंष्ट्रमुत्तममुक्थानां भवत्युत्तरे एव स्तोत्रे अभिसन्तनोति, बृहत्साम भवति यद्वा अतिरिच्यतेऽमुन्तंल्लोकमभ्यतिरिच्यते, बृहत्वा अमुँल्लोकमाप्नुमर्हतीन्द्रियं वीर्यं बृहदिन्द्रियं एव वीर्यं प्रतितिष्ठति वैष्णवीषु शिपिविष्टवतीषु, स्तुवन्त्येषा वै प्रजापतेः पशुष्टास्तनूर्या शिपिविष्टवती, तस्माच्छिपिविष्टवतीषु स्तुवन्त्यतिरिक्तं वा एतदतिरिक्तं शिपिविष्टम-

तिरिक्तेनैवातिरिक्तमाप्नोति ॥ ॐ नमोबुधाय, विष्णुव्रतधारिणे, रूपाधिपतये, महाबुद्धिशरीराय, सोमवंशजाय, यजमानवरप्रदाय स्वाहा । तर्पणम्) बुधो बुद्धिप्रदाता च सोमपुत्रो महाद्युतिः । आदित्यस्य रथे तिष्ठन्स बुधः प्रीयतां मम अनेन मंत्र होमेन० विष्णुबुधौ सानुचरौ प्रीयेतां प्रीतौ मे भवेताम् ॥ इति विष्णुबुधसूक्तम् ॥

अथ इन्द्राबृहस्पतिसूक्तम् ॥

त्रातारमिन्द्र० ॥ १ ॥ बृहस्पते अति० ॥ २ ॥ (ऋ० पृ० । २३–११) उद्यत्सूर्याशुतरुचिनिभं मौलिरत्नांशुदीप्तं देवं पद्माशनिकरमजं नेत्रसाहस्ररम्यम् । हारानर्घ्यस्फुरदुरुमणिव्याप्तवक्षःस्थलं तं ध्याये देवैः प्रणमितपदं पूर्वदिक्पालमिन्द्रम् ॥ तेजोमयं शक्तित्रिशूलहस्तं सुरेन्द्रजेष्ठस्तुतपादपद्मम् । मेधानिधिं मत्स्यगतं द्विबाहुं गुरुं स्मरे मानसपङ्कजेऽहम् ॥ बृहस्पते बृहस्पतिर्ज्ञानं तुष्टाव नवमी जगती ॥ बृहस्पते प्रथमं वाचो अग्रं यत्प्रैरत नामधेयं दधानाः । यदेषां श्रेष्ठं यदरिप्रमासीत्प्रेणा तदेषां निहितं गुहाविः ॥ १ ॥ सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत । अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधि वाचि ॥ २ ॥ यज्ञेन वाचः पदवीयमायन्तामन्व-

विन्दन्नृषिषु प्रविष्टाम् । तामाभृत्या व्यदधुः पुरुत्रा तां सप्त रेभा अभि संनवन्ते॥३॥ उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम् । उत त्वस्मै तन्वं विसस्रे जायेव पत्य उशती सुवासाः ॥ ४ ॥ उत त्वं सख्ये स्थिरपीतमाहुर्नैनं हिन्वन्त्यपि वाजिनेषु । अधेन्वा चरति माययैष वाचं शुश्रुवामफलामपुष्पाम् ॥ ५ ॥ यस्तित्याज सचिविदं सखायं न तस्य वाच्यपि भागो अस्ति । यदीं शृणोत्यलीकं शृणोति नहि प्रवेद सुकृतस्य पन्थाम् ॥ ६ ॥ अक्षण्वन्तः कर्णवन्तः सखायो मनोजवेषु समा बभूवुः । आदघ्नास उपकक्षास उ त्वे ह्रदा इव स्नात्वा उ त्वे ददृशे ॥ ७ ॥ हृदा तष्टेषु मनसो जवेषु यद्ब्राह्मणाः संयजन्ते सखायः । अत्राह त्वं विजहुर्वेद्याभिरोहब्रह्माणो विचरन्त्यु त्वे ॥ ८ ॥ इमे ये नार्वाङ्न परश्चरन्ति न ब्राह्मणासो नसुतेकरासः । त एते वाचमभिपद्य पापया सिरीस्तन्त्रं तन्वते अप्रजज्ञयः ॥ ९ ॥ सर्वे नन्दन्ति यशसागतेन सभासाहेन सख्या सखायः । किल्बिषस्पृत्पितुषणिर्ह्येषामरं हितो भवति वाजिनाय ॥ १० ॥ ऋचां त्वः पोषमास्ते पुपुष्वान्गायत्रं त्वो गायति शक्वरीषु । ब्रह्मा त्वो वदति जातविद्यां यज्ञस्य मात्रां विमिमीत उ त्वः ॥ ११ ॥

इति ऋग्वेदे ॥ अथ यजुषि (इन्द्राय वाचं वदतेन्द्रस्य जगतो, दैवी वाचं प्रत्याज्यशीर्षमानस्यासुरेभ्य, आयुर्यज्ञेन कल्पतामित्यनुवाकद्वयं यावत्पुरुषस्य नारायणस्यार्षम्) ॥ इन्द्राय वाचं वदतेन्द्राय वाचँ संवदतेन्द्रं वाजं जापयतेन्द्रं वाजं जय। आ मा वाजस्य प्रसवो जगम्यादा मा द्यावापृथिवी विश्वरूपे । आ मा गन्तां पितरा मातरा चा मा सोमो अमृतत्वेन गम्यात् ॥ एषा वः सा सत्या सं वागभूद्यामिन्द्रेण समदध्वम् । अजीजपत वनस्पतय इन्द्रं वाजं विमुच्यध्वम् ॥ वाजिनौ वाजिजितौ वाजं जित्वा बृहस्पतेर्भागमवजिघ्रतां । वाजिनो वाजिजितो वाजं जिगीवांसो बृहस्पतेर्भागे निमृजतां पत्नी॥ स्वोरोहावीहि स्वौरोहावेहि स्वोरोहाव स्वोरोहाव स्वोरोहाव स्वोरोहौ ॥ आयुर्यज्ञेन कल्पतां, मनो यज्ञे०, प्राणो य०, चक्षुर्य०, श्रोत्रं य०, वाग्य०, आत्मा य०, ब्रह्मा य०, पृष्ठं य०, यज्ञोयज्ञेन कल्पतां, स्वर्देवा अगन्म प्राजापतेः प्रजा अभूवन्नमृता अभूम ॥ वाजाय स्वाहा, प्रसवाय स्वाहा, पिजाय स्वाहा, क्रतवे स्वाहा, वाक्पतये स्वाहा, वसवे स्वाहा, स्वर्मौर्ध्नाय स्वाहा, मूर्ध्ने वैयशनाय स्वाहा, व्यश्नन आन्त्याय स्वाहा, अन्त्याय भौवनाय स्वाहा, भुवनस्य पतये स्वाहा, प्रजापतये

स्वाहा, अधिपतये स्वाहा, अन्नाय त्वा, वाजाय त्वा, वाजजित्यै त्वा ॥ ॐ नमो बृहस्पतये, ब्रह्मचर्याधराय, प्रजापालपतये, देवराजपुरोहिताय, देवगुरवे, सुरमन्त्रिणे यजमानवरप्रदाय स्वाहा ॥ तर्पणम् ॥ **मेरुमूर्ध्नि समाक्रान्तो देवराजपुरोहितः । ज्ञाता यः सर्वशास्त्राणां स गुरुः प्रीयतां मम ।** अनेन मंत्रहोमेन० इन्द्राबृहस्पती सानुचरौ प्रीयेतां प्रीतौ मे भवेताम् ॥ इति इन्द्राबृहस्पतिसूक्तम् ॥

अथ सरस्वतीशुक्रसूक्तम् ।

सरस्वतीं देवयन्तो० ॥ १ ॥ अश्वात्परिस्रुतो० ॥ २ ॥ (ऋ० पृ० २९–१) उद्यच्चन्द्रसहस्रकोटिसदृशीं पद्माननां हंसगां वाग्देवीं सुमनोहरैर्भुजयुगैर्वीणां तथा पुस्तकम् । पद्मं चामृतपूर्णरत्नचषकं दिव्याम्बरैर्भूषितां सन्धार्य वरदां मनोहरतनुं वाग्देवतां चिन्तये ॥ १ ॥ **सन्तप्तकाञ्चननिभं द्विभुजं दयालुं पीताम्बरं धृतसरोरुहद्वन्द्वशूलम् । क्रौञ्चासनमसुरसेवितपादपद्मं शुक्रं स्मरे द्विनयनं हृदयाम्बुजेऽहम् ॥ २ ॥** इयं षड्ऋचा सारस्वतं त्रिजगत्यादिजगती त्रिष्टुबन्तम् ॥ **इयमददाद्रभसमृणच्युतं दिवोदासं वध्र्यश्वाय दाशुषे । या शश्वन्तमाचखादावसं पणिं ता ते दात्राणि तविषा सरस्वति ॥ १ ॥ इयं शुष्मे-**

भिर्बिसखा इवारुजत्सानु गिरीणां तविषेभिरूर्मिभिः । पारावतघ्नीमवसे सुवृक्तिभिः
सरस्वतीमा विवासेम धीतिभिः ॥ २ ॥ सरस्वति देवनिदो निबर्हय प्रजां विश्वस्य
बृसयस्य मायिनः । उत क्षितिभ्योऽवनीरविन्दो विषमेभ्यो अस्रवो वाजिनीवति
॥ ३ ॥ प्रणो देवी सरस्वती वाजेभिर्वाजिनीवति, धीनामविन्त्र्यवतु ॥ ४ ॥ यस्त्वा
देवि सरस्वत्युपब्रूते धने हिते, इन्द्रं न वृत्रतूर्ये ॥ ५ ॥ त्वं देवि सरस्वत्यवा वाजेषु
वाजिनी, रदा पूषेव नः सनिम् ॥६॥ उत स्या नः सरस्वती घोरा हिरण्यवर्तनिः, वृत्रघ्नी
वष्टि सुष्टुतिम् ॥ ७ ॥ यस्या अनन्तो अह्रुतस्त्वेषश्चरिष्णुरर्णवः, अमश्चरति रोरुवत्
॥ ८ ॥ सा नो विश्वा अति द्विषः स्वसॄरन्या ऋतावरी, अतन्नहेव सूर्यः ॥ ९ ॥
उत नः प्रियः प्रियासु सप्तस्वसा सुजुष्टा, सरस्वती स्तोम्याभूत् ॥ १० ॥ आपप्रुषी
पार्थिवान्युरु रजो अन्तरिक्षम्, सरस्वती निदस्पातु ॥ ११ ॥ त्रिषधस्था सप्तधातुः
पञ्च जाता वर्धयन्ती, वाजे वाजे हव्या भूत् ॥ १२ ॥ प्रया महिम्ना महिनासु-
चिकिते द्युम्नेभिरन्या अपसामपस्तमा । रथ इव बृहती विभ्वने कृतोपस्तुत्या
चिकितुषा सरस्वती ॥ १३ ॥ सरस्वत्यभि नो नेषि वस्यो माप स्फरीः पयसा

मा न आधक् । जुषस्व नः सख्या वेश्या च मा स्वरक्षेत्राण्यरणानि गन्म ॥ १४ ॥
इति ऋचि ॥ अथ यजुषि ॥ सोमो राज इति द्वावनुवाकौ क्रौञ्चा आङ्गिरसस्य । सुरावन्तमिति मृत्योः सांपारायणस्य ॥ सोमो राजामृतँ सुत ऋजीषेणाजहान्मृत्युम् । ऋतेन सत्यमिन्द्रियं विपानं शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॥ १ ॥ सोममद्भ्यो व्यपिबच्छन्दसा हंसाः शुचिषत् । ऋतेन० ॥ २ ॥ अद्भ्यः क्षीरं व्यपिबत्क्रुङ्ङाङ्गिरसो धिया । ऋतेन० ॥ ३ ॥ अन्नात्परिस्रुतो रसं ब्रह्मणा व्यपिबत्क्षत्रम् । ऋतेन० ॥ ४ ॥ रेतो मूत्रं विजहाति योनिं प्रविशदिन्द्रियम् । गर्भो जरायुणावृत उल्बं जहाति जन्मना । ऋतेन० ॥ ५ ॥ वेदेन रूपे व्यपिबत्सुतासुतौ प्रजापतिः ऋतेत ॥ ६ ॥ दृष्ट्वा रूपे व्याकरोत्सत्यानृते प्रजापतिः । ऋतेन० ॥ ७ ॥ दृष्ट्वा परिस्रुतो रसं शुक्रेण शुक्रं व्यपिबत्, पयः सोमं प्रजापतिः । ऋतेन० ॥ ८ ॥ सुरावन्तं बर्हिषदं सुवीरं यज्ञं हिन्वन्ति महिषा नमोभिः । दधानाः सोमं दिवि देवतासु मदेमेन्द्रं यजमानाः स्वर्काः ॥ यस्ते रसः सम्भृत ओषधीषु सोमस्य शुष्मः सुरया सुतस्य । तेन जिन्व यजमानं मदेम सरस्वतीमश्विनाविन्द्रमग्निम् ॥

यमश्विना नमुचेरासुरादधि सरस्वत्यसुनोदिन्द्रियाय । इमं ते शुक्रं मधुमन्तमिन्द्रं सोमं राजानमिह भक्षयामि ॥ यदत्र रिप्तं रसिनः सुतस्य यदिन्द्रो अपिबच्छचीभिः । अहं तदस्य मनसा शिवेन सोमं राजानमिह भक्षयामि ॥ ॐनमः शुक्राय, इन्दुचर्याधराय, सहस्रकिरणाय, मायाधिपतये, असुरगुरवे, यजमानवरप्रदाय स्वाहा तर्पणं। सोमतुल्या प्रभा यस्य योऽसुराणां गुरुस्तथा । जेता यः सर्वशत्रूणां स काव्यः प्रीयतां मम ॥ अनेन मन्त्रहोमेन सरस्वतीशुक्रौ सानुचरौप्रीयेतां प्रीतौ मे भवेताम् । इति सरस्वतीशुक्रसूक्तम् ॥

अथ प्रजापतिशनैश्चरसूक्तम् ।

प्रजापते न हि ॥ १ ॥ शन्नो देवी० ॥ २ ॥ (ऋ० पृ० २९–४) ब्रह्माणं रक्तवर्णं सुरवरनमितं बाहुभिर्धारयन्तं रक्ताक्षमक्षमालाममृतपरिमितं रक्तपात्रं सुशोभम् । गायत्र्या सन्नियुक्तं समुनिश्रुतिगणैर्वेष्टितं वामभागे नानाभूषासुभूषं प्रहसितवदनं होमकाले भजेऽहम् ॥ नीलाञ्जनाभं मिहिरेष्टपुत्रं ग्रहेश्वरं पाशभुजङ्गपाणिम् । सुरासुराणां भयदं द्विबाहुं शनिं स्मरे मानसपङ्कजेऽहम् ॥ शं वतीः षट्छान्तिरानुष्टुभं पञ्चम्यादि बृहतीजगत्यौ शन्न

पञ्चोना शान्तिः ॥ शंवतीः पारयन्त्येतेदं पृच्छस्व वचो यथा । अभ्यारन्तं समाकेतं य एवेदमिति ब्रवत् ॥ १ ॥ आयाकेतुं परिस्तुतं भारती ब्रह्मवादिनी । सञ्जानानामहीजाता य एवेदमिति ब्रवत् ॥ २ ॥ इन्द्रस्तं किं विभुं प्रभुं भानुनायं जुजोषति । तेन सूर्यमरोचयद्येनेमे रोदसी उभे ॥ ३ ॥ जुषस्वाग्ने अङ्गिरः काण्वं मेध्यातिथिम् । मा त्वा सोमस्य बर्बृहत्सुतस्य मधुमत्तमः ॥ ४ ॥ त्वमग्ने अङ्गिरः शोचस्व देववीतमः । आशन्तमशन्तमाभिरभिष्टिभिः शान्तिं स्वस्तिमऽकुर्वत ॥ ५ ॥ शं नः कनिक्रदद्देवः पर्जन्यो अभिवर्षत्वोषधयः संप्रवर्धन्ताम् । शं नो द्यावापृथिवी शं प्रजाभ्यः शंनो अस्तु द्विपदे शं चतुष्पदे ॥ ६ ॥ शं न इन्द्राग्नी भवतामवोभिः शन्न इन्द्रा वरुणा रातहव्या । शमिन्द्रासोमा सुविताय शं योः शं न इन्द्रापूषणा वाजसातौ ॥ ७ ॥ शन्नो भगः शमु नः शंसो अस्तु शन्नः पुरन्धिः शमु सन्तु रायः । शन्नः सत्यस्य सुयमस्य शंसः शंनो अर्यमा पुरुजातो अस्तु ॥ ८ ॥ शन्नो धाता शमु धर्ता नो अस्तु शन्न ऊरूची भवतु स्वधाभिः । शं रोदसी बृहती शन्नो अद्रिः शन्नो देवानां सुहवानि सन्तु ॥ ९ ॥ शन्नो अग्निर्ज्योतिरनीको अस्तु शन्नो मित्रावरुणावश्विना शम् । शन्नः

सुकृतां सुकृतानि सन्तु शन्न इषिरो अभिवातु वातः ॥ १० ॥ शन्नो द्यावापृथिवी पूर्वहूतौ शमन्तरिक्षं दृशये नो अस्तु । शन्न ओषधीर्वनिनो भवन्तु शन्नो रजसस्पतिरस्तु जिष्णुः ॥ ११ ॥ शन्न इन्द्रो वसुभिर्देवो अस्तु शमादित्येभिर्वरुणः सुशंसः । शन्नो रुद्रो रुद्रेभिर्जलाषः शन्नस्त्वष्टाग्नाभिरिह शृणोतु ॥ १२ ॥ शन्नः सोमो भवतु ब्रह्म शन्नः शन्नो ग्रावाणः शमु सन्तु यज्ञाः । शन्नः स्वरूणां मितयो भवन्तु शन्नः प्रस्वः शम्वऽस्तु वेदिः ॥ १३ ॥ शन्नः सूर्य उरुचक्षा उदेतु शन्नश्चतस्रः प्रदिशो भवन्तु । शन्नः पर्वता ध्रुवयो भवन्तु शन्नः सिन्धवः शमु सन्त्वापः ॥ १४ ॥ शन्नो अदितिर्भवतु व्रतेभिः शन्नो भवन्तु मरुतः स्वर्काः । शन्नो विष्णुः शमु पूषाणो अस्तु शन्नो भवित्रं शम्वस्तु वायुः ॥ १५ ॥ शन्नो देवः सविता त्रायमाणः शन्नो भवन्तूषसो विभातीः । शन्नः पर्जन्यो भवतु प्रजाभ्यः शन्नः क्षेत्रस्य पतिरस्तु शम्भुः ॥ १६ ॥ शन्नो देवा विश्वेदेवा भवन्तु शं सरस्वती सह धीभिरस्तु । शमभिषाचः शमु रातिषाचः शन्नो दिव्याः पार्थिवाः शन्नो अप्याः ॥ १७ ॥ शन्नः सत्यस्य पतयो भवन्तु शन्नो अर्वन्तः शमु सन्तु गावः । शन्न

ऋभवः सुकृतः सुहस्ताः शन्नो भवन्तु पितरो हवेषु ॥ १८ ॥ शन्नो अज एकपा-
देवो अस्तु शन्नोऽहिर्बुध्न्यः शं समुद्रः । शन्नो अपां नपात्पेरुरस्तु शन्नः पृश्निर्भवतु
देवगोपाः ॥ १९ ॥ आदित्या रुद्रा वसवो जुषन्तेदं ब्रह्म क्रियमाणं नवीयः ।
शृण्वन्तु नो दिव्याः पार्थिवासो गोजाता उतये यज्ञियासः ॥ २० ॥ ये देवानां
यज्ञिया यज्ञियानां मनुर्यजत्रा अमृता ऋतज्ञाः । ते नो रासन्तामुरुगायमद्य
यूयं पात स्वस्तिभिः सदा नः ॥ २१ ॥ इति ऋचि ॥ अथ यजुषि ॥ शन्नो देवीरिति
ब्रह्मणः ॥ शन्नो देवीरभीष्टये आपो भवन्तु पीतये, शंयोरभिस्रवन्तु नः ॥
एवे यूने युवतयो नमन्त यदीमुशन्नुशतीरेत्यच्छ । सं जानते मनसा संचि-
किन्त्रेऽध्वर्यवो धिषणापश्च देवीः ॥ ओषधीरिति मातरः, या ओषधीः पूर्वा
जाता देवेभ्यस्त्रियुगं पुरा । मनै नु बभ्रूणामहं शतं धामानि सप्त च ॥ गावो भगो
गाव इन्द्रो मे अच्छान्गावः सोमस्य प्रथमस्य भक्षः । इमा या गावः स जनास
इन्द्र इच्छामीद्धृदा मनसा चिदिन्द्रम् ॥ न ता अर्वा रेणुककटो अश्नुते न संस्कृत-
त्रमुप यन्ति ता अभि । उरुगायमभयं तस्य ता अनु गावो मर्तस्य विचरन्ति

यजुनः ॥ रात्री व्यख्यदायती पुरुत्रा देव्यक्षभिः, विश्वा अधिश्रियोऽधित ॥ उप ते गा इवाकरं वृणीष्व दुहितर्दिवः, रात्रिः स्तोमं न जिग्युषे ॥ उदुत्यच्चित्रन्देवानाम्, अन्विदनुमते त्वं मन्यांसै शन्नस्कृधि । इषन्तोकायनोदधः प्राण आयूँषि तारिषः ॥ यत्ते नामसुहवं सु प्रणीतेऽनुमतेऽनुमतँ सदा नु । तेन त्वं सुमतिं दिव्यस्मे इषं पिन्वं विश्ववारं सुवीराम् ॥ राकामहं सुहवाँ सुष्टुती हुवे श्रृणोतु नः सुभगा बोधतु त्मना । सीव्यत्वपः सूच्या च्छिद्यमानया ददातु वीरं शतदायमुक्थ्यम् ॥ यास्ते राके सुमतयः सुपेशसो याभिर्ददासि दाशुषे वसूनि । ताभिर्नो अद्य सुमना उपागहि सहस्रपोषं सुभगे रराणा ॥ सिनीवालि पृथुष्टुके या देवानामसि स्वसा, जुषस्व हव्यमाहुतं प्रजां देवि दिदिड्ढि नः ॥ या सुबाहुः स्वङ्गुरिः सुषूमा बहुसूवरी । तस्यै विश्पत्न्यै हविः सिनीवाल्यै जुहोतन ॥ कुहूमहं सुकृतं विद्मनापसमस्मिन्यज्ञे सुहवां जोहवीमि । या नो ददाति द्रविणं पितॄणां तस्यै ते देवि हविषा विधेम ॥ कुहूर्देवानाममृतस्य पत्नी हव्या नो अस्य हविषः श्रृणोतु । स्वसा देवानां महयन्त्वस्मे रायस्पोषं चिकितुषे दधातु ॥ धाता दधातु नो रयिमीशानो जगतस्पतिः, स नः पूर्णेन वाव-

नव् ॥ प्रजापतिरमयतु प्रजा इह धाता दधातु सुमनस्यमानः । संवत्सर ऋतुभिश्चा-क्लृपानो मयि पुष्टिं पुष्टिपतिर्दधातु ॥ ॐनमः शनैश्चराय, यमधर्माधराय, काल-राज्याधिपतये कृष्णशरीराय, छायासुताय, महामृत्युकिरणाय, यजमानवरप्रदाय स्वाहा ॥ तर्पणम् ॥ कृष्णवर्णः कृशाङ्गश्च कृष्णजीमूतसन्निभः । शनैश्चरः सूर्यपुत्रः स सौरः प्रीयतां मम ॥ अनेन मन्त्रपाठेन० प्रजापतिशनैश्चरौ सानुचरौ प्रीयेतां प्रीतौ मे भवेताम् ॥ इति प्रजापतिशनैश्चरसूक्तम् ॥

अथ गणपतिराहुसूक्तम् ।

गणानां त्वा ग० १ कया नश्चित्र० २ (ऋ पृ० २४-७) ध्याये देवं गणेशं गिरितनयसुतं रक्तवर्णं त्रिनेत्रं मालां दन्तं वहन्तं सततमपि वरैर्दक्षिणैर्बाहुभिः स्वैः । वामैः शुभ्रं कुठारं सकलभयहरं मादकानां च पात्रं सिंहस्कन्धेस्थितं तं प्रथितगुणनिधिं विघ्नराजं महेशम् ॥ शीतांशुमित्रान्तकमीड्यरूपं घोरं च वैडूर्यनिभमबाहुम् । त्रैलोक्यरक्षापरमिष्टदं च राहुं ग्रहेन्द्रं हृदये भजेऽहम् । आ याहि नव त्र्युष्णि-गाद्यन्तानुष्टुप्मध्ये च सा सौरी तदादीतिहासस्तुति कर्मत्वादत्रिदेव एव ॥ आह्वया

त्रिभिः सुतं सोमं सोमपते पिब । वृषन्निन्द्र वृषभिर्वृत्र हन्तम ॥ १ ॥ वृषा ग्रावा
वृषा मदो वृषा सोमो अयं सुतः । वृषन्निन्द्र० ॥ २ ॥ वृषा त्वा वृषणं हुवे वज्रि-
ञ्चित्राभिरूतिभिः । वृषन्निन्द्र० ॥ ३ ॥ ऋजीषी वज्री वृषभस्तुराषाट्छुष्मी राजा-
वृत्रहा सोमपावा । युक्त्वा हरिभ्यामुप यासदर्वाङ्माध्यन्दिने सवने मत्सदिन्द्रः॥४॥
यत्त्वा सूर्य स्वर्भानुस्तमसाविध्यदासुरः । अक्षेत्रविद्यथा मुग्धो भुवनान्यदीधयुः ५
स्वर्भानोरध यदिन्द्र माया अवो दिवो वर्तमाना अवाहन् । गूढं सूर्यं तमसापव्रतेन
तुरीयेण ब्रह्मणाविन्ददत्रिः ॥ ६ ॥ मा मामिमं तव सन्तमत्र इरस्या द्रुग्धो भिय-
सानि गारीत् । त्वं मित्रो असि सत्यराधास्तौ मेहावतं वरुणश्च राजा ॥ ७ ॥
ग्राव्णो ब्रह्मा युयुजानः सपर्यन्कीरिणा देवान्नमसोपशिक्षन् । अत्रिः सूर्यस्य दिवि
चक्षुराधात्स्वर्भानोरप माया अघुक्षत् ॥ ८ ॥ यं वै सूर्यं स्वर्भानुस्तमसा विध्यदा-
सुरः । अत्रयस्तमन्वविन्दन्नह्यन्ये अशक्नुवन् ॥ ९ ॥ इति ऋचि ॥ अथ यजुषि ॥ प्रयो-
जवेति रजनस्य कौणेयस्य ॥ प्रयोजज्ञे विद्वाँ अस्य बन्धुं विश्वादेवानां जनिमा विवक्ति।
ब्रह्म ब्रह्मण उज्जभार मध्यान्नीचादुच्चा स्वधयाभि प्रतस्थौ ॥ महान्मही अस्कभाय-

द्विजातौर्वां द्विता पार्थिवांश्च रजः । स बुध्नादाष्ट जनुषाभ्यग्रं बृहस्पतिर्देवता तस्य सम्राट् ॥ गणानां त्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमम् । ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिः सीद सादनम् ॥ स सुष्टुभा स ऋक्वता गणेन बलं रुरोज फलिगं रवेण । बृहस्पतिरुस्रिया हव्यसूदः कनिक्रदद्वावशतीरुदाजत् ॥ अभिरुक्के पुरोहितो ग्रावाणो बर्हिरध्वरे । ऋचायामि मरुतो ब्रह्मणस्पतिर्देवाँ अवोवरेण्यम् ॥ उत्तिष्ठ ब्रह्मणस्पते देवायन्तस्त्वेमहे । उप प्रयन्तु मारुतः सुदानव इन्द्र प्राशूर्भवा सचा ॥ अर्यमायातु वृषभस्तुविष्मान्यन्ता वसूनि विधत्ते तनूपाः । सहस्राक्षो गोत्रभिद्वज्रबाहुरस्मासु देवो द्रविणं दधातु ॥ ये ते अर्यमन्बहवो देवयानाः पन्थानो राजन्दिव आचरन्ति । तेभिर्नो अद्य पथिभिः सुगेभीरक्षा च नो अधि च ब्रूहि देव ॥ अस्मे इन्द्राबृहस्पती रयिं दत्तं शतग्विनम्, अश्वावन्तं सहस्रिणम् ॥ बृहस्पतिर्नः परि पातु पश्चादुतोत्तरस्मादधरादघायोः । इन्द्रः पुरस्तादुत मध्यतो नः सखा सखिभ्यो वरिवः कृणोतु ॥ हिरण्यगर्भो यः प्राणतः, उदुत्यञ्चित्रन्देवानाम्, तरणिर्विश्वदर्शतो ज्योतिष्कृदस्य सूर्य, विश्वमाभासि रोच-

नम् ॥ दिवो रुक्म उरुचक्षा उदेति दूरे अर्थस्तरणिर्भ्राजमानः । नूनं जनाः सूर्येण प्रसूता अयन्नर्थानि कृणवन्नपांसि । ॐनमो राहवे, कालचर्याधराय, अष्टसहस्र-किरणाय, गन्धर्वाधिपतये, सिंहिकागर्भसम्भूताय, यजमानवरप्रदाय स्वाहा ॥ (तर्पणम्) **रक्ताक्षो धूम्रवर्णाभो विजितारिर्महाबलः । अबाहुश्चान्तरिक्षस्थः स राहुः प्रीयतां मम** अनेन मन्त्रहोमेन० गणपतिराहू सानुचरौ प्रीयेतां प्रीतौ मे भवेताम् । इति गणपतिराहुसूक्तम् ॥

अथ रुद्रकेतुसूक्तम् ।

आ वो राजान० ॥ १ ॥ केतुं कृण्वन्न० ॥२॥ (ऋ० पृ०२४-९) शान्तं पद्मवरासनं शशिधरं केयूरहारान्वितं गौरीभूषितवामभागममलं सिद्धैः सदा सेवितम् । नागेन्द्रेण विराजितं जपवटीं शूलं कपालं वरं बिभ्रन्तं त्रिजगत्पतिं सुरवरं रुद्रं भजेऽहं सदा ॥ **लाङ्गूलयुक्तं भयदं जनानां कृष्णाम्बुभृत्सन्निभमेकवीरम् । कृष्णाम्बरं शक्तित्रिशूलहस्तं केतुं भजे मानसपङ्कजेऽहम् ॥** कद्रुद्राय नव रौद्रं तृतीया मैत्रावरुणी चान्त्यस्तृचः सौम्योन्त्यानुष्टुप् ॥ **कद्रुद्राय प्रचेतसे मीळुष्टमाय तव्यसे, वोचेम शन्तमं हृदे ॥ १ ॥ यथा नो**

अदितिः करत्पश्वे नृभ्यो यथा गवे, यथा तोकाय रुद्रियम् ॥ २ ॥ यथा नो मित्रो वरुणो यथा रुद्रश्चिकेतति, यथा विश्वे सजोषसः ॥ ३ ॥ गाथपतिं मेधपतिं रुद्रं जलाषभेषजम्, तच्छं योः सुम्नमीमहे ॥ ४ ॥ यः शुक्र इव सूर्यो हिरण्यमिव रोचते, श्रेष्ठो देवानां वसुः ॥ ५ ॥ शन्नः करत्यर्वते सुगं मेषाय मेष्ये, नृभ्यो नारिभ्यो गवे ॥ ६ ॥ अस्मे सोम श्रियमधि निधेहि शतस्य नृणाम्, महि श्रवस्तुविनृम्णम् ॥ ७ ॥ मा नः सोम परिबाधो मारातयो जुहुरन्त, आ न इन्दो वाजे भज ॥ ८ ॥ यास्ते प्रजा अमृतस्य परस्मिन्धामं नृतस्य । मूर्धा नाभा सोम येन आभूषन्तीः सोम वेदः ॥ ९ ॥ इत्यृचि । अथ यजुषि । रुद्राखुन्तेति सुभेषजस्य परायणस्य रुद्रैष अवाम्बपतिर्भेषजं पुरस्ताद्बृहती त्र्यम्बकं मृत्युनाशनी अनुष्टुब्भागो भगस्य चापूपा एष भयनाशनं सर्वो रुद्रः ॥ रुद्राखुं ते पशुं करोमि तेन त्वा पशुभ्यो निरवदय । एष ते रुद्र भागः सह स्वस्राम्बिकया तं जुषस्व स्वाहा ॥ अवाम्ब रुद्रमऽदिमह्यव देवं त्र्यम्बकम् । यथा नो वस्यसस्करद्यथा नः श्रेयसस्करद्यथा नो व्यवसाययात् ॥ भेषजं गवेऽश्वाय पुरुषाय सुगं मेषाय मेष्यै । अथो अस्मभ्यं

भेषजं सुभेषजं यथाऽसति ॥ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् । उर्वारुक-मिव बन्धनान्मृत्योर्मुक्षीय मामृतात् । भगस्थ भगस्य वो लप्सी यैष ते रुद्र भागस्तेनावसेन परो मूजवतोऽतीहि कृत्तिवासाः पिनाकहस्तोऽवततधन्वा । एधो-ऽस्येधिषीमहि समिदसि समेधिषीमही तेजोसि तेजो मयि धेहि ॥ ओं नमः केतवे, अग्निचर्याधराय, सन्ध्यागर्भसम्भूताय, पुच्छवते, धूम्रवर्णाय, महोग्रतेजसे, यज-मानवरप्रदाय स्वाहा तर्पणम् । अग्निपुत्रो महातेजाः केतुः सर्वग्रहान्तकः । क्षोभ-येद्यः प्रजाः सर्वाः स केतुः प्रीयतां मम ॥ अनेन मन्त्रहोमेन० रुद्रकेतू सानुचरौ प्रीयेतां प्रीतौ मे भवेताम् ॥ इति रुद्रकेतुसूक्तम् ॥

अथ ब्रह्मध्रुवसूक्तम् ॥

को अद्य युङ्क्ते० ॥१॥ ध्रुवा द्यौ०॥२॥ (ऋ० पृ० २४–१२) ब्रह्माणं रक्तवस्त्रममरमु-निगणैः सेवितं हंसवाहं दिव्यां रुद्राक्षमालां शुभकनकयुतां धारयन्तं सुरेशम् ।आस्यैर्वेदान्वद-न्तममृतद्रवमुचं गायत्रीप्राणनाथं वन्दे शान्तं सुरूपं सकलभयहरं सर्वलोकैर्नमस्यम् ॥ ऋषि-प्रवीरं धृतपक्षिरूपमघोरशं त्र्यम्बकमित्रदिक्स्थम् । महौजसं चाञ्जनवर्णप्रख्यं ध्रुवं

भजे मानसपङ्कजेऽहम् ॥ आ त्वा षड्ध्रुवो राज्ञः स्तुतिस्त्वानुष्टुप् ॥ आ त्वाहर्षमन्तरेधि ध्रुवस्तिष्ठाऽविचाचलिः । विशस्त्वा सर्वा वाञ्छन्तु मा त्वद्राष्ट्रमधि भ्रशत् ॥ १ ॥ इहैवैधि माप च्योष्ठाः पर्वत इवाविचाचलिः । इन्द्र इवेह ध्रुवस्तिष्ठेह राष्ट्रमु धारय ॥ २ ॥ इममिन्द्रो अदीधरद्ध्रुवं ध्रुवेण हविषा हविः । तस्मै सोमो अधिब्रवत्तस्मा उ ब्रह्मणस्पतिः ॥ ३ ॥ ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवासः पर्वता इमे । ध्रुवं विश्वमिदं जगद्ध्रुवो राजा विशामयम् ॥ ४ ॥ ध्रुवं ते राजा वरुणो ध्रुवं देवो बृहस्पतिः । ध्रुवं त इन्द्रश्चाग्निश्च राष्ट्रं धारयतां ध्रुवम् ॥ ५ ॥ ध्रुवं ध्रुवेण हविषाभिसोमं मृशामसि । अथोत इन्द्रः केवलीर्विशो बलिहृतस्करत् ॥ ६ ॥ इत्यृचि । अथ यजुषि ॥ हिरण्यवर्णानां शकुनीनां समववृत्रं प्रतित्यं ज्योतिष्मतीं हंस इति प्रजापतेः, इन्द्रस्येति प्रजापतेर्वासिष्ठस्य ब्रह्मणो ध्रुवस्य ॥ इन्द्रस्य वज्रोसि वाजसास्त्वयायं वाजं सेन्मित्रावरुणयोस्त्वां प्रशास्त्रोः प्रशिषा युनज्मि विष्णोः क्रमोऽसि महतां प्रसवे जयासं मनः समिन्द्रियेणैष वज्रो वाजसातमस्तेन नौ पुत्रो वाजं सेदियदस्यायुरस्यायुर्मे धेह्यूर्जस्यूर्जम्मे धेहि युङ्ङसि वर्चोसि वर्चो मे धेहि मित्रोसि वरुणोसि

संविश्वैर्देवैर्नमो मात्रे पृथिव्यै प्रतित्यं नाम राज्यमधायि स्वान्तन्वं वरुणो सुषोत्, शुचेर्मित्रस्य वत्या अभूम मन्महि महद्दतस्य नाम सर्वे व्रता वरुणस्याभूवन्मित्र-युररतीनतारीत्, अशूशुभन्त यज्ञिया ऋतेन निवितो नौ जरिमाणमानट्, स्योनासि सुषदासि स्योनामासीद सुषदामासीद ॥ निषसाद धृतव्रतो वरुणः पस्त्यास्वा, साम्राज्याय सुक्रतुः, अग्नये गृहपतये स्वाहा, सोमाय वनस्पतये स्वाहा, इन्द्रस्य.बलाय स्वाहा, महतामोजसे स्वाहा ॥ हंसः शुचिषद्वसुरन्तरिक्षस-द्धोता वेदिषदतिथिर्दुरोणसत् । नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतम् ॥ ब्रह्मँस्त्वं ब्रह्मासि सवितासि सत्यसवो, ब्रह्मँस्त्वं ब्रह्मासि मित्रोऽसि सुशेवो, ब्रह्मँस्त्वं ब्रह्मासीन्द्रोसि सत्यौजा, ब्रह्मँस्त्वं ब्रह्मासि वरुणोसि विश्वौजा, एष वज्र-स्तेन मे रध्य दिशो अभ्यभूदयन् ॥ प्रजापते न हि त्वदन्य एता विश्वा जातानि परि ता बभूव, यत्कामास्ते जुहुमस्तन्नो अस्तु, असौ अमुष्य पुत्रोऽमुष्यासौ पुत्रः वयं स्याम पतयो रयीणाम् ॥ अपां नप्त्रे स्वाहा, ऊर्जो नप्त्रे स्वाहा, अग्नये गृहपतये स्वाहा ॥ ॐनमो ध्रुवाय, नरकारिचर्याधराय, ऋषिप्रवराय, पक्षिरूपाय, भूर्भुवः

स्वर्धोत्रे, उत्तराशाधिपतये, यजमानवरप्रदाय स्वाहा ॥ तर्पणम् ॥ ध्रुवराजो महापुण्य ऋषीणां प्रवरो दिशि । उत्तरस्यां स्थितो नित्यं स ध्रुवः प्रीयतां मम । अनेन मन्त्रहोमेन ब्रह्मध्रुवौ सानुचरौ प्रीयेतां प्रीतौ मे भवेताम् ॥ इति ब्रह्मध्रुवसूक्तम् ॥

अथानन्तागस्त्यसूक्तम् ।

आदित्यं गर्भं० ॥ १ ॥ अगस्त्यः खनमानः० ॥ २ ॥ (ऋ० पृ० २५–१) पातालसंस्थं भुजगैः स्तुतं च सहस्रशीर्षं मुदितं द्विनेत्रम् । पीताम्बरं रत्नविभूषितं च भजाम्यनन्तं हृदि देवदेवम् ॥ दिवाकरापत्यककुब्निवासं वातापिशत्रुं विनिगीर्णवारिधिम् । शिवाकृतिं विन्ध्यरिपुं त्वगस्त्यं ध्याये हृदब्जे घटजं ग्रहेशम् ॥ पूर्वीः षड्भ्याः पत्योर्लोपामुद्राया अगस्त्यस्य च ऋचाभ्यां रत्यर्थं संवादं श्रुत्वा अन्तेवासी ब्रह्म चार्यन्तं बृहत्याद्यमपश्यत् ॥ पूर्वीरहं शरदः शश्रमाणा दोषा वस्तोरुषसो जरयन्तीः । मिनाति श्रियं जरिमा तनूनामप्यू नु पत्नीर्वृषणो जगम्युः ॥ १ ॥ ये चिद्धि पूर्व ऋतसाप आसन् साकं देवेभिरवदन्नृतानि । ते चिदवासुर्नह्यन्तमापुः सम नु पत्नीर्वृषभिर्जगम्युः ॥ २ ॥ न मृषा श्रान्तं यदवन्ति देवा विश्वा इत्स्पृधो अभ्यश्नवाव । जयावेदत्र शतनीथमाजिं यत्सम्यञ्चा

मिथुनावभ्यजाव ॥ ३ ॥ नदस्य मा रुधतः काम आगन्निह आजातो अमुतः कुतश्चित् । लोपामुद्रा वृषणं नीरिणाति धीरमधीरा धयति श्वसन्तम् ॥ ४ ॥ इमं नु सोममन्तितो हृत्सु पीतमुपब्रुवे । यत्सीमागश्चकृमा तत्सु मृळतु पुलुकामो हि मर्त्यः ॥ ५ ॥ अगस्त्यः खनमानः खनित्रैः प्रजामपत्यं बलमिच्छमानः । उभौ वर्णावृषिरुग्रः पुपोष सत्या देवेष्वाशिषो जगाम ॥ ६ ॥ इत्यृचि । अथ यजुषि ॥ प्रियमिति देवर्षीणां ब्राह्मणानाम् ॥ प्रियवत्यानुवाक्या श्रीवतीयाज्या यत्प्रियवती प्रियमेवैनं सजातानां करोति यच्छ्रीवती श्रियमेवैनं गमयति द्विपदानुवाक्या चतुष्पदायाज्या द्विपदश्चैव चतुष्पदश्च पशूनऽवरुन्ध ऐन्द्रमेकादशकपालं निर्वपेन्मारुतं प्रैय्यङ्गवं चरुं तं पश्चाच्छृतं कुर्युर्यस्मात्क्षत्रियाद्विळभ्यर्धश्चरेत्क्षत्रं वा इन्द्रो विण्मारुतः क्षत्रायैव विशमनुनियुनक्ति तमनूच्यमाने पश्चात्प्राञ्चमुदाहरन्ति विशमेवास्मै पश्चादुपदधात्यसंसर्गाय मारुतं सप्तकपालं निर्वपेदैन्द्रमेकादशकपालम् । यः कामयेत विशे च क्षत्राय च समदं कुर्यामिति क्षत्रं वा इन्द्रो विण्मारुतो भागधेय एवैभ्यः समदं करोति मारुतस्य मारुतीमनूच्यैन्द्रयायजेदैन्द्रस्यैन्द्रीमनूच्य मारुत्या

यजेत्क्षत्रमेव विशः परिहायादत्ते विट् क्षत्रस्य ते अन्यान्याभिर्णयत उभयतः पुरोडाशस्यावधेयतरान्कामयेत पराजयेरन्निन्त्युभयत एव विशमुपदीपयति ताजक्पराजयन्त एतामेव निर्वपेत् । यदा कामयेत कल्पेरन्निति तस्याः प्रसृतिं यजेद्भागधेयेनैवैनान्कल्पयति, मारुतं सप्तकपालं निर्वपेद्यः क्षत्रियो विशो ज्यान्या बिभीयाद्ब्राह्मणो वा विड्वै मारुतो भागधेयेनैवैनाञ्छमयत्यगस्त्यस्यैतत्सूक्तं कयाशुभीयं तस्य सामिधेनीष्वनुब्रूयात्तस्य याज्यानुवाक्ये स्यातामगस्त्यो वै मरुद्भ्यः शतमुक्ष्णः प्रभीन्प्रौक्षत्तानिन्द्रायालभत तं मारुतः क्रुद्धा वज्रमुद्यत्याभ्यपतन्स एतत्सूक्तमपश्यत्तेनैनानशमयद्यदेतदनूच्यते शान्त्यै ॥ ॐनमो अगस्त्याय, कुम्भयोनये, वातापिशत्रवे, दक्षिणाशापतये, पीतजलनिधये, विन्ध्यारये यजमानवरप्रदाय स्वाहा ॥ तर्पणम् । अगस्त्यः कलशोद्भूतो दक्षिणस्यां दिशि स्थितः । समुद्रं जीर्णवान्योऽसौ विन्ध्यारिः प्रीयतां मम । अनेन० अनन्तागस्त्यौ सानुचरौ प्रीयेतां० ॥ इत्यनन्तागस्त्यसूक्तम् ॥

अथ वास्तोष्पतिसूक्तम् ।

अमीवहा वास्तो॰ (ऋचः ४ ऋ० पृ० २५–४) **श्वेताम्बरः सकलदेवसमाश्रिताङ्गः काकालिमेचकतनुर्द्विभुजो गदाभृत् । सद्रत्नपात्रवरभूषितबाहुदण्डो दिश्यात्स वास्तुपुरुषो हृदयेप्सितं नः ॥** वास्तोष्पत्यममीवाहाष्टौ वास्तोष्पत्यमाद्या गायत्री शिष्टाः प्रस्वापिन्य उपनिषदुपाद्यास्तिस्र उपरिष्टाद्बृहत्यः शेषमानुष्टुभम् ॥ **वास्तोष्पते प्रति जानीह्यस्मान्स्वावेशो अनमीवो भवा नः । यत्त्वेमहे प्रति तन्नो जुषस्व शं नो भव द्विपदे शं चतुष्पदे ॥ १ ॥ वास्तोष्पते प्रतरणो न एधि गयस्फानो गोभिरश्वेभिरिन्दो । अजरासस्ते सख्ये स्याम पितेव पुत्रान्प्रति नो जुषस्व ॥ २ ॥ वास्तोष्पते शग्मया संसदा ते सक्षीमहि रण्वया गातुमत्या । पाहि क्षेम उत योगे वरं नो यूयं पात स्वस्तिभिः सदा नः ॥ ३ ॥ अमीवहा वास्तोष्पते विश्वा रूपाण्याविशन्, सखा सुशेव एधि नः ॥ ४ ॥ यदर्जुन सारमेय दतः पिशङ्ग यच्छसे । वीव भ्राजन्त ऋष्टय उप स्रक्वेषु बप्सतो नि षु स्वप ॥ ५ ॥ स्तेनं राय सारमेय तस्करं वा पुनःसर । स्तोतॄनिन्द्रस्य रायसि किमस्मान्दुच्छुनायसे नि षु स्वप ॥ ६ ॥ त्वं सूकरस्य दर्दृहि तव दर्दर्तु**

सूकरः । स्तोतृनिन्द्रस्य रायसि किमस्मान्दुच्छुनायसे निषुस्वप ॥ ७ ॥ सस्तु माता सस्तु पिता सस्तु श्वा सस्तु विश्पतिः । ससस्तु सर्वे ज्ञातयः सस्त्वयमभितो जनः ॥ ८ ॥ य आस्ते यश्च चरति यश्च पश्यति नो जनः । तेषां संहन्मो अक्षाणि यथेदं हर्म्यं तथा ॥ ९ ॥ सहस्रशृङ्गो वृषभो यः समुद्रादुदाचरत् । तेना सहस्येना वयं निजनान्स्वापयामसि ॥ १० ॥ प्रोष्ठेशया वह्येशया नारीर्यास्तल्पशीवरीः । स्त्रियो याः पुण्यगन्धास्ताः सर्वाः स्वापयामसि ॥ ॐनमो ब्रह्मणे, कूर्माय, ध्रुवाय, अनन्ताय, हरये, लक्ष्म्यै, कमलायै, शिख्यादिभ्यः पञ्चचत्वारिंशद्वास्तोष्पतिदेवताभ्यः स्वाहा ॥ तर्पणम् । अधोमुखस्थितो देवः पृथिवीं यश्च व्यापकः । शम्भोश्च वल्लभो नित्यं स वास्तुः प्रीयतां मम । अनेन शिख्यादयः पञ्चचत्वारिंशद्वास्तोष्पतिदेवताः प्रीयन्तां प्रीता मे भवन्तु ॥ इत्यृचि वास्तोष्पतिसूक्तम् ॥

अथ क्षेत्रपालसूक्तम् ।

क्षेत्रस्य पतिना वयं० (ऋचः ३ ऋ०पृ० २५–९) भ्राजच्चन्द्रजटाधरं त्रिनयनं नीलाद्रितुल्यप्रभं दोर्दण्डात्तगदाकपालमरुणं स्रग्वस्त्रगन्धोज्वलम् । घण्टामेखलघर्घरध्वनि-

मिळज्झाङ्कारभीमं विभुं वन्दे संहितसर्पकुण्डलधरं श्रीक्षेत्रपालं सदा ॥ क्षेत्रस्याष्टौ तिस्रः क्षेत्रपत्यः शुनायैका परा पुरउष्णिक्सान्त्या च शुनासीराभ्यामुपान्त्ये सीतायैते अनुष्टुप् भावाद्या चतुर्थी च ॥ क्षेत्रस्य पतिना वयं हितेनेव जयामसि । गामश्वं पोषयित्न्वा स नो मृळातीदृशे ॥ १ ॥ क्षेत्रस्य पते मधुमन्तमूर्मिं धेनुरिव पयो अस्मासु धुक्ष्व । मधुश्चुतं घृतमिव सुपूतमृतस्य नः पतयो मृळयन्तु ॥ २ ॥ मधुमतीरोषधीर्द्याव आपो मधुमान्नो भवत्वन्तरिक्षम् । क्षेत्रस्य पतिर्मधुमान्नो अस्त्वरिष्यन्तो अन्वेनं चरेम ॥ ३ ॥ शुनं वाहा शुनं नरः शुनं कृषतु लाङ्गलम् । शुनं वरत्रा बध्यन्तां शुनमष्ट्रा मुदिङ्गय ॥ ४ ॥ शुनासीराविमां वाचं जुषेथां यद्दिवि चक्रथुः पयः, तेनेमामुपसिञ्चतम् ॥ ५ ॥ अर्वाची सुभगे भव सीते वन्दामहे त्वा । यथा नः सुभगाससि यथा नः सुफलाससि ॥ ६ ॥ इन्द्रः सीतां निगृह्णातु तां पूषा नु यच्छतु । सा नः पयस्वती दुहामुत्तरामुत्तरां समाम् । शुनं नः फाला विकृषन्तु भूमिं शुनं कीनाशा अभियन्तु वाहैः । शुनं पर्जन्यो मधुना पयोभिः शुनासीरः शुनमस्मासु धत्तम् ॥ पूर्वे हेरकाय, अग्नये त्रिपुरान्तकाय, दक्षिणे वेतालाय, नैर्ऋते

अग्निजिह्वाय, पश्चिमे करालाय, वायवे करालिने, उत्तरे एकपादाय, ईशाने भीमरूपिणे, ऊर्ध्वे तारकाख्याय, पाताले हाटकेश्वराय, मध्ये राजराजेश्वराय हेरकादिभ्यो बटुकादिभ्यः इह राष्ट्राधिपतिभैरवाय समस्तक्षेत्रपालयागदेवताभ्यः स्वाहा॥ तर्पणम्। हेरकादीनि चान्यानि बटुकाश्चरिकादयः। भूपातालखदिग्व्यापी क्षेत्रेशः प्रीयतां मम॥ अनेन० हेरकादयः क्षेत्रेशाः प्रीयन्तां प्रीता मे भवन्तु॥ इति ऋग्वेदे क्षेत्रपालसूक्तम्॥

अथ सर्वदैवतसूक्तम्।

भूतो भूतेषु चरति०—मयि पुष्टिं पुष्टिपतिर्दधातु (इत्यन्तं, ऋचः ३४ ऋ० पृ० २५–२३) नानावस्त्रधरा महाकृतिधराः स्रक्चन्दनालङ्कृता नानाशस्त्रधराः सिताऽसितहरिद्रक्ताम्बरधारिणः। नानाविष्टरसेविनश्च द्विचतुर्बाहून्दधानाः शुभाः सर्वे देवगणाः फलमभिमतं सन्तु श्रियं दायकाः॥ हयोष्टौ प्रतिक्षेत्रेऽन्त्ये देवपत्न्यो द्वितीया त्रिष्टुबन्त्या च॥ हयो न विद्वाँ अयुजि स्वयं धुरि तां वहामि प्रतरणीमवस्युवम्। नास्या वश्मि विमुचं नावृतं पुनर्विद्वान्पथः पुर एत ऋजु नेषति॥ १॥ अग्न इन्द्र वरुण मित्र

देवाः शर्धः प्रयन्त मारुतोत विष्णो । उभा नासत्या रुद्रो अध ग्नाः पूषा भगः सरस्वती जुषन्त ॥ २ ॥ इन्द्राग्नी मित्रावरुणादितिं स्वः पृथिवीं द्यां मरुतः पर्वताँ अपः । हुवे विष्णुं पूषणं ब्रह्मणस्पतिं भगं नु शंसं सवितारमूतये ॥ ३ ॥ उत नो विष्णुरुत वातो अस्रिधो द्रविणोदा उत सोमो मयस्करत् । उत ऋभव उत राये नो अश्विनोत त्वष्टोत विभ्वा नु मंसते ॥ ४ ॥ उत त्यन्नो मारुतं शर्ध आगमद्दिविक्षयं यजतं बर्हिरासदे । बृहस्पतिः शर्म पूषोत नो यमद्वरूथ्यं वरुणो मित्रो अर्यमा ॥ ५ ॥ उत त्ये नः पर्वतासः सुशस्तयः सुदीतयो नद्यस्त्रामणे भुवन् । भगो विभक्ता शवसावसा गमदुरुव्यचा अदितिः श्रोतु मे हवम् ॥ ६ ॥ देवानां पत्नीरुशतीरवन्तु नः प्रावन्तु न स्तुजये वाजसातये । याः पार्थिवासो या अपामपि व्रते ता नो देवीः सुहवाः शर्म यच्छत ॥ ७ ॥ उत ग्ना व्यन्तु देवपत्नीरिन्द्राण्यग्नाय्यश्विनीराट् । आ रोदसी वरुणानी शृणोतु व्यन्तु देवीर्य ऋतुर्जनीनाम् ॥ ८ ॥ ब्रह्म्यादिभ्यो मातृभ्यः (पृ० ३५-४) अखण्डब्रह्माण्डयागदेवताभ्यः स्वाहा इत्यन्तं तर्पणं । पृथिवीं द्यां चान्तरिक्षं समस्तभुवनानि च । अमरा येऽवतिष्ठन्ति प्रीयन्तां ते सदा मम ॥ अनेन० सर्वे देवाः प्रीयन्तां० ॥ इति ऋग्वेदे सर्वदैवतसूक्तम् ॥

अथ रात्रिसूक्तम् ।

शूलाब्जपाशाङ्कुशहस्तपद्मां चतुर्भुजां धूम्रनिभां त्रिनेत्राम् । सिंहासनस्थां धृतपीतवस्त्रां ध्याये महेशीं हृदि कालरात्रीम् ॥ रात्री कुशिकः सौभरो रात्रिर्वा भारद्वाजी रात्रिस्तवो गायत्रम् ॥ **रात्री व्यख्यदायती पुरुत्रा देव्यक्षिभिः, विश्वा अधि श्रियोधित ॥ १ ॥ ओर्वप्रा अमर्त्या निवतो देव्युद्वतः, ज्योतिषा बाधते तमः ॥ २ ॥ निरु स्वसारमस्कृतोषसं देव्यायती, अपेदु हासते तमः ॥ ३ ॥ सा नो अद्य यस्या वयं नि ते यामन्नविक्ष्महि, वृक्षे न वसतिं वयः ॥ ४ ॥ नि ग्रामासो अविक्षत निपद्वन्तो नि पक्षिणः, निश्येनासश्चिदर्थिनः ॥ ५ ॥ यावया वृक्यंवृकं यवयस्तेनमूर्म्ये, अथा नः सुतरा भव ॥ ६ ॥ उप मा पेपिशत्तमः कृष्णं व्यक्तमस्थितः, उष ऋणेव यातय ॥ ७ ॥ उप ते गा इवाकरं वृणीष्व दुहितर्दिवः, रात्रिस्तोमं न जिग्युषे ॥ ८ ॥ आ रात्रि पार्थिवं रजः पितुरप्रायि धामभिः । दिवः सदांसि बृहती वितिष्ठस आ त्वेषं वर्तते तमः ॥ ९ ॥ ये ते रात्रीनृचक्षसो युक्तासो नवतिर्नव । अशीतिः संत्वष्टा उतोते अष्टसप्ततीः ॥ १० ॥ रात्रीं प्रपद्ये जननीं सर्वभूतनिवे-**

शनीम् । भद्रां भगवतीं कृष्णां विश्वस्य जगतो निशाम् ॥ ११ ॥ संवेशिनीं संयमनीं ग्रहनक्षत्रमालिनीम् । प्रपन्नोहं शिवां रात्रीं भद्रे पारमशीमहि ॥ कालरात्र्यै, तालरात्र्यै, शिवरात्र्यै, राण्यरात्र्यै, महारात्र्यै, रौद्ररात्र्यै, सौख्यरात्र्यै, धूम्र्यै: उपधूम्र्य:, महागायत्र्यै, सावित्र्यै, सरस्वत्यै ॥ शैलपुत्र्यै १ ब्रह्मचारिण्यै २ कूष्माण्ड्यै ३ चण्डघण्टायै ४ स्कन्दमात्रे ५ सिद्धिदायै ६ महागौर्यै ७ कालरात्र्यै ८ महालक्ष्म्यै ९ नवदुर्गाभगवत्यै तर्पणम् । भद्रा भगवती कृष्णा तारा काली च पार्वती । मङ्गला शिवरात्री च नवदुर्गा प्रकीर्तितः ॥ अनेन० रात्रिदेव्य: प्रीयन्तां० ॥ इत्यृचि रात्रिसूक्तम् ॥

अथ षडृतुसूक्तम् ।

चूतप्रवालरसनिर्भरमञ्जुकण्ठाः कूजन्ति कोकिलगणा गहनेषु यत्र । वैतालिका इव मनोभवबोधनाय सोऽयं वसन्तसमयः सुखदोऽस्तु मह्यम् ॥ १ ॥ वसन्ततापापगमौ सुपुष्पौ तापान्वितौ तोयभवेशयुक्तौ । हेमन्तमित्रावरुणाधिपौ ये तांश्चिन्तयामि स्वगुणातिरम्यान् ॥ २ ॥ स नाऽरमत स प्राद्रवत्तस्मिन्नजुहोत्तस्या

आहुत्याः पुरुषोऽजायत, स नाऽरमत स प्राद्रवत्तस्मिन्नजुहोत्तस्या आहुत्या अश्वोऽजायत, तस्मात्पुरुषश्चाश्वश्च नक्तं प्रत्यञ्चौ न सु विज्ञायेते, इव स नारमत स प्राद्रवत्तस्मिन्नजुहोत्तस्या आहुत्या गौरजायताऽविरजायताऽजाऽजायत यवोऽजायत व्रीहिरजायतैताभ्यो वै सप्तभ्य आहुतिभ्यः सप्तेमे ग्राम्याः पशवोऽसृजन्त, स नारमत स प्राद्रवत्तस्मिन्नजुहोत्तस्या आहुत्या वसन्तोऽजायत ग्रीष्मोऽजायत वर्षा अजायन्त शरदजायत हेमन्तोऽजायत, स त्रयोदश्यामाहुत्यामुद्यतायामबिभेत्तं प्रत्यङ्ङुपापद्यत तं पाणितः प्राविशत्तस्मात्पाण्योर्लोम नास्त्यग्निधानं ह्येतत्तस्माद्धस्ताभ्यामभिमेथ्यमानो जायते ॥ तस्माद्धन्यमानो हस्तौ प्रति प्रगृह्णात्यग्ना इव तत्त्राणमिच्छतेऽग्निं वै पशवोनूपतिष्ठन्ति पशूनग्निः प्रैनं पशवो विशन्ति प्र पशून्विशति य एवं वेद तामाहुतिमप्सु प्रसिञ्चत्ततः शिशिरमजायत, तस्मात्तत्क्रूरतमं नहि तद्धुतान्नाहुतादजायत, साहुतिरपो दग्धुमुपाक्रामत, तत आपोग्नये वज्रोभवँस्तस्मात्प्रोक्षन्नग्निर्न प्रापयेद्यत्प्रापयेद्ध्येतेन यजते तामाहुतिमोषधीषु न्यदधात्तस्मादोषधयोऽनभ्यक्ता रेभन्त ओषधिभ्योऽधिपशवः पशुभ्योधि प्रजास्तदेतच्छिशिर आज्यं श्याय-

ऽग्नये तस्माच्छिशिरे कक्ष उपाद्दुत्याः प्रियमेव धामाग्नये प्रादात्सोऽस्मा अन्नाद्यं प्रयच्छत्यन्नादो भवति य एवं वेद ॥ १ ॥ ॐवसन्तेनर्तुना देवा वसवस्त्रिवृताः स्तुताः, रथन्तरेण भेषजा हविरिन्द्रो वयो दधुः ॥ १ ॥ ग्रीष्मेण ऋतुना देवा रुद्राः पञ्चदशे स्तुताः, बृहता यशसा बलँ हविरि० ॥ २ ॥ वर्षाभिर्ऋतुनादित्याः स्तोमे सप्तदशे स्तुताः, वैरूपेण विशौजसा हवि० ॥ ३ ॥ शारदेनर्तुना देवा एकविंश ऋभवः स्तुताः, वैराजेन श्रिया श्रियं हवि० ॥ ४ ॥ हेमन्तेनर्तुना देवास्त्रिणवे मारुतः स्तुताः, बलेन शक्करीः सहो हवि० ॥ ५ ॥ शैशिरेणर्तुना देवास्त्रयस्त्रिंशेऽमृता स्तुताः, सत्येन रेवतीः क्षत्रँ हवि० ॥ ६ ॥ २ ॥ अग्नये नमो गायत्र्यै नमस्त्रिवृते नमो रथन्तराय नमो वसन्ताय नमः प्राच्यै दिशे नमः प्राणाय नमो वसुभ्यो नमः ॥ १ ॥ इन्द्राय नमस्त्रिष्टुभे नमः पञ्चदशाय नमो बृहते नमो ग्रीष्माय नमो दक्षिणायै दिशे नमो व्यानाय नमो रुद्रेभ्यो नमः ॥ २ ॥ मरुद्भ्यो नमो जगत्यै नमः सप्तदशाय नमो वैरूपाय नमो वर्षाभ्यो नमः प्रतीच्यै दिशे नमोऽपानाय नम आदित्येभ्यो नमः ॥ ३ ॥ विश्वेभ्यो देवेभ्यो नमोऽनुष्टुभे नम

एकविंशाय नमो वैराजाय नमः शरदे नम उदीच्यै दिशे नमः समानाय नमश्चन्द्र-मसे नमः ॥ ४ ॥ मित्रावरुणाभ्यां नमः पाङ्क्त्यौष्णिहाभ्यां नमस्त्रिणवत्रयस्त्रिंशभ्यां नमः शाक्वररैवताभ्यां नमो हेमन्तशिशिराभ्यां नम ऊर्ध्वायै दिशे नम उदानाय नमो विष्णवे नमः ॥ ५ ॥ पृथिव्यै नमोऽग्नये नमो भूताय नमश्चक्षुषे नमोऽन्त-रिक्षाय नमो वायवे नमो भव्याय नमः श्रोत्राय नमो दिवे नमः सूर्याय नमो भविष्यते नमो मनसे नमः ॥ ॐवसन्ताय, ग्रीष्माय, वर्षाभ्यो, शरदे, हेमन्ताय, शिशिराय, षड्डतुभ्यः स्वाहा । तर्पणम् । वसन्तश्च तथा ग्रीष्मो वर्षाश्चैव शरत्तथा । हेमन्तः शिशिरश्चैव प्रीयन्तामृतवो मम ॥ अनेन० षड्डतवः प्रीयन्तां० ॥ इति यजुषि षड्डतुसूक्तम्॥ अथोपहोमः॥ (देवासुराणाम्) तव श्रिये व्यजिहीत० (ऋ० पृ०२९-८) ऐन्द्राग्नं तावद्धुत्वा । तर्पणमेकत्र चेत्तदा । अनेन० महागणपतिः कुमारः इत्यादि (पृ० ५३-३) अनन्ताद्योऽष्टौ कुलनागदेवताः ॥ उदयंस्तु महाभानुः (पृ० ६१-३) द्विजराजो महापुण्यः (पृ० ६५-८) येनार्जिता जगत्कीर्तिः (पृ० ६९-१०) बुधो बुद्धिप्रदाता च (पृ० ७४-२) मेरुमूर्ध्नि समा (पृ० ७७-३) सोमतुल्या

प्रभा (पृ० ८०–५) **कृष्णवर्णः कृ** (पृ० ८५–४) **रक्ताक्षो धूम्रवर्णाभो** (पृ० ८८–४) **अग्निपुत्रो महातेजाः** (पृ० ९०–६) **ध्रुवराजो महापुण्यः** (पृ० ९३–१) **अगस्त्यः कलशो** (पृ० ९५–१०) **अधोमुखस्थितो** (पृ० ९७–८) **हेरुकादीनि** (पृ० ९९–४ **पृथिवीं द्यां** (पृ० १००–३१) **भद्रा भगवती** (पृ० १०२–६) **वसन्तश्च तथा** (पृ० १०५–७) **अग्न्यादित्यौ "इत्यादि,** (पृ० ३२—) **हेरुकादयो बटुकादयः चत्वारो वेदाः साङ्गाः सायुधाः सपरिवारा यवतिलतण्डुलहोमैः प्रीयन्तां प्रीताः मे सन्तु ॥**

इति यवतिलतण्डुलभागे द्वितीयः ॥ २ ॥

अभिषेकमंत्रः ॥

एवं शान्त्यवसाने तु यजमानस्य याजकः । हृदि विन्यस्य दर्भाग्रान्स्थितान्स्वे दक्षिणे करे ॥ १ ॥ कुर्यात्प्रतिसरबद्धं तन्मे निगदतः शृणु । बध्वा प्रतिसरमादौ सर्वे नश्यन्तु शत्रवः ॥ २ ॥ ध्रुवस्त्वामूर्ध्वतः पातु केतुः पातु तथा त्वधः । पूर्वदक्षिणतः शुक्रो दक्षिणपश्चिमात्तमः ॥ ३ ॥ पश्चिमोत्तरतश्चन्द्रो जीवः प्रागुत्तरेण तु । उक्तसन्धिषु सर्वाणि नक्षत्राणि तवानघ ॥ ४ ॥ स्वां स्वां दिशमधिष्ठाय तत्र नित्यं

दिगीश्वराः । रक्षन्तु सर्वदुष्टेभ्यः शक्रवह्निपुरोगमाः ॥ ५ ॥ शात्रवानां तु घोराणां व्याधीनां पातकस्य च । अमङ्गलानां घोराणां दुरिष्टानां तथैव च ॥ ६ ॥ दुःस्वप्नानां च घोराणां चिन्तितानां तथा मृषा । वज्रेण नाशनं शक्रः करोतु बलसूदनः ॥ ८ ॥ दण्डेन नाशनं नित्यं विदधातु यमोन्तकः । पाशेन वरुणो देवो गदया च धनेश्वरः ॥ ८ ॥ ग्रहाः सन्नाहसन्नद्धा ग्रहपञ्जरमध्यगाः । अदृश्याः सर्वभूतानां सर्वदुःखविवर्जिताः ॥ ९ ॥ सर्वव्याधिविहीनाश्च कालकर्णीविवर्जिताः । तथा त्वं भव दीर्घायुर्ग्रहेन्द्राणां प्रसादतः ॥ १० ॥ रक्षन्तु ते देवगणाः समग्रं धर्मे मतिं चापि सदा दिशन्तु । नाशं तथा शत्रुगणस्य चोग्रं भोगान्मनोज्ञान्विपुलां च लक्ष्मीम् ॥ इति । अन्यच्च ॥ पुष्करो नैमिषारण्यं गङ्गाद्याः सरितस्तथा । अस्म-द्दयानुरोधेन कुम्भे कुर्वन्तु सन्निधिम् ॥ १ ॥ गङ्गा गोदावरी चैव गण्डकी गौतमी तपी । यमुना चन्द्रभागा च पयोष्णी च शतद्रुदा ॥ २ ॥ आयान्तु कृपया कुम्भे सर्वतीर्थसमन्विताः । भो गङ्गे यमुने चैव गोदावरि सरस्वति ॥ ३ ॥ नर्मदे सिन्धु कावेरि कुम्भेस्मिन्सन्निधिं कुरु ॥ ४ ॥ सावीर्हि देव प्रथमाय पित्रे वर्ष्मा-

णमस्मै वरिवाणमस्मै । अथास्मभ्यं सवितुर्वार्याणि दिवे दिव आसुवाभूरि पश्य ॥ भूते भूतेषु चरति प्रविष्टः स भूतानामधिपतिर्बभूव । तस्य मृत्युश्चरति राजसूयं स राजा राज्यमनुमन्यतामिदम् ॥ येभिः शिल्पैः पप्रथानामऽदृंहयेभिर्द्यामभ्यपिंश-त्प्रजापतिः । येभिर्वाचं विश्वरूपेभिरव्ययं स्तेनेममग्न इह वर्चसा समंग्धि ॥ येभिरादित्यस्तपते प्रकेतुभिर्येभिः सूर्यो ददृशे चित्रभानुः । येभिर्वाचं पुष्कलेभिर-व्ययं स्तेनेमामग्न इह वर्चसासमंग्धि ॥ आयम्भातु शिव सा पञ्चकृष्टीरिन्द्र इव ज्येष्ठो भवतु प्राजानाम् ॥ अस्मिन्नस्तु पुष्कलं चित्रभान्वायं पृणातु रजसो विमा-नम् ॥ यत्ते शिल्पं कश्यप रोचनावदिन्द्रियावत्पुष्कलं चित्रभानुः । यस्मिन्सूर्या अर्पिताः सप्त साकं तस्मिन्राजानमधि विश्रयेमम् ॥ व्याघ्रो वैय्याघ्रे अधि विक्रमस्व दिशो महीः । विशस्त्वा सर्वा वाञ्छन्त्वापो दिव्याः पयस्वतीः । या आपो दिव्याः पयसा सम्बभूवुर्या अन्तरिक्ष्या उत पार्थिवासः ॥ तासां त्वा सर्वासां रुचाऽभि-षिञ्चामि वर्चसा । अभित्वा वर्चसा सिचं यशेन पयसा सह ॥ यथासो मित्रव-र्धनस्तथा त्वा सविता करत् । इन्द्रं विश्वा अवीवृधन्समुद्रव्यचसं गिरः । रथीतमं

रथीनां वाजानां सत्पतिं पतिम् ॥ आपो हि ष्ठा० ॥ ३ ॥ हिरण्यवर्णाः शुचयः० ॥ ४ ॥ सुरास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुशिवादयः । वासुदेवो जगन्नाथस्तथा संकर्षणो विभुः ॥ १ ॥ प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते । आखण्डलोऽग्निर्भगवान्यमो वै निर्ऋतिस्तथा ॥२॥ वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः । ब्रह्मणा सहितो विष्णुर्दिक्पालाः पान्तु त्वां सदा ॥ ३ ॥ कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः । बुद्धिर्लज्जा कृपा शान्तिस्तुष्टिः कान्तिश्च तर्पिताः ॥ ४ ॥ एतास्त्वामभिषिञ्चन्तु देवपत्न्यः समागताः । आदित्यश्चन्द्रमा भौमो बुधो जीवः सितोऽर्कजः ॥ ५ ॥ ग्रहास्त्वामभिषिञ्चन्तु राहुः केतुश्च तर्पिताः । देवदानवगन्धर्वा यक्षराक्षसपन्नगाः ॥ ६ ॥ ऋषयो मनवो गावो देवमातर एव च । देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसां गणाः ॥ ७ ॥ अस्त्राणि सर्वशास्त्राणि राजानो वाहनानि च । औषधानि च रत्नानि कालस्यावयवाश्च ये ॥ ८ ॥ सरितः सागराः शैलास्तीर्थानि जलदा नदाः । एते त्वामभिषिञ्चन्तु धर्मकामार्थसिद्धये ॥ ९ ॥ कृत्तिका रोहिणी देवी इल्वकार्द्रा तथैव च । पुनर्वसुश्च तिष्यश्च तथाश्लेषा च सर्वदा ॥ १० ॥ मघा

च फाल्गुणीपूर्वा तथैवोत्तरफाल्गुणी । हस्तश्चित्रा तथा स्वातिर्विशाखा च नराधिप ॥११॥ अनूराधा तथा ज्येष्ठा मूलं च यजमानकम् । पूर्वाषाढा चोत्तरा वै अषाढा त्वभिजिच्छ्रुतिः ॥ १२ ॥ धनिष्ठा शततारा च पूर्वभाद्रपदा तथा । उत्तरभद्रा रेवती च अश्विनी भरणी तथा ॥ १३ ॥ एतास्त्वामभिषिञ्चन्तु चन्द्रपत्न्यः समागताः । अनन्तश्च महानागः शेषवासुकितक्षकाः ॥ १४ ॥ सुपर्णीरश्वकुम्भश्च वामनश्चाञ्जनस्तथा । ऐलापत्रश्च शङ्खश्च कार्कोटकधनञ्जयौ ॥ १५ ॥ महाकर्णमहानीलौ धृतराष्ट्रमहाहकौ । ऐलवतो महानागः कम्बलाश्वतरावुभौ ॥ १६ ॥ कुमारः पुष्पदन्तश्च सुमुखो दुर्मुखस्तथा । सुशरीरो दधिमुखः कालियश्चालिपिण्डकः ॥ १७ ॥ बिल्वपादः पुण्डरीको नागश्चापूरणस्तथा । कपिलश्चाम्बरीषश्च कुमारश्चापि कच्छपः ॥ १८ ॥ प्रह्लादः पुष्पदन्तश्च गन्धर्वश्च मनस्विकः । बहुषः खररोमश्च शङ्खपालश्च नागराट् ॥ १९ ॥ पद्मश्च कुलिकश्चैव कालिकादय एव च । नागास्त्वामभिषिञ्चन्तु धर्मकामार्थसिद्धये ॥ २० ॥ वेदव्यासश्च वाल्मीकिर्वसिष्ठोथ पराशरः । देवलः पर्वतश्चैव दुर्वासो भार्गवः शुचिः ॥ २१ ॥ याज्ञवल्क्यश्च जाबा-

लिर्जमदग्निः शुचिश्रवाः । विश्वामित्रस्थूलशिरा मरीच्यङ्ग्यङ्गिरास्तथा ॥ २२ ॥
पुलस्त्यः पुलहश्चैव त्रितो गौतमगालवौ । शाण्डिल्यश्च भरद्वाजो मौद्गल्यो वेद-
वाहनः ॥ २३ ॥ बृहदश्वः क्रतुश्चैव जूटाधारी घटोदरः । यवक्रीतः शौनकश्च
मार्काण्डेयश्च जैमिनिः ॥ २४ ॥ कात्यायनिः शार्ङ्गरवः काण्वोऽगस्त्योथ कश्यपः ।
एते त्वामभिषिञ्चन्तु ऋषयो ब्रह्मयोनयः ॥ २५ ॥ पृथुर्दिलीपो भरतो रघुर्दशरथो
निमिः । मनुः ककुत्स्थः शत्रुजिच्छिनिश्चैव जयद्रथः ॥ २६ ॥ मान्धाता मुचुकुन्दश्च
हरिश्चन्द्रः पुरूरवाः । अजश्च नहुषश्चैव ययातिरपराजितः ॥ २७ ॥ इक्ष्वाकुश्च यदु-
श्चैव रामो भूरिश्रवस्तथा । अम्बरीषश्चैव कुशो बृहदश्वो महाहनुः ॥ २८ ॥ प्रद्युम्न-
श्चाथ सुद्युम्नो भूरिद्युम्नश्च संशयः । एते त्वाममिषिञ्चन्तु राजानो धनवृद्धये ॥२९॥
ऋग्वेदोऽथ यजुर्वेदः सामवेदस्त्वथर्वणः । कृतस्त्रेता द्वापरश्च कलिस्त्वामभिषि-
ञ्चन्तु ॥ ३० ॥ इतिहासो धनुर्वेदो गान्धर्वश्चायुसंज्ञितः । पुराणमुपवेदाश्च विजयाय
भवन्तु ते ॥ ३१ ॥ गायत्री पापशमनी दुर्गादेवी महाशिवा । गान्धारी च तथा
विद्या विजयं प्रदिशन्तु ते ॥ ३२ ॥ पुष्करश्च प्रयागश्च प्रभासो नैमिषस्तथा । गया

ब्रह्मसरः पुण्यं गयशीर्षं च मानसम् ॥ ३३ ॥ कालो देवो नन्दिकुण्डस्तथैवोत्तर-मानसः । गंगानदी महापुण्या ह्रादिन्यैलावती तथा ॥ ३४ ॥ तपनी च तथा सीता वङ्क्षुः सिन्धुश्च नर्मदा । सुप्रभा करतोया च विशाला गण्डकी नदी ॥ ३५ ॥ सरस्वती च यमुना सुवेणुर्विमलोदका । सिप्रा शोणः शतद्रुश्च सरयूश्चन्द्रभागिका ॥ ३६ ॥ चत्वारः सागराश्चैव स्वेन तोयेन शान्तये । सर्वास्त्वामभिषिञ्चन्तु विजयं प्रदिशन्तु ते ॥ ३७ ॥ अच्छोदश्च विपाशा च चन्द्रभागामरावती । वितस्ता देविका रम्भा कावेरी च शतह्रदा ॥ ३८ ॥ एताश्चान्याश्च सरितः सर्वलोकस्य मातरः । स्वतोयपूर्णैः कलशैरभिषिञ्चन्तु त्वां मुदा ॥ ३९ ॥ मंत्रैर्यथोक्तैर्नृपराजराज्ये दत्त्वाभिषेकं पृथिवीं समग्राम् । ससागरां भुङ्क्ष्व चिरं च जीव धर्मे च ते बुद्धिरतीव चास्तु ॥ ४० ॥ इति यज्ञान्तस्नानम् ॥ ॥ अथ कलशग्रहयोः स्थापनादि ॥

श्रीदेव्युवाच । स्वामिन् ग्रहाः कस्य पुत्राः का सङ्ख्या ग्रहमण्डले । कस्मिन्देशे कश्च जातः किंवर्णश्च पृथग्वद ॥ १ ॥ शान्तिश्च कीदृशी तेषां मण्डलं पुष्पधूपकम् । कानि पात्राणि भोज्यानि कः केन परितुष्यति ॥ २ ॥ श्रीईश्वरः ॥ शृणु देवि सुतो

भानुः कश्यपस्यात्रिजः शशी। भौमो रुद्रस्य तनयो बुधश्चन्द्रमसः सुतः ॥ ३ ॥ जीवश्च ब्रह्मणः पुत्रः शुक्रो भृगुमुनेः सुतः। रवेः पुत्रः शनिश्चैव राहुः पुत्रः प्रजापतेः ॥ ४ ॥ केतुरग्नेः सुतश्चेत्थं नव सङ्ख्यान्वितान् शृणु। सूर्यश्चन्द्रश्च भौमश्च बुधो जीवस्तथा कविः ॥ ५ ॥ शनी राहुश्च केतुश्चेत्येकैकं बहुनायकः। अवतारं प्रवक्ष्यामि देशानां नामपूर्वकम् ॥ ६ ॥ जन्म भोगोऽन्नमेतेषां जन्मस्थानसुखानि च। योऽज्ञात्वा कुरुते शान्तिं ग्रहास्तेनावमानिताः ॥ ७ ॥ अर्को जातः कलिङ्गेषु यमुनायां च चन्द्रमाः। उज्जयिन्यां भूमिपुत्रो मगधेषु बुधस्तथा ॥ ८ ॥ सिन्धुदेशे गुरुर्जातः शुक्रो भोजकटे तथा। सौराष्ट्रे च शनिर्जातो राहुर्वैराडितपुरे ॥ ९ ॥ केतुस्तथा मध्यदेशे जन्मर्क्षाणि शृणु ग्रहे। विशाखायां रविर्जातो रोहिण्यामपि चन्द्रमाः ॥ १० ॥ कृत्तिकायां भूमिपुत्रः श्रवणे तु बुधस्तथा। पूर्वाषाढे गुरुर्जातो हस्ते जातस्तु भार्गवः ॥ ११ ॥ भरण्यां तु शनिर्जातश्चार्द्रायां सिंहिकासुतः। केतुर्जातो मघायां तु ग्रहाणां स्वामिनः शृणु ॥ १२ ॥ रवावग्निर्विधौ पाशी भौमे स्कन्दो बुधे हरिः। इन्द्रो बृहस्पतौ शुक्रे वाणी ब्रह्मा शनैश्चरे

॥ १३ ॥ राहौ गणेशः केतौ च रुद्रश्चेति मताः सुराः । ब्रह्मवर्णौ शुक्रजीवौ सूर्यभौमौ तु क्षत्रियौ ॥ १४ ॥ वैश्यौ चन्द्रबुधौ शूद्रौ राहुकेतू शन्यन्त्यजः । भास्कराङ्गारकौ रक्तौ श्वेतौ शुक्रनिशाकरौ ॥ १५ ॥ पीतौ जीवबुधौ कृष्णं शनिं राहुं हरित्प्रभम् । धूम्रं केतुं शाद्वलाभो ध्रुवोऽगस्त्यः सुवर्णभः ॥ १६ ॥ अथोग्रतेजसां वक्ष्ये ग्रहाणां स्थापनं शिवे । मण्डलं सूपलिप्ते तु चतुरस्रं सुकारयेत् ॥ १७ ॥ एकं वा द्विश्चतुरष्टहस्तं वोर्ध्वमतो नहि । तिर्यक्चोर्ध्वं वेदरेखा देया मध्यस्थयोर्बहिः ॥ ॥ १८ ॥ आऽर्धकोष्ठमथैकैका कोणं नैर्ऋतिशर्वयोः । पूर्णमूर्धमधश्चाथ पूर्वेऽष्टदलमालिखेत् ॥ १९ ॥ त्रिकोणद्वयसंयोगात्पश्चाद्द्वारेशसंस्थितिः । सौम्ये ध्रुवास्पदः पक्षी याम्येऽगस्त्यस्य कुम्भकः ॥ २० ॥ मध्ये भास्करमालिख्य वह्नौ चन्द्रं तु दक्षिणे । भौमं चैशानतः सौम्यं लिखेत्सौम्ये बृहस्पतिम् ॥ २१ ॥ पूर्वे शुक्रं शनिं पश्चाद्राहुं नैर्ऋतिकोणतः । वायवे शिखिनं चैवं ग्रहाणां स्थापनं भवेत् ॥ २२ ॥ चक्राकारौ सोमसूर्यौ सौम्यजीवौ त्रिकोणकौ । चतुष्कोणौ भौमशुक्रावालोकाभः शनैश्चरः ॥ २३ ॥ यवमध्यं पताकाभं राहुं केतुं ततो बहिः । दिक्पालास्त्राणि स-

र्वाणि लिखेत्पूर्वेण वज्रकम् ॥ २४ ॥ वह्नौ शक्तिं सुदण्डं च दक्षिणे नैर्ऋते त्वसिम्।
पश्चात्पाशं ध्वजं वायौ गदां सौम्ये त्रिशूलकम् ॥ २५ ॥ ऐशान्यामथ पद्माब्जमूर्ध्वं
चक्रमधो लिखेत् । एतान्यस्त्राणि घोराणि सर्वविघ्नोपशान्तये ॥ २६ ॥ वाडवो
राक्षसेन्द्रश्च मरीचिर्दूषणः खरः । कटको देवकण्वश्च विकटो दुन्दुभिस्तथा ॥ २७ ॥
यज्ञस्य विघ्नकर्तार आगच्छन्ति दिशोदश । अस्त्रेणादिष्टमात्रेण सर्वे नश्यन्ति दूरतः॥
॥ २८ ॥ न मण्डलं विना सिद्धिः साधकस्य भवेत्प्रिये । पीताविन्द्रश्च वायुश्च
रक्तोऽग्निः कालभो यमः ॥ २९ ॥ धूम्रो रक्षःपतिः श्वेतः पाशी पीतस्तु यक्षराट् ।
श्वेतः शम्भुश्च रक्तोऽजः कृष्णो विष्णुश्च वर्णतः ॥३०॥ रव्यङ्गुलं लिखेत्सूर्यं सोमं तद्द्वि-
गुणं लिखेत् । शुक्रं नवाङ्गुलं चैव षडङ्गुलमितं गुरुम् ॥ ३१ ॥ बुधं भूमिसुतं सौरं
चतुस्त्रिद्व्यङ्गुलं लिखेत् । सोमादर्धाङ्गुलं राहुं केतुमध्यर्धमङ्गुलम् ॥ ३२ ॥ शुक्रार्कौ
प्राङ्मुखौ ज्ञेयौ गुरुसौम्यावुदङ्मुखौ। शनिसोमौ प्रतीच्यां च शेषा दक्षिणतोमुखाः॥
३३ ॥ अथवाऽदित्याभिमुखानेवेतरग्रहादीन् स्थापयेत् । समाप्ते मण्डले प्राज्ञो
द्वारेशान्पूजयेत्पुरा । वायव्यनैऋतेशकोणेषु गणेशस्कन्दश्रीह्वयान् ॥ ३४ ॥ वाणीं

लक्ष्मीं मध्यकोणे त्वष्टारमग्निकोणके । अर्घधूपादिदानेन बलिकर्म समाचारेत्॥३५॥ भास्करे करवीराणि सुमनः शशिने तथा । अशोकं मङ्गले दद्यात्किर्किराट बुधस्य हि ॥ ३६ ॥ केसराणि सुराचार्ये कुमुदं भार्गवस्य तु । नीलोत्पलं शनेर्दद्याद्राहोः पाटलपुष्पकम् ॥ ३७ ॥ अविमुक्तानि पुष्पाणि केतवे तु प्रदापयेत् । दशर्क्षगमनाभावाद्विशेषार्चा न विद्यते ॥ ३८ ॥ ध्रुवस्य कुम्भयोनेश्च पूजामात्रं प्रचक्षते । धूपं सूर्ये गुरुं चन्द्रे नमेरुं भूमिनन्दने ॥ ३९ ॥ गुग्गुलं सोमजे सर्ज्जरसं जीवे घृताक्षतम् । शुक्रे श्रीवासकं सौरौ माहिषाक्षं समाचरेत् ॥ ४० ॥ राहोश्च पशुरोमाणि बिल्वगन्धं तु केतवे ॥ धूपं नानाविधं कृत्वा वर्णतश्चानुलेपनम् । यद्रूपं कथितं तेषां तथा तान्मनसार्चयेत् ॥ ४१ ॥ ग्रहाणां यादृशो वर्णस्तादृक्पुष्पादिनार्चयेत् । बलिं पात्रं प्रवक्ष्यामि ग्रहाणां च पृथक्पृथक् ॥ ४२ ॥ सौवर्णं भास्करे चन्द्रे रजतं भूमिजेऽग्निजम् । बुधे ताम्रं गुरौ रूप्यं शुक्रे मुक्तीयशुक्तिजम् ॥ ४३ ॥ शनौ लोहं कांस्यपात्रं राहौ केतौ तु श्रावकम् । अलाभे सर्वपात्राणां पद्मपत्रेषु दापयेत् ॥ ४४॥ तदभावे पलाशेषु तदभावे तु श्रावके । अथवा सर्वपात्रेषु सर्वेषां च विशेषतः॥४५॥

गुडौदनं रवेर्दद्यात्सघृतं पायसं विधौ । यावकं मङ्गले भक्तं दधियुक्तं बुधे शिवे ॥४६॥ क्षीरभक्तं गुरौ शुक्रे घृतभक्तं प्रदापयेत् । तिलमुद्गयुतं माषमिश्रं मांसं घृतं शनेः ॥ ४७ ॥ मांसौदनं सैंहिकेये प्रशस्तं बलिकर्मणि । लड्डुकापूपिकान्भक्ष्यान्वटकादींश्च केतवे ॥ ४८ ॥ ॐ नमो आदित्याय इत्यादिमन्त्रैः । कृत्वा बलिविधानं तु स्तुत्वा शान्ति समारभेत् । चतुरस्रां लिखेद्वेदिं वह्निं तत्रार्चयेद्बुधः ॥ ४९ ॥ एवं कृत्वा विधानं तु समिधोत्र प्रकल्पयेत् । अर्कः पलाशः खदिरोऽप्यपामार्गोथ पिप्पलः ॥ ५० ॥ उदुम्बरः शमी दूर्वा कुशः सूर्यादिषु क्रमात् । आर्की गदघ्नी पालाशी कामदा खादिर्यर्थदा ॥ ५१ ॥ आपामार्गी हन्ति शत्रूनाश्वत्थी पुत्रदा मता । सुखदोदुम्बरी पापं हन्ति शामी चिरायुषे ॥ ५२ ॥ दूर्वा चैवं हि समिधः प्रमाणा द्वादशाङ्गुलाः । एकैकस्य सहस्रं वा साष्टाविंशतिकं शतम् ॥ ५३ ॥ होतव्ये मधुसर्पिर्भ्यां दधिक्षीरयुते तु द्वे । धेनुः शङ्खस्तथानड्वान्काञ्चनं पीतवस्त्रकम् ॥५४॥ हयः कृष्णा च गौः खड्गश्छागश्चेत्येषु दक्षिणा । अलाभे सर्वद्रव्याणां निःस्वः शक्त्या प्रदापयेत् ॥ ५५ ॥ पूर्णाहुतिं ततो दत्वा ग्रहांस्तत्र क्षमापयेत् । तुष्टास्तेन ग्रहाः

सर्वे शान्तिं कुर्वन्ति शाश्वतीम् ॥ ५६ ॥ इति । अथातः कलशोत्पत्तिं शृणु पूर्वं सुरासुरैः । कूर्मपृष्ठे तु मन्थानं मन्दारं वासुकिं गुणम् ॥ १ ॥ विधाय मथ्यमाने तु क्षीरोधावुद्गतो विधुः । लक्ष्म्यादि रत्नजातं च कलशं चामृतास्पदम् ॥ २ ॥ कलां कलां गृहीत्वा स देवानां प्रोत्थितो यतः । विष्णोः प्रभावाद्देवेशि कलशस्तेन कथ्यते ॥ ३ ॥ कलशस्य मुखे ब्रह्मा ग्रीवायां रुद्र उच्यते । विष्णुर्मूले मातृकास्तु मध्ये कुक्षौ तु सागराः ॥ ४ ॥ सप्त द्वीपा धरा द्यौश्च गंगाद्या सरितस्तथा । वेदास्तीर्थानि सर्वाणि देवाः कलशमाश्रिताः ॥ ५ ॥ मातरश्च समुद्राश्च लोकपाला ग्रहास्तथा । एते सर्वे समागत्य दुरितक्षयकारकाः ॥ ६ ॥ कुम्भं हैममयं कृत्वा रजतं ताम्रमेव वा । निर्दोषं मृण्मयं वापि पूरयेन्निर्मलाम्भसा ॥ ७ ॥ ऐशान्यां पञ्चरङ्गेन लिखेत्पद्मं वस्वस्त्रकम् । सर्वसाधारणं तत्र संस्थाप्य स्वार्चयेद्बुधः ॥८॥ एतेनामृतगर्भेण ब्रह्मणा वन्दितेन च । कलशेन समन्त्रेण यः कुर्यादभिषेचनम् ॥ ९ ॥ आयुरारोग्यमैश्वर्यं लभेत्कामान्सुशोभनान् ॥ इति । अथ ग्रहशान्तिगृहप्रतिष्ठादौ ग्रहबलिविधानम् ॥ समत्स्यमांसकृष्णमांसानपूपान्निवेदयेत् । यथा । सावित्राणि० महागणपतये० ।

भवाय देवाय० । ब्रह्मणे० । विष्णुपञ्चायतनदेवताभ्यः० ।—अष्टाभ्यः कुलनागदेवताभ्यः ॐ नमो आदित्याय ऋषिकश्यपपुत्राय अदितिगर्भसंस्थिताय रक्तवर्णसदृशाय रक्ताम्बरचीरवाससे तपसोग्ररूपधराय भक्तिभावनाय आरुह्य मेरुं प्रदक्षिणं कृत्वा ग्रहमण्डलं प्रविश्य इत्यक्षतगन्धपुष्पधूपदीपसुवर्णरचितं बलिं निवेदयामि स्वगणैः परिवृतः प्रीतमानसो भव ऋतं ते नमः ॥ एवं प्रतिग्रहं स्वस्वभागं पृथक् २ निवेदयेत् । ॐनमः सोमाय अत्रिपुत्राय अमृतकलशसम्भूताय शुक्लवर्णसदृशाय शुक्लाम्बरचीरवाससे तपसोग्र० ॥२॥ भौ० । ॐनमोऽङ्गारकाय रुद्रपुत्राय रुद्राणीगर्भसंभूताय रक्तवर्णसदृशाय रक्ताम्बरचीरवाससे तपसो० ॥ ३ ॥ ॐनमो बुधाय चन्द्रपुत्राय रोहिणीगर्भसंभूताय पीतवर्णसदृशाय पीताम्बरचीरवाससे तपसो० ॥ ४ ॥ ॐनमो बृहस्पतये ब्रह्मपुत्राय मानसीगर्भसंभूताय पीतवर्णस ॥ ५ ॥ ॐनमो भार्गवाय भृगुपुत्राय ओषधीगर्भसंभूताय शुक्लवर्णस० ॥ ६ ॥ ॐनमः शनैश्चराय रविपुत्राय छायागर्भसंभूताय कृष्णवर्णस० ॥ ७ ॥ ॐ नमः सैंहिकेयाय प्रजापतिसुताय सिंहिकागर्भसंभूताय हरिद्वर्णस०) ॥ ८ ॐनमः केतवे अग्निपुत्राय सन्ध्या-

गर्भसंभूताय धूम्रवर्णस० ॥ ९ ॥ ॐनमो ध्रुवाय उत्तानपादसुताय नीतिगर्भसंभूताय रक्तवर्णस० ॥ १० ॥ ॐनमोऽगस्त्याय कलशसंभवाय शुक्लवर्णस० ॥ ११ ॥ अर्चिताश्च ग्रहाः सर्वे कल्पिताश्च विशेषतः । निवेदयेच्चरुमाज्यमेकैकस्य पृथक्पृथक्॥ ॥ १ ॥ ग्रहशान्तिदेवताभ्यो नमो नैवेद्यं निवेदयामि नमः इति ॥ अथ ग्रहादीनां क्षमापुष्पाणि ॥ अहिंसकस्य शान्तस्य न्यायार्जितधनस्य च । नित्यं च नियमस्थस्य सदा सानुग्रहा ग्रहाः । सू० । सिन्दूरारुणवक्त्राब्जः कर्णान्तायतलोचनः। गभस्तिमाली तिग्मांशुर्ग्रहपीडां व्यपोहतु । च० । जगदाप्यायनकरस्त्वमृताधारशीतलः । सोमः सौम्येन भावेन ग्र० । भौ० । पद्मरागनिभो यस्य देहः पिङ्गललोचनः । सोऽङ्गारकः शिवे भक्तो ग्र० । बु० । कुङ्कुमच्छविशोमेन देहेन परिमण्डितः । शिवभक्तो बुधः श्रीमान्ग्रा० । बृ० । धौतचामीकरच्छायः सर्वज्ञानालयो गुरुः । ईशानार्चारतो नित्यं ग्र० । शु० । शुक्लाम्बरधरो धीरः शुक्लमाल्यानुलेपनः । दैत्येन्द्रैः पूजितः शुक्रो ग्र०। श०। कृष्णः कृष्णाम्बरधरो वलीपलितविग्रहः। शनैश्वरः शिवे भक्तो ग्र० । रा०। नीलाञ्जननिभः श्रीमान्सैंहिकेयो महाबलः । शिवपूजापरो राहुर्ग्र० । के० । श्वेतपी-

तारुणःकृष्णः कचचामीकरप्रभः । शिवार्चनरतः केतुर्ग्र० । ध्रु । रक्ताम्बरधरो रक्तो ध्रुव औत्तानपादिकः । उत्तराशापतिरीशो ग्र० । आ० । मायारूपी वार्धिपायी विन्ध्याद्रिं छलयन्विभुः । घटोद्भूतस्त्वगस्त्योसौ ग्रह० ॥ एते ग्रहा महात्मानो महेशार्चनतत्पराः । शान्तिं कुर्वन्तु मे हृष्टाः सर्वकालहितैषिणः ॥ ब्रह्मणैषां वरो दत्तः पूजिताः पूजयिष्यथ । अपस्मारग्रहाः स्वर्गे भूपाताले ज्वरग्रहाः ॥ गर्भबालग्रहा दिक्षु नानारोगग्रहाश्च ये । तेजसा तस्य देवस्य शान्तिं कुर्वन्तु मे सदा ॥ ग्रहाधीना नरेन्द्राणामुच्छ्रायाः पतनादि च । भावोऽभावश्च जगतस्तस्मात्पूज्या नवग्रहाः ॥ १ ॥ ब्रह्मस्त्वं ब्रह्मदैवत्यं ब्राह्मणस्य पितामहः । चतुर्वेदोद्भवे भूमिर्ब्रह्मन्गच्छ स्वकं गृहम् ॥ ॥ २ ॥ शङ्खचक्रगदापाणिरसुराणां क्षयंकर । संसारतारणोद्युक्त विष्णो० ॥ ३ ॥ कैलासो निलयो यस्य पूजितो यः सुरासुरैः । त्रिपुरो ज्वलितो येन शिव ग ॥ ४ ॥ गणेश्वर त्रिनेत्रस्त्वं विघ्नभक्षोऽम्बिकासुतः । गजाननश्चाखुवाहः स्वामिन्ग० ॥ ५ ॥ ऐरावणसमारूढः पूर्वस्यां दिशि पूजितः । वज्रहस्तः शचीयुक्तो जिष्णो ग० ॥६॥ शुकारूढः शक्तिहस्तश्चाग्नेय्यां दिशि पूजितः । स्वाहाशोभितवामाङ्गो वह्ने ग० ॥ ७ ॥

महिषासनमारूढो दण्डपाणिः प्रपूजितः । याम्यां यामीयुतार्थाङ्गो धर्म ग० ॥ ८ ॥ सिंहारूढः खड्गपाणिर्नैर्ऋतिदिशि पूजितः । रक्षःपतिर्धृतियुतो यातो ग० ॥ ९ ॥ मकरासनमारूढः पाशपाणिः प्रपूजितः । पश्चात्तु वारुणीयुक्तः स्वामिन्ग० ॥१०॥ मृगासनो ध्वजाख्यधृग्वायवे पूजितो जनैः । अञ्जनीप्राणनाथस्त्वं वायो ग० ॥११॥ नरासनो गदापाणिः पूजितश्चोत्तरे विभुः । यक्षिणीशः सखा शम्भोः स्वामिन्ग० ॥१२॥ वृषासनः शूलपाणिरैशान्यां पूजितः प्रभुः । पार्वतीप्राणनाथस्त्वं शम्भो ग० ॥ १३ ॥ हंसारूढः पद्महस्तश्चोर्ध्वायां दिशि पूजितः । गायत्रीशो जगत्स्रष्टा ब्रह्मन्ग० ॥ १४ ॥ तार्क्ष्यासनश्चक्रपाणिरधस्ताद्दिशि पूजितः । श्रीयुतः कौस्तुभाभाच्छो विष्णो ग० ॥ १५ ॥ सप्ताश्वरथसंरूढः खड्गपाणिर्ग्रहेश्वरः । शश्वत्त्रैलोक्यदीपको रवे ग० ॥ १६ ॥ क्षीरसागरसम्भूतश्शम्भोर्मूर्तौ व्यवस्थितः । अमृतांशू रोहिणीशो विधो ग० ॥१७॥ रक्ताम्बरधरः स्रग्वी रक्तमाल्यानुलेपनः । भूमिसूनुर्बालमूर्त्तिर्भौम ग० ॥ १८ ॥ पीतवर्णो महाबुद्धिः सोमपुत्रो गुणाकरः । सुप्रसन्नो महावीरः सौम्य ग० ॥ १९ ॥ विद्याः सर्वा मुखे यस्य तिष्ठन्ति च सुरार्चितः । सन्तुष्टिकृत्सुरेन्द्राणां

जीव ग० ॥ २० ॥ असुरेशगुरुः शुद्धस्फुटिकप्रतिमप्रभः । श्वेतच्छत्रो रथो यस्य शुक्र ग० ॥ २१ ॥ भ्रुकुटीकुटिलाकारः कृष्णलोहसमप्रभः । शनैर्गच्छन्ग्रहेषु त्वं शने ग० ॥ २२ ॥ शत्रुः पुष्पवतोर्नित्यं सिंहिकाप्राणवल्लभः । विष्णुः सदार्थको यस्य राहो ग० ॥ २३ ॥ ब्रह्मपुत्रो भवेद्यश्च वह्निपुत्रश्च वीरहा । त्रैलोक्यभयदो मूर्त्या केतो ग० ॥ २४ ॥ आदित्याद्या ग्रहा यस्य प्रकुर्वन्ति प्रदक्षिणम् । ध्रुवं स्थितो ब्रह्मलोके ध्रुव ग० ॥ २५ ॥ विन्ध्याद्रिश्छलितो येन घटोत्पन्नो महाशनः । इल्वलासुरभक्ष्यश्चागस्त्य ग० ॥ २६ ॥ यथा बाणप्रहाराणां कवचं वारणं भवेत् । एवं दैवोपघातानां शान्तिर्भवति वारणी ॥ २७ ॥ यथा समुत्थितं यंत्रं यन्त्रेण प्रतिहन्यते । तथा समुत्थितं घोरं सर्वं शान्त्या प्रशम्यते ॥ २८ ॥ ग्रहा गावो नरेन्द्राश्च ब्राह्मणाश्च विशेषतः । पूजिताः पूजयन्ते च निर्दहन्त्येवमानिताः ॥ २९ ॥ यश्च यस्य ग्रहो दुःस्थः सतं यत्नेन पूजयेत् । इदं ग्रहाणामातिथ्यं कुर्यात्संवत्सरादपि ॥३०॥ आरोग्यबलसम्पन्नो जीवेद्वर्षशतं नरः ॥ ३१ ॥ आरोग्यं तरणिः शशी विमलतां भौमः प्रतापोदयं बुद्धिं शीतकरात्मजः सुरगुरुर्ज्ञानं सुखं भार्गवः । धैर्यं सूर्यसुतश्च

राहुरभयं केतुः प्रसादं ध्रुवः शौर्यं कुम्भसमुद्भवोऽप्यथजयं दिश्यन्तु सर्वे ग्रहाः ॥३२॥ सूर्यः शौर्यमथेन्दुरिन्द्रपदवीं सन्मङ्गलं मङ्गलः सद्बुद्धिं च बुधो गुरुश्च गुरुतां शुक्रः शुभं शं शनिः । राहुर्बाहुबलं करोतु सततं केतुः कुलस्योन्नतिं नित्यं प्रीतिकरा भवन्तु शुभदाः सर्वेऽनुकूला ग्रहाः ॥ ३३ ॥ तेजो रविः शशी कान्तिं भौमोर्थं शशिजः सुखम् । गुरुर्ज्ञानं सितः कीर्तिं शनिरायुर्ददातु नः ॥ आखण्डलोग्निर्भगवान्यमो वै राक्षसाधिपः । वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः ॥ ब्रह्माप्यनन्त इत्येते दिक्पालाः पांतु त्वां सदा ॥ आयुश्च विद्यां च धनं सुखं च धर्मार्थकामं बहुपुत्रलाभम् । शत्रुक्षयं राजसु पूज्यतां च तुष्टा ग्रहामे प्रदिशन्तु कामान् ॥ भूतानि यान्येव वसन्ति भूतले बलिं गृहीत्वा विधिवत्प्रयुक्तम् । सन्तोषमासाद्य व्रजन्तु सर्वे क्षमन्तु तान्यत्र नमोस्तु तेभ्यः ॥ क्षमध्वं मम क्षेत्रेशा दधध्वं सुखसम्पदः । खभूपातालदिक्संस्थास्तुष्टा यांतु स्वकं पदम् । आह्वानं० । नमो ब्रह्मणे इति तर्पणम् । उदकलशं । मन्त्रार्थाः सफलाः सन्तु० ॥ इति ग्रहादीनां क्षमापुष्पाणि ।

अथ ग्रहशान्तिः ।

तत्रादावश्मचूर्णेन ग्रहमण्डलमुल्लिख्य एकादश क्षेत्रपालांश्च संस्थाप्य । प्रधानं । **यो रुद्रो अग्नौ० । भवाय देवाय० । स्वेष्टग्रह**ऋक्च । **अमीवहा० ब्रह्मणे कृ० तद्विष्णो० विष्णुपञ्चायतनदेवताभ्यः । क्षेत्रस्य पतिना०** । पूर्वे **हेरुकाय** आग्नेये **त्रिपुरान्तकाय** दक्षिणे **वेताय** नैर्ऋते **अग्निजिह्वाय** पश्चिमे **करालाय** वायवे **कालाक्षाय** उत्तरे **एकपादाय** ईशाने **भीमरूपिणे** ऊर्ध्वे **तारकाक्षाय** पाताले **हाटकेश्वराय** । मध्ये **राजराजेश्वराय । अर्चन्तस्त्वा०** । यजमानमानीय । **तीर्थे स्नेयं । अद्यतावत्० । महागणपतये० । भवायदेवाय० । स्वेष्टग्रहाय० । ब्रह्मणे कृ०। विष्णुपञ्चायतन देवताभ्यः० । इन्द्रादिभ्यः० । पूर्वेहेरकाय० । धूप दीपः ॥ दक्षिणान्तं** । अथाग्नि-कर्म । **पात्रं तिला० अमुककर्मनिमित्तं जुष्टं निर्वपामि** एवं **प्रोक्षामि । आज्यभा-गान्तं** कृत्वा । **समिद्धोमः** । आदावेकचक्रे (पृ० ३६–१) तेजोसि । **अग्निर्हिर-ण्यं–सोमो हिरण्य**मिति च द्वे हुत्वा । **एकचक्रमुदया**दित्यष्टादश हुत्वा । ध्यानं । **निषुसीद गणपतेः** । एवमन्नहोमे । ते० । एकचक्रादि हुत्वा ॥ पश्चूपहारो यथा ।

पूर्वाभिमुखं पशुं पश्चिमाभिमुखं यजमानं संस्थाप्य । पवित्रं विना शौचादि विधाय । येषां मेषः पूर्वपातेः पशूनां चतुष्पदा उत ये द्विपदाः । विक्रीतास्ते याज्ञिकं भागं सन्तु रायस्पोषं यजमानं संविशन्तु इति मांसशोधनमन्त्रः ॥ पशुपाशाय विद्महे । महापाशाय धीमहि । तन्नः पशुः प्रचोदयात् ॥ ३ ॥ रुद्राय (वा अजाय) पशवे पाद्यादि । पवित्रं धृत्वा । दक्षिणान्तं । बन्धार्थं बन्धनस्थोसि मोक्षार्थं मोचितो मया । देवप्रीत्यै समुत्पन्नः स्वर्गं गच्छ पशो त्वयमिति पठित्वा । दक्षिण-बाहोर्घृतेन स्पर्शनम् । ऋतस्य त्वा देवहविः पाशेन प्रतिमुञ्चामि अमुष्मै देवाय जुष्टं निर्वपामि । ततः पशुपृष्ठे तर्पणम् । अद्य तावत् महागणपतये० ब्रह्मणे० पूर्वे हेरु-काय० अमुककर्मनिमित्तमिमं पशुमपर्यामि नमः ॥ अथ दक्षिणकर्णे मन्त्रः ॥ न वै त्वं म्रियसे न मरिष्यसि आं इदेषि स्वर्गं लोकं पथिभिः सुगेभिः । रुद्राक्षुं ते पशुं करो-मीति (पृ० ८९–९०) सूक्तं पठेत् । यावन्न कम्पयदेहं तावन्नैवोपघातयेत् । नवश्रानके क्षेत्रेशार्थं रक्तं । लवणहारिद्राभिः पचित्वाऽन्त्राणि च ग्राह्याणि ॥ विप्राय दक्षिणपादयुतं शिरः किञ्चिद्दाहयुतं सावित्राणीति निवेद्यम् ॥ (पृ०) ग्रहेभ्यः सपुरोळाशेन कृष्णमांसेन बलिः ।

योगिनीभ्यः वैश्वदेवावसरे हृत्कमलं बलिः ॥ इति शिक्षा । तत एवमाज्यहोमः **ऐन्द्राग्नं** विना । आर्षी **आदित्यस्तेजस्वी**ति (पृ०) ग्रहबलिः। तत **एकचक्रे आदित्यस्तेजस्वी तेजोऽस्मि-**न्नित्युपहोमान् आज्ये मुखं वीक्ष्यन्स्रुवेण जुहोति । **आदित्या रुद्रा०** (पृ० ३९-४) इति ग्रहेष्टब्राह्मणं । **अग्नेर्देवाँ इहावह** (पृ० ४२-६) इति नक्षत्रयज्ञं च हुत्वा । ते० । ऐन्द्राग्नं । तर्पणं । **अनेन ग्रहशान्तिनिमित्तं महागणपतिः० समिदन्नाज्याहुतिभिः प्रीयन्तां प्रीता सन्तु ॥ ॐकारो यस्य मूलं** (पृ० १-१) पृथक् २ तर्पणयुक्तानि वहसूक्तानि पञ्चकत्रयं रक्षोघ्नमन्त्राणि च हुत्वा ॥ वैश्वदेवे **आकाशमातृणां** बलिः । **ब्रह्माणी कमलेन्दुपूर्णवदना माहेश्वरी लीलया कौमारी रिपुदर्पनाशनकरी चक्रायुधा वैष्णवी । वाराही घनघोरघुर्घुरमुखी ऐन्द्री च वज्रायुधा चामुण्डा गणनाथसिद्धसहिता रक्षन्तु त्वां मातरः ॥** गोग्रासादि । अत्र ग्रहाणां क्षमापुष्पाणि । **अहिंसकस्येति** (पृ० १२०-५) **उदकलशं** (पृ०) अथ अभिषेकः । **पूर्वं शान्त्यवसाने तु** (पृ० १०६-९) **मन्त्रार्थाः०** इति ग्रहशान्तिविधानम् ॥

अथ गण्डान्तादिशान्तिः ।

सर्वेषां मूलजातानां परित्यागो विधीयते। ताते–नादर्शयेच्चापि यावत्षण्मास-पूरणम् ॥ अस्य गण्डान्तादिदोषनिवारणार्थं पयःस्नानादि । उक्तं च । शतौषधीमूलमृ-दम्बुरत्नसद्बीजगर्भैः कलशैः समन्त्रैः । कुर्याज्जनित्रीपितृबालकानां स्नानं शुभार्थं सह होममन्त्रैः ॥ कुंकुमं चन्दनं कुष्ठं गोरोचनसमन्वितम् । घृतेन मिश्रितं कृत्वा च-तुर्भिः कलशैस्ततः ॥ २ ॥ सहस्रशीर्षामन्त्रेण बालकं स्नापयेद्बुधः । पितृयुक्तं दिवा-जातं मातृयुक्तं च रात्रिजम् ॥ ३ ॥ सन्ध्ययोरुभयोः सत्यं वदत्येवं बृहस्पतिः । कांस्यपात्रं घृतैः पूर्णं देयाद्गण्डोपशान्तये ॥ ४ ॥ आश्लेषायां च मूले च शान्तिरेवं विधीयते । कृष्णां धेनुं सुवर्णं च ग्रहजाप्यं च कारयेत् ॥ ५॥ शकृन्मूत्रं च सङ्गृह्य श्वेतस्य वृषभस्य च । श्वेतगोः पयसा सार्धं स्नातव्यं तीर्थवारिणा ॥ ६ ॥ मूलन-क्षत्रपीडायां तस्माद्दोषाद्विमुच्यते । मुरा (छर) मांसी वचा कुष्ठं शैलेयं (वटफटो) रजनीद्वयम् ॥ ७ ॥ शुण्ठी चम्पक (सुङ्गोल) मुस्ता च सर्वौषधिगणाः स्मृताः ॥ अन्यच्च । सहदेवी (एटमिट । वा । मूच) प्रतिनिधिः (कामयमूल) विष्णुक्रान्ता

(वाश । वा । हमील) **पुनर्नवा** (साण्ठ) **शरपुङ्खः** (भोडरकोन **वा** थोर । **काकजङ्घ** ।) कावखुर) **सुलक्षणा** (दुदूज्य) **अश्वगन्धः** (हसेमद) **पुंनाग नागकेसर** । **सङ्गर्ग** (जाफूर) **मधूक** (शंघूर)। **श्रीपर्ण** (बिलपत्र) **शमीपत्र**) **वेतसीपत्र** । **प्लक्षपत्र** (वनमुस्त) **औडम्बर** (डलमसाल) **अश्वत्थ** (पीपल) **शतपत्र** (पम्पुष) **जाफल** । **पलाशपत्र** । **अतसी** । **भङ्गा** । **विजया** । **जयन्ती** । **श्रीपर्णी** । **कुन्दपुष्पं** । **सुनपुष्पं** । **आमोलं** । **शतावरी** । **कुशा, तुलसी, काशमूलं, भूतजटा, इक्षुमूलं, सर्षपमूलं, यवामूलं, सर्वौषधी** ॥ मृत्तिका, **राजद्वारात्, वल्मीकात्, महानद्याः तटयोः, गोगृहात्, अश्वस्थानात्, गजस्थानात्** । **चतुष्पथात्, वृक्षमूलात्, तीर्थात्** ॥ **पञ्चरत्नं, कर्पूरं, पञ्चगव्यं** । एते पञ्चकलशेषु निक्षिपेत् पञ्चगव्येन मण्डपशुद्धिं विधाय **आदावश्मचूर्णेन गृहमण्डलं** तद्दक्षे । **सिन्दूरयुतपिष्टेन पद्मचतुष्कं** तेषां मध्ये **चतुर्विंशतिदलं पद्मं संलिख्य**, तद्दक्षे **गोदानार्थं वेदचतुष्टयपद्मानि** संस्थाप्य ॥ **इमं मेवरुणे**ति कुम्भेषु जलं । **याः फलिनी**ति फलानि, **या ओषधय** इति औषधयः, **काण्डात्काण्डे**ति शरारोपः । **योगे योगे**इति रक्तकर्पटं (सोल) वर्ध्नी-

यात् । राक्षसानां तिलकार्थं रक्तचन्दनं सुरार्थं सैन्धवयुतं क्षीरं, मांसार्थं लवणयुतं पायसं कल्पयेत् ॥ प्रधानं । कलशे तद्विष्णोः । वासुदेवाय ८ । तदनु । पूर्वकुम्भे । अप्रतिरथं मम तस्य तमोपहनं व्यावृतस्य पाप्मना । सर्वाणि तस्मिञ्ज्योतींषि यानि त्रीणि प्रजापतौ १ ऐन्द्राग्नं २ निरहावक्कृणोतु न संवरत्रं ददातन, सिञ्चामहा अवतं मुद्रिणं वयं, सुषेकमनुपक्षितं । वष्कृताहवमवत संवरत्रं सुषेचनं उद्रिणं सिञ्चिरक्षितम् ३ इन्द्राय, यातवे, रक्षसे, अस्रपाय, वरदाय । दक्षिणे । रथवाहनं हविरस्य नाम, यत्रायुधं नियुतस्य वातम् । तत्रारथमुपशग्मं मदेम, विश्वावयं सुमनस्यमानः १ मुञ्चामि त्वा. २ । रात्रिचराय, आशराय, कौणपाय, धर्मराजाय । पश्चिमे । प्रतिरथं मिथूकृतमिन्द्रो वातजिष्णुना । अस्मिन्नाजौ पुरुहूत आवये धनं भक्षेधनो व १ रक्षोहणं २ कर्बुराय, निकषात्मजाय, रात्रिञ्चरेभ्यः । उत्तरे । उत्सवातो वहति वासो अस्या अधिरथं यदजयत्सहस्रम् । रथीरभून्मुद्गलनीगविष्टो गभरेकृतं व्यदेशर्म सेना १ ईशानान्त्वा २ यक्षेभ्यः, राक्षसेभ्यः, समस्तरात्रिञ्चरेभ्यः मध्ये । मूलायां । यन्ते देवी । अश्लेषायां नमो अस्तु सर्पेभ्यो ।

ॐ गायत्र्यै नमः ३ जातवेदसे ३ त्र्यम्बकं ४ सीरा युञ्जन्ति कवयो युगा वितन्वते पृथक्, धीरा देवेषु सुम्नया ५ निरहावक्रृणोतु न संवरलं ददातन । सिञ्चामहा अवतं मुद्रिणं सुषेकमनुपक्षितम् । यक्रृता हवमवत संवरलं सुषेचनं उद्रिणं सिञ्चरक्षितम् ६ अग्निस्तु ७ तामग्निवर्णां ८ अमीवहा ९ कृणुष्व पञ्जोना रक्षो० १५ (पृ) क्षेत्रस्य पतिना । गणानान्त्वा । अग्निर्दूतं वृणीमहे होतारं विश्ववेदसं, अस्य यज्ञस्य सुक्रत्वम् । पुरुषसूक्तं १६ (पृ ०१–९) लक्ष्मीसूक्तं (पृ० ९–२) ततो मध्यकुम्भस्य । दक्षिणे । ज्येष्ठदैवतं, इन्द्राय । मध्ये । मूलदैवतं, नैर्ऋतये । उत्तरे । पूर्वाषाढदैवतं, अद्भ्यः । ततः पूर्वादिक्रमेणोत्तराषाढादिदैवतानि ईशानान्तं नक्षत्रयज्ञोक्तैर्मन्त्रैः (पृ०४२–१२) पूजयेत् । तथाहि । विश्वेभ्यो देवेभ्यः उत्तराषाढाभ्यः, विष्णवे अश्वत्थाय, वसुभ्यः; वरुणाय, अजैकपादेभ्यः, अहिर्बुध्न्याय, पूष्णे, अश्विन्यां यमाय, अग्नये, प्रजापतये, सोमाय, रुद्राय, अदितये, बृहस्पतये, सर्पेभ्यः पितृभ्यः भगाय, अर्यम्णे, सवित्रे, त्वष्ट्रे, वायवे, इन्द्राग्नीभ्यां, मित्राय, नैर्ऋतये "मूलनक्षत्राय" वा "आश्लेषानक्षत्राय" सर्वेभ्यो राक्षसेभ्यो नमः ॥ ततः पञ्चायतनदेवताभ्यः ॥

अथ यजमानमानीय ॥ महागणपतये वासुदेवाय ८ नैर्ऋतये रक्षोधिपतये मूल-नक्षत्रदेवतायै, सर्पेभ्यो राक्षसेभ्यो यातवे रक्षसे अस्रपाय, वरदाय इन्द्रकुम्भ-देवताभ्यः । रात्रिञ्चराय, आशराय कौणपाय, धर्मराजाय, धर्मराजकुम्भदेव-ताभ्यः । कर्बुराय, निकषात्मजाय, रात्रिञ्चरेभ्यः वरुणकुम्भदेवताभ्यः । यक्षेभ्यः-राक्षसेभ्यः, यातुधानेभ्यः, धनदाय, धनदकुम्भदेवताभ्यः । मध्ये । गायत्र्यै ३ अमायै ८ भवाय देवाय ८ वास्तोष्पतये, वरुणाय, ज्येष्ठायै, पूर्वाषाढायै, उत्त-राषाढायै, श्रवणाय, धनिष्ठायै, शतभिषजे, पूर्वभाद्रपदायै, उत्तरभाद्रपदायै, रेवत्यै, अश्विन्यै, भरण्यै, कृत्तिकायै, रोहिण्यै, मृगशिरसे आर्द्रायै, पुनर्वसवे, तिष्याय अश्लेषायै मघायै पूर्वफाल्गुन्यै उत्तरफाल्गुन्यै, हस्ताय चित्रायै स्वात्यै, विशाखायै अनूराधायै मूलनक्षत्राय । पञ्चायतनदे० दीपधूपः ॥ ॐ गायत्र्यै नमः ३ विष्णुगायत्रीः सर्वाः । अद्य तावत् । आत्मनः सकुटुम्बस्य सबालकस्य मूला-दिजातदोषनिवारणार्थं मूलप्रतिमापू० कलशपू० दिक्कुम्भयुतौषधिकुम्भपू० चतु-र्वेदेश्वरपू० क्षेत्रेश्वरपूजनमर्चामहं करिष्ये । आवाहनं प्रतिमायाः । आगच्छागच्छ

दिक्स्वामिन्नैर्ऋते खड्गपाणिक । सर्वलोकेश सर्वज्ञ शरणागतवत्सल १ रक्षोधिप महाप्राज्ञ सर्वलोकनमस्कृत । मूलनक्षत्रजन्मोत्थं यद्दोषं दिक्पते मम २ पत्न्या वापि सुतस्यापि तत्सर्वं नाशय प्रभो । अद्य त्वमावयोर्देव रक्षां कुरु सपुत्रयोः ३ त्वदन्यं नैव पश्यामि कृपालुं हितकारकम् । अतस्त्वां शरणं यामि पत्नीपुत्रसमन्वितः ४ तथा कुरु यथा देव न बाध्यन्ते ग्रहा मम । देवमावाहयिष्यामि मूलभं दारुणं महत् ५ खड्गपाणिं महौजस्कं सर्वसौख्यकरं परम् । नीलवर्णो० ६ आवाहयामि नैर्ऋतिंशशिखण्डमौलिं पूजापरं च सृणिखड्गकरं च दक्षे । वामे च खेटकसुपाशसमन्वितं तं वृषासनस्थितमहं मखरक्षणार्थम् । यन्ते देवी० । रक्षोधिपतये मूलनक्षत्रदेवतायै नैर्ऋतये नम इति प्रतिमाशिरसि पुष्पं दद्यात् । भगवन्पु० । सुरास्थाने प्रदातव्यं क्षीरं सैन्धवमिश्रितम् । पायसं लवणोपेतं मांसस्थाने तु रक्षसाम् १ तथैव निवेद्य । दक्षिणान्तं ॥ अग्निकर्म ॥ चरुद्वयं पायसं अन्नं च । आद्यौ समिद्धोमे । यन्ते देवी १०८ ततः पायसे । त्वं नः सोमेन विश्वतो रक्षराज न्नुगाहिता, न रिशीतावता सखा १०८ या ते रुद्र शिवा तनू १०८ इति च हुत्वा ततोन्ने यन्ते देवी १०८ एवमाज्यहोमादि पूर्णा तावत् गोप्रदानं ।

ब्राह्मणपूजा । कुम्भानां प्रतिमायाश्च विसर्जनम् । इन्द्रकु०, धर्मकु०, वरुणकु०, धनदकुम्भदेवतापू० सनक्षत्रदेवतामूलनक्षत्रदेवप्रतिमापूजनमच्छिद्रं ॥ आपन्नोस्मि । अद्य मे रक्षसां नाथ सर्वलोकनमस्कृत । खड्गपाणे महौजस्क प्रीयतां मम नैर्ऋते । आह्वानं । ततो भद्रपीठोपरि पत्नीपुत्रसमन्वितं कुम्भानां मन्त्रितं जलं मध्यकुम्भे निक्षिप्य तेनैव शतधारोदकेन (ऋंज्यलेस मंज) प्रधानमन्त्रैः (पृ१३०–१) सावीर्हिदेव (पृ १०७–१३) पावमान्यब्राह्मणं (पृ) योसौ वज्रधरो देवो महेन्द्रो गजवाहनः । शक्रो मम शिशोर्दोषं (मूल । गण्ड) सर्पजोत्थं व्यपोहतु १ योसौ शक्तिधरो देवो वृषभुग्मेषवाहनः । अग्निर्मम २ योसौ दण्डधरो देवो धर्मो महिषवाहनः । यमो मम० ३ योसौ खड्गधरो देवो नैर्ऋती राक्षसाधिपः । क्रव्यान्मम० ४ योसौ पाशधरो देवो नक्रवाहो जलेश्वरः । पाशी मम० ५ योसौ ध्वजधरो देवो जगत्प्राणो मृगासनः । वायुर्मे० ६ योसौ गदाधरो देवो निधीशो नरवाहनः । कुबेरो मे० ७ योसौ शूलधरो देवः पिनाकी वृषवाहनः । ईशानो मे० ८ योसौ पद्मधरो देवो विधाता हंसवाहनः । ब्रह्मा मम० ९ योसौ चक्रधरो देवो व्यापकस्ताक्ष्यवाहनः । विष्णुर्मे० १० योसौ मुखं देवतानां सहार्चिरमितद्युतिः । वह्नि-

मैंम० ११ योसौ कर्माकर्मसाक्षी लोकानां महिषासनः । धर्मोम० १२ विघ्नेशाः क्षेत्रपालाश्च लोकपाला नवग्रहाः । सर्वे म० १३ इति वस्त्रान्तरितकुम्भाभ्यां पश्चात्तु स्नापयेद्बुधः । ततः शुक्लाम्बरधरो यजमानोर्चयेद्द्विजान् इति ॥ कांस्यपात्रस्थिते घृते आज्यदर्शनं । यथा । आज्यं तेजः समुद्दिष्टमाज्यं पापहरं परम् । आज्यं सुराणामाहारमाज्ये लोकाः प्रतिष्ठिताः । तत्सद्ब्रह्म० पत्नीसुतकुटुम्बलक्ष्मीसहितस्य गण्डान्तादिदोषनिवारणार्थमाज्यं परिकल्पयामि नमः इति छायापात्रं ॥ तदनु घृतपात्रसहितं कुम्भपञ्चकं मूलप्रतिमां च प्रतिपादयेत् । सावित्राणि० सकुटुम्बस्य गण्डान्तादिदोषनिवारणार्थं मध्यकुम्भोपरि इमां निर्ऋतिप्रतिमूलप्रतिमां सहिरण्यां सवाससं साज्यां घृतपात्रसहितां ददानि ३ प्रतिगृह्णामि ३ क इदं० । एता देवता० । ब्राह्मणपृच्छां विसर्ज्य । पूर्णां दत्वा वैश्वदेवादि ॥ इति गण्डान्तादिशान्तिः ॥

अथ वेश्मप्रतिष्ठाविधानम् ।

ईशाने भूमिमधो द्व्यङ्गुलं खादित्वा गोमयेन पञ्चगव्येन संशोध्य । तत्र । गृहवास्तुनि सम्पूज्या पदैकाशीतिसंख्यया । तिर्यगूर्ध्वं विंशरेखाभूता त्रिपदषट्पदा । हस्तद्व-

यप्रमाणेन विस्तरायामतः समाः ॥ आदावश्मचूर्णेनैकाशीतिपदं वास्तुयागमुल्लिख्य तत्कोणेषु काण्डात्काण्डादिति शरान्पञ्चरङ्गसूत्ररक्तवस्त्राभ्यामुपरि संस्कृतान् संकीर्य । शराणां निकटे कलशान् ईशानतोबहिः । क्षेत्रपालाष्टकं वास्तोर्दक्षिणतो मातृकार्थं देवतवारिकादि तद्दक्षिणतो ग्रहमण्डलं तद्दक्षे एकादश क्षेत्रपालान् संस्थाप्य ॥ प्रधानं । ब्रह्मकलशे । अमीवहा० ब्रह्मणे नमः:० । ८। अक्षोटसप्तकेषु । ब्रह्मादेवाद्यां० । ब्राह्म्यै, माहेश्वर्यै, कौमार्यै वैष्णव्यै वाराह्यै नारसिंह्यै ऐन्द्र्यै ॥ ७ ॥ घृतधारासप्तसु ॥ गौरीर्मिमाय० ॥ गौर्यै पद्मायै शच्यै मेधायै सावित्र्यै विजयायै जयायै ॥ ७ ॥ नैरेंगिकादेवतासप्तसु । टिकूपूच । देवसेनायै सुधायै स्वाहायै मातृभ्यः लोकमातृभ्यः धृत्यै तुष्ट्यै ८ स्वात्मने । जातवेदसे० ॥ पुष्ट्यै आत्मदेवतायै २ । देवतमूनशाखासप्तसु । ये के च ज्मा० ॥ ललितायै उमायै गौर्यै अम्बिकायै सलिलाश्रयायै भगायै भगाक्ष्यै ७ भक्तगोलिकासप्तसु । राकामहं० ॥ अनुमत्यै राकायै सिनीवाल्यै कुह्वै धाम्न्यै सर्वेश्वर्यै अक्षेश्वर्यै ७ । देवतवारि । यो विश्वचक्षु० ॥ एकान्तवासिन्यै । गणानां त्वा० । क्षेत्रस्य पतिना वयं० ॥ दुर्गाक्षेत्रगणेश्वरदेवताभ्यः मातृमण्डलयागदेव-

ताभ्यः ॥ तद्विष्णोः० पञ्चायतनदे० यत इन्द्र० । क्षेत्रस्य पतिना वयं० पूर्वे हेरकाय अग्नेये त्रिपुरान्तकाय । दक्षिणे वेतालाय । नैर्ऋते अग्निजिह्वाय । पश्चिमे करालाय । वायवे करालिने । उत्तरे एकपादाय । ईशाने भीमरूपिणे । ऊर्ध्वे तारकाख्याय । पाताले हाटकेश्वराय । मध्ये राजराजेश्वराय । ततो देवतवारिकायां । पुनर्ब्रह्मादे० वानामित्यादि । वास्तोरीशानादारभ्य ॥ आवो राजानं० । ईशानाय नमः ॥ १ ॥ पर्जन्याय प्रगायत दिवस्पुत्राय मीढुषे, स नो यवसमृच्छतु । पर्जन्याय ॥ २ ॥ जयतामिव तन्यंतो मारुतामिति धृष्णया, यच्छुभं याथनानरः । जयन्ताय ॥ ३ ॥ ३–२ द्विपदेयाः त्रातारमिन्द्रं० । इन्द्राय ४–२ सूर्यो नो दिवस्पातु वातो अन्तरिक्षात्, अग्निर्नः पार्थिवेभ्यः । सूर्याय ५–२ सत्येनोत्तभिता भूमिः सूर्येणोत्तमिता द्यौः । ऋतेनादित्यास्तिष्ठन्ति दिवि सोमो अधिश्रितः । सत्याय ६–२ नासत्याभ्यां बर्हिरिव प्रवृञ्जे स्तोमामियर्म्यभ्रियेव वातः । यावर्भगाय विमदाय जायांसेनाजुवान्युहथूरथेन । भृशाय ७–२ हंसः शुचिषत्० आकाशाय ८ इत्यष्टौ पूर्वे ॥ अग्निमीळे० अग्नये ९ पूषा राजानमाघृणिरपगूढं गुहा-

हितम्, अविन्दद्विभ्रबर्हिषम् । पूष्णे १० मानो मित्रो वरुणो अर्यमायुरिन्द्र ऋभुक्षा मरुतो जुषन्त । मनोभिर्वाये ददाथे सुवृक्तं सोमं रुद्राय मीढुषे सजोषाः॥ वितथाय ११–२ गृहकृहमहनायात्यच्छा दिवे दिवे अधि नामादधाना । सिषासन्ती द्योतना शश्वदागादग्रमग्रमिद्भजते वसूनाम् । गृहक्षताय १२–२ त्रिकद्रुकेभिः० यमाय १३–२सोमो ददद्गन्धर्वाय गन्धर्वोददद्ग्नये । रयिञ्चपुत्रांश्चादादग्निर्मह्यमथो इमाम् । गन्धर्वाय १४–२ एकस्य वास्तुरावत प्रणाय वसमश्विनासनाथि सहस्रा । निरहतं दुच्छुना इन्द्रवन्तः पृथुश्रवसो वृषणवरातीः । भृङ्गिराजाय १५–२ मृगो न भीमः कुचरो गिरिष्ठाः परावत आजगन्था परस्याः । सृकं संशाय पविमिन्द्रतिग्मं विशत्रून्ताढि विमृधो नुदस्व । मृगाय १६ इत्यष्टौ दक्षिणे । मनोन्वाहुवामहे नाराशंसेन स्तोमेन, पितॄणां च मन्मभिः । पितृगणाय १७ वनस्पते शतवल्शं विरोह सहस्रवल्शा विवयं रुहेम । यन्त्वायं सुधितिस्तेतिजानः प्रणिनाय महते सौभगाय । दौवारिकाय १८ आमे गृहा भवन्त्वा प्रजाम आमा यज्ञो विशतु वीर्यवान् । आमो दिवे यज्ञिया मा विशन्तु सहस्रस्य मा भूमा प्रहासीत् ।

सुग्रीवाय १९–२ ब्रह्म जज्ञानं० पुष्पदन्ताय २०–२ इमं मे वरुण० वरुणाय २१–२ अयं दंष्ट्रो अर्चिषा यातुधानानुपस्पृशे जातवेदाः समिद्धः । आजिह्वया मूरदेवाञ्रभस्व क्रव्यादो वृक्त्वऽपिदधस्स्वान् । असुराय २२–२ आयावो भूष शुचिपा तपनः सहस्रन्ते नियतो विश्ववारा । उपे ते अन्धो मध्यमयामियतो देव दधिषे पूर्वपेयम् । शोषाय २३–२ ब्रह्मणाग्निः संविदानो रक्षोहा बाधितामितः । अमीवायुस्ते गर्भं दुर्नामा योनिमाशये । रोगाय २४ इत्यष्टौ पश्चिमे ॥ वायवायाहि० वायवे २५ नमो अस्तु सर्पेभ्यो० वासुकये २६ वषट्ते विष्णा० । मुख्याय २७–२ प्रतद्विष्णु० बलाटाय २८–२ आप्यायस्व० सोमाय २९–२ येषु वा यातुधाना० सूर्याय ३०–२ अदितिर्द्यौ० अदितये ३१–२ वसोः पवित्र० दितये ३२ इत्यष्टावुत्तरे ॥ अर्यमायातु वृ० अर्यम्णे ३३ । त्रिपदं । सविता पश्चात्तात्सविता पुरस्तात्सवितोत्तरातात्सविताधरात्तात् । सविता नः सुवत सर्वतातिं सविता नो रासतां दीर्घमायुः । सवित्र्यै ३४ । देवस्य त्वा० सावित्राय ३५ मा नो हेति विवस्वत इन्द्रः कोशमधुघवीम्, खेदय त्रिवृता दिवः । विवस्वते ३६ । ३ इन्द्र श्रेष्ठानि द्रविणानि देहि चित्तर्दक्षस्य

सुभगास्त्वमस्मे । पोषां रयीणामरिष्टन्तनूनां स्वात्मानं वाचः सुदिनत्वमह्नात् । विबुधाधिपतये ३७ जीमूतस्येव भवति प्रतीकं यदीर्मे याति समिधामुपस्थे । अनाविद्वया तन्वा जया त्वं सत्ववर्मणो महिमा पिपर्तु । जयाय ३८ प्रसमित्र मर्तो अस्तु प्रयस्वन्यस्त आदित्य शिक्षितव्रतेन । न हन्यते न जीयते त्वोतो नैनमंहो अश्नोत्यन्तितो दूरात् । मित्राय ३९ । ३ रुद्राखुं ते पंशुं० रुद्राय ४० मुञ्चामि त्वा० राजयक्ष्मणे ४१ इहैवैधिमाप० पृथ्वीधराय ४२ । ३ आपो अस्मान्मातरः० आपाय ४३ आपः पृणीत भे० आपवत्साय ४४ ब्रह्म देवानां०ब्रह्मणे४५॥मध्यपदेषु नवसु ९। एकवारं पाठः । ततश्चरक्याद्यष्टक्षेत्रेशानाम् । आदावीशानतः कोणेषु । अयं पन्था अनुवित्तः पुराणो यतो देवा उत जायन्त विश्वे । अतश्चिदा जनुश्रेष्ठप्रवृद्धो ममातरमुपयः पातुवेकः चरक्यै १ अयं पन्था० विदार्यै २ अयं पन्था० पूतनायै ३ अयं पन्था० पापराक्षस्यै ४ । पूर्वतो दिक्षु । वोधद्यन्मा हरिभ्यां कुमारः साहदेव्यः, अच्छान हूतउत्तरम् । स्कन्धाय ५ यते अर्यमन्वहृवो० अर्यम्णे ६ शन्नो भवन्तु वाजिनो० जम्भकाय ७ रक्षा णे अग्ने तव रक्षणोभिरारक्षाणः सोमवृप्रीणानः ।

प्रतिस्फुर वीरुज वीडुंजहि रक्षोमहिन्विद्वा विधानम् । पिलिपिञ्छाय ॥ ८ ॥ यौते श्वानौ यमरक्षतारौ० सर्वराक्षसादिभ्यः । तत ईशानतस्स्वरेषु । काण्डात्काण्डा० दुर्मदाय १ काण्डा० द्रुपदाय २ काण्डा० दुर्दशाय ३ काण्डा० द्रुमनाय ४ पञ्चरत्न-देवताभ्यः । तत ईशानतः कलशेषु । अग्निमीळे १ इषेत्वा २ अग्नआ याहि ३ शन्नो० ॥ ४ ॥ इन्द्रः पर्वता० ॥ यजमानमानीय । यत्रास्ति माता० । महागणपतये । ब्रह्मणे, कू० । ब्राह्म्यै माहेश्वर्यै कौमार्यै वैष्णव्यै वाराह्यै नारसिंह्यै ऐन्द्र्यै । गौर्यै पद्मायै शच्यै मेधायै सावित्र्यै विजयायै जयायै देवसेनायै सुधायै स्वाहायै मातृभ्यः लोकमातृभ्यः धृत्यै तुष्ट्यै पुष्ट्यै आत्मदेवतायै । ललितायै उमायै गौर्यै अम्बिकायै सलिलाश्रयायै भगाह्यै भगाख्यै । अनुमत्यै राकायै सिनीवाल्यै कुह्वै धात्र्यै सर्वेश्वर्यै अन्नेश्वर्यै । एकान्तवासिन्यै दुर्गाक्षेत्रगणेश्वरदेवताभ्यः मातृमण्डलया-गदेवताभ्यः । विष्णुपञ्जाय० । ईशानाय, पर्जन्याय, जयन्ताय, इन्द्राय, सूर्याय, सत्याय, भृशाय, आकाशाय, अग्नये, पूष्णे, वितथाय, गृहक्षताय, यमाय, गन्धर्वाय, भृङ्गिराजाय, मृगाय, पितृगणाय, दौवारिकाय, सुग्रीवाय, पुष्पदन्ताय,

वरुणाय, असुराय, शोषाय, रोगाय, वायवे, वासुकये, मुख्याय, बलाटाय, सोमाय, सूर्याय, अदितये, दितये, अर्यम्णे, सवित्रे, सावित्राय, विवस्वते, इन्द्राय, जयाय, मित्राय, रुद्राय, राजयक्ष्मणे, पृथ्वीधराय, आपाय, आपवत्साय, ब्रह्मणे । चरक्यै, विदार्यै, पूतनायै, पापराक्षस्यै, स्कन्दाय, अर्यम्णे, जम्बकाय पिलिपिच्छाय, सर्वराक्षसादिभ्यः । दुर्मदाय, द्रुपदाय, दुर्दशाय, द्रुमनाय, पञ्चरदेवताभ्यः । इन्द्राय वज्र० पूर्वे हेरुकाय० वेश्मप्रतिष्ठानि० दीपधूपः ॥ गायत्र्यै नमः ३ वास्तुपुरुषाय विद्महे । वास्तुराजाय धीमहि । तन्नो वास्तुः प्रचोदयात् ३ अद्यतावत् महागणपतेः० वास्तुप्रतिष्ठानिमित्तमावाहयिष्यामि ॥ कलशावाहन (पृ० ७-३) मनु । वास्तोरावाहनम् । एह्येहि नारायण विश्वरूप सर्वामरैरर्चितपादपीठ । चराचराणां जगतामधीश लक्ष्मीयुतो मेऽपचितिं गृहाण १ नमः कौस्तुभनाथाय हिरण्यकवचाय च । क्षीरोदार्णवसुप्ताय जगद्धात्रे नमो नमः २ नमो हिरण्यगर्भाय विश्वरूपाय विष्णवे । भूलोकप्रमुखा लोकास्तव देहे व्यवस्थिताः । ३ नन्दन्ति यावत्कल्पान्तं तथास्मिन्भुवने गृहे । त्वत्प्रसादेन देवेश पुत्रपौत्रयुतो

द्विजः ४ पञ्चयज्ञक्रियायुक्तो वसेदाचन्द्रतारकम्। श्वेताम्बरः० भगवन्पु० । दक्षिणान्तं । **ये के च ज्मेति** वास्तोः पुष्पं । **चर्वणापूपैर्नैवेद्यं ग्रहाणां । ओं नमो आदित्यायेत्यादि** मन्त्रैः । पृ० ११८-१२ **ततोऽग्निकर्म । अन्नहोमं विधाय । मातृकापूजनं । पशूपहारः** पृ० १२५।१३ **ऋतुतिथिः । नैवेद्यं** तावत् ॥ ततो लग्नवेलां परीक्ष्य । **बृहद्द्वार**समीपे सर्वसंभारं संस्थाप्य पूर्णपात्रं पूर्णकुम्भं खड्गं गां दम्पती वेदवन्तं ब्राह्मणं दीप्तां चुल्लीं खण्डिनीं पेषणीं क्रौञ्चीं तीक्ष्णां काञ्चिकं मार्जनीं च संगृह्य यत्र २ प्रवेशः स्यात्तत्र २ तैः सह ॥ **आदौ पूर्वतोरणपूजा** । दारुनिर्मिततोरणचतुष्टयं चतुर्दिक्षु पूजयेत्। पूर्वमेव प्रतितोरणं शाखयोरधः कुम्भौ (सनिबारि) सजलौ भूमौ निक्षिप्य, तदुपरि कुश्रावकौ (पर्व) सशालियवाजाफलौ, तन्निकटे सजलाक्षतौ दीपौ क्षेत्रेशार्थं च संस्थाप्य ॥ पूर्वतोरणे त्रिपताकं, अन्येषु द्विपताकं सर्वे द्विमालायुतं च कृत्वा ॥ **अथ** सर्वतोरणेषुसामान्य**पूजा । शुक्लाम्बरधरं० । महागणपतये प्रशान्ताय शिशिरघटाय शान्तितोरणदेवताभ्यः** दीपधूपः । **तोरणपृष्ठे । मृद्भस्मगोमयैः स्नाप्य कषायफलवारिभिः । आक्रम्य० । प्रसद्य भ० । इह गावः०** ॥ **याः फलिनी० उदुत्तमं०** ।

ततः **शंकुस्नानं** २१ । अम्बुना । **प्रथमं स्नानं गायत्र्या चाभिमंत्रितम् । गायत्र्यैनमः** १ भस्मना । **निर्दग्धंरक्षो:०** २ । मृदद्भिः । **उदुत्तमं** ३ गोमयेन । **इह गावः** ४ सर्षपेण । **रक्षोहणं** ५ त्रेताग्निभस्म । **बृहत्साम क्षत्रभृद्वृद्धवृष्ण्यं त्रिष्टुभौजः शुभित-मुग्रवीरः । इन्द्रस्तोमेन पञ्चदशेनौज इदं वातेन सगरेण रक्ष** ६ वृषशृङ्गेण । **चत्वारि शृङ्गास्त्रयो अस्य पादाद्वे शीर्षे सप्तहस्तासो अस्य । त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यानाविवेश** ७ क्षीरोदकं । **मनसा काममाकूतिं०** ८ हिर-ण्यतोयैः । **हिरण्यवर्णा हरिणीं०** ९ दर्भपिञ्जलैः । **तरत्समन्धि धावति धारासुतो-स्यान्धसः, तरत्समन्धी धावति** १० तीर्थतोयैः । **इमं मे वरुण०** ११ नद्युदकं । **इतो न्विन्द्रं स्तवामहेऽहं शुद्धः शुद्धेन साम्ना । शुद्धैरुक्थैर्वावृध्वांसं शुद्ध आशीर्वान्ममत्तु** १२ पर्वताग्रदमध्याद्वा । **इन्द्रः पर्वता०** १३ शङ्खतोयैः । **वात आवातु भेषजं शम्भुमयो भुवि हृदि, प्राण आयूंषि तारिषत्** १४ क्षेत्रमृत् । **अश्वक्रान्ते०** १५ वाल्मीकमृत् । **अग्निर्ऋषिः प** १६ रत्नवारि । **ऋतं च सत्यं** १७ माक्षिकोदकं । **मधुवाता ऋ०** १८ दधि । **दधि क्राव्णो** १९ सर्वोषधी । **या ओषधयः** २० पञ्चगव्यं । **समुद्रादूर्मिर्म** २१

देवर्षितर्पणं । **संब्वः सृजामि** । अद्यतावत् **महागणपतेः०** । **प्रशान्तस्य शिशिरघटस्य शान्तितोरणदेवतानां वेश्मप्र० शान्तितोरणपूजनमर्चामहं करिष्ये** । आसनादि । **पुष्प** पूजा । **तोरणो**र्ध्वमध्ये । **महागणपतये** । तद्वामदक्षिणयोः । **श्रियै, सरस्वत्यै** । पुनः । **धात्र्यै, पर्जन्याय** । मध्ये । **वरुणाय** । मध्यपताकायां । **श्वेताय** । वामे । **वज्राय** । दक्षिणे । **शक्त्यै** । पुनः । **अग्निमीळे** । **ऋग्वेदाय** । **कृतयुगाय** । मालयोः । **शच्यै** । **लक्ष्म्यै** । स्तम्भयोः । **इन्द्राय** । **अग्नये** । शाखयोः । **आदित्याय** । **भौमाय** । कुम्भयोः । **गङ्गायै** । **यमुनायै** । कलशयोः । **प्रशान्ताय** । **शिशिरघटाय** । क्षेत्रेशयोः । **हेरुकाय** । **त्रिपुरान्तकाय** । **शान्तितोरणदेवताभ्यः नैवेद्यान्तं** । पुरोळाशयोः **योस्मिन्निति क्षेत्रेशबलिः** पृच्छां **विसर्जयेत्** । एवं सर्वेषु । **विशेषो** यथा । **अथ दक्षिणतोरणपूजा** ॥ **पर्जन्याय, अशोकाय, भूतितोरणदेवताभ्यः दीपधूपः** ॥ **पुष्पपूजा तोरणो**परि । **महागण० श्रियै, सर०**, पुनः । **इन्द्राय, मार्गाय** । मध्ये । **अंशुपतये** । पताकयोः । **चण्डायै** । **सीतायै** । पुनः । **इषेत्वो** । **यजुर्वेदाय** । **त्रेता०** । मालयोः । **धूम्रायै** । **मायायै** । स्तम्भयोः । **यमाय** । **नैर्ऋतये** । पुनः ।

शनैश्चराय । राहवे । शाखयोः । **प्रत्यूषाय । प्रदोषाय** । कुम्भयोः । **भृङ्गिराजाय । विघ्नेशाय** । कलशयोः । **पर्जन्याय । अशोकाय** । क्षेत्रेशयोः । **वेतालाय । अग्निजिह्वाय । भूतितोरणदेवताभ्यः** ॥ अथ पश्चिमे । **सञ्जीवनाय, अमृताख्याय । बलाख्यतोरणदे०** । पुष्पपूजा । तोरणोपरि । **महाग० श्रियै, सरस्वत्यै** । पुनः । **विवस्वते अर्यम्णे** । मध्ये । **मित्राय** । पता० । **पाशाय । आपाय** पुनः । **भग्न आया० । सामवे । द्वापर्यु** । मालयोः । **गौर्यै, सरस्वत्यै** । स्तम्भ । **विष्णुचक्राय । हाटकेश्वराय** । पुनः **पाशाय । वायवे** । शाखयोः । **चंद्राय । शुक्राय** पुनः **आपाय । वरुणाय** । पुनः **वृषस्कन्दाय कुमाराय** । कुम्भयोः । **सिन्धवे । सरय्वै** । कल० । **सञ्जीवनाय । अमृताख्याय** । क्षेत्रेशयोः । **कालाक्षाय । करालाय । बलाख्यतोरणदे०** ॥ अथोत्तरे । **अर्थदाय । बुद्धिदाय । आरोग्यतोरणदेवताभ्यः** । पुष्पपूजा । ऊर्ध्वे **महाग० श्रि० सर०** पुनः **विष्णवे । पूष्णे** । मध्ये । **भगाय** । पता० । **गोदावर्यै । त्रिशूलाय** पुनः । **शङ्खोदे । अथर्व, कलियु** । मालयोः । **बुद्ध्यै, भद्रकाल्यै** । स्तम्भ । **कुबेराय । ईशानाय**, पुनः । **बुधाय । बृहस्पतये** । शा । **सोमाय । ईश्वराय** । पुनः । **उमायै, चण्डायै** । कुम्भ । **कावेर्यै, सरस्वत्यै** । कल । **अर्थदाय, बुद्धिदाय** । क्षेत्रेशयोः ।

एकपादाय । भीमेश्वराय । आरोग्यतोर० ॥ सर्वेषां तोरणानां प्रदक्षिणं कृत्वा पश्चिमतोरणेन प्रविश्य बृहद्द्वारोपरि गत्वा । तत्र पूजा । महाग० धर्माय, अधर्माय, देहल्यै, खिङ्किन्यै मेरुप्राकारदेवताभ्यः वास्तुप्र० दीपधूपमनु क्षीराज्यमधुयवादिभिर्बृहद्द्वारोपरि देवर्षिपितृतर्पणम् । ॐभूस्तृप्यतां, ॐभुवः, ॐस्वः, ॐभूर्भुवः स्वः । ब्रह्मा, विष्णुः, रुद्रः, ईश्वरः, सदाशिवः । पृथिवी, आपः, तेजः, वायुः, आकाशः, । वर्हितर्पयामि, सूर्यं, सोमं, वरुणं, वायुं, यमं, कुबेरं, इन्द्रं, पृथ्वीं, अपः, तेजांसि, अग्निं, आदित्यं, वरुणं, चन्द्रं, कुमारं, भौमं, विष्णुं, बुधं, इन्द्रं, बृहस्पतिं, सरस्वतीं, शुक्रं, प्रजापतिं, शनैश्चरं, गणपतिं, राहुं, रुद्रं, केतुं, ब्रह्माणं, ध्रुवं, अनन्तं, अगस्त्यं, कालं, विश्वकर्माणं, वसून् मरुद्गणान्, एकादशरुद्रान्, द्वादशादित्यान्, सिद्धान्, साध्यान्, विद्याधरान्, देवर्षीन्, नागर्षीन्, राजर्षीन्, श्रुतर्षीन्, तपर्षीन्, साध्यर्षीन्, ऋषीन्, परमर्षीन्, किन्नरान्, नागान्, गन्धर्वान्, वैनतेयान्, अप्सरसः, समुद्रान्, पर्वतान्, नक्षत्राणि, नक्षत्रदेवताः, देवमातॄः, देवपत्नीः, देवकन्याः, देवपुत्रान्, वेदान्, वेदाङ्गानि, यज्ञान्, धर्मं, अर्थं, कामं, मोक्षं, धर्मशास्त्राणि, शास्त्रप्रणेतॄन्, सत्वान्, दिशः, विदिशः, दिक्पतिं,

तीर्थानि, नदीः, सप्तलोकान्, सप्तपातालानि श्रियं सरस्वतीं दिवञ्चरान् नक्तञ्चरान् कण्ठोपवीती । सनकस्तृप्यतामित्यादि ॥ संध्वः सृजामि । आवाहयाम्यहं देवं गणेशं पृ० ७९-३ कुमारं २ । एवं ६ । अथपुष्पपूजा द्वारे । द्वारवासिन्यै वामान्यै द्वारलक्ष्म्यै विश्वकर्मणे खिङ्खिन्यै । द्वारमूले । गङ्गायै यमुनायै धर्माय अधर्माय वैश्रवणाय अस्त्राय नारदशस्त्राय धात्र्यै गौर्यै श्रियै लक्ष्म्यै शुष्कायै सिद्धये जयायै विजयायै रक्तचामुण्डायै लम्बोष्ठ्यै वाराह्यै मङ्गलादेव्यै वास्तोष्पतये कीर्तये मायायै समृद्ध्यै वृद्ध्यै सिद्ध्यै विभूत्यै लावण्यै सुभगायै सुमनस्यै सौभाग्यै दूत्यै बहुरूपायै मनोहरायै सुभगायै कीर्तिन्यै जयन्त्यै विजयायै अपराजितायै प्रतापिन्यै भद्रङ्कर्यै महोत्सुकायै मोहिन्यै ध्वंसिन्यै लाञ्छिन्यै सिंहिन्यै मृत्युवर्धिन्यै लङ्गिन्यै कृपाकरिण्यै क्षयकारिण्यै मायादेव्यै मेषाय कूर्माय हृदाय त्रिभुवनेश्वराय नरसिंहायै गजासनाय दण्डहस्ताय मकराय कौवेर्यै नन्दिन्यादिभ्यः पूर्वादितः नन्दिन्यै सुभगायै सुमङ्गलायै भद्रङ्कर्यै अणिमायै लघिमायै महिमायै गरिमायै ईशितायै वशितायै प्राप्त्यै प्राकाम्यायै ईशिन्यै वशिन्यै सर्वसिद्ध्यै शेषभट्टारकाय अष्टाचत्वारिंशद्वास्तोष्पतिदे० ब्र० कू० ध्रु० अ० ह० ल० क० अर्घो नमः पुष्पं नमः

नैवेद्यान्तं । ततो लाजाक्षतौ विकीर्यन् । वामे भार्यां समाधाय श्रोत्रियं दक्षिणे द्विजम् । जलकुम्भं वामहस्ते खड्गं दक्षिणपाणिना १ पूर्वे धेनुं प्रविश्यादौ वाद्यैर्मङ्गलभूषितैः। वाद्यं नानाविधं चैवं पुष्पैर्द्वारं प्रपूजयेत् २ लक्ष्मीसूक्तं १ कनिक्रदद्दिति पृ० ४–३ पठन् प्रविशेत्। पुनश्चेदं। धारानिपातात्सलिलप्रकम्पाद्दंष्ट्रानिपातात्पवनप्रकोपात् । वह्नेश्च दाहान्मुषिताच्च चौरै रक्षत्विदं सद्म शिवं च मेस्तु २ खड्गहस्तो महातेजा दुरिष्टानां निवारकः । निर्गच्छ निर्गच्छ वदेत्प्रविशामि शुभं गृहम् २ नन्दे नन्दय वासिष्ठे वसुभिः प्रजया सह । जये जयावहे देवि प्रजानां जयमावह ३ पूर्णेऽङ्गिरसदायादे पूर्णकामं कुरुष्व माम् । भद्रे कश्यपदायादे कुरु भद्रां मतिं मम ४ सर्वबीजसमायुक्ते सर्वरत्नौषधावृते । रुचिरे नन्दिने नन्दे वासिष्ठे रम्यतामिह ५ प्रजापतिसुते देवि चतुरग्रे महीयते । सुभगे सुव्रते भद्रे गृहं काश्यपि रम्यताम् ६ पूजिते परमाचार्यैर्गन्धमाल्यैरलङ्कृते । भवभूतिकरे देवि गृहे भार्गवि रम्यताम् ८ अव्यक्तस्वाकृते पूर्णे मुनेरङ्गिरसः सुते । इष्टिके त्वं प्रयच्छेष्टं प्रतिष्ठां कामयाम्यम् ८ देवस्वामिपुरस्वामिगृहस्वामिपरिग्रहे । मनुष्यधनहस्त्यश्वपशुवृद्धिकरी भव ९ अस्मिन्वास्तुनि वर्धस्व धनधान्येन मेदिनि ।

उत्तमं वीर्यमास्थाय नमस्तेस्तु शिवा भव १० इति पठन्द्वारकोणान्ददत्खड्गं च कोष्ठकान्। हर्म्यपृष्ठे तदारुह्य जालाक्षतकपर्दिकान् ११ विकिरन्नवरुह्यास्मान्द्विजान्पादाग्रतो व्रजेत्। अकवाटमविच्छिन्नमदत्तबलिभोजनम्। गृहं न प्रविशेद्धीमानापदामालयं गतः। आदौ घटिका (उगमुर) पूजनं। तत्रादौ कपोतमोक्षणं कृत्वा। तोरणपूजावत् विशेषो। यथा मह्रा० ऊर्ध्वदेवताभ्यः वा घटिकायागदेवताभ्यः दीपधूपः॥ तत्पुरुषा० महादेवा ३ वासुदेवाय विद्महे ३ महागणपतेः० पृथिव्याः आपां तेजसः वायोः आकाशस्य। मध्ये। ब्रह्मविष्णुमहेश्वरदेवतानां। ऊर्ध्वे शिवस्य ईशानस्य ईश्वरस्य एकादशरुद्राणां रुद्रस्य शङ्करकस्य, सर्पस्य वरुणस्य सदसस्पतेः बुधस्य धूमकेतोः विख्यातस्य ज्वरस्य अजस्य भुवनेश्वरस्य मृत्योः कापालिकस्य। द्वादशादित्यानां आदित्यस्य रवेः गभस्तेः भानोः सवितुः दिवाकरस्य धर्मस्य तपनस्य भास्करस्य सूर्यस्य त्वाष्टुः स्वर्पतेः शोषस्य अङ्गारकस्य सोमस्य वायोः वामदेवस्य शिवस्य शक्त्याः नन्दिन्याः दूरवासिन्याः चिच्छिन्याः प्रमचण्डायाः कालराज्याः याम्यदेव्याः दिव्याः अम्बिकायाः डाकिन्याः अट्टाट्टहासिन्याः भारिण्याः जयन्त्याः ऐरुण्याः औषीच्याः क्रोधिन्याः अशन-

जिह्वायाः उल्कापातिन्याः गर्जिन्याः हारिण्याः धुर्यचन्द्रिकायाः नक्षत्र्याः प्राज्ञ्याः बोडिन्याः भीषण्याः पर्जन्यायाः सिंहक्रान्तायाः अपराजितायाः वानर्याः मूषक्याः सौरन्याः सौकर्याः पौष्ण्याः चमन्तर्याः रोहिन्याः हरिकेशिन्याः घोरायाः सर्वमुख्यायाः भीमायाः भैरव्याः जम्भिन्याः धरायाः पिचवक्त्रायाः परायाः भव्याः भद्रकाल्याः हरिद्रायाः चोरिन्याः वाचिन्याः चक्र्याः वृषन्याः धूसराननायाः इन्द्रस्य वरुणस्य अग्नेः वायोः व्योम्नः. नवग्रहाणां घटिकादेवतानां वास्तुप्रतिष्ठानिमित्तं घटिकादेवपूजनमर्चा० । नैवेद्यान्तं क्षेत्रेशबलिः । ततः स्थूनसमीपं गच्छेत् ॥ आदौ भूतादिनिवारणार्थं रत्नवाटिकां स्तम्भमूले रक्षोहणमिति मन्त्रेण भूमौ क्षिपेत् ॥ स्थूनस्य पञ्चगव्यादिना संस्कृत्येशाने सन्निधानकरणमन्त्रः ॥ ध्रुवांस्य नोस्य मृतस्य पर्ली क्षेमे तिष्ठ घृतमुक्षमाणान्त्वा । स्थूणे सर्ववीराः सुवीरा अरिष्टवीरा इह संविवेश १ इह वै स्थूणे अमृतेन रोहाऽश्वमती गोमवत्यमृतवती सूनृतावत्यूर्जस्वती च । पयस्वत्यस्मान्स्थूणे पयसाभ्यववृत्सु २ आत्वा कुमारस्तरुण आवत्सो जगता सह आत्वा परिस्रुतः । कुम्भ आदधुः कलश ऐरयदिति प्राञ्चं वंशमारोपयति ३ ऋतेन स्थूनामधिरोह वंशोग्रे विराजन्नपसीद शत्रून्, अथा रयिं

सर्ववीरा वयन्ते ४ मृत्पुत्तलिकासमाधानं । यो रुद्रो इति । तानस्याधः क्षेत्रेशद्वयं (सन्यवारि) तयोः समाधानं ॥ यो विश्वचक्षु १ ये देवा दिव्येकादश २ ॥ पूजा तोरणवत् महाग० ब्र० कू० ध्रु० शिख्यादिभ्यः पञ्चचत्वारिंशद्देवताभ्यः वेश्मप्रतिष्ठा निमित्तं धूपदीपः । पुष्पपूजा । स्तम्भमूले वामतः कूर्माय शेषभट्टारकाय बलि-दानवाय वैश्रवणाय शेषाय कृतयुगाय त्रेता द्वापर कलि, ऋग्वे, यजुर्वे, साम, अथर्वे, ऊर्ध्वे ध्रुवाय हरये विष्णवे । तदूर्ध्वे ब्रह्मणे इन्द्राय नवग्रहदेवताभ्यः महावैष्णव्यै अनन्ताय मध्ये कुमाराय गणपतये वास्तोष्पतये द्विभुजाय गदाभृते ईशानाय तदधः बहुरूपाय कामाय पुनरूर्ध्वे मेरवे मन्दराय हिमाचलाय ब्रह्मे-शाय हेमकूटाय पृथ्वीधराय तदधः वाग्देव्यै अनन्ताय ब्राह्म्यै माहेश्वर्यै वाराह्यै नारसिंह्यै ऊर्ध्वे छत्रधारिणे केशवाय सुतलाय पूर्वादितः जयायै दण्डहस्ताय मकरासनाय कौवीर्यै वेश्मवासिन्यै सपरिवारायै ईशानतः नन्दिन्यै सुभगायै सुमङ्गलायै भद्रङ्कर्यै ऊर्ध्वे सुमङ्गल्यै अणिमायै लघिमायै महिमायै गरिमायै ईशितायै वशितायै प्राकाम्यायै प्राप्त्यै सर्वसिद्ध्यै शिख्यादिभ्यः पंचचत्वा० अर्घपुष्पौ । नैवेद्यान्तं स्थूने मालां बन्धयेत् ॥ अथ सिद्धस्थाने पुनर्नैवेद्यं पुरोळाशे

यथा ॥ गृहपीठयागदेवताभिर्बहिभिः सहितायै सिद्धस्थाने (ठाकुरकुठ) **वाराह्यै** १ श्रीस्थाने (भानकुट) **महालक्ष्म्यै** २ द्वारे **तेजोवत्यै** ३ स्थूने **वज्रवत्यै** ४ तमोहरे (तार) **नारसिंह्यै** ५ भक्तभाण्डे **सोमवत्यै** ६ घटे **जलोदर्यै** ७ पेषण्यां **चर्ममुण्डायै** ८ मार्जन्यां **कृशोदर्यै** ९ शूर्पे **विन्ध्यवासिन्यै** १० कुण्डे **दक्षकर्णाय** ११ प्रस्तार्यां (भ्रान्दकन्य) **त्वष्टुवक्त्रायै** १२ शकटे (मञ्जुल) **प्रेतवक्त्राय** १३ उपले (काज्यवठ) **गोमुख्यै** १४ उलूखले **वेध्रवत्यै** १५ दर्व्यां **पुत्रवत्यै** १६ काञ्चिके **चक्रेश्वर्यै** १७ उच्छिष्टवार्भाण्डे **वासिन्यै** १८ भारधान्यां (गरवंज) **विघ्नेश्यै** १९ गोस्थाने **मङ्गलायै** २० भाण्डमण्डले **चण्डिकायै** २१ इष्टौ (अग्निमनन) **ज्वालामुख्यै** २२ मुसले **भग्नकर्ण्यै** २३ कुट्टिन्यां **लम्बोष्ठ्यै** २४ कर्तर्यां **कालरात्र्यै** २५ करयष्ट्यां (गवा) **महाकाल्यै** २६ चुल्ल्यां **अग्निवासिन्यै** २७ वेलवर्दे (ठठज दगुन) **महामायायै** २८ पावे (कण्डपलिज) **अश्वमुख्यै** २९ कलच्छे (कच) **क्षुधिवत्यै** ३० चालन्यां **शंकुकर्ण्यै** ३१ दीपे **प्रभासिकायै** ३२ चषके (भतठल) **गजकर्ण्यै** भोजनपात्रे **अमृताक्ष्यै** ३४ देहल्यां (भान्द अम्बरकुन) **द्वारवासिन्यै** ३५ कर्णद्वारे (दत) **किङ्किण्यै** ३६ मध्ये **शेषाय** ३७ **ईशाने** **वृषभवाहिन्यै** ३८ **नैर्ऋते** **कूराय**

६९ वायवे नागाय चत्वारिंशत्स्थानयोगिनीभ्यः गृहमध्ये सर्वयोगिनीसहिताय भैरवाय नैवेद्यं ॥ यागस्थाने नैवेद्यं ॥ इळामग्ने इत्यादि पर्वतंत्रं ॥ अग्नि पृच्छां च विसर्ज्य धनं गुणं देहि पुनीहि मह्यं लुनीहि पापेभ्यनसश्रयं च । अकारणाद्वैरपराज्ञनायोंच्छ-मूल्सम ख्याअहि जातवेदाः १ राज्ञां शिवं० २ ककशपुष्पां विसर्ज्य । आपश्नोम्मि । ईशानविष्णु । अथवास्तोः पुष्पाणि । श्वेताम्बरः । क्षमस्व देवदेवेश देवाधि-ष्ठितविग्रह । पुत्रपौत्रादिकं सौख्यं देहि मे वास्तुपूरुष १ राज्यं देहि धनं देहि लक्ष्मीं देहि च पुष्कलाम् । आयुरारोग्यमैश्वर्यं देहि० २ सर्वलक्षणसम्पूर्णः सर्व-देवनमस्कृतः । प्रसन्नो वरदो देव भवाय वा० ३ अस्मिञ्जन्मनि मे नाथ कृतं पापं यदेव वा । तन्मे नाशय देवेश शीघ्रं त्वं वास्तु० ४ सप्तजन्मकृतं पापं वाङ्मनःकायकर्मजम् । तत्सर्वं विलयं यातु प्रसादात्तव सर्वदा ५ कल्पकोटिसह-स्राणि महापद्मशतानि च । अयुतं नियुतं चैव देवलोके वसेत्सुखी ६ मानुष्यं पुनरावृत्य चक्रवर्ती सुतो भवेत् । शूरश्च बहुपुत्रश्च बहुसौख्यश्च जायते ७ धन-धान्यसमृद्धश्च नित्यतृप्तो भवेत्तु सः । यथा ब्रह्मलोकपालश्च खेचरैर्भूचरैः सह ८ बहु-वर्षशतायुश्च स्वर्गलोके महीयते । अप्सरोगणसङ्कीर्णे विमानेष्ववतिष्ठति ९ भूर्लो-

कमुखा लोकास्तव देहे व्यवस्थिताः । नन्दन्ति यावत्कल्पान्तं तथास्मिन्भवने गृहे १० त्वत्प्रसादेन देवेश पुत्रपौत्रयुतो द्विजः । पञ्चयज्ञक्रियायुक्तो वसेदा-चन्द्रतारकम् ११ धारानिपातात्सलिलप्रकम्पाद्दंष्ट्रानिपातात्पवनप्रकोपात् । वह्नेश्च दाहान्मुषितांश्च चौरै रक्षस्त्विदं सद्म शिवस्त्वमेव १२ गणेशस्य सर्गारम्भे० विभ्र-द्दक्षि० शब्दब्रह्ममये० । देवि प्रपन्ना० । यन्मया क्रियते कर्म जागृत्स्वप्नसुषुप्तिषु । तत्सर्वं तावकी पूजा भूयाद्भूत्यै नमः शिवे १ अपराधसहस्राणि क्रियन्तेऽहर्निशं मया । दासोऽयमिति मां मत्वा क्षमस्व परमेश्वरि २ जानताऽजानता वापि यन्मया क्रियते शिवे । मम कृत्यमिदं सर्वमिति मत्वा क्षमस्व मे ३ कर्मणा मनसा वाचा त्वया नान्या गतिर्मम । अनुचारेण भूतानां रक्ष त्वं परमेश्वरि ४ यदक्षरपदभ्रष्टं मात्राहीनं च यद्गतम् । क्षन्तुमर्हसि देवेशि कस्य न स्खलितं मनः ५ क्षमस्व देवदेवेशि त्रिपुरे परमेश्वरि । तव पादाम्बुजे नित्यं निश्चला भक्तिरस्तु मे ६ ग्रहेषु । अहिंसकस्य० (पृ० १२०–४ इति क्षमापुष्पाणि नमो ब्रह्मणे इति तर्पणम् ॥ इतिवेश्मप्रतिष्ठा ॥ अथ रत्नवाटिका । सुवर्णं रजतं ताम्रं कांस्यं लोहं त्रपु तथा । रीतिं भृङ्गारकं सीसं विद्रुमं स्फाटिकं तथा । सुन १ रूप २ ताम ३ लुय

४ शस्तूर ५ सर्तल ६ ज्यस्त ७ भाङ्गरे ८ कलाव ९ लदूर १० मुट्कफले ११ ॥ राजवर्तं च (अल्मास) गोमीदं (जर्द) १३ शङ्खं च १४ मणिमौक्तिकम् १५ गारुत्मतं (याको) १६ पद्मरागं (जम्बोद) १७ वज्रं (यामुन) १८ वैडूर्यकं मणिम् ॥ ३ ॥ रसं (पारूद) मनःशिला मुस्ता वचः कुष्टं नखं तथा । मुरा (छर) शैलेय (बटा फटो) कर्पूरं मृगनाभी म कुङ्कुमम् ॥ चन्दनद्वयमारीचं पिप्पीली च शितावरी (कूचू) हरितालं मधुयष्टी (मजेठ) मुद्गपर्णी (शङ्कूर) कुमारिका ॥ पुनर्नवा विष्णुक्रान्ता शतपुष्पा (सुयपुष) सुवर्चला । (सुचल) सहदेवी च व्याघ्री च श्यामा ब्राह्मी महौषधिः (शुण्ठ) । हरिद्राद्वय दूर्वा च अश्वगन्धा कच्यौरका ॥ च्येना च (दालचीन) भूतकेशी च (भूतजटा) तथा वीतसिपत्रकम् । अर्कपर्णी मपामार्गं यवा धान्यं सरोवरम् । त्रिफला चैव (हलिल बलिल आमूल) दैलिङ्गं (शुङ्गरफ) पद्मचारि (पम्मचाकन) कमलकम् । जातिफलं च सूफारी पहाण्डिका च सर्षपम् ॥ इति ॥ अथ सामग्री ॥ अग्निहोत्रसमिधः घृतं श्रीफलं अक्षोट ११ वास्तोरर्थे । यवाक्षततिला लाजा बधिरः आवकालि (टाकिर) दीपालि २० चर-क्याद्यर्थे ८ तोरणचतुष्टयार्थे ८ रत्नदीपार्थं ४ यागस्य चतुर्दिक्षु कुम्भार्थं शनिचरि-

दूयतवारू १ । हर्म्यपृष्ठे मोक्षणार्थं कपोतं । हम्द वरि । गृहस्य चतुर्दिक्षु कोल मण्डनं कलशार्थं छिट सोक कान ४ शंशिर भरण्य (तोरण) ४ वास्तुपुरुष (तान)॥ मधु सर्षपा कर्पूरं पुष्पमाल तोरणार्थे ९ द्वारार्थे १ ताने १ बृहद्द्वारे (उग) १ । प्रवेशे कामधेनुः कअपावो, दजबुन भकचोर, दांकुत जङ्गार्थं पञ्चरङ्गदेवता (नारे-वन) वास्तोःकोणेषु शरान्संकील्योपरि साल सहितात् पञ्चरङ्गेन बंधयेत् पताका तोरणेषु ५ बृहद्द्वारे २ हर्म्ये (उग) २ पशुः विप्रतभ्रतारकयोः वस्त्रं । वनचोन । तुम्बकनारि वगैरे । पृथक्पाकेन पुरोळाशान् तोरणादि क्षेत्रेशार्थं २० पश्चात्सिद्ध-स्थाने । सिद्धस्थाने वाराह्यै इत्यादि नैवेद्यार्थं पुरोळाशं ॥ भक्तपाचनभाण्डे अक्षोटसक्तं क्षिपेत् । रत्नवाडिकार्थं वारू १ इति ॥

॥ अथ पञ्चगव्यविधिः ॥

गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् । निर्दिष्टं पञ्चगव्यं च पवित्रं कायशोधनम् १ गायत्र्यादाय गोमूत्रं गन्धद्वारेति गोमयम् । आप्यायस्वेति च क्षीरं दधिक्राव्णेति वै दधि २ तेजोसीति घृतं प्रोक्तं देवस्य त्वा कुशोदकम् । गोमूत्रं गोमये क्षेप्यं ते संक्षिप्ये घृते तथा ३ तानि दध्नि प्रक्षिप्यानि तत्सर्वं

पयसोन्तरे । एकीकृत्य तु तत्सर्वं कुशोदकविमध्यगम् ४ आपो हिष्ठेति चालोक्य प्रणवेन तु तत्पिबेत् । औदुम्बरे पद्मपत्रे रौप्यपात्रे हिरण्मये ५ मंत्रपूतं पिबेत्तु त्रीन्वारान्पञ्चगव्यकम् । शुक्रवतीति मंत्रेण प्रक्षिपेद्दिक्षु सर्वतः ६ पलमात्रं दुग्धभागं गोमूत्रं तावदिष्यते । घृतं च पलमात्रं स्याद्गोमूत्रं तोलकद्वयम् ७ दधि प्रसृतमात्रं स्यात्पञ्चगव्यं त्विदं स्मृतम् । अथवा पञ्चगव्यानां समानो भाग इष्यते ८ मूलमंत्रेण संमंथ्य कुशाग्रेणैव शोधयेत् । तेन सर्वविशुद्धिः स्यात्सर्वपापनिकृन्तनम् ९ गोमूत्रं ताम्रवर्णायाः शुक्लवत्यास्तु गोमयम् । पयः काञ्चनवर्णाया नीलायाश्च तथा दधि १० घृतं च कृष्णवर्णायाः सर्वं कापिलमेव वा । गोमूत्रं माषकास्त्वष्टौ गोमयस्य तु षोडश ११ पयसो द्वादश प्रोक्ता दध्नः पञ्चदश स्मृताः । घृतस्याष्टादश प्रोक्ताः प्रमाणं पञ्चगव्यके १२ एकोनविंशमाषास्तु कुशोदकस्य च स्मृताः । गोमूत्रमुत्तरे स्थाप्यं गोमयं वारुणे दधि १३ प्राच्यां याम्यां घृतं क्षीरं मध्ये चैश्यां कुशोदकम् । वरुणो देवता मूत्रे गोमये हव्यवाहनः १४ विष्णुः क्षीरे दधि सोमो घृतस्य पितृमांस्तथा । कुशोदके भवेद्ब्रह्मा पञ्चगव्यस्य देवताः १५ मातृघ्नं भ्रूणहन्तारं गुरुतल्पगमेव वा । पञ्चगव्यं सकृत्पीतं पापेभ्यो

विनिवर्तयेत् १६ इति ॥ अथदिक्क्षेपणमंत्राः ॥ एतोन्विन्द्रं स्तवामहेहं शुद्धः शुद्धेन साम्ना । शुक्रैरुक्थैर्वावृध्वासंशुद्धं आशीर्वान्मम १ तुतान्धुवाम यज्ञिर इन्द्रमुक्था न वावृधः । पुरूण्यस्य पौंस्या सिषासन्तो हवामहे २ इन्द्र शुद्धो हतो नहि शुद्धाशुद्धमिरूतिभिः । शुद्धो रयिं निधारय शुद्धः समद्धि सौम्यः ३ इन्द्रः शुद्धो हि नो रयिं शुद्धो रत्नानि दाशुषे । शुद्धो वृत्राणि जिघ्नसे शुद्धो वाजो सिषासहि ४ पञ्चन्द्युष्ठीरनु पञ्चदुहागां० ५ इति पञ्चगव्यविधिः ॥

॥ अथ शंकुप्रतिष्ठा ॥

ये देवा दिव्येकादशस्थेत्यनेन वास्तोः पुष्पं क्षिपेत् । ततो रत्नमूलिकाद्रव्याणि (पृ० १५५–७) घटिका (वारि) चतुर्षु संगृह्य । घटिकाश्चतुष्कोणेषु निक्षिप्य तदुपरि चतुरश्मानं संस्थाप्य तदुपरि भस्मचूर्णेन ईशाने गवः । आग्नेय्यां वाजिनः । नैर्ऋते मनुष्यस्य । वायव्यां गजस्य । मध्ये सर्पस्य मूर्तिं विधाय । ब्रह्मकलशे । प्रधानं अमी-वहा० ४ ब्रह्मणे नम इत्यादि। क्षेत्रस्य पतिना० ॥ तीर्थे स्थेयं० । धूपदीपः ॥ गायत्र्यै नमः ३ अद्य तावत् महागणपतेः० ब्रह्मणः कूर्मस्य० शंकुप्रतिष्ठानिमित्तं कलशपूजनमर्चामहं करिष्ये ॐ कुरुष्व । दक्षिणान्तं ॥ तदनु ईशाने वृषभनन्दिन्याः पूजा ॥

तत्रादौ शंकुस्नानविधिः । लग्नसमये रत्नवाटिकायुतां समां भूमिं कृत्वा ध्रुवहरि-लक्ष्मीकूर्मानन्ताश्च देवताः पञ्च तोरणपूजावत् शंकुस्थाने पूज्याः । तथा हि भव-वृक्षस्य (भून्यवृक्षस्य) चतुर्विंशाङ्गुलं शंकुं भूमौ निक्षिप्य ॥ तीर्थे श्रेयं० शंकुप्रति-ष्ठानिमित्तं धूपदीपः ॥ ततो मृज्जलगोमयैः स्नानं । एकविंशतिस्नानं । देवर्षितर्पणं । जीवादानं च इत्यादि तोरणपूजावत् (पृ० १४२–१०) कृत्वा । गायत्र्यै नमः ३ अद्य-तावत् ध्रुवस्य हरेः लक्ष्म्याः कूर्मस्य अनन्तस्य ईशाने वृषभनन्दिन्याः आत्मनो० यथोक्तफलप्राप्त्यर्थं शंकुप्रतिष्ठानिमित्तं शिलाप्रतिष्ठानिमित्तं शंकुपूजनं शिलापूजन-मर्चामहं करिष्ये । यवान्विकीर्य । दक्षिणान्तं । अपूपाः नैवेद्यार्थं ध्रुवाय० ईशाने वृषभनन्दिन्यै नमो नैवेद्यं । पृच्छां विसर्ज्य २ एवं आग्नेय्यां । अश्वस्य (पृ० १४२–१०) सुभगायाः । नैवेद्यान्तं । पृच्छां विसर्ज्य २ । एवं (पृ० १४२–१०) नैर्ऋत्ये । नरस्य सुमङ्गल्याः नैवेद्यान्तं पृच्छां विसर्ज्य ३ । एवं (पृ० १४२–१०) वायव्यां । नागस्य भद्रंकर्याः । नैवेद्यान्तं पृच्छां विसर्ज्य ४ । एवं (पृ० १४२–१०) मध्ये । शेषनागस्य ॥ ततो वैश्वदेवं । गोग्रासादि । क्षेत्रेशबलिः । कलशपृच्छां विसर्ज्य ॥ आह्वानंनैव० । नमो ब्रह्मणे० । उदकलशं० । इति शंकुप्रतिष्ठाविधानम् ॥

आज्य भागः ३ ।

अथ विष्णुपञ्चकम् ।

पुरुषसूक्तम् १ ।

ॐनमो नारायणाय ॥ ध्येयः सदा सवितृमण्डलमध्यवर्ती नारायणः सरसिजासनसन्निविष्टः । केयूरवान् कनककुण्डलवान्किरीटी हारी हिरण्मयवपुर्धृतशङ्खचक्रः ॥ १ ॥ शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं, विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम् । लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यं, वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥ २ ॥ आनुष्टुभस्य सूक्तस्य त्रिष्टुबन्तस्य देवता । विश्वात्मा

पुरुषः साक्षादृषिर्नारायणः स्मृतः ॥ १ ॥ "पुरुषमेधः पुरुषस्य नारायणस्याऽऽर्षम्" ॥

ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् । स भूमिं विश्वतो वृत्वाऽत्यतिष्ठद्दशाङ्गुलम् ॥ १ ॥ पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यम् । उताऽमृतत्वस्येशानो यदऽन्नेनाऽतिरोहति ॥२॥ एतावानऽस्य महिमाऽतोज्यायाँश्च पुरुषः । पादोऽस्य विश्वा भूतानि त्रिपादऽस्याऽमृतं दिवि ॥ ३ ॥ त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाऽभवत्पुनः । ततो विष्वङ्व्यक्रामत्साशनानशने अभि ॥ ४ ॥ तस्माद्विराडऽजायत विराजो अधि पुरुषः । स जातो अत्यरिच्यत पश्चाद्भूमिमऽथो पुरः ॥ ५ ॥ यत्पुरुषेण हविषा देवा यज्ञमऽतन्वत । वसन्तो अस्याऽसीदाज्यं ग्रीष्म इध्मः शरद्धविः ॥ ६ ॥ तं यज्ञं बर्हिषि प्रौक्षन्पुरुषं जातमऽग्रतः । तेन देवा अयजन्त साध्या ऋषयश्च ये ॥ ७ ॥ तस्माद्यज्ञात्सर्वहुतः सम्भृतं पृषदाज्यम् । पशूंस्ताँश्चक्रे वायव्यानाऽऽरण्यान्ग्राम्याँश्च ये ॥ ८ ॥ तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे । छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥ ९ ॥ तस्मादऽश्वा अजायन्त ये के चोभयादतः । गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजाऽवयः ॥ १० ॥ यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् । मुखं

किमस्य कौ बाहू का ऊरू पादा उच्येते ॥ ११ ॥ ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः । ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥ १२ ॥ चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत । मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत ॥ १३ ॥ नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत । पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ अकल्पयन् ॥ १४ ॥ सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः । देवा यद्यज्ञं तन्वाना अबध्नन्पुरुषं पशुम् ॥ १५ ॥ "ते०" यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् । ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥ १६ ॥

अथ बृहत्पुरुषसूक्तम् २ ।

सहस्रशीर्षं दिव्यं तु विश्वाक्षं विश्वसम्भवम् । विश्वं नारायणं देवमक्षरं परमं पदम् ॥ १ ॥ "पुरुषमेधः पुरुषस्य नारायणस्य" ॐसहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् । स भूमिं सर्वतः स्पृत्वाऽत्यतिष्ठद्दशाङ्गुलम् ॥ १ ॥ पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यम् । उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥ २ ॥ एतावानस्य

महिमाऽतो ज्यायांश्च पूरुषः । पादोऽस्य सर्वा भूतानि त्रिपादऽस्याऽमृतं दिवि ॥३॥
त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाऽभवत्पुनः । ततो भूमिं व्यक्रामत्साशनाऽनशने
अभि ॥४॥ ततो विराडऽजायत विराजो अधिपुरुषः। स जातो अतिरिच्यत पश्चाद्भूमि-
मऽथो पुरः ॥ ५ ॥ यत्पुरुषेण हविषा देवा यज्ञमतन्वत । वसन्तो अस्याऽसीदा-
ज्यं ग्रीष्म इध्मः शरद्धविः ॥ ६ ॥ तं यज्ञं बर्हिषि प्रौक्षन्पुरुषं जातमऽग्रतः । तेन
देवा अयजन्त साध्या ऋषयश्च ये ॥ ७ ॥ तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यम् ।
पशूँस्ताँश्चक्रिरे वायव्यानाऽऽरण्यान्ग्राम्याँश्च ये ॥ ८ ॥ तस्माद्यज्ञात्सर्वहुत ऋचः सा-
मानि जज्ञिरे । छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥ ९ ॥ तस्मादश्वा अजा-
यन्त ये च के चोभयादतः । गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः ॥१०॥
यत्पुरुषं व्यदधुः कतिधैनमऽकल्पयत् । मुखं किमऽस्य कौ बाहू का ऊरू पादा
उच्येते ॥ ११ ॥ ब्राह्मणोऽस्य मुखमाऽऽसीद्बाहू राजन्यः कृतः । ऊरू तदऽस्य यद्वै-
श्यः पद्भ्यां शूद्रो अजायत ॥ १२ ॥ चन्द्रमा मनसो जातश्चक्षोः सूर्योऽग्निसूर्यः ।
नसो वायुश्च प्राणश्च मुखादऽग्निरऽजायत ॥ १३ ॥ नाभ्या आसीदऽन्तरिक्षं शीर्ष्णो

द्यौः समवर्तत । पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ अकल्पयन् ॥ १४ ॥ सप्ताऽस्या-ऽसन्परिधयस्त्रिः सप्त समिधः कृताः । देवा यद्यज्ञं तन्वाना अबध्नन् पुरुषं पशुम् ॥ १५ ॥ वेदाऽहमेतं पुरुषं महान्तमाऽऽदित्यवर्णं तमसः परस्तात् । सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाऽभिवदन्यदाऽऽस्ते ॥ १६ ॥ धाता पुरस्ताद्यमुदाजहार शक्रः प्रविद्वान्प्रदिशश्चतस्रः । तमेव विदित्वाऽमृतत्वमेति नाऽन्यः पन्था अयनाय विद्यते ॥ १७ ॥ यज्ञेन यज्ञमऽयजन्त देवास्तानि धर्माणि प्रथमान्यासन् । तेह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥ १८ ॥ "ते०" अद्भ्यः सम्भृतः पृथिव्या रसाद्विश्वकर्मणः समवर्तताऽधि । तस्य त्वष्टा विदधद्रूपमेति तन्मर्त्यस्य देवत्वमाऽऽजानमऽग्रे ॥ १९ ॥ "इति पूर्वनारायणम् । अथोत्तरनारायणम्" ॐप्रजापति-श्चरति गर्भे अन्तरजायमानो बहुधा विजायते । तस्य योनिं परिपश्यन्ति धीरास्त-स्मिंस्तिष्ठन्ति भुवनानि विश्वाः ॥ १ ॥ वेदाऽहमेतं पुरुषं महान्तमाऽऽदित्यवर्णं तम-सस्तु पारे । तमेव विदित्वाऽतिमृत्युमेति नाऽन्यः पन्था विद्यतेऽयनाय ॥ २ ॥ यो देवेभ्य आतपति यो देवानां पुरोहितः । पूर्वो यो देवेभ्यो जातो नमो रुचाय

ब्राह्मये ॥ ३ ॥ रुचं ब्राह्मं जनयन्तो देवा अग्रे यदऽब्रवन् । यस्त्वेवं ब्राह्मणो विद्या-
त्तस्य देवा आसन्वशे ॥ ४ ॥ श्रीश्च ते लक्ष्मीश्च पत्न्या अहोरात्रे पार्श्वे नक्षत्राणि
रूपमऽश्विनौ व्यात्तम् । इष्णन्म इषाणाऽमुं म इषाण सर्वलोकं म इषाण ॥ ५ ॥
तदेवाऽग्निस्तद्वायुस्तत्सूर्यस्तदु चन्द्रमाः । तदेव शुक्रं तद्ब्रह्म तदापस्तत्प्रजापतिः
॥ ६ ॥ सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादऽधि । कलाः काष्ठा मुहूर्ताश्चाऽहोरा-
त्राणि सर्वशः ॥७॥ अर्धमासा मासा ऋतवः परिवत्सराः । स आपः स दुघे उभे
इमे अन्तरिक्षमऽथो स्वः ॥ ८ ॥ नैनमूर्ध्वं न तिर्यञ्चं न मध्ये परिजग्रभ । न तस्येशे
कश्चन यस्य नाम महद्यशः ॥ ९ ॥ न सन्दृशे तिष्ठति रूपमऽस्य, न चक्षुषा पश्यति
कश्चनैनम् । हृदा मनीषा मनसाऽभिगुप्तो य एतद्विदुरऽमृतास्ते भवन्ति ॥ १० ॥
ऋतं च सत्यं चाभीद्धात्तपसोऽध्यजायत । ततो रात्रिरऽजायत ततः समुद्रो अर्णवः
॥ ११ ॥ समुद्रादऽर्णवादऽधि संवत्सरो अजायत । अहोरात्राणि विदधद्विश्वस्य
मिषतो वशी ॥ १२ ॥ सूर्याचन्द्रमसौ धाता यथापूर्वमऽकल्पयत् । दिवं च पृथिवीं
चाऽन्तरिक्षमऽथो स्वः ॥ १३ ॥ "ते०" अद्भ्यः सम्भूतः० ॥ १४ ॥ "सरिताङ्का-

इयपीनां सरितो यशकीर्तिमिच्छमानानाम्" ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् । स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥ १ ॥ यः प्राणतो निमिषितश्च राजा पतिर्विश्वस्य जगतो बभूव । ईशेयो अस्य द्विपदश्चतुष्पदः कस्मै० ॥ २ ॥ य ओजोदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः । यस्य च्छायामृतं यस्य मृत्युः कस्मै० ॥ ३ ॥ येन द्यौरुग्रा पृथिवी दृढा येन सुस्तम्भितं येन नाकम् । यो अन्तरिक्षं विममे वरीयः कस्मै० ॥ ४ ॥ य इमे द्यावापृथिवी तस्तभाने आधारयद्रोधसी रेजमाने । यस्मिन्नधि विततः सूर एति कस्मै० ॥ ५ ॥ यस्येमे विश्वे गिरयो महित्वा समुद्रं यस्य रसया सहाऽहुः । दिशो यस्य प्रदिशः पञ्चदेवी कस्मै० ॥ ६ ॥ आपो ह यन्महतीर्विश्वमायुर्गर्भं दधाना जनयन्तीरऽग्निम् । ततो देवानां निरवर्तताऽसुरेकः कस्मै० ॥ ७ ॥ "ते०" आ नः प्रजाअनयतु प्रजापतिर्धाता दधातु सुमनस्यमानः । संवत्सर ऋतुभिश्चाक्लृपानो मयि पुष्टिं पुष्टिपतिर्दधातु ॥ ८ ॥ "आगस्त्यस्यत्र" वेनस्तत्पश्यद्भुवनस्य विद्वान्यत्र विश्वं भवत्येकनीडम् । यस्मिन्निदं सञ्च विचैति सर्वं स ओतःप्रोतश्च विभुः प्रजासु ॥ १ ॥

प्रतद्वोचेदऽमृतन्नु विद्वान्गन्धर्वो नाम निहितङ्गुहासत् । त्रीणि पदानि निहिता गुहासु यस्तानि वेद स पितुष्पिताऽसत् ॥२॥ सतो बन्धुर्जनिता संविधाता नामानि वेद भुवनानि विश्वा । यत्र देवा अमृतमाऽनशानास्तृतीये धामन्नऽध्यैरयन्त ॥ ३ ॥ परीत्य भूतानि परीत्य लोकान्परीत्य सर्वान्प्रदिशो दिशश्च । प्रजापतिः प्रथमजा ऋतस्यात्मनात्मानमुप संविवेश ॥ ४ ॥ परिद्यावापृथिवी विततं सद्य इत्वा परिलोकान्परिदिशः परिस्वः । ऋतस्य तन्तुं विततं विचृत्य तदपश्यत्तदभवत्तदासीत् ॥५॥ सदसस्पतिमऽद्भुतं प्रियमिन्द्रस्य काम्यम् । सनिंमेधामयासिषम् ॥ ६ ॥ "ते०" यस्मादऽन्यो न परोऽस्ति जातो य आविवेश भुवनानि विश्वा । प्रजापतिः प्रजया संविदानस्त्रीणि ज्योतींषि सचते स षोडशी ॥ ७ ॥

अथ लक्ष्मीसूक्तम् ३ ।

ॐपद्मद्वयवराभीष्टयुक्तपाणिचतुष्टयाम् । पद्मवर्णां भजे पद्मशायिनीं पद्मवासिनीम् ॥ १ ॥ पुस्तकाक्षाभयाढ्यां सितवर्णां त्रिलोचनाम् । महापद्मनिषण्णां तां लक्ष्मीं गजगतां नमः ॥ २ ॥ करयुगलगृहीतं पूर्णकुम्भं दधानां क्वचिदऽमलगजस्थां

शङ्खचक्राब्जपाणिम् । क्वचिदऽपि दयिताङ्के चामरव्यग्रहस्तां क्वचिदपि सुभिपाशौ बिभ्रतीं नौमि लक्ष्मीम् ॥ १ ॥ "हिरण्यवर्णामेकोनाश्रीर्भार्गव्यो श्रीरऽलक्ष्मीघ्नं श्रेय्यमानुष्टुभं वैशकर्यन्तं हि सामेयी चतुर्थी प्रस्तारपंक्तिस्त्रिष्टुभौ पञ्चदश्युपरिष्टाद्बृहती श्रीपुत्राः परिषट्" ॥ ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् । चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो ममाऽवह ॥ १ ॥ तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् । यस्यां हिरण्यं विन्देयं गामऽश्वं पुरुषानऽहम् ॥ २ ॥ अश्वपूर्वां रथमध्यां हस्तिनादप्रमोदिनीम् । श्रियं देवीमुपह्वये श्रीर्मा देवी जुषताम् ॥ ३ ॥ कांसोस्मितां हिरण्यप्राकारामाऽर्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम् । पद्मेस्थितां पद्मवर्णां तामिहोपह्वये श्रियम् ॥ ४ ॥ चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम् । तां पद्मनेमिं शरणं प्रपद्ये अलक्ष्मीर्मे नश्यतां त्वां वृणोमि ॥ ५ ॥ आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः । तस्य फलानि तपसा नुदन्तु मायाऽन्तरायांश्च बाह्या अलक्ष्मीः ॥ ६ ॥ उपैतु मां देवसखः कीर्तिश्च मणिना सह । प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन्कीर्तिं वृद्धिं ददातु मे ॥ ७ ॥ क्षुत्पिपासामलां ज्येष्ठाम-

ऽलक्ष्मीं नाशयाम्यऽहम् । अभूतिमऽसमृद्धिं च सर्वां निर्णुद मे गृहात् ॥ ८ ॥
गन्धद्वारां दुराधर्षां नित्यपुष्टाङ्करीषिणीम् । ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्
॥ ९ ॥ मनसा काममाकूतिं वाचः सत्यमऽशीमहि । पशूनां रूपमन्नस्य मयि श्रीः
श्रयतां यशः ॥ १० ॥ कर्दमेन प्रजा भूत्वा मयि सम्भव कर्दम । श्रियं वासय मे
कुले मातरं पद्ममालिनीम् ॥ ११ ॥ आपः स्रवन्तु स्निग्धानि चिक्लीत वस मे
गृहे । निच देवीं मातरं श्रियं वासय मे कुले ॥ १२ ॥ आर्द्रां पुष्करिणीं पुष्टां
पिङ्गलां पद्ममालिनीम् । सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो ममाऽवह ॥ १३ ॥
आर्द्रां पुष्करिणीं यष्टिं सुवर्णां हेममालिनीम् । चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो
ममावह ॥ १४ ॥ तां म आवह जातवेदो लक्ष्मीमऽनपगामिनीम् । यस्यां हिरण्यं
प्रभूतं गावो दास्यो विन्देयं पुरुषानऽहम् ॥ १५ ॥ य आनन्दं समाविशदुपधाव-
न्विभावसुम् । श्रियः सर्वा उपासिष्व चिक्लीत वस मे गृहे ॥ १६ ॥ कर्दमेन
प्रजाः सृष्टा सम्भूतिङ्गमयामसि । अदधादुपगादेषाङ्कामान्संसृजमहे ॥ १७ ॥ जात-
वेदः पुनीहि मां रायस्पोषञ्च धारय । अग्निर्मा तस्मादेनसो विश्वान्मुञ्चत्वंहसः

॥ १८ ॥ "ते०" अच्छायमग्निरमहो देवो देवानग्ने वोचः सुमतिं रोदस्योः । वीहि
स्वस्तिं सुक्षितिं दिवो नॄन्द्विषो अंहांसि दुरिता तरेम तातरेम तवावसा तरेम ॥१९॥

अथ आयुष्यसूक्तम् ४ ।

आयुष्यं दश दाक्षायणायैकर्षाः सनकः सनन्दनः सनातनः सहसंज्ञः समः
सुश्रीः सुवाक्सर्वौ हिरण्यात्मस्तुतिः पञ्चम्यष्टमी नवम्यस्त्रिष्टुभः सप्तमी शक्करी आद्या
चतुर्थी च ॥ ॐ आयुष्यं वर्चस्यं रायस्पोषमौद्भिदम् । इदं हिरण्यं वर्चस्व जैत्रायाः
विशतादिमाम् ॥ १ ॥ उच्चैर्वाजी पृतनाषाट् सभासाहं धनञ्जयम् । सर्वाः समग्रा
ऋद्धयो हिरण्येऽस्मिन्समाहिताः ॥ २ ॥ शुनं महां हिरण्यस्यपितुर्नामेव जग्रभ ।
तेनेमां सूर्यत्वचमऽकरं पुरुषप्रियम् ॥ ३ ॥ सम्राजञ्च विराजञ्चाभिष्टियां च मे ध्रुवा ।
लक्ष्मी राष्ट्रस्य या मुखे तया मामिन्द्र संसृज ॥ ४ ॥ अग्नेः प्रजातं परि यद्धिरण्य-
मऽमृतं जज्ञे अधि मर्त्येषु । य एनद्वेद स इदेन गर्हति जरा मृत्युर्भवति यो बिभर्ति
॥ ५ ॥ यद्वेद राजा वरुणो यदु देवी सरस्वती । इन्द्रो यद्वृत्रहा वेद तन्मे वर्चस्व
आयुषे ॥ ६ ॥ न तद्रक्षांसि न पिशाचास्तरन्ति देवानामोजः प्रथमजं ह्येतत् । यो

बिभर्ति दाक्षायणा हिरण्यं स देवेषु कृणुते दीर्घमायुः, स मानुष्येषु कृणुते दीर्घमायुः ॥ ७ ॥ यदाऽबध्नन्दाक्षायणा हिरण्यं शतानीकाय सुमनस्यमानाः । तन्म आबध्नामि शतशारदायाऽयुष्माञ्जरदष्टिर्यथा सत् ॥ ८ ॥ घृतादुल्लुप्तं मधुमत्सुपर्णं धनञ्जयन्धरणन्धारयिष्णु । भृणत्सपत्नानऽधरांश्च कृण्वदारोह मां महते सौभगाय ॥ ९ ॥ "ते०" प्रियं मां कुरु देवेषु प्रियं राजसु मां कुरु । प्रियं विश्वेषु गोप्त्रेषु मयि देहि रुचा रुचाम् ॥ १० ॥

अथ महालक्ष्मीसूक्तम् ५ ।

पीयूषामृतकल्लोलसुधास्वादसुलोलपाम् । आनन्दवदनां देवीं सिद्धलक्ष्मीं नमाम्यहम् ॥ "अग्निवारुणीति वैकुण्ठस्य ब्रह्मणः । यजुः" ॐअग्निवारुणीमानुड्वाहीमालभेताऽनाज्ञात यक्ष्मो गृहीत नाज्ञात यक्ष्मो वा, एतां वित्तो या ब्रीसत्यानड्वाही तस्मादेनामऽनज्ञात यक्ष्म गृहीत आलभेताग्निः सर्वा देवता यदेवास्य देवताभिर्निषितं, तदग्निना मुञ्चति यद्वारुणगृहीतं तद्वरुणेन यद्वहिनी तेनाग्नीयी यत्स्त्री-सती दान्ता, तेन वरुणी तस्मादऽग्निवारुणी भवति, त्वाष्ट्रमांसे पद्माकभेत पशु-

कामो मिथुनो वा एष योऽसेपात्त्वष्टा, मिथुनस्य प्रजनयिता तमेव भागधेयेनोपधावति, सोऽस्मा एतस्मान्मिथुनात्पशून्प्रजनयति, वरुणँ श्यामशितिकण्ठमालभेत, यं ज्योमानं यक्ष्मो गृह्णीयाद्वारुणो वा एतं गृह्णाति, यं ज्योमानं यक्ष्मो गृह्णाति, यद्वारुणो वरुणादेवैनं मुञ्चति, पाप्मनैव गृहीतो, य आमय्यावी श्याम इव पाप्मा यच्छ्याम पाप्मानमेवापहते । यच्छितिकण्ठो वरुणपाशमेव तेन प्रमुञ्चत, आश्विनं धूम्रललाममालभेत, यो दुर्ब्राह्मणं सोमं पिपासेत्पिपेदऽश्विनौ वै देवानामऽसोमपा आस्तां तौ पश्चा सोमपीथं प्राप्नुतामऽश्विना एतस्य देवता, यः पश्चा सोमपस्ता एव भागधेयेनोपधावति, ता एनँ सोमपीथाय परिणयतः स्तायदिव यजेतस्तायदिव हि दुर्ब्राह्मणो ब्राह्मणो बभूषति धूम्र इव वा, एष यो दुर्ब्राह्मणो यद्धूम्रो धूम्रिमाणमेवापहते । यल्ललामो मुखत एव तेन तेजो धत्ते सारस्वतीन्धेनुष्टरीमाऽलभेत यं भ्रातृव्यानीव श्वासयेरन्वाचा वा एत एनं निःश्वासयन्ति वाक्सरस्वती यत्सरस्वती वाचैवैषां वाचं प्रतिश्रीणाति । धेनुर्वा एषा सती न दुहे तस्माद्धेनुष्टर्युच्यते यद्धेनुष्टरी वाचमेवैषां स्तरीकरोति

सरस्वतीं धेनुष्टरीमालभेत यमऽजग्निवांसमऽभिशंसेयुरऽशान्ता वा एतं वा गृच्छति, यमऽजग्निवांसमऽभिशंसन्ति वाक्सरस्वती यत्सरस्वती वाचैवैषांवाचं शमयति। ॐधेनुर्वा एषा सती न दुहे तस्माद्धेनुष्टर्युच्यते यद्धेनुष्टरी वाचमेवैषां स्तरीकरोति, सावित्रं पुनरुत्सिष्टमालभेत, यः पुरा पुण्यो भूत्वा पश्चा पापीयान्स्यात्तया वा एष देवतया पुरा पुण्यो भवति, साहि वा एतमऽनुसृजत्यऽथैष पापीयान्भवति सविता श्रियः प्रसविता तमेव भागधेयेनोपधावति स एनं पुनः श्रिये प्रसुवति, पापो वा एष पुरा भूत्वा पश्चाच्छ्रियमाप्नोति "ते०" योऽनुड्वान्भूत्वोक्षा भवति यथैव स श्रियं प्राप्नोत्येवमेवैनं श्रियं प्रापयति॥ ॐमातर्नमामि कमले कमलायताक्षि! श्रीविष्णुहृत्कमलवासिनि विश्वमातः। क्षीरोदजे कमलकोमलगर्भगौरि लक्ष्मि प्रसीद सततं नमतां शरण्ये॥ ॐरथे अक्षेषु वृषभस्य वाजे वाते पर्जन्ये वरुणस्य शुष्मे। इन्द्रं या देवी सुभगा जजान सेयमऽआदूर्यसा संविदाना॥ १॥ या हस्तिनि द्विपिनि या हिरण्ये गोष्वऽश्वेषु पुरुषेष्वन्तः। इन्द्रं०॥२॥ सिंहे व्याघ्रे उत या पृदाकौ त्विषिरग्नौ ब्राह्मणे सूर्ये या। इन्द्रं०॥ ३॥ "ते०" या राजन्ये

कुन्कुभावावताबामऽश्वस्य कन्दे पुरुषस्य मायौ । इन्द्रं० ॥ ४ ॥ मन्त्रत्वमेतत्परमं पवित्रं संसारदुःखौघविनाशकारि । सुखप्रदं धर्मविदां नराणां मनोरथावाप्तिकरं प्रदिष्टम् ॥ भगवान् देवकीपुत्रः शङ्खचक्रगदाधरः । लक्ष्मीकान्तो महाबाहुः प्रीयतां केशवः सदा ॥ "अनेन मंत्रपाठेन आत्मनो० भगवान् वासुदेवः ॥ ८ ॥ सर्वपापहरः, सर्वसिद्धिदः परब्रह्मस्वरूपः, लक्ष्मीसहितो नारायणः प्रीयतां प्रीतोऽस्तु ॥"

इति विष्णुपञ्चकम् ॥

अथ रुद्रपंचकम् ।

रुद्रमन्त्रसूक्तम् १ ।

ॐ प्रणतोऽस्मि महादेव प्रपन्नोऽस्मि सदाशिव । निवारय महामृत्युं मृत्युञ्जय नमोऽस्तुते । देवं सुधाकलशसोमकरं त्रिनेत्रं पद्मासनं च वरदाभयदं सुशुभ्रम् । शङ्खाभयाऽञ्जवरभूषितया च देव्या वामेङ्कितं शमनभङ्गहरं नमामि ॥ शुद्धस्फटि-

कसङ्काशं त्रिनेत्रं पञ्चवक्त्रकम् । गङ्गाधरं दशभुजं सर्वाभरणभूषितम् ॥ १ ॥ नीलग्रीवं शशांकाङ्कं नागयज्ञोपवीतिनम् । व्याघ्रचर्मोत्तरीयं च वरेण्यमऽभयप्रदम् ॥२॥ कमण्डल्वऽक्षसूत्राभ्यामऽन्वितं शूलपाणिकम् । ज्वलन्तं पिङ्गलजटाशिखमुद्योतकारिणम् ॥ ३ ॥ अमृतेनाप्लुतं हृष्टमुमादेहार्धधारिणम् । दिव्यसिंहासनासीनं दिव्यभोगसमन्वितम् ॥ ४ ॥ दिग्देवतासमायुक्तं सुरासुरनमस्कृतम् । नित्यं च शाश्वतं शुद्धं ध्रुवमऽक्ष मऽव्ययम् ॥ ५ ॥ सर्वव्यापिनमीशानं रुद्रं वै विश्वरूपिणम् । एवं ध्यात्वा द्विजः सम्यक्ततो यजनमाऽऽरभेत् ॥६॥ मृत्युञ्जय महादेव पाहि मां शरणागतम् । जन्ममृत्युजरारोगैः पीडितं भवबन्धनात् ॥ ७ ॥ आराधितो मनुष्यैस्त्वं सिद्धैर्देवैर्महर्षिभिः । आवाहयामि भक्त्या त्वां गृहाणार्चां महेश्वर ॥८॥ हर शम्भो महादेव विश्वेशाऽमरवल्लभ । शिव शंकर सर्वात्मन् नीलकण्ठ नमोऽस्तुते । इति विज्ञाप्य देवेशं जपेन्मन्त्रं च त्र्यम्बकम् ॥ ९ ॥

"ॐ त्र्यम्बकं यजामहे सुगन्धिं रयिपोषणम् । उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात् १०८" ॐ आ त्वा वहन्तु हरयः सचेतसः श्वेतैरश्वैरिह केतुमद्भिर्वाता

जवेन, वक्रमङ्घ्रिर्मनोजवा यातु शीघ्रं मम रुद्राय हव्यन्देवानां च ऋषीणां चासुराणां च पूर्वजं सहस्राक्षं विरूपाक्षं विश्वरूपं महादेवं शिवमाऽवाहयाम्यहम् ॥ ॐआवाहयाम्यहं देवमीश्वरं पार्वतीपतिम् । वृषभासनमाऽरूढं नागाऽभरणभूषितम् ॥ प्रीयतां यजमानस्य तुष्टो भूयाज्जगत्पतिः । शुक्लवर्णो महातेजाः शुक्लाङ्गदाऽभूषितः । बलिः पुष्पं चरुश्चैव दीपोऽयं प्रतिगृह्यताम् ॥ "तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् ॥ ३ ॥" ॐशतरुद्रियं देवानां रुद्रनमनं भवाय शर्वायश्च प्रत्युत्क्रान्तानुवाकौ देवर्षी रुद्रदैवत्यस्त्रिष्टुप् छन्दः यजने विनियोगः, नमस्ते देवा रौद्रमानुष्टुभमाऽऽद्या गायत्री पंचमषष्ठ्यौ, पाङ्क्त्यान्ता महापाङ्क्तिर्मा भैरेकपदा जगत्यनुष्टुप् त्रिष्टुप् महाबृहती यवमध्या रुद्रो देवता परमेष्टिका, अस्य रुद्रस्य प्रश्नस्य अनुष्टुप् छन्दः अघोर ऋषिः सङ्कर्षणमूर्तिः सुरूपो योऽसावादित्यः परः पुरुषः स एष देवता अग्निः ऋतुचरुमायामिष्टिकायां शतरुद्रे विनियोगः, सकलस्य रुद्राध्यायस्य श्रीमहारुद्रो देवता एका गायत्री छन्दः तिस्रोऽनुष्टुभस्तिस्रः पङ्क्तयः सप्ताऽनुष्टुभो द्वे जगत्यौ परमेष्ठी ऋषिः समस्त-

पापक्षयार्थे पाठे विनियोगः ॥ "अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यश्च । सर्वेभ्यः शर्व सर्वेभ्यो नमस्ते रुद्ररूपेभ्यः १०८" कर्पूरगौरं करुणावतारं संसारसारं भुजगेन्द्रहारम् । सदा रमन्तं हृदयारविन्दे भवं भवानीसहितं नमामि ॥ ("चम" गात्रं भक्षालितं । "रुद्र") ॐनमः शिवाय वरदाय १०" ॐनमस्ते रुद्र मन्यवे बाहुभ्यामुत ते नमः, उत त इषवे नमः । या ते रुद्र शिवा तनूरऽघोराऽपापकाशिनी तयानस्तन्वा शन्तमया गिरिशन्ताऽभिचाकशीहि । यामिषुङ्गिरिशन्त! हस्ते बिभर्ष्यस्तवे, शिवां गिरित्र ताङ्कुरु माहिंसीः पुरुषं जगत् । शिवेन वचसा त्वा गिरिशाच्छा वदामसि, यथा नः सर्वमिज्जगदऽयक्ष्मं सुमना असत् । अध्यवोचदऽधिवक्ता प्रथमो दैव्योभिषक्, अहींश्च सर्वाञ्जम्भय सर्वाश्च यातुधान्योऽधराचीः परासुवः । असौ यस्ताम्रो अरुण उत बभ्रुः सुमङ्गलः, ये चेमे रुद्रा अभितो दिक्षु श्रिताः सहस्राक्षो वैषां हेड ईमहे । असौ योऽवसर्पति नील-ग्रीवो विलोहितः, उतैनं गोपा अदृश्रन्नुतैनमुदहार्यः । उतैनं विश्वा भूतानि स दृष्टो मृडयति नः, नमो अस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे । अथो ये अस्य सत्वानो

ऽहन्तेभ्योऽकरं नमः, प्रमुञ्च धन्वनस्त्वमुभयोरार्त्न्योर्ज्याम् । याश्च ते हस्त इषवः परास्ता भगवो वप, विज्यं धनुः कपर्दिनो विशल्यो बाणवाँ उत ॥१॥ अनेशन्नस्येषव आभूरस्य निषङ्गथिः, या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः। तयाऽस्मान्विश्वतस्त्वमऽयक्ष्मेण परिभुज, परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः। अथो य इषुधिस्तवारे अस्मन्निधेहि तम्, नमांसि त आयुधायाऽनातताय धृष्णवे । उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने, अवतत्य धनुष्ट्वं सहस्राक्ष शतेषुधे । निशीर्य शल्यानां मुखं शिवो नः सुमना भव, या त इषुः शिवतमा शिवं बभूव ते धनुः । शिवा शरव्या या तव तया नो मृड जीवसे ॥ २ ॥ ("च०" वाजश्रमे "रु") ॐनमो हिरण्यबाहवे सेनान्ये दिशां च पतये नमो, नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनां पतये नमो, नमः शिष्पिञ्जराय त्विषीमते पथीनाम्पतये नमो, नमो बभ्लुशाय व्याधिनेऽन्नानाम्पतये नमो, नमो हरिकेशायोपवीतिने पुष्टानां पतये नमो, नमो भवस्य हेत्यै जगतस्पतये नमो, नमो रुद्रायाऽऽततायिने क्षेत्राणाम्पतये नमो, नमः सूतायाहन्त्याय वनानां पतये नमो, नमो रोहिताय

स्थपतये वृक्षाणां पतये नमो, नमो मन्त्रिणे वाणिज्याय कक्षाणां पतये नमो, नमो भुवन्तये वारिवस्कृतायौषधीनां पतये नमो ॥ नम आक्रन्दाय त उच्चैर्घोषाय सत्वानां पतये नमो, नमः कृत्स्नवीताय धावते पत्तीनां पतये नमो, ॥ २ ॥ ("च०" उच्चैष्टयं च "रु") नमः सहमानाय निव्याधिन आव्याधिनीनां पतये नमो, नमो निषङ्गिणे ककुभाय स्तेनानां पतये नमो, नमो वञ्चते परिवञ्चते स्तायूनां पतये नमो, नमो निचेराय परि-चरायाऽरण्यानां पतये नमो, नमो निषङ्गिण इषुधिमते तस्कराणां पतये नमो नमः सृकायिभ्यो जिघांसद्भ्यो मुष्णतां पतये नमो, नमोऽसिमद्भ्यो नक्तंचरद्भ्यः प्रकृन्तानां पतये नमो, नम उष्णीषिणे गिरिचराय कुलुञ्चानां पतये नमो ॥ नम इषुकृद्भ्यो धन्वकृद्भ्यश्च वो नमो, नम इषुमद्भ्यो धन्वावि-भ्यश्च वो नमो, नम आतन्वानेभ्यः प्रतिदधानेभ्यश्च वो नमो, नम आयच्छ-द्भ्योऽस्यद्भ्यश्च वो नमो, नमः विसृजद्भ्यो विध्यद्भ्यश्च वो नमो, नमः स्वपद्भ्यो जाग्रद्भ्यश्च वो नमो, नमः शयानेभ्य आसीनेभ्यश्च वो नमो, नमस्तिष्ठद्भ्यो

धावद्भ्यश्च वो नमो, नमः सभाभ्यः सभापतिभ्यश्च वो नमो, नमोऽश्वेभ्योऽश्वपतिभ्यश्च वो नमो, (“च०” शंचमे“रु”) नम आव्याधिनीभ्यो विविध्यद्भ्यश्च वो नमो, नम उगणाभ्यस्तृंहतीभ्यश्च वो नमो, नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो, नमो गणेभ्यो गणपतिभ्यश्च वो नमो, नमः कृत्स्नेभ्यः कृत्स्नपतिभ्यश्च वो नमो, नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमो, नमः सेनाभ्यः सेनानीभ्यश्च वो नमो, नमो रथिभ्यो वरूथिभ्यश्च वो नमो, नमो महद्भ्योऽर्भकेभ्यश्च वो नमो, नमो युवभ्य आशिनेभ्यश्च वो नमो, नमः क्षत्तृभ्यः संग्रहीतृभ्यश्च वो नमो, नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो, नमः कुलालेभ्यः कर्मारेभ्यश्च वो नमो, नमः पुञ्जिष्ठेभ्यो निषादेभ्यश्च वो नमो, नमः श्वनिभ्यो मृगयुभ्यश्च वो नमो, नमः श्वभ्यः श्वपतिभ्यश्च वो नमो ॥ (“च०” ऊर्कंमे“रु”) नमो भवाय च रुद्राय च, नमः शर्वाय च पशुपतये च, नमो नीलग्रीवाय च शितिकण्ठाय च, नमो व्युप्तकेशाय च कपर्दिने च, नमः सहस्राक्षाय च शतधन्वने च ॥ नमो गिरिशाय च शिपिविष्टाय च, नमो मीढुष्टमाय चेषुमते च, नमो ह्रस्वाय च वामनाय च, नमो बृहते

च वर्षीयसे च, नमो वृद्धाय च सवृद्धने च, नमोऽग्र्याय च प्रथमाय च, नम आशवे चाऽजिराय च, नमः शीघ्राय च शीभ्याय च, नम ऊर्म्याय चाऽवस्वन्याय च, नमो नाद्याय च द्वीप्याय च ("च०" अश्माचमे "रु") नमो ज्येष्ठाय च कनिष्ठाय च, नमः पूर्वजाय चाऽपरजाय च, नमो मध्यमाय चाऽप्रगल्भाय च, नमो बुध्न्याय च जघन्याय च, नमः सोभ्याय च प्रतिसर्याय च, नम आशुषेणाय चाऽऽशुरथाय च ॥ नमो बिल्मिने च कवचिने च, नमो वर्मिणे च वरूथिने च, नमः श्रुताय चावभेदिने च, नमः श्रुताय चँ श्रुतसेनाय च, नमो याम्याय च क्षेम्याय च, नम उर्वर्याय च खल्याय च, नमः श्लोक्याय चावसान्याय च, नमः श्रवाय च प्रतिश्रवाय च, नमो वन्याय च कक्ष्याय च, ("च०" अग्निश्च "रु") नमो दुन्दुभ्याय चाहनन्याय च, नमो धृष्णवे च प्रमृशाय च, नमो निषङ्गिणे चेषुधिमते च, नमस्तीक्ष्णेषवे चायुधिने च, नमः स्वायुधाय च सुधन्वने च ॥ नमः स्रुत्याय च पथ्याय च, नमः काट्याय च नीप्याय च, नमो नाद्याय च वैशन्ताय च, नमः कुल्याय च सरस्याय च, नमः कूप्याय चावट्याय च, नमो वर्ष्याय चाऽवर्ष्याय च, नमो मेघ्याय च विद्युत्याय च,

नमो वीध्र्याय चातप्याय च, नमो वात्याय च रेष्म्याय च, नमो वास्तव्याय च वास्तुपाय च, ("च०" अंशुश्च मे "रु") नमः सोमाय च रुद्राय च, नमस्ताम्राय चारुणाय च, नमः शङ्गवे च पशुपतये च, नमः उग्राय च भीमाय च, नमो हन्त्रे च हनीयसे च, नमोऽग्रेवधाय च दूरे वधाय च, नमो वृक्षेभ्यो हरिकेशेभ्यो, नमस्ताराय, नमः शम्भवे च, मयोभवे च, नमः शङ्कराय च मयस्कराय च ॥ नमः शिवाय च शिवतराय च, नमः किंशिल्याय च क्षयणाय च ("च०" इध्मा च मे "रु") नमः इरिण्याय च प्रपथ्याय च, नमः पुलस्तिने च कपर्दिने च, नमो गोष्ठ्याय च गृह्याय च, नमस्तल्प्याय च गेह्याय च, नमः पर्याय चावार्याय च, नमः प्रतरणाय चोत्तरणाय च, नमस्तीर्थ्याय च कुल्याय च, नमः फेन्याय च शिष्प्याय च, नमः सिकत्याय च प्रवाह्याय च, नमो ह्रद्याय च निवेष्प्याय च, नमः काट्याय च गह्वरेष्ठाय च, नमः शुष्क्याय च हरित्याय च, नमो लोप्याय चोलप्याय च, नमः पांसव्याय च रजस्याय च, नमः सूर्म्याय चोर्म्याय च, नमः पर्ण्याय च पर्णशदाय च, नमः आखिदते च प्रखिदते च, नमोऽभिघ्नते चापगुलमानाय च, नमः आखिदाय च विखि-

दाय च॥ नमो वः किरिकेभ्यो, देवानां हृदयेभ्यो, नमो विचिन्वत्केभ्यो, नमो विक्षी-
णकेभ्यो, नम आनिर्हतेभ्यः॥ ("च०" अग्निश्च मे "रु") द्रापे अन्धसस्पते दरिद्रनील-
लोहित, आसां प्रजानामेषां पुरुषाणामेषां पशूनां माभेर्मा रुङ्मानः किंचनाऽममत्।
इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतीः । यथा नःशमऽसद्द्विपदे
चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम् ॥ या ते रुद्र शिवा तनूः शिवा विश्वाह
भेषजीः, शिवा रुतस्य भेषजी तया नो मृड जीवसे । परिणो रुद्रस्य हेतिर्वृणक्तु
परित्वेषस्य दुर्मतेरघायोः, अवस्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय
मृड । मीढुष्टम शिवतम शिवो नः सुमना भव, परमे वृक्ष आयुधन्निधाय
कृत्तिं वसान आचर पिनाकम् । बिभ्रदाचर विकिरिद विलोहित नमस्ते
अस्तु भगवः यास्ते सहस्रं हेतयोऽन्येऽस्मन्निव पन्तु ताः । ("च" गर्भा च
मे "रु") सहस्राणि सहस्रधा हेतयस्तव बाह्वोः, तासामीशानो भगवः पराचीना
मुखाकुरु ॥ ॐअसङ्ख्याताः सहस्राणि ये रुद्रा अधि भूम्याम्, तेषां
सहस्रयोजनेऽवधन्वानि तन्मसि ॥ १ ॥ येऽस्मिन्महत्यऽर्णवेऽन्तरिक्षे भवा अधि,

तेषां० ॥ २ ॥ ये नीलग्रीवाः शितिकण्ठा दिवं रुद्रा उपाश्रिताः, ते० ॥ ३ ॥ ये नीलग्रीवाः शितिकण्ठाः शर्वा अधः क्षमाचराः, ते० ॥ ४ ॥ ये वनेषु शिष्पिञ्जरा नीलग्रीवा विलोहिताः, ते० ॥ ५ ॥ येऽन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान्, ते० ॥ ६ ॥ ये भूतानामऽधिपतयो विशिखासः कपर्दिनः, ते० ॥ ७ ॥ ये पथीनां पथि रक्षय ऐड मृडाय स्युधः, ॥ते०॥८॥ ये तीर्थानि प्रचरन्ति सृकावन्तो निषङ्गिणः, ते० ॥९॥ य एतावन्तो वा भूयांसो वा दिशो रुद्रा वितस्थिरे, ते०॥१०॥ ॐनमो अस्तु रुद्रेभ्यो, ये दिवि, येषां वर्षमिषवस्तेभ्यो, दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः, तेभ्यो नमो अस्तु ते नो मृडयन्तु, ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ॥ १ ॥ ॐनमो अस्तु रुद्रेभ्यो येऽन्तरिक्षे येषां वातमिषवस्तेभ्यो० ॥ २ ॥ ॐ नमो अस्तु रुद्रेभ्यो ये पृथिव्यां येषामऽन्नमिषवस्ते० ॥ ३ ॥ ("च" एका च मे रुद्र० "ते०") यो रुद्रो० ॥ इति रुद्रमन्त्रसूक्तम् ॥१॥

अथ चमानुवाकसूक्तम् २ ।

"रुद्र" प्रणतोस्मि महादेव० ॥ "चम" गात्रं भस्मसितं सितं च हसितं हस्ते

कपालं सितं, खट्वाङ्गं च सितं सितं च वृषभं कर्णे सिते कुण्डले । गङ्गाफेनसितो जटाजलसितश्चन्द्रः सितो मूर्धनि, सोऽयं सर्वसितो ददातु विभवं पापक्षयं शङ्करः ॥ “आशुः शिशान इति शुक्रज्योतिष्मानंऽशु प्रजननं सर्वाः प्रजाः कश्यपा इति कश्यपस्य वाजस्य प्रसवोऽसे:” ॐ आशुःशिशानो वृषभो न युध्मो, घनाघनः क्षोभणश्चर्षणीनाम् । सङ्क्रन्दनोऽनिमिष एकवीरः, शतँ सेना अजयत्साकमिन्द्रः ॥ १ ॥ सङ्क्रन्दनेनाऽनिमिषेण जिष्णुना, युत्कारेण दुश्च्यवनेन धृष्णुना । तदिन्द्रेण जयत तत्सहध्वं, युधो नर इषुहस्तेन वृष्णा ॥ २ ॥ स इषुहस्तैः सनिषङ्गिभिर्वशी सँस्रष्टा सयुध इन्द्रो गणेन । सँसृष्टजित्सोमपा बाहु, शर्ध्यूर्ध्वधन्वा प्रतिहिताभिरस्ता ॥ ३ ॥ बृहस्पते परिदीया रथेन रक्षोहा मित्राँ अपबाधमानः । प्रभञ्जन्त्सेनाः प्रमृणो युधाजयन्नऽस्माकमेध्यविता रथानाम् ॥ ४ ॥ बलविज्ञायः स्थविरः प्रवीरः सहस्वान्वाजी सहमान उग्रः । अभिवीरो अभिसत्वा सहोजिज्जैत्रावनो रथमाऽतिष्ठ गोवित् ॥ ५ ॥ गोत्रभिदङ्गोविदं वज्रबाहुं जयन्तमऽज्मा प्रमृणन्तमोजसा । इमँ सजाता अनुवीरयध्वमिन्द्रसखायमऽनुसंरभध्वम् ॥ ६ ॥ अभिगोत्राणि सहसा गाह-

मानोऽद्योवीरः शतमन्युरिन्द्रः । दुश्च्यवनः पृतनाषाडऽयुध्योऽस्माकं सेना अवन्तु प्रयत्सु ॥७॥ इन्द्र एषां नेता बृहस्पतिर्दक्षिणो यज्ञः पुर एतु सोमः । देवसेनानाम-ऽभिभञ्जतीनां जयन्तीनां मारुतो यन्तु मध्ये ॥८॥ इन्द्रस्य वृष्णो वरुणस्य राज्ञ आ-दित्यानां मरुतां शर्ध उग्रम् । महामनसां भुवनच्यवानां घोषो देवानां जयतामुद-स्थात् ॥९॥ अस्माकमिन्द्रः समृतेषु ध्वजेष्वऽस्माकं या इषवस्ता जयन्तु । अस्माकं वीरा उत्तरे भवन्त्वऽस्मान्तु देवा अवता भरेष्वा ॥ १० ॥ शुक्रज्योतिश्च, चित्रज्यो-तिश्च, सत्यज्योतिश्च, ज्योतिष्मांश्च, सत्यश्चर्तपाश्चात्यँहा, ईदृङ्चान्यादृङ्च, सदृङ्च, प्रतिसदृङ्च, मितश्च, समितश्च, सभारा, ऋतश्च, सत्यश्च, ध्रुवश्च, धरुणश्च, धर्ताच, विधर्ताच, विधारय, ऋतजिच्च, सत्यजिच्च, सेनाजिच्च, सुषेणश्चान्तिमित्रश्च दूरे अमित्रश्च गण ईदृक्षास एतादृक्षास, ऊषुणः सदृक्षास; प्रतिसदृक्षास एतान मिता-सश्च, संमितासो नोअद्य, सभारसो मरुतो यज्ञे, अस्मिन्निन्द्रं दैवीर्विशो मरुतोऽ-नुवर्त्मानो यथेन्द्रन्दैवीर्विशो मरुतोऽनुवर्त्मानोभवन्नेवमिमं यजमानं दैवीश्च विशो मानुषीश्चानुवर्त्मानो भवन्तु ॥ ("रु०" ॐनमस्ते रुद्र मन्यवे० ॥ "शता० क्षेपक"

मा नो महान्तं ॥ ७ ॥ मानोस्तोके तनये० ॥ ८ ॥ ॐनमस्ते अस्तु भगवः परमेश्वर, विश्वेश्वर, महादेव, शिव, सशिव, सदाशिव, त्रिकालकाल, कालाग्निरुद्र, नीलकण्ठ, अमृतेश्वर, बहुरूप, अघोर, तत्पुरुष, महामृत्युञ्जयभट्टारक, ते नमो नमः ॥ अग्नाविष्णू सजोषसा इमा वर्धन्तु वां गिरः, द्युम्नैर्वाजेभिरागतम् ॥ १ ॥ अनुवाक १ ॥ "च०") वाजश्च मे, प्रसवश्च मे, प्रयतिश्च मे, प्रसृतिश्च मे, धीतिश्च मे, क्रतुश्च मे, स्वरश्च मे, श्लोकश्च मे, श्रावश्च मे, श्रुतिश्च मे, ज्योतिश्च मे, स्वश्च मे, प्राणश्च मे, व्यानश्च मे, अपानश्च मे, ऽसुश्चमे, चित्तं च मे, आधीतं च मे, वाक्च मे, मनश्च मे, चक्षुश्च मे, श्रोत्रं च मे, दक्षश्च मे, बलं च मे, ओजश्च मे, सहश्च मे, आत्मा च मे, तनूश्च मे, शर्म च मे, वर्म च मे, ऽङ्गानि च मे, ऽस्थीनि च मे, परूंषि च मे, शरीराणि च मे, आयुश्च मे, जरा च मे ॥ "क्षे०" यज्ञेन कल्पताम् । "रु०" ॐनमो हिरण्यबाहवे० ॥ "अग्नाविष्णू० । अनुवाकः ॥ २ ॥ "च०" ॐ ज्यैष्ठ्यं च मे, आधिपत्यं च मे, मन्युश्च मे, भामश्च मे, ऽमश्च मे, ऽम्भश्च मे, जेमा च मे, महिमा च मे, वरिमा च मे, प्रथिमाच मे, वर्ष्मा च मे, द्राघ्वा च मे,

वृद्धं च मे, वृद्धिश्च मे, सत्यं च मे, श्रद्धा च मे, जगच्च मे, धनं च मे, क्रीडा च मे, मोदश्च मे, वशश्च मे, त्विषिश्च मे सूक्तं च मे, सुकृतं च मे, जातं च मे, जनिष्यमाणं च मे, वित्तं च मे, वेद्यं च मे, भूतं च मे, भविष्यं च मे, सुगं च मे, सुपथं च मे, ऋद्धं च मे, ऋद्धिश्च मे, क्लृप्तं च मे, क्लृप्तिश्च मे, मतिश्च मे, सुमतिश्च मे ॥ ('यज्ञेन०' "रु०" नमः सहमानायनिव्याधिने० ॥ अग्नाविष्णू०' ॥ अनु० ॥ ३ ॥ "च०") ॐशंच मे, मयश्च मे, प्रियञ्च मे, ऽनुकामश्च मे, कामश्च मे, सौमनसश्च मे, भगश्च मे, द्रविणं च मे, भद्रं च मे, श्रेयश्च मे, वस्यश्च मे, यशश्च मे, यन्ता च मे, धर्ता च मे, क्षेमश्च मे, धृतिश्च मे, संविच्च मे, ज्ञातं च मे, विश्वं च मे, महश्च मे, सूश्च मे, प्रसूश्च मे, सीरं च मे, लायश्च मे, ऋतं च मेऽमृतं च मे, ऽयक्ष्मं च मे, ऽनामयं च मे, जीवातुश्च मे, दीर्घायुत्वं च मे, ऽनमित्रं च मे, ऽभयं च मे, सुगं च मे, शयनं च मे, सूषाश्च मे, सुदिनं च मे ॥ ('यज्ञेन०' "रु०" ॐनम आव्याधिनेभ्यो विविध्यन्तश्च वो नमो० ॥ 'अग्ना०' अनु० ॥ ४ ॥ "च०") ऊर्क्च मे, सूनृता च मे, पयश्च मे, रसश्च मे घृतं च मे मधुश्च मे, सग्धिश्च

मे, सपीतिश्च मे, कृषिश्च मे, वृष्टिश्च मे, जैत्रं च मे, औद्भिद्यं च मे, रयिश्च मे, रायश्च मे, पुष्टं च मे, पुष्टिश्च मे, विभुश्च प्रभुश्च मे पूर्णं च मे, पूर्णतरं च मे, कुयवं च मे, क्षितिश्च मे, अन्नं च मे, इक्षुश्च मे, व्रीहयश्च मे, यवाश्च मे, माषाश्च मे, तिलाश्च मे, नीवाराश्च मे, श्यामकाश्च मे, ऽणवश्च मे, प्रियङ्गवश्च मे, गोधूमाश्च मे, मसूराश्च मे, मुद्गाश्च मे, खल्वाश्च मे। ('यज्ञे०' "रु०" ॐनमो भवाय च रुद्राय च०। 'अग्ना०'। अनु० ॥ ५ ॥ "च०") ॐअश्मा च मे, मृत्तिका च मे, गिरयश्च मे, पर्वताश्च मे, सिकताश्च मे, वनस्पतयश्च मे, हिरण्यं च मे, अयश्च मे, सीसं च मे, त्रपुश्च मे, श्यामं च मे, लोहितायसं च मे, अग्निश्च मे, आपश्च मे, वीरुधश्च मे, ओषधयश्च मे, कृष्टपच्यं च मे, ऽकृष्टपच्यं च मे, ग्राम्याश्च मे, पशव आरण्याश्च मे, वित्तं च मे, वित्तिश्च मे, भूतं च मे, भूतिश्च मे, वसु च मे, वसतिश्च मे, कर्म च मे, शक्तिश्च मे, ऽर्थश्च मे, एमश्च मे, इत्या च मे, गतिश्च मे। ('यज्ञेन०'। "रु०" ॥ नमो ज्येष्ठाय च०। 'अग्ना०'। अनु० ॥ ६ ॥ "च०") ॐअग्निश्च म, इन्द्रश्च मे, सोमश्च मे इन्द्रश्च म, सविता च म, इ०, सरस्वती च म, इ०, पूषा च म, इ०,

बृहस्पतिश्च म, इ०, मित्रश्च म, इ०, वरुणश्च म, इ०, धाता च म, इ०, त्वष्टा च म, इ०, मरुतश्च म, इ०, विश्वेदेवाश्च म, इ०, पृथिवी च म, इ०, अन्तरिक्षं च म, इ०, द्यौश्च म, इ०, समाश्च म, इ०, नक्षत्राणि च म, इ०, दिशश्च म, इन्द्रश्च मे। ('यज्ञेन०' "रु०" नमो दुन्दुभ्याय च०। 'अग्ना०' अनु० ॥७॥ "च०") ॐ अंशुश्च मे, रश्मिश्च मे, दाभ्यश्च मे, ऽधिपतिश्च मे, उपांशुश्च मे, ऽन्तर्यामश्च म, ऐन्द्रावायवश्च मे, मैत्रावरुणश्च मे, आश्विनश्च मे, प्रतिप्रस्थापनश्च मे, शुक्रश्च मे, मन्थी च मे, आग्रायणश्च मे, क्षुल्लकवैश्वदेवश्च मे, ध्रुवश्च मे, वैश्वानरश्च मे, ऐन्द्राग्नश्च मे, वैश्वदेवश्च मे, मरुत्वतीयश्च मे, महेन्द्रीयश्च मे, सावित्रश्च मे, सारस्वतश्च मे, पत्नीवतश्च मे, हारियोजनश्च मे। ('यज्ञेन०' "रु०" नमः सोमाय च०। 'अग्ना०' अनु० ॥ ८ ॥ "च०") ॐ इध्मा च मे, स्रुचश्च मे, चमसश्च मे, वायव्यानि च मे, द्रोणकलशश्च मे, पूतभृच्च मेऽपूतभृच्च मे, ग्रावाणश्च मे, ऽधिषवणश्च मे, ऽवभृथश्च मे, स्वगाकारश्च मे। ('यज्ञे०' "रु०" नम इरिण्याय च०। 'अग्ना०' अनु ॥९॥ "च०") अग्निश्च मे, घर्मश्च मे, ऽर्कश्च मे, सूर्यश्च मे, प्राणश्च मे, ऽश्वमेधश्च मे, पृथिवीच मे,

दितिश्चमेऽदितिश्च मे, द्यौश्च मे, शक्करीरऽङ्गुलयोदिशश्च मे, यज्ञेन कल्पतां, व्रतं चर्तुश्च, संवत्सरश्च, तपश्चाहोरात्रे, ऊर्वष्ठीवे बृहद्रथन्तरश्च मे। ('यज्ञे०'। "रु०" द्रापे अन्ध-सस्पते०। 'अग्ना'। अनु० ॥१०॥ "च०") ॐगर्भा च मे, वत्साच मे, त्र्यविश्चमे, त्र्यवी च मे, दित्यवाट् च मे, दित्यौही च मे, पञ्चाविश्च मे, पञ्चावी च मे; त्रिवत्साश्च मे, त्रिवत्सा च मे, तुर्यवाट् च मे, तुर्यौही च मे, पष्ठवाट् च मे, पष्ठौही च मे, उक्षा च मे, वशा च मे, ऽनुड्वाँश्च मे, धेनुश्च मे, ऋषभश्च मे, वेहश्च मे। ('यज्ञेन०' "रु०" सहस्रधा सहस्राणि०। "अग्नावि"। अ० ॥ ११ ॥ "च०") ॐ एका च मे, तिस्रश्च मे तिसृश्च मे, त्रयस्त्रिंशश्च मे, चतुस्रश्च मे, अष्टौ च मे, अष्ट च मे, ऽष्टाचत्वारिंशच्च मे, वाजश्च, प्रसवश्चाऽपिजश्च, क्रतुश्च, वाक्पतिश्च, वसुश्च, स्वर्मौर्धो मूर्धा वैयशनो, व्यश्वाँन आन्त्योऽन्त्यो भौवनो भुवनस्य पतिः प्रजापतिरधि-पतिरियन्ते राण्मित्रो यन्तासि यमन ऊर्जे त्वा वृष्टयै त्वा प्रजानां त्वाऽधिपत्याय, आयुर्यज्ञेन कल्पतां मनो यज्ञे०, प्राणो य०, चक्षुर्य०, श्रोत्रं य०, वाग्य०, आत्मा य०, ब्रह्म य०, पृष्ठंय०, यज्ञो यज्ञेन कल्पताम्, ऋक्च, सामश्च स्तोमश्च यजुश्च बृहद्रथन्त-

रश्च, स्वर्देवा अगन्म, प्रजापतेः प्रजा अभूवमाऽमृता अभूम वेट् स्वाहा । "वाजस्य नु प्रसवा इति षट्" ॐविश्वे अद्य मरुतो विश्व ऊतीर्विश्वे भवन्त्वग्नयः समिद्धाः । विश्वे मा देवा अवसागमन्त्विह विश्वमस्तु द्रविणं वाजे अस्मिन् ॥ १ ॥ आ मा वाजस्य प्रसवो अगम्यादाऽमाद्यावापृथिवी विश्वरूपे । आमा गन्तां पितरा मातरा चा मा सोमो अमृतत्वेन गम्यात् ॥ २ ॥ वाजस्य नु प्रसवे मातरं महीमदितिं नाम वचसा करामहे । यस्यामिदं विश्वं भुवनमाविवेश तस्यां नो देवः सविता धर्म साविषत् ॥ ३ ॥ वाजो मा सह प्रदिशश्चतस्रो वा परावतः । वाजो मा विश्वैर्देवैर्धनसाता इहावतु ॥ ४ ॥ वाजो मे अद्य प्रसुवातिदानं वाजो देवान्हविषा वर्धयाति । वाजस्य हि प्रसवेनाजमेति विश्वा आशा वाजपतिर्जयेयम् ॥ ५ ॥ वाजः पुरस्तादुत मध्यतो नो वाजो देवानृतुभिः कल्पयाति । वाजस्य हि प्रसवेनाजमिति सर्वा आशा वाजपतिर्भवेयम् ॥ ६ ॥ सँमा सृजामि पयसा पृथिव्याः, सँमा सृजाम्यद्भिरोषधीभिः, सोऽहं वाजस्य नौम्यग्ने ॥ ७ ॥ "ते०" पयः पृथिव्यां पय ओषधीषु पयो दिव्यन्तरिक्षे । पयोधाः पयस्वतीः प्रदिशः सन्तु मह्यम् ॥ ८ ॥

इति चमानुवाकसूक्तम् २ ।

२ आज्य.

अथ सौमारुद्रसूक्तं तृतीयम् ॥ ३ ॥

ॐवन्दे रुद्रमुमापतिं सुरगुरुं वन्दे जगत्कारणं वन्दे पन्नगभूषणं शशिधरं वन्दे पशूनां पतिम् । वन्दे सूर्यशशाङ्कवह्निनयनं वन्दे मुकुन्दप्रियं वन्दे शैलसुतामनोहरतरं वन्दे शिवं शङ्करम् ॥ ॐ"सौमारुद्रमिति ईश्वरो भ्रातृव्यः, ब्राह्मणानि सुमन्तोः कश्यपस्य ब्रह्मणश्च" ॐसौमारुद्रं चरुं निर्वापयेच्छुक्लानां व्रीहीणां श्वेतायाः श्वेतवत्साया आज्यं मथितँ स्यात्तस्मिन्ब्रह्मवर्चसकामः, स्वर्भानुर्वा आसुरः, सूर्यन्तमसाऽविध्यत्स न व्यरोचत, तस्मै देवाः प्रायश्चित्तिमैच्छँ, स्तमेतयेष्ट्या याजयं, स्तयाऽस्मात्तमोपाघ्नँस्तमसैष प्रावृतो, योऽलं ब्रह्मवर्चसाय तत्र ब्रह्मवर्चस्वी भवति, तमएवास्मादऽपहन्ति, ब्रह्मवर्चसेनैनँ सँ सृजति, श्वेतायाः श्वेतवत्सायाः आज्यं भवति, शुक्ला व्रीहय एवमिव वै, ब्रह्मवर्चसं ब्रह्मवर्चसमेव सन्ददाति ॥ घृतेन प्रोक्षन्ति, घृतेन मार्जयन्ति शान्त्यै शान्तिर्ह्यापोऽप्यस्य ताँ रात्रीमाऽपो गृहान्नावहरेयुः परिश्रिते यजेत, ब्रह्मवर्चसस्य परिगृहीत्यै, प्रादेशमात्रश्चरुरूर्ध्वो भवत्येवं तिर्यङ्क्तावान्वै पुरुषो यावदऽस्य प्राणाँ अभि, यावानेवास्यात्मा तस्मा-

स्तमोऽपहन्ति, साकं रश्मिभिः प्रचरन्त्यऽसा एवास्मादादित्य उद्यँस्तमोऽपहन्ति, तिष्या पौर्णमासे यजेत, तिष्यो वै रुद्रश्चन्द्रमाः सोमः सौमीरतः, प्राचीनमोषधयो रौद्रीः, प्रतीचीनमोषधयो रात्रीः प्रतीचीनं पुष्यन्ति, प्राचीनं शुष्यन्ति, प्रतीचीनं प्रत्यक्षमेवैना ऋघ्नोतीश्वरो दुश्चर्मा भवितोर्य एतया यजेते तीवस्वस्माद-ऽपहन्ति, मनोर्ऋचः सामिधेनीष्वऽप्यऽनुब्रूयान्मनुर्वा यत्किञ्चाऽवदत्तद्भेषजमाऽऽसीद्भेषजमेवास्मै करोत्यपक्षरन्ति सिन्धवो, मयोभुव इति, नराशंस्या परिददाति, शान्त्यै षट्पदा भवन्ति, षड्वा ऋतव ऋतुष्वेव परितिष्ठति ॥ ईश्वरस्तु तदऽति दुश्चर्मैव भवितोस्तेजाँसि ह्येष प्रत्यारोहश्चिति, सौमापौष्णश्चरुं पशुकामोऽनुनिर्वपेत्सोमो वै ब्राह्मणस्य, स्वा देवताः पशवः, पूषा स्वामेव देवतां, पशुभिर्बहयते, त्वचमेव कुरुते, सौमारुद्रश्चरुं निर्वपेत्कृष्णानां व्रीहीणामभिचरन्सोमो वा आसां प्रजानामऽधिपती, रुद्रोऽग्निरऽधिपतिर्वध्यस्य चाऽवध्यस्य चेशेऽधिपतिमेवैनं निर्याश्य, रुद्रायाऽपिदधाति, कृष्णानां व्रीहीणां भवति, कृष्णमिव वै तमस्तमो मृत्युर्मृत्युनैवैनं ग्राहयति, शरमयं बर्हिः शीन्यै वैभीतवा, इध्मो विमित्यै सौमारुद्रं चरुं निर्वपेत् ॥ भ्रातृ-

व्यतायैवाऽद्वितीयतायैवातस्यार्धमऽर्धं, सर्वं स्यादऽर्धं, शुक्लानां व्रीहीणाँ स्यादऽर्धं कृष्णानामऽर्धं, शरमयं बर्हिषोऽर्धं दर्भमयमऽर्धं वैभीतकमिध्मस्याऽर्धमऽन्यस्य वृक्षस्य सोमो वै ब्राह्मणस्य स्वा देवता स्वायामेवाऽस्मै देवतायां द्वितीयं जनयति, यदऽर्धमऽर्धं द्वितीयत्वायैव, तत्सौमारुद्रं चरुं निर्वपे,त्पयस्यामयाविनः सौम्यो वै जीवत्त्वाग्नेयः प्रमीतो नैव जीवो न मृतो य आमवायी, तयोरेवैनं भागधेयेन निष्क्रीणाति ॥ पयसि भवति पयो वै पयः पयः पुरुषः, पय एतस्याऽमयति, यस्याऽमयति, पयसैवाऽस्य पयः स्पृणोति, प्रसितं वा एष एतं सौमारुद्रयोर्निष्खिवदति, यो होता भवति, स ईश्वरः प्रमीतो अनड्वाहं तस्मै दद्यात्तं हन्यात्तस्याश्नीयात्सैव तत्र प्रायश्चित्तिः, सौमारुद्रञ्चरुं निर्वपेत्, प्रजाकामो वा पशुकामो वा सोमो वै रेतोधा, रुद्रोऽग्निः स प्रजनयिता सोम एवास्मै रेतो दधात्यऽग्निः प्रजनयति, विन्दते प्रजां वा पशून्वा यतरस्मै कामाय निर्वपति ॥ "सौमारुद्रचतुष्कं भरद्वाजः सौमारुद्रः त्रिष्टुप्" ॐ सौमारुद्रा धारयेथामऽसुर्यं प्रवामिष्टयोऽरमश्नुवन्तु, दमे दमे सप्तरत्ना दधाना शं नो भूतं

द्विपदे शं चतुष्पदे ॥ १ ॥ सोमारुद्रा विवृहतं विषूचीममीवा या नो गयमाविवेश । आरे बाधेथां निर्ऋतिं पराचैरस्मे भद्रा सौश्रवसानि सन्तु ॥ २ ॥ सोमारुद्रा युवमेतान्यस्मे विश्वा तनूषु भेषजानि धत्तम् । अवस्यतं मुञ्चतं यन्नो असित्तनूषु बद्धं कृतमेनो अस्मत् ॥ ३ ॥ "ते" तिग्मायुधौ तिग्महेती सुशेवौ सोमारुद्राविह सुमृडतं नः । प्रनो मुञ्चतं वरुणस्य पाशाद्गोपायतं नः सुमनस्यमाना ॥ ४ ॥ "इति सोमारुद्रमंत्रसूक्तं तृतीयम् ॥

अथ दीक्षामन्त्रसूक्तं चतुर्थम् ॥

ॐ शान्तं पद्मासनस्थं शशधरमुकुटं पञ्चवक्त्रं त्रिनेत्रं शूलं वज्रं च खड्गं परशुमभयदं दक्षभागे वहन्तम् । नागं पाशं च घण्टां डमरुकसहितं साङ्कुशं वामभागे नानालङ्कारयुक्तं स्फटिकमणिनिभं नौमि दक्षं महेशम् ॥ ("दीक्षया त्वापरिमित्येति पञ्चैते प्राजापत्यस्य येन देवा ज्योतिष्मेति, संवर्तस्याऽङ्गिरसस्य यावद्ब्राह्मणः । यजुः") ॐ दीक्षया विराडाऽप्यव्यस्तिस्रोरात्रीर्दीक्षितः स्यात्त्रिपदा विराड्विराजमेवाप्नोति, षड्रात्रीर्दीक्षितः स्यात्, षड्वा ऋतवः संवत्सरः, संवत्सरो विराड्०, दशरात्रीर्दीक्षितः

स्याद्दशाक्षरा विरा०, द्वादशरात्रीर्दीक्षितः स्याद्द्वादशमासाः संवत्सरः, संवत्सरो विरा०, त्रयोदशरात्रीर्दीक्षितः स्यात्त्रयोदश मासाः संवत्सरः, संवत्सरो वि०, पञ्चदशरात्रीर्दीक्षितः स्यात्पञ्चदशार्धमासस्य रात्रयोऽर्धमासशः, संवत्सर आप्यते, संवत्सरो वि०, सप्तदशरात्रीर्दीक्षितः स्याद्द्वादश मासाः पञ्चर्तवः संवत्सरः संवत्सरो वि०, चतुर्विंशतिरात्रीर्दीक्षितः स्याच्चतुर्विंशतिः संवत्सरस्यार्धमासा रात्रयोऽर्धमासशः, संवत्सर आप्यते, संवत्सरो वि०, त्रिंशतं रात्रीर्दीक्षितः स्यात्त्रिंशदक्षरा विराड्० ॥ मासन्दीक्षितः स्याद्यो वै मासः संवत्सरः संवत्सरो विराड्वि०, चतुरो मासो दीक्षितः स्याच्चतुरो वा एतं मासो वसवोऽबिभरुस्ते, पृथिवीमाऽजयन्गायत्रीं छन्दोऽष्टौ, रुद्रास्तेऽन्तरिक्षमाऽजयंस्त्रिष्टुभं छन्दो द्वादशाऽऽदित्यास्ते दिवमाजयञ्जगतीञ्छन्दस्ततो वै ते व्यावृतमाऽगच्छञ्छ्रैष्ठ्यन्देवानां तस्माद्द्वादशमासो भूत्वाऽग्निञ्चिन्वीत, द्वादशमासाः संवत्सरः संवत्सरोऽग्निर्वैश्वानरस्तस्याऽहोरात्राणीष्टका आप्तेष्टकमेवैनञ्चिनुत ऋध्नोति, व्यावृतमेव गच्छति, श्रैष्ठ्यं समानानां गायत्रं पुरस्ताद्गायति, शिरो वै देवानां गायत्रं गायत्रोऽग्निस्तस्माद्गायत्रं

पुरस्ताद्गायति ॥ आग्निपावमानाभ्यामऽयं वा यः पवते, स प्राणो मुखन्देवानामऽग्नि-र्मुखत एव प्राणन्दधाति, तस्मान्मुखतः प्राणो, रथन्तरमुत्तराद्गायति, बृहद्दक्षिणतः पक्ष एवास्योपदधातीयं वै रथन्तरमऽसौ बृहदाभ्यामेवैनं परिगृह्णाति, यज्ञायज्ञी-यम्पुच्छे गायति, प्रोण्यां वामदेव्य,माऽत्मा वै यज्ञायज्ञीयन्तनूर्वामदेव्य, मात्मान-मेवैनँ, स तनूञ्जिनुते, हृदयमपि कक्षे, तस्मादपि कक्षे, हृदयमऽनुचक्रमवति, तस्मा-दानस्यकं हृदयमऽर्ध्यै, परिगायत्यऽर्को वा अग्निरऽर्कमेवाध्यैः परिगायति शान्त्यै ॥ संवत्सरो वा अन्तरतमः, स्वर्गं लोकं ज्योतिष्मतीरेताः साहस्रीरिष्टका, यद्धिरण्य-शुल्कैः प्रोक्षति, ज्योतिष्मैवास्मै संवत्सरं विवासयति, सहस्रस्य प्रमासि, सहस्रस्य प्रतिमासीति, सहस्रसंमिता हीमे लोका अन्ति वा एतदग्नेर्वेदस्याऽग्र न क्रियते, यत्र चीयतेऽमृतं हिरण्यं यद्धिरण्यशुल्कैः प्रोक्षत्यमृतेनैवास्य तन्वम्भुजन्ती, मा मे अग्ने इष्टका धेनवः सन्त्स्विति, धेनूरेवैनाः कुरुते, ता एनं कामदुघा अमुष्मिंल्लोके उपतिष्ठन्ते, रुद्रं वै देवा यज्ञान्निरभजन्, स देवानायतयाऽभिपर्यावर्तत, ते देवा एतच्छतरुद्रियमऽपश्यं स्तेनैनमऽशमयन्, यच्छतरुद्रियञ्जुहोति तेनैवैनं शमयति ॥

जानुदघ्नेऽग्रे जुहोत्यस्या एव रुद्रमऽवयजतेऽथ नाभिदघ्नेऽन्तरिक्षादेव रुद्रमवयजतेऽथ पुरुषमात्रेऽमुष्या एव रुद्रमऽवयजत, इत एवोर्ध्वं रुद्रमऽवयजतेऽथ पुरुषमात्रेऽथ नाभिदघ्नेऽथ जानुदघ्नेऽमुत एवार्वाञ्चं रुद्रमऽवयजते तत्षट् सम्पद्यते, षड्वा ऋतुभ्य एव रुद्रम्भिरवयजते, गवीधुकासक्तुभिर्वा जर्तिलैर्वा मृगक्षीरेण वा जुहोति यद्ग्राम्येण जुहुयाद्ग्राम्यावचारिणँ रुद्रं कुर्यादारण्येनैवारण्यमऽभिरुद्रं निरवयजते ॥ अर्कपर्णेन जुहोत्यर्कोवाऽग्निरऽर्केनैवैनमर्कादऽधि निरवयजत उत्तरस्य पक्षस्य या चरमेष्टका तस्यां जुहोत्येषा वै रुद्रस्य दिक्स्वायामेव दिशि रुद्रं प्रतिगृह्याऽवयजते, पशुर्वा अग्निरेतर्हि वा एष जायते, यर्हि चीयते, यथा वत्सो जातं स्तनं प्रेप्सत्येवं वा एष एतर्हि भागधेयं प्रेप्सति, सयजमानं चैवाऽध्वर्युं च ध्यायति, यच्छतरुद्रियं जुहोति भागधेयेनैवैनं शमयति ॥ अङ्गिरसो वै स्वर्गं लोकं यन्तस्तेजायां घर्मं प्रासिञ्चत्सा शोचन्ती पर्णं परामृशत्सोऽर्कोऽभवत्तदऽर्कस्याऽर्कत्वं यदऽर्कपर्णेन जुहोति सयोनित्वाय यन्द्विष्यात्तस्य सञ्चरे पशूनां न्यसेद्यः प्रथमा पशुराक्रामति त आर्त्तिमार्च्छन्ति, या उत्तमास्ता यजमानं वाचयेदेता वै देवताः स्वर्ग्यास्ताभिरेव स्वर्गलोक-

मित्येता वै देवता अभिचरणीया यन्द्विष्यात्तं ब्रूयादऽमुं वो जम्भे दधामीत्येताभ्य एवैनं "ते०" देवताभ्य आवृश्चति, ताजक् प्रधन्वति "इति दीक्षामन्त्रसूक्तं चतुर्थम् ॥

अथ शताध्यायसूक्तं पञ्चमम् ॥

चन्द्रार्काग्निविलोचनं स्मितमुखं पद्मद्वयान्तःस्थितं मुद्रापाशसुधाक्षसूत्रविलसत्पाणिं हिमांशुप्रभम् । कोटीरेन्दुगलत्सुधाप्लुततनुं हारादिभूषोज्ज्वलं कान्त्या विश्वविमोहनं पशुपतिं मृत्युञ्जयं भावये ॥ ("इमा रुद्रैकादश वासिष्ठैकादश देवता भूर्भुवः स्वश्चक्षुषा रूपाणि वयमित्याङ्गिरसस्यैशानाः") ॐ इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतीः, यथा नः शमऽसद्द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्नानातुरम् ॥१॥ मृडा नो रुद्रो तनो मयस्कृधि क्षयद्वीराय नमसा विधेम ते, यच्छंयोश्च मनुरायेजे पिता तदश्याम तव रुद्र प्रणीतिषु ॥ २ ॥ अश्याम ते सुमतिं देवयज्यया क्षयद्वीरस्य तव रुद्र मीढ्वः, सुम्नायन्निद्विशो अस्माकमाऽचरारिष्टवीरा जुहुवाम ते हविः ॥ ३ ॥ त्वेषं वयं रुद्रं यज्ञं साधनमऽङ्कुङ्कविमऽवसे निह्वयामहे, आरे अस्मद्दैव्यँ हेडो अस्यतु सुमतिमिद्वयमऽस्या वृणीमहे ॥ ४ ॥ दिवो वराहम-

रुषत्कपर्दिनं त्वेषँ रूपं नमसा निह्वयामहे, हस्ते बिभ्रद्भेषजा वार्याणि शर्म वर्म च्छर्दिरस्मभ्यं यं सत् ॥ ४ ॥ इदं पित्रे मरुतामुच्यते वचः स्वादोः स्वादीयो रुद्राय वर्धनम्, रास्वाच नो अमृत मर्त्यभोजनं त्मने तोकाय तनयाय मृड ॥ ६ ॥ मृड त्वमऽस्मभ्यँ रुद्रैतदऽस्तु हुतं तव, पशूनऽस्माकं माहिँसीरेतदऽस्मा असद्धुतम् ॥ ७ ॥ मानो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम्, मानो वधीः पितरं मोत मातरं मा नः प्रियास्तन्वो रुद्र रीरिषः ॥८॥ मा न स्तोके तनये मान आयौ मानो गोषु मानो अश्वेषु रीरिषः, वीरान्मानो रुद्र भामितो वधीर्हविष्मन्तः सदमित्त्वा हवामहे ॥ ९ ॥ उप ते स्तोमान्पशुपा इवाऽकरं रास्वा पितर्मरुताँसुम्नमऽस्मे; भद्रा हि ते सुमतिर्मृडयत्तमाथाऽवयमव इत्ते वृणीमहे ॥ १० ॥ आरे ते गोघ्नमुत पूरुषघ्नं क्षयद्वीर सुम्नमस्मे ते अस्तु, मृडा च नो अधि च ब्रूहि देवाधा च नः शर्म यच्छ द्विबर्हाः ॥११॥ अवोचाम नमो अस्मा अवस्यवः शृण्वन्तु नो हवं रुद्रो मरुत्वान्, तन्नो मित्रो वरुणो मामहन्तामऽदितिः सिन्धुः पृथिवी उत द्यौः ॥ १२ ॥ "यजुः" त्वमग्ने रुद्रो असुरो महो दिवस्त्वं शर्धो मारुतं पृक्ष

यशसे, त्वं वातैराऽरुणैर्यस्ते शङ्ग्यस्त्वं पूषा विदत्ता पासि नु त्मनः, देवा देवेषु श्रयन्तां प्रथमा द्वितीयेषु श्रयन्तां, द्वितीयास्तृतीयेषु श्रयन्तां, तृतीयाश्चतुर्थेषु श्र०, चतुर्थाः पञ्चमेषु श्र०, पञ्चमाः षष्ठेषु श्र०, षष्ठाः सप्तमेषु श्र०, सप्तमा अष्टमेषु श्र०, अष्टमा नवमेषु श्र०, नवमा दशमेषु श्र०, दशमा एकादशेषु श्र०, देवास्त्रिरेकादशा त्रयस्त्रिंशाः, उत्तरे भवथोत्तरे सत्वानो उत्तरवर्त्मान उत्तरकक्ष्माणो यत्कामयेदं जुहोमि स मे कामः समृद्ध्यतां वयं स्याम पतयो रयीणाम् ॥ ॐभूर्भुवः स्वः क्षुच्च शुक्रोष्णा चोग्रा च भीमा च राष्ट्रा च बीभत्सा च वैशन्ता च शार्दूराका चानिराका चामीवाचा नाहुतिश्च निर्ऋतिरेतास्ते अग्निवर्तिमतिस्तन्वस्तामिस्तं गच्छयोऽस्मान्द्वेष्टि यं च वयं द्विष्मस्तमऽर्पय ॥ भवा शर्वा मृडतमा वियातं पशुपती भूतपती नमो वाम्, प्रतिहितामयतामाविस्रष्टं मानो हिंसिष्टं द्विपदो मा चतुष्पदः, शुने क्रोष्ट्रे मा शरीराणि कर्तमारिक्रवेभ्यो गृद्धेभ्यो ये च कृष्णा अवस्यवः, मक्षिकः पशुपति वयांसि विघसे मा विदन्ते । क्रन्दाय ते प्राणाय ते याश्च ते भव हेतयः, नमस्ते उग्रकर्मः, सहस्राक्ष मर्त्य पुरस्तात्ते नमः । कूर्मोधरागुत्त-

रादस्तु, अमी वर्गोद्दिवस्पर्यन्तरिक्षाय ते नमः, मुखानि ते पशुपते यानि चक्षूंषि ते नमः। त्वचे रूपाय सन्दृशे प्रतीचीनाय ते नमः, अङ्गेभ्यस्त उदराय जिह्वायै दद्भ्यो गन्धाय प्राणाय ते नमः, अहोरात्राणि विदधत्प्रतीचीनाय ते नमः। अस्त्रानीलक-पर्दिने सहस्राक्षेण वाजिनः,शर्वेणाऽध्वगगातिना तेन मासमरामसि। भवा ईश द्विपदो भव ईश चतुष्पदः, भवो विश्वस्य भुवनस्य राजति भवाय गाव ओषधीरजीगुर्भवाय द्यावापृथिवी नमेते। मानो रुद्रा परिणो वृणक्तु, हेत्याप इवाग्निः परिणो वृणक्तु, मानो-भिमाँस्त नमो अस्त्वस्मे, चतुर्नमोष्टकृत्वो भवाय दशकृत्वा पशुपते नमस्ते। योऽभि-यातो निलयते त्वं रुद्र निचकीर्षति, यो नः पश्चादऽति प्रयुङ्क्ते तं विव्यस्व पदवीरिव। नमः सायं नमः प्रातः नमो रात्र्या नमो दिवः, भवाय च शर्वाय चोभाभ्यामऽकरं नमः॥ "ॐअथ वायोरेकादश पुरुषस्यैकादशस्त्रीकस्य" प्रभ्राजमानानाँ रुद्राणाँ स्थाने स्वतेजसा भानि १, व्यवजातानाँ रु० २ वासुकिवैद्युतानाँ रु० ३, रजतानाँ रु० ४, पुरुषाणाँ रु० ५ श्यामानाँ रु० ६, कपिलानाँ रु० ७ अतिलोहितानाँ रु० ८ ऊर्ध्वा-नाँ रु० ९ अवपतन्तानाँ रु० १०, वैद्युतानाँ रु० ११ "ॐभूर्भुवः स्वः रूपाणि वो

मिथुनं मा वो मिथुनं रीढ्वम्" ॐभ्रभ्राजमानानाँ रुद्राणीनाँ स्थाने स्वतेजसा भानि १, व्यवजातानां रु० २, वासुकिवैद्युतीनां रु० ३ रजतानाँ रु० ४, पुरुषाणाँ रु० ५, श्यामानाँरु० ६, कपिलानाँ रु० ७, अतिलोहितानाँ रु० ८ ऊर्ध्वानाँ रु० ९ अवपतन्तीनाँ रु० १० वैद्युतीनाँ रु० ११ "ॐभूर्भुवः स्वः स्त्रियो वो मिथुनं मा वो मिथुनं रीढ्वम्" ॐवयमऽग्ने धनवन्तः स्यामलं यज्ञायोत दक्षिणायै, ग्रावावदेदभि सोमस्याँशुमिन्द्रं सिक्षिमिन्दुना सुतेन १३ रायस्पोषं नो देहि जातवेद ऊर्जो भागं मधुमत्स्यां घृतावत्, दधान यज्ञँ सुनवाम सोमं यज्ञेन त्वामुप शिक्षेम शक्र १४ ईशानं त्वा शुश्रुमा वयं धनानां धनपते गोमदऽग्ने, अश्ववद्भूरि पुष्टँ हिरण्यवद्धनवद्देहि मह्यम् १५ दुहान्ते द्यौः पृथिवी पयोऽजगरस्त्वा सोदको विसर्पतु, प्रजापतिनाऽस्मानमाऽग्नीणेऽरिक्तो म आत्मा १६ "ते०" यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो वनस्पतिषु, यो रुद्रो विश्वा भुवना विवेश तस्मै रुद्राय नमो अस्तु देवाः ॥ मद्यं पीत्वा गुरुदारांश्च गत्वा स्तेयं कृत्वा ब्रह्महत्यां विधाय । भस्मच्छन्नो भस्मशय्यां शयानो रुद्राध्यायी मुच्यते सर्वपापैः १ नित्यं दण्डी नित्ययज्ञोपवीती नित्यं

ध्याता भस्मना कर्मबन्धी । रुद्रं दृष्ट्वा देवमीशानमुग्रं याति स्थानं तेन साकं तदीयम् २ अनेन मन्त्रपाठेन० अघोरः, तत्पुरुषः, सद्योजातः, वामदेवः, बहुरूपः, अभुबहुलः, त्र्यम्बकः, त्रिनेत्रः, त्रिशूलहस्तः, मृत्युंजयः,वृषभवाहनः, शतरुद्रेश्वरः, अनेकरुद्रः, उमासहितः शिवः सपरिवारः, सानुचरः प्रीयतां प्रीतोऽस्तु ॥ इति रुद्रपञ्चकम् ॥

ॐअथ देवीपञ्चके अस्यवामाख्यं दुर्गादेवीसूक्तं प्रथमम् ॥

ॐआरक्ताभां त्रिनेत्रां मणिमुकुटवतीं रत्नताटङ्करम्यां हस्ताम्भोजैः सपाशाङ्कुशमदनधनुःसायकैर्विस्फुरन्तीम् । आपीनोत्तुङ्गवक्षोरुहतटविलुठत्तारहारोज्ज्वलाङ्गीं ध्यायाम्यऽम्भोरुहस्थामऽरुणनिवसनामीश्वरीमीश्वराणाम् ॥ ("ॐ अस्य द्विपञ्चाशदऽल्पस्तवन्त्वेतत्संशयोत्थापनप्रश्नप्रतिवाक्यान्यत्र प्रायेण ज्ञानमोक्षाक्षरप्रशंसा च 'दीर्घतमा-ऋषिः, पञ्चपादं साकञ्जानां यद्गायत्रेयं स शिङ्क्ते सप्तार्धगर्भा गौरीरिति जगत्य एतदन्तं च वैश्वदेवं, तस्याः समुद्रा इति वाचः समुद्रा आपोक्षरं, सा प्रस्तारपङ्क्तिः, शकमयमिति शकधूम

उक्षाणं, पृश्निमिति सोमस्त्रयः केशिन इत्यग्निवायुसूर्याश्च केशिनः चत्वारिवाग्वाचः, इन्द्रं मित्रं सौर्ये द्वादशेति संवत्सरसंस्थं कालचक्रवर्णनं, यस्ते सारस्वत्यं, यज्ञेन साध्येभ्यः, परानुष्टुप् सौरी पर्जन्याग्निदेवता वाऽन्त्या सरस्वत्या सूर्यस्य वा शिष्टास्त्रिष्टुभः"॥) ॐ अस्य वामस्य पलितस्य होतुस्तस्य भ्राता मध्यमो अस्त्यश्नः । तृतीयो भ्राता घृतपृष्ठो अस्यात्रापश्यं विश्पतिं सप्तपुत्रम् ॥ १ ॥ सप्तयुञ्जन्ति रथमेकचक्रमेको अश्वो वहति सप्तनामा । त्रिनाभि चक्रमजरमनर्वं यत्रेमा विश्वा भुवनाधितस्थुः ॥ २ ॥ इमं रथमऽधि ये सप्ततस्थुः सप्तचक्रं सप्त वहन्त्यश्वाः । सप्त स्वसारो अभि सन्नवन्ते यत्र गवान्निहिता सप्तनाम ॥ ३ ॥ को ददर्श प्रथमञ्जायमानमऽस्थन्वन्तं यदऽनस्था बिभर्ति । भूम्या असुरऽसृगात्मा क्वस्वित्को विद्वाँसमुपगात्प्रष्टुमेतत् ॥ ४ ॥ पाकः पृच्छामि मनसाऽविजानन्देवानामेना निहिता पदानि । वत्से बष्कयेऽधि सप्ततन्तून्वितत्निरे कवय ओतवा उ ॥ ५ ॥ "वर्ग १" अचिकित्वाश्चिकितुषश्चिदऽत्र कवीन्पृच्छामि विद्मनेन विद्वान् । वि यस्तस्तम्भ षडिमा रजाँस्यजस्य रूपे किमपि स्विदेकम् ॥ ६ ॥ इह ब्रवीतु य ईमङ्ग वेदाऽस्यवामस्य निहितं पदं वेः । शीर्ष्णः क्षीरं दुह्रते गावो अस्य

वर्म्रि वसाना उदकं पदापुः ॥ ७ ॥ माता पितरमृत आबभाज धीत्यग्रे मनसा सं हि जग्मे । सा बीभत्सुर्गर्भरसा निविद्धा नमस्वन्त इदुपवाकमीयुः ॥ ८ ॥ युक्ता माताऽसीद्धुरि दक्षिणाया अतिष्ठद्गर्भो वृजनीष्वऽन्तः । अमीमेद्वत्सो अनु गामऽपश्यद्विश्वरूप्यं त्रिषु योजनेषु ॥ ९ ॥ तिस्रो मातॄस्त्रीन्पितॄन्बिभ्रदेक ऊर्ध्वस्तस्थौ नेमऽवग्लापयन्ति । मन्त्रयन्ते दिवो अमुष्य पृष्ठे विश्वविदं वाचमऽविश्वमिन्वाम् ॥ १० ॥ "व० २" द्वादशारम्न हि तज्जराय वर्वर्ति चक्रं परि द्यामृतस्य । आ पुत्रा अग्ने मिथुनासो अत्र सप्तशतानि विंशतिश्च तस्थुः ॥ ११ ॥ पञ्चपादं पितरं द्वादशाकृतिन्दिव आहुः परे अर्धे पुरीषिणम् । अथेमे अन्य उपरि विचक्षणं सप्तचक्रे षडर आहुरर्पितम् ॥ १२ ॥ पञ्चारे चक्रे परिवर्तमाने तस्मिन्ना, तस्थुर्भुवनानि विश्वा । तस्य नाऽक्षस्तप्यते भूरिभारः सनादेव न शीर्यते सनाभिः ॥ १३ ॥ सनेमि चक्रमजरं वि वावृत उत्तानायां दश युक्ता वहन्ति । सूर्यस्य चक्षूरजसैत्वाऽवृतं तस्मिन्नार्पिता भुवनानि विश्वा ॥ १४ ॥ साकञ्जानां सप्तथमाहुरेकजं षडिद्यमा ऋषयो देवजा इति । तेषामिष्टानि विहितानि धामशः स्थात्रे रेजन्ते विकृतानि रूपशः

॥१५॥ "व० ३" स्त्रियः सतीस्ताँ उ मे पुंस आहुःपश्यदक्षण्वान्न वि चेतदन्धः । कविर्यः पुत्रः स ईमा चिकेत यस्ता विजानात्स पितुष्पिताऽसत् ॥ १६ ॥ अवः परेण पर एना वरेण पदा वत्सं बिभ्रती गौरुदस्थात् । सा कद्रीची कंस्विदर्धं परागात्क्वः स्वित्सूते नहि यूथे अन्तः ॥ १७ ॥ अवः परेण पितरं यो अस्यानुवेद पर एना वरेण । कवीयमानः क इह प्रवोचद्देवं मनः कुतो अधि प्रजातम् ॥ १८ ॥ ये अर्वाञ्चस्ताँ उ पराच आहुर्ये पराञ्चस्ताँ उ अर्वाच आहुः । इन्द्रश्च या चक्रथुः सोम तानि धुरा न युक्ता रजसो वहन्ति ॥ १९ ॥ द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते । तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभि चाकशीति ॥ २० ॥ "व० ४" यत्रासुपर्णा अमृतस्य भागमनिमेषं विदथाभिस्वरन्ति । इनो विश्वस्य भुवनस्य गोपाः स मा धीरः पाकमत्राऽऽविवेश ॥ २१ ॥ यस्मिन्वृक्षे मध्वदः सुपर्णा निविशन्ते सुवते चाधि विश्वे । तस्येदाहुः पिप्पलं स्वाद्वग्रे तन्नो नशद्यः पितरं न वेद ॥ २२ ॥ यद्गायत्रे अधि गायत्रमाहितं त्रैष्टुभाद्वा त्रैष्टुभं निरतक्षत । यद्वा जगज्जगत्याहितं पदं य इत्तद्विदुस्ते अमृतत्वमानशुः ॥ २३ ॥

गायत्रेण प्रति मिमीते अर्कमर्केण साम त्रैष्टुभेन वाकम् । वाकेन वाकं द्विपदा चतुष्पदाऽक्षरेण मिमते सप्त वाणीः ॥२४॥ जगता सिन्धुं दिव्यस्तभायद्रथन्तरे सूर्यं पर्यपश्यत् । गायत्रस्य समिधस्तिस्र आहुस्ततो मह्नाप्ररिरिचे महित्वा ॥ २५ ॥ "व० ५" उपह्वये सुदुघां धेनुमेतां सुहस्तो गोधुगुत दोहदेनाम् । श्रेष्ठं सवं सविता साविषन्नोऽभीद्धो घर्मस्तदुषु प्रवोचम् ॥ २६ ॥ हिंकृण्वती वसुपत्नी वसूनां वत्समिच्छन्ती मनसाऽभ्यागात् । दुहामश्विभ्यां पयो अघ्न्येयं सा वर्धतां महते सौभगाय ॥ २७ ॥ गौरमीमेदऽनु वत्सं मिषन्तं मूर्धानं हिङ्ङकृणोन्मातवा उ । सृक्वाणङ्घर्ममऽभि वावशाना मिमाति मायुं पयते पयोभिः ॥ २८ ॥ अयं स शिङ्क्ते येन गौरभीवृता मिमाति मायुं ध्वसनावऽधिश्रिता । सा चित्तिभिर्निहि चकार मर्त्यं विद्युद्भवन्ती प्रति वव्रिमौहत ॥ २९ ॥ अनच्छये तुरगातु जीवमेजद्ध्रुवं मध्य आ पस्त्यानाम् । जीवो मृतस्य चरति स्वधाभिरऽमर्त्यो मर्त्येनासयोनिः ॥ ३० ॥ "व० ६" अपश्यङ्गोपामऽनिपद्यमानमाऽऽच परा च पथिभिश्चरन्तम् । स सध्रीचीः स विषूचीर्वसान आ वरिवर्ति भुवनेष्वऽन्तः ॥ ३१ ॥ य ईं चकार न सो अस्य वेद

य ईं ददर्श हिरुगिन्नु तस्मात् । स मातुर्योना परिवीतो अन्तर्बहुप्रजा निर्ऋतिमा-
ऽविवेश ॥ ३२ ॥ द्यौर्मे पिता जनिता नाभिरत्र बन्धुर्मे माता पृथिवी महीयम् ।
उत्तानयोश्चम्वोर्योनिरन्तरत्रापिता दुहितुर्गर्भमाधात् ॥ ३३ ॥ पृच्छामि त्वा परमन्तं
पृथिव्याः पृच्छामि यत्र भुवनस्य नाभिः । पृच्छामि त्वा वृष्णो अश्वस्य रेतः पृच्छामि
वाचः परमं व्योम ॥ ३४ ॥ इयं वेदिः परो अन्तः पृथिव्या अयं यज्ञो भुवनस्य
नाभिः । अयं सोमो वृष्णो अश्वस्य रेतो ब्रह्मायं वाचः परमं व्योम ॥ ३५ ॥
"व० ७" सप्तार्धगर्भा भुवनस्य रेतो विष्णोस्तिष्ठन्ति प्रदिशा विधर्मणि । ते धीति-
भिर्मनसा ते विपश्चितः परि भुवः परि भवन्ति विश्वतः ॥ ३६ ॥ न विजानामि
यदि वेदमस्मि निण्यः सन्नद्धो मनसा चरामि । यदा मागन्प्रथमजा ऋतस्यादिद्वाचो
अश्नुवे भागमस्याः ॥ ३७ ॥ अपाङ् प्राङेति स्वधया गृभीतोऽमर्त्यो मर्त्येना स
योनिः । ताः शश्वन्ता विषूचीना वियन्तान्यन्यं चिक्युर्न नि चिक्युरन्यम् ॥३८॥
ऋचो अक्षरे परमे व्योमन्यस्मिन्देवा अधि विश्वे निषेदुः । यस्तन्न वेद किमृचा
करिष्यति य इत्तद्विदुस्त इमे समासते ॥ ३९ ॥ सूयवसाद्भगवती हि भूया अथो

वयं भगवन्तः स्याम । अद्धि तृणमघ्न्ये विश्वदानीं पिब शुद्धमुदकमाचरन्ती ॥४०॥
"व० ८" गौरीर्मिमाय सलिलानि तक्षत्येकपदी द्विपदी सा चतुष्पदी । अष्टापदी
नवपदी बभूवुषी सहस्राक्षरा परमे व्योमन् ॥ ४१ ॥ तस्याः समुद्रा अधि विक्ष-
रन्ति तेन जीवंति प्रदिशश्चतस्रः । ततः क्षरत्यक्षरं तद्विश्वमुप जीवति ॥ ४२ ॥
शकमयं धूममारादऽपश्यं विषूवता पर एना वरेण । उक्षाणं पृश्निमपचन्त वीरा-
स्तानि धर्माणि प्रथमान्यासन् ॥ ४३ ॥ त्रयः केशिन ऋतुथा विचक्षते संवत्सरे
वपत एक एषाम् । विश्वमेको अधि चष्टे शचीभिर्ध्राजिरेकस्य ददृशे न रूपम् ॥४४॥
चत्वारि वाक् परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः । गुहा त्रीणि
निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति ॥ ४५ ॥ इन्द्रं मित्रं वरुणमऽग्नि-
माहुरथो दिव्यः स सुपर्णो गरुत्मान् । एकं सद्विप्रा बहुधा वदन्त्यऽग्निं यमं मात-
रिश्वानमाहुः ॥ ४६ ॥ "व० ९" कृष्णं नियानं हरयः सुपर्णा अपो वसाना दिव-
मुत्पतन्ति । त आववृत्रन्त्सदनादृतस्यादिद्घृतेन पृथिवी व्युद्यते ॥ ४७ ॥ द्वादश
प्रधयश्चक्रमेकं त्रीणि नाभ्यानि क उ तच्चिकेत । तस्मिन्त्साकं त्रिशता न शङ्कवो-

ऽर्पिताः षष्टिर्न चक्रा चलासः ॥ ४८ ॥ यस्ते स्तनः शशयो यो मयोभूर्येन विश्वा पुष्यसि वार्याणि । यो रत्नधा वसुवित्यः सुदत्रः सरस्वति तमिह धातवे कः ॥४९॥ यज्ञेन यज्ञ० ॥ ५० ॥ समानमेतदुदकमुच्चैत्यव चाहभिः । भूमिं पर्जन्या जिन्वन्ति दिवं जिन्वन्त्यग्नयः ॥ ५१ ॥ "ते०" दिव्यं सुपर्णं वायसं बृहन्तमपां गर्भं दर्शतमोषधीनाम् । अभीपतो वृष्टिभिस्तर्पयन्तं सरस्वन्तमवसे जोहवीमि ॥ ५२ ॥ "ऋ० १०" इति अस्यवामास्यदुर्गादेवीसूक्तं प्रथमम् ॥

अथ त्रिपुरादेवीसूक्तं द्वितीयम् २ ॥

ॐ गणेशवटुकस्तुता रतिसहायकामान्विता स्मरारिवरविष्टरा कुसुमबाणबाणैर्युता । अनङ्गकुसुमादिभिः परिवृताच सिद्धैस्त्रिभिः कदम्बवनमध्यगा त्रिपुरसुन्दरी पातु नः ॥ ("कया पञ्चोनः संवादस्तृतीयाद्ययुजो मरुतां वाक्यमन्त्यस्तृच्योऽगस्त्यस्य शिष्टा इन्द्रस्यैकादशी च मरुतां त्विन्द्रो देवता") ॐ कया शुभा सवयसः सनीळाः समान्या मरुतः सं मिमिक्षुः । कया मती कुत एतास एतेऽर्चन्ति शुष्मं वृषणो वसूया ॥१॥ कस्य ब्रह्माणि जुजुषुर्युवानः को अध्वरे मरुत आववर्त । श्येनाँ इव ध्रजतो अन्त-

रिक्षे केन महामनसा रीरमाम ॥ २ ॥ कुतस्त्वमिन्द्र माहिनः सन्नेको यासि
सत्पते किं त इत्था । सं पृच्छसे समराणः शुभानैर्वोचेस्तन्नो हरिवो यत्तेअस्मे
॥ ३ ॥ ब्रह्माणि मे मतयः शं सुतासः शुष्म इयर्ति प्रभृतो मे अद्रिः । आशासते
प्रति हर्यन्त्युक्थेमा हरी वहतस्तानो अच्छ ॥ ४ ॥ अतो वयमऽन्तमेभिर्युजानाः
स्वक्षत्रेभिस्तन्वः शुम्भमानाः । महोभिरेताँ उप युज्महे न्विन्द्र स्वधामनु हि नो
बभूथ ॥ ५ ॥ "व०१" क्व स्या वो मरुतः स्वधासीद्यन्मामेकं समधत्ताहिहत्ये ।
अहं ह्युग्रस्तविषस्तुविष्मान्विश्वस्य शत्रोरनमं वधस्नैः ॥ ६ ॥ भूरि चकर्थ युज्येभिरस्मे
समानेभिर्वृषभ पौंस्येभिः । भूरीणि हि कृणवामा शविष्ठेन्द्र क्रत्वा मरुतो यद्वशाम
॥ ७ ॥ वधीं वृत्रं मरुत इन्द्रियेण स्वेन भामेन तविषो बभूवान् । अहमेता मनवे
विश्वश्चन्द्राः सुगा अपश्चकार वज्रबाहुः ॥ ८ ॥ अनुत्तमा ते मघवन्नकिर्नु न त्वावाँ
अस्ति देवता विदानः । न जायमानो नशते न जातो यानि करिष्या कृणुहि प्रवृद्ध
॥ ९ ॥ एकस्य चिन्मे विभ्वस्त्वोजो या नु दधृष्वान्कृणवै मनीषा । अहं ह्युग्रो मरुतो
विदानो यानि च्यवमिन्द्र इदीश एषाम् ॥ १० ॥ "व०२" अमन्दन्मा मरुतः

स्तोभो अत्र यन्मे नरः श्रुत्यं ब्रह्म चक्र । इन्द्राय वृष्णे सुमखाय मह्यं सख्ये सखायस्तन्वे तनूभिः ॥ ११ ॥ एवेदेते प्रति मा रोचमाना अनेद्यः श्रव एषो दधानाः । सञ्चक्ष्या मरुतश्चन्द्रवर्णा अच्छान्त मे छदयाथा च नूनम् ॥ १२ ॥ कोन्वऽत्र मरुतो मामहे वः प्रयातन सखीँरच्छा सखायः । मन्मानि चित्रा अपि वातयन्त एषां भूत न वेद्याम ऋतानाम् ॥ १३ ॥ आ यद्दुवस्याद्दुवसे न कारुरस्माञ्चक्रे मान्यस्य मेधा । ओ षु वर्त मरुतो विप्रमच्छेमा ब्रह्माणि जरिता वो अर्चत् ॥ १४ ॥ "ते०" एष वः स्तोमो मरुत इयं गीर्मान्दार्यस्य मान्यस्य कारोः । एषा यासीष्ट तन्वे वयां विद्यामेषं वृजिनं जीरदानुम् ॥ १५ ॥ "व० ३" इति त्रिपुरादेवीसूक्तं द्वितीयम् ॥

अथ शारिकादेवीसूक्तं तृतीयम् ॥ ३ ॥

ॐबीजैः सप्तभिरुज्ज्वलाकृतिरसौ या सप्तसप्तिद्युतिः सप्तर्षिप्रणताङ्घ्रिपङ्कजयुगा या सप्तलोकार्तिहृत् । कश्मीरप्रवरेशमध्यनगरे प्रद्युम्नपीठे स्थिता देवीसप्तकसंयुता भगवती श्रीशारिका पातु नः ॥ ("ॐअहमष्टौ वागम्भिनी तुष्टावाऽत्मानं त्रिष्टुप् द्वितीया जगती") अहं रुद्रेभिर्वसुभिश्चराम्यऽहमादित्यैरुत विश्वदेवैः । अहं मित्रावरुणोभा

बिभर्म्यऽहमिन्द्राग्नी अहमऽश्विनोभा ॥ १ ॥ अहं सोममाहनसं बिभर्म्यऽहं त्वष्टा-
रमुत पूषणं भगम् । अहं दधामि द्रविणं हविष्मते सुप्राव्ये यजमानाय सुन्वते
॥ २ ॥ अहं राष्ट्री सङ्गमनी वसूनां चिकितुषी प्रथमा यज्ञियानाम् । तां मा देवा
व्यदधुः पुरुत्रा भूरिस्थात्रां भूर्यावेशयन्तीम् ॥ ३ ॥ मया सो अन्नमत्ति यो विप-
श्यति यः प्राणिति य ईं शृणोत्युक्तम् । अमन्तवो मां त उप क्षियन्ति श्रुधि श्रुत
श्रद्धिवं ते वदामि ॥ ४ ॥ अहमेव स्वयमिदं वदामि जुष्टं देवेभिरुत मानुषेभिः ।
यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधाम् ॥ ५ ॥ अहं रुद्राय
धनुरातनोमि ब्रह्मद्विषे शरवे हन्तवा उ । अहं जनाय समदं कृणोम्यऽहं द्यावापृ-
थिवी आविवेश ॥६॥ अहं सुवे पितरमस्य मूर्धन्मम योनिरप्स्वऽन्तः समुद्रे । ततो
वि तिष्ठे भुवना नु विश्वोतामूं द्यां वर्ष्मणोप स्पृशामि ॥ ७ ॥ "ते०" अहमेव वात
इव प्रवाम्यारभमाणा भुवनानि विश्वा । परो दिवा पर एना पृथिव्यै तावती महिना
सम्बभूव ॥ ८ ॥ "इति शारिकादेवीसूक्तं तृतीयम् ॥

अथ रात्रीदेवीसूक्तं चतुर्थम् ।

ॐ उद्यद्दिवाकरसहस्रसहस्ररुचिं त्रिनेत्रां पद्मासनोपरिगतामुरगोपवीताम् । खड्गाम्बुजाभयकलशामृतपात्रहस्तां रात्रीं भजामि विकसद्वदनारविन्दाम् ॥ "इंद्रं मित्रं सप्त त्रिष्टुबन्तम् ।" ॐ इन्द्रं मित्रं वरुणमग्निमूतये मारुतं शर्धो अदितिं हवामहे । रथं न दुर्गाद्वसवः सदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन ॥ १ ॥ त आदित्या आगता सर्वतातये भूत देवा वृत्रतूर्येषु शम्भुवः । रथं न० ॥ २ ॥ अवन्तु नः पितरः सुप्रवाचना उत देवी देवपुत्रे ऋतावृधा । रथं न० ॥ ३ ॥ नराशंसं वाजिनं वाजयन्निह क्षयद्वीरं पूषणं सुम्नैरीमहे । रथं न० ॥ ४ ॥ बृहस्पते सदमिन्नः सुगं कृधि शं योर्यत्ते मनुर्हितं तदीमहे । रथं न० ॥ ५ ॥ इन्द्रं कुत्सो वृत्रहणं शचीपतिं काटे निबाळ्ह ऋषिरह्वदूतये । रथं न० ॥ ६ ॥ "ते०" देवैर्नो देव्यदितिर्नि पातु देवस्त्राता त्रायतामप्रयुच्छन् । तन्नो मित्रो वरुणो मामहन्तामदितिः सिंधुः पृथिवी उत द्यौः ॥ ७ ॥ "इति रात्रीदेवीसूक्तं चतुर्थम् ॥

अथ ज्वालादेवीसूक्तं पञ्चमम् ।

ॐ ज्वालापर्वतसंस्थितां त्रिनयनां पीठत्रयान्तःस्थितां ज्वालाडम्बरभूषितां सुवदनां नित्यंवदश्यां जनैः । षट्चक्राम्बुजमध्यगां वरगदाम्भोजाभयान्बिभ्रतीं चिद्रूपां सकलार्थदीपनकरीं ज्वालामुखीं नौम्यहम् ॥ "इदमपि च० ॐतामग्निवर्णां सौभरिर्दुर्गा त्रिष्टुप्" ॐतामऽग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टाम् । दुर्गां देवीं शरणमऽहं प्रपद्ये सुतरसितरसे नमः ॥१॥ अग्ने त्वं पारयानव्यो अस्मान्स्वस्तिभिरति दुर्गाणि विश्वा । पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शं योः ॥ २ ॥ विश्वानि नो दुर्गहा जातवेदः सिन्धुं न नावा दुरितातिपर्षि । अग्ने अत्रिवन्नमसा गृणानोऽस्माकं बोध्यविता तनूनाम् ॥ ३ ॥ पृतनाजितं सहमानमुग्रमऽग्निँ हुवेम परमात्सधस्थात् । स नः पर्षदऽतिदुर्गाणि विश्वा क्षामाद्देवो अति दुरितात्यग्निः ॥ ४ ॥ प्रत्नो हि कमीड्यो अध्वरेषु सनाच्च होता नव्यश्च सत्सि । स्वां चाग्ने तन्वं पिप्रयस्वास्मभ्यं च सौभगमा यजस्व ॥ ५ ॥ "यजुः" अग्न आयूंष्यग्ने पवस्वाग्ने पावक रोचिषा, स नः पावक दीदिवोऽग्ने देवाँ इहावह, उपयज्ञं

हविश्चनः, अग्निः शुचिव्रततम उदग्ने शुचयस्तव, सुत्रामणं महीमूषु, तँहि शश्वन्त ईडते श्रुचा देवँ घृतश्चुता, अग्निँहव्याय वोहवे, अग्निं दूतं पुरो दधे, स हव्यवाडमर्त्य, उशिग्दूतश्च नो हितः, अग्निर्धिया समृण्वति, अग्निँ स्तोमेन बोधय, समिधानो अमर्त्यम्, हव्या देवेषु नो दधत्, प्रेद्धो अग्न इमो अग्ने, पीपिवांसं सरस्वतः स्तनं यो विश्वदर्शतः, धुक्षीमहि प्रजामिषं, ये ते सरस्वन्नूर्मयो, मधुमन्तो घृतश्चुतः, तेभिर्नोऽविता भव, दिव्यं सुपर्णं वायसं बृहन्तमऽपाँ पतिं वृषभमोषधीनाम् । अभीपतो वृष्टिभिस्तर्पयन्तं सरस्वन्तमवसे जोहवीमि, यस्य व्रतमुपतिष्ठन्त आपो यस्य व्रते पशवो यन्ति सर्वे । यस्य व्रते पुष्टिपतिर्निविष्टस्तं सरस्वन्तमऽवसे जोहवीमि ॥ "मयोभूर्वातो इत्यादि गयस्य त्रितस्य काक्षीवतः शम्बरो गौस्त्रिष्टुप् ॥" मयोभूर्वातो अभि वातूस्रा ऊर्जस्वतीरोषधीराविशन्ताम् । पीवस्वतीर्जीवधन्याः पिबन्त्व, वसाय पद्वते रुद्र नो मृड ॥ १ ॥ याः सरूपा विरूपा एकरूपा यासामऽग्निरिष्ट्या नामानि वेद । या अङ्गिरसस्तपसेह चक्रुस्ताभ्यः पर्जन्य महि शर्म यच्छ ॥२॥ या देवीषु तन्वमैरयन्त यासां सोमो विश्वा रूपाणि वेद । ता अस्मभ्यं पयसा

पिन्वमानाः प्रजावतीरिन्द्र गोष्ठे रिरीहि ॥ ३ ॥ प्रजापतिर्मह्यमेता रराणो विश्वैर्देवैः पितृभिः संविदानः। बह्वीर्भवन्तीरुप नो गोष्ठमागुस्तासां वयं प्रजया सँसदेम "य०" इह धृतिः स्वाहेह विधृतिः स्वाहेह रन्तिः स्वाहेह रमतिः स्वाहा महीमूषु सुत्रामाणम्, "कास्विदेकाकीत्यादि दीर्घतमस आङ्गिरसस्यात्रेयस्य" कास्विदेकाकी चरति क उ स्विज्जायते पुनः। किं स्विद्धिमस्य भेषजं किं स्विदावपनं महत् ॥१॥ सूर्य एकाकी चरति चन्द्रमा जायते पुनः। अग्निर्हिमस्य भेषजं भूमिरावपनं महत् ॥२॥ का स्विदासीत्पूर्वचित्तिः किं स्विदासीद्बृहद्वयः। का स्विदासीत्पिलिप्पिला कास्विदासीत्पिशङ्गिला ॥३॥ द्यौरासीत्पूर्वचित्तिरश्व आसीद्बृहद्वयः। अविरासीत्पिलिप्पिला रात्रिरासीत्पिशङ्गिला ॥ ४ ॥ पृच्छामि त्वा परमन्तं पृथिव्याः पृच्छामि यत्र भुवनस्य नाभिः। पृच्छामि त्वावृष्णो अश्वस्य रेतः पृच्छामि वाचः परमं व्योम ॥ ५ ॥ वेदिमाहुः परमन्तं पृथिव्या यज्ञमाहुर्भुवनस्य नाभिम्। सोममाहुर्वृष्णो अश्वस्य रेतो ब्रह्मैव वाचः परमं व्योम ॥ ६ ॥ अम्बे अम्बालीति वृषातकिः "य०" अम्बे अम्बाल्यम्बिके न मानयति कश्चन ससस्त्यश्वकः ॥ १ ॥ सुभगे काम्पीलवासिनि, स्वर्गे लोके संप्रोर्णुवाथा

माहमजामि गर्भध, मात्वमजामि गर्भधं, तौ सह चतुरः पादाः, संप्रसारयवहै; वृषा वां रेतोधा, रेतो दधातूत्सक्थ्यो, र्गृदं धेह्यञ्जि,मुदञ्जिमन्वज, यः स्त्रीणां जीवभोजनो, य आसां बिलधावनः, प्रियः स्त्रीणामऽपीच्यो य आसां कृष्णे लक्ष्माणि, सन्धिगृर्धि परावधीत्, अम्बे० ॥ २ ॥ ऊर्ध्वामेनामुच्छ्रयता, द्वेणुभारं गिराइव, अथास्या मध्यमेधतां शीते वाते पुनन्निव, अम्बे अ० ॥ ३ ॥ यद्धरिणी यवमऽत्ति,न पुष्टं पशु मन्यते, शूद्रा यदर्यजारा,न पोषाय धनायति, अम्बे० ॥ ४ ॥ इयं यका शकुन्ती,काहलमिति वञ्चति, आहतं गभे पसो,निजल्गालुति धानिका, अम्बे० ॥ ५ ॥ माता च ते पिता च ते,ऽग्रं वृक्षस्य रोहतः, प्रसुलामिति ते पिता; गभे पुष्टिमतँ स यत् ॥ ६ ॥ दधि क्राव्णो अकारिषं० ॥ ६ ॥ आपो हि ष्ठा मयो भुवस्ता० ॥ यद्वाग्वदन्त्यविचेतनानि राष्ट्री देवानां निषसाद मन्द्रा । चतस्र ऊर्जं दुदुहे पयांसि क्व स्विदस्याः परमं जगाम ॥ १ ॥ देवीं वाचमऽजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति । सा नो मन्द्रेषमूर्जं दुहाना धेनुर्वागस्मानुप सुष्टुतैतु ॥ २ ॥ प्रणो देवी सरस्वती वाजेभिर्वाजिनीवती । धीनामवित्र्यवतु ॥ ३ ॥

ॐ गायत्र्यै नमः ॐ भुर्भुवःस्व० ३ ॥ ४ ॥ "ते०" जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः । स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः ॥ ५ ॥ माया कुण्डलिनी० अनेन मन्त्रपाठेन० श्रीदेवीप्रीत्यर्थं भगवती अमा० ८ सहस्रनाम्नी सपरिवारा प्रीयतां प्रीता मेऽस्तु ॥ "इति देवीपञ्चकं ॥"

अथ रक्षोघ्नमन्त्राख्यं महौषधिसूक्तम् ॥

"ॐ या ओषधय इत्यनुवाको भिषगस्याथर्वणस्य ॥" या ओषधयः प्रथमजा देवेभ्यस्त्रियुगं पुरा । मनै नु बभ्रूणामहं शतं धामानि सप्त च ॥ १ ॥ शतं वो अम्ब धामानि सहस्रमुत वो रुहः । अधा शतक्रतवो यूयमिमं मे अगदं कृत ॥ २ ॥ पुष्पवतीः प्रसूमतीः फलिनीरफला उत । अश्वा इव सजित्वरीर्वीरुधः पारयिष्णवः ॥ ३ ॥ ओषधीरिति मातरस्तद्वो देवीरुपब्रुवे । अपांसि विघ्नतीरिव रक्षश्च तयमाना ॥ ४ ॥ अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता । गोभाज इत्किलासथ यत्सनवथ पूरुषः ॥ ५ ॥ अश्वावतीं सोमवतीमूर्जयन्तीमुदोजसम् । आवित्सि सर्वा ओषधीरस्मा अरिष्टतातये ॥६॥ यदोषधयः समग्मत राजानः समिता इव । विप्रः स उच्यते

भिषग्रक्षोहामीवचातनः ॥ ७ ॥ उच्छुष्मा ओषधीनां गावो गोष्ठादिवेरते । धनं सनिष्यन्तीनामात्मानं तव पूरुषः ॥ ८ ॥ अति विश्वाः प्रतिष्ठाःस्तेन इव व्रजम-क्रमुः । ओषधयः प्रचुच्यवुर्यत्किञ्चित्तन्वोरपः ॥ ९ ॥ यास्त आतस्थुरात्मानमा-विविशुःपरुष्परुः । तास्ते यक्ष्मं विबाधन्तामुग्रो मध्यमशीरिव ॥ १० ॥ यदहं वाज-यन्निमा ओषधीर्हस्त आदधे । आत्मा यक्ष्मस्य नश्यति पुरा जीवगृभो यथा ॥ ११ ॥ निष्कृतिर्नाम वोमाता थो त्वमसि निष्कृतिः । सराः पतत्रिणीः स्था यदामयति निष्कृत ॥१२॥ साकं यक्ष्म प्रपत चाषेण किकिदीविना । साकं वातस्य ध्राज्या साकं नश्यनिहाकया ॥ १३ ॥ अन्यावो अन्याभवत्वन्यान्यस्या उपावत । ताः सर्वाः संविदाना इदं मे प्रावता वचः ॥१४॥ अवपतन्तीरवदन्दिवन्तेभ्यस्परिपरि । यञ्जी-वमश्नवामहै न सरिष्याति पूरुषः ॥ १५॥ याः फलिनीर्या अफला अकोशाः कोशि-नीश्च याः । बृहस्पतिप्रसूतास्तानो मुञ्चन्त्वंहसः ॥ १६ ॥ याश्चेदमुपशृण्वन्ति याश्च दूरं परागताः । बृहस्पतिप्र० ॥ १८ ॥ याः सोमराज्ञी वरुणस्य राज्ञो यासां विश्वे-देवा अधिपतयश्च सर्वे । या अन्तरिक्षे दिवि याः पृथिव्यां ता नः स्तुता ओषधीः

पारयन्तु ॥ १८ ॥ ॐ सहस्रधा रेवतीसमस्वरन्देवो नाके मधुजिह्वा असश्चतः । तस्य स्पृशो न निमिषन्ति तूर्णयः पदे पदे पशवः सन्ति सेतवः ॥ १९ ॥ मलिम्लुचो नामासि त्रयोदश मासाः । इन्द्रस्य शर्मासीन्द्रस्य वर्मासि इन्द्रस्य वरूथमसि ॥ २० ॥ तन्त्वा प्रपद्ये सगुः साश्वः सपूरुषः सह यन्मे स्थितेन । स मे शर्म च वर्म च भवा गायत्री लोमभिः प्रविशामि ॥ २१ ॥ त्रैष्टुभं त्वचा प्रविशामि जगती मांसेन प्रविशामि । अनुष्टुभमस्था प्रविशामि पाङ्क्तिं मज्जा प्रविशामि ॥२२॥ ऐन्द्राग्नं वर्म बहुलं यदुग्रं विश्वेदेवा नातिविध्यन्ति शूराः । तन्नस्त्रायतां तन्वः सर्वतो महदायुष्मन्तो जरामुपगच्छेम जीवाः ॥ २३ ॥ ("अनेन मन्त्र० आत्मनो० अमुकराश्या ग्रहपीडानिवारणार्थं दिव्यन्तरिक्षभौमोपद्रवनिवारणार्थं महौषधिगणा रक्षोघ्नमन्त्राः प्रीयन्तां प्रीताः सन्तु ॥ इति महौषधिसूक्तम् ॥"

अथ उदकलशम् ॥

(उदकलशमुपनिधाय स्वस्त्ययनं वाचयति), उत्तिष्ठ ब्रह्मणस्पते! देवयन्तस्त्वेमहि उपप्रयन्तु मारुतः, सदानव इन्द्र प्राशूर्भवासचा, अर्यमा यातु वृषभस्तुविष्मान्,

यन्ता वसूनि विधत्ते तनूपाः सहस्राक्षो गोत्रभिद्वज्रबाहुः, अस्मासु देवो द्रविणं ददातु, येते अर्यमन्बहवो देवयानाः पन्थानो राजन्! दिव आचरन्ति, तेभिर्नो अद्य पथिभिः सुगेभी रक्षा च नो अधि च ब्रूहि देव! (राष्ट्रभृतान्देवानामार्षम्) बोधश्च मा प्रतिबोधश्च पुरस्ताद्गोपायतामऽस्वप्नश्च मानवद्राणश्च दक्षिणतो गोपायतां, गोपायमानश्च मा रक्षमाणश्च पश्चाद्गोपायतां जागृविश्च मारुन्धती चोत्तराद्गोपायतां, अनमित्रन्नो अधरागऽनमित्रमुदक्कृधि, इन्द्रानमित्रन्न पश्चादऽनमित्रं पुरस्कृधि, अनमित्रैरहोभिः सचेमहि विश्वेदेवा अनमित्रा न उषसः सन्तु मित्रुषः, याः षडुर्वीः पञ्च प्रदिशस्ता नः पान्तु मित्रधानो मित्रे दधाता अभयं नो अस्तु, ये रात्रीमऽनुतिष्ठथ ये च भूतेषु जागृथ पशून्ये सर्वान्रक्षथ तेन आत्मसु जागृत, बोधप्रतीबोधा स्वप्नानवद्राण गोपायमान रक्षमाण जागृवेऽरुन्धतीति, ये देवास्तनूपाः स्थ ते म इह तन्वं पात बोधप्रतीबोधेत्यसौ वा आदित्यो बोधोऽग्निः, प्रतीबोधो स्वप्नानवद्राणेति चन्द्रमा वा अस्वप्नोऽयं यः पवते सो नवद्राणो गोपायमान रक्षमाणेत्यहर्वै गोपायमानो रात्री रक्षमाणो जागृव्य, रुन्धतीति यज्ञो वै जागृविर्द-

१ आज्य.

क्षिणा रुन्धत्येते वै देवा राष्ट्रभृतास्तानेवेष्टे आत्मने गोपीथाय ॥ मन्त्रार्थाः सफलाः सन्तु पूर्णाः सन्तु मनोरथाः । शत्रूणां बुद्धिनाशोऽस्तु मित्राणामुदयस्तव । मार्कण्डेयमुनेः स्वर्गवैद्ययोः स्वर्पतेस्तथा । आयुरारोग्यमैश्वर्यमेतत्त्रितयमस्तु ते । जीव त्वं शरदः शतम् 'इति उदकलशस्वस्त्ययनम् ॥

ॐ अथ कूष्माण्डार्षम् ।

ब्रह्मा स्वयम्भूर्लिङ्गोक्ता देवताः समिधादानं पाप्मापहं च । यद्देवा देवहेळनमिति त्यष्टौ आद्याश्चतस्रोऽनुष्टुभः, पञ्चम्यष्टम्यौ त्रिष्टुभौ, षट्सप्तम्यौ जगत्यौ ॥ यददीव्यमिति सप्तोनाष्टौ त्रिष्टुप् महान्त्या प्रस्तारपङ्क्तिः, षष्ठी गायत्री, दशम्यनुष्टुबुपान्त्या त्र्युष्णिक् ॥ आयुस्ते विश्वतो दधदिति सप्तोनाद्या द्विपदा सप्तम्यस्त्रिष्टुप् तृतीयाऽन्त्यास्तिस्रो गायत्रं पञ्चाष्टम्याद्यानुष्टुप् शक्वर्यन्तम् । सौत्रामण्या निचाक्रणस्य । यद्देवा देवहेळनमिति तिसृभिरनुष्टुप् भद्रं कर्णेभिरिति चतसृभिः शिशुशैशवयोः, आद्यान्ते त्रिष्टुप् द्वितीया विराट् तृतीया जगती । शेषः कोकिलस्य राजपुत्रस्य राज्येप्सोः । पुनन्तु मा पितर इति नवभिः चतुर्थ्याद्या द्वेऽनुष्टुभौ, त्रिष्टुबन्त्या वैश्वदेवी, शेषं गायत्रं,

तृतीया पञ्चम्याद्याश्चतस्रो गायत्र्यं । ब्रह्मणो यच्चानिरुक्तम् । पुनर्मामैत्विन्द्रियमिति तिसृभिरनुष्टुबष्टरूपा प्रस्तारपङ्क्तिः । अपांयो द्रवण इति चतस्रः प्रजापतेस्त्रिष्टुप् । हिरण्यवर्णा इति तिसृभिः कश्यपस्य त्रिष्टुप् जगत्यस्य, अग्ने त्वं पारयेति त्रयोदश स्वयम्भूर्ब्रह्मा लिङ्गोक्ताद्यास्तिस्रः षष्ठ्यादि तिस्रस्त्रिष्टुबेकादशी च चतुर्थ्यादि द्वावनुष्टुब्नवमी जगती पङ्क्तिर्द्विशकर्यन्तम् ॥ अथ कूष्माण्डैर्जुहुयाद्योऽपूत इव मन्येत यथा वै भ्रूणहैव सैष भवति योऽयोनौ रेतः सिञ्चति यदर्वाचीनमेनो भ्रूणहत्यायास्तस्मान्मुच्येयमित्यऽयोनौ रेतः सिक्त्वा स्वप्नादन्यत्र भ्रूणहत्या ब्रह्महत्या यो वा पवित्रकामः पौर्णमास्याममावस्यायां वा केशश्मश्रुलोमनखानि वापयित्वा शुक्लपक्षस्य पुण्याहे पर्वणि रोहिण्यां वा स्नातः शुचिः शुचिवासाः कृष्णाजिनवासा वा ब्रह्मचारिकल्पेन व्रतमुपैति, संवत्सरं मासं चतुर्विंशति द्वादश षट् तिस्रो वा रात्रीः न मांसमश्नीयात्, न स्त्रियमुपेयात्, नोपरि शयीत, जुगुप्सेतानृतात्, पयो भक्षयति इति प्रधानकल्पः । यावकमुपभुञ्जीत कृच्छ्रं द्वादशरात्रं वाचरेत्, यवागूं राजन्यस्यामिक्षां वैश्यस्य सौम्येऽप्यध्वर इत्येतद्व्रतं ब्रूयात् यदि मन्येतोपदास्यामीत्येवमोदनं धाना-

सक्तून् घृतमित्यनुव्रतयेदात्मनोऽनुपदासायेति पूर्वाह्णेऽग्निमुपसमाधाय चरुं श्रपयित्वाऽग्नेयाद्याः षड्देवताः कलशेऽभ्यर्च्य निर्वपेत्, आज्यभागान्तं हुत्वाऽथ स्रुवेणाज्यस्य जुहोति, यद्देवा देवहेळनं, यददीव्यनृणमहं, आयुस्ते विश्वतो दधदित्येतैः सूक्तैः प्रत्यृचमाज्यं जुहुयात् । यद्देवा देवहेळनमिति तिसृभिः, भद्रं कर्णेभिरिति चतसृभिः, पुनन्तु मा पितर इति नवभिः, पुनर्मामैत्विन्द्रियमिति तिसृभिः, रथे अक्षेष्विति चतसृभिः, हिरण्यवर्णा इति तिसृभिः प्रतिमंत्रमाज्यस्य हुत्वा अथ व्रतहोमान् जुहोति । अग्नये, वायवे, सूर्याय, ब्रह्मणे, प्रजापतये, कूष्मर्षिभ्यः इति व्रतहोमः । अग्ने त्वं पारयेति स्विष्टकृतं । वैश्वानर्येणेतिसूक्तेन प्राङ्मुखः प्राञ्जलिरुपतिष्ठते जपेत्सूक्तानि पराञ्चि यानि वैश्वानरीयं च । एवमोदनमासाद्याग्न्याधेये दशहोता दर्शपौर्णमासयोश्चतुर्होता चातुर्मास्येषु पञ्चहोता पशुयज्ञे षड्ढोता सोमे सप्तहोतेति ह विज्ञायते कर्मादिष्वेतैर्जुहुयात्पूतो देवलोकं समश्नुत इत्येतदित्येतत् ॥ महापापापनुत्यर्थं कूष्माण्डानि जपेद्द्विजः । कृतव्रतः पौर्णमास्यां दर्शे वा प्रातरेवच ॥ १ ॥ पयो यवागूरामिक्षा द्विजादीनां व्रतं क्रमात् । नवां स्थालीं समाहृत्य तस्यां पायसमाश्रपेत् ॥ २ ॥ देवतास्तेन

यष्टव्या ऋचो होम्या जपेत च । कूष्माण्डानि जपेन्नित्यं जुहुयाद्दर्शपूर्णयोः ॥ ३ ॥ पापी पापाद्विनिर्मुक्तः शुद्धात्मा स्वर्गमाप्नुयात् । प्रायश्चित्तानि हुत्वाथ द्विजाञ्छक्त्या प्रपूजयेत् ॥ ४ ॥ इति सफलं कूष्माण्डार्षम् ॥

ॐ अथ कूष्माण्डमन्त्रम् ॥

कूष्मा नाम मुनीश्वरास्त्रिभुवने ख्याताः सुरूपाः शुभा, अण्डानामसृतेश्वरा विचरतां मध्ये स्वहंसात्मकाः । तेपि यत्पठनात्परात्परतरां श्रेष्ठां गतिमास्थिताः, सोयं नो विदधातु सौख्यनिचयं पापारिनाशं सदा ॥ १ ॥ यत्पाठात्प्रलयं प्रयान्ति शतशः पापारिसंघाः क्षणाद्धोमात्तर्पणसञ्चयात्सुमहतामभ्यासनात्सद्वरात् । सोयं ब्रह्ममुखोद्गतः परतरो मन्त्रादिगर्भो महान्कूष्माण्डो विदधातु सौख्यनिचयमग्रेः पुरः संस्थितिम् ॥ २ ॥ (कूष्माण्डानि कूष्माणां शकुनीनामण्डस्थानाम्) यद्देवा देवहेळनं यद्वाचानृतमूदिम । आदित्यास्तस्मान्मुञ्चतर्तस्यर्तेन मामुत ॥ १ ॥ देवा जीवनकाम्या यद्वाचानृतमूदिम । तस्मान्न इह मुञ्चत विश्वेदेवाः सजोषसः ॥ २ ॥ ऋतेन द्यावापृथिवी ऋतेन त्वं सरस्वति । कृतान्नः पाह्येनसो यत्किञ्चानृतमूदिम ॥३॥

इन्द्राग्नी मित्रावरुणौ सोमो धाता बृहस्पतिः । ते नो मुञ्चन्त्वेनसो यत्किञ्चानृतमूदिम ॥ ४ ॥ सजातशंसादुत जामिशंसाज्ज्यायसः शंसादुत वा कनीयसः । अनाधृष्टं देवकृतं यदेनस्तस्मात्त्वमस्माज्जातवेदो मुमुग्धि ॥ ५ ॥ यदन्तरिक्षं पृथिवीमुतद्यां यत्पितरं मातरं वा जिहिंसिम । अग्निर्नस्तस्मादेनसो गार्हपत्यः प्रमुञ्चतु चकृम यानि दुष्कृता ॥ ६ ॥ येन त्रितो अर्णवान्निर्बभूव येन सूर्यस्तमसो निर्मुमोच । येनेन्द्रो विश्वा अजहादरातींस्तेनाहं ज्योतिषां ज्योतिरानशान आक्षि ॥७॥ यत्कुसीदमऽप्रतीतं मयीह येन यमस्य मिथुनाचरामि । एतत्तदग्ने अनृणो भवामि जीवन्नेव प्रति तत्ते दधामि ॥८॥ यददीव्यन्नृणमहं बभूवा दित्सन्वा सञ्जगर जनेभ्यः । अग्निर्मा तस्मादिन्द्रश्च संविदानौ प्रमुञ्चताम् ॥ ९ ॥ यद्धस्ताभ्यां चकर किल्बिषाण्यक्षाणां वग्नुमुपजिघ्रमाणः । उग्रंपश्या च राष्ट्रभृच्च तान्यप्सरस अनुदत्तामृणानि ॥ १० ॥ उग्रंपश्ये राष्ट्रभृत्किल्बिषाणि यदक्षवृत्तमनुदत्तमेतत् । नेन्न ऋणादृणवाँ इच्छमानो यमस्य लोके अधिरज्जुरायत् ॥ ११ ॥ अव ते हेळो वरुण नमोभिरव यज्ञेभिरीमहे हविर्भिः । क्षयन्नस्मभ्यमसुर प्रचेता राजन्नेनांसि शिश्रथः कृतानि

॥ १२ ॥ उदुत्तमं वरुण पाशमस्मदवाधमं विमध्यमं श्रथाय । अथा वयमादित्य व्रते तवानागसो अदितये स्याम ॥ १३ ॥ इमं मे वरुण श्रुधी हवमद्या च मृळय । त्वामवस्युराचके ॥ १४ ॥ तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः । अहेळमानो वरुणेह बोध्युरुशँस मा न आयुः प्रमोषीः ॥ १५ ॥ त्वं नो अग्ने वरुणस्य विद्वान्देवस्य हेळोऽव यासिसीष्ठाः । यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषाँसि प्रमुमुग्ध्यस्मत् ॥ १६ ॥ स त्वं नो अग्नेऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ । अव यक्ष्व नो वरुणँ रराणो वीहि मृळीकँ सुहवो न एधि ॥ १७ ॥ सङ्कुसुको विकसुको निर्ऋथो यश्च निःस्वरः । तेऽस्मद्यक्ष्ममनागसो दूराद्दूरमचीचतन् ॥ १८ ॥ निर्यक्ष्ममचीचतन्कृत्यां निर्ऋतिं च । तेनान्योऽस्मत्समृच्छतां तमस्मै प्रसुवामसि ॥ १९ ॥ दुःशंसानुशंसाभ्यां घनेनानुघनेन च । तेन योऽन्योऽस्मत्समृच्छतां तमस्मै प्रसुवामसि ॥ २० ॥ संवर्चसा पयसा सन्तनूभिरगन्महि मनसा संशिवेन । त्वष्टा सुदत्रो विदधातु रायो नोऽनु मार्ष्टु तन्वो यद्विलिष्टम् ॥ २१ ॥ आयुस्ते विश्वतो दधदयमग्निर्वरेण्यः । पुनस्ते प्राण आयातु परा

यक्ष्मँ सुवामि ते ॥२२॥ इममग्न आयुषे वर्चसे कृधि तिग्ममोजो वरुण संशिशाधि । मातेवास्मा अदिते शर्म यच्छ विश्वे देवा जरदष्टिर्यथासत् ॥ २३ ॥ अग्न आयूँषि पवस आसुवोर्जमिषं च नः । आरे बाधस्व दुच्छुनाम् ॥ २४ ॥ अग्निर्ऋषिः पवमानः पांचजन्यः पुरोहितः । तमीमहे महागयम् ॥ २५ ॥ अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यम् । दधद्रयिं मयि पोषम् ॥ २६ ॥ अग्ने जातान्प्रणुदानः सपत्नान्प्रत्यजाताञ्जातवेदोनुदस्व । अधि नो ब्रूहि सुमना अहेळञ्शर्म ते स्याम त्रिवरूथ उद्भौ ॥ २७ ॥ सहसा जातान्प्रणुदानः सपत्नान्प्रत्यजाताजातवेदो नुदस्व । अधिनो ब्रूहि सुमनस्यमानो वयं स्याम प्रणुदा नः सपत्नान् ॥ २८ ॥ अग्ने ये नोऽभितो वृको जनो वारो जिघांसति । तं त्वं वृत्रहअहि वस्वस्मभ्यमाकृधि ॥ २९ ॥ अग्ने योनोऽभिदासति समानो यश्च नेष्ट्यः । तं वयं समिधं कृत्वा तुभ्यमऽग्ने पिदध्मसि ॥ ३० ॥ यो नः शपादऽशपतो यश्च नः शपतः शपात् । इध्मस्येव प्रक्ष्यायतस्तस्य मुच्छेषि किंचन ॥ ३१ ॥ संशितं मे ब्रह्म संशितं वीर्यं बलम् । संशितं क्षत्रं मे जिष्णु यस्याहमस्मि पुरोहितः ॥ ३२ ॥ उदेषां बाहू अतिरमुद्वर्चो अथो

बलम् । क्षणोमि ब्रह्मणामित्रानुन्नयामि स्वाँ अहम् ॥ ३३ ॥ पुनर्मनः पुनरायुर्मे आगात्पुनश्चित्तं पुनराधीतं म आगात्, पुनश्चक्षुः पुनःश्रोत्रं म आगात् । वैश्वानरो अदब्धस्तनूपा अवबाधतां दुरितानि विश्वा ॥ ३४ ॥ (सौत्रामण्या निचाङ्गणस्य)। यद्देवा देवहेळनं देवासश्चकृमा वयम् । अग्निर्मा तस्मादेनसो विश्वान्मुञ्चत्वंहसः ॥ ३५ ॥ यदि दिवा यदि नक्तमेनांसि चकृमा वयम् । वायुर्मा तस्मा० ॥ ३६ ॥ यदि जाग्रद्यदि स्वप्नमेनांसि चकृमा वयम् । सूर्यो मा तस्मा० ॥ ३७ ॥ (प्रायश्चित्तानि सर्वान्तीयानि शिशुशैशवयोः) ॥ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षिभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः ॥ ३८ ॥ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥३९॥ पृषदश्वा मरुतः पृश्निमातरः शुभं यावानो विदथेषु जग्मयः । अग्निजिह्वा मनवः सूरचक्षसो विश्वे नो देवा अवसाऽगमन्निह ॥ ४० ॥ शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम् । पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोः ॥ ४१ ॥ शेषः कोकिलस्य राज्य-

पुत्रस्य राज्येभ्यो: ॥ पुनन्तु मा पितरः सोम्यासः पुनन्तु मा पितामहाः । पुनन्तु प्रपितामहाः पवित्रेण शतायुषा ॥ ४२ ॥ पुनन्तु मा पितामहाः पुनन्तु प्रपितामहाः । पवित्रेण शतायुषा विश्वमायुर्व्यश्नवै ॥ ४३ ॥ अग्न आयूँषि पवस आसुवोर्जमिषं च नः । आरे बाधस्व दुच्छुनाम् ॥ ४४ ॥ पुनन्तु मां देवजनाः पुनन्तु मनसा धियः । पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा ॥ ४५ ॥ पवित्रेण पुनीहि मा शुक्रेण देव दीद्यत् । अग्ने क्रत्वा क्रतूँरनु ॥ ४६ ॥ यत्ते पवित्रमर्चिष्यग्ने विततमन्तरा । ब्रह्म तेन पुनातु मा ॥ ४७ ॥ पवमानः सो अद्य नः पवित्रेण विचर्षणिः । यः पोता स पुनातु मा ॥ ४८ ॥ उभाभ्यां देव सवितः पवित्रेण सवेन च । मां पुनीहि विश्वतः ॥ ४९ ॥ वैश्वदेवी पुनती देव्यागाद्यस्यामिमास्तन्वो वीतपृष्ठाः । तया मदन्तः सधमादेषु वयं स्याम पतयो रयीणाम् ॥ ५० ॥ (ब्राह्मणो वचानिरुक्तम्) ॥ पुनर्मा मैत्विन्द्रियं पुनरायुः पुनर्भगः । पुनर्ब्राह्मणमैतु मा पुनर्द्रविणमैतु माम् ॥ ५१ ॥ यन्मेऽद्य रेतः पृथिवीमस्कन्दोषधीरप्यसरद्यदपः । तदहं पुनराददे ॥ ५२ ॥ यन्मे रेतः प्रसिच्यते यन्म आजायते पुनः । यद्वा मे प्रति-

तिष्ठति तेन मामसृतं कुरु तेन सुप्रजसं कुरु ॥५३॥ (अपां मो द्रविण इति प्रजापतेः) रथे अक्षेषु वृषभस्य वाजे वाते पर्जन्ये वरुणस्य शुष्मे । इन्द्रं या देवी सुभगा जजान सेयमगाद्वर्चसा संविदाना ॥ ५४ ॥ या हस्तिनि द्वीपिनि या हिरण्ये त्विषिरश्वेषु पुरुषेष्वन्तः । इन्द्रं या० ॥ ५५ ॥ सिंहे व्याघ्र उत या पृदाकौ त्विषिरग्नौ ब्राह्मणे सूर्ये या । इन्द्रं या० ॥ ५६ ॥ या राजन्ये दुन्दुभावायतायामश्वस्य क्रन्दे पुरुषस्य मायौ । इन्द्रं या० ॥ ५७ ॥ (हिरण्यवर्णा इति कश्यपस्य) ॥ हिरण्यवर्णाः शुचयः पावका यासु जातः कश्यपो यास्विन्द्रः । या अग्निं गर्भं दधिरे विरूपास्ता न आपः शं स्योना भवन्तु ॥ ५८ ॥ यासां देवा दिवि कृण्वन्ति भक्षं या अन्तरिक्षे बहुधा भवन्ति । या अग्निं० ॥ ५९ ॥ यासां राजा वरुणो याति मध्ये सत्यानृते अवपश्यञ्जनानाम् । या अग्निं० ॥ ६० ॥ अग्नये नमः, वायवे नमः, सूर्याय नमः, ब्रह्मणे नमः, प्रजापतये नमः, कूष्मर्षिभ्यः नमः (इति व्रतहोमः ।) अग्ने त्वं पारयेति स्विष्टकृतम् ॥) अग्ने त्वं पारयानव्यो अस्मान्स्वस्तिभिरति दुर्गाणि विश्वा । पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शंयोः ॥ ६१ ॥

(वैश्वानरीयेण सूक्तेन प्राङ्मुखः प्राञ्जलिरुपतिष्ठते, जपेत्सूक्तानि पराञ्चि यानि वैश्वानरीयं च ॥) वैश्वानराय प्रति वेदयामो यदी मृळँ सङ्गरो देवतासु । स एतान्पाशान्प्रमुञ्च प्रवेद स नो मुञ्चतु दुरितादवद्यात् ॥ ६२ ॥ वैश्वानरः पावया नः पवित्रैर्यत्सङ्गरमऽभिधावाम्याशाम् । अनाजानन्मनसा याचमानो यदत्रैनो अपतत्सुवामि ॥ ६३ ॥ अमू ये सुभगे दिवि विचृतौ नाम तारके । प्रेहामृतस्य यच्छतमेतद्बद्धकमोचनम् ॥ ६४ ॥ विजिहीष्व लोकान्कृधि बन्धान्मुञ्चसि बद्धकम् । योनेरिव प्रच्युतो गर्भः सर्वान्पथो अनुष्यात् ॥ ६५ ॥ सुप्रजानन्प्रतिगृह्णाति विद्वान्प्रजापतिः प्रथमजा ऋतस्य । अस्माभिर्दत्तं जरसः परस्तादच्छिन्नं तन्तुमनु सन्तरेम ॥ ६६ ॥ ऋत तन्तुमन्वेके सन्तरन्ति येषां दत्तं पित्र्यमायतनवत् । अबन्ध्वेके ददतः प्रयच्छन्दातुं चेच्छक्नुवान्स स्वर्ग एषाम् ॥ ६७ ॥ आरभेथामऽनु संरभेथां समानं पन्थामवतो घृतेन । यद्वां पूर्तं परिविष्टं यदग्नौ तस्य गुप्त्यै इह जायापती संरभेथाम् ॥ ६८ ॥ यदन्तरिक्षं पृथिवीमुत द्यां यत्पितरं मातरं वा जिहिंसिम । अग्निर्नस्तस्मादेनसो औपासन उत्तैनेषद्दुरिता यानि चकृम ॥ ६९ ॥ भूमिर्मातादि-

तिर्नो जनित्रं त्रातान्तरिक्षमभिशस्त्या नः । द्यौर्नः पिता पित्र्याच्छं भवाति जामिमृत्वा मावपत्सि लोकान् ॥ ७० ॥ यत्रासुहार्दः सुकृतो मदन्ति विहाय रोगं तन्वं स्वाम् । अश्रोणा अङ्गैरह्रुताः स्वर्गेलोके तत्र पश्येम पितरं च पुत्रम् ॥ ७१ ॥ यदन्नमद्म्यनृतेन देवा दास्यन्नदास्यन्नुत वा करिष्यन् । यद्देवानां चक्षुष्यागो अस्ति यदेव किञ्च प्रतिजग्राहाहमग्निर्मा तस्मादनृणं करोतु ॥ ७२ ॥ यदन्नमद्मि बहुधा विरूपं वासो हिरण्यमुत गामजामविम् । यद्देवानां० ॥ ७३ ॥ अनेन मन्त्रपाठेन० अग्निः प्रीयतामग्निः प्रीतोस्तु, वायुः प्री०, सूर्यः प्री०, ब्रह्मा प्री०, प्रजापतिः प्री०, कूष्मर्षयः प्रीयन्तां कूष्मर्षयः प्रीताः सन्तु ॥ पापान्मुक्तिः पुण्यवृद्धिरस्तु ॥ इति कूष्माण्डमन्त्रम् ॥

ॐ अथ कूष्माण्डब्राह्मणम् ॥ ब्राह्मणः प्रजापतेर्यजुः ॥ वातरशना ह वा ऋषयः श्रमिण ऊर्ध्वमन्थिनो बभूवुस्तानृषयोऽर्थमायँस्ते निलायमाचरंस्तान्प्रविविशुः, कूष्माण्डानि ताँस्तेऽन्वपश्यञ्छ्रद्धया च तपसा च तानृषयोऽपृच्छन् कथानिलायं चरथेति, त ऋषीनब्रुवन्नमो वोस्तु भगवन्तोऽस्मिन्धाम्नि केन वः सपर्यामेति तानृषयोऽब्रुवन्पवित्रं नो ब्रूत, येनाऽरेपसो भविष्याम इति, त एतानि सूक्तान्यऽपश्यन्

"यद्देवा देवहेळनं" "यददीव्यन्नृणमहं" "आयुष्टे विश्वतो दधत्" इत्येतैराज्यं जुहुत, तेनारेपसो भविष्यथेति, त एतैराज्यमजुहवुस्ते वाऽरेपसोऽभवन्कर्मादिष्वेतैर्जुहुयात्पूतो देवलोकान्समश्नुते ॥ १ ॥ कूष्मा ह वै नाम ऋषयो वातरशनास्ते हँसा हिरण्मया ज्योतिष्पक्षा भजिरा भूत्वाऽचरँस्ते कामयन्ताण्डेषु नः प्रजा ब्रह्म वदेयुरिति, तेषामण्डेष्वेव प्रजा ब्रह्मावादिषुस्त अण्डस्था अवदँस्तस्मात्कूष्माण्डानि कूष्माण्डैर्जुहुयाद्योऽपूत इव मन्येत यदर्वाचीनमेनो भ्रूणहत्यायास्तस्मान्मुच्येयमित्यऽयोनौ वा रेतः सिक्त्वा जुहुयाद्यथा वै स्तेनो यथा भ्रूणहैवमेष भवति योऽयोनौ रेतः सिञ्चति, यदेतैराज्यं जुहोति तैरेवात्मानं पुनीते दीक्षामुपैति दीक्षित एतैः सदृषि जुहोति संवत्सरं दीक्षितो भवति संवत्सरादेवात्मानं पुनीते, मासं दीक्षितो भवति, यो वै मासः स संवत्सरः, संवत्सरादेवात्मानं पुनीते, द्वादशरात्रीर्दीक्षितो भवति द्वादशमासाः संवत्सरः संवत्सरादेवात्मानं पुनीते, षड्रात्रीर्दीक्षितो भवति षड्वा ऋतवः संवत्सरः संवत्सरादेवात्मानं पुनीते, तस्य व्रतं "न मांसमश्नीयात्, न स्त्रियमुपेयात्, नोपर्यासीत, जुगुप्सेतानृतात्, पयो ब्राह्मणस्य व्रतं, यवागू

राजन्यस्य, आमिक्षा वैश्यस्य, सौम्येप्यध्वरे इत्येतद्व्रतं ब्रूयाद्यदि मन्यतोपदस्यामीत्योदनं धानाः सक्तून् घृतमित्यनुव्रतयेदात्मनोऽनुपसादायेति ॥ इति कूष्माण्डब्राह्मणम् ॥

अथ कलशावाहनम् ।

आवाहयाम्यहं देवं गणेशं सुरपूजितम् । सदैव विघ्नहर्तारं सर्वकामफलप्रदम् ॥१॥ रक्तवर्णो महातेजा रक्तस्रग्दामभूषितः । बलिः पुष्पं चरुश्चैव धूपोयं प्रतिगृह्यताम् ॥२॥ निषुसीद गणपते० १ । आवा० कुमारं षण्मुखं प्रभुम् । मयूरासनमारूढं भक्तानामभयङ्करम् ॥ १ ॥ शुक्लवर्णो महातेजाः० ॥ २ ॥ कुमारं माता० २ । आवाहयाम्यहं देवीः श्रियं लक्ष्मीं सरस्वतीम् । तथा च विश्वकर्माणमन्याश्च द्वारदेवताः ॥१॥ नानावर्णधरा देवीः० २। आगच्छागच्छ देवेशि क्षीरारार्णवसमुद्भवे । लोकानामुपकारार्थं सन्निधिं कुरु सर्वदा ॥१॥ रक्तवर्णा० २ ॥ अश्वपूर्वां० ३ । आवाहयाम्यहं देवीं वागीशीं वाक्प्रदायिनीम् । हंसस्थां सुरदितिजैः पूजितां विघ्नहारिणीम् ॥१॥ शुक्लवर्णा० ॥२॥ इयं शुष्मेभिः० ४ । आवाह० लक्ष्मीं त्रैलोक्यपूजिताम् । भक्तं मोहाकुलमार्तं पश्यन्तीं स्निग्धचक्षुषा ॥ १ ॥ रक्तवर्णा० ॥२॥ कांस्यस्मितां० ५ । आ-

वाहयाम्यहं देवं विश्वकर्माणमीश्वरम् । सर्वासां देवतानां च सदाशिल्पप्रवर्तकम्॥ १॥ शुक्लवर्णो० ॥२॥ विश्वकर्मा० ६ । इति द्वारदेवताः । अथ ब्रह्मकलशे। आवाहयाम्यहं देवं ब्रह्माणं च चतुर्भुजम् । हंसयानं स्वक्षमालाकमण्डलुधरं प्रभुम् ॥१॥ रक्तव० ॥२॥ ब्रह्मा देवानां० १ । आवाह० विष्णुं गदाशङ्खाब्जचक्रिणम् । अतसीपुष्पसङ्काशं पीतवाससमच्युतम् ॥१॥ पीतवर्णो०॥२॥प्रतद्विष्णु० २ । आवा० ईश्वरं पार्वतीपतिम् । वृषभासनमारूढं नागाभरणभूषितम् ॥ १ ॥ शुक्लवर्णो० ॥२॥ यो रुद्रो अग्नौ० ६ । आवाहयाम्यहं दुर्गां शङ्खचापशरान्विताम् । त्रिशूलहस्तां वरदां त्रिनेत्रां चारुहासिनीम् ॥१॥ रक्तवर्णा० ॥२॥ जातवेदसे० ४ । अथेन्द्रकलशे दिक्पालान् । आवाह० वज्रहस्तं शचीपतिम् । ऐरावणसमारूढं पूर्वस्यां दिशि पूजयेत् ॥१॥ पीतव० ॥ २ ॥ इन्द्रा पर्वताः० १ । आवा० रक्तं वैश्वानरं तथा । शक्तिहस्तं शुकारूढमाग्नेय्यां दिशि पूजयेत् ॥१॥ रक्तव० ॥२॥ अग्निः सर्सि० २ । आवा० धर्मराजं महाबलम् । महिषासनमारूढं दक्षिणस्यां दिशि यजेत् ॥१॥ कृष्णव० ॥२॥ यमो दाधार० ३ । आवा० नैर्ऋतं दैत्यपूजितम् । खड्गपाणिं रक्षोव्याप्तं नैर्ऋत्यां दिशि पूजयेत् ॥ १ ॥

नीलव० ॥२॥ यन्ते देवी० ४ । आवा० वरुणं यादसां पतिम् । पाशहस्तं तिमिवाहं पश्चिमायां दिशि यजेत् ॥१॥ श्यामव० ॥२॥ उदुत्तमं० ५ । आवा० मारुतं ध्वजधारिणम् । सर्वेषां जीवनं वीरं वायव्यां दिशि पूजयेत् ॥१॥ रक्तव० ॥ २ ॥ वायवायाः० ६ । आवा० कुबेरं गदया युतम् । नरासनसमारूढमुत्तरस्यां दिशि यजेत् ॥१॥ कृष्णव० ॥२॥ सोमो धेनुं० १ ॥ राजाधिराजा० ८ । आवा० ईशानं शूलधारिणम् । शिरश्चन्द्रं वृषारूढमैशान्यां दिशि पूजयेत् ॥ १ ॥ शुक्लव० ॥२॥ ईशानन्त्वा० ८ । आवा० ब्रह्माणं गायत्रीपतिम् । चतुरास्यं हंसयानमूर्ध्वायै दिशि पूजयेत् ॥१॥ रक्तव० ॥२॥ ब्रह्मजज्ञानं० ९ । आवा० विष्णुं त्रैलोक्यपूजितम् । रमायुतं खगारूढमधरायां दिशि यजेत् ॥१॥ पीतव० ॥२॥ वषट्ते विष्ण० १० । मध्ये ग्रहान् । आ० भानुं सर्वजगद्गुरुम् । अरुणः सारथिर्यस्य सप्ताश्वरथवाहनः ॥ १ ॥ रक्तव० ॥ २ ॥ आकृष्णेन० १ । आवा० चन्द्रं नक्षत्रनायकम् । शम्भोः शिरस्यलङ्कारं प्रत्यक्षं लोकनायकम् ॥ १ ॥ शुक्लव० ॥ २ ॥ याते धामानि० २ । आवा० भौमं मयूरवाहनम् । लोहिताङ्गं महौजस्कं शत्रूणां च भयङ्करम् ॥१॥ रक्तव० ॥२॥

अग्निर्मूर्धा० ३ । आवा० बुधं बुद्धिविवर्धनम् । सुवर्णरथगं दीपं सोमवंशस्य दुःख-हम् ॥१॥ पीतव० ॥२॥ बोधास्व मे० ४ । आवा० जीवं देवेन्द्रमन्त्रिणम् । गजासनं देवपूज्यं वाक्पतिं च ग्रहेश्वरम् ॥१॥ पीतव० ॥२॥ बृहस्पति अ० ५ । आवा० भार्गवं दैत्यपूजितम् । असुराणां गुरुं चैव ग्रहाणामतिपूजितम् । शुक्लव० ॥ २ ॥ अन्नात्परि० ६ । आवा० सूर्यपुत्रं शनैश्चरम् । मेचकप्रतिवर्णाभं भूतसंहारकारकम् ॥१॥ कृष्णव० ॥२॥ शन्नोदेवी० ७ । आवा० सैंहिकेयं महाबलम् । अबाहुमन्तरिक्षस्थं देवदानवपूजितम् ॥१॥ हरिद्वर्णो० ॥ २ ॥ कया नश्चि० ८ । आवा० केतुं सर्वग्रहान्तकम् । नीलजीमूतसङ्काशं मृत्युतुल्यपराक्रमम् ॥१॥ धूम्रव० ॥२॥ केतुं कृण्व०९। आवा० ध्रुवराजं महाबलम् । ऋषीणां प्रवरं पूज्यं रुद्रैकादशवासिनम् ॥१॥ ग्रहचक्रे स्थितं नित्यमुदीच्यां दिशि पूजयेत् । रक्तव० ॥२॥ ध्रुवाद्यौ० । आवा० अगस्त्यं देवपूजितम् । उग्ररूपधरं नित्यं रुद्ररूपं मुनिस्तुतम् । दक्षिणस्यां ज्वलंतं च जलधिचुलुकीकरम् ॥१॥ पीतव० ॥ २ ॥ अगस्त्यः ख० । आवा० वास्तोष्पतिमतिप्रियम् । अधोमुखं कराकाशादिक्षु सर्वासु व्यापकम् ॥१॥ स्वेच्छाव० ॥२॥ अमीवहा० । वा-

स्तोष्पते० । आवाहयाम्यहं देवान्क्षेत्रपालान्महाबलान् । दंष्ट्राकरालवदनाञ्जटामुकुटमण्डितान् । भूपातालखदिक्व्याप्य संस्थितान्भक्तवत्सलान् । नानारूपधरान्देवान्नानावर्णोपशोभितान् । बलि० ॥ क्षेत्रस्य पतिना वयं० भगवन्पुण्डरीकाक्ष० ॥ ३ ॥

इत्यावाहनं कलशेषु ॥

अथाग्निकुण्डपूजा ।

वेदिमुपस्पृश्य । आगच्छ वरदे ज्ञानमुद्रे यज्ञैर्विभूषिते । वेदि वेदमयैर्मन्त्रैः संस्कृते ते नमो नमः ॥ १ ॥ त्वामाश्रित्य स्थिता देवा घृताहुतिं पिबन्ति ये । ते देवास्तुष्टिमायान्तु मा विघ्नं यज्ञकर्मणि ॥ २ ॥ पयः पृथिव्याः ३ ॥ देवस्य त्वा० ॥ ४ ॥ अथाञ्जलिः । संमुखातिष्ठ वेदि त्वं यथा स्थास्यन्ति देवताः । स्थानभूता शिवादीनां शक्तीनां सुरपूजिते । ब्रह्माज्ञयाद्य मे यज्ञं सफलीकर्तुमर्हसि ॥ गणपतयेऽक्षोटं ज्वालालिङ्गे श्रीफलकन्दौ च संस्थाप्य ॥ सं त्वः सृजामि० । अश्विनोः० । गायत्र्यै नमः ३ तत्पुरुषाय वि०, वक्रतुण्डाय० ३ वैश्वानराय० समार्चिषे धी० तन्नोऽग्निः प्र० ३ पावकाय वि०, हेलालीलाय धी०, तन्नोऽग्निः० ३ तत्पुरु० महादे० ३ अद्य तावत्

महागणपतेः० द्वार्देवतानां, विनायकस्य ८ आदित्यमणेः अनुमतिमणेः सरस्वतिमणेः पूर्वे देवमुखस्य, आग्नेये सप्तजिह्वस्य दक्षिणे वैश्वानरस्य, नैर्ऋते जातवेदसः, पश्चिमे अग्नेः वायवे हुताशनस्य, उत्तरे हुतवहस्य, ईशाने कृष्णवर्त्मनः, मध्ये अग्नेसहस्राक्षस्य शतं ते प्राणः शतं ते व्यानः शतं ते तेजः सहस्रमुखस्य ऊर्ध्वे ब्रह्मविष्णुमहेश्वरदेवतानां काल्याः, कराल्याः, मनोजवायाः, सुलोहितायाः, धूम्रायाः, विस्फुलिंगिन्याः, सुमनसायाः विश्वचर्याः ब्रह्माण्डव्यापिन्याः ज्वालालिङ्गतेजसः धूम्रवर्णायाः नीलवर्णायाः कपिलायाः ज्वालायाः तेजोवत्याः हव्यवाहायाः कव्यवाहायाः रौद्र्याः संहारिण्याः तापिन्याः, पाचिन्याः । भवस्य देवस्य० ८ षड्त्रिंशत्तत्त्वानां सप्तजिह्वासहितस्य पावकस्य ब्रह्माण्डव्यापकतेजोमयपरमशिवज्वालालिङ्गदेवतानां ॥ स्रुवमूले । सोमस्य शुक्रस्य अग्नेः । मध्ये । महेश्वरस्य । मूर्ध्नि । ब्रह्मणः । स्रुचमूले । अपां मध्ये । भास्करस्य । रन्ध्रद्वये । गौर्याः दुर्गायाः, काल्यावन्यामह्याः स्रुक्स्रुवदेवतानां आत्मनो० अमुकक्रियानिमित्तं द्वार्देवपूजनं, अग्निकुण्डपू० ज्वालालिङ्गपू० स्रुक्स्रुवपूजनमर्चामहं करिष्ये । एवमासनं । महागणतये० वः पू-

जयामि । महागणपतिं० आवाहयिष्यामि० ॥ आवाहयाम्यहं देवं गणेशं० ॥ अ-ग्निं स्वाहासमेतं दितिजसुरनुतं रक्तवर्णं त्रिनेत्रं कण्ठे हारं भुजाभ्यां वरमभयमथो दक्षिणाभ्यां वहन्तम् । वामाभ्यामक्षमालाममृतकलशकं रम्यहासं सुवेषं नानाल-ङ्कारयुक्तं मृगवरसहितं त्वाह्वये होमकाले ॥ ज्वालामण्डितमाकाशं० ॥ ज्वालालिङ्गे । आवाहयामि गिरिजाधवमीश्वरं तं गौरीयुतं सकलपाशहरं सुरेशम् । चर्माम्बरं द-शभुजं च त्रिशूलहस्तं व्यालैर्विभूषिततनुं मखरक्षणार्थम् । स्रुवस्रुचौ ॥ मूले सोमा-ग्निशुक्रास्पदमथ शिरसि ब्रह्मणो मध्यदेशे माहेश्वर्यं स्रुवं तं स्रुचमपि पयसां भास्क-रस्याथ मध्ये । दुर्गागौर्योर्हिरन्ध्रे स्वजनभयहतेर्भूमिकात्यायनीयं देवान्पितॄनृषींश्चा-चिरतं कुशकवावाह्वये तौ च होमे ॥ भगवन्पु० । पाद्यादि दक्षिणानैवेद्यान्तम् ॥ अथ पुरोहितपूजा । शतक्रतोर्यथा जीवो विष्णोर्ब्रह्मा यथा पुरः । अध्वर्योर्भूस्तथा मे त्वं भव ब्रह्मन् नमोऽस्तु ते ॥ इन्द्राबृहस्पतिभ्यां गन्धादि नैवेद्यान्तम् ॥ अथ स्रुक्स्रुव-प्रतिपादनम् । सावित्र्यादि० आत्मनो० यज्ञसाफल्यद्वारा सर्वात्मकविष्णुप्रीत्यर्थं ब्रा-ह्मणाय स्रुक्स्रुवौ प्रतिपादयामि १ प्रतिगृह्णामि १ । त्रातारमिन्द्रं० १ इन्द्रं कुत्सो० २

चित्तिः स्रुक्चित्तमाज्यं वाग्वेदिराधीतं बर्हिः । केतोरग्निर्विज्ञातमग्निर्वाचस्पतिर्होता मन उपवक्ता प्राणो हविः सामाध्वर्युरिन्द्रं गच्छ नमः ३ कया नश्चित्र० ४ अग्नारप-रि ५ ब्रह्मा देवानां० ६ पृथिवी शान्तिरन्तरिक्षं शान्तिः० ७ ॥ ततोऽग्निं पुष्पं दत्त्वा । सप्तहस्तश्चतुश्शृङ्गः सप्तजिह्वो द्विशीर्षकः । त्रिपात्प्रसन्नवदनः सुखासीनः शुचिस्मितः ॥१॥ यावद्धोमं तथाकर्म करिष्ये त्वदनुज्ञया । तावत्कालमिहातिष्ठ वह्ने विघ्नं नि-वारय ॥ २ ॥ ततोऽग्निकोणे धमयेत् ॐ हुं हुतभुजे नमः ॥ अग्ने शकेति मन्त्रः । अथ समित्पूजा । ॐ भूर्भुवः स्वः मन्त्रेण समिद्धमानयेद्बुधः । घृतवती पयः पृथिव्या इति घृतदुग्धेन संस्पृशेत् ॥ दर्भकाण्डद्वयं प्रज्वाल्यावर्तनीयम् । येन देवा ज्योतिषोर्ध्वा उ-दायन् येनादित्या वसवो येन रुद्राः । येनाङ्गिरसो महिमानमानशुस्तेनैत्वं यजमा-नाय स्वस्ति इति ॥ ततो नमस्कारः । पृथिवी समित्तामग्निं समिन्धे तामहं समिन्धे सा मा समिद्धा सुसमिद्धा तेजसा वर्चसा यशसा ब्रह्मवर्चसेन समिन्ध्यात् १ अ-न्तरिक्षं समित्तां वायुं समिन्धे तामहं समिन्धे० २ द्यौः समित्तां सूर्यं समिन्धे तामहं० ३ ओषधीनां पते ! सोम हव्यकव्येष्वऽयुक्तिताम् । यथा तथा गतां स-

ग्यक् दूरीकुरु नमोऽस्तुते ॥ ततः पूजा । हव्यै कव्यै कुलकुल्यायै सिन्धव्यै सिद्धै अमृतवर्धन्यै अमृतरूपिण्यै पावकवर्धिन्यै वह्निप्रियायै नैवेद्यान्तमर्चयित्वा प्रणमेत् । हव्यं प्रणीहि हव्यं शृणीहि हव्यं श्रपय हव्यं पाचय हव्यमसि हव्यत्वा हव्यं वहसि हव्यं सीद सुगमं प्रयासि ॥ ततः पुस्तकपूजा । सरस्वतीं देवयन्तो० । लक्ष्म्यै मेधायै धरायै धृत्यै तुष्ट्यै पुष्ट्यै वागीश्वर्यै वाग्देवतायै गायत्र्यै सावित्र्यै सरस्वत्यै अमृतेश्वर्यै । गन्धादि नैवेद्यान्तं कृत्वा ॥ अग्निभद्रं पठेत् । अग्नये समन०, वायवे०, सूर्याय०, वरुणाय०, सोम्ने०, ब्रह्मणे०, राज्ञे० रथाय सम० ॥ उत्तरतः संस्तीर्येति आज्यभागान्तं हुत्वा । ॥ इत्याज्याभागः ३ ॥

(यवतिलभागान्तरिदं)

अथ प्रायश्चित्तस्थानकम् ।

यथाश्वमेधः क्रतुराट् सर्वपापापनोदनः । तथाघमर्षणं सूक्तं सर्वपापापनोदनम् ॥ ध्यानं ॥

श्रीनारायणमात्मरूपममलं ब्रह्मादिभिः संस्तुतं शङ्खचक्रगदाम्बुजानि दधतं दोर्भिश्चतुर्भिः सदा । लक्ष्म्या भूषितवामभागममले पद्मे निषण्णं महापापानामभिसंहर-

न्तमनघं दोषापनुत्त्यै भजे ॥ भद्रं कर्णेभिरिति चतसृभिः स्योनोमइति छिद्रस्य अवो मित्रावरुणयोरन्तेवासिनः पङ्क्तिरयातयानीन्द्रक्रतुमिति शक्तिर्वासिष्ठस्य प्रायश्चित्तानि सर्वान्तीयानि शिशुशैशवयोः प्रजापतिमनसीत्यादि मित्रो जनानित्यन्तं वैप्रुषासन्ततीनां वसिष्ठपुत्राणां स्वर्गतानां वाग्वै सरस्वती विंशानुवाकौ प्रायश्चित्तेति वैतानि हवींषि पापविमुञ्चनम् । यजुः ॐ भद्रं कर्णेभिः० १ स्वस्ति न इन्द्रो वृ० २ पृषदश्वा मरुतः० ३ शतमिन्नु शरदो० ४ (ऋ० पृ०) प्रेद्धो अग्ने दीदिहि पुरो नोऽजस्रया सूर्म्या यविष्ठ, त्वां शश्वन्त-मुपयन्ति वाजाः ५ अग्नकर्णाय कवये वेद्याय वाचोमिर्नाकमुपयामि शंसन् । यतोभयमभयं तन्वो अस्त्वग्ने देवानामवहेड ईक्ष ॥ ६ ॥ अग्निर्वोदेवमग्निभिः सजोष यजिष्ठं दूतमध्वरे कृणुध्वम् । यो मर्त्येषु निध्रुविनृतावातपूर्मूर्धा घृतान्नः पावकः ॥७॥ घृतप्रतीको घृतपृष्ठो अग्ने घृताहवानो घृतमस्य धाम । घृतप्रुषो हरितस्त्वा वहन्तु घृतं पिबन्यजताद्देवदेवान् ॥८॥ (अ० १) इमो अग्ने वीततमानि हव्याजस्रो वक्षि देवतातिमच्छ । प्रति न ईं सुरभीणि व्यन्तु सप्त ते अग्ने त्रयस्त्रिंशत्, यन्मे मनसो विश्वकर्माग्नि युनज्मीन्धानास्त्वाभिजा ईळित ईळितव्यै, देवैः

पार्थिवैः पातु वायुर्न ईळित ईळितव्यै, दैवै रन्तरिक्षैः पातु सूर्यो न ईळित ईळितव्यै, दैवैर्दिव्यैः पातु विष्णुर्न ईळित ईळितव्यै, दैवैर्दिश्यैः पातु अग्निर्यजुर्भिः पूषा सुगाकारैस्त इमं यज्ञमवन्तु ते मामवन्त्वव आरमेनमारभध्वम् २ पृथिवी विभूवरि सिनीवाल्युबन्ध आचित्तिमनस्ते भुवि, विवस्ते य ऊर्मिर्हविष्य इन्द्रियावां-स्तव ऋद्ध्या संसोमस्याज्यमसि,हविषो हविर्ज्योतिषो ज्योतिर्विश्वेषां देवानां भागधे-येस्थ देववीतयेवो गृह्णामि, संव्वः सिचन्तु मरुतः संपूषा सत्धाता समिन्द्रः संबृह-स्पतिः, संव्वोयमग्निः सिञ्चतु प्रजया च धनेन च आयुष्मन्तं कृणोतु माम्, माम्दावशः, आपो देवीर्घृतमिदाप आसन्नग्नीषोमौ बिभ्रत्याप इत्ताः, तीव्रो रसो मधुपृचामरङ्गम आमा प्राणेन सह वर्चसागन्, आदित्पश्याम्युत वा शृणोम्यामा घोषो गच्छति वाङ्म आसम्, मेनेभेजानो अमृतस्य तर्हि हिरण्यवर्णो अतृपं यदा वः, समान्या-यन्त्युपयन्त्यन्याः समानमूर्वं नद्यः पृणन्ति, तमू शुचिं शुचयो दीदिवांसमपान्नपातं परितस्थुरापः, आपोहिष्ठामयोभुवस्तान ऊर्जे दधात न, महे रणाय चक्षसे, यो वः शिवतमो रसस्तस्य भाजयते इनः उशतीरिव मातरः, तस्मा अरङ्गमाम वो

यस्य क्षयाय जिन्वथ आपो जनयथा च नः, स ईं वृषा अजनयत्तासु गर्भं स ईं
शिशुर्धयति तं रिहन्ति, सो अपान्नपादूर्जयन्नप्स्वन्तर्वसु देवाय विदते विभाति,
इह गावः प्रजायध्वमिहाश्वा इह पूरुषाः, इह सहस्रदक्षिणो रायस्पोषः प्रजायतां,
अयं यज्ञो वर्धतां गोभिरश्वैरियं वेदिः सुपत्या सुवीराः, इदं बर्हिरतीबर्हींष्यन्येमं
यज्ञं विश्वे अवन्तु देवाः, स आदमे सुदुघा यस्य धेनुः स्वधां पीपाय
सुभ्वन्नमत्ति, सो अपान्नपादनभिम्लातवर्णोऽन्यस्येवेह तन्वा विवेष १ स्कन्ना
द्यौः स्कन्ना पृथिवी स्कन्नं विश्वमिदं हविः, स्कन्नादो विश्वा भूतानि प्रस्कन्नं
जायतां हविः, इह गावोयं यज्ञः, पयस्वतीराप ओषधयः पयस्वान्मामकं वचः,
अपां पयस्वदित्पयस्तेन नः सह वर्धतां, यद्वामृक्षश्शकुनिर्मुखेन निर्भरते तव,
अग्निष्टत्सर्वं शुन्धतु हव्यवाड्घृतसूदनः, यद्वामृक्षश्श्वापान्मुखेन निर्भरते तव,
अग्निष्टत्सर्वं शुन्धतु हव्यवाड्घृतसूदनः, भूतिदक्षा घृतेन वर्धतां यज्ञं यज्ञाय मुञ्चतु
स्वाहा, घृतेन वर्धतां भूतिर्मुञ्चेमं यज्ञं मुञ्च यज्ञपतिमंहसः स्वाहा, यास्ते अग्ने
समिद्धो अप्स्वन्तर्यस्मिन्पृथिव्या उपसूर्यैयाः, तास्ते गच्छन्त्वाहुतीर्घृतस्य देवाग्ने

यजमानाय शर्म ४ यज्ञस्य हि स्थ ऋत्विजा इन्द्राग्नी कल्पना युवम्, हुता-हुतस्य तृप्यतुसाहुतस्य हुतस्य च, हुतस्य चाहुतस्य चाहुतस्य च हुतस्य च, पीता-पीतस्य सोमस्यास्य इन्द्रस्येन्द्राग्नी वीतं पिबतमागतम्, सोमं यज्ञं तमो विद्-म्मत्तिजोमो इमाः प्रजाः, मयाः सोमं पिवादिमं संसृष्टमुभयकृतम्, मा नो ध्व-रिषुः पितरो मोत देवा मा नः सबन्धुरुत वान्यबन्धुः, मा नो दुःशंस्यो अघशंस ईशताहुतोयं यज्ञो अप्येतु देवान्, सप्तर्त्विजः सप्तसदांस्येषान्दशक्षिपो अश्विन पञ्चवाजः, प्राणोव्यानोपानोमान आकूतिमग्निः स्वाहा, देवा हविरिदं जुषन्ताम् ५ आत्मा यज्ञस्य रंह्याः सुषाणः पवते सुतः प्रत्नानि पाति काव्यः, घोषा इनो नृषा अस्य अस्रा वाजसा उत आत्मा यज्ञस्य पूर्व्यः, आत्मान्वन्नभो दुह्यते घृत-म्पयो ऋतस्य योनिरमृतं विजायते, समीचानः सुदानवः प्रीणन्तितन्पुरोहितमेव मेहन्ति पेरवः, देवा देवेषु श्रयन्तां प्रथमा द्वितीयेषु श्रयन्तां, द्वितीया तृतीयेषु श्रयन्तां, येस्थ त्रय एकादश त्रयश्च त्रिंशच्च त्रयश्च त्रीश्च शतात्रयश्च त्रीश्च सहस्रा त इमं यज्ञमवन्तु ते मामवन्तुनोव आरभेन मारभध्वम् ६ वसवस्त्वोदीरयन्तु

रुद्रास्त्वोदीपर्यन्त्वादित्यास्त्वोच्छ्रयन्तु विश्वे त्वा देवा दृंहन्तु, ध्रुवा द्यौ ध्रुवा पृथिवी ध्रुवासः पर्वता इमे, ध्रुवं विश्वमिदं जगद्ध्रुवो राजा विशामसि, देवा इ धर्मणा ध्रुवा यजमानः पशुभिर्ध्रुवः, दिवि दिव्यां दृंहान्तरिक्षेन्तरिक्षं दृंह पृथिव्यां पार्थिवान् दृंह, आ त्वा हर्षमन्तरेभूर्ध्रुवस्तिष्ठ विचाचलत्, विशस्त्वा सर्वा वाञ्छन्तु मा त्वाद्यश्रे अधिभ्रशत्, ध्रुवं ध्रुवेण हविषा हविरवसोमनयामसि, यथा न इन्द्रः केवली विशो बलिर्हृतस्करत्, स्वाहा दिव आप्यायस्व, स्वाहान्तरिक्षादाप्यायस्व, स्वाहा पृथिव्या आप्यायस्वायुर्धा असि, ध्रुवायुर्मेदेहि वयोधा असि ध्रुवं वयो मे देहि तनूपा असि, ध्रुवतन्वं मे पाहि, चक्षुष्पा असि ध्रुवचक्षुर्मे पाहि, वर्चोधा असि, ध्रुववर्चो मे पाहि, अध्वर्यो यं यज्ञो अस्तुदेवा ओषधीभ्यः पशुभ्यो मे धनाय, विश्वस्मै भूताय ध्रुवो अस्तु देवाः स पिन्वस्व घृतवद्देवयज्ञा, इहैवैविमा पथ्योष्टा पर्वता इवाविचाचलत्, इन्द्र इवेह ध्रुवस्तिष्ठेह यज्ञमुधारय, इममिन्द्रो अदीधरद्ध्रुवन्ध्रुवेण हविषा हविः, तस्मै सोमो अधिब्रुवत्तस्मा वो ब्रह्मणस्पतिः, ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवासः पर्वता इमे, ध्रुवं विश्वमिदं जगद्ध्रुवो राजा

बिशामसि ७ असवे स्वाहा वसवे स्वाहा, वसुधेयायस्वाहा, भूपतयेस्वाहा भुवनपतयेस्वाहा भूतानां पतयेस्वाहा, भूतायस्वाहा, द्रप्सश्च स्कन्दपृथिवीमनुद्यामिमं च योनिमनु यश्च पूर्वः, समानं योनिमनुसञ्चरन्तं द्रप्सं जुहोम्यनु ससहोत्राः, यस्ते द्रप्स स्कन्दति यस्ते अंशुर्बाहुच्युतो धिषणाया उपस्थे, अध्वर्यो वा परिवायः पविन्नान्ततें जुहोमि मनसा वषट्कृतम्, यो द्रप्सो अंशुः पतितः पृथिव्यां परिवापात्पुरोळाशात्करम्भात्, धानासोमान्मन्थिन इन्द्रशुक्रात्स्वाहाकृतमिन्द्राय तं जुहोमि, यस्ते द्रप्सो मधुमां इन्द्रियावान्स्वाहाकृतः पुनरप्येति देवान्, अध्वर्यो वा परिवायः पविन्नान्ततें जुहोमि मनसा वषट्कृतम्, यस्ते द्रप्सः स्कन्दति यस्ते अंशुरवश्चयः पुरोदिवः, अयन्देवो बृहस्पतिः सन्तत्सिञ्चन्तु राधसा ८ विसृष्ट धेनाः सलिला घृतच्युतो वसन्तो ग्रीष्मो मधुमन्ति वर्षाः; शरद्धेमन्त ऋतवो मयोभुव उदप्रुतो नभसीसं वसन्ताम्, आनः प्रजा मा देवानान्त्वमग्ने व्रतपा असि, यद्वो वयं प्रमिनाम व्रतानि विदुषां देवा अविदुष्टरासः, अग्निष्टद्विश्वमापृणाति विद्वान्येभिर्देवानृतुभिः कल्पयति मधुश्च माधवश्च वासन्तिका ऋतू, शुक्रश्च शुचिश्च

ग्रैष्मा ऋतू, नभश्च नभस्यश्च वार्षिका ऋतू, इषश्चोर्जश्च शारदा ऋतू, सहश्चसहस्यश्च हैमन्तिका ऋतू, तपश्च तपस्यश्च शैशरा ऋतू, त इमं यज्ञमवन्तु ते मामवन्त्वनुव आरभेऽनुमारभध्वम् ९ असवे स्वाहा वसवे स्वाहा विभवे स्वाहा विवस्वते स्वाहा, धूषाय स्वाहा संसर्पाय स्वाहा मलिम्लुचाय स्वाहा गणश्रिये स्वाहा, चन्द्राय स्वाहा, ज्योतिषे स्वाहाऽभिभवे स्वाहाऽधिपतये स्वाहा, दिवापतये स्वाहा, इन्द्रस्य गृहोसि गृहीतो गृह्यो देवानां पूरसि तान्त्वा प्रविशामि, तान्त्वाप्रपद्ये सह गृहैः सह प्रजया सह पशुभिः सहर्त्विग्भिः सह सदस्यैः सहसोम्यैः सहदक्षिणीयैः सह यज्ञेन सह यज्ञपतिना, इन्द्राग्नी परिधीममावातो देवपुराकृता, तन्त्वेन्द्रस्य ग्रहप्रपद्ये सगुः साश्वः सपुरुषः सह यन्मे स्थितेन, अरिष्टया अविध्यै संवेशायोपवेशाय गायत्र्यै च्छन्दसेऽभिभुवे स्वाहाऽरिष्ट्या अविथ्यै संवीशायोपवीशाय त्रैष्टुभेन च्छन्दसा जगत्याऽनुष्टुभेन पांक्त्यै च्छन्दसेऽभिभुवे स्वाहा १० द्यौश्च त्वा पृथिवी च श्रीणीता, महश्च त्वा रात्री च श्रीणीतां, वाक्च त्वा मनश्च श्रीणीता, आपश्च त्वोषधयश्च श्रीणीता, ऋक्च त्वा साम च श्रीणीतां, स्तोमश्च त्वा यजुश्च श्रीणीतां, बृहच्च त्वा रथन्तरं

च श्रीणीतां, यज्ञश्च त्वा दक्षिणा च श्रीणीतां, सूर्यश्च त्वा चन्द्रमाश्च श्रीणीतां, दर्शश्च त्वा पौर्णमासश्च श्रीणीतां, ब्रह्मच त्वा क्षत्रं च श्रीणीतां, अर्कश्च त्वाऽश्वमेधश्च श्रीणीतां, श्रीतस्त्वं श्रीतोहमिन्दुरिन्दुमवागंस्तस्य त इन्द्र इन्द्रियावत इन्द्रपीतस्य सर्वगणः सर्वगणस्योपहूत उपहूतस्य भक्षयामि ॥ ११ ॥ विश्वा अग्ने त्वया वयं धारा उदन्य इव अतिगाहे महिद्विषः, या दिव्याष्टकास्यपसामपस्तमास्वपा असि, तस्यैत एना हविषा विधेम त्वं यज्ञो वरुणस्य वया असि, श्रुतकर्णाय, अनुमतेन मन्यस्व न इदं यज्ञेषजं कृण्वमहेतनूषु, यद्वा तोकेषु तनूषु प्रजासु यद्गोष्वोषधीष्वप्सु ॥१२॥ हिरण्यगर्भः०, तदित्पदमविचिकेत विद्वान्यन्मृतः पुनरप्येति देवान्, त्रिवृद्भुवनं यद्रथवृहज्जीवो गर्भो न मृतः स्वाहा,आप्यायस्व, सन्ते पयांसि, आप्यायस्व मदिन्तम सोमविश्वेभिरंशुभिर्भवानः, सुश्रवस्तमः सखावृधे १३ अप्स्वग्ने । तपोष्वग्ने अन्तरां अमित्रान्तपशंसमररुषः परस्य, तपो वसो चिकितानो अचित्तान्वितै तिष्ठन्तामजरा अयासः, योनः सनुत्यो अभिदासदग्ने यो अन्तरो मित्रमहो अनुष्यात्, तमजरेभिर्वृषभिस्तवस्वैस्तपा तपिष्ठ तपसा तपस्वान्, सम्मा कृणोतु

केतुमानर्क चिदूर आसते । पावको यद्वानस्पतीन्प्रासा मिनात्यजरः, न हितो अग्ने तन्वः क्रूरमामा शमन्तः कपिर्बिभस्तिते जनं स्वं जरायुर्गौरिव मेष इव यदुपच विचचर्वति यदप्सरद्दनुपरस्य खादति, शीर्ष्णा शिरो वक्षसा वक्ष एजयन्संशुंबभस्ति हरितेभिरासभिः, सुपर्णावाचमक्रतोपद्याव्या खरे कृष्णा ईषिरा अनर्तिषुः, न्यङ्नि-यन्त्युपरस्य निष्कृतं पुरूरेतोदधिरे सूर्यश्रितः १४ अग्निना तपोन्वाभवत्सूर्येन तेजो, वायुना प्राणा, इन्द्रेण देवा, यमेन पितरः, सरस्वत्या मनुष्याः, सप्तदशेन स्तोमा, वामदेव्येन सामानि, गायत्र्या. च्छन्दांसि, मण्या रूपाणि, हिरण्येन वर्चांसि ति-रश्चि, राजिना सर्पा, अजगरेणाऽप्सव्याः, श्येनेन पतत्रिणो, व्याघ्रेणारण्याः पशवः, सुपर्णेन वयांसि, अश्वत्थेन वनस्पयय, ओदनेनाऽन्नानि, यवेनौषधयोऽश्ववृषेनैक-शफाः पशवो, वृषभेन गावो, वृष्णिनाऽवयो, बस्तेनाजा, श्चन्द्रमसा नक्षत्राणि ब्राह्मणेन वाचो, वाचा देवताः, श्रिया विराड्ब्राह्मणा पर्वताः, समुद्रेणापोऽद्भिः सत्यं, सत्येनर्तं,मृतेन तप,स्तपसा परमेष्ठी, परमेष्ठिना मृत्युर्मृत्युना प्रजाः, प्रजाभिः सगर,स्तनूभिः प्रजापतिस्तैर्देवैरन्वाभूति,रन्वा च भूयासं मर्ति च भूयासं

ब्राह्मणानां श्रेष्ठश्च भूयासम् १५ । यस्य द्रोणकलश उपदस्यति, कलशमेव तस्यो-पवायन्तं प्राणोनूपदस्यति प्राणो हि सोमस्तदाहुः, पयोऽवनयेदित्यऽपो त्वस्या-हुरन्तर्हितमेव वा, एतदप्पयो हिरण्यमेवाऽपोऽभ्यवनये, हिरण्यमभ्युन्नयेदऽमृतं वा, आप आयुर्हिरण्यममृतादेवाध्यायुरारभन्धत्ते, चत्वारो वरा देया, ब्रह्मण उद्गात्रे होत्रेऽध्वर्यव, एते वै यज्ञस्येन्द्रा, स्तानेव प्रीणाति, सैव तत्र प्रायश्चित्तिर्यस्य चमस उपदस्यति, चमसमेव तस्योपवायन्तं प्राणोनूपदस्यति, प्राणो हि सोमोऽयमध्व-र्युरन्तमं ग्रहं गृह्णीया, त्तस्य संपातमवनयेत्प्रायश्चित्यै वै सोमो गृह्यते प्रायश्चित्यै-वास्मै प्रायश्चित्तिं करोति, सर्वमायुरेति, सैव० यस्य ग्रावापि शीर्यते पशुभिर्वृ-ज्यते, पशवो हि ग्रावाणो द्युतानस्य मारुतस्य ब्रह्म सामेन स्तुवीरन्पशवो, वै द्युतानो मरुतः स्वेनैवैनं साम्ना सन्दधाति, पशुमान्भवति, सैव०, प्रजापतये स्वाहेत्य, भक्षणीयानुपरमेष्ववनयेत्प्राजापत्यो वै सोमः प्रतिष्ठामेवैनङ्गमयति सैव०, यस्य सोममभिदहेद्धाहानध्वर्युः स्पाशयेत, स्तोत्राण्युद्गाता शस्त्राणि होताथ यथापूर्वं यज्ञेन चरेयुः, पञ्च वरा देयाः, पङ्क्तो यज्ञो यज्ञमेवावरुन्धेऽवभृथं गत्वा,

४ आज्य.

पुनरुदेत्य पुरा द्वादश्याः पुनर्दीक्षेत, यद्वादशीमतिनयेदन्तर्यीयेत तत्र ता दक्षिणा दद्याद्यः पूर्वस्मिन्दास्यं भवति सैष० १६। सर्वान्वा एषोऽग्नौ कामान्प्रवेशयते योऽग्निमन्वाधाय व्रतमुपैति, स यदनिष्ट्वा प्रयायादकामप्रीता एनं कामा नानु-प्रयायुरतेजा अवीर्यः स्यात्स प्रयास्यं जुहुयात्; पुनन्त्वा अङ्गिरसमविश्वाः क्षुधितयः पृथक्, अग्ने कामाय येमिरे, इति कामानेवास्मिन्दधाति, कामप्रीता एनं कामा अनुप्रयान्ति, तेजस्वी वीर्यवान्भवति, सन्ततिर्वा एषा यज्ञस्य योऽग्निमन्वा-धाय व्रतमुपैति, स यदनिष्ट्वा उद्वयाद्विच्छित्तिरेवास्य सा प्राङ्मुखस्तं मनसोपतिष्ठेत, मन इव वै प्रजापतिः प्राजापत्यो यज्ञो यज्ञमेव सन्तनोति, भूरिति व्याहरेद्भूर्वै वै प्रजापतिर्भूतिमेवोपैत्यायुषा वा एष वीर्येण व्युध्यते, यस्याहिताग्नेरग्निरपक्षा-यति, स यावच्छम्यया पराविध्येद्यदि तावदपक्षायेत्तं सम्भरेत् ॥ इदन्त एकं पर ऊत एकं तृतीयेन ज्योतिषा संविशस्व, संवेशनस्तन्वे चारुरेधि प्रियो देवानां परमे जनित्रे, इति ब्राह्मणैवेनं सम्भरयति सैष०, यदि परस्तरामपक्षायेदनुप्रियाय, वसे-त्सैष०, ओषधीर्वा एतस्य पयः पशून्प्रविशति, यस्य हविषेऽपाकृतावत्सा धयन्ति

वायव्यां यवागूं निर्वपे, द्वायुर्वै पयसः प्रदाता तमेव भागधेयेनोपधावति, सोस्मैपयः प्रयच्छत्यथोत्तरस्मै हविषे वत्सानपावर्त्तये त्सैव० । १७ । अर्धं वा एतस्य यज्ञस्य मीयते, यस्य सायं दुग्धं हविरार्तिमार्च्छतीन्द्राय व्रीहीन्निरुप्योपवसेत्पयो वा ओषधयः पय एवारभ्योपवसति, यत्प्रातः स्यात्तच्छृतं कुर्युरैन्द्र इतरः पुरोळाशः स्यात्पयो वा ओषधयः पयः पयः पयसैवास्मै पयः प्रदापयत्यथोत्तरस्मै हविषे वत्सानपावर्तयेत् सैव०, उभयान्वा एष देवान्भागधेयेत् व्यर्धयति, ये यजमानस्य सायं च प्रातश्च गृहमागच्छन्ति, यस्य सायं प्रातर्दुग्धं हविरार्तिमार्च्छत्योदनं पञ्चशरावं निर्वपेदऽग्निर्देवतानां प्रथमं यजेदभिमुखा एव देवताः प्रीणात्यग्निं वा अन्वन्या देवता इन्द्रमन्यास्ता एवोभयीः प्रीणात्यथोत्तरस्मै हविषे वत्सानपावर्तये त्सैव०, यत्कीटावपन्नेन जुहुयादप्रजा अपशुर्यजमानः स्यादनायतने निनायेदनायतनः स्यान्मध्यमेन पर्णेन द्यावापृथिव्यावर्धन्तः परिनिनयेत् द्यावापृथिवी वै यज्ञस्य प्रतिष्ठा प्रतिष्ठामेवैनं गमयति सैव०, यत्प्रयाजेष्वऽनिष्टेषु प्राङ्गारःस्कन्देदऽध्वर्यवे च, यजमानाय चाकं स्यादक्षिणा ब्रह्मणे च

यजमानाय चाकं स्यादध्वर्यवे होत्रे च पत्न्यै चाकं स्यादुदकम्भिषे च यजमानस्य च पशुभ्योऽकं स्यात्तं प्रहरेत्, सहस्रशृङ्गो वृषभो, जातवेदः स्तोमपृष्ठो घृतवान्सुप्रतीकः मा मा हिंसीन्नाथितो नेत्त्वा जहानि, सहस्रपोषं मे गोपोषं च यच्छ इति ब्राह्मणेनैवं प्रहरति सैव०, अर्धं वा एतस्य यज्ञस्य मीयते यस्य व्रतेऽन्हपत्न्यानालम्भुका भवति, तामपरुध्य यजेत, सर्वेणैव यज्ञेन यजेत तामिष्टोपह्वयेत, सा त्वमस्य मोऽहममोऽहमस्मि सा त्वम्, ता एहि संरभावहै, पुंसे पुत्राय कर्तव्ये रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय, इत्यर्धं एवैनामाभजति सैव०, १८ यदवृष्टेन जुहुयादपरूपमस्यात्संजायेत, यदस्येयात्पापीयान्स्याद्यन्न जुहुयादार्तिमार्च्छेत्, मित्रो जनन्यातयति प्रजानन्मित्रो दधार पृथिवीमुतद्याम्, मित्राकृष्टीरनिमिषाभिचष्टे मित्राय हव्यं घृतवज्जुहोम, इति मैत्र्यर्चा समिधमाधाय होतव्यं मित्रो वै यज्ञस्य शान्तिर्मित्रेणैवैनं शमयति तज्जुह्वाऽथाम्यां दुग्ध्वा पुनर्होतव्यं सैव०, यत्कीटावपन्नेन जुहुयादऽप्रजा अपशुर्यजमानः स्यात्, यन्न जुहुयादार्तिमार्छेत्प्राजापत्यर्चा वाल्मीकवपायामवनयेत्, प्राजापत्यो वै वाल्मीको यज्ञः, प्रजापति-

यज्ञ एव यज्ञं प्रतिष्ठापयति, तदुत्सावाभ्यां हुत्वा पुनर्होतव्यं सैव०, यदि पूर्व-
स्यामाहुत्यां हुतायामुत्तराहुतिःस्कन्देद्द्विपद्भिः पशुभिर्यजमानो व्यृध्यते, यद्यभिशुष्या-
चतुष्पाद्भिः पशुभिर्यजमानो व्यृध्यते, यत्र वेत्थ वनस्पते देवानां गुह्या नामानि तत्र
हव्यानि कामय, इति वानस्पत्ययर्चा समिधमादाय होतव्यं, वनस्पतिर्वै वाताम्तां
यानान्तां चाहुतीः विदाधार, तदुत्सावाऽथाभ्यां हुत्वा पुनर्होतव्यं सैव०, १९ ॥
देवाश्चवाऽसुराश्चास्मिंल्लोके आसन्प्रजापतिरकामयत, पराऽसुरान् देवं प्रजा सृजे-
येति, स एतानि चातुर्मास्यान्यपश्यत्स चातुर्मास्यैरेवासुरान्प्रानुदत, चातुर्मास्यैः
प्रजा असृजत, य एवं विद्वांश्चातुर्मास्यैर्यजेत, परा भ्रातृव्यं नुदते,प्र प्रजया
प्रपशुभिर्जायते,ऽग्निष्टोमाद्वैश्वदेवं यज्ञक्रतुर्निर्माय प्रजापतिः प्रजा असृजतोक्था
द्वरुणप्रघासान्यज्ञक्रतुं निर्माय, प्रजा वरुणेन ग्राहयेदतिरात्रात्साकमेधान्यज्ञक्रतु-
र्निर्मायेन्द्रो वृत्रमहन्वैश्वदेवेन वै सोऽसुरान्प्राणुदत, वैश्वदेवेन प्रजा असृजत,
सृष्टा वै अन्याः प्रजा आसन्नसृष्टा अन्या,अथ प्रजापतिरकामयत, प्रजाः सृजेयेति,
संवत्सरो वै यज्ञो यज्ञः प्रजापतिः, स एते आत्मनोधिपयसी निरमिमीतो धान्यं

च यद्वं चापैताभ्यो देवताभ्य एतानि हवींषि भागं निरवपत्तैः प्रजा असृजत तेभ्यो वैताः प्रजाः प्राजायन्त तथैव एतानि पञ्च हवींषि पञ्च ऋतवस्त एवं प्रजायन्ते,ऽग्नि-रेव प्राजापयत्सोमो रेतो दधान्मिथुनं वा अग्निश्च सोमश्च सविता प्रासुवत्संवत्सरो वै सविता द्वादश मासाः संवत्सरस्याद्वादशकपालोऽथो वैश्वदेवत्वादेव द्वादश-कपाल उपांशु यजत्यनिरुक्तो हि संवत्सरः सरस्वत्यैव सृष्टा क्षुधायमदधा, त्पूषाणं प्रतिष्ठामभ्यसृजन्त, वाग्वै सरस्वती पशवः पूषा मिथुनं, वाक्च पशवश्च मध्यतो वै प्रजा विसृजन्तेऽन्ततो मिथुनाद्विपूषीः प्रजायन्ते, तदेतत्प्रजापतेरेवाधिमध्यतः प्रजा विसृजन्ते,ऽथोदोत्ततो मिथुनादुभयतो विपूषीः प्रजायन्ते (तेजोसि) वातप्रानि वा एतानि हवींषि अग्निना वा अनीकेनेन्द्रो वृत्रमहन्सोमेन राज्ञा सवित्रा प्रसूत सरस्वत्या पैन्या पूषावीर्यैरयतिष्ठत विजितिरेवैतानि हवींषि ॥ इति श्रीयजुषि काठके चरकशाखायामुपमिकायां नाम प्रायश्चित्तस्थानकं पञ्चत्रिंशं संपूर्णम् ॥ प्रायश्चित्तं पठेद्यो वै प्रातरुत्थाय मानवः । अश्वमेधसहस्राणां फलं सर्वशुभप्रदम् । हुनेद्यो वै सदा मर्त्यो यज्ञे नैमित्तिके परम् । नित्यपापाद्विनिर्मुक्तिर्याज्ञिकस्य द्विजस्य च । प्रका-

त्पठेच्छृणुयान्मर्त्यो नित्ये नैमित्तिके तथा । अगम्यागमनादिभ्यो मुक्तो याति परं पदम् । अभक्ष्यभक्षणादिभ्यो स्वग्राह्यग्रहणादितः । अकार्यकरणाच्चैव स्वकर्माणि विलोपकः । स्वधर्मपङ्क्तिनाशाय स्वकर्माणि च निन्दकः । एतैः पापैर्विनिर्मुक्तो विष्णुसायुज्यमाप्नुयात् अनेन० भागवान्वासुदेवः प्रीयतां प्रीतोऽस्तु ॥

अथाषाढमाघकार्तिकवैशाखमासव्रतोद्यापनम् ।

अश्मचूर्णेन ग्रहमण्डलं तद्दक्षिणे विष्णुप्रतिमां वेदचतुष्टयं क्षेत्रेशद्वयं च संस्थाप्य । पञ्चगव्येन शुद्धिं विधाय ॥ प्रधानं कलशे । अग्नयेनमः, वा० सू० ब्र० प्र० कूष्मार्षिभ्यः । ॥६॥ अतो देवा० प्रतद्विष्णुः० । तद्विष्णुः० वासुदेवाय नमः ॥ ८ ॥ प्रतिमायाः । पुरुषसूक्तं ऋचः १६ शेषशायिने नारा० । चतुर्वेदेषु । यो रुद्रो० । अग्निमीळे० । इषे त्वोर्जे० । अग्न आयाहि० । शन्नो देवी० । यजमानमानीय । अ नाभौ । अपतावत् महागणपतये० अग्नये० वासुदेवाय ॥ ८ ॥ शेषशायिने नारायणाय रुद्राय जलधेनुविषये । विष्णवे वा सानुचराय पृथिव्यै अग्नये ऋग्वेदाय ब्रह्मणे छन्दोभ्यः । अन्तरिक्षाय वायवे यजुर्वेदाय ब्र० छ० । दिवे सूर्याय सामवे० ब्र० छ० । दिग्भ्यः चन्द्रमसे अथर्ववे०

ऋ०छ० । इन्द्रायवज्रहस्ताय दीपधूपः । गायत्र्यै नमः ३ नमोस्त्वनन्ताय इति सर्वा विष्णुगायत्री आत्मनो० त्रयोदश्यां दशमीनक्तव्रतनि० चतुर्दश्यामेकादशीव्रतोपवासनि० पूर्णमास्यां द्वादशीपारणनिमित्तं अमुकमासव्रतोद्यापननिमित्तं कलशपू० दिक्पालपू० ग्रहमण्डलपू० शेषशायिपू० चतुर्वेदेश्वरपू० क्षेत्रेश्वरपूजनमर्चा० । दक्षिणान्तं । अथाग्निकर्म । आज्यभागान्तं । मेधातिथिर्ऋषिः गायत्री छन्दः । विष्णुर्दे० समिद्धोमे विनि० । अतो देवा० १०८ ध्यानं । नि ष्वसीद० प्रधानं । अतो देवा० इत्यादि । ततोऽन्नहोमः । प्रजापतिः ऋ० । गा० छ० । विष्णुर्दे० । अन्नहोमे वि० । तद्विष्णोः १०८ ध्यानं । नि ष्वसीद । एवमाज्यहोमः । काण्वायन ऋषिः । त्रिष्टुप् छ० । विष्णुर्देवता आज्यहो० । प्र तद्विष्णु स्तवते० १०८ ध्यानं० नि ष्वसीद । तर्पणम् । विष्णुपञ्चकं (पृ० १-१) । कूष्माण्डं सार्धं (पृ०, ६६-५) च । तान आपः शंस्योना भवन्तु इत्यन्तं कूष्माण्डग्रहणं (पृ० ७७-९) च हुत्वा चतुर्गृहीतेनाऽग्नये स्वाहेति षट् प्रधानानि । ततो यवतिलहोमः । ओंकारो यस्येति व्याहृतिहोमः । अतो देवा १०८ ऋतुपतिं हुत्वा प्रायश्चित्तस्थानकं (पृ० ८७-९)

सहस्रशीर्षा १६ विष्णुपुरुषसूक्तं । तर्पणं । यो रुद्रो इत्यादि पञ्चायतनं । इन्द्रा पर्वता इति सूक्तानि । रुद्रपञ्चकादि । नैवेद्य मनु । (पृ० ७६–१) वैश्वानरे-त्युपस्थानम् । पुनः कूष्माण्डानि कू० (पृ० ६९–४) सौत्रामण्या तावत् । वैश्वा-नरायेति तर्पणम् । इळामग्ने० पूर्णां विना । वैश्वदेवं । स्विष्टकृतं विना । गोदानं ब्राह्मणपूजनं । गायत्र्यै नमः ३ विष्णुगायत्री । अग्नेः वायोः० ६ ऋतुपतेः० त्रयो-दश्यां दशमी० अमुकमासव्रतोद्यापनाच्छिद्रनिमित्तं ब्राह्मणपू० । दक्षिणान्तं । एता देवता विना । क्षेत्रेशबलिः । विष्णुप्रतिमा विसर्जनं । तस्यां क्षमापुष्पाणि । आपन्नोस्मि० । ध्येयः सदा० । नमस्तेऽस्तु हृषीकेश पद्मनाभाय विष्णवे । दामोदर नमस्तुभ्यं केशवाय नमो नमः ॥ १ ॥ गोविन्दाय नमस्तुभ्यं विश्व-रूपाय ते नमः । मधुरिपो नमस्तुभ्यं त्रिविक्रम नमो नमः ॥ २ ॥ नमो वामनरूपाय श्रीधराय नमो नमः । व्रतेनानेन सन्तुष्टः प्रीयतां मधुसूदनः ॥ ३ ॥ अनर्घ्यैः सर्वदेवेभ्यः सप्तर्षिभ्यस्तथैव च । व्रते० मम केशवः ॥ ४ ॥ रुक्मिणी-पतिः सर्वेशो नम्रः सर्वैः सदानवैः । व्रते० गरुडध्वजः ॥ ५ ॥ नीलाञ्जनगि-

रिप्रक्षः शंखचक्रगदाधरः । व्रते० मम शान्तिदः ॥ ६ ॥ दैत्यानां मारणे युक्तो नरकार्णवशोषकः । व्र० कूर्मरूपभृत् ॥ ७ ॥ उद्धृता भूः पुरा येन पातालाज्जलमध्यतः । व्र० पृथिवीधरः ॥ ८ ॥ हिरण्याख्योऽसुरो येन वक्ष उत्पाट्य मारितः । व्र० नरकेसरी ॥ ९ ॥ शक्रानुजो महासत्त्वस्त्रिजगदुद्धारको विभुः । व्र० वासवानुजः ॥ १० ॥ पर्वताधिपती रामः क्षत्रान्तकरणोद्यतः । व्र० जमदग्निभूः ॥ ११ ॥ बद्ध्वा सेतुं समुद्रस्य रक्षोघ्नो रघुवंशजः । व्र० रावणान्तकः ॥ १२ ॥ वसुदेवात्मजः श्रीमान्दानवारिर्महाबलः । व्र० कृष्णरूपधृक् ॥ १३ ॥ कलौ छन्नवपुर्देवो योगनिद्रामिषात्प्रभुः । व्र० बुद्धरूपभृत् ॥ १४ ॥ नीलाम्बरधरो विष्णुर्हृषीकेशोऽतितुष्टहृत् । व्र० कल्किरूपभृत् ॥ जगदुद्धारको भक्त्या नानाभववरप्रदः । व्रतेनानेन सन्तुष्टः प्रीयतां मधुसूदनः ॥ विश्वरूपो महाकायः सृष्टिसंहारकारकः । ब्रह्माथ भास्करः शम्भुः सर्वव्यापी महेश्वरः । शिव इन्द्रो कुमारोऽथ मनुरात्रेयनारदौ । कश्यपश्च तथा व्यासो याज्ञवल्क्यवसिष्ठकौ ॥ कपिलो वामदेवश्च व्रतेनानेन तर्पिताः ॥ संसारपाथोनिधितारणाय निःशेषभूतोदयकारणाय ।

नमोन्तकत्रासनिवारकाय विपत्क्रमोन्मूलनवारणाय ॥ अच्युतानन्तगोविन्द वैकुण्ठ गरुडध्वज । विष्णो पीताम्बरधर वासुदेव नमोस्तु ते ॥ यस्य हस्ते गदाच० ॥ ईप्सितं मे देहि कामं पुत्रांश्च वाञ्छितं धनम् । सन्तुष्टो देहि मे नित्यं भगवन्भक्तवत्सल ॥ जप्तो ध्यातः श्रुतो नित्यं भुक्तिमुक्तिप्रदो भव । कर्मणा मनसा वाचा यौवने वार्द्धकेपि वा ॥ यन्मयोपार्जितं पापं तत्सर्वं हर मे हरे ॥ गर्भवासेथवा बाल्ये यत्कृतं पापसञ्चयम् । तं मे नाशय देवेश भोगमोक्षौ ददस्व मे ॥ निमग्नोहं भवाम्भोधौ मोहकच्छपसङ्कुले । विषयोरगदष्टोऽस्मि पाहि नारायण प्रभो ॥ १ ॥ वित्तोपार्जनकार्यस्तु चिन्ताशतसमाकुलः । पुण्यहीनशरीरोहं पाहि० ॥ २ ॥ कान्ताकटाक्षविशिखैर्नष्टचेताः प्रलोभवान् । मोहनष्टविवेकोहं पाहि० स्वामिन्मोहसुरापानक्षीबेण जन्म निष्फलम् । कृतं किमद्य करवै पाहि० ॥ ४ ॥ करणग्रामचौरैर्मे हृतं ज्ञानधनं बलात् । कीनाशपाशग्रस्तं मां पाहि० ॥ ५ ॥ पुण्यैर्नोपार्जितं धर्मं नो कृतं मुक्तिसाधनम् । संसारमायया क्रान्तं पाहि० ॥ ६ ॥ कृपाम्बुधे हि चिन्तामणिस्त्वं शरणं तव । प्रपद्येऽनन्यशरणं पाहि० ॥ ७ ॥

कालाम्बुधरद्युङ्कारनदेग्निद्यवगर्ति हरे। कल्याकन्दमानं मां पाहि० ॥ ८ ॥ प्रपन्नं पाहि मामीश भीतं मृत्युग्रहार्णवात्। इति शेषां समादातु शिरस्यादाय सत्वरम् ॥ ९ ॥ नमो ब्रह्मणे इति तर्पणम् ॥ आदौ जलकुम्भदानं ॥ साविन्नाणि० आत्मनो० अमुकमासव्रतोद्यापननिमित्तं जलकुम्भं सहिरण्यं साज्ञं सवस्त्रं ददानि ॥ १ ॥ ततो विष्णुप्रतिमा होत्रे ॥ साविन्नाणि० यथोक्तफलवृद्ध्यर्थं मनोवाक्कायज्ञाताज्ञाताशेषपापक्षयार्थं ऐहिकामुष्मिकफलभूतायुरारोग्यादिप्राप्त्यर्थं च त्रयोदश्यां दशमीनक्तव्रतनि० चतुर्दश्यां एकादशीव्रतोपवासनि० पूर्णमास्यां अमुकमासव्रतोद्यापननिमित्तं श्रीसहिताय जनार्दनाय, विभूतिस० मधुसूदनाय। इमां श्रीस० जनार्दनविभूतिस० मधुसूदनप्रतिमां सहिरण्यां सवासस्रं सार्घ्यां ददानि ३ प्रतिगृह्णामि ॥ ततो दध्यक्षतैस्सलिलैस्तर्पणं। ये चरन्ति सदा मेरौ ब्रह्मणाधिष्ठिताः सुराः। तृप्तिमायान्तु ते सर्वे अमुको (माघस्नो-वैशाखो-आषाढो-कार्तिको वा) द्यापनाद्धरे ॥ १ ॥ नागलोकगता ये च हाटकेशार्चने रताः। तृप्ति० ॥ २ ॥ अत्रिर्वसिष्ठः पुलहः कश्यपो गौतमो भृगुः ॥ तृ० ॥ च्यवनो व्याघ्रपाद्विष्णुर्देवलो

लोमहर्षणः । तृ० । कश्यपो वै दीर्घतपाः पाराशर्यपराशरौ । तृ० । विश्वामित्रोऽथ जाबालिर्भारद्वाजश्च शौनकः । तृ० । कण्ठोपवीती । सनन्दः पिप्पलादश्च वोढः पञ्चशिखस्तथा । तृ० । याज्ञवल्क्यो मनुर्दक्षः सनकाग्निमरीचयः । तृ० । लौगाक्षिः कपिलः काण्वो हारितो जमदग्नयः । तृ० । आपस्तम्भः सुमन्तुश्च बौधायनबलायनौ । तृ० । अपसव्येन । पिता पितामहश्चैव तथैव प्रपितामहः । । तृ० । माता पितामही चैव तथैव प्रपितामही । तृ० । श्वश्रूः स्वसा गुरुपत्नी भार्या मित्रं च बान्धवः । तृ० । ये मत्कुलाः स्वर्गलोके नरके वा वसन्ति ये । अवीच्यन्तर्गता ये च कुम्भीपाके च ये स्थिताः । तृ० । सव्येन । नमो देवेभ्यः० ॥ एता देवताः० ॥ ब्राह्मणाच्छिद्रं ॥ पूर्णां दत्वा । अग्नये स्विष्टकृते । विमुञ्चामि ॥३॥ धर्मं देहि । कलशाच्छिद्रं ॥ आपश्चोपि । उदकलशं । सुराश्त्वामभि० ॥ पृ० १०९–२ घृतपात्रं (पृ० ११५–४) सङ्कल्पयेत् । सावित्राग्नि० आत्मनो० श्रीविष्णुप्रीत्यर्थं इदमाज्यपात्रं देवप्रीत्यै सङ्कल्पयामि ॥ इति आषाढमाघकार्तिकवैशाखमासव्रतोद्यापनं ॥

अथ तुलादानविधिः ।

अक्षतचूर्णेन ग्रहमण्डलं तद्दक्षिणतो दश दिक्पालांस्तन्मध्ये वेदचतुष्टयं चोल्लिख्य । प्रधानं । गणानान्त्वा । विनायकाय० । ये के चक्षा० । यो रुद्रो० । यो विश्व-चक्षु० । ब्रह्मा देवानां० । प्र तद्विष्णु० । वनस्पतिर्विदाङ्गोहि भूयाद्स्मत्सखा प्रतरणः सुवीरः । गोभिः सन्नद्धो असि वीरता इव स्थाजिर्वाजयतु जित्वानि । दिक्पालेषु ॥ इन्द्रा पर्वता० । ऋ. १० । वेदचतुष्टयेषु । यो रुद्रो० ऋ० ५ । तद्वि-ष्णोरित्यादि ॥ अ आभी० । अद्य तावत् महागणपतये० विनायकाय० ब्रह्मविष्णु-महेश्वरेभ्यः । अष्टाभ्यो वसुभ्यः । एकादश रुद्रेभ्यः । द्वादशादित्येभ्यः । एकोन-पञ्चाशन्मरुद्गणेभ्यः । वनस्पतिदेवताभ्यः इन्द्रादिदिक्पालेभ्यः रुद्राय सानुचराय । पृथिव्यै, अग्नये, ऋग्वेदाय, ब्रह्मणे छन्दोभ्यः । अन्तरिक्षाय, वायवे,-यजुर्वे,ब्र० छ० । दिवे, सूर्याय, सामवे० ब्र० छ । दिग्भ्यः, चन्द्रमसे, अथर्ववे० ब्र० छ० विष्णुपञ्चा-यतनदेवताभ्यः । आत्मनः सपत्नीकस्य सपुत्रस्य स्वर्गापवर्गसिद्ध्यर्थं अमुकराशिग्र-हपीडानिवारणार्थं तुलापुरुषदाननिमित्तं दीपधूपः ॥ गायत्र्यै नमः ॥ ३ ॥ महागण-पतेः० कलशपू० दिक्पालपू० चतुर्वेदेश्वरपू० अर्चामहं करिष्ये ॥ कलशावाहनमनुदि-

कपालधारिणम् (आवाहयेल्लोकपतीन्क्रमेण मंत्रैरमीभिर्यजमानवर्यः) । पूर्वे । एह्येहि सर्वामरसिद्धसाध्यैरभिष्टुतो वज्रधरोऽमरेश । संवीज्यमानोऽप्सरसां गणेन रक्षाध्वरं नो भगवन्नमस्ते । इन्द्राय नमः । इन्द्रा पर्वता । आग्नेये । एह्येहि वैश्वानर हव्यवाह मुनिप्रवीरैरभितोऽभिजुष्टः । तेजोवता लोकगणेन सार्धं ममाध्वरं रक्ष विभो नमस्ते । अग्नयेनमः । अग्निं सर्हि० । दक्षिणे । एह्येहि वैवस्वत लोकनाथ सर्वामरैरर्चित दिव्यमूर्ते । शुभाशुभाचारविचारसाक्षिन् शिवाय नः पाहि मखं नमस्ते । यमाय नमः । यमो दाधार० । नैर्ऋते । एह्येहि रक्षोगणनायकस्त्वं विशालवेतालपिशाचसङ्घैः । ममाध्वरं पाहि शुभाधिनाथ लोकेश्वरस्त्वं भगवन्नमस्ते । निर्ऋतयेनमः । यन्ते देवे० । पश्चिमे । एह्येहि यादोगणवारिधीनां गणेश पर्जन्ययुतः प्रचेतः । विद्याधरेन्द्रामरगीयमानः पाहि त्वमस्मान्भगवन्नमस्ते । वरुणायनमः । उदुत्तमं । वायवे । एह्येहि यज्ञे मम रक्षणाय मृगाधिरूढः सह सिद्धसंघैः । समीरण प्राणवती-सहायो गृहाण पूजां भगवन्नमस्ते । वायवेनमः । वायवायाहि । उत्तरे । एह्येहि यक्षेश्वर यज्ञरक्षां कुरुष्व यक्षाधिगणेन साकम् । सर्वैर्निधीशैः सह भूतसंघैर्गृहाण पूजां भगवन्नमस्ते । कुबेरायनमः । सोमो धेनुं । ईशाने । एह्येहि विश्वेश्वर नस्त्रिशूलकपाल-

रुद्राङ्गवरैश्च साकम् । भूतेश लोकेश्वर यज्ञसिद्ध्यै गृहाण पूजां भगवन्नमस्ते । ईशानायनमः । ईशानन्त्वा० । ऊर्द्ध्वे । एह्येहि विश्वाधिपते मुनीन्द्रलोकेन सार्धं पितृदेवताभिः । चतुर्मुख त्वं भव नः शिवाय पितामहायाद्य विभो नमस्ते । ब्रह्मणेनमः । ब्रह्म जज्ञानं । अधः । एह्येहि पातालधराधरेन्द्रनागाङ्गनाकिन्नरगीयमानः । रक्षोगणेन्द्रामरलोकयुक्तोऽप्यनन्त रक्षाध्वरमस्मदीयम् । विष्णवेनमः । आयङ्गौः पृश्निरक्रमीदसन्मातरं पुनः पितरं च प्रयत्सुः । वषट्ते० । मध्ये । आवाहयाम्यहं देवं रुद्रं (विष्णुं) सानुचरं विभुम् । चतुर्वेदेश्वरं श्रेष्ठं मध्ये तिष्ठन्तमव्ययम् । रुद्राय (विष्णवे) सानुचराय । यो रुद्रो० (प्र तद्विष्णुः) पूर्वे । आवाहयामि पृथिवीमग्निना संयुतां शुभाम् । ब्रह्माणं पूर्वतो देशे छन्दांसि सर्वसिद्धये । पृथिव्यै अ० ऋ, ब्र, छ, अग्निमीळे । दक्षिणे । आवाहयाम्यन्तरिक्षं यजुर्वेदं च मारुतम् । ब्रह्माणं दक्षिणे देशे छन्दांसि सर्वसिद्धये । अन्तरि, वा, य, ब्र, छ, । इषे त्वा० । पश्चिमे । दिवमावाहयिष्यामि सूर्यसामसमन्विताम् । ब्रह्माणं पश्चिमे देशे छन्दांसि सर्वसिद्धये । दिवे, सू, सा, ब्र, छ । अग्न आयाहि । उत्तरे । दिशश्चन्द्रमसं देवमथर्वणयुतं शुभम् । आवाहयामि ब्रह्माणं छन्दांसि चोत्तरे दिशि । दिग्भ्यः,

चन्द्रमस अ, म, छ । शन्नो देवी ॥ दक्षिणान्तं । अथाग्निकर्म । अग्निकुण्डपूजादि । समिदग्न्याज्यभागं पञ्चकत्रयं रक्षोघ्नमंत्राश्च हुत्वा ऋतुतिथिः । नैवेद्यं । ब्राह्मणपूजनं विना । तुलापूजनं यथा । तुलामध्ये हिरण्मयं तुलापुरुषं विष्णुरूपं स्थापयेत् । सं स्वः सृजामि० । अश्विनोः० । गायत्र्यै नमः ३ दक्षिणपदे सूर्यस्य वामे सोमस्य । द । यमस्य । वा । वरुणस्य । आधाररज्जौ द । वासुकेः । वा । पुष्कराक्षस्य । दण्डविवरे । द । धर्मस्य । वा । अधर्मस्य । मध्ये । ध्रुवस्य विष्णोः । आधाररत्नदण्डे । इन्द्रस्य वज्रहस्तस्य ॥ १० ॥ तुलापुरुषस्य विष्णोः आत्मनो० तुलादाननिमित्तं तुलापूजनमर्चामहं करिष्ये । आवाहयामि वरदं सहस्रांशुं दिवाकरम् । तेजोमूर्तिं दुराधर्षं ऋक्सामयजुषां पतिम् । त्रैलोक्यमण्डपे दीपं सर्वव्याधिविनाशनम् । रक्तवर्णो० । आवाहयामि वै चन्द्रं मृगाङ्कं नीलवाससम् । नक्षत्रेशं क्षपानाथं सर्वाप्यायकरं विभुम् । शुक्लवर्णो० । आवाहयाम्यहं देवं धर्मराजं महायकम् । महिषासनमारूढं दण्डहस्तं भयानकम् । कृष्णव० ॥ आवाहयाम्यहं देवं वरुणं यादसां पतिम् । पाशहस्तं वारिधीशं द्विभुजं मकरासनम् । नीलवर्णो० ॥ आवाहयाम्यहं देवं वासुकिं नागराजकम् । प्राणिनां सर्वभूतानां विष्णुरूपं शिव-

शिवम् । शुक्ल० ॥ आवाहयाम्यहं देवं पुष्कराख्यं मनोहरम् । तेजोरूपं समस्तानां देवानां च सदाप्रियम् ॥ शुक्ल० ॥ आवाहयाम्यहं देवमधर्मं दुर्जनप्रियम् । दुर्गतिप्रदं तेषां शमने शङ्करं प्रभुम् ॥ कृष्ण० ॥ आवाहयाम्यहं देवं ध्रुवराजं महाबलम् । औत्तानपादिं राजानं ग्रहाणां प्रवरं सदा । पीत० ॥ आवाहयाम्यहं देवं ब्रह्मविष्णुमहेश्वरम् । त्रिमूर्तिं च त्रिदेवेशं रक्तं पीतं च निर्मलम् । त्रिवर्णोऽयं महातेजाश्चन्द्रगन्धामभूषितः ॥ भग० । दक्षिणान्तम् । ततो दिक्पालवेदेश्वरान्विष्ठन्म् ॥ गायत्र्यै नमः ॥ ३ ॥ इन्द्रस्य, अग्नेः, यमस्य, नैर्ऋतेः, वरुणस्य, वायोः, कुबेरस्य, ईशानस्य, ब्रह्मणः, विष्णोः । रुद्रस्य, वा (विष्णोः ।) सानुचरस्य । पू, अ, ऋ, ग्र, छ । अ, वा, य, ग्र, छ, । दि, सू, सा, ग्र, छ, । दिशां, च, भ, ग्र, छ । आत्मनो० दशदिक्पालपूजनं चतुर्वेदेश्वर० । यथोदकं अपन्नो० । ऐरावतसमारूढं स्वर्णवर्णं किरीटिनम् । सहस्रनयनं शक्रं वज्रहस्तं विभावयेत् ॥ १ ॥ सप्तार्चिषं तु बिभ्राणमक्षमालाकमण्डलुम् । रक्तं ज्वालाकुलं ध्यायेच्छक्तिहस्तमजासनम् ॥ २ ॥ कृतान्तं महिषारूढं दण्डहस्तं भयानकम् । कालपाशधरं ध्यायेत्काकं दक्षिणदिक्पतिम् ॥ ३ ॥ रक्तनेत्रं शवारूढं नीलोत्पलदलप्रभम् । कृपाणपाणिमस्त्रौघं

पिबन्तं राक्षसं स्मरेत् ॥ ४ ॥ नागपाशधरं हृष्टं रत्नौघद्युतिविग्रहम् । शशाङ्कधवलं ध्यायेद्वरुणं मकरासनम् ॥ ५ ॥ आपीतमरुणच्छायं स्मरेद्वै ध्वजधारिणम् । प्राणभूतं च भूतानां हरिणस्थं समीरणम् ॥ ६ ॥ कुबेरं मेषमारूढं सर्वगं सर्वविग्रहम् । स्वर्णच्छायाङ्गदाहस्तमुत्तराधिपतिं स्मरेत् ॥ ७ ॥ ईशानं वृषभारूढं त्रिशूलव्यालधारिणम् । शरच्चन्द्रावतंसं च त्र्यक्षं ध्यायेद्विधुप्रियम् ॥ ८ ॥ पीनं पीतं चतुर्बाहुं हंसयानं चतुर्मुखम् । अजं ध्यायेद्धि बिभ्राणं दण्डाक्षस्त्रक्कमण्डलुम् ॥ ९ ॥ अनन्तं पुण्डरीकाक्षं कूर्मासनं विचिन्तयेत् । शङ्खं चक्रं गदां खड्गं बिभ्राणं च चतुर्भुजैः ॥१०॥ आह्वानं । नमो ब्र । तानेव तुलायाः परितः । एह्येहि सर्वा० पृ० १०९-१३ । पठन्क्षिपेत् । तेषां मध्ये वेदचतुष्टयं च ॥ नमस्करः । त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च । ब्रह्मविष्णुशिवैः साकं रक्षां कुर्वन्तु मां सदा ॥ १ ॥ देवदानवगन्धर्वयक्षराक्षसपन्नगाः । ऋषयः पितरो गावो देवमातर एव च ॥२॥ ममाध्वरंतुते सर्वे रक्षां कुर्वन्तु दर्शिताः । त्रिः प्रदक्षिणमावृत्य गृहीतकुसुमाञ्जलिः ॥ ३ ॥ ततो मङ्गलशब्देन नादितो नरपुङ्गवः । शुक्लमाल्याम्बरधरस्तां तुलामनुमन्त्रयेत् ॥ ४ ॥ शन्न इन्द्राग्नी पृ० ८१-८ इत्यादि शन्नो रजसस्पतिरस्तु जिष्णुरित्यन्तम् । "ऋचः ५"

पठन् तुलायां पुष्पाञ्जलिं क्षिपेत् । पुनश्च । नमस्ते सर्वदेवानां शक्तिस्त्वं सत्यमाश्रिता । साक्षिभूता जगद्धात्री निर्मिता विश्वयोनिना ॥१॥ एकतः सर्वपापघ्नी चैकतोऽनृतहा तथा । धर्माधर्मकृतौ मध्ये स्थापितासि जगद्धिते २ त्वं तुले सर्वभूतानां प्रमाणमिति कीर्तिता । मां तोलयन्ती संसारादुद्धरस्व नमोऽस्तु ते ॥३॥ योऽसौ तत्त्वाधिपो देवः पुरुषो नादिमान्स्वयम् । स एषोधिष्ठितो देवि त्वया तस्मान्नमो नमः ॥ ४ ॥ नमो नमस्ते गोविन्द तुलापुरुषसंज्ञक । त्वं हरे तारयस्वास्माद्घोरात्संसारसागरात् ॥ ५ ॥ नमस्ते सर्वदेवानां साक्षिभूते सनातने । पितामहेन देवेशि निर्मितासि जगद्धिते ॥६॥ पुण्यकालं समासाद्य कृत्वैवमधिवासनम् । पुनः प्रदक्षिणं कृत्वा तुलां तामारुहेत्पुनः ॥ ७ ॥ सखड्गचर्मकवची सर्वाभरणभूषितः । धर्मराजं समादाय हेमसूत्रेण भूषिताम् ॥ ८ ॥ कराभ्यां बद्धमुष्टिभ्यां तिष्ठेत्पश्येद्धरेर्मुखम् । तत्रोपरि तुलाभागे न्यसेत्स द्विजपुङ्गवः ॥९॥ सर्वं धान्यादि तथावत्काञ्चनादि च निर्मलम् । मुक्तिका-मस्तु कुर्वीत भूमिसंस्थो नरोत्तमः ॥१०॥ क्षणमात्रं ततः स्थित्वा पुनरेवमुदीरयेत् ॥ त्वया धृतं जगत्सर्वं स्थावरं जङ्गमं च यत् । सर्वभूतात्मभूतस्थे नमस्ते विश्वधारिणि ॥१॥ नमस्ते सर्वभूतानां साक्षिभूते सनातने । जगद्धिते निर्मितासि ब्रह्मणा ते नमो-

नमः ॥ २ ॥ शक्र इन्द्राग्नी इति वै क्षणमात्रं पुनः पठन् । त्रिः प्रक्रम्य तथाग्रे दक्षिणाभिमुखः पठेत् । खड्गपाणिः शनैः (पृ० ८०—८) सूक्ष्ममवतीर्य क्षिपेदसिम् । स्नात्वा तुलादक्षिपादे ग्रहान्लोकेशांश्च तर्पयेत् । उदयंस्तु महाभानुरित्याद्यै (पृ० १०५—११) ततो ब्रह्मर्षितर्पणम् ॥२॥ ब्रह्मा तृप्यतामित्यादि । गायत्र्यै नमः ३ सूर्यस्य सोमस्य (११३—४) इत्यादि अच्छिद्रम् ॥ यवोदकम् ॥ आपश्चोस्मि । सूर्याय विश्वरूपाय त्रिजगज्ज्योतिरूपिणे । सोमाय च नमस्तुभ्यं यमाय वरुणाय च ॥ १ ॥ वासुकिपुष्कराख्याभ्यां नमस्ताभ्यां करोम्यहम् । धर्माधर्मौ ध्रुवं विष्णुं नमस्यामि सदा मुदा २ आह्वानं । नमोब्रह्मणे । अग्नेर्यविष्ठपूजनम् । पूर्णा । विमुच्य । पुनः परिसमूह्य ॥९॥ वैश्वदेवं । क्षेत्रेशबलिः । कलशपृच्छां विसर्ज्य । आपश्चोस्मि । उदकलशं ॥ इति तुलापुरुषदानविधिः ।

॥ ॐ अथ कन्यासंस्कारविधिः ॥

अश्मचूर्णेन ब्रह्मकलशमुल्लिख्य । ब्रह्मा देवानां० । ब्राह्म्यै माहेश्वर्यै कौमार्यै वैष्णव्यै वाराह्यै नारसिंह्यै ऐन्द्र्यै ७ । गौरीर्मिमाय० । गौर्यै पद्मायै शच्यै मेधायै सावित्र्यै विजयायै जयायै ७ दिव्यं सुपर्णं० । देवसेनायै स्वाहायै स्वधायै मातृभ्यः लोकमातृभ्यः धृत्यै तुष्ट्यै । जातवेदसे० । पुष्ट्यै आत्मदेवतायै । ये के च उमा० ॥

ललितायै उमायै गौर्यै अम्बिकायै सलिलाश्रयायै भगायै भगाक्ष्यै ८ राका-महं० । अनुमत्यै राकायै सिनीवाल्यै कुह्वै धात्र्यै सर्वेश्वर्यै अखेश्वर्यै ७ यो विश्व-चक्षु० । एकान्तवासिन्यै । क्षेत्रस्य पतिना० । गणानां त्वा० । दुर्गाक्षेत्रगणेश्वर-देवताभ्यः । मातृमण्डलयागदेवताभ्यो नमः । इति देवतवारिप्रधानं ॥ अथकन्या-संस्कारे । ये के च उमा० । सीमन्तकरणदेवताभ्यः । १ । इन्द्राणीमासु नारिषु० । नाहमिन्द्राणि रारण० । सद्दोद्धरणदेवताभ्यः । २ । इन्द्राय इन्द्राण्यै कामायै भगायै ह्रियै श्रियै लक्ष्म्यै तुष्ट्यै पुष्ट्यै विश्वावसवे गन्धर्वराजाय गोदान-देवताभ्यः ३ अलक्ष्मीनिर्णोदनदेवताभ्यः ४ (द्वादशवर्षाधिक्यां कन्यायां रजो-दोषनिवारणार्थं हविष्कल्पं । नान्यथा) "अर्यम्णे प्रजापतये हविष्कल्पदेवताभ्यः । ५ । इन्द्राण्यै वरुणान्यै गन्धर्वाण्यै उदकान्त्यै अग्नये जीवपुत्राय प्रजापतये महा-राजाय स्कन्दाय अर्यम्णे भगाय प्रजानकाय हविष्पुण्यदेवताभ्यः ६ । अग्नये सोमाय मित्राय वरुणाय इन्द्राय उदकाय भगाय अर्यम्णे पूष्णे त्वाष्ट्रे राज्ञे प्रजा-पतये कन्याहोमयागदेवताभ्यः । ७ । अग्नये सोमाय मित्राय वरुणाय इन्द्राय उदकाय भगाय अर्यम्णे पूष्णे त्वाष्ट्राय राज्ञे प्रजापतये कुम्भाय वैश्रवणाय

ईशानाय वरहोमयागदेवताभ्यः । ८। अग्निनारयिमश्नवत्० । प्रजापते० नहि त्वदन्यः० । अग्नये पुष्टिपतये प्रजापतये महाप्रस्थानयागदेवताभ्यः । ९ । कन्यासंस्कारयागदेवताभ्यः । तद्विष्णोः० वासुदेवाय० विष्णुपञ्चायतनदेवताभ्यः । इन्द्रा पर्वता० । ऐन्द्राग्नं० ॥ ततो यजमानमानीय । अ नाभौ० । तीर्थे क्षेयं० । यत्रास्ति माता० । अद्यतावत्० महागणपतये० । ब्राह्म्यै० । सीमन्तकरणदेवताभ्यः० । वासुदेवाय० । इन्द्राय वज्रहस्ताय धूपदीपः ॥ अपसव्येन । नमः पितृभ्यः ३ । सव्येन । गायत्र्यै नमः ३ । सुभगायै विद्महे० ३ । अद्यतावत्० । महागणपतेः० । ब्राह्म्याः माहेश्वर्याः कौमार्याः वैष्णव्याः वाराह्याः नारसिंह्याः ऐन्द्र्याः गौर्याः पद्मायाः शच्याः मेधायाः सावित्र्याः विजयायाः जयायाः देवसेनायाः स्वधायाः स्वाहायाः मातृणां लोकमातृणां धृतेः तुष्टेः पुष्टेः आत्मदेवतायाः ललितायाः उमायाः अम्बिकायाः गौर्याः सलिलाश्रयायाः भगाह्याः भगाक्ष्याः अनुमत्याः राकायाः सिनीवाल्याः कुह्वाः धाव्याः सर्वेश्वर्याः अवेश्वर्याः एकान्तवासिन्याः दुर्गाक्षेत्रगणेश्वरदेवतानां मातृमण्डलदेवतानां । सीमन्तकरणदेवतानां सप्टोद्धरणदेवतानां । इन्द्रस्य इन्द्राण्याः कामायाः भगाह्याः ह्रियाः

श्रियाः लक्ष्म्याः तुष्टेः पुष्टेः विश्वावसोः गन्धर्वराजस्य गोदानव्रतदेवतानां । अलक्ष्मीनिर्णोदनदेवतानां (रजोदोषार्थे) "अर्यम्णः प्रजापतेः हविष्कल्पदेवतानां" इन्द्राण्याः वरुणान्याः गन्धर्वाण्याः उदकान्याः अग्नेः जीवपुत्रस्य प्रजापतेः महाराजस्य स्कन्दस्य अर्यम्णः भगस्य प्रजानकस्य हविष्पुण्यदेवतानां । अग्नेः सोमस्य मित्रस्य वरुणस्य इन्द्रस्य उदकस्य भगस्य अर्यम्णः पूष्णः त्वाष्ट्रस्य राज्ञः प्रजापतेः कन्याहोमदेवतानां । अग्नेः सोमस्य मित्रस्य वरुणस्य इन्द्रस्य उदकस्य भगस्य अर्यम्णः पूष्णः त्वाष्ट्रस्य राज्ञः प्रजापतेः कुम्भस्य वैश्रवणस्य ईशानस्य वरहोमयागदेवतानां । अग्नेः पुष्टिपतेः प्रजापतेः महाप्रस्थानदेवतानां । वासुदेवस्य० । इन्द्रस्य वज्रहस्तस्य० आत्मनो० मातृकादेवीसन्तोषणार्थमर्चामहं करिष्ये । एवमेवासनम् महागणपतये० युष्मान्वः पूजयामि ॐ पूजय । महागणपतिं० । ब्राह्मीं माहेश्वरीं कौमारीं वैष्णवीं वाराहीं नारसिंहीं ऐन्द्रीं गौरीं पद्मां शचीं मेधां सावित्रीं विजयां जयां देवसेनां स्वधां स्वाहां मातॄः लोकमातॄः धृतिं तुष्टिं पुष्टिं आत्मदेवतां ललितां उमां अम्बिकां गौरीं सलिलाश्रयां भगाहीं भगाक्षीं अनुमतिं राकां सिनीवालीं कुहूं धात्रीं सर्वेश्वरीं अखेश्वरीं एकान्तवासिनीं दुर्गाक्षेत्रगणेश्वरदेवताः मातृमण्डल-

देवताः। सीमन्तकरणदेवताः। सष्टोद्धरणदेवताः। इन्द्रं इन्द्राणीं कामां भगां ह्रियं श्रियं लक्ष्मीं पुष्टिं विश्वावसुं गन्धर्वराजं गोदानव्रतदेवताः। अलक्ष्मीनिर्णोदन-देवताः (रजोदोषार्थं) "अर्यमाणं प्रजापतिं हविष्कल्पदेवताः" इन्द्राणीं वरुणानीं गन्धर्वाणीं उदकानीं अग्निं जीवपुत्रं प्रजापतिं महाराजं स्कन्दं अर्यमाणं भगं प्रजानकं हविष्पुण्यदेवताः अग्निं सोमं मित्रं वरुणं इन्द्रं उदकं भगं अर्यमाणं पूषाणं त्वाष्टं राजानं प्रजापतिं कुम्भं वैश्रवणं ईशानं वरहोमयागदेवताः। अग्निं पुष्टिपतिं प्रजापतिं महाप्रस्थानदेवताः वासुदेवं०। इन्द्रं वज्रहस्तं० हेलकादीन्० एता देवता आवाहयिष्यामि०। पाद्यार्थमुदकं नमः। शन्नोदेवी०। महागणपतये० पाद्यं नमः। पुनः शन्नोदेवी०। महागणयते० ब्राह्मि माहेश्वरि कौमारि वैष्णवि वाराहि नारसिंहि ऐन्द्रि गौरि पद्मे शचि मेधे सावित्रि विजये जये देवसेने स्वधे स्वाहे मातरः लोकमातरः धृति तुष्टि पुष्टि आत्मदेवते ललिते उमे गौरि अम्बिके सलिलाश्रये भगाहि भगाक्षि अनुमति राके सिनीवालि कुहु धात्रि सर्वेश्वरि अक्षेश्वरि एकान्तवासिनि दुर्गाक्षेत्रगणेश्वरदेवताः मातृमण्डलदेवताः। सीमन्त-करणदेवताः सष्टोद्धरणदेवताः इन्द्र इन्द्राणि कामे भगे ह्रीः श्रीः लक्ष्मीः तुष्टे पुष्टे

विश्वावसो गन्धर्वराज गोदानव्रतदेवताः "अर्यमन् प्रजापते हविष्कल्पदेवताः" इन्द्राणि वरुणानि गन्धर्वाणि उदकानि अग्ने जीवपुत्र प्रजापते महाराज स्कन्द अर्यमन् भग प्रजानक हविष्पुण्यदेवताः अग्ने सोम मित्र वरुण इन्द्र उदक भग अर्यमन् पूषन् त्वाष्ट्र राजन् प्रजापते कन्याहोमदेवताः अग्ने सोम मित्र वरुण इन्द्र उदक भग अर्यमन् पूषन् त्वाष्ट्र राजन् प्रजापते कुम्भ वैश्रवण ईशान वरहोमयाग-देवताः अग्ने पुष्टिपते प्रजापते महाप्रस्थानयागदेवताः । वासुदेव० । इन्द्रपत्न्यह-ष० । हेरुकायुधः इदं वोऽर्घ्यं नमः । दक्षिणान्तं । तद्विष्णोः० । आत वेदसे० इतिच ककुत्पुष्पम् ॥ अथाग्निकर्म ॥ अग्रहोमं विधाय । गणेशार्थं मृत्पिण्डं देवतगोलिकासत अक्षो-टसह, घृतधारासह, च संस्थाप्य मातृकाः पूज्याः । पञ्चूपहारं च (पृ०१२५–१३) कृत्वा । रुद्रमंत्रांतंच हुत्वा कन्याज्ञानार्थं पीठिकापूजा । पूर्वतश्चरणेषु । धाम्नै विधान्नै विश्वयवै विश्वरूपिण्यै । मध्ये शक्तये पीठदेवताभ्यः, इति नामभिः ॥ ततः स्नात्वा । या आपोदिव्याः (पृ० ७८–१०) तिलकमाज्यदर्शनं च कृत्वा देवीसूक्तं रक्षोघ्नमंत्रं । ऋतुतिथ्यादि तंत्रसमाप्तिः इतिमातृकापूजनम् । ततः कन्यासंस्कारं ब्राह्मणपूजनं वैश्वदेवं नान्दीमुखादि सर्वं विदध्यात् ॥ अथ कन्यासंस्कारः । तत्र सामग्री । समिद्द्वयं पुनर्द्वयं

त्रिवेणबन्धद्वययुतं केशहस्तयोर्बन्धनार्थं । पुनः तोकशालां रक्तसूत्रयुतं । कांस्यपात्रं पीठिका कन्यकाभ्रातरः । कुंकुमचन्दनकर्पूरादि इति ॥ आदौ सीमन्तकरणं ॥ परिसमूह्य ९ आस्तीर्य १६ न निर्वापः । सीमन्तकरणदेवताभ्यः अग्नये वै० इदमाज्यमर्पयामि० । आज्यभागान्ते । कुमारीमानीय । तृतीये गर्भमासे सीमन्तं कारयते शुक्लपक्षस्य पुण्याहे पर्वणि वा यथोक्तमुपसमाधाय जयप्रभृतिभिर्हुत्वा । पश्चादग्नेः दर्भेषु प्राक्तासीनायाः प्रत्यक्तासीनायाः सर्वान्केशान् संप्रमुच्य प्रसादयते ॥ यं सीमन्तं कङ्कतस्ते चकार वहाक्षरः
परिवर्ज्यावपांसे । वीषु रूपमश्विनौ तन्निवपत्त पौंस्येनेमं संसृजतं वीर्येण १
इन्द्राणी चक्रे कङ्कतं ससीमन्तं विसर्पतु । पुनः पतिभ्यो जायान्दा अग्ने प्रजया सह
२ पुनः पत्नीमग्निरदादायुषा सह वर्चसा । दीर्घायुरस्या यः पतिर्जीवातु शरदः शतम्
३ इति त्रिः श्वेतया शलल्या शमीशाखया सपलाशया ससीमन्तं विचिनोति ॥ यास्ते राक इति पृथक्केशपक्षौ संनह्यति । यास्ते राके सुमतयः सुपेशसो याभिर्ददासि दाशुषे वसूनि । ताभिर्नो अद्य सुमना उपागहि सहस्रपोषं सुभगे रराणा ॥ नीललोहितेन सूत्रेण केशान्ग्रन्थयेत् । नीललोहितं भवति कृत्या सक्तिर्व्यज्यते । एधन्ते अस्या ज्ञातयः पतिर्बन्धेषु बध्यताम् । या आपो दिव्याः । ये के च ज्मेत्याज्यप्रधानं ।

ऋतुतिथिः विमुच्य १ ॥ अथ सहोद्धरणम् ॥ परिसमूह्य ५ परिस्तीर्य १६ म निर्वापः । सहोद्धरणदे० अग्नये वै० इदमाज्यम० । आज्यभागान्तं । आज्येन प्र० । इन्द्राणीमासु० । नाहमिन्द्राणि० । ऋतुतिथिः । विमुच्य ॥ २ ॥ अथ गोदानम् ॥ परिसमूह्य ४ परिस्तीर्य १६ इन्द्राय इन्द्राण्यै कामायै भगायै ह्रियै श्रियै लक्ष्म्यै पुष्ट्यै विश्वावसवे गन्धर्वराजाय गोदानयागदे० जुष्टं निर्वपामि । आज्यभागान्तं । ततः कांस्यपात्रे हिरण्यमलङ्करणीयं सर्वं समुत्क्षिप्य यजमानहस्तेन हिरण्यवर्णा १ यासां दे० ३ यासां राजा० ४ शिवेन मा० ४ इति चतसृभिरभिषिच्य बध्वाः संकल्पं दद्यात् सावित्राणि० अद्य तावत्० आत्मनो० कन्योद्वाहनिमित्तं सूर्यदैवतं सौवर्णं चन्द्रदैवतं रौप्यं अग्निदैवतं कांस्यादि सर्वमलङ्करणीयं प्रजाभ्यस्त्वा ददानि ३ सावित्राणि रायस्पोषाय त्वा प्रतिगृह्णामि ३ ततो गोदानिकैर्मन्त्रैः कन्यामलङ्कृत्य चतुष्पादे भद्रपीठे दक्षिणतोऽग्नेः प्राङ्सीनामुपविश्य अविधवाः स्त्रीचतस्रः माता पिता गुरुश्च सप्तमः । तां सहस्रच्छिद्रेण पवित्रेण स्नापयित्वाऽऽहतेन वाससा प्रच्छाद्य । सावीर्हि (पृ० १०७–१३) शुक्रं पवित्रं वस्त्रं कुङ्कुमकर्पूरादिभिर्विप्रहस्तेनाभिषेचनम् हिरण्यवर्णाः ४ आपो हि ष्ठा ३ येनव्याघ्रं परि० । प्रधानं इन्द्राय ११ प्रधानान्तरं (टोर) समिधा शुनं वहेति । शुनं वह शुनं

नराः शुनं कृषतु लाङ्गलम् । शुनं वरत्रा बध्यन्तां शुनमष्ट्रामुदिङ्गय १ शुनासी-
रामिमां वाचं जुषेथां यद्दिवि चक्रथुः पयः । तेनेमामुपसिञ्चतम् २ अर्वाची सुभगे
भव सीतेवन्दामहे त्वा । यथा नः सफलामसि ३ इन्द्रः सीतां निगृह्णातु तां पूषा
नियच्छतु सा नः पयस्वती दुहामुत्तरामुत्तरां समाम् ४ शुनन्नः फाला विकृषन्तु भूमिं
शुनं कीनाशा अभियन्तु वाहैः । शुनं पर्जन्यो मधुना पयोभिः शुनासीरा शुनम-
स्मासु धत्तम् ५ सुप्रजस्त्वाय गोमुखः प्रक्रीडयतु कन्या सुमनस्यमाना स्वाहा
सहेन्द्राणी हतमङ्गला इत्यनेन सगीतिनृत्यं कांस्यपात्रं वादयेत् ॥ ऋतुतिथिः । नवमि
॥ ६ ॥ अथालक्ष्मीनिर्णोदनमंत्रः । त्रिकाहोमाख्यः ॥ परिसमूह्य ५ पुरस्तात् ४
आज्यमुत्पूय यैः कैश्चिद्दर्भाग्रैः स्रुवमुन्मुज्यैकदर्भेण वा पृश्न्या पयोसि आत्मनो० त्रिका-
ग्रतदेवताभ्य हृदमाज्यम० । याज्ञिकस्य वृक्षस्य प्रागायतां शाखां सकृदाच्छिन्नां सूत्र-
तन्तुना तुलवृक्षशाखां सरक्तसूत्रां सावित्राशि० इति बध्वा हस्ते दत्वा या ते अलक्ष्मी
मातृमयी पितृमयी सङ्क्रामणीस हजा वापि कापित्तां तिष्येण सह देवतायाः निर्णु-
दामि सा द्विषन्तं गच्छतु तिष्यबृहस्पतिभ्यां नमो नमः इति शाखाया-मा-त्सर्गः
कलशं प्रवेशान्यां ॥ तव श्रिये विजहीत० २४ ऋचः (पृ० २९-८) स्रुवेण परिते दूक्

भूरथ इत्यक्षोटसहितमाज्यहोमः ॥ विमुच्य नयामि ॥ ४ ॥ अथ द्वादशवर्षोत्तीर्णानां रजोदोषनिवारणार्थं हविष्कल्पम् ॥ परीसमूह्य ९ परिस्तीर्य १६ अर्यम्णे प्रजापतये जुष्टं निर्वपामि । आज्यभागान्तं । प्रधानं । अर्यम्णे स्वाहेति दक्षिणे । प्रजापतये स्वाहेत्युत्तरे । प्रधानान्तरं कुङ्कुमादि स्रुवेण सप्तदशाज्याहुतिर्जुहुयात् ॥ अग्नये सोमाय मित्राय इन्द्राय वरुणाय बृहस्पतये रुद्राय स्कन्दाय वात्सीपुत्राय भगाय भग-नक्षत्रेभ्यः काल्यै पुष्ट्यै भद्रकाल्यै पूष्णे त्वाष्ट्रे महिष्यकाय स्वाहा ॥ १८ ॥ ऋतुतिथिः । विमुच्य ॥ ५ ॥ अथ हविष्पुण्यम् । परिसमूह्य ९ परिस्तीर्य १६ इन्द्राण्यै वरुणान्यै गन्धर्वाण्यै उदकान्यै अग्नये जीवपुत्राय प्रजापतये महाराजाय स्कन्दाय अर्यम्णे भगाय प्रजानकाय हविष्पुण्यदे० जुष्टंतिनिर्वपामि ॥ आज्यभा-गान्तं । या आपो दिव्याः० । प्रधानं ऋतुतिथ्यादि ॥ ६ ॥ अथ कन्याहोमः ॥ परिसमूह्य९ परि स्तीर्य १६ अग्नये सोमाय मित्राय वरुणाय इन्द्राय उदकाय भगाय अर्यम्णे पूष्णे त्वाष्ट्राय राज्ञे प्रजापतये कन्याहोमदेवताभ्यः जुष्टं निर्व-पामि । आज्यभागान्तं । या आपो दिव्याः० । प्रधानं । ऋतुतिथिः । विमुच्य ॥७॥ अथ वरहोमः ॥ परिसमूह्य ९ परिस्तीर्य १६ अग्नये सोमाय मित्राय वरुणाय

इन्द्राय उदकाय भगाय अर्यम्णे पूष्णे त्वाष्ट्राय राज्ञे प्रजापतये कुम्भाय वैश्रवणाय ईशानाय शुद्धं निर्वपामि ॥ आज्यभागान्तं । या आपो दिव्याः० । प्रधानं । स्रतु-तिथिः । विसृज्य ॥ ८ ॥ अथमहाप्रस्थानम् ॥ उद्वाहपर्यायम् ॥ परिसमूह्य १५ परिस्तीर्य १६ अक्षतचरुः ॥ अग्नये पुष्टिपतये प्रजापतये निर्वपामि । आज्यभा-गान्तं [सफलीकृत्योत्सृष्टपिनष्टयलङ्कारेण काले सपवित्रे पात्रे सकूर्चपति]चतुस्रोऽष्टौ वाऽविधवाः शाकमिश्रिताभिर्मरिचशर्करादिभिर्भक्ष्यैः साधिताः स्त्रियोन्न्येनान्नेण च भक्षणायित्वा वीणा गायन्त्यः संगायेयुः । अपि वा चतुरे नर्तनं कुर्यात् ॥ क्रीडं वां शर्धो मारुतमनर्वाणं रथे शुभम् । काण्ठा अभि प्रगायत इत्यनया गायत्र्या गणितऋत्विगेवानुमन्त्र-यते ॥ यावत्कन्यासंस्कारहोमांश्चतुष्पदे भद्रपीठे प्राङासीनां कन्यामुपवेशयेत् । कन्या-संस्कारहोमान्तरं वधूर्हस्ते खड्गं संस्थाप्य त्रिरावर्तमग्निं प्रक्रमन्ती रक्षार्थं "पूषा मा" मिति पठति ॥ पूषा मा प्रपथे पातु पूषा मा पशुपा पातु । पूषा माधि-पतिः पातु प्राची दिगग्निर्देवता अग्निं स ऋच्छतु योमैतस्या दिशोभिदासति । इति सर्वदिग्गमनं । एवं । दक्षिणा दिगिन्द्रो देवतेन्द्रं स ऋच्छतु योमैतस्यादिशो भिदासति । प्रतीची दिक्सोमोदेवता सोमं स ऋच्छतु यो मैतस्या० । उदीची

दिक्मित्रावरुणो देवता मित्रावरुणौ स ऋच्छतु यो मै० । ऊर्ध्वा दिग्बृहस्पतिर्देवता बृहस्पतिं स ऋच्छतु यो मै० ॥ यन्तिगऽदितिर्देवताऽदित्यं स ऋच्छतु यो मै० ॥ सर्वदिक्षु ॥ ज्योतिषे तन्तव आशिषमाशास्ते सानुमा तनूः ॥ इति प्रास्थानिकमंत्रः । शन्नोदेवी० । उपस्पृश्य (लवदिन्यह) ततोऽक्षतसक्तूनां यागः ॥ प्रधानं । अग्निर्नो रयिं० । १ । प्रजापति० । २ । ऋतुतिथिः । पूर्णा तावत् । अग्नेर्यविष्ठपूजनं पूर्णां दत्वा । विमुच्य ॥ वैश्वदेवं । स्विष्टकृद्विना । नान्दीमुखश्राद्धं कृत्वा अग्नये स्विष्टकृते स्वाहेति ईशान्यां । आयुः प्रजां । कलशपृच्छां विसर्ज्य । आपश्नोस्मि । उदककलशं । देवततभच्य पूजा अनुमत्यै ७ गन्धपुष्पादि । इति कन्यासंस्कारविधिः ॥ सामग्री । शकुनं (जंगियोन) मरिद् जलं अक्षतं अक्षोट घृतं यवा अग्निहोत्र वधूवरयोः काष्टपादिका छेट दधि क्षीरं वरि चुच्यवरि भक्तवरि हाभील पशु देवतवारि हन्द वरि कुङ्म कर्पूर कस्तूरि नन्दीमुखश्राद्धार्थ बविराः भिय । पिण्डान्तः स्थाप्याः ॥

पण्डितकेशवभट्टज्योतिर्विदा

संस्कारशोधनाभ्यां सम्पादितम्

साङ्गोपाङ्ग-विष्णुबलिविधि-साङ्ग-शैवीक्रियात्मकं

कर्मकाण्डम् ।

चतुर्थपुस्तकम् ।

मुम्बय्यां

निर्णयसागराख्यमुद्रणयन्त्रालयेऽङ्कयित्वा

श्रीसप्तर्षिसंवत्सरे ५०१२, विक्रमवत्सरे १९९३

ईखीवत्सरे १९३६

परोपकाराय प्राकाश्यं नीतम् ।

मूल्यं सपादरूपिकाद्वयम् २।)

विषयानुक्रमणिका.

१ विष्णुकारण
५ ब्रह्मकारण
७ शिवकारण
१० यमकारण
१८ पितृकारण
३१ इषेत्वाब्राह्मण
३२ स्वाध्यायब्रा०
३९ प्रतिग्रहब्रा०
४० सन्ध्याब्रा०
४१ पावमान्यब्रा०
४३ पावमानीसू०
४६ मलिम्लुचब्रा०
४८ मार्तण्डब्रा०
५८ विष्णुध्रुवसू०
६१ ब्रह्मध्रुवसू०
६४ रुद्रकेतुसूक्तं
६९ प्रजापतिशनैश्वरसू०
७३ ऋतुनारायणसू०

विष्णुबली

८१ प्रायश्चित्तविधिः
८८ विष्णुक्रियाविधिः
९७ विष्णुश्राद्धविधिः
१३६ पूयमानब्रा०

सूर्यबली

१४० प्रायश्चित्तविधिः
१५५ भर्गक्रियाविधिः
१६६ भर्गश्राद्धविधिः
२४४ पर्णपुरुषविधिः

शैवीयक्रियायां

२०५ निर्वाणे साग्निनिरग्निनियमः
२०९ वैदिकान्त्येष्टि
२११ तान्त्रिकअन्त्येष्टि
२९३ वैदिकदशाहिक
२९९ शिवक्रियाविधिः
३१३ अन्नपूरिपूजा
३३८ शिवाष्टक
३५४ शिवान्वष्टिक
३५८ शिवश्राद्ध
३७७ शिवेकोद्दिष्ट
३९१ शिवसपिण्डी
४१० शिवदीपश्राद्ध
४५२ वैश्वदेव शैवी
४५६ तक समाप्त हुई

शंकुप्रतिष्ठायां पूजामंडपे पूजावेध्यदेवादि विषये

वामभागोयं वेधप्रतिमाविधये



दक्षिणभागोर्ध्ववास्तुभागोर्ध्वम् वेश्मप्रतिष्ठाविषये



उपनयनविषये



विवाहविषये



पश्चिमतोरणम् वेश्मप्रतिष्ठः उत्तरतोरणम्




पूर्वतोरणं
दक्षिणतोरणम्
गणपतये
पर्जन्याय ५
कृतयुगाय
वरुणाय
भौमाय १७
इन्द्राय १४
अग्नये १५
महागण पतये
बृहस्पतये
इन्द्राय
अर्यम्णे ५
धनुर्वेदाय
त्रेतायुगाय ८
धूम्राय ११
यमाय १३
नैर्ऋतये १७
शनैश्चराय १२
राहवे १६
यमुनायै १७

पञ्चप्रहारयुत   रुद्रशान्त्यादि होमविषये




होमं विना तुलादानविषये
ब्रह्म
कलशं
वैश्वदेव
दशदिक्पाल
तुला
होमयुत तुलापुरुषविषये
दशदिक्पाल
इन्द्रकलश
अग्नि कुण्डम्
तुला

चातुर्मास्योद्यापनविधये



सामान्यहोमकुशलहोमविषये



सामान्यतो व्रतोद्यापनविषये



मूलाश्लेषगण्डान्तादिशान्तिविषये



पञ्चगव्यम्

गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम्। निर्दिष्टं पञ्चगव्यञ्च पवित्रं कायशोधनम्। गोमूत्रे गोमये क्षेप्यं ते संक्षेपे घृते तथा। तानि दध्नि प्रक्षेप्यानि तत्सर्वं पयसोऽन्तरे। एकीकृत्य तु तत्सर्वं कुशोदकविमिश्रणम्।

देवस्यत्वा कुशोदकम् ६	दधिक्राव्णोति वै दधि ❀ ४	देवस्य त्वा
गायत्र्येव समादाय गोमूत्रं ❀ १	आप्यायस्वेति क्षीरं ❀ ५	तेजोऽसीति घृतं प्रोक्तं ❀ ३
आपो हिष्ठेति	गन्धद्वारेति गोमयं ❀ २	देवस्यत्वा

अन्त्येष्टिविषये



श्मशानविषये



एकादशाह्निक एकोद्दिष्ट विषये




द्वादशाह्निकसपिण्डीविधये
ह्रेग्रणो
अग्निकुण्ड
कर्षूः


मासिकविषये
कर्षूः

ऊनषाण्मासिकविधये



प्रेतदीपदानविषये



वार्षिकसापिण्ड्यविषये




कन्यासंस्कारविषय
रस्वती - विहारः

विष्णुबलिभेगेश्राद्धविषये



कर्मकाण्डम् ।

अथ कारणसूक्तानि ॥

आद्यो विष्णोः ॥ १ ॥

गोविन्दं कमलासनं त्रिपुरजिच्छक्रादिदेवैः स्तुतं कुर्वाणं करसात्सुदर्शनगदासच्छार्ङ्गकौक्षेयकम् । विश्वाध्यक्षमनन्तमूर्त्तिममृतं श्रीवल्लभं शाश्वतं धर्माधर्मबहिष्कृतं प्रणयिनं ध्याये महासिद्धिदम् ॥ ॥ प्रतद्विष्णुः स्तवते वीर्येण मृगो न भीमा कुचरो गिरिष्ठः । यस्योरुषु त्रिषु विक्रमणेष्वऽधि क्षियन्ति भुवनानि विश्वा ॥ ॥ प्रति सप्तोनाभरुः सर्वहरिर्वैन्द्रो हरिस्तुतिर्द्धित्रिष्टुबन्तम् ॥ ॥ प्रतेमहे विदथे शंसि शं हरी प्रतिवने वन्नुषो हर्यतां मदम् । घृतभयो हरिभिश्चारु सेचत आत्वा विशन्तु हरिवर्षमङ्गिरः ॥ १ ॥

हरिं हि योनिमभि य समस्वरन्हिन्वन्तो हरिदिव्यं यथा
सदः । अयस्पृणन्ति हरिभिर्नधेनवः इन्द्राय शूषं हरिवर्त्त-
मर्चत ॥ २ ॥ सो अस्य वज्रो हरितो य आयसो हरिर्निकामो
हरिरा गभस्त्योः । द्युम्नीसुशिप्रो हरिमन्युसायक इन्द्रे नि-
रूपा हरिता मिमिक्षरे ॥ ३ ॥ दिवि न केतुरधिधाविह-
र्यतो विव्यचद्वज्रो हरितो नरंह्या । तुददहिं हरिशिप्रो
आयसः सहस्रशोका अभवद्धरिंभरः ॥ ४ ॥ त्वन्तमहर्यथा
उपस्तुताः पूर्वेभिरिन्द्र हरिकेश यज्वभिः । त्वं हर्यस्य तव
विश्वमुक्थ्यं मासामिराधो हरिजातो हर्यताम् ॥ ५ ॥ त्वां
वज्रिणं मन्दिनं स्तोम्यमद इन्द्रं रथे वहतो हर्यता हरी ।
पुरूण्यस्मै सवनानि हर्यत इन्द्राय सोम हरयो दधन्विरे ॥६॥
अरङ्कामाय हरयो दधन्विरे स्थिराय हिन्वन्हरयो हरीत्तरा ।
अर्वद्भिर्यो हरिभिर्जोषमीयते सो अस्य कामं हरिवर्तमा-
नशे ॥ ७ ॥ हरिश्मशारुन्हरिकेश आयसस्तुरम्पे ययो
हरिप अवर्धत । अर्वद्भिर्यो हरिभिर्वाजिनी वस्वरति विश्वा

दुरिता पारिषद्वरी ॥ ८ ॥ स्रुवेव यास्य हरिणी विपेततु-
शिप्रेवाजाय हरिणीद्विध्वतः । प्रयर्ध्यते चमसे सन्मृज-
द्धरी पीत्वा मदस्य हर्यतस्यन्धसः ॥९॥ उतस्य सद्म हर्य-
तस्य पस्त्योरन्योन वाजं हरिवां अचिक्रदत् । महीचिद्धि
धिषणा हर्यदोजसा बृहद्वयो दधिरे हर्यतश्चिदा ॥ १० ॥
आ रोदसी हर्यमानो महित्वा नव्यं नव्यं हर्यसि मन्मनु-
प्रियम् । प्रायस्त्योमसुरहर्यतङ्गोराविष्कृधि हरये सूर्याय
॥ ११ ॥ आत्वा हन्तं प्रयजो जनानां रथे वहन्तु हरि-
शिप्रमिन्द्र । पिवा यथा प्रतिभृतस्य मध्वोर्हर्यन्यज्ञं सदमादे
दशोनिम् ॥१२॥ अपः पूर्वेषां हरिवः सुतानामथो इदं सवनं
केवलन्ते । समद्धि सोमं मधुमन्तमिन्द्रमऽत्राबृषञ्जठरा आ-
वृषस्व ॥१३॥ इति हरिपञ्चाशिका ॥ ॥ ओं अयन्ते पञ्च-
बार्हत्वा मन्त्रैः ॥ अयन्ते अस्तु हर्यतः सोम आ हरिभिः
सुतः । जुषाण इन्द्र हरिभिर्न आगह्या तिष्ठ हरितं रथम् ॥
हर्यन्नुषसमर्चयः सूर्यं हर्यन्न रोचयः । विद्वाश्चिकित्वा हर्य-

श्ववर्षस इन्द्रविश्वा अभिश्रियाः ॥ द्यामिन्द्रो हरिधायसं पृथिवीं हरिवर्षसम् । अधारयद्धरितोभूरिभोजनं ययोरन्तर्हरिश्चरत् ॥ जिज्ञानो हरितो वृषा विश्वमाभासि रोचनम् । हर्यश्वो हरितन्धत्तु आयुधमावज्रबाह्वोर्हरिम् ॥ इन्द्रो हर्यन्तमर्जुनं वज्रं शुक्रैरमीवृतम् । अपावृणोद्धरिभिरद्रिभिः सुतमुद्गा हरिभिराजत ॥ १ ॥ आमन्द्रैरिन्द्र हरिभिर्याहि मयूररोमभिः । मा त्वा किञ्चिन्नियमन्विन्नपाशिनोति-धन्वेवतामिह ॥ वृत्रखादो वलं रुजः पुरान्दर्मो अपामजः । स्थाता रथस्य हर्योरभिस्वर इन्द्रो दृढां चिदारुजः । गम्भीरमुदधेरिव क्रतुं पुष्यसि गा इव । प्रसु गोपाय वसन्वेनवो यथा ह्रदकुल्या इवासत । आनस्तुजं रयिंभरां शश्र प्रति जानते । वृक्षं पक्कं फलं मङ्कीवधूनमहीन्द्र सम्पारणं वसु ॥ सुयुरिन्द्र सुराळासिः सदिष्टः स्वयंशस्तरः । सवावृधान ओजसा पुरुष्टुत भवानः सुश्रवस्तमः ॥ तत ऋग्वेदे विष्णु बुध सूक्तं हुत्वा अनेन मन्त्रहोमेनात्मनो वाङ्मनः

कायोपार्जितपापनिवारणार्थं पितुर्विष्णोरऽतीतवर्तमानभविष्यदा-
त्मनो वाङ्मनःकायोपार्जितपापनिवारणार्थंदशविधपापनिष्कृत्यर्थं
कुम्भीपाकादि—असिपत्रवनान्तेभ्यः समस्तनरकेभ्यः समुद्धरणार्थं
नारायणबलिविधाननिमित्तं प्रथमे विष्णुश्राद्धे वा द्वितीये वा १२
विष्णुश्राद्धे पृथ्वीरूपो विष्णुः "श्रीसहितः केशवः" इत्यादि
प्रीयतां प्रीतोस्तु ॥ इति विष्णुकारणानि ॥ १ ॥

॥ अथ ब्रह्मकारणानि ॥ २ ॥

ब्रह्माणं चतुराननं सुरसरित्स्फूर्जत्प्रवालोल्लसद्वीचीव्य-
ग्रकमण्डलुं जपवटीं सत्पुस्तकं पुष्करम् । श्रीदण्डासनबन्ध-
नाऽभयवरान्हस्तैर्दधानं सदा वेदाभ्यासविशारदं सुजठरं
शोणद्युतिं चिन्तयेत् ॥ ॥ ॐब्रह्मा देवानां पदवी कवी-
नामृषिर्विप्राणां महिषो मृगाणाम् । श्येनो गृध्राणां सुधि-
तिर्वनानां सोमः पवित्रमत्येति रेभन् ॥ इन्दानः पञ्च जगतं
सृजुः चतुष्कम् ॥ इन्दा नो अग्निं वनवद्वनुष्यतः कृतं ब्रह्मा
शूशुवद्रातहव्यमत् । जातेन जातं मतिसप्रन्स ते यं

य्यं यजुष्कृणुते ब्रह्मणस्पतिः[1] ॥ वीरेभिर्वीरान्वनवन्वनुष्यतो गोभी रयिं पप्रथद्बोधतित्मना । तोकाश्च तस्य तनयं च वर्धते[2] यं० ॥ सिन्धुर्न क्षोदः शमीवां ऋघायतो वृषेव वध्रीं रभिवष्टोजसा । अग्निरिव प्रसितिनाहवर्त्तवे यं य्यं यजुं०[3] ॥ तस्मा अर्षन्ति दिव्या असश्चताः ससत्त्वभिः प्रथमो गोषु गच्छति । अनिभृष्टतविषिर्हन्त्योजसा[4] यं० ॥ तस्मा इद्विषे धुनयन्त सिन्धवो च्छिद्रा शर्म दधिरे पुरूणि । देवानां सुम्ने सुभगः स एधते यं य्यं यजुं कृणुते ब्रह्मणस्पतिः ॥ १ ॥ ऋजु ऋच्छंसो वनवद्वनुष्यतो देवयन्निदं देवयन्तमभ्यसत् । सुप्रावीरिद्वनवत्पृत्सु दुष्टरं यज्वेदयज्वे विभजति भोजनम् ॥ यजस्व वीर प्रविहिमना यतो भद्रम्मनः कृणुष्व वृत्रतूर्ये । हविष्कृणुष्व सुभगो यथा ससि ब्रह्मणस्पते रव आवृणीमहे ॥ स इज्जनेन सविशास जन्मना स पुत्रैर्वा जम्भरते धनानृभिः । देवानां यः पितरमाविवासति श्रद्धमाना हविषा ब्रह्मणस्पतिम् ॥ यो

असौ हव्यैर्घृतवद्भिरविधत्प्र प्राचानयति ब्रह्मणस्पतिः । उरुष्यती मंहसो रक्षतीरिषोऽंहोश्चिदस्मा उरु चक्रिरद्भुतः ॥ २ ॥ तत ऋग्वेदे ब्रह्मध्रुव सूक्तं हुत्वा अनेन० पितुर्विष्णोः प्रथमे विष्णुश्राद्धे २ वा १३ विष्णुश्राद्धे अप्रूरूपो ब्रह्मा प्रीयतां प्रीतोऽस्तु ॥ नरकोद्धरणमस्तु ॥ इति ब्रह्मकारणानि ॥ २ ॥

अथ शिवकारणानि ॥ ३ ॥

शिवो भूत्वा मह्यमग्ने अथो सीद शिवस्त्वम् । शिवाः कृत्वा दिशाः सर्वाः स्वं योनिमिहासदः ॥ ॥ शम्भुं शूलपिनाकसोमकलशभ्राजिष्णुहस्ताम्बुजं देव्याऽलङ्कृतवामपार्श्वमुरगाधीशस्फुरत्कङ्कणम् । गङ्गागर्जितगर्भजूटममलं चन्द्रार्धमौलिप्रभं कीनाशक्रमनाशनिश्चितधियं भस्माङ्गरागं भजे ॥ ॐवृषभं वृषभो वैराजा शाकरो वा सपत्नघ्नमाऽनुष्टुभं महापान्त्यन्तम् ॥ वृषभं मासमन्मानां सपत्नानां विषासहिम् । हन्तारं शत्रूणां कृधि विराजङ्गोपतिं गवम् ॥ अहमस्मे सपत्नहेन्द्र इवारिष्टो अक्षतः । अधः सपत्नमे पदो-

रिमे सर्वे अभिष्ठिताः ॥ अत्रैव वोपि नह्याम्युभे आर्त्नी इवज्यया । वाचस्पते निषधे मान्यथा मादधरं वदान् ॥ अभिभूरिहमागम विश्वकर्मणे धाम्ना आवश्चित्तमावो व्रतमावोहं समितिन्दधे ॥ योगक्षेमं व आदायाहं भूयासमुत्तम । अधस्पदान्स उद्वत मण्डूका इवोदकान्मण्डूका उदगादिव ॥ १ ॥ येन सप्तोना मानवः शिवसङ्कल्पो मानसम् ॥ येनेदं भूतं भुवनं भविष्यत्परिगृहीतमऽमृतेन सर्वम् । येन यज्ञस्तायते सप्तहोता तन्मे मनः शिवसङ्कल्पमस्तु ॥ येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदिथेषु धीराः । यदपूर्वं यक्षमन्तः प्रजानां तन्मे० ॥ यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु । यस्मान्न ऋते किञ्चन कर्म क्रियते तन्मे० ॥ यज्जाग्रतो दूरमुदेति दैवं तदु सुप्तस्य तथैवेति । दूरङ्गमं ज्योतिष्यं ज्योतिरेकं तन्मे० ॥ यस्मिन्नृचः साम यजूंषि यस्मिन्प्रतिष्ठिता रथनाभाविवाराः । यस्मिंश्चित्तं सर्वमोतं प्रजानां तन्मे० ॥ सुषारथिरश्वानिव

यन्मनुष्यान्नेनीयते भीशुभिर्वाजिन इव। हृत्प्रतिष्ठं यदजरं यविष्ठं तन्मे० ॥ यदत्र षष्टिं त्रिशतं शरीरं यज्ञस्य गुह्यनवनाभमाद्यम्। दशं पञ्चत्रिंशतं च यत्परं तन्मे मनः०॥ ये पञ्चपञ्चाशतं शतञ्च सहस्रं च नियुतमर्बुदं च। तेन यज्ञचित्तेष्ट गातुं शरीरं तन्मे० ॥ वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः पुरस्तात्। तस्य योनिं परिपश्यन्ति धीरास्तन्मे० ॥ येन कर्माणि प्रचरन्ति धीरा विप्रा वाचा मनसा कर्मणा वा। यां संविदमनुसंयन्ति प्राणिनस्तन्मे० ॥ ये मनो हृदयं ये च देवा ये अन्तरिक्षे बहुधा चरन्ति। ये श्रोत्रञ्चक्षुषी सञ्चरन्ते करणे तन्मे० ॥ येन द्यौरुग्रा पृथिवी चान्तरिक्षं ये पर्वताः प्रदिशो दिशश्च। येनेदं जगद्व्याप्तं प्रजानां तन्मे० ॥ येनेदं सर्वं जगतो बभूव ये देवा अपि महतो जातवेदाः। तदेवाग्निस्तपसो ज्योतिरेकं तन्मे० तत ऋग्वेदे रुद्रकेतु सूक्तं हुत्वा। अनेन मन्त्रहोमेन पितुर्विष्णोः प्रथमे वा २ वा ३ वा ४ त्र्यो-

दर्शे विष्णुश्राद्धे तेजोरूपः शिवः" प्रीयतां प्रीतोस्तु ॥ इति शिवकारणानि ३ ॥

अथ यमकारणानि ॥ ४ ॥

ॐ यमो दाधार पृथिवीं यमो द्यामुत सूर्यम् । यमाय सर्वमित्तस्थे यत्प्राणाद्वायुरक्षितः ॥ ॥ स्फूर्जत्सैरिभवाहनं पितृपतिं प्रेङ्खत्परेतावलिं धर्माधर्मविचारचारुचरितं द्राघिष्ठदण्डाश्रितम् । रागद्वेषविविक्तबुद्धिविभवं विष्वक्षु संवर्तनं विश्वग्रासविशारदं व्यवहितं तं धर्मराजं भजे ॥ परीवांसं षोडश यमो यामं षष्टी लिङ्गोक्तदेवता द्वादशी श्वभ्यां पर अनुष्टुभ उपान्त्या बृहती यामायनाः परे पञ्च ॥ परीवांसं प्रवतो महीरनु बाहुभ्यः पन्थामनुपस्पृशानाम् । वैवस्वन्तं सङ्गमनञ्जनानां यमं राजानं हविषा दुवस्य ॥ यमो न गातुं प्रथमोविवेद नैषा गव्यूतिरपभर्तार वा उ । यत्रानः पूर्वे पितरः परेयुरेना जज्ञानाः पन्थ्या अनस्वाः ॥ मातलीकव्यैर्यमो अङ्गिरोभिर्बृहस्पतिर्ऋक्कभिर्वावृधानः । यांश्च

देवा वृधुर्ये च देवाः स्वाहान्ये स्वधयान्ये मदन्ति ॥ इमं यज्ञमप्रस्तरमाहिंसीदाङ्गिरोभिः पितृभिः संविदानः । आत्वा मन्ता कविशस्त्वा वहन्ते नाराजन्हविषा मादयस्व । अङ्गिरोभिरागहि यज्ञे येभिर्यम वै रूपैरिह मादयस्व । विवस्वन्तं हुवे यः पिता तेऽस्मिन्यज्ञे बर्हिषि निषेद्य ॥ १ ॥ अङ्गिरसो नः पितरो न वग्वा अथर्वाणो भृगवः सोम्यासः । तेषां वयं सुमतौ यज्ञियानामपि भद्रे सौमनसे स्याम ॥ प्रेहि प्रेहि पथिभिः पूर्वेभिर्यत्रा नः पूर्वे पितरः परेयुः । उभा राजानः स्वधया मदन्ता यमं पश्यामि वरुणश्च देवम् ॥ सङ्गच्छस्व पितृभिः संय्यमनेष्टापूर्तेन परमे व्योमन् । हित्वा यावद्यं पुनरस्तमेति सङ्गच्छस्व तन्वां सुवर्चाः ॥ अपेतवींत विच सर्पतातोस्मा एतम्पितरो लोकमक्रन् । अहोभिरद्भिरक्तुभिर्व्यक्तं यमो ददात्यवसानमस्मै ॥ अतिद्रवसारमेयौ श्वानौ चतुरक्षौ शबलौ साध्वना पथौ । अथा पितृन्सुविदत्रामुपेहि यमेन

ये सदमादं मदन्ते ॥ यौ ते श्वानौ यमरक्षितारौ चतुरक्षौ पथि रक्षी नृचक्षसौ । ताभ्यामेनं परिदेहि राजन्स्वस्ति चास्मा अनमीवञ्च धेहि ॥ उरुणसावसुतृपौ उडम्बलौ यमस्य दूतौ चरतो जनां अनु । तावस्मभ्यं दृशये सूर्याय पुनर्दातां वसुमद्येह भद्रम् ॥ यमाय सोमं सुनोत यमाय जुहुता हविः । यमं ह यज्ञो गच्छत्यग्निर्दूतो अरङ्कृतः । यमाय घृतवद्धविर्जुहोता प्रच तिष्ठत । स नो देवेष्वाऽय-मद्दीर्घमायुः प्रजीवसे यमाय मधुमत्तमं राज्ञे हव्यं जुहो-तन । इदं नम ऋषिभ्यः पूर्वजेभ्यः पूर्वेभ्यः पथिकृद्भ्यः॥ त्रिकद्रुकेभिः पतति षडुर्वीरेकमिद्बृहत् । गायत्री त्रिष्टुप्-छन्दांसि सर्वता यम आहिताः॥ ध्यानम् ॥ कृतान्तं महि-षारूढं दण्डहस्तं भयानकम् । कालपाशधरं देवं ध्याये दक्षिणदिक्पतिम् ॥ ॥ यत्त इति द्वादशमानुष्टभं मन आव-र्तनं जेपुः ॥ ॥ यमादहं वैवस्वतात्सुबन्धोर्मन आभरम् । जीवातवे न मृत्यवेऽथो अरिष्टतातये ॥ यत्ते यमं वैवस्वतं

मनो जगाम दूरकम् । तत्त आवर्तयामसीह क्षयाय जीवसे ॥ यत्ते देवं यत्पृथिवीं मनो जगाम दूरकम् । तत्त आवर्तयामसीह क्षयाय जीवसे ॥ यत्ते भूमिं चतुष्षष्टिं मनो० ॥ यत्ते चतस्रः प्रदिशो मनो० ॥ यत्ते समुद्रमर्णवं मनो० यत्ते मरीचिः प्रवतो मनो० यत्ते आपो यदोषधीर्मनो० ॥ यत्ते सूर्य यदोषसं मनो० ॥ यत्ते पर्वताद्बृहतो मनो० ॥ यत्ते विश्वमिदं जगन्मनो० ॥ यत्ते परापरावतो मनो० ॥ यत्ते भूतं च भव्यं च मनो जगाम दूरकम् । तत्त आवर्तयामसीह क्षयाय जीवसे ॥ १२ ॥

ध्यानं । कालपल्यायुतं देवं लोकेशं लोकभावनम् । विचारज्ञं महाबाहुं यममावाहयाम्यहम् ॥ ॥ बृहस्पति-पुरोहिता देवा देवानां देवा देवाः प्रथमजा देवा देवेषु पराक्रमध्वम् । प्रथमा द्वितीयेषु द्वितीया तृतीयेषु त्रिरे-कादशस्त्रियस्त्रिंशा अनु वा आरभे इदं शकेयं यदिदङ्क-रोमि, तेमाऽवत ते माजिन्वतास्मिन् ब्रह्मण्यस्मिन् क्षेत्रे-

ऽस्यामाशिष्यऽस्यां पुरोधायामस्यां देवहूत्याम् ॥ ॥ यस्य कौष्टजगतः पार्थिवस्यैकयद्वशी । यमं भङ्गश्रवो गाय यो राजा न परोध्यः । यमङ्गाय भङ्गश्रवो यो राजा न परोध्यः । येनाऽपो नद्यो धन्वानि येन द्यौः पृथिवी दृढा । हिरण्यकेशान्सुदुरा हिरण्याक्षानयः शफान् । अश्वा वनस्पतो दानं यमो राजाधितिष्ठति । अयं य्योसि यस्यत इदं शर एतेन त्वमत्र शीर्षण्वनेधि । इदमस्माकं भुजे भोगाय भोगात् ॥ उदह्यग्ने अधिमातुः पृथिव्या विश आविश महतः सधस्थात् । आशुन्त्वाजो दधिरे देवयन्तो हव्यवाहं भुवनस्य गोपाम् । धनञ्जयः सहमानः पृतन्युरग्न इषमूर्जं यजमानाय देहि । विश्वाः पृतनाः सहमानाः सहोभिरन्नो देहि बहुधा विरूपम् । य्यत्प्रजा अनुजीवन्ति सर्वाः ॥ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां अग्नये त्वा वैश्वानराय त्रैष्टुभेन छन्दसाऽहरुपदधे ॥ देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां

पूष्णो हस्ताभ्यामग्नये त्वा वैश्वानरायानुष्टुभेन च्छन्दसा रात्रिमुपदधे ॥ १ ॥ पुनस्त्वादित्या रुद्रा वसवः समिन्धतां पुनर्ब्रह्मणो वसुनीथ यज्ञैः । घृतेन ते तनुं वर्धयामि सत्याः सन्तु यजमानस्य कामाः ॥ अग्निर्होता नो अध्वरे वाजी सन्परिणीयते देवो देवेषु यज्ञियाः ॥ परित्रिविष्ट्यध्वरं यात्यग्नीरथीरिव, आदेवेषु प्रियो दधत् ॥ परिवाजः पतिः कविरग्निर्हव्या न्यक्रमेत् । दधद्रत्नानि दाशुषे ॥ परित्वाग्निं पुरं व्वयं विप्रं सहस्य धीमहि । धृषद्वर्णं दिवे दिवे, हन्तारं भङ्गुरावतम् । परि प्रागाद्दिवो अग्नी रक्षोहामीव चातनः । सीदन्विश्वा अपद्विषो दहद्रक्षांसि विश्वा । यच्चितःस्थ परिचित ऊर्ध्वश्रितःश्रयध्वम् । प्रजामस्मे रयिमस्मे नियच्छत ॥ २ ॥ ॐतस्य यज्ञस्याश्व प्रतिजगृहुषोऽर्धमिन्द्रियस्याऽपराक्रमत् । स एतेन प्रतिगृह्णात् सोर्धमिन्द्रियस्योपाधत्त ॥ य एतं विद्वानश्वं प्रतिगृह्णात्यर्धमिन्द्रियस्योपाधत्ते ॥ य एतद्विद्वान्प्रतिगृह्णात्य-

र्थमिन्द्रियस्यापक्रामति ॥ तस्याग्नेर्हिरण्यं प्रतिगृहुषस्तृती-
यमिन्द्रियस्यापक्रामत् स एतेन प्रतिगृह्णात् स तृतीयमि-
न्द्रियस्योपाधत्त ॥ य एतद्विद्वान्हिरण्यं प्रतिगृह्णाति तृती-
यमिन्द्रियस्योपाधत्ते । य एतद्विद्वान्प्रतिगृह्णाति तृतीयमि-
न्द्रियस्यापक्रामति । तस्य रुद्रस्य गां प्रतिजगृहुषश्चतुर्थ-
मिन्द्रियस्यापक्रामत् । स एतेन प्रतिगृह्णात् स चतुर्थमि-
न्द्रियस्योपाधत्त । य एतद्विद्वान् गां प्रतिगृह्णाति स चतु-
र्थमिन्द्रियस्यापाक्रामति । तस्य बृहस्पतेर्वासः प्रतिजगृहुषः
पञ्चममिन्द्रियस्यापक्रामत् । स एतेन प्रतिगृह्णात् स पञ्च-
ममिन्द्रियस्योपाधत्ते ॥ य एतद्विद्वान्वासः प्रतिगृह्णाति
पञ्चममिन्द्रियस्योपाधत्ते । य एतद्विद्वान्प्रतिगृह्णाति पञ्च-
ममिन्द्रियस्योपक्रामति ॥ २ ॥ तस्योत्तानस्याऽङ्गिरसस्या-
प्राणत्प्रतिजगृहुषः षष्ठमिन्द्रियस्योपक्रामत् स एतेन प्रति-
गृह्णात् षष्ठमिन्द्रियस्योपाधत्त । य एतद्विद्वान्प्राणत्प्रति-
गृह्णाति षष्ठमिन्द्रियस्योपाधत्ते । यएतद्विद्वान्प्रतिगृह्णाति-

षष्ठमिन्द्रियस्योपक्रामति। तस्य प्रजापतेः पुरुषं प्रतिज-गृहुषः सप्तममिन्द्रियस्योपक्रामत् स एतेन प्रतिगृह्णात् स-प्तममिन्द्रियस्योपाधत्ते । य एतद्विद्वान्पुरुषं प्रतिगृह्णाति, सप्तममिन्द्रियस्योपाधत्ते । य एतद्विद्वान् प्रतिगृह्णाति सप्तममिन्द्रियस्योपक्रामति ॥३॥ क इदं कस्मा अदात्कामः कामायेति कामो हि दाता कामः प्रतिगृहीता कामः समु-द्रमाविशदिति समुद्र इव हि कामोऽपरिमितः कामेन त्वा प्रगृह्णामि कामैतत्त इति कामेनैव प्रतिगृह्णाति कामे प्रतिष्ठापयति। नाहं वैतस्मिन्नमुस्मिँल्लोके दक्षिणामिच्छ-न्ति। य एवं विद्वान् दक्षिणां प्रतिगृह्णाति। यस्तं देवं वेद योऽग्रे दक्षिणा अनयत्प्रतावदाप्नोति, यावद्दक्षिणानां नेत्रं भवति ये तान्वेद येभ्यः स तदनयद्दक्षिणीयो भवति। यस्तं प्रतिगृहं वेद येन ते प्रतिगृह्णन्वसीयान्भवति प्रति-गृह्य वसीयांसि हि ते प्रतिगृह्याभवंस्ते देवाः सुरित्रा व्य-गृष्यांस्ते विदुरमुतः प्रदानाद्वा इहाजगामेति ॥ त ऋषी-

नब्रुवन्नतो न यूयं प्रयच्छतेति सप्तहोतॄन् केनायतन्वेत्य-
त्रैव वेत्स्यथेति सप्तहोत्रार्यमगृहपतयोन्यसीदन्सन्तनवा-
मेति तेषां महाहविर्होताऽसीत्सत्यहवीरध्वर्युर्गोचित्तपाजा
अग्निदचित्तमना उपवक्ता नाधृष्यश्च प्रतिधृष्यश्चाभिगरा
अयास्या उद्गाता त एतं गृहमगृह्णत आयतनमैच्छंस्ते त्रय-
स्त्रिंशमेवायतनमारचयंस्ते वेदं समतन्वंस्त्रयस्त्रिंशेन च हवा
इदं सप्तहोत्रा च सन्ततं यदिदं देवा मनुष्या अन्योन्यस्मै
प्रददाति सन्ततमस्मा अविच्छिन्नं प्रदीयते य एवं वेद ॥
अनेन मन्त्रहोमेन पितुः विष्णोः प्रथमे वा त्रयोदशे विष्णुश्राद्धे
वायुरूपो यमः प्रीयतां प्रीतोस्तु ॥ इति यमकारणानि ॥ ४ ॥
ततः शनैश्चरसूक्तं पठेत् ॥

अथ पितृकारणानि ॥ ५ ॥

आहं पितॄन्सुविदत्राँ अवित्सिनः पातं च विक्रमाणं च विष्णोः । बर्हिषदो ये स्वधया सुतस्य भाजन्त पितरस्त इहागमिष्ठाः ॥ यथा पितृसंख्या ॥ पितृध्यानम् । ये केचि-

भुवि सन्ति पूर्वपितरो ये के च नद्यां गता ये पाताल-
निवासिनो मम कुले याताश्च ये प्रेतताम् । ये दग्धा नि-
जगोत्रजैः पितृवने दग्धाश्च ये वा स्वतः क्षेत्रेऽस्मिन्नुपया-
न्तु तेऽद्य निखिला मन्त्रक्रियावैभवात् ॥ १ ॥ ये चा-
स्मत्पितरो विषादपि मृता येऽभक्ष्यभक्ष्याद्धता येचान्ये
क्षुधितार्तिदुर्भिक्षहता ये व्याधिग्रस्ताः परे । ये चण्डाल-
पदातिसङ्करहता ये शस्त्रसम्भेदनैस्तेद्यास्मिन्नुपयान्तु कर्म-
विषये तृप्तिं परां कर्मजाम् ॥ २ ॥ ये चास्मत्पितरः सरी-
सृपहता ये चाथमश्रृङ्गिभिर्ये दंष्ट्राजलवह्निपादपशिलाचौ-
रारिदुष्टैर्हताः । येऽसत्सङ्गतिदुष्टचारचरितैर्विस्रम्भघाताश्च
ये तेऽद्यास्मिल्लघु संलभन्तु महतीं तृप्तिं परां कर्मजाम्
॥ ३ ॥ आवाहिता मखमुखे भवदर्थमद्य नारायणादय
इमे खलु कारणेशाः । उत्तारणाय भवतो नरकात्सुघो-
रात्त्वं चैहि प्रेत गगनाकृतिशून्यरूपः ॥ ४ ॥ ॐ उदी
रतां षड्नां शङ्खः पित्र्यं जगत्येकादशी ॥ ॐ उदीरतामवरा

उत्परासा उन्मध्यमाः पितरः सोम्यासः । असुं य्य ईयु-
रवृका ऋतज्ञास्ते नोऽवन्तु पितरोहवेषु ॥ इदं पितृभ्यो
नमो अस्त्वद्य ये पूर्वासो य उ परास ईयुः । ये पार्थिवे
रजस्या निषत्ताये वा नूनं सुवृजिनासु विक्षु ॥ आहन्पितृ-
न्सुविदत्रां अवित्सिन पातं च विक्रमाणं च विष्णोः ।
बर्हिषदो ये सुधया सुतस्य भाजन्त पितस्त इहागमिष्ठाः ॥
बर्हिषदः पितर ऊत्यर्वागिमा वो हव्या चकृमा जुषध्वम् ।
त आगता वसाशन्त मे नाथा नः शंय्योनौरपो ददा-
तन ॥ उपहूताः पितरः सोम्यासो बर्हिष्येषु निधिषु प्रि-
येषु । त आगमन्तूत इह श्रुवन्तु तेऽवन्त्वऽस्मान् ॥ शुच्या
जानु दक्षिणतो निषिद्येमां यज्ञमभि घृणन्तु विश्वे । माहिं-
सीष्ट पितरः केनचिन्नो यद्व आगः पुरुद्दा कराम ॥ आ-
सीनासो अरुणीनामुपस्थे रयिष्ठन्त दाशुषे मर्त्याय । पुत्रे-
भ्यः पितरस्तस्य वसवस्ते सोम्यासाः प्रयच्छत इहोर्जं
दधातन ॥ ये नः पूर्वे पितरःसोऽनूहिरे सोमपीथं व-

सिष्ठाः । तेभिर्यमः संरराणो हवींष्युशन्नुशद्भिः प्रतिकाम-मन्तु ॥ ये तातृषुर्देवत्रा जेहमाना होत्राविदः स्तोमतष्टासो अर्कैः । अग्ने याहि सुविदत्रेभिरर्वाङ् सत्यैः काव्यैः पितृभिर्घर्मसद्भिः ॥ ये सत्यासो हविरदो हविष्पा इन्द्रेण देवैः सरथं दधानाः । अग्ने याहि सहस्रं देववन्दैः परैः पूर्वैः पितृभिर्घर्मसद्भिः ॥ २ ॥ अग्निष्वात्ताः पितर इहा-गच्छत सदः सदः सदत सुप्रणीतयः । अत्ता हवींषि प्रयतानि बर्हिष्यथा रयिं सर्ववीरं दधातन ॥ त्वमग्न ईडितो जातवेदोऽवाड्ढव्यानि सुरभीणि कृत्वी । प्रादाः पितृभ्यः स्वधया ते अक्षन्नद्धि त्वं देव प्रयता हवींषि ॥ ये चेह पितरो ये च नेह यांश्च विद्म यां उ च न प्रविद्म । त्वं वेत्थ यति ते जातवेदः स्वधाभिर्यज्ञं सुकृतं जुषस्व । ये अग्निदग्धा ये अनग्निदग्धा मध्ये दिवः स्वधया माद-यन्ते । तेभिः स्वराळसुनीतिमेतां यथा वशं तन्वं कल्प-यस्व ॥ इति ऋग्वेदे ॥

श्राद्धब्राह्मणम् ॥ ॥ श्रद्धया श्राद्धकामायनी श्राद्धमानुष्टु-
भन्तु ॥ श्रद्धयाग्निः समिध्यते श्रद्धया हूयते हविः । श्रद्धां
भगस्य मूर्धनि वचसा वेदयामसि ॥ प्रियं श्रद्धे ददतः
प्रियं श्रद्धे दिदासतः । प्रियं भोजेषु यज्वस्विदन्त
मुदितं कृधि ॥ यथा देवा असुरेषु श्रद्धामुग्रेषु चक्रिरे ।
एवं भोजेषु यज्वसु, अस्माकं मुदितं कृधि ॥ श्रद्धां देवा
यजमाना वायुगोपा उपासते । श्रद्धां हृदय्ययाऽकूत्या
श्रद्धया विन्दते वसु ॥ श्रद्धां प्रातर्हवामहे श्रद्धां मध्य-
न्दिनं परि । श्रद्धां सूर्यस्य निम्रुचि श्रद्धे श्रद्धापयेह नः ॥
यजुः ॥ पितुर्नुन्नस्तुतिर्गायत्रंत्वाद्योष्णिगनुष्टुब्गर्भा तृतीया पञ्च-
म्याद्याश्चतुस्रोऽनुष्टुबोन्त्या बृहती च ॥ ॥ पितुन्नु स्तोषं महो
धर्मानन्तविषीं यस्य त्रितो व्योजसा वृत्रं विपर्वमर्दयत् ।
स्वादो पितो मधोपितो वयन्त्वा ववृमहे अस्माकम-
विता भव ॥ उप नः पितवाचरः शिवः शिवेभिरूतिभिः ।
मयोभूरद्विषेण्यः सखा सुशेवो अद्वयः ॥ तव ते पितरो

रसा रजांस्यनु विष्ठिता दिवि वाता इव श्रिताः ॥ तव त्ये पितो ददतस्तव स्वादिष्ठ ते पितो प्रस्वाद्मानो रसानां तु विग्रीवा इवेरते । त्वे पितो महानां देवानां मनोहितम् । अकारि चारु केतुना तवाहिमावसावधीत् । यद्दः पितो अजगन्विवस्व पर्वतानाम् । अत्राचिन्नो मधो पितोरं भक्ष्याय गम्याः ॥ यदपामोषधीनाम्परि शंसा रिषामहे, वाता पेपीव यद्भवं ॥ करम्भओषधी भव पीवो वृक्क उदारथिः । वाता पेपीव यद्भवं ॥ यत्ते सोम गवाशिरो यवाशिरो भजामहे, वाता पेपीव यद्भवं ॥ तन्त्वा वयं पितो वचोभिर्गावो न हव्या सुषूदिम । देवेभ्यस्त्वा सदमादमस्मभ्यं त्वा सदमादम् ॥ १ ॥ सोमाय पितृमत इति तूष्णीम् ॥ सोमाय पितृमत आज्यं पितृभ्यो बर्हिषद्भ्यः षट्कपालः पुरोळाशः पितृभ्यो अग्निष्वात्तेभ्यो धाना अग्नये कव्यवाहनाय मन्था, एतत्ते तत येचत्वाऽनु, एतत्ते पितामह येचत्वाऽनु, एतत्ते प्रपितामह येचत्वाऽनु, अत्र

पितरोमादयध्वम् । स्वसन्दृशन्त्वा वयं मघवन्सन्दिषीमहि
प्रनूनं पूर्णवन्धुरः स्तुतो यामि वशामनु यो जान्विन्द्र ते
हविः । परेत पितरः सोम्यासो गम्भीरेभिः पथिभिः पू-
र्विणेभिर्दत्वा यास्मभ्यं द्रविणेहि भद्रं रयिं चनः सर्ववीरं
नियच्छत अमी मदन्तु पितरः ॥ अयाविष्ठा जनयन्कर्व-
राणि, सहि घृणिरुर्वरायुगातुः । सम्प्रत्युदैद्धरुणं मध्वो
अग्रं, स्वायन्तनू तनुमैरयन्त अक्षन्नमी मदन्त ह्यव प्रिया
अतषत अस्तोषत सुभानवो विप्रा न विष्टया मती, यो
जान्विद्र ते हरी ॥ नमो वः पितरो मन्यवे, नमो वः
पितरः शुष्माय, नमो वः पितरो जीवाय, नमो वः पि-
तरो रसाय, नमो वः पितरोऽकूराय, नमो वः पितरो
बलाय, नमो वः पितरः स्वधा वः, पितरो याऽत्र
पितरः स्वधा, यत्र यूयं स्थ सा युष्मासु तया यूयं, यथा-
भागं मादयध्वं, येह पितर ऊर्क् यत्र वयं स्म, सा अ-
स्मासु तस्यै वयं ज्योक्जीवन्तो भूयास्म ॥ ॥ मनोन्वा

हवामहे नाराशंसेन स्तोमेन पितॄणां च मन्मभिः । आन
एतु मनः पुनः क्रत्वे दक्षाय जीवसे ज्योक् सूर्य-
न्दृशे । पुनर्नः पितरो मनो ददातु दैव्यो जनः जीवा-
न्व्रातं सचेमहि । आते अग्न इधीमहि धीमन्तं देवजनम् ।
यद्धस्याति पनीयते समिदीदयति द्यवि इषं स्तोत्रभ्य आ-
भर ॥ यदन्तरिक्षं पृथिवीमुत द्यां यत्पितरं मातरं वा
जिहिंसिम । अग्निर्नस्तस्मादेनसो गार्हपत्यः प्रमुञ्चतु चकृम
यानि दुष्कृता ॥ ॐ उशन्तस्त्वा हवामह उशन्तः समि-
धीमहि । उशन्नुशन्त आवह पितॄन्ह विषे अत्तवे ॥ त्वं
सोम प्रचिकितो मनीषा त्वं रजिष्ठ मननेष पन्थाम् । तव
प्रणीते पितरो न इन्दो देवेषु रत्नमभजन्त धीराः ॥ त्वया
हि नः पितरः सोमाः पूर्वे कर्माणि चक्रुः पावमान धीराः ।
वन्वतु वातः परिधीरोपर्णुर्वीरेभिरश्वैर्मघवा भवा नः ॥
त्वं सोम पितृभिः संविदानोऽनुद्यावापृथिवी आततन्त ।
तस्मै त इन्दो हविषा विधेम वयं स्याम पतयो रयीणाम् ॥

बर्हिषदः पितर ऊत्यर्वागिमा वो हव्या चकृमा जुषध्वम् । त आगता वसाशन्त मे नाथा नः शंय्योर्नौरापो ददात न ॥ आहन्पितृन्सुविदत्राँअवित्सि नः पातं च विक्रमणं च विष्णोः । बर्हिषदो ये सुधया सुतस्य भाजन्त पितस्त इहागमिष्ठाः ॥ उपहूतः पितरः सोम्यासो बर्हिष्येषु निधिषु प्रियेषु । त आगमन्तु त इह श्रुवन्त्वधिब्रुवन्तोऽवन्त्वऽस्मान् ॥ अग्निष्वात्ताः पितर इहागच्छन्तु सदः सदः सदतः सुप्रणीतयः । अत्ता हवींषि प्रयतानि बर्हिष्यथा रयिं सर्ववीरं ददातन ॥ अग्निष्वात्ता ऋतावृधः पितरो मृळतास्व नः । प्रमुञ्चन्तु नो अंहसः ॥ अग्निष्वात्ताऽनृतमती हवामहे नराशंसं, सोमपीथं ये आनशुः । ता आगमन्त त इह श्रुवन्त्वधिब्रुवन्तो तेऽवन्त्वऽस्मान् ॥ स पूर्वया निविदा कव्यता योरिमाः प्रजा अजयन्मनूनाम् । विवस्वता चक्षसाध्यामऽपश्च देवा अग्निं धारयन्द्रविणोदाः ॥ यो अग्निः कव्यवाहनः पितॄन्यक्षदृता वृधा । प्रेदु

हव्यानि वोचते देवेभ्यश्च पितृभ्य आ ॥ त्वदग्ने काव्या त्वन्मनीषा त्वदुक्था जायन्ते राध्यानि त्वदेति द्रविणम् । वीरपेशा इत्था धिये दाशुषे मर्त्याय, वायुरग्रेगा प्रयाभिर्यासि ॥ सीरा युञ्जन्ति कवयो युगा वितन्वते पृथक् । धीरा इन्द्राय सुम्नया ॥ शुनं हुवे मघवानमिन्द्रमस्मिन्भरेनृमं वाजसातौ । शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि । सञ्जितं धनानाम् ॥ उदुत्यं, चित्रन्देवानाम् । इन्द्रं वयं शुनासीरमस्मिन्यज्ञे हवामहे, इह देवं सुरादसम् ॥ इन्द्रं वयं धनपतिं क्रतुमन्वारभामहे । स नः पितेव पुत्रेभ्य ईशानः शर्म यच्छतु ॥ इति पितृसूक्तम् ॥

"अथ यजुर्वेदे ॥" असुराणां वा इमे लोका आसंस्ते देवानब्रुवन् । यो वै यं लोकमुज्जिष्यति स तस्मै भविष्यतीति, ते वसव इमं लोकमजयन्नऽन्तरिक्षं रुद्रा दिवमादित्यास्ते वसव इमं लोकं जित्वाऽन्तरिक्षं परापतंस्ते रुद्रानब्रुवन् यन्नो ज्रयेम तन्नः सहासदिति, ते वसवो

रुद्राश्चान्तरिक्षं जित्वा दिवं परापतंस्त आदित्यानब्रुवन्यस्मो जयेम तन्नः सहासदिति ते वसवो रुद्राश्चादित्याश्चामुं लोकं जित्वेमानेव लोकानसुरानभ्यभवंस्ततो देवा अभवन् पराऽसुरा अभवन्वसवः पितरो, रुद्राः पितामहा, आदित्याः प्रपितामहास्तस्मादाहुर्देवाः पितरः पितरो देवा इति ये वै देवानां सोमपाः पितरस्तानुदपात्रैस्तर्पयन्ति तस्मान्निरेकस्यापः प्रदीयन्ते द्विरेकस्य सकृदेकस्य, तत्षट् सम्पद्यते यथाजितमेवोपलभन्ते यदनन्तममुदकं सम्पिबन्ति तत्सप्तमं यदुभयतो मूलैस्तिलमिश्रं तदष्टमं यत्पात्र्या पिण्ड परिषेकस्तन्नवमं यदुदकुम्भं दक्षिणां प्रोक्षन्ति तद्दशमं तेन दशोदकं श्राद्धमुच्यते, तद्दश दशाक्षरा विराळन्नं विराड्विराज्ये वाऽन्नाद्ये प्रतितिष्ठति ॥ १ ॥ पितरो वै पुत्रं जायमानमन्वायन्नस्माकं श्राद्धं कुर्यादिति, सोऽब्रवीत्कदाऽहं श्राद्धं करवाणीति तेऽब्रुवन्हस्तिच्छायायां श्राद्धं दद्याद्यः कामयेत न पुनर्दद्यादिति हस्ती वै भूत्वा सुर्भाजुरक्षमा-

त्रित्यं छायया भ्यभवत्तद्देवपितर आप्याययन्नेतद्वै देवपि-
तृणामायतनं यद्धस्तिच्छायायां तस्माद्धस्तिछायायां श्राद्धं
दद्याद्यः कामयेताऽक्षय्यमऽपरिमितमऽनन्तं भूयः स्यादि-
त्यक्षय्यमेवाऽपरिमितमऽनन्तं भूयो भवति, य एवं वि-
द्वान्हस्तिच्छायायां श्राद्धं ददाति पितृणामक्षय्यत्वाय
॥ २ ॥ द्वौ वै पन्थानौ देवयानश्च पितृयानश्चाग्निहोत्रेण
वै देवाः स्वर्गं लोकमायन्पितृयज्ञेन पितृलोकं तस्मादुभौ
पन्थानौ देवयानश्च पितृयानश्चोभाभ्यां वा इतः स्वर्गं
लोकमित्याहुरन्यस्मिंल्लोके समिधा प्रत्यतिष्ठन्नाद्यश्च प्र-
जाभ्योपासरंस्तेभ्योऽब्रवन्नग्नौ कुर्मोऽग्नौ करिष्याम्यग्नौ
करवाणीति, तेऽब्रुवन्कुरुत, कुरुष्व क्रियतामिति यः का-
मयेत प्रजावान्स्यादिति तस्य यज्ञे कुरुतेति ब्रूयाद्यं काम-
येत पशुमान्स्यादिति तस्य यज्ञे कुरुष्वेति ब्रूयाद्यं काम-
येत वसीयान्स्यादिति तस्य यज्ञे क्रियतामिति ब्रूयादग्नी-
षोमीयं वा एतद्धविर्यदग्नौ करणमग्नीषोमीयेनैव तद्धव्ये-

नास्मिँल्लोके यजमानो वसीयान्भवति ॥ ३ ॥ मनो वा एष युङ्क्ते यो यक्ष्यमाणो युंक्ते सहि मनसा यज्ञस्तायते स यज्ञो भवत्यथ श्रद्दत्ते श्रद्धानं वै पितरोऽन्वायंति वृद्धिं श्रुत्वा यद्वृद्धिश्राद्धं कुर्वन्ति तेनास्य ते पितरोऽभीष्टाः प्रीता भवन्तीन्द्रो वै प्रजाकामः पितृयज्ञेनाऽयजत्तस्यासुरा यज्ञ-मजिघांसंस्तान्विश्वदेवा उपघ्नन्यद्वैश्वदेवं पुरस्तात्कुर्वन्त्य-सुराणामपहत्यै प्राचीनं प्रवणेन देयं प्राचीनप्रवणो वै वज्रो वज्रेणैव यज्ञाद्रक्षांस्यपहन्ति दक्षिणाग्राश्चोदगग्राश्च दर्भा भवन्ति दक्षिणाग्रेभिर्वाऽस्य पितरः समुपसरन्त्युद-गग्रेभिर्देवास्तस्माद्ब्राह्मणेभ्य आवृता दर्भाः प्रदीयन्ते पितृ-णामुपसरत्वायैवमस्य पितरः समुपसरन्त्यन्तर्हिता ह्यमुष्मा-दादित्यात्पितरोरथेऽन्तर्हिता हि देवेभ्यश्च मानुष्येभ्यश्च पितरः, उपमूलं बर्हिर्ददाति तेन पितृणां यद्गतमूलं तेन दे-वानामुभये हीज्यन्तेऽन्तर्हिता हि वीक्ष्यया मानुष्यस्यैव-मिव हि तेऽन्तर्हिता भवन्ति । इति श्राद्धब्राह्मणम् ॥ अनेन०

पितुर्विष्णोः प्रथमे द्वितीये त्रयोदशे विष्णुश्राद्धे आकाशरूपाः पितरः प्रीयन्तां प्रीताः सन्तु ॥ इति पितृसूक्तम् ॥

॥ अथ इषे त्वोर्जे त्वा ब्राह्मणम् ॥

'इषे त्वोर्जे'तीषमेवोर्जं यज्ञो दधाति "वायवःस्थ" इति वायवा अन्तरिक्षस्याऽध्यक्षोऽन्तरिक्षादेव वायव्याः पशवो वायुरेवैनानऽन्तरिक्षाय परिदधाति प्रायएनानेतत्करोति यद्वा वायवःस्थेत्याहारण्यस्येव हि वायु "सपायवस्थेऽति" यजमानायैव पशूनुपाकरोति "देवोवः सविता प्रार्पय-त्वि"ति प्रसूत्यै "श्रेष्ठतमाय कर्मणे" इति यज्ञो वै श्रेष्ठतमं कर्म "आप्यायध्वमघ्न्या देवभाग"मिति वत्सेभ्यश्च वा एता मनुष्येभ्यश्च पुनराप्यायन्ते ध्यै तर्हि देवेभ्य एवैना आप्याययन्ति "प्रजावतीरनमीवा आयक्ष्मा" करोति "मा वः स्तेन ईशत माघशंस" इत्याशिषमेवाशास्ते "परि वो रुद्रस्य हेतिर्वृणक्त्विति" रुद्रमेवमभि परि वृणुक्तु धा-

तस्कोस्य रुद्रः पशून्भवति । यस्यैवं विदुषो यस्यैवं विद्वान्हविषे प्रार्पैः प्रार्पयति "ध्रुवा अस्मिन् गोपतौ स्यातेति" दृंहत्येवैना "बह्वीरिति" भूयानमेवैना गमयति "यजमानस्य" पशून्पाहि । "पशुपा असी"ति पशूनां गोपीथाय प्रतीचीं शाखामुपगूहति तस्माद्ग्राम्याः पशवः सायमारण्याद्ग्राममुपयन्ति यत्पराचीमुपगुहेदरण्ये हीयेरन् ॥ इति इषे त्वोर्जे त्वा ब्राह्मणम् ॥

अथ स्वाध्यायब्राह्मणम् ॥

स ह वै देवानां चासुराणां च यज्ञो प्रतता आस्तां, वयं स्वर्गं लोकमेष्यामो वयमेष्याम इति । ते सुरा सन्नद्धोवै सहसाऽचरन् ब्रह्मचर्येण तपसैव देवास्तेऽसुरा अमुह्यंस्ते न प्रजानंस्ते पराभवन्प्रसृतेनैव यज्ञेन देवाः स्वर्गं लोकमायन्नप्रसृतेनाऽसुराः पराभवन् प्रसृतो वै यज्ञ उपवीतिनोऽप्रसृतेनोपवीतिनो यद्वै किञ्चिद्ब्राह्मणो यज्ञोपवीत्यधीते यजत एव तस्माद्ब्राह्मणो यज्ञोपवीत्येवाधीयीत

यजेत याजयेद्वा दद्यात्प्रतिगृह्णीयाद्यज्ञस्य प्रसृत्याऽजिनं वासो वा दक्षिणत उपवीय दक्षिणं पाणिमुद्धरत्यवधत्ते सव्यमिति यज्ञोपवीतमेतदेव विपरीतं प्राचीनावीतं पितृदैवत्यं संवीतं मानुष्यं निवीतमासुरम् ॥ १ ॥ अजान् ह वै पृश्नीस्तपस्यमाना ब्रह्म स्वयं लभ्यानर्ष त ऋषयोऽभवंस्तदृषीणामृषित्वं तान्देवा उपातिष्ठन्त यज्ञकामास्तेभ्य एतद्ब्रह्मयज्ञमपश्यन् स्वाध्यायं तेनायाजन्त यदृचोऽध्यगीषत ताः पयआहुतयो देवानामभवन् यद्यजूंषि ता घृताहुतयो यत्सामानि ताः सोमाहुतयो यदथर्वाङ्गिरसस्ता मध्वाहुतयो यद्ब्राह्मणानीतिहासान्पुराणानि कल्पान्गाथा नाराशंसीस्ता मेदआहुतयो देवानामभवन्, ताभिः क्षुधां पाप्मानमपाघ्नताऽपहतपाप्मानो देवाः स्वर्गं लोकमायन्ब्रह्मणः सायुज्यमृषयोऽगच्छन्क्षुधामेव पाप्मानमपहत्य स्वर्गं लोकमेत्य ब्रह्मणः सायुज्यं गच्छति य एवं विद्वान्स्वाध्यायमधीते ॥ २ ॥ पञ्च वा एते यज्ञाः सदवि

प्रतायन्ते सदधिसन्तिष्ठन्ति देवयज्ञः पितृयज्ञो भूतयज्ञो मनुष्ययज्ञो ब्रह्मयज्ञश्चेति यदग्नौ जुहोत्यपि समिधं तद्देवयज्ञः सन्तिष्ठते। यत्पितृभ्यः स्वधाकारैस्तर्प्योऽपः तत्पितृयज्ञः सन्तिष्ठति । यद्भूतेभ्यो बलिं हरति तद्भूतयज्ञः सन्तिष्ठति । यत् ब्राह्मणेभ्योऽतिथिभ्योप्यऽन्नाद्यमुपहरति तन्मनुष्ययज्ञः सन्तिष्ठति । यत्स्वाध्यायमधीत एकामप्यृचं यजुः साम वा तद्ब्रह्मयज्ञः सन्तिष्ठति ॥ २ ॥ यदृचोऽधीते पयसः कुल्या अस्य पितृन्स्वधा अभिवहन्ति यद्यजूंषि घृतकुल्या यत्सामानि सोम एभ्यः पवते यदथर्वाङ्गिरसो मधोः कुल्या यद्ब्राह्मणानीतिहासान्पुराणानि कल्पान्गाथा नाराशंसीर्मेदसः कुल्या अस्य पितृन्स्वधा अभिवहन्ति। यदृचोधीते पय आहुतिभिरेव देवांस्तर्पयति यद्यजूंषि घृताहुतिभिः यत्सामानि सोमाहुतिभिर्यदथर्वाङ्गिरसो मध्वाहुतिभिर्यद्ब्राह्मणानीतिहासान्पुराणानि कल्पान्गाथा नाराशंसीर्मेदाहुतिभिरेव देवांस्तर्पयति एनं

तृप्ताः प्रीतास्तेजसा वर्चसा द्रविणेन चान्नाद्येन तर्पयन्ति ॥ ४ ॥ ब्रह्मयज्ञेन यक्ष्यमाणः प्राच्यां दिशि ग्रामादाग-च्छन्दिश उदीच्याः प्रागुदीच्यां वोदित आदित्यो दक्षि-णत उपवीयोपविश्य त्रिरापआचामेद्भिः परिमृजेद्दर्भाणां महदुपस्तीर्योपस्थं कृत्वा प्राङासीनः स्वाध्यायमधीयी-तापां वा एष ओषधीनां रसो यद्दर्भाः सरसमेव ब्रह्म कुरुते दक्षिणोत्तरौ पाणी कृत्वा सपवित्र ओमिति प्रति-पद्यते एतद्वैतद्यजुस्त्रयीविद्यां प्रत्येषा वागेतत्परममऽक्षरं तदेतदृचाभ्युक्तम् "ऋचोअक्षरे परमे व्योमन् यस्मिन्देवा अधिविश्वे निषेदुः । यस्तन्न वेद किमृचा करिष्यति य एतद्विदुस्त इमे समासते" इति त्रयमेव प्रयुक्त्वाथासीत सावित्रीं गायत्रीं त्रिरन्वाह, पच्छोऽर्धर्चशोऽननवानं स-विता श्रियः प्रसविता श्रियमेवाप्नोतीत्यथो प्रज्ञातयैव प्रतिपदाच्छन्दांसि प्रतिपद्यते ॥ ५ ॥ तस्य वा एतस्य यज्ञस्य मेघा हविर्दानं वर्षं हविर्विद्युदग्निः स्तनयित्नुर्वषट्कारो यदवस्फूर्जति सोऽनु वषट्कारो वायुरात्माऽमावस्यां स्विष्ट-

कुर्य एवं विद्वान्मेघो वर्षति विद्योतमाने स्तनयत्यवस्फूर्जति पावमाने वाया अमावस्यायां स्वाध्यायमधीते उत्तमं नाकं रोहति उत्तमः समानानां भवति यावद्वा इमां पृथिवीं वित्तस्य पूर्णां ददत्स्वर्गं लोकं जयति त्रिस्तावन्तं जयति भूयांसं चाक्षय्यमपः पुनर्मृत्युञ्जयति यएवं विद्वान्स्वाध्यायमधीते ॥ ६ ॥ तस्य वा एतस्य यज्ञस्य द्वा अनध्यायौ यदात्माऽशुचिर्यद्देशो य एवं विद्वान्महारात्र उषस्युदित आसीनस्तिष्ठन् व्रजञ्शयानोऽरण्ये ग्रामे वा यावत्तरसं स्वाध्यायमधीते सर्वांल्लोकानभिजयति सर्वांल्लोकानऽनृणोऽनुसञ्चरति तदेषाऽभ्यनूक्ता "अनृणा अस्मिन्ननृणाः परस्मिंस्तृतीये लोके अनृणाः स्याम। ये देवयानाः पितृयानाश्च लोकाः सर्वांल्लोकाननृणाः सञ्चरेम" इत्यग्निं वै सृष्टं पाप्माऽपजग्राह तस्य प्रजापतिराहुतिभिः पाप्मानमपहताहुतीनां यज्ञेन यज्ञस्य दक्षिणाभिर्दक्षिणानां ब्राह्मणेन ब्राह्मणस्य छन्दोभिः छन्दसां स्वाध्यायेनापहत-

पाप्मा स्वाध्यायो देवपवित्रं वा एतद्धविस्तं यो विज-
जत्यभागो वाचि भवत्यऽभागो नाके। तदेवाऽभ्यनूक्ता
"यस्तित्याज सचिविदं सखायं न तस्य वाच्यपि भागो
अस्ति। यदीं शृणोत्यलीकं शृणोति नहि प्रवेद सुकृतस्य
पन्थाम्" इति तस्मात्स्वाध्यायोऽध्येतव्यो यंयं क्रतुमधीते
तेनास्येष्टं भवत्यग्नेर्वायोरादित्यस्य सायुज्यं गच्छति तदे-
षाभ्यनूक्ता "ये अर्वाञ्च उत वा पुराणा वेदं विद्वांसो
अभितो वदन्ति। आदित्यमेव ते परिविशन्ति सर्वेऽग्निं
द्वितीयं त्रिवृतं च हंस"मिति यावतीर्वै सर्वा देवतास्ताः
सर्वा वेदविदि ब्राह्मणे वसन्ति, तस्माद्ब्राह्मणेभ्यो वेद-
विद्भ्यो दिने दिने नमस्कुर्यान्नाश्लीलं कीर्तयेदेता एव
देवताः प्रीणाति। मध्यंदिने प्रबलमधीयीताग्निर्वै ब्राह्म-
णोऽग्ना आदित्योग्निस्तस्मादेष तेजिष्टं तपति तदेषाऽभ्य-
नूक्ता "चित्रन्देवानामुदगादनीकं चक्षुर्मित्रस्य वरुण-
स्याग्नेः। आप्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जग-

वस्तस्थुषश्चेति" स वा एष ब्रह्मयज्ञः सद्यः प्रतायते सद्यः सन्तिष्ठते तस्य प्राक् सायमवभृथो "नमो ब्रह्मण" इति परिधानीयां त्रिरन्वाहाऽप उपस्पृश्य गृहान्परीत्य तत्र यत्किंचिद्ददाति तद्दक्षिणाद्वहे ह वा एष छन्दांसि यो याजयति स येन यज्ञ क्रतुना याजयेत्तमरण्यं परेत्य शुचौ भूम्यवकाशे ग्रामादिशुचौ देशे स्वाध्यायमेवैनमधीयन्नासीत तथाहास्य पुनराप्याययन्ते दीक्षामुपैति दीक्षितो वा एष भवति यः स्वाध्यायमधीते तस्यानशनन्दीक्षास्थानमुपसद आसीनं सत्या वागुजुहूर्मन उपभृत्प्राणो हविः सवा एष ब्रह्मयज्ञः प्राणं दक्षिणः सद्यः समृद्धतमो भवति ग्रामेण मनसा स्वाध्यायमधीते दिवानक्तं वेति ह स्माह शौच आग्नेयमुतारण्ये बलवदुत वानो उत्तिष्ठन्नुत व्रजन्नुतासीन उत शयानोऽधीयीत वै स्वाध्यायमानस्वाद्धा एष तपस्तप्यते यः स्वाध्यायमधीते तपस्वी पुण्यो भवति। तदेषाभ्यनूक्ता ॥ ९ ॥ "नमो ब्रह्मणे नमो अस्त्वग्नये

नमः पृथिव्यै नम ओषधीभ्यो नमो वाचे नमो वाचस्पतये नमो विष्णवे बृहते कृणोमि । इत्येतासामेव देवतानां सार्ष्टितां सायुज्यं सलोकतां सामीप्यमाप्नोति य एवं विद्वान्स्वाध्यायमधीते ॥ इति स्वाध्यायब्राह्मणम् ॥

अथ प्रतिग्रहब्राह्मणम् ॥

ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां प्रतिगृह्णामि, वरुणस्त्वा नयतु देवि दक्षिणे यमायाशु, तेनामृतत्वमशीय वयो दात्रे भूयान्मयो मह्यं प्रतिगृहीत्रे, देवस्य त्वा सवितुः० प्रतिगृह्णामि, वरुणस्त्वा नयतु देवि दक्षिणेऽग्नये हिरण्यं तेनाऽमृतत्वमशीय वयो दात्रे भूयान्मयो मह्यं प्रतिगृहीत्रे, देवस्य त्वा सवितुः० प्रतिगृह्णाम्यऽग्निस्त्वाकृन्तन्नपसोतन्वत वरुत्रीरवयन् वरुणस्त्वा नयतु देवि दक्षिणे बृहस्पतये वासस्तेनामृतत्वमशीय वयो दात्रे भूयान्मयो मह्यं प्रतिगृहीत्रे, देवस्य त्वा सवितुः० उत्तानायाङ्गिरसाय प्राणं तेनामृतत्वमशीय वयोदात्रे भूया-

न्मयो मह्यं प्रतिगृहीत्रे, देवस्य त्वा सवितुः० प्रजापतये पुरुषं तेनामृतत्वमशीय वयो दात्रे भूयान्मयो मह्यं प्रतिगृहीत्रे, क इदं कस्मा अदात्कामः कामाय कामो दाता कामः प्रतिगृहीता कामः समुद्रमाविशत् कामेन त्वा प्रतिगृह्णामि कामैतत्ते अस्तु । इति प्रतिग्रहब्राह्मणम् ॥

अथ सन्ध्याब्राह्मणम् ॥

ॐ रक्षांसि ह वा पुरोऽनुवाके तपोग्रमतिष्ठन्त तानि प्रजापतिर्वरेण्योपामन्त्रयत । तानि वरमऽवृणीताऽदित्यो नो योद्धेति, तानि प्रजापतिरब्रवीद्योधयध्वमिति, तस्मादुत्तिष्ठन्तं ह वा तानि रक्षांसि आदित्यं योधयन्ति यावदस्तमन्वागात्तानि ह वा एतानि रक्षांसि गायत्र्याऽभिमन्त्रितेनाम्भसा शाम्यन्ति ह वा एते ब्रह्मवादिनः पूर्वाभिमुखाः सन्ध्यायां गायत्र्याभिमन्त्रिता आप ऊर्ध्वं विक्षिपन्ति, ता एता आपो वज्रो भूत्वा तानि रक्षांसि मर्दितान्यऽरुणे द्वीपे प्रक्षिपन्ति, यत्प्रदक्षिणं प्रक्रामन्ति

त्रेन पाप्मानमवधून्वन्त्युद्यन्तमस्तयन्तमादित्यमभिधाय कुर्वन्ब्राह्मणो विद्वान्सकलं भद्रमश्नुतेऽसावादित्यो ब्रह्मेति ब्रह्मैव सन् ब्रह्माप्येति य एवं वेद ॥ इति सन्ध्याब्राह्मणम् ॥

अथ पावमान्यब्राह्मणम् ॥

उपस्थानम् ॥ ॐ त्वं सोमासि द्वात्रिंशद्भारद्वाजः कश्यपो गोतमोत्रिर्विश्वामित्रो जमदग्निर्वसिष्ठ इतीह त्र्यृचा सप्तर्षयः शेषं पवित्रो वसिष्ठो मौवितारः तिस्रः पापाष्ण्यो यत्ते पवित्रमग्नेयी साविज्यग्निः सावित्री वैश्वदेवी पवस्व सोमेति षोडशाक्षरा-स्तिस्रो द्विपदास्त्रिशी पुरा उष्णिक् सप्तविंशत्यानुष्टुबन्ते च ते पावमान्यधेत्यस्तु ते जगती ॥ उपस्थाने विनियोगः ॥ ॐ त्वं सोमासि धारयुर्मन्द्र ओजिष्ठो अध्वरे । पवो समं हयद्रविः ॥ त्वं सदो नृपादने दधन्वात्सत्सरिन्तमः । इन्द्राय सूरि-रन्धसा ॥ त्वं सुष्वाणो आद्रिभिरभ्यो कर्षकनिक्रदत् । द्युमन्तं शुष्मसुत्तमम् ॥ इन्दुं हिन्वनि आर्षति तिरो वा-राण्यव्यया । हरिवाजमऽचिक्रदत् ॥ इन्दो व्यवमर्षसि

विश्ववासि विसौभगाः । विवाजान्सोमगो मतः ॥ १ ॥
आन इन्दो शतग्विनं रयिङ्गोमन्तमश्विनम् । भिरासोम-
सहस्रिणम् ॥ पावमानः स इन्दव स्थिरः पवित्रमाशवः ।
इन्द्रं यासेभिराशत ॥ ककुहः सोम्यो रस इन्द्ररिन्द्राय
पूर्व्याः । आयुः पवत आयवे ॥ हिन्वन्ति सूर सुस्रयः
पवमानः मधुश्च्युतम् । अभिगिरा समस्वरन् ॥ अविता नो
अजाश्वः पूषा यामनि वासनि । आभक्षत्कन्यासु नः ॥२॥
अयं सोम कपर्दिनो घृतन्नः पवते शुचि । आ भक्षन्
कन्यासु नः ॥ वाचो जन्तुः कवीनां पवस्व सोम धारय ।
देवेषु रत्नधा असि ॥ आकलयेषु धावति श्येनो वर्म वि-
गाहते । अभिद्रोणा कनिक्रदत् ॥ परि प्रसोमतेरसौरस-
लिकलशो सुतः । श्येनो न उक्तो आर्षति ॥ ३ ॥ पवस्व
सोम मन्दयन्निन्द्राय मधुमत्तमः । अस्रग्रन्देववीतये ॥
वाजयन्तो रथा इव ते सुतासो मदिन्तमा । शुक्रावायु-
मसृक्षत ॥ ग्राव्णा तन्नो अभिष्टुतः पवित्रं सोम गच्छसि ।

दधस्तोत्रे सुवीर्यम् ॥ एष तन्नो अभिष्टुतः पवित्रमति-
गाहते । रक्षोहावारमव्ययम् ॥ ४ ॥ यदऽन्ते यच्च दूरके
भयं विन्दति मामिह । पावमानं वितज्जहि ॥ पावमानः
सो अद्य नः पवित्रेण विचर्षणिः । यः पूतः स पुनातु
मा ॥ यत्ते पवित्रमर्चिष्यग्ने विततमन्तरः । ब्रह्म तेन
पुनीहि नः ॥ यत्ते पवित्रमग्निवदग्ने तेन पुनीहि नः ।
ब्रह्म स वै पुनीहि मा ॥ उभाभ्यां देव सवितः पवित्रेण
सवेन च । मां पुनीहि विश्वतः ॥ ५ ॥ "इत्युपस्थाने" ॥
अथ तर्पणम् ॥ अस्य पावमानीसूक्तस्य गायत्रीच्छन्दः सप्त-
र्षयो देवता तर्पणे विनियोगः । ॐत्रिभिष्ट्वन्देव सवितर्वर्षिष्ठैः
सोम धामभिः । अग्ने दक्षैः पुनीहि मा ॥ "अनुष्टुप्छ-
न्दः" ॥ पुनन्तु मां देवजनाः पुनन्तु वसवो धिया । विश्वे
देवाः पुनीत मा जातवेदः पुनीहि मा ॥ "द्वे गायत्रीच्छ-
न्दः" ॥ प्राप्यायस्व प्रस्यन्दस्व सोम विश्वेभिरंशुभिः । देवे-
भ्य उत्तमं हविः ॥ उपप्रियं परिपूतं च्युवानमाहुतीवृधम् ।

अगर्म विद्रुतो नमः "उष्णिक्च्छन्दः" ॥ अलाय्यस्य पर-
शुना शतमा पर्वसु देवसोम । आखुश्चिदेव सोम ॥
"द्वे आनुष्टुप्छन्दः" ॥ यः पावमानीरध्येत्यृषिभिः संभृतं
रसम् । सर्वं स पूतमश्नाति सुदितं मातरिश्वना ॥ पाव-
मानीर्यो अध्येत्यृषिभिः संभृतं रसम् । तस्मै सरस्वती
दुहे क्षीरं सर्पिर्मधूदकम् ॥ सप्तर्षयो वसिष्ठ ऋषिर्वाऽनुष्टुप्-
छन्दः त्रिष्टुप् वा देवाः सोमो देवता पाठे तर्पणे वा विनि-
योगः ॥ ॥ पावमानीः स्वस्त्ययनीः सुदुघा हि घृत-
श्च्युतः । ऋषिभिः संभृतो रसो ब्राह्मणेष्वमृतं हितम् ॥
पावमानीर्दिशन्तु न इमं लोकमथो अमुम् । कामान्स-
मवयन्तु नो देवैर्देवीः समाहृताः ॥ येन देवाः पवि-
त्रेणाऽत्मानं पुनते सदा । तेन सहस्रधारेण पावमानः
पुनातु मा ॥ प्राजापत्यं पवित्रं शतद्योतं हिरण्ययम् ।
तेन ब्रह्मविदो वयं पूतं ब्रह्म पुनीमहे ॥ इन्द्रः सुनीत्या
सहसा पुनातु सोमः स्वस्त्या । वरुणः समीच्या ॥

यमो राजा प्रसूणाभिः पुनातु जातवेदा, ऊर्जयन्त्वा पुनातु मा ॥ ऋषयस्तु तदपस्तापे सर्वे सर्वजिगीषवः । तपसस्तपसोध्यायन्तु पावमानी ऋचोदब्रवीत् ॥ यन्मे गर्भे वसतः पापमुग्रं यज्जायमानस्य च किञ्चिदन्यत् । जातस्य च यच्चापि च वर्धतो मे तत्पावमानीभिरहं पुनामि ॥ मातापित्रोर्यन्न कृतं वचो मे यत्स्थावरं जङ्गमभावभूव । विश्वस्य तत्प्रहरिषितं वचो मे तत्पावमानीभिरहं पुनामि ॥ गोघ्नात्तुष्कराद्वा स्त्रीवधाद्यत्किल्विषम् । पापकं च चरणेभ्यस्तत्पावमानीभिरहं पुनामि ॥ ब्रह्मवधात्सुरापानात्सुवर्णस्तेयाद्वृषलिगमनमैथुनसङ्गमात् ॥ गुरोर्दाराभिगमनाच्च तत्पावमानीभिरहं पुनामि ॥ बालघ्नान्मातृपित्रोर्वधाद्भूमितस्करात्सर्ववर्णगमनमैथुनसङ्गमात्पापेभ्यश्च प्रतिग्रहात् । सद्यः प्रहरन्ति सर्वदुष्कृतं तत्पावमानीभिरहं पुनामि ॥ क्रयविक्रयाद्योनिदोषाद्भक्ष्याद्भोज्यात्परिग्रहात् । असम्भोजनाच्चापि नृशंसं तत्पावमा-

नीभिरहं पुनामि ॥ दुरिष्टं दुरधीतं पापं यच्चाज्ञानतः कृतम् । अयाचिताच्चासंयाज्यात्तत्पावमानीभिरहं पुनामि ॥ ऋतस्य योनयोऽमृतस्य धाम विश्वादेवेभ्यः पुण्यगन्धास्ता न आपः प्रहरन्ति पापम् । शुद्धा गच्छामि सुकृतां लोके तत्पावमानीभिरहं पुनामि ॥ पावमानीः स्वस्त्ययनीर्याभिर्गच्छति नन्दनम् । पुण्यांश्च भक्ष्यान्भक्षयत्यमृतत्वं च गच्छति ॥ पावमान्यं परं ब्रह्म शुक्रं ज्योतिः सनातनम् ॥ पितॄंस्तस्योपतिष्ठन्ति क्षीरं सर्पिर्मधूदकम् ॥ पावमानीः पितॄन्देवान्ध्यायेद्यश्च सरस्वतीम् । पितॄंस्तस्योपतिष्ठेत्तु क्षीरं सर्पिर्मधूदकम् ॥ अनेन० अक्षय्यतृप्तिरस्तु पावमानीमन्त्राः प्रीताः सन्तु ॥

अथ मलिम्लुचब्राह्मणम् ॥

ॐ उद्वयन्तमसस्परि० ॥ १ ॥ उदुत्यञ्जातवेदसं० ॥ २ ॥ चित्रन्देवानां० ॥ ३ ॥ तच्चक्षुर्देव० ॥ ४ ॥ हंसः शुचिषत्० ॥ ५ ॥ सूर्योनोदिवस्पातु वातो अन्तरिक्षात् ।

अग्निर्नः पार्थिवेभ्यः ॥ ध्यानं ॥ सव्ये खड्गाक्षसूत्रा सकलधनलिनी जाह्नवी कूर्मवाहा वामे पाशाङ्कुशाढ्या मकररथगता सूर्यजा कुम्भहस्ता । धर्माधर्मौ च पार्श्वेऽरुणरथशशिनौ चक्षुषी द्वे च यस्य सोऽयं मार्तण्डनाथो हरतु च दुरितं भर्गरूपं नमामि ॥

ॐ साध्या ह वै नाम ऋषयः प्रजापतिमपृच्छन् किं वाऽयमग्निः सम्भवति किमिष्ट्वा किं यजेत को नु प्रीणाति, तान्प्रजापतिरब्रवीत् यत् षड्तून् यजेत् द्वादश पौर्णमासीरिष्ट्वा दक्षिणाग्निः प्रीणाति तेन स्वर्गं लोकं गमयति, यद्वादश ऋतून्यजेत चतुर्विंशतिपौर्णमासीरिष्ट्वाऽऽहवनीयः प्रीणाति तेनामृतत्वं गच्छति, यत् षोडश ऋतून्यजेत द्वात्रिंशत्पौर्णमासीरिष्ट्वा गार्हपत्यः प्रीणाति तेन त्रयोदशो मासः सम्पद्यते तेन पितरः प्रीणन्ति । तस्मात्त्रयोदशमासः संवत्सरः संवत्सरस्यास्यै त्रिषवनं नेत्रं भवति त्रय इमे लोका एष्वेव लोकेषु ऋध्नुवन्ति ॥ इति मलिम्लुचब्राह्मणम् ॥

अथ मार्तण्डब्राह्मणम् ॥

ध्यानं ॥ भास्वत्पुञ्जकरं प्रसन्नवदनं पीताम्बरालङ्कृतं पद्मं चाभयपुस्तकौ जपवटीं हस्तैर्दधानं विभुम् । संवर्ताग्निसमानकान्तिममलं नेत्रत्रयोद्भासितं देवीभिः परिवारितं च वरदं मार्तण्डनाथं स्तुमः ॥१॥ यावच्चाका वहति च नदी लोदरीतोयपूर्णा यावन्नागौ विमलकमलौ तिष्ठतो मत्स्ययुक्तौ यावद्भास्वांस्तपति गगने नित्यशः कालशक्त्या तावत्स्वर्गे वसति सततं श्राद्धकृत्सूर्यक्षेत्रे ॥ २ ॥ ॐब्रह्मणः प्रजापतिः मृतो वा सजीवो भव द्वादशादित्यास्त्रयोदश मासाः ॐ भूर्भुवःस्वः, तस्मात्कश्यपः संवत्सरः पितृयज्ञश्चेति, ऋग्यजुःसामाऽथर्वाणामार्षम् ॥ ॐतद्ब्रह्मणोऽयमृषिपुत्रः कश्यपस्येयं या भार्या सा दक्षकन्या अदितया तामुभयोर्याच्यन्ते । तर्त्कि ब्रह्मा किं विष्णुः किं रुद्रः किमेता दारेतानामावाह्यामीदं पृच्छामि साऽयं ब्रह्मा या मेतानां वाचः परमं वेद यं वेदि वदन्ति ॥ १ ॥ यां ब्रह्माण्डमाग्नेयां

परमां गायत्रीं सामवेदैश्चतुर्णामुत्तारयन्ति ॥ ॐभूर्भुवःस्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि, धियो यो नः प्रचोदयादों ३ तमुद्धरन्ति । तरणिर्विश्वे तन्दर्शन्यत्कश्यपस्य स जातम् । विश्वमाभासि रोचनम् । तस्मात्रयोदशो आण्डो वाऽण्डजैरदितया तद्द्वादशाण्डानामारात्रयः स आण्डो वा अण्डजः सः सतीनां सरेति प्रविश्यत । तथैतानां संवत्सरस्यैतद्द्वादशादित्यानां द्वादश राशिभिः षड्तवो षड्तवस्ततः सम्पद्यते ॥ २ ॥ सरार्णवो जलार्णवस्तत्कश्यपस्यार्थिनां धातुमेतं निवारयेत् एतानाऽऽवाहयामीति तत्सरार्णवो जलार्णवद्यन्मही तत्पृथिव्यामादिते तस्यार्थिनो ददाति तन्महीयं कश्यपोऽयं मृताण्डोऽयं दर्शयन् स सनिनिर्जीवस्य तस्यैतस्य तत्प्रसादये तस्य तज्जीवातवे जीवनस्य या असौ । देवा आयुष्मन्तस्तेऽमृतेनायुष्मन्तस्तेषामयमायुषाऽयुष्मानस्त्वसौ ॥ ॥ ब्रह्माऽयुष्मत्तद्ब्राह्मणैरायुष्मंस्तस्यायमायुषायुष्मानस्त्वसौ ॥ अग्निरायुष्मान्स वन-

स्पतिभिरायुष्मांस्तस्यायमायु० ॥ यज्ञ आयुष्मान्स दक्षिणाभिरायुष्मांस्तस्या० ॥ सोम आयुष्मान्स ओषधिभिरायुष्मांस्त० । ओषधय आयुष्मतीस्ता अद्भिरायुष्मतीस्तासामय० ॥ इममग्न आयुषे वर्चसे कृधि तिग्ममोजो वरुण संशिशाधि । मातेवाऽस्मा अदिते शर्म यच्छ विश्वेदेवा जरदष्टिर्यथा सत् ॥ अश्विनोः प्राणस्तौ ते प्राणन्दत्तां तेन जीव । मित्रावरुणयोः प्राणस्तौ ते प्राणन्दत्तां तेन जीव बृहस्पतेः प्राणः स ते प्राणन्दत्तात्तेन जीव ॥ ३ ॥ स मृताण्डोऽयं सजीवन्नेव संजीवयामीति, स त्रयोदशमासोयं रविः सन्नरकारिर्यन्नेतान्मार्तण्डः एतानामित्येतत्प्रसादयामीति तच्चाऽधिमासोयं वन्यश्चतुःपर्वण्यऽधीतान्स्वधार्हान्यथोपपत्तिः सुशाखायाः सुधर्मकर्मणोस्तत्क्षेत्रं मृजन्ते तस्मात्तत्क्षेत्रोयं यत्प्रतीच्यां दिशि मूलेयं चक्रे तच्चक्रकोटी च तीर्थान्पापीनां महान् प्रशाम्यते यत्तत्पापशमनोऽयं तत्र तम् ॥ ४ ॥ सप्तर्षीणां मही तन्मूलजा-

ह्व्यायां तज्जलं वहन्तीयं या सा चाकायामऽघोराणां निष्पीडिताम् । या सा चाकायां नित्ये तन्नित्यजा-ह्व्यां यामीत्येतत्सत्यं श्रोतृभ्यस्तच्छ्रुतं विमलकमलौ नागौ तन्मूलभौवने गरुडपङ्कजे जले जलान्तरेयम् । यायु-गीनां यायुगीश्वर्या सा सिद्धान्तदोपान्ति तद्रुद्रे रुद्रैरुद्रे-न्मेधाया शतरुद्रेयं देवानां कूष्माण्डं तद्धोतव्यं यजेत । "ये देवा दिव्येकादशस्थ पृथिव्यामध्येकादश स्थ । अप्सु-षदो महिनैकादश स्थ ते देवासो यज्ञमिमं जुषध्वम्" । ते भुवनीयानामधेयामही पृथिवी क्षेत्राणां तत्क्षेत्राधिक्षे-त्रोयं यत्कश्यपस्यार्थीनां दातुर्मेमाहोत्यार्थीनां कृतिते य-त्सृजन्ते ॥ ५ ॥ तस्मात्कश्यपनाम्नोऽयं यन्मण्डलोयं क्षे-त्राणां क्षेत्रादिदं रविक्षेत्रोयं तदादिमूलभवानी मही य-स्यार्थेनः ब्रह्मा राजन्देवोयं भारद्वाजो देवर्षेः पुत्रः तत्र त्रयोदशमासः सूर्येण दातुमेतद्ब्रह्मवर्चसकामोयं प्रतिगृह्णीयं प्रार्थनेयमभ्यार्चितम् ॥ "धाता दधातु नो रयिमीशानो

जगतस्पतिः । स नः पूर्णेन वावनत् ॥ प्रजापती रमयतु
प्रजा इह धाता दधातु सुमनस्यमानः । संवत्सर ऋतु-
भिश्चाक्लृपानो मयि पुष्टिं पुष्टिपतिर्बभूव ॥" धाता दधातु
तद्धाते प्रतिगृह्णीयं गृह्णाति, तद्वयो दातृ भूयान्मयो मह्यं
प्रतिगृहीता क इदं कस्मा अदः कामङ्कामायेति कामो हि
दाता कामः प्रतिगृहीता कामः समुद्रमाविशदिति कामै-
तत्ते स्वस्ति ॥ ६ ॥ नमो अस्तु सर्पेभ्यो ये के च पृथि-
व्यामधि । ये अन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः ॥
येषु वा यातुधाना ये वा वनस्पतीरनु । येऽवटेषु शेरते
तेभ्यः सर्पेभ्यो नमः ॥ ये वाऽदो रोचने दिवो ये वा सूर्यस्य
रश्मिषु । येप्सु सदांसि चक्रिरे तेभ्यः सर्पेभ्यो नमः ॥
धन्वना गा धन्वनाऽजिञ्जयेम धन्वना तीव्राः समदो
जयेम । धन्वना शत्रोरपकामङ्कृणोतु धन्वना सर्वाः प्रति-
दिशो जयेम ॥ नमो अस्तु० । तत्क्षेत्रेभ्यस्तद्वेदेभ्यस्तदा-
दिमूलमौवानी तद्भारद्वाजोयमृषिपुत्रस्योपपत्तेस्तद्वेदान्वद-

न्तीति तद्ब्रह्मणेभ्यस्ते भुवनाधिपतिना । "देवं मातृ-
श्रीन्पितृन्बिभ्रदेकमूर्धस्तस्थानिमवग्लापयन्ति । मन्त्रयन्ते
दिवो अमुष्य पृष्ठेदं परमं वेदेयं विश्वमिदं वाचमविश्वमि-
न्वाम्" ॥ वेदान्वेदन्तीति तद्भरद्वाजोयमृषिपुत्रस्योपपत्तिः,
तद्वेदान्धार्यमाणं यामीति तथोपपन्नाश्चातुर्होतृकास्त्रैता-
ग्निकानां होत्राग्नियानाम् । सितासिताभ्यां पक्षाभ्यामु-
भयोः प्रत्यहं धारयन्धारणाद्धते ॥ ७ ॥ तच्चतुर्वेदोच्चारयं
तद्ब्रह्मपुत्रं तद्ब्रह्मणो यो वेदानुच्चारयन्तं श्रुतीः श्रोतव्याः
पठ्यं पठतां यः स श्रोत्रियो यं मह्यधिपाः परिपालयन्ते
तमायुरारोग्यमैश्वर्यं भुक्तिं मुक्तिं नः संवर्धयन्ति । तथै-
तानां पार्थिवीयानां तथेन्द्राणामघोराणामाघोराणात्प्रजा-
यन्ते । "धाता दधातु नो रयिमीशानो जगतस्पतिः ।
स नः पूर्णेन वावनत् ॥ प्रजापती रमयतु प्रजा इह दाता
दधातु सुमनस्यमानः । संवत्सर ऋतुभिश्चाक्लृपानो मयि
पुष्टिं पुष्टिपतिर्दधातु" ॥ संवत्सरः संवत्सरो विराड्विराज-

मेवाप्नोति अत्राधिकवसुभ्यो मासानहः षडिन्धवो नालिकाश्चतुर्णाम्। तदिन्धवो तादिन्धवः पूर्णे पौर्णमास्यां द्वात्रिंशद्भिः दर्शः देशे षोडश ऋतून्तद्धोमान्होतव्यं यजेत। ततस्तन्मलिम्लुचान्तं "मलिम्लुचो नामासीत्त्रयोदशमासान्। सहस्रधा रेवती समस्वरन्दिवो नाके मध्वजिह्वा असश्चतः। तस्य स्पृशो न निमिषन्ति तूर्णयः पदे पदे पाशिनः सन्ति सेतवः। मलिम्लुचो नामासि त्रयोदशमासः। इन्द्रस्य शर्मास्येन्द्रस्य वर्मासीन्द्रस्य वरूथमसि। तन्त्वा प्रपद्ये सगुः साश्वः सपुरुषः सह यन्मे स्थितेन स मे शर्म च वर्म च। भवा गायत्रीं लोमभिः प्रविशामि त्रिष्टुभं त्वचा प्रविशामि जगतीं मांसेन प्रविशामि आनुष्टुभमस्थ्ना प्रविशामि पांक्तिं मज्ज्ञा प्रविशामि॥ ऐन्द्राग्नं वर्म बहुलं यदुग्रं विश्वेदेवा नातिविदन्ति शूराः। तन्नस्त्रायतां तन्वः सर्वतो महदायुष्मन्तो जरामुपगच्छेम जीवाः"॥ सहस्रधा रेवती सरस्वती दिवो ना प्रविशा-

मीत्यन्तैर्वेदन्ते ॥ ८ ॥ यद्वेदि यद्वेदमधीते तद्ब्रह्मयज्ञैर्देवाग्निः पितृकर्मणोऽकुर्वन् । अच्छिन्नं पुत्राग्नेस्त्वाता यद्भूर्भुवःस्वरथैतानां सर्वानां प्रयच्छताम् । ततः श्रद्धेति श्रद्धया पितृयज्ञ एषां तिष्ठते तस्मात्त्रयोदशमं भानुक्षेत्रमिदम् । अघोराणाम सरित् सा सत्यभामासहितो रविः तदेतद्दक्षिणं पादपङ्कजि सत्यश्रोतिस्तन्मूले निजले–श्रद्धेतां श्रद्धां हत्वाऽन्यत्सुधर्मकर्मणे । तद्देवयज्ञः पितृयज्ञो भूतयज्ञो मनुष्ययज्ञो ब्रह्मयज्ञः स ब्रह्मवर्चसकामान्वा अन्यपातकान्वा महापातकिनां सहस्रपातकानां तामुत्तार्यातामग्नुं स्वर्गं लोकं प्रविश्यताम् ॥ ९ ॥ यद्वेद वेदान्दर्शतां तद्विष्णोः परमं पदम्, इदमावाहयामीदमर्चयित्वा प्रपूजितम् । तद्धोमा होतव्यं यजेत । "अग्निर्होता नो अध्वरे-वाजी सत्परिणीयते । देवो देवेषु यज्ञियः ॥ अग्निर्होता कविक्रतुः सत्यश्चित्रश्रवस्तमः । देवो देवेभिरागमत् ॥ कविमिच्छा विश्ययनेन विद्वान् । वियस्तस्तम्भ षडिमा

रजांस्यऽज्ञस्य रूपे किमपि स्विदेकम् ।। अङ्गिरसो नः पितरो नवग्वा अथर्वाणो भृगवः सोम्यासः । तेषां वयं सुमतौ यज्ञियानामपि भद्रे सौसुमनसे स्याम ।। तन्मलिम्लुचान्तं मलिम्लुचयामीति त्रयोदश एतन्नरकारि यत्स त्रयोदशमासीति हरयः सुपर्णाः । यद्गायत्री अधिगायत्री सामवेदैश्चतुर्णामुदारयन्ति ऋग्यजुःसामाथर्वाणो होतव्यमेतद्धोतव्यः । अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम् । होतारं रत्नधातमम् ।। इषे त्वोर्जे त्वा वायवःस्थोपायवःस्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे ।। अग्न आयाहि वीतये गृणातो हव्य दातये । निहोता सत्सि बर्हिषि ।। शन्नो देवीरभीष्टय आपो भवन्तु पीतये । शंय्योरभिस्रवन्तु नः ।। ऊर्जो विभ्रद्वसो वनेस्सुमेधा गृहानां गा मोदमानः सुवर्चः । अघोरेण चक्षुषाऽहं शिवेन गृहाणां पश्यन्वाय उत्तरामि । गृहाणामायुः प्रवयन्ति रामाः । गृहा अस्माकं प्रतेरन्वायुः । "येन देवा

ज्योतिषोर्ध्वा उदारयन्येनादित्या वसवो येन रुद्राः। येनाङ्गिरसो महिमानमानशुस्तेनैतु यजमानाय स्वस्ति ॥ तरणिः विश्वदर्शितो ज्योतिष्कृदस्य सूर्य। विश्वमाभासि रोचनम् ॥ दिवो रुक्मा उरुचक्षा उदेति दूरे अर्थस्तरणिर्भ्राजमानः । नूनञ्जनः सूर्येण प्रसूता अयन्नर्थानि कृणवन्नपांसि॥ शुकेषु मे हरिमाणं रोपणाकासु दध्मसि। अथो हरिद्रवेषु मे हरिमाणं निदध्मसि ॥ उदगादयमादित्यो विश्वेन सहसा सह। द्विषन्तं मह्यं रन्धयन्मो अहं द्विषते रधम् ॥ समैक्षिषोर्ध्वमहसा आदित्येन महीयसा। अहं यशस्विनां यशो विश्वा रूपाण्यादधे ॥ उद्यन्नद्य विनो भज पिता पुत्रेभ्यो यथा। दीर्घायुत्वस्य हेषिषे तस्य नो धेहि सूर्य ॥ उद्यन्तन्त्वा मित्रमह आरोहन्तं विचक्षणः। पश्येम शरदः शतं जीवेम शरदः शतम् ॥ अनेन० ह्रां ह्रांसः सूर्यः० प्रीतोस्तु ॥ इति मत्स्यभवने मार्तण्डब्राह्मणं यजेत् ॥ समाप्तम् ॥

अथ ऋग्वेदे विष्णुवृषसूक्तानि ॥ ध्यानं विष्णोः ॥ परो वैष्णव ऊरुमिन्द्रश्च तिस्रोऽनूमर्त्तः ॥ परो मात्रया तन्वा वृधान, न ते महित्वमन्वश्नुवन्ति । उभे ते विद्म रजसे पृथिव्या, विष्णो देव त्वम्परमस्य वित्से ॥ न ते विष्णो जायमानो न जातो, देवं महिम्नः परमन्तमाप । उदस्तभ्ना नाकमृष्वं बृहन्तं, दाधर्थ प्राचीङ्ककुभं पृथिव्याः ॥ हिळावती धेनुमती हि भूतं, सूयवसिनी मनुष्ये सदस्या । व्यस्तभ्ना रोदसी विष्णवेते, दधातु पृथिवीमभितो मयूखैः ॥ उरुं यज्ञाय चक्रथूरुलोक, ञ्जनयन्ता सूर्यमुषासमग्निम् । दासस्य चिद्वृषशिप्रस्य माया, जघ्नथुर्नरा पृतनाज्येषु ॥ इन्द्राविष्णू दंहितः शम्बरस्य, नवपुरो नवतिश्च श्नथिष्टम् । शतं वर्चस्विनः सहस्रं च साकं, हथो अप्रत्यसुरस्य वीरान् ॥ इयं मनीषा बृहती बृहन्तो रुक्रमा तवसा वर्धयन्ती । रेरेवांस्तोमं विदथेषु विष्णो, पिन्वन्तो मिषो वृजिनेष्विन्द्र ॥ वषट्ते विष्ण आस

आकृणोमि, तन्मे जुषस्व शिपिविष्ट हव्यम् । वर्धन्तु त्वा सुष्टुतयो गिरो मे, यूयं पात स्वस्तिभिः सदा नः ॥ नमन्तो दयते सविष्यन्यो विष्णव उरुगायाय दाशत् । प्रायः सत्राचा मनसा यजेत, एतावन्तमर्यमा विवासत् ॥ त्वं विष्णो सुमतिं विश्वजन्या, मप्रयतामेव यावोमतिन्द्राः । पर्चो यथानः सविततस्य भूरी, रश्वावतः पुरुश्चन्द्रस्य रायः ॥ त्रिन्दिवः पृथिवीमेष एतां विचक्रमे शतर्चसं महित्वा । प्रविष्णुरस्तु तवसस्तुवीया, न्त्वेषं ह्यस्य स्थविरस्य नाम ॥ विचक्रमे पृथिवीमेष एतां, क्षत्राय विष्णुर्मनुष्ये दश स्यात् । ध्रुवासो अस्य कीरयो जनास उरु क्षितिं सुजनिमाचकार ॥ प्रतत्ते अद्य शिपिविष्टनामा, यः शंसामि वयुनानि विद्वान् । तन्त्वा गृह्णामि नवसामतव्या, क्षयन्तमस्य रजसः पराके ॥ किमत्ते विष्णो परिचक्षमऽभूत्प्रयद्विवक्ष्ये शिपिविष्टो अस्मिन् । मा वर्पो अस्मदपगूह एतत्, यदन्यरूपः समिथे बभूव ॥ वषट्

ते विष्ण० ॥ ॥ उद्बुध्यध्वं बुधाः सौम्यं नवम्यन्ते जगत्यौ पञ्चमी बृहतीगायत्र्योर्मध्ये ॥ ॥ उद्बुध्यध्वं सुमनसः सखायः, समग्निमिन्ध्वं बहवः सनीळाः । दधिक्रामग्निमुषसञ्च देवीमिन्द्रावतो वसूनि ह्वयेवः ॥ मन्द्रा कृणुध्वं धिय आतन्वध्वं, नावमरित्रमरणीं कृणध्वम् । इष्कृणुध्वमायुधारं कृणुध्वं, प्राञ्चयज्ञं प्रणयता सखायः ॥ युनक्त सीरा वियुगा तन्वध्वङ्कृते योनौ वपतीह बीजम् । गिरा च श्रुष्टिः सभरा असन्नो, नोदीय इच्छृण्यपक्कमेयात् ॥ सीरा युञ्जन्ति कवयो, युगा वितन्वते पृथक् । धीरा देवेषु सुम्नया, निराहावाङ्कृणोतु न ॥ संवरत्रा दधातन, सिञ्चामह अवततम् । सुद्रिणं च वयं क्रतौ, सुषेकमनुपक्षितम् ॥ इष्कृता हावमवतं, सुवरत्रं सुषेचनम् । उच्छ्रिणं सिञ्चे अक्षितम् ॥ प्रणीताध्वान्हिताञ्जयाय, स्वस्तिवाहं रथमित्कृणुध्वम् ॥ द्रोणहावमवतमश्मचक्रः, संसत्रकोशं सिञ्चता नृपानाम् ॥ व्रजङ्कृणुध्वं सहिवो नृ-

पाणो, वर्मसे व्यध्वं बहुला पृथूनि । पुनः कृणुध्वं माय-
सीरदृष्टः, सावस्तिस्रोचे हसो हहतातम् ॥ आबोधियं य-
ज्ञियां वर्त ऊतये, देवो देवीं यजतां यज्ञियामहे । सानो
दुहीयद्यवसेव गत्वी, सहस्रधारा पयसा महीज्ञोः ॥ आ-
तृषिश्च हरिमिन्द्रोरुपस्थे, वाशीभिस्तक्षताश्म धमयीभिः ।
परिषजष्वन्दशकक्ष्याभि, रुभेध्वरौ प्रतिवार्हि शुक्रु ॥ उभौ
ध्वरौ बहिरप्यन्दमानोऽन्तर्येनेव चरति द्विजानि । वन-
स्पतिं वन आस्थापयिध्वं, निषूदधिष्वमखनन्त उत्सम् ॥
कपृन्नरः कपृथमुद्दधात, नचोदयत खुदतवाजसातये ।
निष्टग्र्यः पुत्रमाप्यावथोतय, इन्द्रं सबाध इह सोम
पीतये ॥ अनेन मन्त्रहोमेन आत्मनो० पितुर्विष्णोः समस्त-
प्रेतविष्णूनां अतीत० प्रथमे विष्णुश्राद्धे वा त्रयोदशे पृथ्वीरूपो
विष्णुः प्रीयंतां प्रीतोऽस्तु ॥ इति ऋग्वेदे विष्णुबुधसूक्तम् ॥

अथ ऋग्वेदे ब्रह्मध्रुवसूक्तम् ॥ ध्यानम् ब्रह्मणः। सोमानमिति
पञ्च ब्रह्मणस्पत्या चतुर्थ्यामिन्द्रः सोमश्च पञ्चम्यां दक्षिणा चान्याः

सदस्पत्या नांराशंसीं वात्या प्रत्यन्तमग्निमारुतम् ॥ ॥ सोमानं स्वरणङ्कृणुहि ब्रह्मणस्पते । कक्षीवन्तं य्य औषजः ॥ यो रैवाण्यो अमीवहा वसुवित्पुष्टिवर्धनः । स नः सिषक्तु यस्तुरः ॥मा नः शंसो अररुषो धूर्ति प्राणङ्मर्त्यस्य । रक्षाऽणो ब्रह्मणस्पते ॥ मघा वीरो न रिष्यति यमिन्द्रो ब्रह्मणस्पतिः । सोमो हिनोति मर्त्यम् ॥ त्वन्तं ब्रह्मणस्पतिः सोम इन्द्रश्च मर्त्यम् । दक्षिणा पात्वंहसः ॥ सदसत्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम् । सनिं मेधामयासिषम् ॥ यस्मादृते न सिद्ध्यति यज्ञो विपश्चितश्च न । सधीनां योगमिन्वति ॥ आ वृध्नोति हविष्कृतिं प्राञ्चं कृणोत्यध्वरम् । होता देवेषु गच्छति ॥ नराशंसं सुधृष्टं मम पश्यसप्रथस्तमम् । दिवो न सद्म मखसम् ॥ प्रति त्यञ्चारुमध्वरं गोपीथाय प्रहूयसे । मरुद्भिरग्न आगहि ॥ नहि देवो न मर्त्यो महस्तव क्रतुं परः । मरुद्भिरग्न आगहि ॥ यो महो रजसो विदुर्विश्वेदेवासो अद्रुहः । मरुद्भिरग्न० ॥

य उग्रा अर्कमानृचुरनाधृष्टास ओजसा । मरुद्भिरग्न० ॥
ये शुभ्रा घोरवर्पसः सुक्षत्रासो रिशादसः । मरुद्भिरग्न० ॥
ये नाकस्याधि रोचने दिवि देवास आसते । मरुद्भिरग्न० ॥
ये ईङ्खयन्ति पर्वतान्तिरः समुद्रमर्णवम् । मरुद्भिरग्न० ॥
आ ये तन्वन्ति रश्मिभिस्तिरः समुद्रमोजसा । मरुद्भि-
रग्न० ॥ अभि त्वा पूर्वपीतये सृजामि सोम्यं मधु । मरु-
द्भिरग्न० ॥ इति ऋग्वेदे ॥ अथ यजुर्वेदे ॥ वसवस्त्वोदी-
रयन्तु रुद्रास्त्वोदीरयन्तु आदित्यास्त्वोच्छ्रयन्तु विश्वे
त्वा देवा दृंहन्तु ॥ ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवं विश्वमिदं
जगत् । देवा ह धर्मणा ध्रुवा यजमानः पशुर्ध्रुवः ॥ दिवि
दिव्यान्दृंह, अन्तरिक्षेऽन्तरिक्षान्दृंह, पृथिव्यां पार्थिवान्
दृंह ॥ आ त्वा हार्षमन्तरभूर्ध्रुवस्तिष्ठाविचाचलत् । विश-
स्त्वा सर्वा वाञ्छन्तु मा त्वद्यज्ञो अधिभ्रशत् ॥ ध्रुवन्ध्रुवेन
हविषा हविरव सोममयामसि । यथा न इन्द्र केवली
विशो बलिहृतस्करत् ॥ स्वाहा दिवमाप्यायस्व, स्वाहा-

ऽन्तरिक्षदाऽप्यायस्व स्वाहा पृथिव्या आप्यायस्व स्वाहा ॥ आयुर्धा असि ध्रुवायुर्मे धेहि, वयोदा असि ध्रुववयो मे देहि, तनूपा असि ध्रुवतनूं मे पाहि, चक्षुष्पा असि ध्रुवचक्षुर्मे पाहि, वर्चोधा असि ध्रुवंवर्चो मे धेहि ॥ अध्वर्योयं यज्ञो अस्तु देवा ओषधीभ्यः पशुभ्यो मे धनाय । विश्वस्मै भूताय ध्रुवो अस्तु देवाः स पिन्वस्व घृतवद्देवयज्ञः ॥ इहैवैधि मापच्योष्ठाः पर्वता इवाविचाचलत् । इन्द्र इवेह ध्रुवस्तिष्ठेह यज्ञमुदारय ॥ इममिन्द्रो अदीधरद्ध्रुवन्ध्रुवेण हविषा हविः । तस्मै सोमो अधिध्रुवस्तस्मा उ ब्रह्मणस्पतिः ॥ ध्रुवाद्यौर्ध्रुवा पृथिवी ध्रुवासः पर्वता इमे । ध्रुवं विश्वमिदं जगद्ध्रुवो राजा विशामसि ॥ अनेन मन्त्रहोमेनात्मनो० पितुर्विष्णोः प्रथमे वा त्रयोदशे विष्णुश्राद्धे अप्रूपः ब्रह्मा प्रीयतां प्रीतोस्तु ॥ इति यजुर्वेदे ध्रुवसूक्तम् ॥ २ ॥

अथ ऋग्वेदे रुद्रकेतुसूक्तम् ॥ रुद्रस्य ध्यानम् ॥ केशी मुनयो

वातरशना एकर्चाः केशिनं जूतिर्वातजूतिर्विप्रजूतिर्वृषाणकः कनि-
क्रतुः एतश्च ऋष्यश्रृङ्गश्चेत देवाः सप्त ऋषयः एकर्चा वैश्वदेवम् ॥ ॥
ॐ केश्यग्निं केशी विषं केशी बिभर्ति रोदसी। केशी विश्वं
स्वर्दृशे, केशीदं ज्योतिरुच्यते ॥ मुनयो वातरशनाः पि-
शङ्गा वसते मला। वातस्यानु ध्राजिं यन्ति, यद्देवासो
अविक्षत ॥ उन्मदिता मौनेयेन, वाताँ आतस्थिमा वय-
म्। शरीरेदस्माकं यूयं मर्तासो अभि पश्यथ ॥ अन्त-
रिक्षेण पतति विश्वा रूपावचाकशत्। मुनिर्देवस्य देवस्य
सौकृत्याय सखा हितः ॥ वातस्याश्वो वायोः सखाऽथो
देवेषितो मुनिः। उभौ समुद्रावाक्षेति यश्च पूर्व उता-
परः ॥ अप्सरसां गन्धर्वाणां मृगाणां चरणे चरन्।
केशी केतस्य विद्वान्सखा स्वादुर्मदिन्तमः ॥ वायुरस्मा
उपामन्थत् पिनष्टि स्मा कुनन्नमा। केशी विषस्य पात्रेण
यद्रुद्रेणापिबत्सह ॥ उत देवा अवहितं देवा उन्नयथा
पुनः। उतागश्चक्रुषं देवा, देवा जीवयथा पुनः ॥ द्वाविमौ

वातो वात आसिन्धोरपरावतः। दक्षन्ते अन्य आवातु परान्यो वातयद्रपः॥ आवात वाहि भेषजं विवात वाहि यद्रपः। त्वं हि विश्वभेषजो देवानां दूत ईयसे॥ आत्वागमंशन्तातेभिरथो अरिष्टतातेभिः। दक्षन्ते भद्रमाभार्षं परायक्ष्मं सुवामि ते॥ त्रायन्तामिह देवास्त्रायतां मरुतां गणः। त्रायन्तां विश्वा भूतानि यथायमरपा असत्॥ आपो यद्वातभेषजीरापो अमीव चातनीः। आपः सर्वस्य भेषज्यस्तास्ते कृण्वन्तु भेषजम्॥ हस्ताभ्यां दशशाखाभ्यां जिह्वा वाचा पुरोगवीः। अनामयं यत्नुभ्यां त्वा ताभ्यान्त्वोपस्पृशामसि॥ इति ऋग्वेदे॥ अथ यजुर्वेदे॥ ॥ आवो राजानमध्वरस्य रुद्रं होतारं सत्ययजं रोदस्योः। अग्निं पुरा तमुयित्नुरचित्ताद्धिरण्यरूपमवसे कृण्वध्वम्। कर्द्धिष्ण्या सद्वृधा सानो अग्ने, कद्वाताय प्रवतसे शुभं ये। परिज्मानो नासत्याय क्षत्र ब्रुवत्कदग्नेरुद्रायदग्ने॥ अग्निर्होता साध्वीं मक्र अग्र आयूंषि पवसे। अग्ने पवस्व स्वपा

अस्मे वर्चस्व वीर्यं दधद्रयिं मयिपोषम् ॥ यो अश्वस्य दधिक्राव्णो अकारीत्समिद्धे अग्ना उषसो व्युष्टौ । अनाशसन्तमदितिः कृणोतु समित्रेण वरुणो नसजोषाः ॥ महश्चार्कन्सर्वतः ऋतुप्रा दधिक्राव्णः पुरुवानस्य वृष्णः । यं पुरुभ्यो दीदिवांसन्नाग्निर्मधुधुर्मित्रावरुणा उत्तरिम् ॥ ऋतावानं वैश्वानरं वैश्वानरस्य सुमतौ स्याम उक्षान् । नाव उशाभायसोमपृष्ठा यवेधसेस्तोमैर्विधेमाग्नये ॥ तृषु यत्ना तृषुणावनक्ष तृषुं दूतं कृणुते यव्हो अग्निः । वातस्य मेळि सचते निजूर्वन्नाशुन्न जयते हिते अर्वा ॥ अग्निरेशेषस्य(?) स्याग्निर्महः सौभगस्या तान्यस्मभ्यं रासति ॥ त्वमग्ने वसुपतिं वसूनां मभिप्रमन्दे मधुरेषु राजन् । त्वया वाजं वाजयन्तो जयेमा भिष्यामपृत्सुती मर्त्यानाम् ॥ त्वेय-विष्ट दाशुषे नॄं पाहि शृणु धीगिरः रक्षतोकमुततमना । तुभ्यम्भरन्ति क्षितयो यविष्ट, बलिमग्ने अन्तित उत दूरात् ॥ अभि दिष्टस्य सुमतिं चिकिद्धि बृहते अग्ने महि

शर्म भद्रम् । कृष्णा रजांसि पत्सतः प्रयाणे जातवेदसः अग्निर्यद्रोधतिक्षसि ॥ त्वे वसूनि पूर्वणीक होत दोषवस्तोरेरिरे यज्ञियासः । क्षामेव विश्वा भुवनानि यस्मिन्सं-सौभगानि दधिरे पावके । प्रवः सखायो अग्नये स्तोमं यज्ञञ्च धृष्णया । अर्चगाय च वेदसे ॥ प्रवः शुक्राय भानवे भरध्वं हव्यमतिं चाग्नये सुपूतम् । यो दैव्यानि मनुषा जनूंष्यतुर्विश्वानि विद्मना निजगाति ॥ विज्योतिषा विपाजसा सत्वमग्ने प्रतीकेव । प्रत्यूषे यातुधान्या उरुक्षयेषु दीध्यात् ॥ तं सुप्रतीकं सदृशं स्वञ्चम विद्वांसो विदुष्टरं सपेम । स भक्षद्विश्वा वयुना विविद्वान्प्रहव्यमग्निरमृतेष्ववोचः ॥ युक्ष्वा हि देवहूतमां अश्वामग्ने रथीरिव । निहोता पूर्व्यासदः ॥ उत नो देवदेव्यां, अच्छावचो विदुष्टरः । श्रद्विश्वा वार्या कृधि ॥ त्वं हि यत्यविष्ठ्य सहसंसून आहुत । ऋतावा यज्ञियो भुवः ॥ अयमग्निः सहस्त्रिणः तन्नोमि ऋभवो यथा । नमस्व सुहू-

तिभिः ॥ नेदीयो यज्ञमङ्गिरः कस्मै नूनमभिद्यवे । वाचा विरूपनित्यया वृष्णे चोदस्व सुष्टुतिम् ॥ कमुष्विदस्युसे-नयाऽग्नेरपाकचक्षसः । पाणि गोषुस्तरामहे ॥ मा नो देवानां विशः प्रस्नातीरिवोस्राः । कृशन्नहासुरघ्न्याः ॥ मानः सप्तस्याढ्यः परिद्वेषसो अंहतिः । ऊर्मिन्ननायमावधीत् ॥ नमस्ते अग्न ओजसे गृणन्ति देवकृष्टयः । अमैरमित्रमर्दय ॥ कुवित्सरोग इष्टयेऽग्नेः संवेषियो रयिम् । उरु कृदुरुण-स्कृधि ॥ मानो अस्मिन्महाधने परा वग्भारभृद्यथा । संवर्गं संरयिञ्जय ॥ परस्या अधिसंवत, एहूषु ब्रुवाणि ते ॥ अ-नेन मन्त्रहोमेनात्मनो पितुर्विष्णोः प्रथमे वा त्रयोदशे विष्णुश्राद्धे तेजोरूपः शिवः प्रीयतां प्रीतोस्तु ॥ ॥ इति रुद्रकेतुसूक्तम् ॥

अथ ऋग्वेदे प्रजापतिशनैश्चरसूक्तम् ॥ नासत्सप्तमः प्रजापतिः परमेष्ठी भाववृत्तं तु यो यज्ञः प्राजापत्योजगत्याद्या ॥ प्रजापतेर्ध्यानम् ॥ ॥ नासदासीन्नोसदासीत्तदासीन्नासी-द्रजो नो व्यमापरायत् । किमावरीवः कुहकस्य शर्मन्नम्भः

किमासीद्गहनं गभीरम् ॥ न मृत्युरासीदमृतन्न तर्हि न रात्र्या अह्न आसीत्प्रकेतः । आनीदवातं स्वधया तदेकन्तस्माद्धान्यन्नपरः किञ्च नास ॥ तम आसीत्तमसा गूढमग्रे प्रकेतं सलिलं सर्वमा इदम् । तुच्छेना भ्वपिहितं यदासीत्तपसस्तन्महिनाजायतैकम् ॥ कामस्तदग्रे समवर्त्तताधि मनसो रेतः प्रथमं यदासीत् । सतो बन्धुमसति निरविन्दन् हृदि प्रतीष्या कवयो मनीषा ॥ तिरश्चीनो विततो रश्मिरेषा मधः स्विदासीदुपरि स्विदासीत् । रेतोधा आसन्महिमान आसन् स्वधा अवस्तात्प्रयतिः परस्तात् ॥ को अद्धा वेद क इह प्रवोचत् कुत आजाता कुत इयं विसृष्टिः । अर्वाग्देवा अस्य विसर्जनेनाऽथा को वेद यत आबभूव ॥ इयं विसृष्टिर्यत आबभूव यदि वा दधे यदि वा न । यो अस्याध्यक्षः परमे व्योमन् सो अङ्ग वेद यदि वा न वेद ॥ यो यज्ञो विश्वतस्तन्तुभिस्तत, एक शतन्देवकर्मभिरायतः । इमे वयन्ति पितरो य आययुः प्रवयापवयेत्यासते तत ॥

पुसामेनन्तनुत तत्कृण्वन्ति पुंसां वितते अधिनाके अ-
स्मिन् । इमे मयूखा उपसेदुरसदस्सामानि चक्रुस्तसुराण्युत
वै ॥ कासीत्प्रमा प्रतिमा किं निदानमाज्यङ्किमासीत्प-
रिधिः क आसीत् । च्छंदः किमासीत्प्रतगेङ्किमुक्तं यद्देवा
देवमयजन्त विश्वे ॥ अग्नेर्गायत्र्युभवन्सयुग्वोष्णिहया स-
विता सम्बभूव । अनुष्टुभा सोम उक्थैर्महस्वां बृहस्पते बृहते
मांचवत् ॥ विराण्मित्रावरुणयोरभिश्रीरिन्द्रस्य त्रिष्टुबिहा
भगो अह्नः । विश्वान्देवाजगत्याविवेश तेन चाक्लृप्य
ऋषयो मनुष्याः ॥ चाक्लृप्य तेन ऋषयो मनुष्या यज्ञजाते
पितरो नः पुराणाः । पश्यन्मन्ये मनसा चक्षासामा तान्य
इमं यज्ञमयजन्त पूर्वे ॥ सहस्तोमः सहच्छन्दस्व आवृतः
सह प्रमा ऋषयः सप्तदैव्यः । पूर्वेषां पन्थामनुदृश्य धीरा
अन्वलोभिरे रथ्योन रश्मीन् ॥ इति ऋग्वेदे ॥ अथ यजुर्वेदे
॥ प्रजापतिर्वा इदमिति अग्निहोत्रमन्त्रः प्रियमेधसः प्रजापतेः ॥
प्रजापतिर्वा इदमासीत्तस्मादग्निरध्यसृत सौम्यमूर्धा । ऊर्ध्वं

उदद्रवत्तस्य यल्लोहितमासीत्तदपामृष्ट तद्भूम्यान्यमान्युत।
उदम्बरोऽजायत तस्मात्स लोहितं पश्यत। स मां प्रद्रवत्तं
स्वा वागैद्व जुहुधीति। स इतः पर्यमृष्ट तत्स्वाहेत्यजुहोत्त-
स्मादेषैवमाहुति स्वाहैनं वागैद्व तस्मान्न ललाटे लो-
मास्ति न पाण्योः। तस्मादरित्रमात्री सुग्भवति चक्षुर्वास
तत्स्वमजुहोदऽमुमेवादित्यमग्नौ ज्योतिर्ज्योतिरग्नौ इति
ज्योतिरिव ज्योतिष्यऽजुहोद्ब्रह्माऽजुहोत्सत्यजुहोदमुमेव
तदादित्यमजुहोदेष ह्येवाग्निहोत्रं श्वः श्वो वसीयान्भवति
यस्यैवमग्निहोत्रं हूयते॥ न वै पुराहोत्रात्रे आस्तां त एत-
याहुतिभ्यो सहासृजेतां यत्सायं जुहोति। तेन भ्रातृव्याय
पराचीं विवासयति यत्प्रातस्तेनात्मना प्रतीचीमग्नेर्वै गुप्त्या
अग्निहोत्रं हूयते यत्सायं जुहोति तेनैनं रात्र्यै रमयति
यत्प्रातस्तेनाह्ना एषा वा अग्ना आहुतिः प्रथमाहुता यद-
ग्निहोत्रं तस्मादग्नौ सर्वा आहुतयो हूयन्ते अथैषैवाग्निहो-
त्रमुच्यते अग्निहोत्रं हवै नाम नास्मादन्यः समानेषु वसी-

थान्भवति यस्यैनमग्निहोत्रं हूयते ॥ ॥ अनेन मन्त्रहोमेनात्मनो-पितुर्विष्णोः प्रथमे वा द्वितीये ३।४।५।६।७।८।९।१०।११।१२।१३ वा त्रयोदशे विष्णुश्राद्धे वायुरूपो यमः प्रीयतां प्रीतोस्तु ॥ ॥ इति प्रजापतिशनिसूक्तम् ॥ ४ ॥

अथ ऋतुनारायणसूक्तम् ॥ वषट् ते विष्ण आस आकृणोमि तन्मे जुषस्व शिपिविष्ट हव्यम्। वर्धन्तु त्वा सुष्टुतयो गिरो मे यूयं पात स्वस्तिभिः सदा नः ॥ ध्यानम् ॥ देवानामेकेन्द्राणीवरुणान्यग्नायीनां द्यावापृथिव्यौ पार्थिवी षड्वृष्णव्योऽतो देवा दैवी वा ॥ ॥ अभि नो देवीरवसा महः शर्मणा नृपत्नी। अच्छिन्नपत्राः सचन्ताम् ॥ इहेन्द्राणीमुपह्वये वरुणानीं स्वस्तये। अग्नायीं सोमपीतये ॥ मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम्। पिपृतां नो भरीमभिः ॥ तयोरिद्घृतवत्पयो विप्रा रिहन्ति धीतिभिः। गन्धर्वस्य ध्रुवे पदे॥ स्योना पृथिवि भवानृक्षरा निवेशिनी। यच्छाऽऽनः शर्म सप्रथाः ॥ अतो देवा अवन्तु नो यतो विष्णुर्वि-

चक्रमे । पृथिव्याः सप्त धामभिः ॥ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पाँसुरे ॥ त्रीणि पदा विचक्रमे विष्णुर्गोपा अदाभ्यः । अतो धर्माणि धारयन् ॥ विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे । इन्द्रस्य युज्यः सखा ॥ तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् ॥ तद्विप्रासो विपण्यवो जागृवांसः समिन्धते । विष्णोर्यत्परमं पदम् ॥ ॥ अथ यजुर्वेदे विष्णुबुधसूक्तम् ॥ अग्नेस्तनूरसीत्यग्न्यादीनां देवानां पतिरग्निस्तनूपा वायुः शवसा शक्करी वरुणः शग्मनोजिष्ट इन्द्रो देवस्य उभया मैत्रावरुण्याः नार्यसीत्यनुवाकः सिंह्याः संवत्सरीयाः अग्ने अग्निरिति गर्भस्य प्राजापत्यस्येन्द्रघोषस्त्वा इत्यरुणानां केतूनाम् ॥ अग्नेस्तनूरसि विष्णवे त्वा सोमस्य तनूरसि विष्णवे त्वाऽतिथेरातिथ्यमसि विष्णवे त्वा अग्नये त्वा रायस्पोषदे विष्णवे त्वा श्येनाय त्वा सोमभृते विष्णवे त्वा पतये त्वा परिपतये गृह्णामि तनूनप्त्रे शग्मने शक्कराय शग्मनो

जिष्टायानाधृष्टमस्यऽनाधृष्टं देवानामोजोऽभिशस्तिपा अ-
नभिशस्ते न्यमञ्जसासत्यमुपगां सवितेमा धा अग्ने व्रतपा
असे व्रतपास्त्वे व्रतपा व्रतिनां व्रतानि याग्ने मम तनूरेषा
सा त्वयि या तव तनूरियं सा । मयि सहनाव्रतपा व्रतिनां
व्रतानि । या ते अग्ने रुद्रिया तनूस्तया नपाहि तस्यैते
स्वाहांशुरंशुस्ते देव सोमाप्यायतामिन्द्रायैकधन आ तुभ्य-
मिन्द्रः प्यायतामा त्वमिन्द्राय प्यायस्वाप्यायाय सखी-
न्सन्या मेधया स्वस्ति ते, देव सोम स्वत्यामशीय स्वस्त्यो-
म्पचोमैष्टाराय, एष्टवामानि प्रेष्ठे भगायन्त मृतवादिभ्यो
नमोदिवे नमः पृथिव्यै, या ते अग्नेयाशया तनूर्वर्षिष्टा गह्-
नेष्टा वर्षिष्टा गह्वरेष्टा, उग्रं वचोपावधीत्त्वेषां वचोपावधी-
त्स्वाहा, या तेऽग्नेरजाशया हराशया तनूर्वर्षिष्टा गह्नेष्टा
वर्षिष्टा गुह्वरेष्टा, उग्रं वचोऽपावधीत्त्वेषां वचोऽपावधी-
त्स्वाहा । देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो
हस्ताभ्यामाददे नारीस्थ, इदमहं रक्षसो ग्रीवा अपि कृन्ता-

मीदमहं यो नः समानो योऽसमानोऽरातीयति तस्य ग्रीवा अपि कृन्तामि, तप्तायन्यविन्तायन्यस्यऽवतान्मा नाथित मवताद्व्यथितमग्ने अङ्गिरो योस्यां पृथिव्यामस्यायुर्ना-नाम्नेहियत्तेनाधृष्टं नामानाधृष्टं तेन त्वाद्धेऽग्ने, अङ्गिरो-यो द्वितीयस्यां यस्तृतीयस्यां पृथिव्यामस्यायुर्नानाम्नेहि यत्तेनाधृष्टं नामानाधृष्टं तेन त्वा दधे विदेदग्नेर्नभो नाम सिंहिसि महिष्यसि देवेभ्यः पृथस्व देवेभ्यः कल्पस्व देवे-भ्यः शुन्धस्व देवेभ्यः शुम्भस्व॥ विभ्राट् बृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञपता अविहुतं वातजूतयो अभिरक्षत्य-त्मना प्रजाः पिपर्ति बहुधा विराजति ॥ इन्द्रघोषास्त्वा वसवः पुरस्तात्पान्तु, मनोजवसस्त्वा पितरो दक्षिणतः पान्तु, प्रचेतास्त्वा रुद्रैः पश्चात्पातु, विश्वकर्मा त्वाऽऽदि-त्यैरुत्तरतः पातु, त्वष्टा त्वा रूपैरुपरिष्टात्पातु, सिंह्यसि सपत्नसाही स्वाहा, सिंह्यसि रायस्पोषवनिः स्वाहा, सिंह्यसि सुप्रजावनिः स्वाहा, सिंह्यस्यादित्यावनिः स्वाहा,

सिंहस्यां वह देवान्देवाय ते यजमानाय स्वाहा भूतेभ्यस्त्वा विश्वायुरसि पृथिवीं स्कभानाच्युतक्षिदऽस्यान्तरिक्षं स्कभान, ध्रुवक्षिदसि दिवं स्कभानाग्ने कुलायमस्याग्नेः पुरीषमसि यज्ञः प्रतिष्ठाम् ॥ ॥ मनुषुत्वा निधीमहि मनुषु समिधीमहि । अग्ने मनुषुदङ्गिरो देवान्देवयते यज ॥ युञ्जते मा न उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः । विहोत्रा दधे वयुना विदेक, इन्मही देवस्य सवितुः परिष्टुतिः । देवश्रुतौ देवेष्वाघोषेथाम् ॥ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पांसुरे ॥ इळावती धेनुमती हि भूतं सूयवसिनी मनुष्ये यशस्ये । व्युष्टभ्ना रोदसी विष्ण एते दधात्थ पृथिवीमभितो मयूखैः, वैष्णवमसि विष्णुस्तु तुभ्नातु ॥ दिवो वा विष्णुरुत वा पृथिव्या महो वा विष्णुरुतोर्वन्तरिक्षात् । हस्तौ पृणस्व बहुभिर्वासव्यैराप्रयच्छ दक्षिणादुत सव्यात् । विष्णुर्नु कं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसि ।

यो अस्कभायदुत्तरं सधस्थं विचक्रमाणस्त्रेधोरुगायः ॥ वि-
ष्णोः पृष्टमसि विष्णो रराटमसि विष्णोः शप्त्रेस्त्थो विष्णोः
स्यूरसि विष्णोर्ध्रुवोसि वैष्णवमसि विष्णवे त्वा ॥ प्रतद्वि-
ष्णुः स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठः । य-
स्योरुषु त्रिषु विक्रमणेष्वऽधिक्षियन्ति भुवनानि विश्वाः ॥
देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां । पूष्णो हस्ता-
भ्यामाददे ॥ इदमहं रक्षसो ग्रीवा अपि कृन्तामि, इद-
महं यो नः समानो योऽसमानोऽरातीयति तस्य ग्रीवा
अपि कृन्तामि । बृहन्नसि बृहद्ग्रावा बृहतीमिन्द्राय वाचं
वद रक्षोहनं बलगहनं वैष्णवीमिदमहं तान्वलगानुद्वपामि ।
यो नः समानो यो नोऽसमानो निचखानेदमहं तान्वलगा-
नुद्वपामि । या नः सबन्धुर्या नोऽसबन्धुर्निचखानेदमहं ता-
न्वलगानुद्वपामि ॥ या नः सनाभिर्या नोऽसनाभिर्निचखानेद
महंतान्वलगानुद्वपामि ॥ या नः स्वबारणो निचखानेदमहं
तान्वलगानुद्वपामि । राळसि विराळसि सम्राळसि स्वरा-

ऽसि गायत्रेण च्छन्दसावबाढो यन्द्विष्मः । त्रैष्टुभेनच्छन्दसा-
वबाढो यन्द्विष्मः जागतेन च्छन्दसावबाढो यन्द्विष्मः आनु-
आदौ प्रायश्चित्तविधिः ॥ शुक्लपक्षे चेद्बलिविधानं स्यात्तदाऽष्टम्यां नक्तभोजनं, नवम्यामुपवासः, दशम्यां प्रायश्चित्तं, एकादश्यां भर्गक्रिया दशाह्निका, द्वादश्यां भर्गश्राद्धं कार्यम् । (कृष्णपक्षे तु) एकादश्यां नक्तभोजनं,द्वादश्यामुपवासः,त्रयोदश्यां प्रायश्चित्तं, चतुर्दश्यां भर्गक्रिया दशाह्निका, अमावस्यां भर्गश्राद्धमिति नियमः ॥ ॥ पञ्चगव्येन स्वात्मानं भूमिं च संशोध्य । शालिचूर्णेन ग्रहमण्डलमुल्लिख्य, तद्दक्षे सूर्यप्रतिमापद्मकलशं क्षेत्रे-

शद्वयं च संस्थाप्य ॥ भद्रपाठादि । कलशे प्रदानं । अग्न-
येनमः ६ उद्वयन्तमसं । उदुत्यञ्जा । चित्रन्देवानां ।
तच्चक्षुर्देवं । हंसः शुचिषत् । घृणिः सूर्यमादित्यमर्चयन्ति
तपः सत्यं मधु क्षिरन्ति । तद्ब्रह्म तदापोज्योतीरसोमृतं
ब्रह्मभूर्भुवः स्वरोम् ॥ ॐ ह्रांह्रींसः सूर्यायनमः ८ भवा-
न्यैनमः भास्वत्यै, भीमायै, योगीश्वर्यै, विमलनागराजाय,
कमलनागाय, गोतमनागाय, चक्रसुतायै, चाक्राभगवत्यै,
महामार्ताण्डनाथायै नमः । प्रतिमाकलशे । चित्रन्देवानां ।
ॐ ह्रांह्रींसः सूर्यायनमः ॥ विष्णुपञ्चायतनदेवताभ्यः नमः ॥
इन्द्रा पर्वता ॥ अर्चन्तस्त्वा ॥ यजमानमानीय ॥ अनाभौ ॥
उदुत्यमित्यग्निसूक्तेन न्यासो यथा ॥ शिरसि । उदुत्यञ्जातवे
दसं । ललाटे, अपत्येतायेवो । नेत्रयोः, अदृश्रन्नस्य केतवो ।
श्रोत्रयोः, तरणिर्विश्वर्द । नासिकायां, प्रत्यङ्देवानां । मुखे,
येनापावकचक्षसां । कण्ठे, विद्यामेषिरजः । सव्यबाहौ, सप्तत्वा
हरितो । वामबाहौ, अयुक्तसप्तशुन्ध्युवः । हृदि, उद्वयन्तम-

सस्परि[10] । नाभौ, उद्यन्नद्य मित्रमहे[11] । गुह्ये, शुकेषु मे हरि माणं[12] । लिङ्गे, उदगादयमादित्यो[13] । ऊर्वोः, समैक्षिषोर्ध्वम-हर्सो[14] । जान्वोः, उद्यन्नद्य विनोभज[15] । पादयोः, उद्यन्तन्त्वा मित्रमह आरो[16] ॥ तथाच पुनः द्विगुणसूर्यसूक्तेन च । शिरसि, चित्रन्देवानां । ललाटे, सूर्यो देवीमुषसं रोचमानांमार्यो न योषामभ्येति पश्चात् । यत्रानरो देवयन्तो युगानि वितन्वते प्रतिभद्राय भद्रम्[2] । नेत्रयोः, तच्चक्षुर्देवं[3] ॥ नासिकायां, भद्रा अश्वा हरितः सूर्यस्य चित्रा एतद्वा अन्नमद्यासः । नमस्यन्तो देव आपृष्ठमस्थुः परिद्यावा पृथिवीयन्ति सद्यः[3] ॥ मुखे, तत्सूर्यस्य देवत्वन्तरहित्वं मध्याकर्तो विततं सञ्जभार । यदेद्ऽयुक्तहरितः सदस्थ दात्राती वासस्तनुते सिमस्मै[4] । कण्ठे, तन्मित्रस्यवरुणाभिचक्षे सूर्यो रूपं कृणुते द्यौरुपस्थे । अनन्तमन्यद्रुषदस्यपाजः कृष्णमन्यद्धरितः सम्भरन्ति ॥ बाह्वोः, अद्या देवा उदिताः सूर्यस्य निरंहसः पिपृता निरवद्यात् । तन्नो मित्रो वरुणो मामहन्ता-

मदितिः सिन्धुः पृथिवीरुतद्यौः ॥ हृदि, इदं ह नूनमेषां स्तम्भं भिक्षेन मर्त्यः । आदित्यानामपूर्व्यं सवीमनि । नाभौ, बृहद्वरूथं मरुतान्देवं त्रातारमश्विना । मित्रमीमहे वरुणं-स्वस्तये । जान्वोः, त्वमिमा ओषधीः सोमविश्वा-स्त्वमाप अजयस्त्वं गाः । त्वमाततमुतोर्वन्तरिक्षं त्वं ज्योतिषा वितमो विवर्त्त । सर्वाङ्गेषु, अङ्गादङ्गाल्लोम्नो ॥ तथा । मित्रं पादयोः, देवानां जङ्घयोरित्यादि । ॐह्रद, ह्रांशिर, ह्रींशिखा, सः कव, सूर्यायनेत्राभ्यां, नमः अस्त्राय फट् ॥ अपसर्पन्तु० । प्राणायामः ॥ तीर्थे स्नेयं । यत्रास्ति माता । अ-क्षतावत् महागणपतये । अग्नये वायवे सूर्याय । ॐह्रांह्रींसःसू-र्याय । भवान्यै । विष्णुपञ्चायतनदेवताभ्यः । इन्द्राय वज्रह-स्ताय । तेजसे चण्डाय । सूर्यबलिसङ्कल्पितप्रायश्चित्तनिमित्ते दीपोनमः धूपोनमः ॥ अपसव्येन ॥ समस्तमातापितृभ्यो दीपः स्वधा ॥ सव्येन । पित्रेभर्गाय । समस्तप्रेतभर्गेभ्यः सूर्यसायुज्यार्थे सूर्यबलिसङ्कल्पितप्रायश्चित्तहोमे दीपो-

नमः। संवः सृजामि। अश्विनोः प्राणा। देहवद्देवस्य न्यासः॥ ॐगायत्र्यैनमः ॐभूर्भुवः ३। आदिदेवाय वि ३। भास्कराय वि ३। विश्वप्रकाशाय वि ३। योगीशाय ३। सूर्यरूपाय वि ३। नमो धर्मनिधानाय ३। घृणिः सूर्यमादित्यमर्चयन्ति तपः सत्यं मधु क्षरन्ति। तद्ब्रह्म तदापोज्योतीरसोमृतं ब्रह्मभूर्भुवःस्वरोम् ३। अद्य तावत्। ॐह्रांह्रींसःसूर्यस्य। महागणपतेः। अग्नेःवायोः सूर्यस्य। भवान्याः। विष्णुपश्चायजनदेवतानां। इन्द्रस्य वज्रहस्तस्य। तेजसः। चण्डस्य। आत्मनोवाङ्मनःकायो० पितुः भर्गस्य। समस्तप्रेतभर्गोणां सूर्यसायुज्यार्थे (पातित्यदोषाऽभोज्यभोजनदोषाऽकार्यकारणदोषाऽविक्रेयविक्रेणनदोषाऽग्राह्यग्रहणदोषस्वजातिक्रियाविलोपनदोषजनितनानाविधनरकोत्तारणार्थे सूर्यबलि सङ्कल्पितप्रायश्चित्तहोमे महामार्तण्डपादमूले सन्निधौ च) सूर्यपूजनं कलशयागपूजनं तेजश्चण्डपूजनमर्चामहं करिष्ये ॐकुरुष्व। तिलसर्षपयवान्विकीर्य॥ अपत्येता, आकृष्णेन,

ध्रुवाद्यौरित्यासनं । ह्रांह्रींसःसूर्यस्य, महागणपतेः । अग्नेः । भवान्याः । विष्णुपञ्चायतनदेवतानां । इन्द्रस्य वज्रहस्तस्य तेजसः चण्डस्य इदमासनं नमः ॥ महागणपतये । अग्नये । ह्रांह्रींसःसूर्याय । भवान्यै । विष्णुपञ्चायतनदेवताभ्यः । इन्द्राय वज्रहस्ताय । तेजसे चण्डाय । युष्मान् वः पूजयामि ॐ पूजय । उदुत्यञ्जात० । ह्वयाम्यग्निं प्रथमं स्वस्तये ह्वयामि मित्रावरुणाविहायुषे । ह्वयामि रात्रीं जगतो निवेशनीं ह्वयामि देवं सवितारमूतये ॥ महागणपतिं । अग्निं । ह्रांह्रींसःसूर्यं । भवानीं । विष्णुपञ्चायतनदेवताः । इन्द्रं वज्रहस्तं । तेजसं चण्डं आवाहयिष्यामि ॐआवाहय । यवान्विकीर्य ॥ आवाहयाम्यहं देवं भानुं० । एहि सूर्य० । त्रैलोक्यं भूषितं० । पद्मासनः पद्मकरःपद्म० ॥ तेजोवतीसहितदेव तवानुषङ्गात्प्राप्तं पदं पितृभिरस्तसमस्तदोषैः । घोरान्धकारपटलच्छिदुरस्य तस्मादावाहनं पितृमखेऽद्य करोमि तेऽहम् ॥

ब्रह्माण्डगेहपरि० ॥ हेमाम्भोजप्रवालप्रतिमतनुरुचिं चारुखट्वाङ्गपद्मौ शंखं चक्रं च पाशं सृणिमतिरुचिरामक्षमालां कपालम् । हस्ताम्भोजैर्दधानं त्रिनयनविलसद्वेद वक्त्राभिरामं मार्तण्डं वल्लभार्धं मणिमयमुकुटं हारदीप्तं भजामः ॥ घृणिः सूर्य ३ । प्राणायामः ॥ शन्नो देवी । लाजागन्धवचाकुष्टं वालुकं पद्मकेसरम् । नागकेसरसंयुक्तं पाद्यमेतत्प्रकल्पयेत् ॥ अदृश्रन्नस्य । सूर्यो नो दिवस्पातु वातो अन्तरिक्षात् । अग्निर्नः पार्थिवेभ्यः ॥ हिरण्यवर्णाः शु ४। ह्रांह्रींसःसूर्याय। पाद्यंनमः । महागणपतये । अग्नये । भवान्यै । विष्णुपञ्चायतनदेवताभ्यः इन्द्राय वज्रहस्ताय । तेजसे चण्डाय पाद्यंनमः । शेषंनिवार्य ॥ शन्नोदेवी । कुङ्कुमागुरुकर्पूरचन्दनैश्च सुगन्धिभिः । मृगजातीफलैर्युक्तमर्घ्यमेतत्प्रकल्पयेत् ॥ तरणि विश्व० । मनोहेतिविवस्वत आदित्यः कृत्रिमशरुः । पुरा न रजसोऽवधीत् ॥ आपो हिष्ठा ॥ ह्रांह्रींसःसूर्य इदं वोर्घ्यंनमः ।महागणपते । अग्ने ।

भवानि । विष्णुपञ्चायतनदेवताः । इन्द्र वज्रहस्त । तेजः चण्ड इदं वोऽर्घ्यंनमः ॥ प्रत्यङ् देवानां० । विश्वेदेवो व्यंह-तिमादित्यासो विसंहितम् । विश्वग्विवृहतास्पः ॥ शन्न आपो । ह्रांह्रींसः सूर्याय आचमनीयंनमः ॥ येना पावक चक्षु-षा० । शन्नो भव चक्षुषा शन्नो अह्ना शं भानुना शं महिम्ना शं घृतेन । यथा शं मधुच्छन्दसं सद्दुरोणे तत्सूर्य द्रविणं देहि चित्रम् । इदमापः । ह्रांह्रींसः सूर्याय मन्त्रस्नानीयं नमः ॥ ततः "पयोदधिघृत" इत्येकविंशतिस्नानमनु ॥ पयः क्षीरं दधिसर्पिरिक्षुस्तिला यवामधु । लाजामृतं पञ्चगव्यं गन्ध-पुष्पौषधीस्तथा । त्रयोदशस्नानेऽमूनि सूर्यस्योक्तानि सू-रिभिः ॥ "उदुत्यञ्जात०" । (पृ. १४१ पं. ११) इति "चित्रन्देवाना" मिति (पृ. १४२ पं. ४) सूक्तेन च ह्रां-ह्रींसःसूर्याय त्रयोदशस्नानानि नमः ॥ श्लोकतर्पणं कृत्वा ॥ हंसः शुचिषदिति मन्त्रगुड्डकम् ॥ रक्षोहणं० । प्रत्यग्नेहरेत्याऽरात्रिका । तां वा वस्तून्युश्मसि इति नेत्रस्पर्शनं ॥ रथे अक्षेषु इत्यनु

लेपनम् ॥ आसनायनमः । विद्यामेषि रज० । तेषां हि चित्रमुक्थ्यं वरूथमस्तिदाशुषे । आदित्यानामरङ्कृधि ॥ युवा सुवासा० । ह्रांह्रींसःसूर्याय वस्त्रंनमः ॥ सप्त त्वा हरितो० । अनेहो न उरुव्रज ऊरूची विप्रसत्तवे । कृधिस्तोकाय जीवसे ॥ यज्ञोपवीतं नमः ॥ अयुक्तसप्तसि० । यो मूर्धानः क्षितीनाम-दब्धासः सुयशसः । व्रता रक्षन्ति अद्रुहः ॥ गन्धद्वारां० । समालभनं गन्धोनमः ॥ उद्वयन्तमस० ॥ तेन अस्तु वृका-णामादित्यासो मुमोचः । स्तेनबद्धमिवादिते ॥ पुष्पवती० । ह्रांह्रींसःसूर्यायनमः । महागणपतये अर्घोनमः पुष्पंनमः । तत्र "उदुत्यञ्जातवे" इति षोडशर्चेन । (पृ. १४१ पं. ११) "चित्रं देवानां इति षोडशर्चेन सूक्तेन च । पुष्पपूजा । पूर्वे सूर्यायनमः, आग्नेये दिवाकरायनमः, दक्षिणे विवस्वते, नैर्ऋते भगाय, पश्चिमे वरुणाय, वायवे महेन्द्रायनमः, उत्तरे आ-दित्याय, ईशाने शान्ताय, पूर्वे सप्ताश्वेभ्यः, दक्षिणे यमराज्ञे, पश्चिमे भास्कराय, उत्तरे रवये, मध्ये सूर्याय, प्रत्यक्ष-

देवाय, परमार्थसाराय, विश्वधात्रे, नरकोत्तारणाय, तेजोधिपतये, तमोपहाय, ॐ हुंमार्तण्डाय, व्योमरूपिणे, अनन्ताय, ह्रांह्रींसःसूर्याय ८ प्राणरूपाय हंसात्मने, निष्कलासहिताय महामार्तण्डाय, अशोकाय, विशोकाय, नन्दीशाय, पुष्टिवर्धनाय, सुवर्णचूडाय, शङ्खाय, मणिभद्राय, सूर्याय, विभ्राजाय वैनमोनमः अर्घोनमः पुष्पंनमः ॥ उद्यन्नद्यमित्रमह० । अपोषुण इयं शरुरादित्या अप दुर्मतिः । अस्मदेत्व जघ्नुषी ॥ धूरसि धूर्व धूर्वन्त । धूपं परिकल्पयामिनमः ॥ शुकेषु मे० । तत्सूर्यो बृहदर्चींष्यश्रेत्पुरो विभ्राजनिममानुषाणाम् । सोमो देवा ददृशे रोचमानः कृत्वः सुकृतः कर्तृभिरभूत् ॥ तेजोसि शुक्रमसि ॥ ह्रांह्रींसःसूर्याय । रत्नदीपं परिकल्पयामिनमः ॥ "देवस्य त्वा सवितुः" इति चामरं । काण्डात्काण्डादिति छत्रम् । तच्चक्षुरित्यादर्शंपरिकल्पयामिनमः ॥ एताभ्यो देवताभ्यः दीपोनमः । वासोनमः । एतासां देवतानामर्घ्यदानं ।

उदगादय० । यद्वः श्रान्ताय सन्वते वरूथमस्ति यच्छन्दिः ।
तेन नो अध्यवोचत ॥ मधुवात ऋतायते० । ह्रांह्रींसः
सूर्याय मधुपर्कंपरिकल्पयामिनमः ॥ समैक्षिपोर्द्ध्व० । नाभि-
रसि चक्षुरसि श्रोत्रमसि सूर्य मे देहि । प्राणं चक्षुर्मे
व्यानम् ॥ ह्रांह्रींसः । पुष्पाञ्जलिं समर्पयामिनमः ॥ उद्यन्नद्य
विनोभज० । सूर्यमसि सविता दृंह, विष्णुरसि देवानां दृंह,
सूर्यः सूर्ये विभज्यते सूर्यरश्मिप्रतिष्ठः ॥ "ह्रांह्रांसःसूर्याय-
नमः भगवन् प्रसीद" इति सप्त प्रदक्षिणानि ॥ चूडारत्नमरी-
चिरञ्जितभुवा देवेन जम्भद्विषा यस्त्रैलोक्यमणिस्त्रिसन्ध्य-
ममरैः साकं समभ्यर्च्यते । मत्तैरावणकुम्भपीठविलुठ-
त्सिन्दूरपूरच्छविः स श्रेयांसि रविर्दधातु नलिनीनिर्नि-
द्रताकोविदः ॥ इति स्वाष्टाङ्गपातप्रणामः ॥ अन्नं नमः २ ।
दक्षिणायै । ततोऽक्षय्यं यथा । पद्मगर्भापते० । अद्यतावत् भ-
वानीभा० महामार्तण्डपादमूले तत्सन्निधौ पितुः भर्गस्य ।
समस्तप्रेतभर्गाणां सूर्यसायुज्यार्थे (पातित्यदोषाऽभोज्यभोजन-

दोषाऽकार्यकरणदोषाऽविक्रेयविक्रीणनदोषाऽग्राह्यग्रहणदोषस्वजा-
तिक्रियाविलोपनदोषजनितनानाविधनरकोत्तारणार्थे सूर्यबलिवि-
धानसङ्कल्पितप्रायश्चित्तहोमे) कलशप्रीत्या० पुण्यवृद्धिरस्तु ।
सूर्यमण्डलप्राप्तिरस्तु ॥ एवं । अद्यतावत्० भवानीभास्वती०
सूर्यप्रतिमाप्रीत्या० पुण्यवृद्धिरस्तु सूर्यमण्डलप्राप्तिरस्तु ॥
एता देवता कलशेपुष्पद्वयं ॥ ततोऽग्निकर्म ॥ ॥ पात्रं
तिला । अग्निं परिसमूह्य ९ परिस्तीर्य १६ आदौ पञ्च ॥
अग्निपूजा ॥ अग्नये समनमत् ॥ उत्तरतः संस्तीर्णे० महा-
गणपतये जुष्टं निर्वपामि एवं प्रोक्षामि ॥ इदं हविः ।
आज्यदर्शनं । आत्मनो० भवनी० पितुःभर्गस्य, समस्त-
प्रेतभर्गाणां सूर्यसायुज्यार्थे सूर्यबलिविधानसङ्कल्पितप्रा-
यश्चित्तहोमे अग्नये ६ ह्रांह्रींसःसूर्याय ८ इन्द्रादिभ्यः
अग्नये वैश्वानराय इदमाज्यमर्पयामिनमः ॥ आज्यभा-
गान्ते । कूष्माण्डमन्त्राणि कूष्माण्डब्राह्मणं च हुत्वा प्रधानानि
"तेजोसि" ॥ अग्नयेस्वाहा इत्याज्येन हुत्वा ॥ ततोऽन्नहोमः ॥

निष्वसीद० वषट्कृते तावत्। ततः प्रधानानि। उद्वयन्तमसं० । उदुत्यञ्जा०। चित्रन्देवानां०। तच्चक्षुर्दे० । हंसः शुचि० । घृणिः सूर्य० । ह्रांह्रींसःसूर्यायस्वाहां, सप्ताश्वाय ८ । भवान्यैस्वाहां । विष्णुपञ्चायतनदेवताभ्यः स्वाहा । इन्द्रपर्वता । ऐन्द्राग्नं ॥ ॥ एवमाज्यहोमः ॥ तर्पणं अनेन मन्त्रहोमेन पितुः भर्गस्य समस्तप्रेतभर्गाणां सूर्यसायुज्यार्थं महागणपतिः कुमारः० अन्नाज्याहुतिभिः प्रीयन्तां प्रीताः सन्तु ॥ विष्णुपञ्चकं हुत्वा तर्पणम् ॥ ततो यवतिलहोमः ॥ गायत्रीब्राह्मणं, तर्पणम् ॥ अध्वर्योयं–वषट्कृते तावत्। ततः प्रधानानि । उद्वयन्तमस० ६ ऋचः हुत्वा मार्तण्डब्राह्मणं हुत्वा ह्रांह्रींसः सूर्यायस्वाहा ॥ तर्पणं । मलिम्लुचब्राह्मणं हुत्वा भवान्यैस्वाहां तर्पणम् ॥ प्रायश्चित्तस्थानकं हुत्वा वासुदेवाय स्वाहा ८ । तर्पणम् ॥ इन्द्रा पर्वता ॥ वा यथा कालं ॥ नवग्रहसूक्तानि वा हुत्वा ॥ तर्पणम् ॥ रुद्रपञ्चकं । तर्पणम् ॥ देवीपञ्चकं । तर्पणम् ॥ रक्षोघ्नमन्त्राः । तर्पणम् ॥

ऋतुतिथिः । इळामग्ने० । अग्नेत्वं पारयानव्यो० । वैश्वानरेण पावमान्यब्राह्मणेन चेत्युपस्थानम् ॥ यद्देवा देवेतिकुसुमाञ्जलिः ॥ वैश्वानराय पूयमानब्राह्मणेन चेतितर्पणम् ॥ अनेन मन्त्रहोमेनात्मनो० भवानी० पितुर्भर्गस्य समस्तप्रेतभर्गाणां सूर्यसायुज्यार्थं सूर्यबलिविधानसङ्कल्पितप्रायश्चित्तहोमे अग्निः प्रीयतां अग्निः प्रीतोस्तु । वायुः प्री, सूर्यः प्री । ब्रह्माप्री० । हुतमेक्षणं । आश्रावितं तावत् ॥ ब्राह्मणपूजनम् ॥ ॐभूः पुरुषमावाहयामि नमः ३ । ॐभूर्भुवःस्वः पु० ३ । आदिदेवायवि ३ । भास्करायवि ३ । विश्वप्रकाशायवि ३ । योगीशायवि ३ । सूर्यरूपायवि ३ । नमो धर्मनिधानाय३ ॥ घृणिः सूर्य ३। अद्यतावत् अग्नेः ६ ह्रांह्रींसः सूर्यस्य ८ भवान्याः आत्मनो० पितुः भर्गस्य भर्गाणां सूर्यसायुज्यार्थं (पृ. १४४पं.१०) अग्नेर्यविष्टब्राह्मणपूजनमर्चामहं करिष्ये । अग्नेर्यविष्ठाय दक्षिणान्तं । तदनु क्षेत्रेशबलिः ततः सूर्यप्रतिमाविसर्जनं । ॐभूः पुरुषं विसर्जयामिनमः ३ । "सर्वाः

सूर्यगायत्रीः" अद्यतावत् ह्रांह्रींसः सूर्यस्य ८ भवान्याः आत्मनो० पितुः भर्गस्य० (पृ.१४४ पं. १०) सूर्यपूजनमच्छिद्रमस्तु। यवोदकं।आपन्नोसि। तर्पणम्॥ प्रतिमाप्रतिपादनम्॥ सावित्राणि० अद्यतावत् भवानी० पितुः भर्गस्य समस्तप्रेतभर्गाणां अतीत० इमां सूर्यप्रतिमां ब्राह्मणाय ददानि ३ एता देवता। पूर्ववद्ब्रह्मणपृच्छां विसर्ज्य॥ आश्रावितमिति पूर्णांदत्वा विमुच्य नयामि॥ नित्यकर्म वैश्वदेवादि सम्पाद्य। कलशपृच्छां विसर्ज्य। ॐभूः पुरुषंविसर्जयामिनमः ३। ॐभूर्भुवःस्वः ३। आदिदेवायवि ३ भास्करायवि ३ विश्वप्रकाशायवि ३। योगीशायवि ३। सूर्यरूपायवि ३ नमोधर्मनि ३। घृणिः सूर्य ३। अद्यतावत् महागणपतेः। अग्नेः ६। भवान्याः। विष्णुपञ्चायतनदेवतानां। इन्द्रस्य वज्रहस्तस्य। तेजसः चण्डस्य। आत्मनो (पृ.१४४ पं.१०) कलशपूजनं ग्रहमण्डलपूजनं क्षेत्रेश्वरपूजनमच्छिद्रं सम्पूर्णमस्तु॥ यवोदकं॥ आपन्नोसि। नमो ब्रह्मणे। उदकलशं। इति सूर्यबलिविधाने प्रायश्चित्तम्॥

अथ भर्गक्रियाविधिः ॥

तत्र शुक्लपक्षे एकादश्यां, कृष्णे तु चतुर्दश्यां भर्गक्रियारम्भः ॥ शालिचूर्णेन ब्रह्मकलशं तद्दक्षे सूर्यप्रतिमाकलशं तद्दक्षे सूर्यकलशं तद्दक्षे यमवैवस्वतकलशमुल्लिख्य क्षेत्रेशद्वयं च संस्थाप्य ॥ स्वस्त्ययनादि पठित्वा । प्रधानानि । ब्रह्मकलशे । उद्वयन्तमसस्परि । ऋचः ६ ह्रांह्रींसःसूर्यायनमः ॥ भवान्यैनमः ॥ सूर्यप्रतिमायां ॥ चित्रन्देवानां० ह्रांह्रींसःसूर्यायनमः । सूर्यकलशे ॥ सूर्योनो दिवस्पातु० । अस्य वामस्य पलि० । यमकलशे ॥ यमोदाधार० । त्रिकद्रुकेभिः० । विष्णुपञ्चायतनदेवताभ्यः । क्षेत्रस्य पतिना । ऐन्द्राग्नं । अर्चन्तस्त्वा ॥ ॥ यजमानमानीय ॥ अनाभौ० । उदुत्यञ्जात (पृ. १४१ पं. ११) इति सूक्तेन न्यासः ॥ तीर्थेस्नेयं । यत्रास्ति माता ॥ अद्यतावत् महागणपतये ह्रांह्रींसःसूर्याय । भवान्यै । कलशरूपाय सूर्याय । यमवैवस्वताभ्यां । विष्णुपञ्चायतनदेवताभ्यः तेजसे चण्डाय दीपोनमः ॥ अपसव्येन । समस्त-

मातापितृभ्यो दीपःस्वधा ॥ सव्येन। पित्रे भर्गाय समस्तप्रे-
तभर्गाणां सूर्यमण्डलप्राप्त्यर्थे भर्गक्रियासङ्कल्पे दीपोनमः॥
संव्वः सृजामि । अश्विनोः प्राणा ॥ देहवद्देवस्य न्यासः ॥
ॐभूः पुरुषमावाहयामिनमः २ ॐभूर्भुवः २ । आदिदे २ ।
भास्क २ । विश्वप्र २ । योगी २ । सूर्यरू २ । नमो धर्म २ ।
घृणिः सूर्य २ अद्यतावत् महागणपतेः । ह्रांह्रींसःसूर्यस्य ।
भवान्याः । कलशरूपस्य सूर्यस्य यमवैवस्वतयोः विष्णुप-
श्चायतनदेवतानां तेजसः चण्डस्य । आत्मनो० पितुः
भर्गस्य भर्गानां० (पृ. १४४ पं. १०) भर्गक्रियानिमित्तं
कलशपूजनं सूर्यपूजनं सूर्यकलशपूजनं यमवैवस्वतकलशपू-
जनं तेजश्चण्डपूजनमर्चामहं करिष्ये दक्षिणान्तं कृत्वाऽक्ष-
य्यम् ॥ पद्मगर्भापते भानो प्राप्तं पदमनामयम् । पितृभिर्भु-
विभावेन सौरमक्षय्यमस्त्विदम् । अद्यतावत् भवानी० पितुः
भर्गतनुत्रस्य समस्तप्रेतभर्गाणां । अतीत० सूर्यप्रीत्या०
सूर्यमण्डलप्राप्तिरस्तु । एवं ब्रह्मकलशे । ततः सूर्यकलशे ।

निष्कलासहितमहामार्तण्डप्रीत्या० महामार्तण्डः प्रीतोस्तु सूर्यमण्डलप्राप्तिरस्तु ॥ यमकलशे । कीनाशस्य च प्रीत्यर्थं मायया सहितस्य च । यमस्य धर्मराजस्य याममक्षय्यमस्त्विदम् ॥ अद्यतावत् पितुः भर्गतनुत्रस्य विश्वप्रकाशस्य (पृ. १४४ पं. १०) यमवैवस्वतप्रीत्या० यमवैवस्वतौ प्रीयेतां प्रीतौ मे भवेताम् ॥ एवं तेजश्चण्डप्रीत्या एतादेवता ॥ कलशे पुष्पद्वयं । तद्विष्णोः । प्रतिमायां चित्रन्देवानां । सूर्यकलशे । सूर्यो नो दिव० । अस्य वामस्य० ॥ यमकलशे यमो दाधार । त्रिकद्रुकेभि ॥ ॥ ततो वैश्वदेवादि नित्यकर्म—अग्नयेस्विष्टकृते तावत् । ब्राह्मणपूजनं ॥ ॐभूः पुरु ३ । आदि० भास्करा० विश्व० योगी० सूर्य० नमो० घृणिः सू० । अद्यतावत् भवानी० ह्रांह्रींसः सूर्यस्य । भवान्याः । कलशरूपस्य सूर्यस्य यमवैवस्वतयोः आत्मनो, पितुः भर्गतनुत्रस्य समस्त (पृ. १४४ १०पं.) अग्नेर्येविष्टब्राह्मणपूजनमर्चामहं करिष्ये । दक्षिणां कृत्वाऽऽदित्यमुपतिष्ठेत् ॥ अद्यतावत् पितुः

भर्गतनुत्रस्य समस्तप्रेतभर्गतनुत्राणां भर्गक्रियानिमित्तं (भगवन् सूर्य प्रभातीर्थे प्रह्वीभूतस्य प्रशान्तिमयीं प्रकृतिं प्रापितस्य विमलोद्द्योततमे स्वमण्डले ब्रह्मवर्चसं साक्षात्कुरुष्विति) सूर्याय प्रकाशरूपाय परमार्थसाराय प्रत्यक्षदेवाय विश्वदात्रे नरकोत्तारकाय निष्कलासहिताय महामार्तण्डनाथाय ह्रांह्रींसःसूर्याय, महाश्वेतासहिताय परमतेजोरूपिणे सूर्याय विभ्राजाय वैनमोनमः ॥ इत्युपस्थानम् ॥

अथ सूर्यसम्मुखं खे पुष्पाणि क्षिपेत् ॥ ॥ कालात्मन्सर्वभूतात्मन् विश्वात्मन्विश्वतोमुख । यस्मादग्नीन्दुरूपस्त्वं पाहि नोऽतः प्रभाकर ॥ वीरवीरेश देवेश नमस्तेऽस्तु त्रिधात्मक । महामार्तण्ड वरद सर्वाभयवरप्रद ॥ त्वमेव सप्तधा भूत्वा च्छन्दोरूपेण भास्कर । यस्माद्भासयसे लोकान्पाहि नोऽतः प्रभाकर ॥ नमोनमः पापविनाशनाय विश्वात्मने सप्ततुरङ्गमाय । धाम्नामधीशाय भवाभवाय पापौघदावानलशान्तिकर्त्रे ॥ नमस्ते देवदेवेश

वेदाहरणलम्पट । वाजिरूपेण मामस्मात्पाहि संसारसागरात् ॥ नमो धर्मनि० ॥ श्रीभगवन्सूर्याऽमुं प्रेतभर्गं स्वमण्डलं प्रापय ३ "यथाप्रेतसंख्यं एवं कृत्वा" ऋतं च सत्यश्चाभीद्धात् इति पठेत् ॥ इति सूर्ये प्रत्यक्षपूजामनु । क्षेत्रेशबलिः ॥ ततः प्रतिमाकलशसूर्यकलशयमवैवस्वतकलशान् विसर्ज्य । ॐभूः पुरुषं विसर्जयामिनमः ३ ॐ भूर्भु । आदि । भास्क । विश्व । योगी । नमो धर्म । घृणिः सूर्य । अद्यतावत् ह्रांह्रींसःसूयस्य । कलशरूपसूर्यस्य । यमवैवस्वतयोः । आत्मनो० पितुः भर्गतनुत्रस्य । समस्त० (पृ. १४४ पं. १०) भर्गक्रियानिमित्तं सूर्यप्रतिमापूजनं सूर्यकलशपूजनं यमवैवस्वतपूजनमच्छिद्रंसम्पूर्णमस्तु ॥ यवोदकं नमः । आपन्नोस्मि ॥ प्रतिमाकलशे । नमो धर्म । जातवेदप्र० । सूर्यकलशे । अपरः शरणं० । यमकलशे । यमो वैवस्वतो नाम प्रेतरूपो महाबलः । पायादमुं सदातारं प्रेतमुक्तिं करोतुवै ॥ आह्वानं नैव । नमो ब्रह्मणे ॥ ततो ब्राह्म-

णाय प्रतिपादयेत् ॥ सावित्राणि अद्यतावत् भवानी० पितुः भर्गतनुत्रस्य समस्त (पृ. १४४ १० पं.) सूर्यमण्डलप्राप्त्यर्थं इमां सूर्यप्रतिमां ददानि ३ ॥ एवं सूर्यकलशं ॥ ततो दर्भविष्टरे जीवादानं दत्वा, एवं यमवैवस्वतकलशं दद्यात् ॥ ततोऽक्षय्यं ॥ पद्मगर्भापते भानो प्राप्तं पदमनामयम् । पितृभिर्भुविभावेन सौरमक्षय्यमस्त्विदम् । अद्यतावत् भवानी सूर्यसायुज्यार्थं सूर्यप्रीत्या० सूर्यः प्रीतोऽस्तु सूर्यमण्डलप्राप्तिरस्तु ॥ एवं कलशरूपसूर्यप्रीत्या० कलशरूपसूर्यः प्रीतोस्तु सूर्यमण्डलप्राप्तिरस्तु ॥ एवं कीनाशस्य च प्रीत्यर्थं मायया सहितस्य च । यमस्य धर्मराज्यस्य याममऽक्षय्यमस्त्विदम् ॥ अद्यतावत् यमवैवस्वतौ प्रीयेतां प्रीतौ मे भवतां ॥ एता देवताः ॥ ब्राह्मणपृच्छां विसर्ज्य (पृ१४४ पं १०) अग्नये स्विष्टकृतेस्वाहा । विमुच्य । नयामि ॥ धर्मं देहि ॥ गोग्रासादि । आयुः प्रजां ॥ कलशपृच्छांविसर्ज्य । ॐभूःपुरुषं विसर्जयामिनमः ३

आदिदे । भास्क । विश्व । योगी । सूर्यरू । नमो धर्म । घृणिः सू । अद्यतावत् भवानी० महागणपतेः ह्रांह्रींसः सूर्यस्य भवान्याः । विष्णुपञ्चायतनदेवतानां तेजसः चण्डस्य । आत्मनो पितुः भर्गस्य (पृ १४४ पं १०) भर्गक्रियानिमित्तं कलशपूजनं क्षेत्रेश्वरपूजनमच्छिद्रं सम्पूर्णमस्तु ॥ यवोदकं । आपञ्चोसि । नमोब्रह्मणे ॥ उदकलशं । मन्त्रार्थाः ॥ इति भर्गक्रियापूजाविधिः ॥ ॥ तदनु नदीतीरेऽन्यदेशे गच्छेत् ॥ उक्तं च ॥ "उदुत्यमिति मन्त्रेण उद्वयन्तमसस्ततः । स्मृत्वाप्यमुकभावं च कुर्याद्दशोदकक्रियाः ॥ हव्या[१] कव्या[२] प्रभा[३] धूम्रा[४] सौम्या[५] तीव्रा[६] प्रतापिनी[७] । रौद्री[८] ब्राह्मी[९] तथा धर्मा[१०] क्रिया भर्गकला दश ॥ पृथिव्या[१]पस्[२]तथा तेजो[३] वायु[४]राकाश[५] एवच । मनो[६]बुद्धि[७]रहङ्कारा[८]: प्रकृति[९]:पुरुषो[१०]दश ॥" अथ विधिः । सदर्भकाण्डहस्तो दक्षिणाभिमुखो भर्गरूपान्प्रेतान्ध्यात्वा "उदुत्यञ्जा" इति दशर्चसूक्तेन प्रेतभर्गेभ्यस्तिलोदकाञ्जलयो देयाः ॥ यथा । उदुत्यञ्जा[१] । अपत्येता[२] । अदृश्यन्न[३] । तरणिर्वि[४] । प्रत्यङ्दे[५] । येना पाव[६] ।

विद्यामेषिं । सप्त त्वा हं । अयुक्त सप्त । उद्वयन्तं ॥
अद्यतावत् भवानी० पित्रे भर्गाय । समस्त०प्रथमेऽहनि
२, ३, ४, ५, ६, ७, ८, ९, दशमेऽहनि एष ते तिलो-
दकाञ्जलिःनमः ॥ तीर्थे स्नेयं० चाकाभगवत्यै गन्धादि ।
अद्यतावत् भवानी० पित्रे भर्गाय समस्त एष वः दीपो-
नमः ॥ ततो भूमिमुपलिप्य ॥ दक्षिणाग्रान्दर्भानास्तीर्य ॥ पित्रे
भर्गाय समस्त०प्रथमेऽहनि०भूपृष्टे० एतद्वोऽवनेजनं नमः॥
प्रेतचरोरन्नमुद्धृत्य । तिलास्तोयं तथा क्षीरं० । सव्यं जानुं
भूमौ निधाय ॥ ॐभूः पुरुषमावाहयामिनमः ३ । ॐभू-
र्भुवः । आदि । भास्क । विश्व । योगी । सूर्य । नमो ।
घृणिः अद्यतावत् भवानी० पितःभर्ग प्रथमेऽहनि हव्या-
ख्याकलाव्यापिन्नेष ते प्रथमः पार्थिवः पिण्डोनमः । अप
उपस्पृश्य । एवं ॐभूः पुरुषमावाहयामि द्वितीयेऽहनि कव्या-
ख्याकलाव्यापिन्नेष ते द्वितीय आप्यः पिण्डोनमः । अपउप-
स्पृश्य । एवं द्वितीयेऽहनि–प्रभाख्या–तृतीयस्तैजसः । ३ ।

चतुर्थेऽहनि धूम्राख्या–चतुर्थो वायवः पिण्डः । ४ । पञ्चमेऽहनि सौम्याख्या–पञ्चम आकाशेयः पिण्डः । ५ । षष्ठेऽहनितीव्राख्या–षष्ठो मानसः पिण्डः ।६। सप्तमेऽहनि प्रतापिन्याख्या–सप्तमः बोधः पिण्डः । ७ । अष्टमेऽहनि रौद्याख्या–अष्टमः आहङ्कारिकः पिण्डः । ८ । नवमेऽहनि ब्राह्मयाख्या–नवमः प्राकृतः पिण्डः । ९ । दशमेऽहनि धर्म्याख्याकलाव्यापिन्नेष ते दशमः पौरुषः पिण्डः अप- उपस्पृश्य ॥ इति प्रत्येकं पितरं दश दश पिण्डान्दद्यात् ॥ ("वा- सवीरान्नगन्धार्घादिभिरऽर्चां समापयेत् । पित आमन्त्रणेनेति प्रेत- नामापि तनुयादिति" कात्यायनकौमुद्युक्तिः ॥) पितः भर्ग प्रथमेऽहनि एतत्ते ऊर्णं वासोनमः वीरान्नंनमः । पितः भर्ग एष ते गन्धोनमः । अर्घोनमः पुष्पंनमः दीपो- नमः धूपोनमः ॥ पितः भर्ग प्रथमेऽहनि भक्ष्यभोज्यफल- मूलबलिः नमः । पितः भर्ग तिलमधुमिश्रमुदकं० । पितः भर्ग एतत्ते हिमपानादि नमः । सूर्यरूपं प्रेतं

ध्यात्वा । "उद्यन्तन्त्वा मित्रमह आरोहन्तं विचक्षणम् । पश्येम शरदः शतंजीवेम शरदः शतम्" इति प्रत्येक-पिण्डेषु पुष्पाणि क्षिपेत् ॥ वामाङ्गुष्ठे विष्टरं निधाय ॥ अद्य-तावत् भवानी० पितुः भर्गस्य प्रथमेऽहनि कृव्यारव्या-कलाव्यापिनः सूर्यलोकप्राप्त्यर्थं भर्गप्रकृतिसाधनाय चाकाप्रवाहे प्रथम एष ते पार्थिवः पिण्डः पूरकोस्तु ॥ पितः भर्ग प्रथमेऽहनि एष ते तिलोदकुम्भोनमः । पितः भर्ग प्रथ-मेऽहनि एषते तिलोदकाञ्जलिः नमः ॥ एवं अद्यतावत्—भवानी० पितुः भर्गस्य द्वितीयेऽहनि कृव्यारव्याकलाव्या-पिनः सूर्यलोकप्राप्त्यर्थं भर्गप्रकृतिसाधनाय चाकाप्रवाहे द्वितीय एष आप्यः पिण्डः पूरकोऽस्तु ॥ पितः भर्ग द्विती-येऽहनि एषते प्रथमः तिलोदकुम्भोनमः । द्वितीयेऽहनि एष ते द्वितीयस्तिलोदकुम्भोनमः ॥ पितः भर्ग द्वितीयेऽ-हनि एष ते प्रथमस्तिलोदकाञ्जलिः नमः । पितः भर्ग द्वितीयेऽहनि एष ते द्वितीयस्तिलोदकाञ्जलिः नमः ॥

एवं दिनवृद्ध्या तिलोदकुम्भतिलोदकाञ्जलयो वर्धितव्याः ॥ इत्थं क्रमेण दशपिण्डान्क्षिपेत् ॥ ॥ तदनु भर्गकुम्भे संविष्टरे जलक्षीरमधुतिलान्नघृतगुडशर्करादिफलमूलादि एकीकृत्य पात्रान्तरे। अद्यर्तावत् भवानी० पितुः भर्गस्य समस्तप्रे० प्रथमेऽहनि द्वितीयेऽहनि ३, ४, ५, ६, ७, ८, ९ दशमेऽहनि सूर्यमण्डलप्राप्त्यर्थं एष सूर्यकुम्भोऽहोरात्रतृप्तयेऽस्तु ॥ भर्गक्रियायां सोदकुम्भं प्रेतकुम्भं च नास्ति ॥ ततो वपनं ॥ विष्णुबलिर्युते भर्गश्राद्धे द्विर्वपनं निषिद्धं, तदा विष्णुबलावेव कार्यम् ॥ तदनु भर्गकुम्भक्षेपणम् ॥ इदं पुरुषशार्दूला विमलं दिव्यमुत्तमम् । सूर्यलोके सुपानीयं प्रेता अत्र स्नात अपः पिबतेति स्नात्वा शुद्धवस्त्रधारणम् ॥ तिलकं । प्रत्यग्ने इत्यारात्रिका ऐन्द्राग्नमितितिलहोमः । तर्पणं महौषधिगणा रक्षोघ्नाः प्रीयन्तां प्रीताः सन्तु ॥ अहोरात्रं कर्तॄणामऽशौचं ॥ दीपं दद्यादहोरात्रं तीर्थाग्नेतिलतैलतः ॥ इति भर्गक्रियाविधानम् ॥ ॥

अथ भर्गश्राद्धविधिः ॥

शुक्ले द्वादश्यां, कृष्णेऽमावस्यां ॥ दत्तात्रेयः । ततो विंशतिविप्रान्वै श्रेष्ठान् शुद्धान्निमन्त्रयेत् । इति ॥ त्रयोदश तथा विप्रान्प्राङ्मुखान्प्रतिपूजयेत् । त्रिभिश्च दशभिर्नाम्नां सूर्यस्य विश्वशक्तिभिः । उदङ्मुखांस्तथा विप्रान्सप्त वै प्रतिपूजयेत् ॥ आदौ ग्रहमण्डलं तद्दक्षे त्रयोदशकलशान् तन्मध्ये प्रतिमाकलशं तद्दक्षे सूर्यकारणकलशषट्कं तेषामधोवेदचतुष्टयीं तद्दक्षे यथाप्रेतसंख्यं कलशान् क्षेत्रेशद्वयं च संस्थाप्य ॥ तत्रादौ भद्रपाठादि–वषट्कृते तावत् ॥ प्रदानानि ॥ कलशे अग्नयेनमः ६ उद्वयन्तमस ६ ॥ भवान्यै १० ततस्त्रयोदशकलशेषु प्रत्येकस्य द्वे द्वे ऋचो उदुत्यञ्जा० । चित्रन्देवाना० १ ॥ अपत्ये ता० ॥ विवस्व आदित्यैष ते सोमपीथस्तस्मिन्मन्दस्व । या दिव्या वृष्टिस्तया त्वा श्रीणामि २ ॥ अदृश्यन्नस्य० ॥ गायत्रेण प्रतिमिमीते अर्कमर्केन साम त्रैष्टुभेन वाकम् । वाकेन वाकं द्विपदा चतुष्पदाऽक्षरेण

मिमते सप्तवाणीः । ३ । तरणिर्विश्वं० ॥ धारयन्त आदि-
त्यासो जगत्स्था देवा विश्वस्य भुवनस्य गोपाः । दीर्घ-
धियो रक्षमाणा आसुर्यमृता वा नः च्यवमाना ऋणानि ।
४ । प्रत्यङ्दे० ॥ सविता पश्चात्तात्सविता पुरस्तात्सवितो-
त्तरात्तात्सविताऽधरात्तात् । सविता नः सुवतु सर्वतार्तिं
सविता नो रासतां दीर्घमायुः । ५ । येना पावक० ॥ ये ते
अर्यमन्वहवो ६ । विद्यामेषि रजं० ॥ बहिष्टेभिर्विहरन्यासि
तन्तुमवव्ययन्नसि तन्देवं स्म । दिविष्वतो रश्मयः सूर्यस्य
चर्मेवावधुस्तमो अप्स्वन्तः ७॥ सप्तत्वा हरितो० ॥ सम्पूषन्न-
ध्वनस्तिरव्यंहो विमोचनपात् । सक्ष्वादेवप्रणम्पुरः । ८ ।
अयुक्त सप्त० ॥ मित्रः संसृज्य पृथिवीं भूमिश्च ज्योतिषा
सह । सुजातं जातवेदसमऽयक्ष्मत्वा संसृजामि प्रजाभ्यः
। ९ । उद्वयन्तं० ॥ रुद्रः संसृज पृथिवीं बृहज्ज्योतिः समी-
धिरे । तेषां भानुरजस्र इच्छुक्रोदेवेषु रोचते । १० । उद्य-
न्नद्यं० ॥ सप्तत्वा हरितो० ११ शुकेषु मे० ॥ हंसः शुचि-

षत् १२ उद्गादयं० ॥ सूर्यो नो दिवस्पातु वातो अन्तरि-
क्षात् । अग्निर्नः पार्थिवेभ्यः ।१३॥ मध्यकलशे ॥ अस्य वा-
मस्यं० ॥ सप्त युञ्जन्ति० ॥ इमं रथमधि० ॥ वृष्णे यत्ते वृ-
षणो अर्कमर्चन्निन्द्र ग्रावाणो अदितिः सोजषा । अनश्वासो
ये योपवन्निरथः इन्द्रेषिता अभ्यवर्तन्त दस्यून् । ह्रांह्रींसः-
सूर्यायनमः ॥ कारणकलशेषुषट्सु । रदत्पथो वरुण सूर्याय
पूर्णासि समुद्रिया नदीनाम् । सर्गो न सृष्टो अर्वतीनृता-
यञ्चकार महीरवनीरहभ्यः । सूर्यायनमः । १ । प्रसम्राजे
बृहदर्चा गभीरं ब्रह्मप्रियं वरुणाय श्रुताय । वियोजघान
शमितेव वर्मोपस्थिरे पृथिवीं सूर्याय ॥ अरुणायनमः । २ ।
उपेससृक्षेवाजयोवचस्यां धानो दधीत नाद्यो गिरो मे ।
अपान्नपादाशु हेमाकुवित्स सुपेशस्कर ज्योतिषिषद्धि ।
पराध्योयनमः ॥ ३ ॥ इमं स्वसै हृदआसुतष्टं मन्त्रं वोचे मन्थ
विदस्यवेदत् । अपान्नपादसुर्यस्य मह्ना विश्वान्यर्यो भुवना
ज़जान । करीवृषभायनमः ॥ ४ ॥ आपो रेवती० आपः पृ-

णीत भेषजं वरूथं तन्वं मम । ज्योक्च सूर्यन्दृशे । खशुक्राय नमः ॥५॥ ततो यमकलशे ॥ यस्य कोष्टजगतः पार्थिवस्यैक इद्वशी । इमं भङ्गश्रवोगाय यो राजान परोध्यः । १ ॥ यमङ्गाय भङ्गश्रवो यो राजानपरोध्यः । येनापो नद्यो धन्वानि येन द्यौः पृथिवी दृढा । २ । हिरण्यकेशान्सुधुरान्हिरण्याक्षानयः शफान् । अश्वावनश्यतो दानं यमो राजाऽधितिष्ठति ॥ ३ ॥ यमायनमः ॥ ६ ॥ ततो यथाप्रेतसंख्यं प्रेतकलशेषु ॥ तिस्रो मातृस्त्रीन्पितृन्बिभ्रदेक ऊर्ध्वस्तस्थौ नेमवग्लापयन्ति । मन्त्रयन्ते दिवो अमुष्य पृष्ठे विश्वविदं वाचमविश्वमित्वा ॥ वेदचतुष्टयीषु । यो रुद्रो (वा) वषट्ते विष्ण । अग्निमीळे । इषेत्वोर्जे । अग्न आयाहि । शन्नो देवी । विष्णुपञ्चायतनदेवताभ्यः नमः । इन्द्रापर्वता । ऐन्द्राग्नं । अर्चन्तस्त्वा ॥ ॥ यजमानमानीय ॥ ॥ अनाभौ । "उदुत्यञ्जातवे" (पृ. १४१ पं. ११) इति सूक्तेन । "चित्रन्देवानां" (पृ. १४२ पं. ११) इति सूक्तेन च । न्यासः ॥

चित्रं पादयोः ॥ अपसर्पन्तु ते भूता ॥ प्राणायामः ॥ ॥ तीर्थे स्नेयं । वीर वीरेश देवेश नमस्तेऽस्तु त्रिधात्मक । महामार्तण्ड वरद सर्वाभयवरप्रद ॥ चाकाभगवत्यै गन्धादि ॥ यत्रास्ति माता । अद्यतावत् भवानी० महागणपतये । अग्नये ६ ह्रांह्रींसः सूर्याय ८ भवान्यै १० प्रभासहिताय आदित्याय सूर्याय १ दीप्तिस–रवये विवस्वते २ प्रकाशास–गभस्तयेऽर्काय ३ मरीचिस–भानवे आदित्याय ४ तापनीस–सवित्रे सवित्रे ५ पाचनीस–दिवाकरायाऽर्यम्णे ६ हव्यवाहास–धर्मराजाय सहस्ररश्मये ७ तेजोवतीस–तपनाय पूष्णे ८ शतधामास–भास्कराय मित्राय ९ वरुणधामास–सूर्याय भानवे १० पद्मगर्भास–त्वष्ट्रे हरिद्रथाय ११ छायास–स्वर्पतये हंसाय १२ निष्कलास–महामार्तण्डनाथाय १३ सूर्यायं अरुणायं पराध्यायँ करीवृषभार्यं खशुल्कायं यमायँ ॥ प्रेतभर्गाणां विष्णवे (वा) रुद्राय सानुचराय पृथिव्यै अग्नये ऋग्वे-

दाय ब्रह्मणे छन्दोभ्यः । अन्तरिक्षाय वायवे यजुर्वेदाय ब्रह्मणे छन्दोभ्यः । दिवे सूर्याय सामवेदाय ब्रह्मणे छन्दोभ्यः । दिग्भ्यः चन्द्रमसे अथर्ववेदाय ब्रह्मणे छन्दोभ्यः ॥ वासुदेवादिभ्यो विष्णुपञ्चायतनदेवताभ्यः । इन्द्राय वज्रहस्ताय तेजसे चण्डाय दीपोनमः ॥ अपसव्येन ॥ समस्तमातापितृभ्यः । दीपः स्वधा ॥ सव्येन । अद्यतावत् । पित्रे भर्गाय । समस्तप्रेतभर्गेभ्यः सूर्यमण्डलप्राप्त्यर्थे भर्गश्राद्धे दीपोनमः ॥ संवः सृजामि० । अश्विनोः । देहवद्देवन्यासः ॥ ॐभूः पुरुषमावा ३ । आदि ३ भास्क ३ विश्व ३ योगी ३ सूर्य ३ नमो ध ३ घृणिः ३ अद्यतावत् भवानी० महागणपतेः अग्नेः ६ ह्रांह्रींसः सूर्यस्य । भवान्याः । प्रभासहितस्यादित्यस्य सूर्यस्य । दीप्तिस–रवेः विवस्वतः । प्रकाशास–गभस्तेः अर्कस्य । मरीचिस–भानोरादित्यस्य । तापनीस–सवितुः सवितुः । पाचनीस–दिवाकरस्यार्यम्णः । हव्यवाहास–धर्मराजस्य

सहस्ररश्मेः । तेजोवतीस-तपनस्य पूर्ष्णः । शतधामास-मास्करस्य मित्रस्य । वरुणधामासहितस्य सूर्यस्य भानोः । पद्मगर्भास-त्वष्टुः हरिद्रथस्य । छायास-स्वर्पतेः हंसस्य । निष्कलास-महामार्तण्डनाथस्य । सूर्यस्य अरुणस्य पराध्यस्य करीवृषभस्य खशुल्कस्य यमस्य । समस्तप्रेतभर्गाणां । विष्णोः (वा) रुद्रस्य सानुचरस्य । पृथिव्याः अग्नेः । विष्णुपञ्चायतनदेवतानां । इन्द्रस्य वज्रहस्तस्य । तेजसः चण्डस्य । आत्मनो पितुर्भर्गस्य (पृ. १४४ पं. १०) सूर्यबलिविधानसङ्कल्पितभर्गश्राद्धे कलशपूजनं सूर्यपूजनं, कारणपूजनं चतुर्वेदेश्वरग्रहमण्डलक्षेत्रेश्वरपूजनमहं करिष्ये । तिलसर्षपयवान्विकीर्य ॥ एवमासनं अपत्येतो० आकृष्णेने० ध्रुवाद्यौ० ह्रांह्रींसःसूर्यस्य इदमासनं नमः ॥ महागणपतेः० तेजसः चण्डस्येदमासनंनमः ॥ महागणपतये । अग्नये । ह्रांह्रींसःसूर्याय । भवान्यै ॥ प्रभास-आदित्याय । तेजसे चण्डाय युष्मान्वः पूजयामि ॐपूजय । उदुत्यञ्जात० इया-

म्यग्निं० । महागणपतिं । अग्निं । ह्रांह्रींसः सूर्यं । भवानीं । प्रभासहितमादित्यं सूर्यं[1] । दीप्तिस० रविं विवस्वन्तं[2] । प्रकाशास० गभस्ति अर्कं[3] । मरीचिस० भानुं आदित्यं[4] । तापनी–सवितारं सवितारं[5] । पाचनीस० दिवाकरं अर्यमाणं[6] । हव्यवाहास० धर्मराजं सहस्ररश्मिं । तेजोवतीस० तपनं पूषणं[8] । शतधामास० भास्करं मित्रं[9] । वरुणधामास० सूर्यं भानुं[10] । पद्मगर्भास० त्वष्टारं हरिद्रथं[11] । छायास० स्वर्पतिं हंसं[12] । निष्कलास० महामार्तण्डनाथं[13] । सूर्यं अरुणं पराध्यं करीवृषभं खशुल्कं यमं[6] । समस्तप्रेतभर्गान् विष्णुं सानुचरं पृथिवीं अग्निं ऋग्वेदं ब्रह्माणं छन्दांसि । विष्णुपञ्चायतनदेवताः इन्द्रं वज्रहस्तं तेजसं चण्डं आवाहयिष्यामि ॐआवाह्य ॥ आवाहयाम्यहं देवं भानुं सर्वजगद्गुरुम्० । एहि सूर्य० । त्रैलोक्यं भू० ॥ ब्रह्माण्डगे० ॥ त्रयोदशकलशेषु । प्रभया सहितं देवमादित्यं तपतां वरम् । आवाहयामि यज्ञेऽस्मि-

न्पितृमुक्तिविधायकम् ॥ १। दीप्त्यान्वितं महाबाहुं रविं रक्षाविधायकम् । आवाहयामि० । २ । प्रकाशासहितं देवं गभस्तिं भूरितेजसम् । आवाहयामि० । ३ । मरीच्यासहितं देवं भानुमादित्यसंज्ञकम् । आवा० । ४ । तापनीसहितं देवं सवितारं सुवित्तरम् । आवा० । ५ । पाचनीसहितं देवं दिवाकरमरिन्दमम् । आवा० । ६ । हव्यवाहायुतं देवं धर्माधर्मविदां वरम् । आवा० । ७ । तेजोवतीयुतं देवं तापनं सर्वकामदम् । आवा० । ८ । शतधामायुतं देवं भास्करं भानुनायकम् । आवा० । ९ । वरुणधामया युक्तं सूर्यं सत्यपराक्रमम् । आवा० । १० । पद्मगर्भान्वितं देवं त्वष्टारं सदसत्पतिम् । आवा० । ११ । छायान्वितं महाबाहुं स्वर्पतिं रक्तवर्णकम् । आवा० । १२ । निष्कलासहितं देवं महामार्तण्डनायकम् । आवाहयामि यज्ञेऽस्मिन्पितृमुक्तिविधायकम् ॥ १३ ॥ कारणषट्कं । आवाहयामि तं सूर्यं भास्करं कामरूपिणम् । नानालङ्कार-

संयुक्तं सर्वकामफलप्रदम् ॥ १ ॥ आवाहयामि सद्भक्त्या स्वर्णवर्णसमप्रभम् । अरुणं चान्धकारघ्नं सर्वपापप्रणाशनम् । २ । आवाहयामि देवेशं पराध्यं रक्तवर्णकम् । कामदं सर्वपापघ्नं सर्वसिद्धिप्रदायकम् । ३ । करीवृषभनामानं सर्वदेवैः सुपूजितम् । आवाहयामि वरदं भक्तेभ्यः सर्वकामदम् । ४ । खशुल्कं देवदेवेशं सर्वसिद्धनमस्कृतम् । आवाहयामि सद्भक्त्या सर्वकामप्रदं शुभम् । ५ । सूर्यात्मजं च वरदं दण्डपाणिं सुरेश्वरम् । आवाहयामि सद्भक्त्या पितॄणां मुक्तिहेतवे ॥ ६ ॥ प्रेतकलशेषु । नानादेहगता विचित्रभुवने ब्रह्माण्डरन्ध्रोदरे नानाजात्यऽविलीनपापनिचयैश्चक्रभ्रमिं ये गताः । तान्सर्वान्स्वकुलोद्भवान्पितृगणानाऽवाहयेयं पुरः सम्प्रत्यच्युतशम्भुब्रह्मभुवनेष्वानन्दप्राप्त्यै सदा ॥ सूर्यप्रतिमायां । "घृणिः सूर्य" इति पुष्पत्रयम् ॥ यवतिलान्विकीर्य । प्राणायामः ॥ ततः पूर्ववत्पाद्यार्घ्याचमनमन्त्रस्नानैकविंशतिस्नानत्रयोदशस्नानश्लो-

कृतर्पणवस्त्रयज्ञोपवीतगन्धार्घपुष्पधूपदीपचामरछत्रादर्शवासोमधुपर्कप्रदक्षिणदक्षिणाश्च सम्पाद्य ॥ अक्षय्यं ॥ अद्यतावत् भवानीसमस्तमातापितॄणां स्वर्गप्राप्त्यर्थं कलशप्रीत्या—कलशदेवताः प्रीयन्तां ॥ एवं अद्यतावत् भवानी० पितुः भर्गस्य समस्तप्रेतभर्गाणां सूर्यमण्डलप्राप्त्यर्थं पातित्यदोषाऽभोज्यभोजनदोषाऽकार्यकरणदोषाऽविक्रेय्यविक्रीणनदोषाऽग्राह्यग्रहणदोषस्वजातिक्रियाविलोपनदोषजनितनानाविधनरकोत्तारणार्थं सूर्यबलिनिधानसङ्कल्पितभर्गश्राद्धे कलशप्रीत्या० सूर्यमण्डलप्राप्तिरस्तु ॥ प्रतिमायां ॥ पद्मगर्भापते भानो प्राप्तं पदमनामयम् । पितृभिर्भुवि भावेन सूर्यस्याक्षय्यमस्त्विदम् ॥ अद्यतावत् भवानी० पितुः भर्गस्य समस्तप्रेतभर्गाणां सूर्यप्रीत्या—सूर्यमण्डलप्राप्तिरस्तु ॥ त्रयोदशकलशेषु । प्रभापरिवृढादित्य देवदेव दयानिधे । अधुना त्वत्प्रसादेन पित्र्यमक्षय्यमस्त्विदम् ॥ अद्यतावत् प्रभासहितादित्यप्रीत्या—सूर्यमण्डलप्राप्तिरस्तु । १ । रवे त्रिभुवनव्यापिन्दीप्ति-

द्योतितविग्रह । ग्रहमण्डलमाणिक्य पित्र्यमक्षय्यमस्त्विदम् । अद्यतावत् दीप्तिसहितरविप्रीत्या सूर्यमण्डलप्राप्तिरस्तु । २ । प्रकाशाशक्तिकामात्मन् प्रशान्तकरणेश्वर । गभस्तेऽद्भुतचारित्र पित्र्य० ॥ अद्यता० प्रकाशासहितगभस्तिप्रीत्यासूर्यमण्डलप्राप्तिरस्तु । ३ । भानो भञ्जितसंसारदुर्ग दुर्गतिनाशन । मरीचिसमवेताङ्ग पित्र्यमक्षय्य० ॥ अद्य० मरीचिसहितभानुप्रीत्यासूर्यमण्डलप्राप्तिरस्तु । ४ । तापनीखेदिताशेषदिक्चक्रक्रमतः सदा । सवितः सदसद्रूप पित्र्य० ॥ अद्यतावत् तापनीस० सवितृप्रीत्यासूर्य० । ५ । पाचनीप्रियक्षेत्राऽऽप्तपुण्य भक्तप्रपूजित । दिवाकर नमस्तुभ्यं पित्र्य० । अद्य । पाचनीस० दिवाकरप्रीत्यासूर्यम० । ६ । धर्माधर्मभृतां धुर्य गुह्यवंशावतारकृत् । हव्यवाहासमाश्लिष्ट पित्र्य० । हव्यवाहास० धर्मराजप्रीत्यासूर्य० । ७ । तपनाकलिताखण्डरोदोमण्डलमण्डन । तेजोवतीस्फुरत्तेजः पित्र्यमक्ष० । तेजोवतीस० तपनप्रीत्यासूर्य० । ८ । शतधामापरिष्वक्त शतधामंस्त्रि-

धामक। प्रभो भास्कर देवानां पित्र्यमक्षय्य०। शतधामास० भास्करप्रीत्यासूर्य० ।९। पराक्रमणरोचिष्णो विश्वग्वरुणधामया । ब्रह्मविष्णुगिरीशात्मन् पित्र्य। वरुणधामास० सूर्यप्रीत्यासूर्य० ॥ १० ॥ पद्मबान्धव सज्जुष्टपद्मगर्भ गरीयसाम् । गरीयोऽतुलित त्वष्टः पित्र्यमक्षय्य०। पद्मगर्भास० त्वष्टृप्रीत्यासूर्य० । ११ । महामायामहाध्वान्तदूरीकरणपाटव। स्वर्पते स्फुरितच्छाय पित्र्य०। छायास० स्वर्पतिप्रीत्यासूर्यम० ॥१२॥ निष्कलादीप्तिदीप्तार्कमण्डलध्वान्तनाशन । मार्तण्डनाथ मुक्त्यर्थं पित्र्यमक्षय्यमस्त्विदम् ॥ अद्यतावत् भवानी० पितुः भर्गस्य समस्तप्रेतभर्गाणां सूर्यसायुज्यार्थे सूर्यबलिविधानसंकल्पितभर्गश्राद्धे निष्कलासहितमहामार्तण्डनाथप्रीत्या सूर्यमण्डलप्राप्तिरस्तु निष्कलासहितमहामार्तण्डनाथः प्रीयतां प्रीतोस्तु ॥१३॥ कारणकलशेषु ॥ पद्मगर्भापते भानो प्राप्तं पदमनामयम् । पितृभिर्भुवि भावेन सौरमक्षय्यमस्त्विदम् । अद्यतावत्

भवानी० पितुः भर्गतनुत्रस्य सूर्यप्रीत्या० सूर्यः प्रीतोस्तु सूर्यमं० ॥ १ ॥ प्रकाशाजीविताधीश सहस्रकिरणोज्वल । अतिसंशुद्धभावेनाऽरुणमक्षय्यमस्त्विदम् ॥ अरुणः प्रीतोस्तु सूर्यमं० ॥२॥ तापनीप्राणनाथाशु प्रेतैः प्राप्ता परार्ध्यता । तवानुग्रहणात्साक्षात्परार्ध्यमिदमक्षय्यम् ॥ अद्य । परार्ध्यः प्रीतोस्तु, सूर्यमण्डल० ॥ ३ ॥ प्रभापरिवृढादित्य प्रभावाच्चव भास्वतः । अधुना पितरो मुक्ताः करीवृषभमक्षय्यम् । करीवृषभः प्रीतोऽस्तु सूर्यमं० ॥ ४ ॥ निष्कलायत्तमार्तण्ड ब्रह्मविष्णुशिवात्मक । अस्मिन्महामखे पित्र्ये खाशुक्रमिदमक्षय्यम् ॥ खशुक्रः प्रीतोस्तु सूर्यमं० ॥ ५ ॥ केनाश प्रेतराट्क्रूर सूर्यलोकं समाश्रिताः । पितरस्त्वत्प्रसादेन याममक्षय्यमस्त्विदम् । यमः प्रीतोस्तु सूर्यमण्डलप्राप्तिरस्तु ॥६॥ यथाप्रेतसंख्यं पृथक् २ प्रेतकलशेषु॥ प्रेता गताः सूर्यलोकं भर्गरूपा दिवौकसः । अस्माकं वाञ्छितार्थास्ते पित्र्यमक्षय्यमस्त्विदम् ॥ अद्यतावत्

भवानी० पितुः भर्गतनुत्रस्य समस्तप्रेतभर्गाणां सूर्यमण्डल-प्राप्त्यर्थमिदमक्षय्यमस्तु ॥ अद्यतावत् । तेजश्चण्डप्रीत्या० तेजश्चण्डौ प्रीयेतां प्रीतौ भवेताम् ॥ पुष्पाणि कलशे ॥ तद्विष्णोः। प्रतिमायां, अस्य वामस्य ४ । त्रयोदश कलशेषु, उदुत्यञ्जा १३ चित्रं षट् सौर्यम् । चित्रन्देवानां[१३] ॥ कारणेषु ॥ इदन्तपथो वरुणं ॥ तत्र यमकलशे ॥ यस्य कोष्ट जगतो[३] । प्रेतकलशेषु यथासंख्यं ॥ तिस्रोमातृस्त्रीन्पि० ॥ ॥

अथाग्निकर्म ॥ पात्रं तिला । अग्निं परिसमुह्य ९ परिस्तीर्य । आदौपस्थ । अग्निकुण्डपूजा । अग्नये समनमत् । अपूपचरौ अग्नये ६ जुष्टं निर्वपामि । एवं प्रोक्षामि । इदं हविः ॥ आज्यदर्शनं । आत्मनो० भवानीभास्वती० । पितुः भर्गस्य सूर्यमण्डलप्राप्तये सूर्यबलिविधानसङ्कल्पितभर्गश्राद्धविधौ प्रायश्चित्तहोमे अग्नये वायवे[८] । अग्नये वैश्वानराय इदमाज्य-मर्पयामिनमः । आज्यभागान्ते कूष्माण्डंतद्ब्राह्मणं च हुत्वा अपूपचरुणा प्रधानानि ॥ तेजोऽसि । अग्नये[६] ॥ ऋतुतिथिः ।

...कामग्ने० । अग्ने त्वं पारयानव्य इति च । वैश्वानराय इति पावमान्यब्राह्मणेन चोपस्थानं ॥ यद्देवा देवहेळनमिति कुसुमाञ्जलिः । वैश्वानराय इति पूयमानब्राह्मणेन च तर्पणम् ॥ हुतमेक्षणम् ॥ आश्रावितं । विमुच्य । नयामि ॥ ॥ पुनरग्निं परिसमुह्य ९ परिस्तीर्य, आदौ पञ्च ॥ सावित्राणि महागणपतये । ह्रांह्रींसः सूर्याय । भवान्यै प्रभासहिताय आदित्याय १३ सूर्याय ६ प्रेतभर्गेभ्यः विष्णुपञ्चाय-तनदेवताभ्यः । इन्द्राय वज्रहस्ताय तेजसे चण्डाय जुष्टं निर्वपामि एवं प्रोक्षामि ॥ आज्यदर्शनं । आज्यभागान्ते ॥ निष्वसीद इत्यन्नहोमः । प्रधानानि । उद्वयन्तमसस्परि[६] । ह्रांह्रींसः सूर्यायस्वाहा । भवान्यैस्वाहा । उदुत्यञ्जा[१३] ॥ चित्र-न्देवानां[१३] ॥ अस्य वामस्य ॥ रदत्पथो ॥ यस्य कोष्ठ[३] ॥ तिस्रो मार्दृणी ॥ यथाप्रेतसंख्यं ॥ विष्णुपञ्चायतनदेवताभ्यः । इन्द्रा पर्वता ॥ एवमाज्यहोमः । तर्पणं । अनेन आत्मनो० भवानी०पितुः भर्गतनुत्रस्य समस्तप्रेतभर्गाणां सूर्यमण्डल-

प्राप्त्यर्थं भर्गश्राद्धनिमित्तं महागणपतिः । ह्रांह्रींसःसूर्यः भवानी[10] । प्रभासहित आदित्यः सूर्यः । दीप्तिसहितो-रविः विवस्वान् । प्रकाशास० गभस्तिरर्कः । मरीचिस० भानुः आदित्यः । तापनीस० सविता सविता । पाच-नीस० दिवाकरः अर्यमा । हव्यवाहास० धर्मराजः सह-स्ररश्मिः । तेजोवतीस० तपनः पूषा । शतधामास० भा-स्करः मित्रः । वरुणधामास-सूर्यः भानुः । पद्मगर्भास० त्वष्टा हरिद्रथः । छायास स्वर्पतिः हंसः । निष्कलास-महा-मार्तण्डनाथः । सूर्यः अरुणः पराध्यः करीवृषभः खशुक्रः यमः समस्तप्रेतभर्गाः विष्णुपञ्चायतनदेवताः । इन्द्रः वज्रहस्तः । तेजः चण्डः । अन्नाज्याहुतिभिः प्रीयन्तां प्रीताः सन्तु ॥ विष्णुपञ्चकं तर्पणं । अथ यवतिलहोमः । गायत्रीब्राह्मणम् तर्पणं । अध्वर्योयं वषट्ते तावत् । प्रधानं । उद्वयन्तम (पृ० १६६) मार्तण्डब्राह्मणं ह्रांह्रींसः सूर्याय-स्वाहा । मलिम्लुचब्राह्मणं भवान्यै १० ॥ उदुत्यञ्जातं

(पृ. १४१) चित्रन्देवानां (पृ. १४२) अस्य वामस्य ४ तर्पणं । अनेन भवानीपितुः भर्गतनुत्रस्य समस्त सूर्य-सायुज्यार्थे महागणपतिः । ह्रांह्रींसः सूर्यः भवानी प्रभा-सहितः आदित्यः सूर्यः १३ खशुल्कः प्रीताः सन्तु ॥ रदत्पथो (पृ. १६८) "अग्निमीळे पुरोहित"मित्यभ्या-दित्यसूक्तं हुत्वाऽथ द्विगुणमभ्यादित्यसूक्तं यजेत् ॥

"अथ द्विगुणमभ्यादित्यसूक्तम्" वया इत्सप्त वैश्वानरीयं वह्नि पश्चास्मा इदं षोडश ॥ वया इदग्ने अग्नये यस्ते अन्येत्वे विश्वे अमृता मादयन्ते । वैश्वानर नाभिरसिक्षितीनां स्थूनेव जना उपसिद्ययन्था । मूर्धा दिवो नाभिरग्निः पृथिव्या अथा-भवदऽराती रोदस्योः । तंत्वा देवासो जनयन्त देवं वैश्वा-नरज्योतिरिदार्याय । आसूर्येन रश्मयो ध्रुवासो वैश्वानरे दधिरेऽग्नावसूनि । या पर्वतेष्वोषधीष्वप्सु या मनुष्येषु सितस्य राजा । बृहती इव सूनवे रोदसी गिरो होता मनुष्यो न दक्षः । स्ववर्ते सत्यशुष्माय पूर्वे वैश्वानराय

नृतमाय यह्वीः । दिवश्चित्ते बृहतो जातवेदो वैश्वानर प्ररिरिचे महित्वम् । राजा कृष्टीनामसि मानुषीणां युधा देवेभ्यो वरिवश्चकर्थ । प्रनू महित्वं वृषभस्य वोचं यं पूरवो वृत्रहणं सचन्ते । वैश्वानरो दस्युमग्निर्जघन्वाँ अधू-नोत्काष्ठा अवशम्बरम्भेत् । वैश्वानरो महिम्ना विश्वकृष्टि भारद्वाजेषु यजतो विभावा । शातवनेये शतिनीभिरग्निः पुरुणीथे जरते सूनृतावान् । वह्निं यशसं विदथस्य केतुं सुप्राव्यन्दूतं सद्यो अर्थम् । द्विजन्मानं रयिमिव प्रशस्तं रातिं भरद्भृगवो मातरिश्वा । अस्य शासुरुभयासः सचन्ते हविष्मन्त उशिजो ये च मर्त्ताः । दिवश्चित्पूर्वो न्यसादि होता पृच्छयो विश्पतिर्विक्षु वेधाः । तं नव्यसी हृद आ-जायमानमस्मत्सुकीर्तिर्मधुजिह्वमश्याः । यमृत्विजो वृजने मानुषासः प्रयस्वन्त आयवो जीजनन्त । उशिक्पावको वसुर्मानुषेषु वरेण्यो होता धायि विक्षु । दमूना गृहपतिर्दम आँ अग्निर्भुवद्रयिपती रयीणाम् । तन्त्वा वयं पतिमग्ने-

धीनां प्रशंसासो मतिभिर्गोतमासः । आशुमवाजम्भरः सर्जयन्तः प्रातर्माक्षू धिया वसुर्जगम्यात् ॥ अथ यजुः ॥ (अग्निर्वृत्राणि ते अनूचमाणो ब्रह्मणः) अग्निर्वृत्राणि जङ्घ- नद्द्रविणस्युर्विपन्यया । समिद्धः शुक्र आहुतः ॥ त्वं सोमासि सत्पतिस्त्वं राजोत वृत्रहा । त्वं भद्रो असि क्रतुः ॥ अग्नेयं यज्ञमध्वरं विश्वतः परिभूरसि । स इद्दे- वेषु गच्छति ॥ लन्नः सोम विश्वतो रक्षा राजन्नघायतः । न रिष्ये त्वावतः सखा ॥ सत्वं विप्रास दाशुषे रयिन्देहि सहस्रिणम् । अग्ने वीरवतीमिषम् ॥ वृषा सोम द्युमांअसि वृषादेव वृषव्रतः । वृषा धर्माणि दधिषे ॥ आनो अग्ने सुचेतना रयिं विश्वायुः पोषम् । मृळीकन्धेहि जीवसे ॥ गयस्फानो अमीवहा वसुवत्पुष्टिवर्धनः । सुमित्रासो मनो- भव । त्वमग्ने सप्रथा असि जुष्टो होता वरेण्यः । त्वया यज्ञं वितन्वते ॥ त्वं सोम महे भगं त्वं यून ऋतायते । दक्षन्ददासि जीवसे ॥ अग्ने रक्षाणो अंहसः प्रतिष्म देव

रीषतः । तपिष्ठैरजरो दह ॥ अग्ने नक्षत्रमजरमासूर्यं रोहयो दिवि । दधज्ज्योतिर्जनेभ्यः ॥ आदित्प्रत्नस्य रेतसो ज्योतिष्पश्यन्ति वासरम् । परो यदिध्यते दिवा ॥ अग्निः प्रत्नेन मन्मना शुम्भानस्तनुं स्वाम् । कविर्विप्रेण वावृधे ॥ सोमयास्ते मयोभुव ऊतयः सन्ति दाशुषे । ताभिर्नोऽविता भव "अप्स्वग्ने" अप्सु मे सोमो अब्रवीदन्तर्विश्वानि भेषजा । अग्निं च विश्वशम्भुवम् ॥ अग्नी रक्षांसि सेधति शुक्रशोचिरमर्त्यः । शुचिष्पावक ईड्यः ॥ एह्यूषु ब्रुवाणि तेऽग्न इत्थेतरागिरः । एधि वर्धास इन्दुभिः ॥ इमं यज्ञमिदं वरो जुजुषाण उपागहि । सोम त्वन्नो वृधे भव ॥ उदग्ने शुचयस्तव न्यशिज्ञातवेदसम् । होत्रवाहं य्यविष्ठ्यम् । दधाता देवमृत्विजम् । अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम् । होतारं रत्नधातमम् ॥ सोम गीर्भिष्ट्वा वयं वर्धयामो वचोविदः । सुमृडीको न अविश इत्यग्न्यादित्यसूक्तं द्विगुणम् ॥ "तिस्रो मातॄ"रिति हुत्वा ॥

श्राद्धब्राह्मणं । उदीरतां० इति स्वाध्यायब्राह्मणं सन्ध्या-ब्राह्मणं पावमानीब्राह्मणं च हुत्वा ॥ तत्रैव ॥ उदुत्यञ्जा इति सूक्तेन स्रुवेणाज्यहोमः । तर्पणं अनेन प्रेतभर्गाः प्रीयन्तां प्रीताः सन्तु ॥ पुनरपि यवतिलेन विष्णुपञ्चायतनमनु इन्द्रापर्वता यथाविस्तरं ऋग्वेदयजुर्वेदयोश्च सूक्तानि हुत्वा । ऐन्द्राग्नं तर्पणं । भगवान् वासुदेवः । इन्द्रः । वज्रहस्तः । तेजः । चण्डः । प्रीताः सन्तु ॥ तदनु रुद्रपञ्चकं तर्पणं । देवीपञ्चकं तर्पणं । रक्षोघ्नमंत्राः । तर्पणं ॥ ऋतुतिथिः । नैवेद्यं । आश्रावितंतावत् गोप्रदानं शय्यादानं अश्वदा॰ ततो अग्नेर्यविष्ट ब्राह्मणपूजनं ॥ ॐ भूः पुरुषमावाहयामिनमः आदि । भास्क । योगी । विश्व । अद्यता भवानी० ह्रां-ह्रींसःसूर्यस्य । भवान्याः । अग्नेः । प्रभासहितस्यादित्यस्य सूर्यस्य । सूर्यस्य । इन्द्रादीनां आत्मनो पितुः भर्गस्य समस्त० सूर्यमण्डलप्राप्त्यर्थं पातित्यदोष । अग्नेर्यविष्ठब्राह्मणपूजन-महं करिष्ये । गन्धादि अक्षय्यंविना विसृज्य । आश्रावितं ।

विमुच्य। नयामि॥ ततो वैश्वदेवादि नित्यकर्म कुर्यात्। धर्मं धेहि। भगवन्यक्ष्म। कण्ठोपवीती। सनकादय ऋषयः॥

अथ भर्गश्राद्धमारमेत्॥ सव्येनैव सर्वं कुर्यात्। अत्र प्राङ्मुखांस्त्रयोविंश विप्रान् उदङ्मुखान्सप्तोपवेशयेत्॥ सूर्यरूपं प्रेतं ध्यात्वाऽऽचम्य॥ ॐभूः पुरुषमावा ३ आदिदेवा। भास्क। विश्व। योगी। सूर्य। नमोध। घृणिः ३ अद्यतावत् भवानी॰ प्रभास-आदित्यस्य सूर्यस्य १३ सूर्यस्य ६ पितुः भर्गस्य समस्त। सूर्यसायुज्यप्राप्त्यर्थं (पातित्यदोषाऽभोज्यभोजनदोषाऽकार्यकरणदोषाऽविक्रेय्यविक्रेणनदोषाऽग्राह्यग्रहनदोषस्वजातिक्रियाविलोपनदोषजनितनानाविधनरकोत्तारणार्थे) सूर्यबलिविधानसङ्कल्पिते भर्गश्राद्धे ब्राह्मणपूजनमर्चामहं करिष्ये। तिलसर्षपयवान्विकीर्य॥ आदौ प्राङ्मुखब्राह्मणपूजनं। प्रभास-आदित्यस्य सूर्यस्येदमासनं नमः १३ प्रभास-आदित्याय सूर्याय १३ भर्गश्राद्धे त्वां भोजयामि। प्रभास-आदित्यं सूर्यं १३ आवाहयि-

ष्यामि । एवं पाद्यार्घ्यगन्धपुष्पधूपदीपयज्ञोपवीतवासोऽर्घ्य-
दानाद्यर्चनविध्यन्तम् ॥ तत उदङ्मुखब्राह्मणपूजनं ॥ सूर्य-
स्येदमासनं नमः ६ पितुः भर्गस्येदमासनं नमः यथाप्रेत-
संख्यं । एवं पाद्यार्घ्यगन्धपुष्पधूपदीपवासः । तत्र प्राङ्मु-
खेषु पुष्पाणि । उदुत्यञ्जा १३ । उदङ्मुखेषु रदत्पथो ५ ।
यमब्राह्मणे यस्य कोष्ट ३ प्रेतब्राह्मणे, "तिस्रो मातृः" यथा-
प्रेतसंख्यं ॥ सूर्यस्य ६ अर्घ्यदानाद्यर्चनविधिः सर्वः परि-
पूर्णोस्तु ॥ ततः प्रभास-आदित्याय सूर्याय १३ इदमन्नं
भृतमभिघार्य । तथा सूर्याय ६ भृतमभिघार्य । प्रक्षाल्या-
ऽग्रतो मेक्षणमवदधाति । प्रणवं मनसा ध्यात्वा । क्षीरं घृतं
वासिच्य । प्रभासहिताय आदित्याय सूर्याय । क्षीरं घृतं
वाषिच्य ॥ प्रभास-आदित्याय सूर्यायाऽन्नं नमः २ एवं
१३ अन्नं मधु २ प्रभास-आदित्य। सूर्य । इदं रक्षस्व एवं
१३ । प्रभास-आदित्याय सूर्याय १३ यथोपस्थितं । न-
मोदेवेभ्यः ॥ ततः सूर्याय ५ अन्नं नमः २ अन्नं मधु

२ । सूर्य अरुण ५ इदं रक्षस्व (वामतः सूर्यस्यान्नपिण्डं नान्येषां) सूर्याय ५ यथोपस्थितं ॥ एवं यमायाऽन्नं नमः २ अन्नं मधु २ यम इदं रक्षस्व । यमाय यथोपस्थितं । एवं च पित्रेभर्गाय समस्तप्रेतभर्गेभ्यः भर्गश्राद्धे अन्नं नमः २ अन्नं मधु २ प्रेतभर्गा इदं रक्षध्वम् । समस्तप्रेतभर्गेभ्यः यथोपस्थितं । नमोदेवेभ्यः ॥ शन्नोदेवी । सूर्याय ५ यमाय । पित्रे भर्गाय समस्त० भर्गश्राद्धे अपोशानं नमः । अमृतेन सह भोक्तव्यं असुरा निवर्तन्तां सूर्यादीनि कारणान्यागच्छन्तु ॥ ॐभूर्भुवः स्वस्तत्स० । मधुवाता । अन्तश्चरसि भूतेषु० ब्रह्मार्पणं० ॥ इति पठित्वाऽथ पिण्ड-दानविधिः ॥ दक्षिणान्दर्भानास्तीर्य । शन्नोदेवी । सूर्याय६ पित्रे भर्गाय समस्त । भर्गश्राद्धे भूपृष्ठे दर्भास्तरणे० अव-नेजनं नमः । अन्नमुद्धृत्य स्थाल्याः । तिलास्तोयं । सव्यं जानुं भूमौ निधाय यथा । ॐभूःपुरुषमावाहयामिनमः ३ आदि । भास्क । विश्व । योगी । सूर्य । नमोध । घृणिः

३ अद्यतावत् भवानी० भगवन्सूर्य एषते पिण्डोनमः । अप उपस्पृश्य । एवं अरुण एषते । पराध्र्य एषते । करीवृषभ एषते । खशुल्क । यम । पितः भर्गतनुत्र एषते पिण्डोनमः । एवं यथा प्रेतसंख्यं सप्त २ प्रत्येकस्य पिण्डान्दत्वा ॥ ये लुप्तपिण्डाः पितरोस्मदीया गर्भे प्रणष्टा जलभूमिमग्नाः । ते तृप्तिभाजः पररूपयुक्ताः पापैर्विमुक्तास्त्रिदिवं प्रयान्तु ॥ आमगर्भेभ्यो लुप्तपिण्डेभ्यो नमः ॥ सूर्याय६ वासोनमः वीरान्नंनमः लेपं निवार्य । सूर्याय ६ समालभनं गन्धोनमः पित्रे भर्गाय गन्धोनमः एवं पुष्पार्घधूपदीपभक्ष्यभोज्यतिलमधुमिश्रोदकपात्रहिमपानादि । वसन्तायनमः इत्यादि च समाप्य । शन्नोदेवी० । ऊर्जं देवेभ्यः सुभगा मनुष्या उत ऊर्जं पितृभ्यो अष्टि । ऊर्जं दधात्वाविवेश ऊर्जांसि नमस्कारं करोमिनमः ॥ ततः प्रेतपिण्डेषु पुष्पं क्षिपेत् । उद्यन्तं त्वामित्रमह आरोहन्तं० ॥ ॥ अथ सपिण्डीकरणं ॥ ॥ तत्र प्रेतपिण्डस्याऽष्टधा विभागः ॥ तदर्थं

रौप्यमयतूलिकाः पञ्च, सुवर्णताम्रमयतूलिकास्तिस्रः कार्याः ॥ ताभिः "पार्थिवोभागः, आपोभागः, तैजसोभागः, वायवोभागः, आकाशोभागः, मानसो भागः, बौद्धोभागः, आहङ्कारिकोभागः, इत्थमष्टधा कृत्वा ॥ तत्र शुक्लद्वादश्यां सूर्यबलिश्चेत्तदा 'पाञ्चभौतिकाः पिण्डभागाः पञ्च सूर्यपिण्डे मेलनीयाः । मनोबुद्ध्यहङ्कारात्मिकास्त्रयः स्वशुक्लपिण्डे मेलनीयाः ॥ कृष्णामावस्यायां चेत्तदा पाञ्चभौतिकभागान् स्वशुक्लपिण्डे मेलयेत् । अवशिष्टपिण्डभागास्त्रयो यमपिण्डे मेलनीयाः ॥ अथ अष्टधाऽहं करिष्ये इतिपृष्ट्वा ॐकुरुष्व इत्याज्ञां गृहीत्वा । "रौप्यतन्तुना" शाब्दोभागः स्पार्शोभागः, रौपोभागः, रासोभागः, गान्धोभागः ॥ "सौवर्णतन्तुना" मानसोभागः "ताम्रेण" बौधोभागः, आहङ्कारिकोभागः ॥ (मधुचाज्यं जलं चार्घः पुष्पं गन्धविलेपनम् । बलिं दद्याच्च विधिवत्पिण्डोऽष्टाङ्गः प्रकीर्तितः) ॥ मेलापनमंत्रः ॥ संसृजतु त्वा पृथिवीर्वायु-

रग्निः प्रजापतिः संसृजध्वं पूर्वेभिः पितृभिः सह । ये समानाः सुमनसः पितरो यमराज्ये । तेषां लोके स्वधा नमो यज्ञो देवेषु कल्पताम् । ये समानाः सुमनसो जीवा जीवेषु मामकाः । तेषां श्रीर्मयि कल्पतामस्मिंल्लोके शतं समाः । समाना वः आकूतानि समाना हृदयानि वः । समानमस्तु वो मनो यथा वः समहासति । संवो मनांसि संव्रताः समुचितान्यकरत् । अमी ये विव्रताः स्थ नस्तान्वः सन्नमयामसि ॥ संसृष्टं वसुभी रुद्रैर्वीरैः कर्माण्यासद । हस्ताभ्यां मृद्वीं कृत्वा सिनीवाली करोतु ताम् । सिनीवाली स्वकर्मपास्वकरीरा सुपसा । सा तुभ्य-मदिते मह्य उखान्दधातु हस्तयोः । उखाङ्करोतु शक्त्या बाहुभ्यामदितिर्धिया । माता पुत्रं यथोपस्थे साग्निं बिभर्तु गर्भ आ । इत्येकपिण्डीकृत्वा ॥ ॐभूःपुरुषमावाह २ । ॐभूर्भुवः स्व २ आदि २ भास्क २ विश्व २ योगी २ सूर्य २ नमो २ घृणिः २ अघतावत् भवानी पितरं

भर्गतनुत्रं शब्दस्पर्शरूपरसगन्धात्मकं पञ्चवृत्तं शुल्कं भग-
वन्सूर्य गृहाण नमः । अप उपस्पृश्य ॥ पुनः संसृजतु
त्वा-साग्निं विभर्तु गर्भ आ) ॥ ॐभूः पुरुषमावाहेत्यादि
अद्य तावत् पितरं भर्गतनुत्रं मनोबुद्ध्यहङ्कारात्मकं त्रिवृत्तं
शुल्कं भगवन्‌खशुल्क गृहाणनमः ॥ अपउपस्पृश्य ॥ पित्रे
भर्गतनुत्राय पञ्चवृत्ताय सूर्याय वासोनमः वीरान्नंनमः ।
पित्रे भर्गतनुत्राय त्रिवृत्ताय खशुल्काय वासोनमः वीरा-
न्नंनमः ॥ पिण्डलेपं निवार्य । पित्रे भर्गाय पञ्चवृत्ताय
सूर्याय, त्रिवृत्ताय खशुल्काय गन्धार्घपुष्पधूपदीपभक्ष्यभोज्य-
तिलमधुहिमपानादि । वसन्तायनमः ॥ शन्नो देवी । ऊ-
र्जांसि नमस्कारः ॥ इतिशुक्लद्वादश्यां ॥ अमावास्यां तु ।
पितरं भर्गतनुत्रं शब्दस्पर्शरूपरसगन्धात्मकं पञ्चवृत्तं
शुल्कं भगवन्‌खशुल्क गृहाण नमः ॥ अप उपस्पृश्य ॥ एवं
पितरं भर्गतनुत्रं मनोबुद्ध्यहङ्कारात्मकं त्रिवृत्तं शुल्कं भग-
वन् यम गृहाणनमः । अप उपस्पृश्य । पित्रे भर्गतनुत्राय

पञ्चवृताय सशुल्काय वासोनमः वीराश्रं नमः । उभयोः । गन्धार्घपुष्पधूपदीपबल्युदकपात्रादिहिमपानादि । आचम्य, वसन्तायनमः । शन्नो देवी । ऊर्जं देवेभ्यः सुभगा मनुष्या उत ऊर्जं पितृभ्यः । अग्निरूर्जं दधातु आविवेश ऊर्जासि नमस्कारं करोमिनमः ॥ लुप्तपिण्डे पुष्पं ॥ येकेचिन्मानुषे लोके लुप्तपिण्डोदकक्रियाः । तेषां त्वदग्रे दत्तेन पिण्डेनास्तु दिवाकर । परातृप्तिः परं सौख्यं स्वर्गे प्राप्तिरनुत्तमा ॥ कृतदुष्कर्मणां नृणां मोक्षदो भव भास्कर । इति तत्तेजः सूर्यमण्डलगतं ध्यायेत् ॥ ॥ ततो बहिर्मण्डलमुपलिप्तायां सूर्यस्योपस्थानं । अद्यतावत् भवानी० पितुः भर्गतनुत्रस्य समस्त० भर्गश्राद्धनिमित्ते "भगवन्सूर्य प्रभातीर्थे प्रह्वीभूतस्य प्रशान्तिमयीं प्रकृतिं प्रापितस्य विमलोद्योततमे स्वमण्डले ब्रह्मवर्चसं साक्षात्कुरुष्विति" ह्रांह्रींसःसूर्याय प्रकाशरूपाय परमार्थसाराय प्रत्यक्षदेवाय विश्वधर्त्रे नरकोत्तारणाय निष्कलासहिताय

महामार्तण्डनाथाय, महाश्वेतासहिताय परमार्थरूपाय प्राणरूपाय हृदाकाशस्थिताय परमतेजोरूपिणे सूर्याय विभ्राजाय वै नमोनमः ॥ इत्युपस्थानम् ॥ ॥ अथ सूर्यसंमुखं खे पुष्पाणि क्षिपेत् ॥ कालात्मन् सर्वभूतात्मन् विश्वात्मन्विश्वतोमुख । यस्मादग्नीन्दुरूपस्त्वमतः पाहि प्रभाकर ॥ वीर वीरेश देवेश नमस्तेऽस्तु त्रिधात्मक । महामार्तण्ड वरद सर्वाभयवरप्रद ॥ त्वमेव सप्तधा भूत्वा छन्दोरूपेण भास्कर । यस्माद्भासयसे लोकान् पाहि नोऽतः प्रभाकर ॥ नमोनमः पापविनाशनाय विश्वात्मने सप्ततुरङ्गमाय । धाम्नामधीशाय भवाभवाय पापौघदावानलशान्तिकर्त्रे ॥ जातवेदप्रका० । नमस्ते देवदेवेश वेदाहरणलुम्पट । वाजिरूपेण मामस्मात्पाहि संसारसागरात् ॥ नमो धर्मनि० । ऋतञ्च सत्यञ्चा० । चित्रन्देवाना० । तरणिर्वि० । दिवोरुक्म० । मित्रो जनान्या० । "इतिपठन्," भगवन् सूर्याऽमुं पितरं भर्गतनुत्रं स्वमण्डलं प्रापय ३ नमः । यथा-

नैवसंख्यं एवं कुर्यात् इति पुष्पाक्षेपणम् ॥ ततो मा मेक्षेष्ठा० । नैवेद्यम् । सर्वमन्नमुपादाय० । भर्गश्राद्धं कच्चित्सम्पन्नं भोः सुसम्पन्नं तृप्यन्तु भवन्तः तृप्ताः स्मः । शेषमन्नं मित्रभृत्यजनैः सार्धं पश्चाद्भुञ्जीत वाग्यतः ॥ आचम्य ॥ सूर्याय ६ आचमनीयंनमः पित्रे भर्गायाचममीयंनमः । प्रभास० आदित्याय सूर्याय १२ आचमनीयंनमः । अर्धप्रदक्षिणं कृत्वा प्रत्येत्य ॥ यो विश्वमाद्यं भुवनस्य गोप्ता येनेदं विश्वं सचराचरं च । स वै देवो यजमानं च मां च या दक्षिणा सर्वमेतत्पुनातु । इति । शन्नोदेवी । सूर्याय ६ दक्षिणा ॥ प्रभास-आदित्याय सूर्याय १२ दक्षिणा ॥ ततो क्षेत्रेशबलिः । प्रतिमायां त्रयोदशकलशेषु कारणकलशेषु च पुच्छां सम्पाद्य ॥ ॐभूःपुरुषं विसर्जे । ३ सर्वा गायत्रीः । अग्रतावत् भवानी०ह्रांह्रींसःसूर्यस्य भवान्याः । प्रभास-आदित्यस्य सूर्यस्य १२ सूर्यस्य ६ प्रेतभर्गाणां आत्मनो० पितुः भर्गतनुत्रस्य समस्त० सूर्यमण्डलसायुज्यार्थे दशविधपापनि-

ऽकृत्यर्थं भर्गश्राद्धे सूर्यप्रतिमापूजनं कलशकारणपूजनं सूर्य-कारणकलशपूजनमच्छिद्रं। यवोदकंनमः। प्रतिमायां। आप-ओसि ॥ नमोस्तु सूर्याय सहस्ररश्मये सहस्रसंख्यामित-सम्भवात्मने। सहस्रयोगाद्भुतभोगभोगिने सहस्रसंख्या-युधधारिणे नमः ॥ विश्वाय विश्वरूपाय विश्वधाम्ने स्वय-म्भुवे। नमोऽनन्ताय ते धात्रे विश्वकर्त्रे नमोनमः ॥ दण्डवज्रभुजगान्करैर्गदां बिभ्रतोऽरुणरुचीन्सकङ्कटान्। स्वानुरूपदयितांस्त्रिलोचनान्नौमि पङ्कजगतानिह भास्क-रान् ॥ नमोनमो पाप (पृ. १९६–९) वीर वीरेश० । पीतारुणश्मश्रुधरस्त्रिनेत्रः खड्गं तथा खेटकमावहंश्च । दण्डं तथा पिङ्गलनिष्कलायुध्मार्तण्डनाथो दुरितं हरेन्मे ॥ सव्ये खड्गाक्षसूत्रा सकलशनलिनी जाह्नवी कूर्मरूढा वामे पाशाङ्कुशाङ्का मकररथगता सूर्यजा कुम्भयुक्ता। धर्माधर्मौ च पार्श्वेऽरुणरथसचिवश्चक्षुषी द्वे च यस्य सोयं मार्तण्ड-नाथो हरतु च दुरितं भर्गरूपो महेशः ॥ जातवेद० ।

जन्मान्तरेषु सकलेषु यदर्जितं वै पापं मयाऽत्र सकलेष्वपि कस्यचिच्चे । सर्वं तदद्य परभास्कर संहराशु संसारसागरभयात्परिपाहि भक्तान् ॥ नमः सवित्रे जगदेकचक्षुषे जगत्प्रसूतिस्थितिनाशहेतवे । त्रयीमयाय त्रिगुणात्मधारिणे विरिञ्चिनारायणशङ्करात्मने ॥ अयोदशकलशेषु ॥ सूर्यो दिवस्पतिस्त्राता प्रजानां पूर्वपूजितः । नरकेभ्यः समुद्धृत्य पितॄणां मोक्षदोऽस्तु मे ।१। विवस्वान्भर्गज्येष्ठश्च श्रेष्ठो विष्णुः प्रजापतिः । जीवरूपो जगद्योनिः पितॄणां० ।२। अर्कोऽग्र्यो दिननाथस्तु कृतपुण्यनमस्कृतः । जनानां पापहारी च पि० । ३ । आदित्यो विश्वव्यापी च दृष्टिकृज्ज्ञानशोधकः । पद्मानां तोषकृद्देवः पि० । ४ । सवितुस्तद्वरेण्यं हि परं ज्योतिर्हृदम्बुजे । धृतं योगीश्वरैर्यस्य सोस्तु मे पितृतारकः । ५ । सहस्ररश्मिः संवेद्यः सर्वव्यापी तु सर्वदः । सर्वकृत्सर्वधारी च पि० । ६ । पूषा पुष्टिकरो देवो जगत्त्राता दयानिधिः । कालकर्ता

परंब्रह्म पि० । ७ । मित्रो मित्रं हि भक्तानां वेदाहरणलु-
म्पटः । वाजिरूपेण देवेशः पि० । ८ । भानुस्तमोऽपह-
न्भाभिर्बाह्यतोऽन्तर्गतं च यत् । स देवो देवतादेवः पि०
। ९ । हरिद्रथः सुसंपूज्यो विधिनानुक्रमेण च । कर्तृणां
विभवं दास्यन् पि० । १० । खचरः कमलारूढः शिपि-
विष्टः कलानिधिः ।जलपाशधरो हंसः पितृणां० । ११ ।
मार्तण्डो मृतकत्राता स्रष्टा वेदनिधिः परः । द्वादशात्मा
सुराध्यक्षः पि० । १२ । नागाभ्यां चाकया युक्तो महा-
मार्तण्ड एव च । एताभिः शक्तिभिश्चैव पितृणां मोक्ष-
दोऽस्तु मे ॥ १३ ॥ कारणकलशेषु सप्तसु । सूर्यस्तेजो-
निधिर्विष्णुर्ब्राह्म्याद्यैः पूजितो भुवि । जगतां निहतध्वान्तः
पितृणां मोक्षदोस्तु मे । १ । अरुणो विश्वव्यापी च स-
हस्रकिरणो रविः । योगिनां हृदयस्थायी पितृणां । २ ।
परार्घ्यः सदसत्साक्षी सप्ताश्वो भक्तवत्सलः । चित्रभानुः
परंज्योतिः पितृणां० । ३ । करीवृषभनामासौ देवासुरनम-

स्कृतः । भक्तानां दत्तलक्ष्मीकः पि० । ४ । खशुल्कस्तै-
ज्रसो बन्धुः पद्मानां वरदो भुवि । तमोहर्ता वेदनिधिः
पितॄणां मोक्ष । ५ । रमो यमस्य जनको यमिनां हितहृत्सदा ।
यज्वनां यज्ञरूपश्च पि० । ६ । भर्गनाथः प्रजानाथो हर्ता
पापस्य दम्भिनाम् । आदित्यो हतदैत्येशः पितॄणां मो । ७ ॥
ये लुप्तपिण्डाः० । नमो धर्म० पतितस्य नि० । उद्यन्तन्त्वा-
मित्र मह आरो० । आह्वानं । नमो ब्रह्मणे । उदङ्मुख-
विप्रेषु सूर्यादिकलशान् क्रमेण प्रतिपादयेत् ॥ सावित्राणि
अद्यतावत् भवानी पितुः भर्गतनुत्रस्य सूर्यसायुज्यप्राप्त्यर्थं
भर्गश्राद्धे भगवते सूर्याय इमं सूर्यकलशं सहिरण्यं सवा-
सर्सं साम्रं सोदकं ददानि ३ ॥ क इदं कस्मा अदात्कामः० ।
एवं "अरुणाय" इत्यादिभ्यः ६ ॥ ततः पूर्वमुखेभ्यो विप्रेभ्य-
स्त्रयोदशकलशान् ॥ सावित्राणि अद्यतावत् भवानी
न्दभैरवं देवं सर्वकामफलप्रदम् ॥ ध्यायेद्वै यस्तु युक्तात्मा क्षिप्रं सिद्ध्यति मानवः । पूर्वं या सा मया ख्याता अघोरा शक्तिरुत्तमा ॥ यादृशं भैरवं रूपं तस्यास्तादृशमेवहि । भैरवं पूजयित्वा तु तस्योत्सङ्गगतां स्मरेत् ॥ ईषत्करालवदनां गम्भीरविपुलस्वनाम् । प्रसन्नास्यां सदा ध्यायेद्भैरवीं विस्मितेक्षणाम् ॥ नौम्यऽहंतां परब्रह्ममहिषीं चित्स्वरूपिणीम् । चराचरस्वरूपेण संस्थितां भक्तवत्सलाम् ॥ ॐहुंनिष्कलस्वच्छन्दभैरवायस्वाहा १०८ ह्रांह्रींहूं इत्यङ्गानि । स्वशान्तं निष्कलं शुद्धं सर्वव्यापि निरञ्जनम् । चिद्बोधानन्दगहनं तेजसामाश्रयं भजे ॥ ॐह्रींश्रींलक्ष्मीवासुदेवायस्वाहा १०८ ॐह्रांह्रीमित्यङ्गानि । पूर्णेन्दुवदनं पीतवसनं कमलासनम् । लक्ष्म्याश्रितं चतुर्बाहुं लक्ष्मीनारायणं भजे ॥ ॐह्रांमहालक्ष्म्यैस्वाहा १०८ ह्रामित्यङ्गानि ॥ मातर्नमामि कमले कमलायताक्षि श्रीविष्णुहृत्कमलवासिनि विश्वमातः । क्षीरोदजे कमलकोम-

लगर्भगौरि लक्ष्मीःप्रसीद सततं नमतां शरण्ये ॥ श्रींह्रींक्लींऐंसौः ॐह्रींश्रींकएईलह्रींहसकलहसकलह्रींसौः ॐक्लींह्रींश्रींश्रींमहात्रिपुरसुन्दर्यैस्वाहा १०८ । ह्रांह्रींह्रूं । त्र्यर्णा त्र्यश्रनिविष्टमूर्तिरधिका मुद्रात्रयोद्भासिता या दत्तेऽङ्कुशपाशबाणनिचयं चापं चतुर्भिः करैः । देवीभिस्तिसृभिस्तथाष्टभिरथो दिग्दिक्ष्वनुख्यातिभिर्वस्वष्टप्रमिताभिरष्टभिरथो जीयाज्जगन्मातृका ॥ ऐंक्लींसौःबालायैस्वाहा १०८ । अरुणकिरणजालैरञ्जिताशाऽवकाशा विधृतजपवटीकापुस्तकाभीतिहस्ता । इतरवरकराढ्या फुल्लकल्हारसंस्था निवसतु हृदि बाला नित्यकल्याणरूपा ॥ ॐह्रींदुंदुर्गायैस्वाहा १०८ सव्ये त्रिशूलकरवालमहेषुचक्राण्या शंखखेटकधनुः परितर्जनीया । दत्ते महामहिषदानवपृष्ठसंस्था दूर्वानिभा भवतु साभिमताप्तये नः ॥ सिंहस्था० ॥ ॐक्लींसौः कामेश्वरायस्वाहा १०८॥ कामित्यङ्गानि ॥ चन्द्रकोटिप्रतीकाशं चन्द्रमौलिं त्रिलो-

चनम् । वराऽभयत्रिशूलाऽसिकरं कामेश्वरं भजे ॥ ॐह्रींवद्वद्वाग्वादिनिस्वाहा १०८ ह्रामित्यङ्गानि । सितवर्णालङ्कारे सरस्वति समस्तवाङ्मयाधारे । कमलजमानसवरले मृगाङ्कधवले नमस्तुभ्यम् ॥ ॐह्रींश्रींक्लींभुवनेश्वर्यैस्वाहा १०८ ह्रां । उद्यदिनद्युतिमिन्दुकिरीटां तुङ्गकुचां नयनत्रययुक्ताम् । स्मेरमुखीं वरदाङ्कुशपाशाभीतिकरां प्रभजे भुवनेशीम् ॥ ॐह्रींश्रींहूंफ्रांआंशांशारिकायै स्वाहा १०८ ह्रांश्रामिति ॥ या खड्गं डमरुं त्रिशूलपरशू खट्वाङ्गपाशौ गदा चक्रं मुद्गरचापबाणवरदाभीतिकपालाङ्कुशान् । धत्ते तोमरपुस्तके च मुसुलं दिग्भिस्तथा चाष्टभिर्देवीभिः परिवारिता शशिधरा सा शारिका पातु नः ॥ ॐह्रांवांवामदेवायस्वाहा १०८ ह्रांवामिति । पूर्णेन्दुकोटिप्रभमिन्दुचूडं कपालखट्वाङ्गगदासिहस्तम् । भस्मास्थिमालाश्रितगात्रमाद्यं श्रीवामदेवं शिवमाश्रयामि ॥ ॐह्रींश्रींशारदाभगवत्यैस्वाहा १०८ ह्रामित्यङ्गानि ॥ षड्-

भुजां त्रिनयनां स्मितवक्त्रां शाण्डिल्यर्षिनुतपदपङ्कजाम् ।
पर्वते स्थितिमतीं धृतशूलां शारदां भगवतीं हृदि ध्याये ॥
ॐह्रींश्रींरांक्लींसौःभगवत्यैराज्यैह्रींस्वाहा १०८ ह्रामित्य-
ङ्गानि ॥ उद्यद्दिवाकरसहस्ररुचिं त्रिनेत्रां सिंहासनोपरि-
गतामुरगोपवीताम् । खड्गाम्बुजाढ्यकलशामृतपात्रहस्तां
राज्ञीं भजामि विकसद्वदनारविन्दाम् । ॐह्रींश्रींभूतेश्वरा-
यस्वाहा १०८ ह्रांह्रीमित्यङ्गानि ॥ कुन्देन्दुभासं शशिखण्ड-
चूडं कपालपाशाङ्कुशशूलहस्तम् । त्रिलोचनं भूतिसितं
हसन्तं भूतेश्वरं चेतसि चिन्तयामि ॥ ॐह्रींश्रींज्वालामुखि
मम सर्वशत्रून्भक्षयभक्षयहूंफट्स्वाहा १०८ ह्रामित्यङ्गानि ॥
ज्वालापर्वतसंस्थितां त्रिनयनां पीठत्रयाधिष्ठितां ज्वाला-
डम्बरभूषितां सुवदनां नित्यामदृश्यां जनैः । षट्चक्राम्बु-
जमध्यगां वरगदाम्भोजाभयान्बिभ्रतीं चिद्रूपां सकला-
र्थदीपनकरीं ज्वालामुखीं नौम्यहम् ॥ ॐह्रांह्रौंमहा-
देवायस्वाहा १०८ ह्रामित्यङ्गानि । त्रिनेत्रमिन्द्वर्धकिरी-

टरलं कल्पान्तसूर्यप्रभमुग्रहासम् । वृषासनं शूलकपालहस्तं वन्दे महादेवमहं चिदीशम् ॥ ॐक्रींक्रींक्रींहूंहूंह्रींह्रींभैंभद्रकालिभैंह्रींह्रींहूंहूंक्रींक्रींक्रींस्वाहा १०८ भांभीमित्यङ्गानि ॥ क्षुत्क्षामां कोटराक्षीमपि मलिनमुखीं मुक्तकेशीं हसन्तीं नाहं तृप्ता वदन्तीं जगदिदमखिलं ग्रासमेकं करोमि । हस्ताभ्यां धारयन्तीं ज्वलदनलशिखासन्निभं पायुमुग्रदन्तैर्जेष्काफलाभैः परिहरितभयं पातु मां भद्रकाली ॥ ॐहूंहूंमहाकालप्रसीदप्रसीदह्रींह्रींस्वाहा १०८ । ह्रामिति ॥ ॐह्रींश्रींक्लींनमोभगवतिमाहेश्वरिअन्नपूर्णेस्वाहा ॥ रक्तां विचित्रवसनां नवचन्द्रचूडामन्नप्रदाननिरतां स्तनभारनम्राम् । नृत्यन्तमिन्दुशकलाभरणं विलोक्य हृष्टां भजे भगवतीं भवदुःखहर्त्रीम् ॥ सांसींवितस्ताभगवत्यैस्वाहा । सा मित्यङ्गानि । अक्षसूत्राम्बुजकरामाऽदर्शकलशाङ्किताम् । मीनपद्मासनां देवीं वितस्तां वरदां श्रये ॥ ॐश्रींगांगींसःगङ्गायैस्वाहा १०८ गां । अभिनवबिसवल्ली पा-

दपग्रस्य विष्णोर्मदनमथनमौलेर्मालतीपुष्पमाला । जयति जयपताका काप्यसौ मोक्षलक्ष्म्याः क्षपितकलिकलङ्का जाह्नवी नः पुनातु ॥ ॐह्रींश्रींक्लींहसरक्षमलवयऊं आनन्देश्वरभैरवाय वौषट्स्वाहा । द्वारेशा नव (पृ. २५६–९) (सर्वमन्त्रचक्रतृप्तिरस्तुस्वाहावौषट् । द्वितीया पूर्णा । मध्यप्राणिनि) (पृ. २५६–१३) ऍ बहुरूपभैरवं सपरिवारं साङ्गं सचक्रं तर्पयामि स्वधानमः वौषट् । तृतीया पूर्णा । ॐहूंन्यूनातिरिक्तविधिं पूरयामि स्वाहावौषट् । इत्याज्यहोमः ॥ ॥ अथयवतिलहोमः ॥ पूर्ववत्पूर्णाद्वयं दत्त्वा । (पृ. २५६–९) "मन्त्रचक्रहोमंकृत्वा" ॥ अथ नरकशुद्धिः ॥ (एतेऽतिनरका घोरास्त्रिकोणाः परिकीर्तिताः । असत्कर्मरतानां च प्राणिनां पातनाय वै) ॥ आज्येन । (ॐहूंह्रांअमुकाणोः निवृत्तिकलयां पृथ्वीतत्त्वे कूष्माण्डान्तः) अवीचिनरकं शोधयामिस्वाहा १० । (ॐहूंह्रां) कुम्भीपाकनरकंशो ॥ (ॐ) रौरवनरकं । (ॐ)महारौरवनरकं । (ॐ)पञ्चाशत्कोटिनरकं शोध-

मामिस्वाहा। पूर्णा ॐहूंहां अमुकाणोः पञ्चाशत्कोटिनरकशु-
द्धिरस्तुस्वाहावौषट् ॥ (अथाज्ञा) ॥ नरकेन्द्रा न युष्माभि-
रमुकस्य शिवाज्ञया। प्रतिबन्धः प्रकर्तव्यो यातु परमना-
मयम् ॥ स्रुवेणाज्यहोमः ॥ ॐह्रींश्रींअंब्राह्म्यैशब्दमर्पयामि-
स्वाहा १०८। ३ कं माहेश्वर्यैस्पर्शमर्पयामि। ३ चंकौमार्यै-
रसमर्-। ३टंवैष्णव्यैरूपमर्प-। ३तंवाराह्यैगन्धमर्पयामिस्वाहा।
३ पंऐन्द्र्यैबुद्धिमर्-। ३ यंचामुण्डायै अहङ्कारम-। ३ शंम-
हालक्ष्म्यै मन अर्पयामिस्वाहा ॥ (अथ शवसंस्काराः ॥)
अग्निसमीपे दर्भासनोपरि शवमुत्तराभिमुखं संस्थाप्य ज्ञानखड्गेन
समसाऽस्त्रार्घजलं "ह्रांह्रींहूंहैंह्रौंहः" इति शिरसि ताडयेत् ॥
ततः शरीरे पादादि-शिरोन्तं चतुरङ्गुलान्तरेण पुष्पैः पूजयेत् ॥
ॐह्रींसः पृथिव्यैस्वधानमः (एवमूर्ध्वम्) ३जलाय,
तेजसे, वायवे, ३आकाशाय, गन्धाय, रसाय, रूपाय,
३शब्दाय, स्पर्शाय, उपस्थाय, ३पायवे, पादाभ्यां,
पाणिभ्यां, वाचे, घ्राणाय, जिह्वायै, चक्षुषे, त्वचे,

ईँश्रोत्राभ्यां[२०], मनसे[२१], अहङ्काराय[२२], बुद्धये[२३], ईँप्रकृत्यै[२४]स्वधा-नमः ईँपुरुषाय[२५]स्वधानमः ॥ अथ धारणया प्राणकलां द्वादशान्ते शिवपदे विश्रान्तिमनुभूय सुषुम्णामार्गेण मूलाधारं गत्वा कुण्डलिनीमुत्थाप्य तेनैव मार्गेण द्वादशान्तं यावद्गत्वा दक्षनासारन्ध्रेण धूमलेखाकारां विद्याजालरूपां बहिः क्षिपेत् । प्रथमं तेन वर्णाध्वनो मध्यनामाऽद्यवर्णरूपं जीवं मनसा ध्यात्वाऽथ शवशरीरे नाभिमारभ्य ब्रह्मरन्ध्रान्तं पुष्पैर्न्यसेत् ॥ (हुंदेवदत्तात्मनेहुं) ॐ-पुरुषतत्त्वायनमः ॥ एवं, नियति[२],-काल[३],-राग[४],-विद्या[५],-कला[६],-माया[७],-शुद्धविद्या[८],-ईश्वर[९],-सदाशिव[१०],-शक्ति[११],-(हुंदेवदत्तात्मनेहुं) ॐशिवतत्त्वाय[१२]नमः ॥ पुनस्त्र्यङ्गुलान्तरेण पादादि-मूर्धान्तं । (ॐहुंअमुकात्मनेहुं) ॐपुरुषतत्त्वायनमः एवं प्रकृति-तत्त्वा[२],-बुद्धि[३],-अहङ्कार[४],-मनो[५],-श्रोत्र[६],-त्वक्[७],-चक्षुस्त[८],-रसना[९], घ्राणं[१०],-वाक्[११],-पाणि[१२],-पाद[१३],-पायु[१४],-उपस्थ[१५]-शब्द[१६],-स्पर्श[१७],-रूप[१८],-रस[१९],-गन्ध[२०],-आकाश[२१],-वायु[२२],-तेजस्त[२३],-जल[२४],-(ॐहुंअमुकात्मनेहुं)ॐपृथिवीतत्त्वा[२५]यनमः ॥ ततो हुनेत् ॥ पृथिव्यैस्वधानमः

स्वाहा, । जलायै-तेजसे-वायवे-आकाशायै-गन्धायै-रसायै-रूपायै-स्पर्शायै-शब्दायै उपस्थायै-पायवे-पादाभ्यां-पाणिभ्यां-वाचे घ्राणायै-जिह्वायै-चक्षुषे-त्वचे-चक्षुर्भ्यां-मनसे-अहङ्कारायै-बुद्ध्यै-प्रकृतये ॐ पुरुषायस्वधानमःस्वाहा ॥ ततः कालादिहोमयेत् ॥ एवं ॐ हूं अमुकात्मने हूं ॐ कालतत्त्वायनमः स्वाहा । एवं कला,-नियति,-राग,विद्या,-मायातत्त्वाय-नमःस्वाहा,-शुद्धविद्या,-ईश्वर,सदाशिवतत्त्वायनमःस्वाहा, शिवतत्त्वायनमःस्वाहा ॥ पुनःशवस्य पुष्पपूजा । ॐ हुं अमुकात्मनेहुं ॐ प्रकृतिपुरुषाभ्यांनमः । एवं बुद्ध्यै अहङ्कारायै मनसे श्रोत्राभ्यां त्वचे चक्षुर्भ्यां रसनायै घ्राणाय वाचे पाणिभ्यां पादाभ्यां पायवे उपस्थाय शब्दाय स्पर्शायै रूपायै रसायै गन्धायै आकाशायै वायवे तेजसे जलायैनमः ॐ हूं अमुकात्मनेहूं पृथिव्यैनमः ॥ पुनः ॐ हूं अमुकात्मनेहुं-ॐ कालतत्त्वायनमः कलातत्त्वा,-नियतितं,-राग,-विद्या, ॐ हूं अमुकात्मनेहूं ॐ मायातत्त्वायनमः ॥ पुनः ॐ हूं अमुका-

त्मनेहूंओंमायात[१],-शुद्धविद्यात[२]त्त्वाय, ईश्वर[३]-सदाशिव[४]तत्त्वा-
यनमः ॥ ॐहूंअमुकात्मनेहूंओंशक्तितत्त्वायनम[५]ः ।-शिव-
तत्त्वायनम[६]ः ॥ (सर्वे १०८) ॥ पुनरङ्गुलान्तरेण मालिनीमातृका-
न्यासः पुष्पैः ॥ ॐक्षंमातृकायैनमः, ॐफंमालिन्यैनम[२]ः ।
ॐहंमातृ-ॐदंमालि[४]न्यै । ॐसं-मातृ-ॐऔंमालि[६]न्यैनमः ।
ॐषंमातृ-ॐओं[८]मालि । शंमातृ-ऐं[१०]मालि । वंमातृ-एं[१२]मालि ।
लंमातृ-नं[१४]मालि । रंमातृ-अं[१६]मालि । यंमातृ-शं[१८]मालिन्यै ।
मंमातृ-मं[२०]मालि । भंमातृ-क्षं[२२]मालि । बंमातृ-षं[२४]मालि ।
फंमातृ-हं[२६]मालि । पंमातृका-अंः[२८]मालि । नंमातृ-सं[३०]मालि ।
धंमातृ-आं[३२]मालि । दंमातृ-लं[३४]मालि । थंमातृ-छं[३६]मालि ।
तंमातृ-पं[३८]मालि । णंमातृ-टं[४०]मालि । ढंमातृ-रं[४२]मालि ।
डंमातृ-जं[४४]मालि । ठंमातृ-अं[४६]मालि । टंमातृ-झं[४८]मालि ।
ञंमातृ-ठं[५०]मालि । झंमातृ-ढं[५२]मालि । जंमातृ-ङं[५४]मालि ।
छंमातृ-यं[५६]मालि । चंमातृ-भं[५८]मालि । ङंमातृ-वं[६०]मालि ।
घंमातृ-अं[६२]मालि । गंमातृ-इं[६४]मालि । खंमातृ-ङं[६६]मालि ।

कंमातृ-घं[६८]मालि । अंःमातृ-गं[७०]मालि । अंमातृ-खं[७२]मालि । औंमातृ-कं[७४]मालि । ओंमातृ-वं[७६]मालि । ऐंमातृ-ऊं[७८]मालि । एंमातृ-उं[८०]मालि । ॡंमातृ-णं[८२]मालि । ऌंमातृ-ईं[८४]मालि । ॠंमातृ-धं[८६]मालि । ऋंमातृ-चं[८८]मालि । ऊंमातृ-थं[९०]मालि । उंमातृ-ॡं[९२]मा । ईंमातृ-ॡं[९४]मा । इंमातृ-ॠं[९६]मालि । आंमातृ-ऋं[९८]मालि । ॐअंमातृकायैनमः ॐनंमालिन्यैनमं[१००]ः ॥ स्रुवेणाज्यहोमः "प्रथमं" ॐह्रींहिरण्यायैस्वाहा ॐज्रींकृष्णायै, ॐक्रींकनकायै, ॐश्रींअतिरक्तायै, ॐसंसुप्रभायै, ॐझ्रींरक्तायै, ॐब्रींबहुरूपायैस्वाहा ॥ ॐब्रह्मणेस्वाहा ॐविष्णवे ॐरुद्राय, ॐईश्वराय, ॐसदाशिवाय, ॐमहाभूतेभ्यः ॐइन्द्राय, ॐयमाय, ॐवरुणाय, ॐसोमाय स्वाहा ॥ ततः पूर्वोक्तमातृकामालिनीहोमंकुर्यात् ॥ ॐक्षंमातृकायैस्वाहा ॐफंमालिन्यैस्वांहां । होमान्ते तेजोसि (ॐनऋॠलॡथचधईणउऊबकखगघङइअवभयडढठझञजरटपछलआसअःहषक्षमशअंतएऐओऔदफमालिन्यैस्वाहा ।)

(तदनु) नवात्महोमः (फट्हसरक्षमलवयऊँफट्स्वाहा) सहस्त्रं १००० वा १०० । वा १० हुत्वा । पूर्णा । तेजोसि फट् फट् अमुकस्य पापानि दहामिस्वाहा ॥ ततः कौलिनीन्यासः शवस्य पुष्पैः ॥ स्त्रीणां ह्रस्वस्थाने दीर्घोदयः ॥ ॐह्रीं श्रींक्लींफेंअं ("स्त्रीणांदीर्घ"आं) देविसुभगे अमुकस्य इतराध्वव्याप्तनिवृत्त्यन्तर्गतधरातत्त्वशोधिनि ह्रींश्रींक्लींफेंकौलिनिनमःस्वाहा, इति गुल्फान्तम् । ॐह्रींश्रींक्लींफेंइं ("स्त्रीणां"ईं) देविईश्वरि अमुकस्य इतराध्वव्याप्तप्रतिष्ठान्तर्गताप्तत्त्वशोधिनि ॐह्रींश्रींक्लींफेंकौलिनिनमःस्वधा, इतिनाभ्यन्तम् ॥ ॐह्रींश्रींक्लींफेंउं (स्त्रीणांऊं) देविऊर्ध्वकेशिनि अमुकस्य इतराध्वव्याप्तविद्यान्तर्गता तेजस्तत्त्वशोधिनि ॐह्रींश्रींक्लींफेंकौलिनिनमःस्वधा, इतिकण्ठान्तम् । ॐह्रींश्रींक्लींफें ऋं ("स्त्रीणां"ॠं) देविविकरालिके अमुकस्य इतराध्वव्याप्तशान्त्यन्तर्गते वायुतत्त्वशोधिनि ॐह्रींश्रींक्लींफेंकौलिनिनमःस्वधा, इतिब्रह्मरन्ध्रान्तम् । ॐह्रींश्रींक्लींफें लृं(ॡं)देवि

सोम्ये अमुकस्य इतराध्वव्याप्तशान्त्यतीतान्तर्गताऽकाश-तत्त्वशोधिनि ॐह्रींश्रींक्लींफें कौलिनिनमःस्वधा, इतिसर्व-व्यापकम्॥ अदीक्षितस्य तत्त्वशोधनं कुर्यात्॥ आहुतीनां १०० शतं शतं वा यथाशक्ति आज्याहुतिः श्रेष्ठा तदभावे तिलयवतुण्डलैः॥ यथादौ पृथ्वीतत्त्वमावाह्य संपूज्य चाहुनेत्॥

भगवन्पृथ्वीतत्त्वाऽगच्छ २ सन्तिष्ठ २ सन्निधत्स्व २ सन्निधीहि २ सन्निरुद्धोभव २ पृथ्वीतत्त्वाय गन्धादि। ततः पृथ्वीतत्त्वायस्वाहा १०० वा १० "एवं" पृथ्वीतत्त्वाधिपतयेब्रह्मणे (गन्धादि दत्त्वा) स्वाहा १०० वा १० पूर्णा ॐहूँ अमुकाणुः सषडध्वपृथ्वीतत्त्वशुद्धोऽस्तुस्वाहा वौषट्॥ प्रार्थना "भोः ब्रह्मन् भवता नाऽस्य अमुकाणोः शिवाज्ञया। प्रतिबन्धः प्रकर्तव्यो यातु पदमनामय"मिति संश्रावयेत्॥ एवमप्तत्त्वमावाह्यसंपूज्य च। अप्तत्त्वायस्वाहा १०। अप्तत्त्वाधिपतिं विष्णुमावाह्य सम्पूज्य अप्तत्त्वाधिपतये विष्णवे स्वाहा १० पूर्णा। ॐहूँअमुकाणुः सषडध्वाऽप्तत्त्वशुद्धोस्तु-

स्वाहावौषट् । प्रार्थना । "भोविष्णो भवता नाऽस्येति ॥ तेजस्तत्त्वमावाह्य सम्पूज्य । तेजस्तत्त्वायस्वाहा १० तेजस्तत्त्वाधिपतिं रुद्रमावाह्य, तेजस्तत्त्वाधिपतयेरुद्रायस्वाहा १० पूर्णा ॐहूँ अमुकाणुः सषडध्वतेजस्तत्त्वशुद्धोस्तुस्वाहा वौषट् । "भोरुद्र भवता नास्येति" ॥ ततोवायुतत्त्वमावाह्य संपूज्य वायुतत्त्वायस्वाहा १०० वायुतत्त्वाधिपतिमीश्वरं चावाह्यसम्पूज्य, वायुतत्त्वाधिपतये ईश्वरायस्वाहा १० पूर्णा ॐहूँअमुकाणुः सषडध्ववायुतत्त्वशुद्धोस्तुस्वाहावौषट् ॥ "भोरीश्वर त्वया नास्येति" ॥ आकाशतत्त्वमावाह्य आकाशतत्त्वायस्वाहा १०० आकाशतत्त्वाधिपतिं सदाशिवमावाह्य सम्पूज्य । आकाशतत्त्वाधिपतये सदाशिवायस्वाहा १०० पूर्णा ॐहूँ अमुकाणुः सषडध्वाकाशतत्त्वशुद्धोऽस्तु स्वाहावौषट् । "सदाशिव त्वया नास्य अमुकाणोः शिवाज्ञया । प्रतिबन्धः प्रकर्तव्यो यातु पदमनामय"मिति क्षमापयेत् ॥ स्रुवेणाज्यहोमः मनसा ॐआत्मतत्त्वायस्वाहा १००

वा १० सशब्दं ॐआत्मतत्त्वायस्वाहा १०० वा १० एवं मनसा, सशब्दं च ॐविद्यातत्त्वाय–ॐशिवतत्त्वायस्वाहा १०० ॥ अथ षड्विंशतत्त्वहोमः प्रत्येकं दशांशतः ॥ ॐपृथ्वी-तत्त्वायस्वाहा[१] । जलतं[२]-तेजस्तं[३]-वायुं[४]-आकाशं[५]-गन्धं[६]-रसं[७]-रूपं[८]-शब्दं[९]-स्पर्शं[१०]-उपस्थं[११]–पायुं[१२] पादं[१३]-पाणिं[१४]-वाक्[१५]-घ्राणं[१६]- जिह्वां[१७]-चक्षुस्तं[१८]-त्वक्[१९]-श्रोत्रं[२०]-मनस्तं[२१]-अहङ्कारं[२२]–बुद्धि[२३]–प्रकृति[२४]–पुरुषं[२५]-कालं[२६] नियतिं[२७]-रागं[२८] विद्यां[२९]-कलां[३०]-मायां[३१]-शुद्धविद्यां[३२]-ईश्वर[३३]–सदाशिवं[३४]-शक्तिं[३५]-ॐशिवंतत्त्वायस्वाहा[३६] ॥ पूर्णा ॥ ॐहूँ अमुकाणोरेतत्प्रारब्धशरीरकर्मवर्जं वर्तमानकर्म-भविष्यत्कर्म-शोधयामिस्वाहा १ द्वितीया । ॐहूँ अमुकात्मनेहूँ फट् स्वाहा वौषट् २ ॥ आज्ञा । "शुद्धाध्वानं मृतं शिशुं मुमुक्षुं परमे-पदे । निरपेक्षं योजयामि ममाज्ञां दीयतां शिव" इति गृहीताज्ञो मृतशिशुं मनसा मन्त्रात्मानं विभाव्य पूर्णाहुतिं सम्पूर्य शिष्यात्मानं संगृह्य स्वात्मनि संस्तभ्य स्रुगग्रे न्यस्य "तेजोऽसि" द्वारेशा (२५६-९) ॐहूंअमुकाणुं महाशून्ये परमशिवे योजयामि

स्वाहा वौपट् ॥ ततः कौलिन्या आहुतिशतं शतं दद्यात् ॥ ॐह्रीं श्रींक्रींफेंअं(आं) देविसुभगे अमुकस्य धरातत्त्वशोधिनि ओं-ह्रींश्रींक्रींफेंकौलिनिस्वाहा १०० । ॐह्रींश्रींक्रींफेंइं(स्वीईं) देवि ईश्वरि अमुकस्यापत्त्वशोधिनि ॐह्रींश्रींक्रींफेंकौलिनि स्वाहा१००। ॐह्रींश्रींक्रींफेंउं(ऊं)देविऊर्ध्वकेशिनि अमुकस्य तेजस्तत्त्वशोधिनि ॐह्रींश्रींक्रींफेंकौलिनिस्वाहा१००।ॐह्रीं श्रींक्रींफेंऋं(ॠं)देविविकरालिके अमुकस्य वायुतत्त्वशोधिनि ॐह्रींश्रींक्रींफेंकौलिनिस्वाहा१००॥ ॐह्रींश्रींफेंलं(लृं)देवि-सौम्ये अमुकस्यआकाशतत्त्वशोधिनि ॐह्रींश्रींक्रींफेंकौलि-निस्वाहा१००। पूर्णा। ॐ अमुकाणुःपूर्वपूजितमन्त्रशुद्धोस्तु-स्वाहा।तर्पणं॥अनेनमन्त्रहोमेनआत्मनो-पितुर्भैरवगो०पराची कर्मनिमित्ते शिवपदवीप्राप्तये हिरण्यादिकलाः सर्वादेवताः प्रीताः सन्तु ॥ अथ चित्तावास्तुं शालिचूर्णेनोल्लिख्य, पूजा यथा ॥

सव्येन ॥ संवः सृ-अश्विनोः-। ॐगायत्र्यैनमः ३ ॐत-त्महेशायवि ३ अद्यतावत्, ईशानेगगनयुतस्येशानस्य,

आग्नेये अग्नियुतस्यरुद्रस्य, नैर्ऋतेजलयुतस्यविष्णोः, वायवे वायुयुतस्येश्वरस्य, मध्ये पृथ्वीयुतस्य ब्रह्मणः, पूर्वे इन्द्रस्य, दक्षिणेयमस्य, पश्चिमे अपांपतेः, उत्तरे सोमस्य, चरक्याः विदार्याः पूतनायाः पापराक्षस्याः, स्कन्दस्य अर्यम्णः जम्बकस्य पिलिपिञ्छस्य। (शैवे) ईशाने, गगनयुतस्य अघोरस्य, आ, अग्नियुतस्य बहुरूपस्य, नै, निर्ऋतियुतस्य त्र्यम्बकस्य, वा, वायुयुतस्य रुद्रस्य, म, क्षितियुतस्य शिवस्य, पू, कपालेशस्य, द, शिखिवाहनस्य, प, क्रोधराजस्य, उ, विकरालस्य, ई, रजोत्कटस्य, आ, चण्डनेत्रस्य, नै, रौद्रवक्त्रस्य, वा, चण्डोग्रस्य, पूर्वे, महाचण्डस्य, द, सितवक्त्रस्य, प, सिंहनादस्य उ, उग्रसेनस्य चिताबास्तुदेवतानां आत्मनो पितुर्भैरवगोत्रस्य रुद्रस्य अन्त्यकर्म निमित्तं चित्तावास्तुपूजनमर्चामहंकरिष्ये एवमेवासनम्॥ ई, गगनयुतायेशानाय, आ, अग्नियुतायरुद्राय, नै, जलयुताय विष्णवे, वा, वायुयुतायेश्वराय, मध्ये, पृथ्वीयुताय ब्रह्मणे। पू,

इन्द्राय "दक्षिणे" यमाय, पश्चिमे, अपांपतये, उ, सोमाय, "ईशाने" चरक्यै, आ, विदार्यै, "नैर्ऋते" पूतनायै, वा, पापराक्षस्यै, पू, स्कन्दाय द, अर्यम्णे, प, जम्बकाय, उ, पिलिपिञ्छाय । शैवे । "ईशाने" गगनयुताय अघोराय, आ, अग्नियुताय बहुरूपाय, "नैर्ऋते" निर्ऋतियुताय त्र्यम्बकाय, "वायवे" वायुयुतायरुद्राय, मध्ये, क्षितियुताय शिवाय । "पूर्वे" कपालेशाय, "दक्षिणे" शिखिवाहनाय, प, क्रोधराजाय, उ, विकरालाय, "ईशाने" रजोत्कटाय, आ, चण्डनेत्राय, नै, रौद्रवक्त्राय, "वायवे" चण्डोग्राय, "पूर्वे" महाचण्डाय, द, सितवक्त्राय, प, सिंहनादाय, उ, ग्रसनाय चित्तावास्तुदेवताभ्यः युष्मान्वः पूजयामि । ॐपूजय, गगनयुतमीशानं, अग्नियुतं रुद्रं, जलयुतं विष्णुं, वायुयुतमीश्वरं, पृथ्वीयुतं ब्रह्माणं, रुद्रं यमं अपांपतिं, सोमं, चरकीं, विदारीं, पूतनां, पापराक्षसीं, स्कन्दं, अर्यमणं, जम्बकं पिलिपिच्छं ।। गगनयुतमघोरं, अग्नियुतं बहुरूपं, निर्ऋति-

युतं त्र्यम्बकं, वायुयुतं रुद्रं, क्षितियुतं शिवं, कपालेशं, शिखिवाहनं, क्रोधराजं, विकरालं, रजोत्कटं, चण्डनेत्रं रौद्र वक्रं, चण्डोग्रं, महाचण्डं, सितवक्रं, सिंहनादं, प्रसनं चिता-वास्तुदेवता आवाहयिष्यामि ॥ यवान्विकीर्य । शन्नोदेवी । फट्अस्त्रमन्त्रेण "फट्अस्त्रायफट्" । लाजाश्च । ई, गगनयुता येश्वराय पाद्यंनमः । शेषं निवार्य । पुनः शन्नोदेवी । फट्-अस्त्रायफट् । आपःक्षीरं । भगवन्तोऽर्घ्ये २ ई, गगनयुतेशान, अग्नियुतरुद्र, जलयुतविष्णो, वायुयुतेश्वर, पृथिवी-युतब्रह्मन् , इन्द्र, यम, अपांपते, सोम । चरकि, विदारि, पूतने, पापराक्षसि, स्कन्द, अर्यमन् , त्र्यम्बक, पिलिपिच्छि । गगनयुताघोर, अग्नियुतबहुरूप, निर्ऋतियुतत्र्यम्बक, वायु-युतरुद्र, क्षितियुतशिव । कपालेश, शिखिवाहन, क्रोधराज, विकराल, रजोत्कट, चण्डनेत्र, रौद्रवक्र, चण्डोग्र, महाचण्ड, सितवक्र, सिंहनाद, प्रसन, चित्तावास्तुदेवता, इदंवोर्घ्यं-नमः ॥ गन्धादि दक्षिणान्तं ॥ अपसव्येनाऽक्षयम् ॥ अद्यतावत्-

पितुर्भैर-पराचीकर्मनिमित्तं शिवसायुज्यार्थं चित्तावास्तु-देवताप्रीत्याचितावास्तुदेवताः प्रीयन्तां ॥ सव्येन एता-देवता—। पृथक् २ नैवेद्यम् । आदौ वैदिके । अपसव्येन । अमृतमस्तु-यमाय अग्निष्वात्तादिभ्यः अद्यतावत् दक्षिणा-ग्नये नमोनैवेद्यम् ॥ सव्येन मुण्डयागे । अमृतमस्तु अस्त्राय शक्त्यै शिवकलशदेवताभ्यः, संहारभै-भीषण-कपालेश-उन्मत्त-क्रोधराज चण्ड-रुरु-असिताङ्गभैरवाय । महा-लक्ष्म्यै चामुण्डायै वाराह्यै ऐन्द्र्यै वैष्णव्यै कौमार्यै माहे-श्वर्यै ब्राह्म्यै मायादेव्यैनमोनैवेद्यम् ॥ "मायाजालस्य मध्ये आदौ"। मायादेवीसहिताय बहुरूपभैरवाय पूर्वे अमर्दकाय-कङ्कालाय भीमरवाय अट्टहासाय करवीराय कलङ्काख्याय कालग्रासाय कुलेश्वराय ॐनमोनैवेद्यं । ततश्चितावास्तोः चरिक्यादीनां विना । "अपसव्येन"। गगनयुतायेशानाय अग्नि-रुद्राय जलयु-विष्णवे वायुयु-ईश्वराय पृथ्वीयु-ब्रह्मणे । इन्द्राय यमाय अपांपतये सोमाय । शैवे ।

गगनयु-अघोराय, अग्नियु-बहुरूपाय, नैर्ऋतियु-त्र्यम्बकाय, वायुयु-ईश्वराय, क्षितियु-शिवाय । कपालेशाय शिखिवाहनाय क्रोधराजाय विकरालाय रजोत्कटाय चण्डनेत्राय रौद्रवक्त्राय चण्डोग्राय महाचण्डाय सितवक्त्राय सिंहनादाय प्रसनाय चित्तावास्तुदेवताभ्योनैवेद्यं । वैदिके । इळामग्ने० । पूर्णान्तं । "सव्येन" । शिवाग्नौ स्रुवेनाज्यहोमः । मध्ये ॐब्रह्मणेस्वाहा १०८वा १०वा३ ॥ नैर्ऋते ॐविष्णवेस्वाहा १० "आग्नेये" ॐरुद्राय-१० "वायवे" ॐईश्वराय १० "ईशाने" ॐसदाशिवाय । ॐमहाभूतेभ्यः स्वाहा १० ॥ इन्द्राय, यमाय, वरुणाय ॐसोमायस्वाहा १० ततो मुण्डयागदेवताश्च होमयेत् ॥ ॐसंहारभैरवायस्वाहा १० भीषण-कपालेश-उन्मत्त-क्रोधराज-चण्ड-रुरु-असिताङ्गभैरवायस्वाहा १० ॐमहालक्ष्म्यै स्वाहा१० चामुण्डायै वाराह्यै ऐन्द्र्यै-वैष्णव्यै-कौमार्यै-माहेश्वर्यै ॐब्राह्मयैस्वाहा १० ॐमायादेवीसहिताय बहुरूपभैरवायस्वाहा १० ॐगगनयु-अघोराय, अग्नियु-बहुरूपाय, नैर्ऋ-

तियु-त्र्यम्बकाय, वायुयु-ईश्वराय, क्षितियु-शिवाय, ॐक-पालेशाय, शिखिवाहनाय, क्रोधराजाय, विकरालाय, रजोत्कटाय, चण्डनेत्राय, रौद्रवक्त्राय, चण्डोग्राय, महा-चण्डाय, सितवक्त्राय, सिंहनादाय, ॐग्रसनायस्वाहा १० ॥ ततः पुर्यष्टकं ब्रह्मादिष्वऽर्पयेत् ॥ ॐहांब्रह्मणे अमुकसत्कौ शब्दस्पर्शावऽर्पयामिस्वाहा १०० वा १० ॐहांविष्णवे अमुकसत्कं रसमर्प,· ॐहांरुद्राय अमुकसत्के गन्धरूपे अर्प-। ॐहांईश्वराय अमुकसत्के बुद्ध्यहङ्कृती अर्पयामिस्वाहा । ॐहांसदाशिवाय अमुकसत्कं मनोऽर्पयामिस्वाहा १० ॥ ॐहांहसरक्षमलवयऊंहांब्रह्मन् अमुकस्य पुर्यष्टकांशं गृ-हाणस्वाहा ३ ॐहांएँहांविष्णो अमुकस्य० । ॐहां एँ हांईश्वर अमु-। ॐहांएँहांसदाशिव अमुकस्यपुर्यष्टकां-शंगृहाणस्वाहा १०८ वा १० पूर्णा एँ बहुरूपभैरवाय वौषट्स्वाहा । पुनः स्रुवेण । एँ अमुकस्यात्मनः कार्मपाशं-दहामि एँ फट्स्वाहाफट् १० । एँ अमुकस्यात्मनः मायी-

मपाशं-। ऐँ अमुकस्यात्मनः आणवपाशं दहामि ऐँ फट्स्वाहा फट् १० ॥ ऐँ अमुकस्यात्मनः प्रायश्चित्तं शोधयामि ऐँ फट्स्वाहाफट् १० पूर्णा ऐँ अमुकस्यात्मनः प्रायश्चित्तशुद्धि-रस्तुस्वाहा। "ततःक्षेत्रेशान् होमयेत्"। ॐआमर्दकायस्वाहा ॐकङ्कालाय-ॐभीमरवाय ॐअट्टहासाय-करवीराय क-ङ्काख्याय-कालग्रासाय-ॐकुलेश्वरायस्वाहा १० चरक्यै विदार्यै पूतनायै पापराक्षस्यै स्कन्दाय अर्यम्णे जम्बकाय पिलिपिच्छायस्वाहा १० "धारणा" ॥ प्रणवोच्चारपूर्वं स्वदक्ष-नासापुटेन निर्गत्य शवस्य वामनासापुटे नाड्या हृदयं प्रविश्य प्राग् न्यस्तं चैतन्यमऽस्त्रेण छित्त्वाऽक्रम्य तद्दक्षनासापुटेन निर्गत्य स्ववामेन स्वहृदि प्रविश्य चित्तप्राणात्म सर्वमन्त्रसंयुक्तं कारणपद-बोधनक्रमेण ॥ ऐँ अमुकात्मानं परमशिवपदे योजयामि स्वाहावौषट्" इत्यूहेन योजनिकां कृत्वा "पूर्णा" मध्यप्राण-निविष्ट हंस (२५६-९) ऐँ समस्तन्यूनातिरिक्तविधिपूरण-मस्तुस्वाहावौषट्। अथाग्नेः पुष्पं क्षिपेत् (दत्त्वा पूर्णाहुतिं ब्रू-

याद्दीक्षितेषु विशेषतः। त्वदिच्छया महेशान योऽनेन व्युत्क्रमः कृतः ॥ सोऽस्तु त्वदिच्छया पूर्णो मैनं रौत्सीः जगत्पते। देवदेव महेशान गुरुरामुत्रिके त्वया। प्रवर्तितोऽहं महतीं तद्देह्यस्मै सुवासनाम् ॥ दग्धबीजो यथा क्वापि न भूयो रोहयेदय मिति) ॥ "मण्डलानलस्थदेवेनदत्तामाज्ञां विभावयेत् ॥" ततः कुण्डादऽग्निं गृहीत्वाऽवशिष्टं कुण्डाग्निं विमुञ्चेत् ॥ फट्अग्निं विमुञ्चामि २ नयामि ॥ गृहीतमग्निं चितासमीपं नयेत् ॥ (पठेयुर्दीक्षिताः सर्वे विद्यां व्योमेश्वरीं ततः। सप्तकृत्वा समं चोच्चैर्वर्णानां च शतत्रयम्। पाठादस्या गुरुः सर्वपापोत्तीर्णो विमुच्यते। कर्णान्ते पठिता यातु पशूनामपि मोक्षदा ॥ न वाच्या कामतो या तु गृहे श्माशानिका यतः। यस्या उच्चारमात्रेण कम्पतेऽसौ स्वयं शिवैः) ॥ दक्षिणकर्णे व्योमेश्वरीं पठेत् यथा ॥ "हंसः शुचिषल्लंवः व्योमेश्वरिवौषट्स्रंरः महाकालसङ्कर्षणिवौषद्यंऊंवाग्वाधारेफट् अंआंइंऊंयांरांलांवांसांक्षांसर्वाधारवेदिनिनमःऊंयं

रःसंवःलंसः हंपादगुल्फजङ्घाजानुनीपायुब्रह्मकारणेश्वरिस्पृशहंसिनिस्वाहा, विश्ववह्निकुण्डलिनीविष्णुकारणेश्वरिस्पृशहंसिनिस्वाहा, हृदाकाशज्योतीरूपसरोरुहकिञ्जल्कलुम्पटेरुद्रकारणेश्वरिस्पृशहंसिनिस्वाहा, त्यक्तवाहद्वादशान्तसंहतसोमघ्र्यैकलाग्रासैकघस्मरेईश्वरकारणेश्वरिस्पृशहंसिनिस्वाहा, वेदिताष्टकपाललालाटिकनिःशब्दनादध्वनिध्वन्यमानपराकाशरोहणलुम्पटे सदाशिवकारणेश्वरिस्पृशहंसिनिस्वाहा, समस्तग्रस्तपञ्चव्योमार्णवातीतनिरुद्धब्रह्मकवाटसमविषमव्यक्तवह्निपरज्योतीरूपेश्वरित्यक्ताधाराधेयनिःशेषनिःसङ्कल्पभावोज्झितदेहातीतनिःस्पृशस्पृशतनुंहंसिनिहंसःशुचिषत्स्वधा" ॥ तत आकाशगामिनीबलिः । "अन्नं मांसं पयो मत्स्या दध्याज्यं कृसरं मधु । इत्यष्टाङ्गं बलिं प्राहुः द्रव्यादेभ्यश्चितार्चने" ॥ नमः क्रव्यादमुख्येभ्यो देवेभ्य इति सर्वदा । येस्मिन्श्मशानदेवाः स्युर्भगवन्तः सनातनाः ॥ तेऽस्मत्सकाशाद्गृह्णन्तु बलिमष्टाङ्गसंयुतम् ।

प्रेतस्यापि शुभाँल्लोकान्प्रयच्छन्त्वपि शाश्वतान् ॥ अस्मा-
कमायुरारोग्यं सुखं च ददतांवरम् ॥

"ऊर्ध्वं ब्रह्माण्डतोऽमूर्दिवि गगनतले भूतले निष्कले
वा पाताले कानने वा सलिलपवनयोः यत्रतत्रस्थिता वा ।
क्षेत्रे पीठोपपीठादिषु च कृतपदा धूपदीपादिकेषु प्रीता
देव्यः सदा नः शुभफलविधिना पान्तु देवेन्द्रवन्द्याः ॥
अपसव्येन । योविश्वभाविनो० । चरक्यादीन्क्षेत्रेशानष्टाङ्गान्नेन
"योस्मिन्निति" "तर्पयेत् ॥ ई, चरक्यै आ, विदार्यै, "नैर्ऋते"
पूतनायै, वा, पापराक्षस्यै, "पूर्वे" स्कन्दाय, द, अर्यम्णे,
"पश्चिमे" जम्बकाय, उ, पिलिपिच्छाय अष्टाङ्गमन्नं समर्प-
यामिनमः ॥ तत उत्तानं शवं दक्षिणशिरस्कोत्तानशवां चितां-
समिधैरापूर्य । सव्येन "भैरवाग्नौ" फट्परिसमूह्य पर्युक्ष्य परि-
षिच्य ९ दक्षिणपश्चिमाग्रैः स्तरैः परिस्तीर्य । १६ । तस्मिन्ने-
वाग्नौ शङ्करं साङ्गं । ९ बहुरूपभैरवायनमः" "ह्रांहृ-ह्रींशि-
ह्रूंशिखा-ह्रैंकव-ह्रौंनेत्राभ्यांहः अस्त्रा-" । इति च गन्धार्घ्यादि-

भिःसंपूज्य "हसरक्षमलवयऊं बहुरूपभैरवायस्वाहा" १०८ "ह्रींमायादेव्यैस्वाहा" १०८ हुत्वा, उल्मुकत्रयं दद्यात् । ईशाने, आकूत्यैत्वाइच्छाशक्तयेस्वाहा, "वायवे" कामायत्वाक्रियाशक्तयेस्वाहा। "नैर्ऋते" समृध्यैत्वाज्ञानशक्तयेस्वाहा इति दत्त्वा पूर्णां ॥ स्रुक्स्रुवौ मध्यबिलौ वा, मध्याऽक्षोटावन्योन्यं मिलाप्य, "ॐत्वमग्ने दक्षिणः कालः कालेनैवोपपादितः । गृहाण मन्त्रसंपूतां शैवीमेतां ममाहुतिंस्वाहावौषट्" इति पठित्वा स्रुक्स्रुवावपि तत्रैवक्षिपेन्नासिकायां, ज्ञानखड्गंशिरसि, आज्यपात्रमुदरे, शेषमन्तराले क्षिपेत् ॥ अपसव्येन ॥ आज्यपात्रं सदधिघृतं दक्षहस्ते, आस्ये चरुशेषं स्रुवं नासिकायां, उपयामं शिरसि, शिष्टानि पात्राणि ऊर्वन्तराले क्षिपेत् । साग्निकानां स्त्रीणां चैकत्र प्राकृताग्निमग्निकोणे प्रक्षिप्य । "तेजोसि" । आश्रावितमिति अस्मत्त्वमभिजातोसि त्वदयं जायते पुनः । असौ (देवदत्तः) स्वार्गायलोकायस्वाहा ॥ ततो रोमदाहे सम्पन्ने सव्यावृत्त्या त्रिः प्रदक्षिणं कृत्वा "अस्मानी-

लकपर्दिने सहस्राक्षेण वाजिनः । शर्वेणाध्वगघातिना तेन मा समरामसि" "इति पठन् त्रिः प्रक्रम्योदकधाराः क्षिपन् शिरस्तलस्थिते परशौ वाटिकामुच्चैःप्रेतनामोच्चारयुतां त्रोटयेत्॥ सव्येन"। "ईशाने" शैवीमस्त्रवार्धानीं पूजयेत् । ॐअघोरास्त्रायफट्नमः, चोदनास्त्रायफट्, ॐखड्गायफट्नमः घण्टाय त्रिशूलाय खेटकाय वज्राय दण्डाय पाशाय परशवे मुद्गराय, अङ्कुशाय शराय पिनाकाय वराय अभयाय मुण्डाय खट्वाङ्गाय वीणायै डमरवेफट्नमः । वज्राय फट्नमः शक्तये दण्डाय खड्गाय पाशाय ध्वजाय गदायै त्रिशूलाय पद्माय ॐहलायफट्नमः । ततो "वामाचारं त्रिः प्रक्रम्य "ॐह्रींहूंहूंप्रस्फुर २ स्फुर २ घोरघोरतरउग्ररूप चटचट प्रचटप्रचट कह २ वम २ घातय २ हूंहूंहूंःहूंः फट्फट्फट् अघोरास्त्रायनमः" । इति पठन् उच्चैर्नामोच्चारयुतामस्त्रवार्धानीमीशानस्थपरशौ त्रोटयेत्॥ अपसव्येन । उपस्थानम् । "नमोमहिम्ने उत चक्षुषे महतां पितरउरु

तद्वृणीमः । हुतो याहि पथिभिर्देवयानैरोषधीषु प्रतितिष्ठाः शरीरैः" ॥ "सव्येन" धारणा "ॐहूंशान्तबोधप्रकाशात्मने ॐहांॐह्रींॐहूंॐहैंॐहौंॐहः ॐसः ब्रह्मात्मने ब्रह्ममूर्तये सर्वसमयलोपान्निवारय २ सर्वसमयं पूरय २ सान्निध्यं कुरुकुरुहूं फट्स्वाहा" इति प्रकाशरूपं देवं हृदि विधाय चितावास्तोर्विसर्जयेत् ॥ "अपसव्येन ॥" गायत्र्यैनमः ॐभूर्भुवः ३ तन्महेशायवि ३ अद्यतावत् ईशाने गगनयुतस्येशानस्य (२७९–९) चितावास्तुपूजनमच्छिद्रं सम्पूर्णमस्तु ॥ अर्धदाहे "अघोरास्त्रं" जपन्नदीतीरे अद्यतावत् पितः अन्त्यकर्मनिमित्तंएतत्ते तिलोदकमेतत्ते उदकतर्पणम् ॥ सव्येन । "ॐहांअमुकशुद्धात्मन् ईश्वरसमोभव, ॐहांअ० सदाशिवसमोभव, । ॐहांअमुकशुद्धात्मन् शिवसमोभव" ॥ (स्त्रीषु) "ॐहां–बलविकरणीसमाभव ।–बलप्रमथिनीसमाभव ।–मनोन्मनीसमाभव" इतिजलाञ्जलित्रयं दद्यात् ॥ तदनु ईशानकोणस्थो जपं कुर्यात् यथा 'ऐंबहुरूपायनमः १०८

ॐह्रींमायादेव्यैवौषट्नमः १०८ वक्त्राणांद्विगुणोजपः । यथा । ॐवांवामदेववक्त्रायनमः । ॐलंसद्योजातव–। ॐरंअघोरव-। ॐयंतत्पुरुषव-। ॐक्षंईशानवक्त्रायनमः ॥ ततः स्वेष्टदेवस्यजपः ॥ ततः श्मशानभैरवस्य "ध्यानं" नीलाञ्जनचयप्रख्यं स्फुटिताधरभास्वरम् । ब्रह्मेन्द्रविष्णुनमितं नौमिश्मशानभैरवम् ॥ ॐह्रींफ्रांक्रौं श्मांश्मशानभैरवायनमः ॥ ॐह्रींश्रींफ्रांश्रांमहामायायैनमः १०८ । ततः क्षमापणम् ॥ क्षमस्व देवदेवेश महाभैरवपूजित । गृहाणेमां बलिं पूजां गच्छ स्थानं स्वकं प्रभो ॥ अन्त्यजानां किञ्चिद्दत्त्वा वामाङ्गुष्ठप्रमाणेनाङ्गुष्ठमात्रमस्थिपुरुषमानीय तीर्थे सचैलस्नात्वा प्रज्वालितमग्निं सबान्धवस्त्रिः प्रक्रमन् "इन्द्रः सुनीत्या सहसा पुनातु सोमः स्वस्त्या वरुणः समीच्या । यमो राजा प्रमृणाभिः पुनातु जातवेदा ऊर्जयन्त्या पुनातु" इति पठेत् ॥ ततोऽह्निकक्रियामाचरेत् ॥

इतिशिवनिर्वाणपद्धतिः ॥

अथ दशाह्निकप्रेतक्रियाकाण्डविधिः

अपसव्येन ॥ अपन अष्टावित्यऽस्य, कौत्सऋषिः, गायत्रंच्छन्दः, अग्निर्देवता, शुचये विनियोगः ॥ अपनः शोशुचदऽघमऽग्ने शुशुग्ध्या रयिम् । अपनः शोशुचदऽघम् ॥ सुक्षेत्रिया सुगातुया, वसूयाच यजामहे । अपनः शोशुचदघम् ॥ प्रयद्भन्दिष्ट एषां प्रास्माकासश्च सूरयः । अपनः शोशुचदघम् ॥ प्रयत्ते अग्ने सूरयो जायेमहिप्रतेवयम् । अपनः शोशुचदघम् ॥ प्रयदग्नेः सहस्वतो विश्वतो यन्ति मानवः । अपनः शोशुचदऽघम् ॥ त्वं हि विश्वतोमुख विश्वतः परिभूरसि । अपनः शोशुचदघम् ॥ द्विषो नो विश्वतोमुखातिनावेव पारयः । अपनः शोशुचदऽघम् ॥ सनः सिन्धुमिव नाव याति पार्षास्वस्तये । अपनः शोशुचदघम् ॥ अघतावत्० पितः अमुकअमुकगोत्र प्रथमेऽहनि द्वितीयेऽहनि, तृतीयेऽहनि, चतुर्थेऽ, पञ्चमेऽ, षष्ठेऽ, सप्तमेऽ, अष्टमेऽ, नवमेऽ, दशमेऽहनि, एतत्ते तिलोदकम् ॥ सव्येन ॥ तीर्थे-

स्वेयं० । वसोः पवित्र० । आशीर्वादं । परमात्मने । स्वप्रकाशो । वनस्पति । नमोधर्म । गङ्गाभगवत्यै गन्धादि ॥ अपसव्येन । अद्यतावत् पितः प्रथमेऽहनि वा दशमेऽहनि एष ते धूपः एष ते दीपः ॥ दक्षिणाभिमुखः शिलापृष्ठे दारुपृष्ठे वा मृत्तिकोपलिप्ते दक्षिणाग्रान्दर्भानाऽस्तीर्य ॥ पितः अमुक प्रथमे वा दशमेऽहनि एतत्तेऽवनेजनम् ॥ प्रेतचरोरन्नमुद्धृत्य । तिलास्तोयं वामजानुं भूमौ निधाय॥ अद्य-तावत् पितः प्रथमेऽहनि एष ते पिण्डः अपउपस्पृश्य ॥ एतत्ते ऊर्णवासः, एतत्तेवीरान्नं । पिण्डलेपं निवारयेत् ॥ पितः प्रथमेऽहनि एष ते गन्धः, पितः एषतेऽर्घः, एतत्ते पुष्पं, एष ते धूपः, एष ते दीपः, एष ते भक्ष्यभोज्य-फलमूलबलिः । पितः एतत्ते तिलमधुमिश्रमुदकपात्रं आचमनीयम् । पितः एतत्ते हिमपानं, एतत्तेक्षीर-पानं, एतत्ते मधुपानं, एतत्तेतिलोदकं, एतत्ते उदक-तर्पणं, हिमंहिमं रजतं रजतं ॥ तद्विष्णोरितिपुष्पद्वयं ॥

एकदर्भविष्टरं वामांगुष्ठे निधाय, पात्रान्तरे पिण्डं संस्थाप्य ॥ अथतावत् पितुः प्रथमे वा दशमेऽहनि सुशुद्धप्रकृतिसाधनाय गङ्गाप्रवाहेऽयं पिण्डोऽस्तु पूरकः ॥ पितः प्रथमेऽहनि प्रथमस्तिलोदकुम्भः । पितः प्रथमेऽहनि प्रथमस्तिलोदकाञ्जलिः । एवं प्रेतनाम्नादिनवृद्धया तिलोदकुंभतिलोदकाञ्जलयो द्वितीये द्विः २ तृतीये त्रिः ३ दशमे दश १० देयाः ॥ "यथा" द्वितीयदिवसे । पितः द्वितीयेऽहनि प्रथमस्तिलोदकुम्भः वा प्रथमस्तिलोदकाञ्जलिः । पितः द्वितीयेऽहनि द्वितीयस्तिलोदकुम्भः वा द्वितीयस्तिलोदकाञ्जलिः ॥ अस्थिटरोदकप्रेतकुम्भमुपरि । "श्मशानानलदग्धोऽसि परित्यक्तोऽसि बान्धवैः । इदं क्षीरमिदं नीरं" प्रथमेऽहनि प्रेतअन्न खाहि, अपः पिब । द्वितीयपात्रमुपरि ॥ यमदूत ! अत्र खाहि, अपः पिब । प्रेत क्षीरं पिब । यमदूत क्षीरं पिब । प्रेत मधुलीढि, यमदू० । प्रेत तिलान्भुंक्ष्व, यमदू० । प्रेत अन्नमद्धि, यम० । प्रेत सर्पिष्भज, यम० । प्रेत गुडशर्कर-

फलमूलद्राक्षादि भुंक्ष्व, यमदू० ॥ तत्पृष्टे भाण्डमाऽदाय ॥ प्रेतयमदूतौ एष वां गन्धः, एषवामर्घः, एतद्वां पुष्पं, एष वां धूपः, एष वां दीपः । एतद्वां वासः, एतद्वां माल्यं, एतद्वां दण्डं ॥ अद्यतावत्० पितुः प्रथमेऽहनि वा दशमेऽहनि एष प्रेतकुम्भोऽहोरात्रतृप्तयेऽस्तु ॥ "सव्येन" ॥ प्रत्यग्रे हरसाहरेत्याारात्रिका ॥ "अपसव्येन" ॥ प्रेतकुम्भं वामकुक्षौ गृहीत्वा गृहं गच्छेत् । गृहद्वारदक्षिणशाखोपरि प्रेत-कुम्भं संस्पृश्य, वामपादेनाऽश्मानं बहिः क्षिप्त्वा, दक्षिणपादेन लोहशङ्कमऽन्तः प्रक्षिप्य, गृहं प्रविशेत् ॥ गृहमध्ये सोदकुम्भ-पूजा ॥ "सव्येन" ॥ तीर्थे स्नेयं । धूपदीपः । "अपसव्येन" पितः प्रथमेऽहनि सोदकुम्भे एष ते धूपः, एष ते दीपः ॥ जलकुम्भमध्ये विष्टरं क्षिप्त्वा । "कुम्भोऽवनिष्टो जनिता शचीभिर्यस्मिन्नऽग्रे योन्यां गर्भोऽन्तः । प्लाशिर्व्यक्तः शतधार उत्सो दुहेन कुम्भेन स्वधा पितृभ्यः" इति तिलो-दकं क्षिपेत् ॥ पितः प्रथमे वा दशमेऽहनि सोदकुम्भे एष

ते गन्धः, एष तेऽर्घः, एतत्ते पुष्पं एष ते धूपः, एष ते दीपः एतत्तेवासः, एतत्ते माल्यं। तिलोदकक्षीरमध्वादि एकस्मिन्पात्रे संस्थाप्य। अद्यतावत् पितुः प्रथमेऽहनि "अयं सोदकुम्भ अहोरात्रतृप्तयेऽस्तु" इत्युक्त्वाऽन्तःक्षिपेत्॥ "सव्येन" अग्नौ तिलैरक्षोघ्नमन्त्रं, ऐन्द्राग्नं तावद्धुनेत्॥ अनेन मन्त्रहोमेन आ० रक्षोघ्नमन्त्राः प्रीयन्तां प्रीताः सन्तु॥ दशमेऽहनि सोदकुम्भविसर्जनं पुष्पैः॥ नमः पितृभ्यः प्रेतेभ्यो यमाय जातवेदसे। षट्त्रिंशत्तत्त्वमोक्षाय प्रेत गच्छ शिवालयम्॥ मयि मदन्वये चापि देहि लाभं विशेषतः। आयुरारोग्यमैश्वर्यं देहि मे विमलां श्रियम्॥ दशाह्निकं तु रात्रौ तु सोदकुम्भं विनिक्षिपेत् इति॥ "अथ दशमेऽहनि पिण्डोपरि पुष्पैर्विसर्जनम्"॥ शिरो मे श्रीर्यशोमुखं त्विषि केशाश्च श्मश्रूणि। राजा मे प्राणो अमृतं सम्राट्चक्षुर्विराट्श्रोत्रम्॥ जिह्वा मे भद्रं वाङ्महो मनो मन्युः सुराङ्गसः। मोदाः प्रमोदा अङ्गुलीरङ्गानि मित्रं मे महः॥

बाहू मे बलमिन्द्रियं हस्तौ मे कर्म वीर्यं च । आत्मा क्षेत्रमुरो ममपृष्टिर्मे राष्ट्रमद्रसु ॥ अंसौ ग्रीवाश्च श्रोणी ऊरू अरत्नी जानुनी । विश्वो मेऽङ्गानि सर्वशः ॥ नाभिर्मे चित्तं विज्ञानं पायुर्मेऽपचितिर्भसः ॥ आनन्दनन्दौ अण्डौ मे भगः सौभाग्यं भसः । जङ्घाभ्यां पद्भ्यां धर्मेऽस्मिन्विश्वराजा प्रतिष्ठितः इति ॥ वपनमन्त्रः ॥ आत्मनः शुद्धिकामस्तु पितुर्वैकुण्ठहेतवे । वमनं कारयिष्यामि तीरेऽहं तव जाह्नवि ॥ यानि कानि च पापानि ब्रह्महत्यादिकानि च । केशानाश्रित्य तिष्ठन्ति तस्मात्केशान्वपाम्यऽहम् ॥ वपनं कृत्वा जलान्तर्विष्टरयुतवामस्कन्देन प्रेतकुम्भं गृहीत्वा क्षेपणमन्त्रः ॥ "पुंविषये ॥" इदं पुरुषशार्दूल विमलं दिव्यमुत्तमम् । प्रेतलोकेषु पानीयं मद्दत्तमुपतिष्ठतु ॥ "स्त्रीविषये ॥" इदं स्वदिति कल्याणि विमलं दिव्यमुत्तमम् । प्रेतलोकेषु पानीयं मद्दत्तमुपतिष्ठतु ॥ इति वैदिकदशाहिकप्रेतक्रियाविधिः ॥

"अथ शिवक्रियाविधिः"

अत्रादौ वैदिकक्रियां कृत्वा । ब्रह्मणस्याग्रे मृल्लिप्तशिलायां दर्भैककाण्डविष्टरयुतं कलशत्रयं शालिचूर्णलिखितपद्मेषु संस्थाप्य "दक्षिणेऽस्त्रकलशे" गः अस्त्रायफट् । रः अ-। हः अ-। य अस्त्रा-। लः अ-। फट् अस्त्राय फट् । ॐश्लींपशु-हूंफट् ॥ ॐहृ-। श्लींशिर-। पशिखा-। शुकव-। हूं नेत्रा-। फट् अस्त्रा-॥ तेन सर्वद्रव्यप्रोक्षणम्" ॥ आधूम्र २ जीव जीव सः सः सर्वासां पुष्पजातीनां जीव आगच्छतुस्वाहा "इति पुष्पे ।" कालाग्निरुद्राय जगद्धूमसुगन्धिने सर्वगन्धवहाय नमः "इति धूपे ।" जगज्ज्योतीरूपायनमः "इतिदीपे ।" गन्धमादिनि गन्धं जीवापयतुस्वाहा "इति चन्दने ।" ह्रीं-स्वाहा "इति कुङ्कुमे ।" लंपृथिव्यै धरितृशक्तयेनमः "इत्यर्घ्ये।" क्लींवरुणराजानकायनमः "इत्युदके ।" फट्सर्वोपचारशुद्धिरस्तु फट्स्वाहा "इति सर्वद्रव्येषु" स्वात्मासनायनमः "इति स्वासने ।" दिङ्मातृभ्योनमः "इत्याकाशे ॥ ॥

"मध्येऽर्घ्यकलशे द्वितीयपद्मस्थे ॥" ॥ आपः क्षीरं- । ॐस्वांस्वांसःसोमायवौषट् "इति जलं" । वागीश्वरि वाक्प्रदे सरस्वत्यैनमः "इतिक्षीरं[२]" । ओंसावित्रिपाप-भक्षिणिहूंफट्सावित्र्यैनमः "इति कुशाः[३]" । ॐहूंविष्णवे सुरपतये महाबलायनमः "इति पुष्पं[४]" । ॐतत्सदोंपितृ-भ्योनमः "इति तिलान्" । ॐलांप्रवीर्यजगद्धात्रेनमः स्वाहा "इति तण्डुलान्[५]" । ब्रह्मणेज्येष्ठायनमः "इति यवान्[६]" । ॐ-त्रिजटोर्ध्वपिङ्गलाय रुद्रायनमः "इति सर्षपान्" एवमष्टाङ्गेन पूरयेत् ॥ ॥ "वामे मन्त्रकलशे तृतीयपद्मस्थे" ॥ ग्लूंगंगण-पतयेनमः । गामित्यङ्गानि । ग्लूंसः गणपतिवल्लभायैनमः । गांगीं । क्लींकांकुमारायनमः । कांकीं । ह्रांह्रींसःसूर्याय नमः । ह्रांह्रां । श्रींश्रियैनमः । श्रांश्रीं । सांसींसरस्वत्यै-नमः । लंलक्ष्म्यैनमः । वंविश्वकर्मणेनमः । ॐह्रींदुं-दुर्गायैनमः । ॐहूंह्रींलक्ष्मीनारायणायनमः । ॐह्रींश्रीं-हूंफ्रांआंशांशारिकायैनमः । ॐह्रींश्रींज्वालामुखिममसर्व-

शत्रून्भक्षयभक्षयहूंफट्स्वाहा । ॐह्रींश्रींरांक्लींसौःभगव-
त्यैराज्यैह्रींस्वाहा । ॐनमःशिवाय । ॐहृ-। नशिर-। मः
शिखा-। शिकव-। वानेत्रा । "यअस्त्रा" इत्यस्त्रकलशे ॥ ॐन-
ईशानवक्त्रायनमः । ॐमः तत्पुरुषव-। ॐशिअघोरव-।
ॐवावामदेवव-। ॐयसद्योजातवक्त्रायनमः ॥ ॐह्रींअन-
न्तायनमः । सूक्ष्माय, शिवोत्तमाय, एकरुद्राय, एक-
नेत्राय, त्रिमूर्तये, श्रीकण्ठायनमः, शिखण्डिने, ॐरांरीं-
नन्दिने, सांसींमहाकालायनमः ॐत्रांवृषभाय ॐहूसौंः
भृङ्गीरुद्राय, ॐह्रींअम्बिकायै, चण्डेश्वराय गांगणेश्वराय
क्लींकांकुमारायनमः लंइन्द्रायवज्रहस्तायनमः । रंअग्नये
शक्ति-। यंयमायद-। क्षंनैर्ऋतयेख-। वंवरुणायपा-। वा-
वायवेध्वजह। कुंकुबेरायग-।ईईशानायत्रि-। आंब्रह्मणेपद्म।
ह्रींविष्णवेचक्रहस्तायनमः । ह्रींश्रींआंब्राह्म्यैनमः, ईमाहे-
श्वर्यै, ऊंकौमार्यै, ऋंवैष्णव्यै, लृंवाराह्यै, ऐंनारसिंह्यै
एंऐन्द्र्यै, औंचामुण्डायै, अःमहालक्ष्म्यैनमः, जयायै,

विजयायै, सुभगायै, दुर्भगायै, जयन्त्यै, ऊहिन्यै, अपराजितायै, करालयैनमः आंअग्न्यादित्याभ्यां संवरुण चन्द्रमोभ्यां, हूंकुमारभौमाभ्यां हूंविष्णुबुधाभ्यां ह्रीं-इन्द्राबृहस्पतिभ्यां स्रींसरस्वतीशुक्रभ्यां कुंप्रजापतिशनैश्च-राभ्यां, कुंगणपतिराहुभ्यां, ह्रींरुद्रकेतुभ्यां, ब्रंब्रह्मध्रुवाभ्यां, आंअनन्तागस्त्याभ्यांनमः । अनन्तनागराजायनमः । वासुकिना- । पद्मना- । महापद्मना तक्षकना- । कार्कोट-कना- । शङ्खपालना- । कुलिकनागराजायनमः । ॐव-ज्रायफट्नमः, शक्तयेफट्नमः, दण्डाय-। खड्गाय-। पाशा-य-। ध्वजाय-। गदायै। त्रिशूलाय-। पद्माय-। चक्रायफट्-नमः । ॐजुंसः अमृतेश्वरभैरवायनमः । ॐजुंहृ-। व्यों-शिर- । ईंशिखा- । हूंकव- । ज्योंनेत्रत्र- । फट्अस्त्रा-॥ ॐजुंसः अमृतलक्ष्म्यैनमः॥ जुंहृ- । व्योंशि- । ईंशिखा-। हूंकव-। ज्यों-नेत्र- । फट्अस्त्रा॥ सर्वमन्त्रचक्रतृप्तिरस्तुस्वाहावौषट् ॥ ॥ "शिलापूजा" ॥ ॥ "अग्रे" प्रभामण्डलायनमः, वृषभाय,

भृङ्गीशाय, अम्बिकायै, द्वारश्रियै, लक्ष्म्यै, गणपतये, सरस्वत्यै, त्रिशूलाय, विश्वकर्मणेनमः "पूर्वे" उमायै, दुर्गायै, भद्रकाल्यै, स्वस्तये, स्वाहायै, शुभङ्कर्यै, श्रियै, गौर्यै, भूतधात्र्यै, वागीश्वर्यैनमः "स्ववामे" नन्दिने, गङ्गायै, मेषास्यायै, चण्डाय, शङ्खनिधये दण्डिनेनमः। "स्वदक्षे" महाकालाय, यमनाय, छागलास्याय, उपचण्डाय, पद्मनिधये, महोदरायनमः। "ऊर्ध्वे" द्वारश्रिये "अधः" देहल्यैनमः। "मध्ये" ब्रह्मणे वास्तुपुरुषाय क्षेत्रपालाय, मणिभद्राय, सर्वेभ्योभूतेभ्योनमः शतदलपद्मासनायनमः सहस्रदलपद्मासनायमः गुरवेनमः परमगुरवेनमः परमेष्ठिनेगुरवेनमः परमाचार्यानमः आद्यसिद्धेभ्योनमः ॥ इति कलशस्थापनम् ॥ ॥ अनामिकास्थदर्भकाण्डद्वयोयजमानः ॥ ॥ "अपसव्येन" ॥ "पुंविषये" तिलोदकेन ॐजुंसःईश्वरसमोभवस्वधानमः। ॐजुंसः सदाशिवसमोभवस्वधानमः। ॐजुंसःशिवसमोभवस्वधानमः ॥ "स्त्रीविषये" ॐजुंसःब-

लविकरिणीसमाभवस्वधानमः। ॐ जुंसः बलप्रमथिनीसमा-भवस्वधानमः । ॐ जुंसः सर्वभूतदमनीसमाभवस्वधानमः ॐ तत्सद्ब्रह्माद्यतावत्-पित्रे शिवगोत्रायरुद्राय "वा" मात्रे शिवगोत्रायै रुद्राण्यै प्रथमे "वा" दशमेऽहनि एष ते तिलोदकाञ्जलिःस्वधानमः ॥ "सव्येन" । "मन्त्रकलशजले-नात्मप्रोक्षणम्" ॥ नौमि स्वात्मप्रकाशं प्रशमितविषमक्लेश-राशिं महेशं वन्दे वाग्देवतां तां कलयति किल या मूलतो वाग्लतायाः। विघ्नग्रासप्रबन्धादिव बृहदुदरं नौमि विघ्ना-धिराजं दत्तप्राग्दीक्षमेकं गुरुवरमपरं ज्ञानदं च प्रपद्ये ॥ वन्दे महेशं विश्वेशं वन्दे वाग्देवतां पराम् । वन्दे लम्बो-दरं देवं वन्देऽहं गुरुपादुकाम् ॥ ॐ ह्रींसः पवित्रकमर्पया-मिनमः ॥ स्वात्मनेशिवस्वरूपाय समालभनं गन्धोनमः अर्घोनमः पुष्पंनमः ॥ ॥ संसारमरुकान्तारमहामोहनिवृ-त्तये । तदिदमऽमृतं चक्षुर्दीपोऽयं शिव गृह्यताम् ॥ "इति दीपे" । कालाग्निरुद्ररूपं तं सर्वाघविनिसूदनम् । सर्वसौ-

भाग्यजननं धूपोऽयं शिव गृह्यताम् "इतिधूपे" ॥ द्विभुजं चैकवदनं सौम्यं पङ्कजभृत्करम्। तेजोबिम्बस्य मध्यस्थं वर्तुलं रक्तवाससम्॥ आदित्यमीदृशं ध्यायेद्भुक्तिमुक्तिफलप्रदम्। "इतिसूर्ये" ॥ स्वात्मने शिवस्वरूपाय दीपोनमः। अद्यतावत् नन्दिरुद्राय महाकालाय भवायदेवाय अस्त्रार्घ्यमन्त्रकलशदेवताभ्यः दीपोनमः। अपसव्येन। पित्रे शिव-। प्रथमे "वा" दशमेऽहनि दीपःस्वधानमः। "दक्षिणाग्रान्दर्भानास्तीर्य"। अस्त्रकलशजलेनाऽवनेजनम् ॥ पित्रे शिवगो० प्रथमेऽहनि अवनेजनं स्वधानमः। आधारशक्त्यैनमः पृथिव्यै क्षीरार्णवाय, चन्द्रमसे, वह्निमण्डलाय, सूर्यमण्डलाय, अनन्ताय, धर्माय, अधर्माय, सहस्रदलपद्मासनाय, अष्टदलपद्मास०, ॥ "चरुमानीय"। तिलास्तोयं। अन्नतिलमध्वाज्यपयोभिर्दक्षिणहस्ततले वामावर्तेन पिण्डं वर्तयेत् ॥ (अग्निष्वात्तेभ्यो विद्महे बर्हिषद्भ्योधीमहि, तन्नः सोमः प्रचोदयात् ३ अद्यतावत्=लंदिव्यं शिवस्वरूपिणं सर्व-

बन्धविवर्जितम् । सर्वकर्मविनिर्मुक्तं, धर्माधर्मबहिष्कृतं पिण्डमुत्पादयामिस्वधानमः) धूम्राकलायै धूम्राकलाश्रयायै पृथ्वीतत्त्वाय, पृथ्वीतत्त्वस्वरूपाय, क्षंईशानवक्राय, क्षं ईशानवक्राश्रयाय, ॐजुंसः पितः शिवगोत्र रुद्र "वा" मातः शिवगोत्रे रुद्राणि प्रथमेऽहनि एष ते पार्थिवः पिण्डः स्वधानमः । अप उपस्पृश्य ॥ १ ॥ (अग्निष्वा-त्तेभ्यो-) नीलरक्ताकलायै नीलरक्ताकलाश्रयायै अप्तत्त्वाय अप्तत्त्वस्वरूपाय यंतत्पुरुषवक्राय यंतत्पुरुषवक्राश्रयाय ॐजुंसः पितः "वा" मातः द्वितीयेऽहनि एष ते आपः पिण्डः स्वधानमः अपउपस्पृश्य ॥२॥ (ॐअग्नि-) कपिलाक-लायै कपिलाकलाश्रयायै तेजस्तत्त्वाय तेजस्तत्त्वस्वरूपाय रंअघोरवक्राय रंअघोरवक्राश्रयाय ॐजुंसः पितः "वा" मातः तृतीयेऽहनि एष ते तैजसः पिण्डः । अपउपस्पृश्य ॥ ३ ॥ (ॐअग्निष्वा-) विस्फुलिङ्गिनीकलायै विस्फुलि-ङ्गिनीकलाश्रयायै वायुतत्त्वाय वायुतत्त्वस्वरूपाय वंवामदे-

ववक्राय वंवामदेववक्त्राश्रयाय ॐजुंसः पितः "वा" मातः चतुर्थेऽहनि एष ते वायवः पिण्डः ॥४॥ (अग्निष्वात्ते-) ज्वालाकलायै ज्वालाकलाश्रयायै आकाशतत्त्वाय आकाशतत्त्वस्वरूपाय लंसद्योजातवक्त्राय लंसद्योजातवक्त्राश्रयाय ॐजुंसः पितः "वा" मातः पञ्चमेऽहनि एष ते आकाशः पिण्डः ॥ ५ ॥ (अग्निष्वात्ते-) तेजोवतीकलायै तेजोवतीकलाश्रयायै मानसतत्त्वाय मानसतत्त्वस्वरूपाय सर्वज्ञताहृदयाय सर्वज्ञताहृदयाश्रयाय ॐजुंसः पितः "वा" मातः षष्ठेऽहनि एष ते मानसः पिण्डः ॥ ६ ॥ (ॐअग्नि-) हव्यवाहनाकलायै हव्यवाहनाकलाश्रयाय बुद्धितत्त्वाय बुद्धितत्त्वस्वरूपाय तृप्तिशिरसेस्वाहायै तृप्तिशिरसेस्वाहाश्रयायै ॐजुंसः पितः "वा" मातः सप्तमेऽहनि एष ते बौद्धः पिण्डः ॥७॥ (ॐअग्निष्वात्ते-) कव्यवाहनाकलायै कव्यवाहनाकलाश्रयायै अहङ्कारतत्त्वाय अहङ्कारतत्त्वस्वरूपाय अनादिबोधशिखायै अनादिबोधशिखाश्रयायै नमः ॐजुंसः

पितः "वा" मातः अष्टमेऽहनि एष ते आहङ्कारिकः पिण्डः ॥८॥ (ॐअग्निष्वात्तेभ्यो-) रौद्रीकलायै रौद्रीकलाश्रयायै प्रकृतितत्त्वाय प्रकृतितत्त्वस्वरूपाय स्वतन्त्रकवचाय स्वतन्त्र-कवचाश्रयाय ॐजुंसः पितः "वा" मातः नवमेऽहनि एष ते प्राकृतः पिण्डः ॥९॥ (ॐअग्निष्वात्तेभ्यो-) संहारिणी-कलायै संहारिणीकलाश्रयायै पुरुषतत्त्वाय पुरुषतत्त्वस्वरू-पाय अलुप्तशक्तिअस्त्राय, अलुप्तशक्तिअस्त्राश्रयाय ॐजुंसः पितः "वा" मातः शिवगोत्रे रुद्राणि दशमेऽहनि एष ते पौरुषः पिण्डः । अपउपस्पृश्य ॥ १० ॥ पितः एष ते ऊर्णवासः, वीरान्नं स्वधानमः । लेपं निवार्य ॥ पित्रे शिव-गोत्राय-समालभनं गन्धःस्वधानमः, अर्घः, पुष्पं, दीपः, धूपः, भक्ष्यभोज्य, तिलमधु, हिमपानादि स्वधानमः । "मध्यार्घ्यकलशजलेनान्नसहितेन" । ऊर्जासि नमस्कारं करोमि स्वधानमः ॥ ततः पुष्पपूजा [(ॐअग्निष्वात्तेभ्यो) इसमन्त्र की तवदिलीसे (आं प्रभुशक्तये) यह मन्त्रपढके, भाकय

(धूम्रकलायै) इह आदिक पिण्डस्थापन मन्त्रों से फी पिण्ड को फूल चढाना ॥] "यथा" "(आं प्रभुशक्तयेनमः, ईं इच्छाशक्तयेनमः ऊं ज्ञानशक्तये, लृं क्रियाशक्तयेनमः) ॥" "धूम्रकलायैनमः (पृ. ३०६।२)," इह भी पढकर पित्रे शिवगोत्राय रुद्राय प्रथमेऽहनि वासांसि स्वधानमः ॥ एवं (आं प्रभुक्तये नमः) संहारिणीकलायैनमः-(पृ.३०८।५) पित्रे-दशमेऽहनि वासांसि स्वधानमः ॥ ॥ सव्येन ॥ ॥ अर्घेन दीपं संकल्प्य (नमोस्तु ते महादेवि सर्वोपद्रवनाशिनि । इच्छारूपे स्वरूपस्थे नित्ये नित्यात्मिके शिवे । कलाकलङ्करहिते भावभावान्तमध्यगे । अव्यक्ते कलनातीते शान्ते नित्योदिते परे । लयोदयविनिर्मुक्ते नित्यतृप्ते निरामये । शक्तिबीजस्वभावस्थे चण्डीकापालिनीश्वरि । स्वाहाकारे स्वधाकारे परिपूर्णे कृपापरे । त्वं देवी सर्वभूतानां व्याप्तिकर्त्री न संशयः । त्वया व्याप्तमिदं सर्वं भूतसर्गं चराचरम् । स्वचक्रयोगिनीनां च पारम्पर्यानुमध्यगे । अद्यास्माकं

हितार्थाय सन्निधानं कुरु प्रभो ॥ ॥ अपसव्येन ॥ ॥
"तिलेन" यमान्तकायै विद्महे कालरात्र्यै धीमहि । तन्न-
श्चण्डी प्रचोदयात् ३ (अद्यतावत् पितुः शिवगोत्रस्य रुद्रस्य
मोहान्धकारनिवृत्त्यर्थं परलोके प्रकाशवृद्ध्यर्थं) प्रथमेऽ-
हनि ब्राह्मीदीपं परिकल्पयामिनमः ॥ १ ॥ (सव्येन । पुनः
अर्घेन । नमोस्तुते—वृद्ध्यर्थं) द्वितीयेऽहनि माहेश्वरीदीपं—
॥ २ ॥ एवं (नमोऽस्तुते-) तृतीयेऽहनि कौमारीदीपं-
॥ ३ ॥ ॥ चतुर्थेऽहनि वैष्णवीदीपं-॥ ४ ॥ ॥ पञ्चमेऽ-
हनि वाराहीदीपं- ॥ ५ ॥ ॥ षष्ठेऽहनि नारसिंहीदीपं-
॥६॥ ॥ सप्तमेऽहनि ऐन्द्रीदी- ॥७॥ ॥ अष्टमेऽहनि
चामुण्डादीपं-॥ ८ ॥ ॥ नवमेऽहनि महालक्ष्मीदीपं- ॥९॥
॥ (सव्येन । नमोस्तुते । अपसव्येन । यमान्तकायै-अद्यता-
वत् पितुः-प्रकाशवृद्ध्यर्थं) दशमेऽहनि चण्डीदीपं परिकल्प-
यामिनमः ॥१०॥ "पिण्डेषु पुष्पं मन्त्रकलशात्" ॥ त्रयीसप्त-
चतुर्युग्ममयी त्रितयवर्त्मनि । स्थितो यः शक्तिसहितः

स जयत्यऽमरेश्वरः ॥१०॥ "वामाङ्गुष्ठे काण्डैकविष्टरं निधाय पिण्डं नद्यां क्षिपेत्"। (अद्यतावत्-पितुः शिवगोत्रस्य रुद्रस्य प्रथमेऽहनि निर्मलनिर्द्वन्द्वशिवप्रकृतिसाधनाय अमुकनद्याः प्रवाहे) अयं पार्थिवः पिण्डः पूरकोऽस्तु स्वधानमः ॥ पित्रे शिव-प्रथमेऽहनि-प्रथमस्तिलोदकुम्भः स्वधानमः। प्रथमे-हनि प्रथमस्तिलोदकाञ्जलिः ॥१॥ एवं द्वितीये-आप्यः पिण्डः पूरकोऽस्तु स्वधानमः। पित्रे शिवगोत्राय द्वितीये-ऽहनि प्रथमस्तिलोदकुम्भः। पित्रे द्वितीयेऽहनि द्वितीय-स्तिलोदकुम्भः स्वधानमः। पित्रे द्वितीयेऽहनि प्रथमस्तिलो-दकाञ्जलिः स्वधानमः। पित्रे द्वितीयेऽहनि द्वितीयस्तिलो-दकाञ्जलिः स्वधानमः ॥२॥ तृतीयेऽतैजसः ॥३॥ चतुर्थे-ऽहनिवायवः ॥४॥ पञ्चमेआकाशीयः ॥५॥ षष्ठे मानसः ॥६॥ सप्तमे बौद्धः ॥७॥ अष्टमे आहङ्कारिकः ॥८॥ नवमे प्राकृतिकः ॥९॥ दशमेऽहनि पौरुषः पिण्डः पूरकोस्तु स्वधा-नमः ॥ एवं पितुः प्रथमे २,३,४,५,६,७,८,९, दशमेऽहनि

दशमस्तिलोदकुम्भः स्वधानमः ॥ प्रथमे प्रथमः २, ३, ४, ५, ६, ७, ८, ९, १० ऽहनि दशमस्तिलोदकाञ्जलिः स्वधानमः ॥ "पुनः" शताञ्जलिः "ॐ हूं बहुरूपभैरवायनमः" (इस मन्त्र से सौ १०० जलाञ्जलि-देकर) ॥ अद्यतावत् पित्रे शताञ्जलिं ददामि स्वधानमः ॥ दशमेऽहनि कुम्भंक्षिपेत् ॥ मन्त्रकलशात् शिष्यस्य "मन्त्रार्थाः सफलाः" इति दत्त्वा । रिक्तान् कलशत्रयपात्रान् पुनर्जलार्घयुतान् स्वेस्वेस्थाने क्षेत्रपालान्प्रकल्प्य ॥ क्षांक्षेत्रपालायनमः ॥ आमर्दकायनमः कङ्कालाय, भीमरवाय, अट्टहासाय, करवीराय, करङ्काख्याय, कालग्रासाय, कुलेश्वरायनमः ८ । मयि पुष्टिं पुष्टिपतिर्दधातु ॥ इति सन्तर्प्य ॥ आरात्रिका ॥ गृह्णन्तु शिवसम्भक्ताः प्रेताः प्रासादबाह्यगाः । पञ्चभूताश्चये मन्त्रास्तेषामनुचराश्च ये । ते तृप्यन्तु स्वाहावौषट् ॥ ततो गृहं गत्वा रक्षामन्त्रं पठेत् ॥ "आमर्दकोऽथ कङ्कालो भीमरावोऽट्टहासकः । करवीरः करङ्काख्यः कालग्रासः कुलेश्वरः ॥ इति शिवक्रियाविधिः ॥

अथ शिवश्राद्धेऽन्नपूरिपूजा ॥

ॐनौमि स्वात्मप्रकाशप्रशमितविषमक्लेशराशिं महेशं वन्दे वाग्देवतां तां कलयति किल या मूलतां वाग्लतायाः । विघ्नग्रासप्रबन्धादिव बृहदुदरं नौमि विघ्नाधिराजं दत्तप्राग्दीक्षमेकं गुरुवरमपरं ज्ञानदं च प्रपद्ये ॥ वन्दे महेशं विश्वेशं वन्दे वाग्देवतां पराम् । वन्दे लम्बोदरं देवं वन्देऽहं गुरुपादुकम् ॥ ॥ ॐह्रींसःपवित्रकमर्पयामिनमः ॥ ॥ भुक्त्वा भोगानवनिवलयं धर्मतः पालयित्वा जित्वा शत्रून् द्रविणनिवहैरर्थिनस्तर्पयित्वा । अम्लानश्रीर्वयसि चरमे पुत्रसंन्यस्तभारः स्वस्थे चित्ते त्रिभुवनगुरुं शम्भुमभ्यर्चयेथाः ॥ ॥ यं शैवाः समुपासते शिव इति ब्रह्मेतिवेदान्तिनो बौद्धा बुद्ध इति प्रमाणपटवः कर्तेतिनैयायिकाः । अर्हन्नित्यथ जैनशासनरताः कर्मेति मीमांसकाः सोयं नो विदधातु वाञ्छितपदं षड्दर्शनाढ्यः शिवः ॥ स्वात्मने शिवस्वरूपाय समालभनं

गन्धोनमः अर्घोनमः पुष्पं नमः ॥ संसारमरुकान्तारमहा-मोहनिवृत्तये । तदिदममृतं चक्षुर्दीपोयं शिवगृह्यताम् ॥ इति दीपे । कालाग्निरुद्ररूपं तं सर्वाघविनिसूदनम् । सर्व-सौभाग्यजननं धूपोयं शिवगृह्यताम् ॥ इति धूपे । द्विभुजं चैकवदनं सौम्यं पङ्कजभृत्करम् । तेजोबिम्बस्य मध्यस्थं वर्तुलं रक्तवाससम् । आदित्यमीदृशं ध्यायेद्भोगमोक्ष-फलप्रदम् ॥ इति सूर्ये । स्वात्मने शिवस्वरूपाय भवायदेवाय ८ प्रपन्नपारिजाताय दीपोनमः ॥ "अपसव्येन" ॥ अद्य-तावत् पित्रे शिवगोत्राय ईश्वराय, पितामहाय शिवगोत्राय सदाशिवाय, प्रपितामहाय शिवगोत्राय शिवाय ॥ मात्रेशिव-गोत्रायै बलविकरिण्यै, पितामह्यैशिवगोत्रायै बलप्रमथिन्यै, प्रपितामह्यै शिवगोत्रायै सर्वभूतदमन्यै ॥ एवं । मातामहाय शिवगोत्राय ईश्वराय ॥ मातामह्यै शिवगोत्रायै बलवि-करिण्यै इत्यादि समस्तमातापितृभ्योद्वादशदैवतेभ्यः पितृभ्यः सांवत्सरिकेशिवश्राद्धे दीपःस्वधानमः धूपःस्वधा-

नमः ॥ "सव्येन" ॥ तन्महेशाय विद्महे वाग्विशुद्धाय धीमहि ।
तन्नः शिवः प्रचोदयात् २ ॥ "अपसव्येन" ॥ अग्निष्वा-
त्तेभ्योवि-बर्हिषद्भ्योधी-। तन्नः सोमः प्र-। ३॥ अद्यतावत्
पितुः शिवगोत्रस्य ईश्वरस्य "इत्यादि" समस्तमातापितॄणां
द्वादशदैवतानां सांवत्सरिकं शिवश्राद्धं अनन्तभुवना-
त्सदाशिवभुवनं तावच्छिवसायुज्यार्थं शिवपीठोपरि अक्षं
परिकल्पयामिनमः ॥ ॐनमोविष्णवे सुरपतये महाबलाय
सोमकोटिसोमपायप्रवाणे सोमाय ठः ठः अमृतोद्भवाय
अमृतकलनाय सोमायाऽऽप्याय वौषट् ॥ "सव्येन" ॥ द्वारेशा
नवरन्ध्रगाहृदयगो वास्तुगणेशोमनः शब्दाद्या गुरवः
समीरदशकं त्वाधारशक्त्यात्मकम् । चिद्देवोऽथ विम-
र्शशक्तिसहितं षाड्गुण्यमऽङ्गावलिर्लोकेशाः करणानि यस्य
महिमा तं नेत्रनाथं स्तुमः ॥ पुष्पाञ्जलिप्रमाणेन सम्मुखं
भावयेद्विभुम् । विभोः सपरिवारस्य स्वागतमित्युदी-
रयेत् ॥ "स्वागतं, सुस्वागतं शिवस्य सपरिवारस्य भोः" ॥

आत्मासनायनमः । दिङ्मातृभ्योनमः ॥ ॥ सुधाकलश-सत्पुष्पमालाहस्ताः सुशोभनाः । आकाशमातर एकवक्त्रा देवस्य संमुखाः ॥ उमायैनमः, दुर्गायै, भद्रकाल्यै, स्वस्त्यै, स्वाहायै, शुभङ्कर्यै, श्रियै, गौर्यै, भूतदात्र्यै, वागीश्वर्यै, दिङ्मातृभ्यः, वृषभाय, भृङ्गीशाय, कुमाराय, अम्बिकायै, द्वारश्रियै, सरस्वत्यै, लक्ष्म्यै, गणपतये, प्रभामण्डलाय, नन्दिने, गङ्गायै, मेषास्याय, दण्डिने, महाकालाय, यमुनायै, छागलास्याय, महोदराय, वास्तुपुरुषाय, ब्रह्मणे, सर्वेभ्योभूतेभ्योनमः ॥ ॥ अपसर्पन्तु ते भूता ये दिवि भुवि संस्थिताः । ये दिक्षु विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ॥ पाषाण्डकारिणोभूत्वा पिशाचाः प्रेतराक्षसाः । अपसर्पन्तु ते सर्वे दिव्यास्त्रेण तु ताडिताः ॥ ॥ "प्राणायामः" ॥ ॐ १६ "पूरकं" । ॐ ६४ "कुम्भकं" ॐ ३२ "रेचकं" इतिजपेत् ॥ ॥ ॥ (स्ववामेऽधः शाखायां गणपति-पूजा) ॥ "वायव्ये" ॥ बिभ्रद्दक्षिणहस्तपद्मयुगले दन्ता-

क्षसूत्रे शुभे वामे मोदकपूर्णपात्रपरशू नागोपवीती त्रिदृक् । श्रीमान्सिंहयुगासनः श्रुतियुगे शङ्खौ वहन्मौलिमान्दि-श्यादीश्वरपुत्र एष भगवांल्लम्बोदरः शर्म नः ॥ अस्य श्रीमहागणपतिमन्त्रस्य, ब्रह्माऋषिः, गायत्रंछन्दः, महागणपति-र्देवता, गंबीजं, ह्रींशक्तिः, कुरुकुरु कीलकं, पूजनेविनियोगः॥ गांहृ-गींशिर-गूंशिखा-गैंकव-गौंनेत्राभ्यां:, गः अस्त्रायफट् ॥ ॥ तत्पुरुषायवि-वक्रतुण्डायधी- । तन्नोदन्ती प्र- । ३ ॥ गजवदनमऽचिन्त्यं तीक्ष्णदन्तं त्रिनेत्रं बृहदुदरमऽनन्तं, दन्तमाले दधानम् । परशुचषकपद्मयुग्महस्तारविन्दं हरियुगलनिविष्टं श्रीगणेशं भजामि ॥ ॥ ॐ अनन्ताय-नमः, पद्मासनाय, सिंहासनाय, ग्लूंगंगणपतये, ग्लूंसः गणपतिवल्लभायै, "गां" इत्यङ्गानि । गंगणराजाय, गांल-म्बोदराय, गांगणेशाय, गांविरूपाक्षाय, गांविभीषणाय, गांविघ्नेशाय, गांदीर्घनासाय, गांइभाननाय, गुरुवे, पर-मगुरवे, परमेष्ठिने, परमाचार्याय, आद्यसिद्धेभ्यो, स्व-

गुरवे, क्षांक्षेत्रपालाय, हांवागीश्वर्यै, ॐघोरदंष्ट्राय, ॐ-विरूपाक्षाय, काकतुण्डाय, चिल्लवक्त्राय, उदुम्बराय, गांगणपतये, संसरस्वत्यै गङ्गायै, महाकालाय, यमुनायै, चण्डायै, प्रचण्डाय, दण्डिने, महोदराय, वैश्रवणायराज्ञे, गांमूर्तये, गांगणेश्वराय, समालभनं गन्धादि- ॥ ॥ ("ततः पश्चिमे मध्यबृहच्छाखायां" कुमारपूजा) घण्टां सुवर्णरचितां रुचिरां पताकां शक्तिं दधानमपि चारुशिखण्डिराजम् । भूयात्सदर्तवदनो भवतां विभूत्यै बद्धस्थितिर्वयसि बालवयाः कुमारः ॥ ॥ अस्य श्रीकुमारमन्त्रस्य, ब्रह्माऋषिः, गायत्रं छन्दः, कुमारोदेवता, कंबीजं क्रूंशक्तिः, कौंकीलकं, पूजने विनियोगः ॥ कांहृ-कींशि-॥ कार्तिकेयायवि-सेनाधिपतयेधी-। तन्नः कुमारः प्र-। ३ ॥ ॐक्रीं-कांकुमारायनमः ॥ ॥ (स्वदक्षेऽधः शाखायां सूर्यपूजा) धवलाम्भोरुहासीनं दाडिमीकुसुमप्रभम् । स्फुरद्रत्नमहातेजोवृत्तमण्डलमध्यगम् । अंसासक्तस्फुरच्छ्वेतसनाला

ऽकरद्वयम् । एकास्यं चिन्तयेद्भानुं द्विभुजं रक्तवास-सम् ॥ सूर्यं सौवर्णवर्णं मुनिगणनमितं चारुहासं त्रिनेत्रं रक्ताब्जं सुर्णकुम्भं सुरुचिरवसनं धारयन्तं भुजाभ्याम् । वामे च्छायासमेतं रथवरवहनं शुक्लपर्णाब्जमध्ये तिष्ठन्तं स्थूलसूक्ष्मं सकलजननुतं ध्यानकाले भजेऽहम् ॥ ॥ अस्य श्रीसूर्यमन्त्रस्य ब्रह्माऋषिः, गायत्रं च्छन्दः, सवितादेवता, ह्रांबीजं, ह्रींशक्तिः, ॐकीलकं, पूजने विनियोगः ॥ ह्रांहृदयायनमः । सर्वरूपायवि-सूर्यज्ञानायधी-। तन्नः सूर्यः प्रचोदयात् । १॥ विश्वप्रकाशायवि-विश्वज्ञानायधी-। तन्नः सूर्यः प्र-। २ ॥ ह्रांपद्मासनायनमः, आंअर्कासनायनमः, ह्रांखशोल्कायसू-र्यमूर्तये, ह्रांह्रींहंसःसूर्याय, अंहृदयायनमः, अर्काशिरसे-स्वाहा, ॐभूर्भुवःस्वःज्वालिन्यैशिखायैवषट्; हुंकवचायहुं, भां-नेत्राभ्यांवौषट्, रः अस्त्रायफट्, अंदण्डिनेनमः, अंपिङ्गलाय, ॐगुरुभ्यः, अंविमलायै, अंअमायै, रांदीप्ताय, रींसूक्ष्माय, रुंजयाय, रूंभद्रकाल्यै, रेंविभूतायै, रैंविमलाय, रोंअमो-

घाय, रौंविद्युताय, रंसर्वतोमुखायनमः । ३ ॥ (दक्षिणेऊर्ध्वोर्ध्वपंक्तिक्रमेण ग्रहपूजा) अग्न्यादित्याभ्यांनमः, वरुणचन्द्रमोभ्यां, कुमारभौमाभ्यां, विष्णुबुधाभ्यां, इन्द्राबृहस्पतिभ्यां, सरस्वतीशुक्राभ्यां, प्रजापतिशनैश्चराभ्यां गणपतिराहुभ्यां, रुद्रकेतुभ्यां, ब्रह्मध्रुवाभ्यां, अनन्ताऽगस्त्याभ्यांनमः । ११ "भगवन्तोग्रहाः सर्वे येऽन्ये चोपग्रहा मताः । ते सर्वे सन्निधानं मे कुर्वन्तु विघ्नशान्तये ॥ ४॥ (दक्षिणे मध्यशाखायां दुर्गापूजा)॥ दूर्वानिभां त्रिनयनां विलसत्किरीटां शङ्खाब्जखड्गशरखेटकशूलचापान् । सन्तर्जनीं च दधतीं महिषासनस्थां दुर्गां नवारकुलपीठगतां भजेऽहम् ॥ ॥ अस्य श्रीदुर्गामन्त्रस्य, महेश्वरऋर्षिः, अनुष्टुप्छन्दः, दुर्गादेवता, दुंबीजं, ह्रीं शक्तिः, ॐकीलकं, पूजने विनियोगः ॥ ॐहृ,-ह्रींशिर,-दुंशिखा,-दुर्कव,-गानेत्रा-यैनमःअस्त्रायफट् ॥ सुभगायैविद्महे, काममालिन्यैधीमहि । तन्नोदुर्गाप्रचो- । ३॥ ॐह्रींदुंदुर्गायैनमः सिंहासनाय । "सा मे भवतु सुप्रीता

गौरी शिखरवासिनी । उग्रेण तपसा लब्धो यया पशुपतिः पतिः" ॥ ॐगौंगौर्यासनाय, ॐगौंमूर्त्यै, ॐह्रींसः महागौरि रुद्रदयितेस्वाहा "मूलं" गांहृदया० ॥ ॥ (आग्नेय्येऽधःशाखायां लक्ष्मीवासुदेवपूजा) ॥ श्वेतैः शंखगदाब्जचक्रसहितैः सव्यैर्भुजैरङ्कितं वामैः पुस्तकदर्पणाग्रनलिनीकुम्भानुशार्ङ्गं सदा । राजन्तं गरुडाधिरूढमधिकं भक्तानुकम्पास्पदं लक्ष्म्यार्धाङ्कितमद्य नौमि वरदं श्रीवासुदेवं विभुम् ॥ ॥ अस्य श्रीलक्ष्मीवासुदेवमन्त्रस्य, शिवऋषिः, त्रिष्टुप्छन्दः, लक्ष्मीवासुदेवो देवता, पूजनेविनियोगः ॥ ॐह्रांविमलज्ञानसद्भावायहृदयायनमः । ह्रींसर्वैश्वर्यमूर्तयेशिर- । ॐहूंसर्वशक्तिस्वरूपायशिखा- । ह्रैं अनन्तबलरूपिणेकव- । ह्रौंअपरिमिततेजसेनेत्रा- । ह्रः अप्रतिहतवीर्याय अस्त्राय- ॥ वासुदेवायवि-लक्ष्म्यर्धायधी- । तन्नोविष्णुः प्र- । ३ ॥ ॐहूंह्रींलक्ष्मीवासुदेवाय नमः १०८ । ॐह्रांमहालक्ष्म्यैनमः १०८ । क्षेत्रपालाय, द्वारश्रियै, चण्डाय, जयाय, विजयाय, शङ्ख-

निधये, पद्मनिधये, ॐपितृभ्यःस्वधानमः, गणपतयेनमः, वास्तुपुरुषाय, पृथिव्यै, सरस्वत्यै, गुरुभ्योनमः ॥ "ततोऽङ्गषट्कं मूलेनाऽत्मपूजांच" ॥ आधारशक्त्यैनमः, कूर्माय, अनन्ताय, पृथिव्यै, क्षीरार्णवाय, कालाग्निरुद्राय पद्मासनाय धर्माय इत्यासनं । "तदुपरिभगवन्तमावाहयेत्" ॥ भगवन्भूतभव्येश मदनुग्रहणोद्यत । आवाहितोसि विश्वेश गृहाणासत्कृतंजपम् ।' इत्यावाह्य पुनर्मूलं । रहरऊंगरुडायनमः, सःसर्वैश्वर्याय, नंनलिन्यै, पंपद्मिन्यै, सूर्यसोममण्डलाय, प्रधानपुरुषईश्वरतत्त्वाय, पंपद्माय, हंशङ्खाय, ईचक्राय, क्रूंकमण्डलवे, आंदर्पणाय, ऐंपुस्तकाय, अक्षसूत्राय, ईंनलिनीनालाय, किरीटाय, कौस्तुभाय, श्रींश्रीवत्साय, वनमालायैनमः ॥ "ततोगुरुपूजा" ॥ ॐगुरवेनमः, परमगुरवे, परमेष्ठिने, परमाचार्याय, आद्यसिद्धेभ्यः ॥ आंक्षांवास्तुक्षेत्रपालायनमः स्वगुरवेनमः ॥ ॥ (पूर्वेमध्यशाखायां त्रिपुरसुन्दरीपूजा) ॥ त्र्यर्णा त्र्यश्रनिविष्टमूर्तिरधिका मुद्रात्रयो-

ङ्कासिता या धत्तेऽङ्कुशपाशबाणनिचयं चापं चतुर्भिर्भुजैः। देवीभिस्तिसृभिस्तथाष्टभिरथो दिग्दिक्षमनुख्यातिभिर्वसुऽष्टिप्रणताभिरष्टभिरथो जीयाज्जगन्मातृका ॥ गणेशवटुकस्तुता- ॥ ॥ "अस्य श्रीत्रिपुरसुन्दरीमन्त्रस्य, दक्षिणामूर्तिर्ऋषिः,पङ्क्तिच्छन्दः । त्रिपुरसुन्दरीदेवता, श्रींबीजं, ह्रींशक्तिः क्लींकीलकं, पूजनेविनियोगः" ॥ श्रांह्र-श्रीं ॥ ऐंत्रिपुरादेव्यैविद्महे, क्लींकामेश्वर्यैधीमहि । सौंतन्नः क्लिन्नः प्रचो ३ ॥ परब्रह्मात्मके महाचक्रेबैन्दवे महात्रिपुरसुन्दर्यऽम्बापादुकाभ्योनमः॥ "सौंक्लींऐं हृद-सौंक्लींऐं शिरसेस्वाहा" इति ॥ ॥ (ईशानेऽधः शाखायां मृत्युञ्जयपूजा) ॥ ॥ देवं सुधाकलशेति ॥ चन्द्रार्काग्निविलोचनं स्मितमुखं पद्मद्वयान्तः स्थितं मुद्रापाशसुधाऽक्षसूत्रविलसत्पाणिं हिमांशुप्रभम् । कोटीरेन्दुगलत्सुधाप्लुततनुं हारादिभूषोज्ज्वलं कान्त्या विश्वविमोहनं पशुपतिं मृत्युञ्जयं भावये ॥ ॥ अस्य श्रीमृत्युञ्जयमन्त्रस्य महाचमसकोहलऋषिः, गायत्रंछन्दः, मृत्युञ्जयोदेवता, ॐबीजं

जुंशक्तिः, सःकीलकं, पूजनेविनियोगः ॥ ॐहृ-जुंशिर-सःशिखा-ॐकव-जुंनेत्र-सःअस्त्रा-॥ अमृतेशायवि-व्योमदेहायधीमहि। तन्नोनेत्रः प्र-। २ ॥ ॐजुंसःहंसःमांपालयपालयसोहं-सःजुंॐ १०८ ॥ ॥ चन्द्रार्धमौलिमऽतिसुन्दरमाऽ-दिदेवं पूर्णेन्दुबिम्बवदनं कमलासनस्थम् । पीयूषपात्र-कलशाब्जवराऽभयाढ्यं देवं त्रिनेत्रममृतेश्वरमाश्रयामि ॥ ॐजुंसः अमृतेश्वरभैरवायनमः ॥ ॐजुंसःअमृतलक्ष्म्यै-नमः ॥ ॐजुंसः अमृतेश्वरमूर्तये सर्वभूतान्तरात्मने व्योम-व्यापिने व्योमशरीराय सर्वसमयलोपाभिवारय २ सर्वस-मयां पूरय पूरय सर्वसाधारणमन्त्रशरीरायह्रींस्वाहा ॥ॐजुंसः अमृतेपरामृतेनित्ये क्लींसः अमृतेश्वरि सर्वभूतान्तरस्थे ब्रह्मस्वरूपे महाव्योमशरीरे सर्वसमयां पूरय २ अमृतल-क्ष्म्यैस्वाहा ॥ "मूलं" ॥ ॐजुंसः अमृतलक्ष्म्यैनमः १०८॥ ॐजुंहृदयायनमः, व्योंशिर-, ईंशिखा-, हूंकव-, ज्योंनेत्र-, फट्अस्त्रायफट् ॥ (उत्तरे मध्यशाखायां भद्रकालीपूजा) ॥

श्यामां श्याममुखीं विलोलवपुषीं सत्कोटराक्षीं शिवां विंशद्व्युत्तररूपिणीं मधुमदोन्मत्तां च रक्ताम्बराम् । ब्रह्मा-मुण्डशिवाभिविष्णुरशनाहस्तामऽनङ्गोज्वलां प्रेतस्थां हृद-याम्बुजे भगवतीं भैंभद्रकालीं भजे ॥ ॥ अस्य श्रीभद्र-कालीमन्त्रस्य ब्रह्माऋषिः, अनुष्टुप्छन्दः, भद्रकालीदेवता, भैंबीजं, ह्रींशक्तिः, क्रूंकीलकं, पूजनेविनियोगः ॥ क्रींक्रींक्रींहृद- । हूंहूंशिर- । ह्रीह्रींशिखा- । भैंभद्रकालीकव- । ह्रींह्रींहूंहूंनेत्र क्रींक्रींक्रींअस्त्रायफट् ॥ ॐभैंभद्रकाल्यैविद्महे, कालरात्र्यैधी-महि । तन्नोभद्रकालीप्रचोदयात् २ ॥ क्रींक्रींक्रींहूंहूंह्रींह्रीं भैंभद्रकालिभैंह्रींह्रींहूंहूंक्रींक्रींक्रींस्वाहा १०८ ॥ ॥ (कर्णिकायां) ॥ ब्रह्मादिकारणातीतं स्वशक्त्यानन्दनिर्भरम् । नमामि परमेशानं स्वच्छन्दं वीरनायकम् ॥ त्रिपञ्चनयनं देवं जटामुकुटमण्डितम् । चन्द्रकोटिप्रतीकाशं चन्द्रार्धकृतशेख-रम् ॥ पञ्चवक्त्रं विशालाक्षं सर्पगोनासमण्डितम् । वृश्चिकैर-ग्निवर्णाभैर्हारेण तु विराजितम् ॥ कपालमालाभरणं खड्ग-

खेटकधारिणम् । पाशाङ्कुशधरं देवं शरहस्तं पिनाकिनम् ॥ वरदाभयहस्तं च मुण्डखट्वाङ्गधारिणम् । वीणाडमरुहस्तं च घण्टाहस्तं त्रिशूलिनम् ॥ वज्रदण्डकृताटोपं परश्वायुधहस्तकम् । मुद्गरेण विचित्रेण धृतेन तु विराजितम् ॥ सिंहचर्मपरिधानं गजचर्मोत्तरीयकम् । अष्टादशभुजं देवं नीलकण्ठं सुतेजसम् ॥ ऊर्ध्ववक्त्रं महेशानि स्फाटिकाभं विचिन्तयेत् ॥ आपीतं पूर्ववक्त्रं तु नीलोत्पलदलप्रभम् ॥ दक्षिणं तु विजानीयाद्वामं चैव विचिन्तयेत् । दाडिमकुसुमप्रख्यं कुङ्कुमोदकसन्निभम् ॥ चन्द्रार्बुधप्रतीकाशं पश्चिमं तु विचिन्तयेत् । स्वच्छन्दभैरवं देवं सर्वकामफलप्रदम् ॥ ध्यायेद्वै यस्तु युक्तात्मा क्षिप्रं सिद्ध्यति मानवः । पूर्वे या सा मया ख्याता अघोरा शक्तिरूपमा ॥ यादृशं भैरवं रूपं तस्यास्तादृशमेवहि । भैरवं पूजयित्वा तु तस्योत्सङ्गगतां स्मरेत् । ईषत्करालवदनां गम्भीरविपुलस्तनाम् । प्रसन्नास्यां सदा ध्यायेद्भैरवीं

विस्मितेक्षणाम् ॥ नमस्तस्मै ह्यऽघोराय घोरघोरतरात्मने ।
उत्पत्तिस्थितिसंहारलयानुग्रहहेतवे ॥ (एवं ध्यात्वा मान-
सोपचारैः संपूज्य) ॥ वामे खेटकपाशशार्ङ्गविलसद्दण्डं च
वीणाण्टिके बिभ्राणं ध्वजमुद्गरौ स्वनिभदेऽव्यङ्कं कुठारं करे।
दक्षेऽस्यङ्कुशकन्दुलेषुडमरून्वज्रत्रिशूलाभयं रुद्रस्थं शरवक्र-
मिन्दुधवलं स्वच्छन्दनाथं स्तुमः ॥ ॥ अस्य श्रीअघोर-
भैरवमन्त्रस्य श्रीकालाग्निरुद्रभैरवऋषिः, अनुष्टुप्छन्दः, श्रीबहुरूपः
अघोरेश्वरः परमात्मा देवता, ॐबीजं, हूँशक्तिः, कुरुकुरुकीलकं
पूजनेविनियोगः ॥ ॥ अघोरेभ्यः सर्वात्मने अङ्गुष्ठा-,ऽथघो-
रेभ्योब्रह्मतर्जनी- । घोरघोरतरेभ्यश्चज्वलिन्यैमध्यमा-। सर्व-
तःशर्वसर्वेभ्योपिङ्गलाय अनामिकाभ्यां-। ॐजुंसः ज्योतीरू-
पायकनिष्ठि-। नमस्ते रुद्ररूपेभ्योदुर्भेद्यायमहापाशुपतास्त्राय
करतल- ॥ ॥ एवं षडङ्गन्यासः ॥ बहुरूपायविद्महे, कोटरा-
क्षाधी- । तन्नोऽघोरःप्रचो- । ३ ॥ अघोरेभ्योथ घोरेभ्यो
घोरघोरतरेभ्यश्च । सर्वथा शर्व सर्वेभ्यो नमस्ते रुद्ररू-

पेभ्यः १०८ ॥ (अथाघोरेश्वर्याः) नौम्यहं तां परंब्रह्मम हिषीं चित्स्वरूपिणीम् । ब्रह्मादिकारणातीतां परानन्दमयीं शिवाम् ॥ बहुरूपायवि-अघोरेश्वर्यैधी-तन्नोऽघोरीप्र-। २ ॥ परात्मिकायैवि-चित्स्वरूपिण्यैधी- । तन्नः शक्तिः प्र । ३॥ ह्रांहृदयायनमः ॥ ॥ मूलं ॐह्रींअघोरेश्वरिहूंफट्स्वाहा १०८ अस्य श्रीनिष्कलेश्वरमन्त्रस्य, सदाशिवऋषिः, अनुष्टुप्छन्दः, श्रीसच्चिदानन्दरूपः परमशिवः परमात्मादेवता, पूजनेविनियोगः॥ "ह्रांहृ"- । विश्वैकरूप विश्वात्मन् विश्वसर्गादिकारणम् । परप्रकाशवपुषं स्तुमः स्वच्छन्दभैरवम्॥ विश्वातीतं विश्वमयं भैरवाष्टकसंयुतम् । सुशान्तं निष्कलं शुद्धं सर्वव्यापि निरञ्जनम्। चिद्बोधानन्दगहनं तेजः सर्वाश्रयं भजे ॥ मध्यप्राणनिविष्टहंसपरमा यो रोमकूपाश्रयः प्राणः सूक्ष्मविमर्शशालिवपुषः सार्धत्रिकोट्यात्मकः । तान्मन्त्रात्मतया विलोमयति यः स्वच्छन्दनाथः परोदेवोऽसौ विदधातु भैरववपुस्तेजः परं शाश्वतम्॥ॐहूंनिष्कलस्वच्छन्दभैरवायस्वाहा१०८"ह्रां-

हृदयायह्रीं"। क्षंईशानवक्त्रायनमः,यंतत्पुरुषव-। रंअघोरव-।
वंवामदेवव-। लंसद्योजातवक्त्रायनमः,कपालेशादिभ्यो नमः
खड्गाद्यायुधेभ्योनमः । (अथ सप्तावरणपूजा) ह्रींअनन्ताय,
सूक्ष्मायनमः, शिवोत्तमाय, कूंएकनेत्राय, रंएकवक्त्राय, क्षां
एकरुद्राय, ऊंब्लूंत्रिमूर्तये, हूंह्रींश्रीकण्ठाय, श्रींशिखण्डिने-
नमः ।१। रांरींरूंनन्दिने, सांसींसूंमहाकालाय, हूंसांभृङ्गि-
रुद्राय, गूंगंगणपतये, व्रांवृषभाय, कुंकुमाराय, ह्रींसः
अम्बिकायै,हूंसूंचण्डीश्वरायनमः ।।२। ॐलंइन्द्रायवज्रहस्ता-
यनमः, रंअग्नयेशक्तिह, टंयमायदण्डह-। क्षंनैर्ऋतयेखड्गह-।
वंवरुणायपाशह-।यंवायवेध्वजह-। कुंकुबेरायगदाह-। शूंई-
शानायत्रिशूलह-। आंब्रह्मणेपद्मह-। ह्रांअनन्तायहलहस्ताय-
नमः । ३ ।। जमरयऊंजयायैनमः, क्षसरूंविजयायै रांसुभ-
गायै यांदुर्भगायै,समरयऊंजयन्त्यै, समरयऊंऊहिन्यै,हसर-
यऊंअपराजितायै, झंकरालयैनमः । ४ । ह्रांह्रींसः सूर्याय-
नमः, सहरऊंचन्द्रमसे, रहरऊंअङ्गारकायनमः, सहलऊं

बुधाय, रसऊंजीवाय, ह्रींभार्गवाय, क्षरमयऊंशनैश्चराय, गलूंराहवे, ह्रींकेतवे, ॐध्रुवाय, ॐअगस्त्यायनमः । ५ । अनन्तनागराजायनमः, वासुकिना-, पद्मना-, महापद्मना-, तक्षकना-, कार्कोटकना-शङ्खपालना-, कुलिकनागराजायनमः ।६। ॐवज्रायफट्नमः, शक्तयेफट्नमः, दण्डायफट्नमः-,खड्गाय-, पाशाय-, ध्वजाय-,गदायै-,त्रिशूलाय-, पद्माय-, हलाय, वराय, अभयाय, मुद्गराय, कृपाणाय, घण्टायै,डमरवे,परशवे,खेटकायफट्नमः ।७।। जम्बुद्वीपाय, प्लक्षद्वी-,शल्मलि,कुशद्वी,क्रौञ्च, शाक,पुष्करद्वीपायनमः ।। क्षारसमुद्राय, इक्षुसमुद्रय, सुरास,घृत, दधि,क्षीर,स्वादूदकसमुद्रायनमः ।। भवायदेवायक्षितिमूर्तये,शर्वायदेवायजलमूर्तये, रुद्रायदेवायाऽग्नि, पशुपतयेदेवायवायु, उग्रायमूर्तयेनमः देवायाऽकाश, महादेवायसूर्य, भीमायदेवायसोम, ईशानायदेवाययजमानमूर्तयेनमः ।। कपालेश्वरभैरवाय,शिखिवाहन,क्रोधराजभै, विकरालभै, मन्मथ,मेघनाद,सोम-

राज, विद्याराजभैरवाय, एतन्मण्डलमध्यगतस्वच्छन्दभैर-
वायनमः ॥ आत्मतत्त्वाय, विद्यातत्त्वाय, शिवतत्त्वाय,
इच्छाशक्तये,ज्ञानशक्तये,क्रियाशक्तये,मन्त्राध्वनेनमः, पदा-
ध्वने, भुवनाध्वने, वर्णाध्वने, तत्त्वाध्वने, कलाध्वने नि-
वृत्तिकलायैन्दमः,निवृत्तिकलाधिपतयेब्रह्मणे,प्रतिष्ठाकलायै,
प्रतिष्ठाकलाधिपतयेविष्णवे, विद्याकलायै,विद्याकलाधिप-
तयेरुद्राय, शान्ताकलायै, शान्ताकलाधिपतयेईश्वराय,
शान्त्यतीताकलायै, शान्त्यतीताकलाधिपतयेसदाशिवाय-
नमः॥ सर्वज्ञताहृ- तृप्तिशिरसेस्वाहा, अनादिबोधशिखायै,
स्वतन्त्रताकवचा-, अलुप्तनेत्राभ्यांवौषट्, अनन्तशक्तयेअस्त्राय-
फट् ॥ खड्गायनमः,खेटकाय,पाशाय, अङ्कुशाय,शरायनमः,
पिनाकाय, वराय, अभयाय, मुण्डाय,खट्वाङ्गाय, वीणाय,
डमरवे, घण्टाय, त्रिशूलाय, वज्राय, दण्डाय, परशवे,
मुद्गराय, क्षंतारादिभ्यईशानकलाभ्यः, यंशान्त्यादिभ्यस्त-
त्पुरुषकलाभ्यः, रंउमादिभ्योऽघोरकलाभ्यः,वंरजादिभ्यो-

वामदेवकलाभ्यः, लंसिद्धादिभ्यः सद्योजातकलाभ्योनमः। गणसहिताय ईश्वरायनमः, उमास-शिवाय, कांत्यायनीस-रुद्राय, गौरीस-वृषाकपये, कात्यायनीस-हराय, हैमवतीस-त्र्यम्बकाय, ईश्वरीस-श्रीकण्ठाय, शिवास-भवाय, भवानीस-ईशानाय, रुद्राणीस-शर्वाय, शर्वाणीस-महादेवाय, सर्वमङ्गलास-पशुपतये, अपर्णास-परमेश्वराय, पार्वती-सहितायशिवाय अर्घोनमः पुष्पंनमः।। (धूप चढ़ाना)।। महादेव महेशान जगदीश निरञ्जन। धूपं गृहाणदेवेश साज्यं गुग्गुलकल्पितम्।। भवायदेवाय ८ सपरिवाराय धूपं परिकल्पयामिनमः ।। (रत्नदीप चढ़ाना) ।। हिरण्यबाहो सेनानीरोषधीनांपते शिव। दीपं गृहाण कर्पूरकपिलाज्यत्रिवर्तकम्।। भवायदेवाय ८ रत्नदीपं परिकल्पयामिनमः ।। चामरं रजनीनाथमरीचिप्रभमुत्तमम्। हेमदण्डयुतं देव गृहाण गिरिजाधव।। "जय सर्वजनाधीश" इति भवायदेवाय८ चामरं परिकल्पयामिनमः।। तालवृत्तोद्भवं दिव्यं रत्नमञ्जीरमण्डितम्। सुखवातालयं

शम्भो व्यञ्जनं प्रतिगृह्यताम् । भवायदेवाय चामरंनमः ॥
(आईना चढाना) ॥ यस्य प्रसादमात्रेण विश्वं दर्पणबिम्बवत् ।
तस्मै ते परमेशाय मुकुरं कल्पयाम्यहम् । भवायदेवाय आदर्शं
परिकल्पयामिनमः ॥ नवरत्नमयं दिव्यं मुक्ताजालविभूषि-
तम् । गृहाण छत्रं भगवन् पूर्णेन्दुमण्डलप्रभम् । छत्रंनमः ॥
मृडानीशान मे सर्वानऽपराधानऽनेकधा । क्षम स्वामिन्प्रणा
मंमेगृहाणाऽष्टाङ्गसंयुतम् ॥ इति नमस्कारः ॥ भवायदे०
वासोनमः ॥ गणसहितस्येश्वरस्य उमासहितस्य शिवस्याऽ-
र्घ्यदानाद्यऽर्चनविधिः सर्वः परिपूर्णोऽस्तु ॥ अन्नंनमः
२ । "फट्अस्त्रायफट्" । भवायदेवाय अपोशानं नमः ॥
"फट् अस्त्रायफट्" । भवायदेवाय दक्षिणायै तिल- ॥
अपसव्येन । पितुः शिवगोत्रस्येश्वरस्य तस्य सांवत्सरिकेशिव
श्राद्धे शिवप्रीत्यातिलाम्भसा पुण्यवृद्धिरस्तु स्वर्गप्राप्तिरस्तु
शिवः प्रीतोऽस्तु सव्येन ॥ पुष्पाणि सन्तु तव देव मदि-
न्द्रियाणि धूपो गुरुर्वपुरिदं हृदयं प्रदीपः । प्राणा हवींषि

करणानि नवाक्षतास्ते पूजाफलं व्रजतु साम्प्रतमेष जीवः ॥ वाञ्छामि नाहमपि सर्वरसाधिपत्यं नेच्छे पुरन्दरपदं न पदं विधातुः । भूयो भवामि यदि जन्मनिजन्मनि स्यां त्वत्पादपङ्कजलसन्मकरन्दभृङ्गः ॥ जन्मानि सन्तु मम देव शताधिकानि माया च मे विशतु चित्तमबोधहेतुः । किञ्च क्षणार्धमपि त्वच्चरणारविन्दान्मापैतु मे हृदयमीश नमो नमस्ते ॥ अमृतेशमुद्रया सावित्राणि-ॐनमो नैवेद्यं ॥ ततोऽर्घेनदीपं संकल्पयेत् । नमोऽस्तु ते महादेवि सर्वोपद्रवनाशिनि । इच्छारूपे स्वभावस्थे नित्ये नित्यात्मके शिवे । कलाकलङ्करहिते भावभावान्तमध्यगे । अव्यक्ते कलनातीते शान्ते नित्येऽलये परे । लयोदयविनिर्मुक्ते नित्यतृप्ते निरामये । शक्तिबीजस्वभावस्थे चण्डीकापालिनीश्वरि । स्वाहाकारे स्वधाकारे परिपूर्णे कृपापरे । त्वं देवी सर्वदेवानां व्यापकर्त्री न संशयः । त्वया व्याप्तमिदं शैवं भूतसर्गे चराचरम् । स्वचक्रयोगिनीनां तु पारम्पर्यक्रमागतम् । अथा-

स्माकं कृतार्थाय सन्निधानं कुरु प्रभो ॥ ॐरक्तायैनमः, करालयै चण्डाक्ष्यै महोच्छ्वासायै करालिन्यै भीमवक्त्राय, दन्तुरायै महाबलायै ॥ ॥ चण्डी शूलकपालखड्गछुरिकाखट्वाङ्गमुण्डाण्ठिकारावैर्भूषितवामदक्षिणकरा वर्णैर्नवैर्भास्वरा । कल्पान्ताग्निसमप्रभैकवदना प्रेतोपरिस्थापिता देवी दूतिभिरावृता भगवती कुर्यात्स्वधाम्नि स्थितिम् ॥ ह्रींचण्डीकपालिनिस्वाहा १०८ । "अपसव्येन" । यमान्तकायैविद्महे,कालरात्र्यैधीमहि । तन्नश्चण्डी प्रचोद्-३ ॥ अद्यतावत्-पितुः शिवगोत्रस्य ईश्वरस्य सांवत्सरिके शिवश्राद्धे तस्य परलोके प्रकाशवृद्ध्यर्थं घोरान्धकारनिवारणार्थं इमं चण्डीदीपं परिकल्पयामिनमः ॥ ॥ "सव्येन" ॥ चण्ड्यै महालक्ष्म्यै अम्बापादकाभ्यो नमोनैवेद्यं निवेदयामिनमः ॥ ततः श्राद्धविधिं विसृज्य ॥ "सव्येन" तन्महेशायविद्महे ३ ॥ अद्यतावत्० महागणपतेः—कलशपूजनमच्छिद्रं ॥ आपन्नोऽसि० । अन्नपुरे पुष्पाणि ॥ सभार्यस्त्रिजगन्नाथ

दासस्तेऽहं व्यवस्थितः । कुरु पापक्षयं चाद्य देव्या सार्ध-
मितस्ततः ॥ सपुत्रदारः सधनः प्रभो दासोऽस्म्यऽहं तव।
पालनीयः प्रयत्नेन यावच्चन्द्रदिवाकरौ ॥ संसारार्णवम-
ग्नानां मत्पूर्वाणां महेश्वर । मदऽनन्तरजातानां मम मातृ-
कुलस्य च ॥ पतितानामऽनाथानां विषयेष्वऽभिलाषि-
णाम् । अन्येषां लुप्तपिण्डानां त्वमेवोद्धरणक्षमः ॥ यत्कि-
ञ्चिद्विधिना हीनं कृतं मूढधिया मया । क्षन्तव्यं भो
त्वया नाथ सर्वं च परमेश्वर ॥ भगवन्मत्कुलोत्पन्ना ये
जाताः स्वल्पबुद्धयः । दारिद्र्योपहता ये च दानधर्मवि-
वर्जिताः ॥ कुम्भीपाके निमग्नाश्च ये चान्ये दुःखिता
नराः । मुक्तिं ते यान्तु मनुजास्त्वत्प्रसादान्महेश्वर ॥
भगवन् भूतभव्येश मया चाऽज्ञानशक्तितः । ऊनाधिकं
विपर्यस्तं यत्किञ्चिद्विहितं प्रभो ॥ द्रव्यक्रियामन्त्रहीनं
पूर्णं मेऽस्तु त्वदिच्छया ॥ यावती तण्डुली सङ्ख्या भवत्य-
न्नेन सर्वदा । तावत्कल्पसहस्राणि दाता शिवपुरे वसेत् ॥

अनन्तभवनाद्विप्र यावत्सादाशिवं पदम् । पूरितं निखिलं तेन भवत्यऽन्नेन सर्वदा ॥ तावद्युगसहस्राणि शिवलोके महीयते ॥ शतं स्वर्णपुष्पाणां दत्त्वा पुण्यफलं च यत् । कोटिं स्रग्वसनानां तदनन्तं लिङ्गपूरणम् ॥ प्रयागे नैमिषारण्ये गङ्गासागरसङ्गमे । कुरुक्षेत्रे च यद्दानं राहुग्रस्ते दिवाकरे ॥ पृथिवीं सस्यसम्पूर्णां यो दद्याद्वेदपारगे । स्थानं न लभते तादृग्यादृशं लिङ्गपूरणात् ॥ भुवनान्भुवनेशांश्च तत्त्वतत्त्वानुपालकान् । तर्पयेन्मानवो धीमानन्नपूरे कृते सति ॥ ये ताराधिपखण्डशेखरमजं यक्ष्यन्ति लिङ्गान्तरे शुद्धान्तःकरणक्रियावशमयं भक्तिप्रणीतात्मकाः । ते भुक्त्वा विविधामनेन बहुशो भोगावलीमुज्ज्वलां सायुज्यं ध्रुवमाप्नुवन्ति सहसा तस्यैव शम्भोर्नराः ॥ करचरणकृतं वाक्० ॥ अपारसंसार० । उभाभ्यां ॥ पात्राणि चालयेत् । आचम्य । उदकलकं । उत्तिष्ठ देवदेवेश त्वं मण्डलसुरैः सह । रक्षास्थानपूर्वतो नित्यं धृततत्पुरुषाभिधः ।

तथा दक्षिणतो रक्ष धृताघोरात्मभैरवः । तथैवोत्तरतो रक्ष वामदेवोऽसि शङ्करः । वारुणाशागतो नित्यं सद्योजातोऽसि रक्ष माम् । ऊर्ध्वे रक्ष महेशान त्वमीशानोऽसि देवता । सर्वतः सर्वथा देव सर्वत्रास्मिन्भवाध्वनि । पाहि मां याहि देवेशि नित्यानन्दमयं पदम् ।। मन्त्रार्थाः ।। ब्राह्मण-पुष्पम् ।। नन्दन्तु साधकाः सर्वे विनश्यन्तु विदूषकाः । अवस्था शाम्भवी मेऽस्तु प्रसन्नोऽस्तु गुरुः सदा ।। इति अन्नपूरपूजाविधिः ।। ततोऽष्टकाविधिः ।।

अथ शिवाष्टका

"ॐस्वदक्षेऽस्त्रार्घपात्रं कृत्वा, तज्जलेन कुण्डसंस्कारं कुर्यात्" ॐ-फट् सेचनं करोमिफट् । -खननं- । मृत्स्नोद्धारं-।-कुट्टनं-।-शोषणं-। ॐफट् प्रोक्षणं करोमिफट् । ॐक्रियाशक्त्यात्मने कुण्डायनमः ।। इति कुण्डपूजा ।। ॐफट्वज्रीकरणं करोमि फट् । "इति कुण्डमध्ये वज्रीकरणं" ।। कुण्डमध्ये पूर्वाग्रमेकं दर्भं तत्पृष्ठे उत्तराग्रमेकं दर्भं संस्थाप्य यथा+। इति चतुष्पथमस्त्रेण

कुर्यात् । तत्पृष्ठे विष्टरं संस्थाप्य । तत्र । वागीश्वासनायनमः । ॐजुंभगवति वागीश्वरि आगच्छ २ सन्तिष्ठ २ सन्निधत्स्व २ सन्निरुद्धाभव २ सन्निधेहि २ जुंभगवति अवगुण्ठयामि नमः अमृतीकरोमिनमः ॥ अथध्यानं ॥ नीलोत्पलदल-श्यामामृतुमच्चारुलोचनाम् । सर्वलक्षणसम्पूर्णां सर्वाभरण-भूषिताम् ॥ ध्यात्वा चैवंविधां देवीं स्थापयेत्कुण्डम-ध्यतः । ब्रह्मस्थानोपविष्टां च द्वाराभिमुखभद्रदाम् ॥ इतिध्यात्वा । ॐभगवति वागीश्वरि पाद्यं गृहाणस्वधा, ॐभगवति वागीश्वरि अर्घ्यं गृहाणस्वधा । एवं । समा-लभनं आदत्स्व । अक्षतपुष्पाणि गृहाणवौषट् । धूपं गृहाणहूंफट् । दीपं गृहाणवौषट् ओंह्रांवागीश्वर्यैनमः इति संपूज्य । ईशानशिरसमुत्तानामृतुमतीं भावयित्वा सन्नि-धानाय योनिमुद्रां प्रदर्शयेत् । (सूर्यकान्तादारणितः श्रोत्रि-यागारतोऽपि वा । पात्रेण पिहिते पात्रे वह्निमानाययेत्ततः) एवं कांस्यपात्रस्थमग्निमानीय । ॐफट् अग्नेः प्रोक्षणं करोमिफट् ।

इति सम्प्रोक्षयेत् । ॐफट्निरीक्षणंकरोमिफट् । इति निरी-
क्षयेत् । ॐफट्अग्नेरवगुण्ठनं करोमिफट् । इत्यवगुण्ठ-
येत् ॥ ॐरंज्ञानशक्त्यात्मने अग्नयेनमः इति पूजयेत् ॥
ॐफट्क्रव्यादं निष्कर्षयामिफट् इति मन्त्रेणदर्भकाण्डद्वयं
प्रज्वाल्यनैर्ऋतेक्षिपेत् ॥ ततस्तिलाहुतिः ॥ ॐरंअग्नेःक्रव्याद्-
शुद्धिं करोमिस्वाहा ५ ॥ हूंदर्भकाण्डत्रयेणाग्नेराच्छादनं
करोमिहूं "इतिदर्भत्रयेणाऽग्निंप्रच्छाद्य । ततोऽग्निपात्रं हस्तद्वयेन
गृहीत्वा नासाग्रेणाघ्रायाऽग्नेश्चैतन्यतया ज्वालाग्रं मूलेन गृहीत्वा
वामनासापुटेन पूरकेनाऽग्निं हृदि प्रविश्य स्वचैतन्यानलेनैकी-
कृत्य बहिर्दक्षनासापुटेन रेचकेन मूलमुच्चार्य पात्रे क्षिपेत्" ॥ इति
चैतन्याऽपादनम् ॥ पुनर्मूलेनसाङ्गेनपूजनम् ॥ तेनैवामृतीकरणम् ।
स्वयं "अहमेवशिवः" इति दार्ढ्येन शिवाभिमानं गृहीत्वा
वह्निं शुक्ररूपं ध्यात्वा मायां वागीशीं परिकल्प्य "ॐ वह्निं योनौ
भ्रामयामिनमः" इति त्रिःपरिभ्रम्य तस्या योनौ क्षिपेत् ॥ इति
कुण्डान्तरे क्षिप्त्वा पुनरस्त्रेण वह्निं प्रोक्ष्य "गर्भरक्षार्थं वागी-

शीयोनिं प्रच्छादयामिनमः" इतिदर्भैर्योनिप्रच्छादनम् ॥
"ॐफट्अक्षवाटं कल्पयामिनमः" इत्यऽष्टासुदिक्षु साग्रैरूर्ध्व-
मुखैर्दर्भैरक्षवाटः ॥ "ॐफट्वागीश्याः कङ्कणंबध्नामिनमः
फट्फट्फट्फट्फट्फट्फट्" इति वागीश्या दर्भपवित्रं दद्यात्।
दक्षिणहस्तस्थितं कङ्कणरूपं ध्यायेत् ॥ ततोऽन्यान्संस्कारांस्त्रिभि-
स्त्रिभिस्तिलाहुतिभिरुत्तानपाणिना कुर्यात् ॥"ॐजुंरंअग्नेर्गर्भाधानं
करोमिस्वाहा ३। ॐजुंरंअग्नेर्गर्भाधानं सम्पद्यतांस्वाहा ३"॥
"ॐव्योंअग्नेपुमान् भवनमः" इति कुशाग्रेणजलबिन्दुंक्षिपेत्।
"ॐव्योंअग्नयेपुंसेनमः" इति पूजनं॥ ॐजुंअग्नेः पूर्ववक्त्रक-
ल्पनां करोमिस्वाहा ३। एवं सम्पद्यतांस्वाहा ३। ॐहूंअग्ने-
र्नेत्रत्रयक० ३ एवं ३॥ ॐरंअग्नेः सीमांक० ॥ ॐरंअग्नेःसः-
शिवतत्त्वमुखं कल्पयामिस्वाहा ३। एवंस-। ॐरंअग्नेःजुंविद्या-
तत्त्वहृदयं क० ३। ॐरंअग्नेःॐआत्मतत्त्वपादौक० ३॥
ॐरंअग्नेःसीमाकल्पनांकरोमि० ३। ॐरंअग्नेः पादौ करो-
मिस्वाहा ३। ॐरंअग्नेः जंघे करोमिस्वाहा ३ एवं सम्पद्यतां

स्वाहा। ॐरंअग्ने: जानू, ॐरंअग्ने: गुह्यं, कटिं, मेढ्रं, नाभिं, उदरं, हृदयं, हस्तौ, बाहू, स्कन्दौ, ग्रीवां, मुखं, अङ्गप्रत्यङ्गसन्धीः, ॐरंअग्नेः समस्तशरीरं करोमिस्वाहा ३ एवं सम्पद्यतांस्वाहा ३ ॥ ॐरंअग्नेः सीमन्तोन्नयनंकरोमि ३ एवं सम्पद्यतांस्वाहा ३ ॥ ॐफट्अग्निंजीवापयामिस्वाहा ३। ॐअग्नेप्रसवामिमुखोभवनमः "इति विज्ञप्य" ॥ (वागीश्याऽत्राऽग्निः कृतः) इति विभाव्य। "ॐफट्अग्नयेनमः" इति पूजनम् ॥ ॐहूंअग्नेजातकर्मकरोमिस्वाहा ३ एवं सम्प० ३। ॐफट्अग्नेः सूतकशुद्धिर्भवतुफट्स्वाहा ३। ततः कुण्डं अस्त्रार्घ्यपात्राम्भसा प्रोक्षयेत् ॥ ॐफट् अग्निंपरिसमूहामि फट् ३। एवं। ॐफट् पर्युक्षामि फट् ३। परिषिञ्चामिफट् ३ ॥ ॐफट्यज्ञस्य सन्ततिरसि ॐफट्यज्ञस्यत्वासन्तत्यै आस्तृणामिफट्॥ (पूर्वेत्रयः पुनः पञ्च पञ्चापि च त्तरास्त्रयः। प्रक्षेप्या अस्त्रमन्त्रेण ह्याचार्यैर्यज्ञसिद्धये ॥) ततोहस्तमात्रं समिधाचतुष्टयं (ॐफट्परिधीन् आस्तृणामिफट्) इति

पूर्वोत्तराग्रान्, पूर्वादिषु संस्थाप्य तदुपरि। "पूर्वे" ब्रह्मणे नमः। "दक्षिणे" रुद्रायनमः। "उत्तरे" सदाशिवायनमः। पश्चिमे" विष्णवेनमः। इति सपुष्पं विष्टरचतुष्टयं दद्यात्॥ ज्वालालिङ्गोपरि पात्रं सविष्टरं संस्थाप्य परमेश्वरं, परितो लोकपालांश्चपूजयेत्॥ ॐजुंसःज्वालालिङ्गस्थायाऽमृतेश्वरभैरवायनमः। ॐजुंसःअमृतलक्ष्म्यैनमः। इति सम्पूज्य, लोकपालान्पूजयेत्॥ लंइन्द्रायवज्रहस्तायनमः, रं अग्नयेश०, टंयमायद० क्षंनैर्ऋतयेख०, वंवरुणायपा०, यंवायवेध्व०, कुंकुबेरायगदाह०, हौंईशानायत्रि०, आंब्रह्मणेप०, ह्रौंअनन्ताय हलहस्तायनमः। इतिलोकपालान्सम्पूज्य, लोकपालायुधमुद्राः प्रदर्शयेत्॥ ॐज्योंजुंअग्नेर्निष्क्रमणं करोमिस्वाहा ३ एवंसंपद्यतांस्वाहा। ३॥ ॐज्योंजुंआदित्यदर्शनं क० ३। एवं सं० ३। ततो वागीश्यादक्षहस्तस्थितं कङ्कणं विमुच्य। वागीश्याः कङ्कणमोक्षंकरोमि० ३ एवं० ३॥ मूलेन। "अग्ने शिवाग्निर्भवनमः" इति विज्ञप्य। "ॐजुंसः शिवाग्नयेनमः"।

इति पूजनं। ॐजुंसः अग्नेः शिवाग्निरितिनामकर्म करोमिस्वाहा ३ एवं सम्पद्यतांस्वाहा ३ ॥ ततोध्यानं। रक्तं जटाधरं वह्निं चिन्तयेद्रक्तवाससम्। वामोत्सङ्गगतस्वाहं द्विभुजं रक्तलोचनम् ॥ शुकपृष्ठासनं देवं ज्वालाश्मश्रुविभूषितम् ॥ ईदृशं चिन्तयेद्देवं हव्ये कव्ये च पावकम् ॥ ॐजुंसःशिवाग्नये स्वाहा ३ ॥ ततः पूर्वे। ॐब्रह्मणेनमः इतिसम्पूज्य । तिलेन ॐब्रह्मणेस्वाहा ३ । "ब्रह्मन्! क्षम्यतां" इति विसृज्य, पूर्वविष्टरं मोचयेत्। दक्षिणे। ॐरुद्रायनमः इतिसम्पूज्य । तिलेन। ॐरुद्रायस्वाहा ३ "रुद्र! क्षम्यतां" इति विसृज्य, दक्षिणविष्टरं मोचयेत् ॥ उत्तरे। ॐसदाशिवायनमः इतिपूजा। ॐसदाशिवायस्वाहा ३ "सदाशिव! क्षम्यतां" इति विसृज्योत्तरविष्टरं मोचयेत्। पश्चिमे । ॐविष्णवेनमः इतिपूजा । ॐविष्णवेस्वाहा ३ "विष्णो! क्षम्यतां" इति विसृज्य, पश्चिमविष्टरं मोचयेत् ॥ ततः । ॐवागीश्वर्यैनमः इति पूजा। ॐह्रांवागीश्वर्यैस्वाहा ३ "सृष्टिस्थितिलये दक्षे भोगमोक्षप्रदे

शिवे। वागीश्वरि नमस्तेऽस्तु गच्छ देवि स्वविष्टपम्"
इति विसृज्य। पुनः, लालानिवारणार्थं हस्तप्रमाणचतुर्विंशतीध्मा-
होमः (२४ चौवीस समिद्धोंका होम करना)॥ ॐजुंसः शिवा-
ग्नितर्पयामिस्वाहा २४ ॥ ॥ (अथस्रुक्स्रवसंस्कारः ॥) ॐ-
फट्तापनं करोमिफट् इत्यग्नौतापनं ॥ फट्प्रोक्षणं करोमिफट्
इतिशिवाम्भसा प्रोक्षणम्। ॐहूंअवगुण्ठयामिहूं इतिलिङ्ग-
मुद्रयाऽवगुण्ठनं ॥ पुनरग्नौ त्रिर्भ्रामणं अस्त्राम्भसा प्रोक्षणम्।
दर्भाग्रेण तदग्रस्पर्शः। पुनः प्रोक्षणमग्नौ त्रिर्भ्रामणं। दर्भ-
मध्येनतन्मध्यस्पर्शः। प्रोक्षणं त्रिर्भ्रामणं। दर्भमूलेन तन्मू-
लस्पर्शः। प्रोक्षणं त्रिर्भ्रामणं॥ "ततः स्ववामेदर्भपृष्ठे स्रुक्स्रुवा-
वऽधोमुखौ संस्थाप्य" ॥ ॐशिवशक्तिभ्यांनमः" इतिपूजा।
गन्धादि। "उर्ध्वमुखौकृत्वा" ॐशिवायनमः, ॐशक्तये
नमः ॥ ॥ (अथाज्यसंस्कारः ॥) आज्यस्याधिश्रयणं,
प्रस्रुतस्य संप्रोक्षितपात्रे स्थापनं "ॐहः फट्प्रोक्षणंकरो-
मिफट्" इत्यस्त्रेण प्रोक्षणं "ॐफट्तापनंकरोमिफट्" "ॐ-

हूं अवगुण्ठयामिहूं" इत्यवगुण्ठनं । "ॐहैं उद्भासनं करोमिहैं" इत्याग्नेयेदिशि ऊर्ध्वेधारणं दीप्तिस्फुटार्थं । "ॐह्रः फट् भ्रामयामिफट्" इतिकुण्डस्य परितोऽस्त्रेण त्रिर्भ्रामणम् । योनौ स्थापनं ॥ ततः प्रादेशमात्रं दर्भद्वयं नागपाशाकारं करद्वयाऽनामिकाऽङ्गुष्ठाभ्यामाऽदायाऽज्यस्य त्रिवारं पराङ्मुखानयनं(उत्प्लवणं) त्रिवारं प्राङ्मुखानयनं (संप्लावनं) च समलभागाऽपनयनाय, सारभागाऽऽहरणायच, मूलेन कुर्यात् ॥ ॐह्रःफट्संप्लवनं करोमिफट्" तदनु दर्भोल्मुकं प्रज्वाल्याऽज्यपात्रमध्ये क्षिपेत् । मूलेन "ॐआज्ये प्रोक्षणं करोमिनमः" इति स्वनेत्रतेजोनिरीक्षणेन परतेजोमयमाज्यं कुर्यात् ॥ (इत्यवद्योतनानामसंस्कारः ॥) पुनर्ज्वलद्दर्भोल्मुकेन सर्वतो भ्रामितेन नीराजनं ॥ तदेव ज्वलदुल्मुकं "ॐहूंपर्यग्निकरणं करोमिनमः" इत्यग्नौक्षिपेत् ॥ "ॐह्रःफट्प्रोक्षणं करोमिफट्" इति शिवाम्भसाप्रोक्षणं । मूलाङ्गैरभिमन्त्र्याऽमृतमुद्रयाऽमृतीकृत्यैवं द्वादशसंस्कारान्कृत्वाऽऽज्यं मूलेनार्चयेत् ॥ (इत्याऽज्यसंस्काराः) ॥ लंसद्योजातवक्रे-

णाऽघोरवक्त्रमऽनुसन्दधेस्वाहा ३ यंतत्पुरुषवक्त्रेणधंईशा-
नवक्त्रम्ऽनुसन्दधेस्वाहा ३ इति जुहुयात् ॥ ततः; ॐहूँनाडि-
त्रयकल्पनांकरोमिनमः" इत्याज्यपात्रे पूर्वाग्रं दर्भद्वयं स्थाप-
यित्वा भागत्रयेण नाडित्रयं ध्यायेत् ॥ तत्र मध्ये । ॐह्रां-
इच्छाशक्तयेनमः, ॐजुंवह्निधाम्नेसुषुम्णायैनमः । वामे ।
ॐह्रींक्रियाशक्तयेनमः, ॐसः सोमधाम्नेइडायैनमः । दक्षे ।
ॐहूंज्ञानशक्तयेनमः, ॐॐसूर्यधाम्नेपिङ्गलायैनमः ॥ ॥
अथाग्नेः ॥ ॐशिवाग्नेर्भागत्रयकल्पनां करोमिनमः" इत्यू-
र्ध्वमुखं प्रादेशमात्रं ससिद्धाद्वयं दत्त्वा भागत्रयेण नाडित्रयं
ध्यायेत् ॥ स्ववामेवह्निदक्षेपूजनं । ॐॐपिङ्गलाश्रयायसूर्या-
यनमः ॥ मध्ये । ॐजुंसुषुम्णाश्रयायाग्नयेनमः ॥ स्वदक्षे
वह्निवामे । ॐसः इडाश्रयायसोमायनमः । इति संपूज्य ।
"ॐजुंसः अग्नयेस्वाहा" इत्याज्यदक्षभागाद्वह्निदक्षभागे । "ॐ-
जुंसः सोमायस्वाहा" । इत्याज्यवामभागाद्वह्निवामभागे ।
"ॐजुंसः अग्नीषोमाभ्यांस्वाहा" इत्याज्यमध्यभागाद्वह्निमध्य-

भागे जुहुयात् । इति शुक्लपक्षे ॥ (अथकृष्णपक्षे) ॥ "ॐ जुं-सः अग्नयेस्वाहा" इत्याज्यदक्षभागाद्वह्निदक्षभागे । "ॐ जुंसः सूर्यायस्वाहा" इत्याज्यवामभागाद्वह्निवामभागे । "ॐ जुंसः अग्निसूर्याभ्यांस्वाहा" । इत्याज्यमध्यभागाद्वह्निमध्यभागे हुनेत् ॥ (इति चक्षुषीहोमः) ॥ ॐ जुंसः शिवाग्नेः प्राशनं करोमिस्वाहा ३ एवं सम्पद्यतांस्वाहा ३ ॥ (अथाज्यदर्शनम् ॥) आज्यं तेजः समुद्दिष्टमाऽज्यं पापहरं परम् । आज्यं सुराणामाहारमाज्ये लोकाः प्रतिष्ठिताः ॥ दिव्यन्तरिक्षभौमादेर्यत्ते किल्बिषमागतम् । तत्सर्वमाज्यसंस्पर्शाद्विनाशमुपगच्छतु ॥ आत्मनोवाङ्० पितुर्वा मातुः परलोके शिवपदवीप्राप्त्यर्थं शिवाग्नाविदमाज्यमर्पयामिनमः ॥ आदौ पूर्णा ॥ अग्निंज्वालामयं देवं भूषयन्तमनेकशः । ज्वालाभिर्मण्डिताकाशं साक्षमालाकमण्डलुम् ॥ वरदाभयहस्तं च पुष्पवर्णं हुताशनम् । शुकपृष्ठासनं देवं शक्तिहस्तं चतुर्भुजम् ॥ मृगाजिनेन सम्बद्धं

यजमानवरप्रदम् । त्रिनेत्रं पञ्चवक्त्रं च होमकाले च चिन्तयेत् ॥ एवं ध्यात्वा भगवन्तं सर्वसिद्धिप्रदायकम् ॥ ॐजुंसः शिवाग्नेश्चूडाद्याः संस्कारा बाल्यादिसंस्थिताः प्राशनान्ताश्च सर्वे "पूर्णाहुत्या" सम्पूर्णाः सन्तु वौषट् ॥ ॥ अथ चरुसंस्कारः ॥ ॥ स्ववामे कुण्डसमीपे पूर्वाग्रान्दर्भानास्तीर्य "स्वाधारशक्त्यैनमः" इति संपूज्य, तत्र पुरोडाशादिकं चरुं संस्थाप्य, मूलेन साङ्गेन सम्पूज्याऽमृतीकृत्य दर्भकाण्डं प्रज्वाल्य, "फट् नीराजनां करोमिफट्" विधाम्भसाऽभ्युक्ष्याऽस्त्रेण सविष्टरं मेक्षणमग्रतः स्थापयेत् । "ॐजुंसः सम्पातं करोमि"स्वा" इत्यऽग्नौ "हा" इति चरौ ३॥ ॐजुंसः सुतप्तोभव"स्वा" इत्यग्नौ "हा" इति चरौ ३ अग्नावधिश्रित्य ॐजुंसः स्वशीतोभव"स्वा" इतिचरौ "हा" इत्यग्नौ । ३ ॥ ॐहुःफट्चरुमाच्छादयामिनमः "इतिदर्भैराच्छादनं" । ॐहुंचरुंसंरक्षयामिनमः "इतिपुष्पं" ॥ (ततोनवजिह्वा ज्वालालिङ्गोपरिपूजयेत्) ॐप्रभायैनमः, दीप्त्यै, प्रकाशायै,

अर्चायै,मरीच्यै,स्थापिन्यै,रुच्यै,करालायै,लेलिहायैनमः ॥ "कुण्डमध्ये नवजिह्वाः पूर्वादितः" ॥ पूर्वे । ॐराज्यार्थायैनमः, दाहजनन्यै, मृत्युदायै, शत्रुहारिण्यै, वशीकर्त्र्यै, उच्चाटिन्यै, अर्थदायै, मुक्तिदायै, "मध्ये" ॐसर्वसिद्धिप्रदायैनमः "इतिसम्पूज्य । स्वाहान्तेन होमयेत् । यथा" ॐप्रभायैस्वाहा, १८ । पूर्णा । द्वारेशा (पृ० ३००) । ॐजुंसः शिवाग्नेर्जिह्वाः कल्पयामिस्वाहावौषट् ॥ द्वितीयापूर्णा । ॐजुंसःशिवाग्नेर्जिह्वासन्निधिरस्तुस्वाहावौषट् ॥ ततश्चरोः किञ्चिद्भागेन नैवेद्यं कृत्वाऽन्यभागं सघृतस्रुवेण यथाशक्ति देवेषु होमयेत् । ॐजुंसः अमृतेश्वरभैरवायस्वाहा ८ ॐजुंसः अमृतलक्ष्म्यैस्वाहा ८ । ॐहृदयायस्वाहा, जुंशिरसेस्वाहा, सः शिखायै, ॐकवचायहुंस्वाहा, जुंनेत्राभ्यां,सःअस्त्रायफट्स्वाहा ॥ ॐअघोरभट्टारकायस्वाहा ३ अघोरेश्वर्यै स्वाहा ३ निष्कलाय स्वाहा ३ लंसद्योजातवक्त्रायस्वाहा, वंवामदेव०, रंअघोरव०, यंतत्पुरुष०, क्षंईशानवक्त्रायस्वाहा । ह्रींचण्डीकापा

लिन्यैस्वाहा ३ ॐआनन्देश्वरभैरवायस्वाहा सुरादेव्यैस्वाहा
"ततः पापमक्षयार्थं मातापित्रोश्चतुर्दशाऽहुतीः पितृणामाहुतित्रयं त्रयं दद्यात्। यथा" ॐह्रंह्रांह्रींह्रूंह्रैंह्रौंह्रः पितुरमुकस्य शिवगोत्रस्येश्वरस्य उद्धारं करोमिस्वाहा १४ एवं, पितामहस्य ३ प्रपितामहस्य ३ ॥ इत्थमेव, मातुःशिवगोत्रायारुद्राण्या बलविक्रमण्या उद्धरणं करोमिस्वाहा १४ पितामह्याः ३ ३ प्रपितामह्याः ३ दत्त्वा ॥ (द्वात्रिंशदक्षरोऽघोरो व्योमव्यापी दशाक्षरः । भवात्मा बहुरूपश्च पापहर्ता प्रकीर्तितः) ॐअघोरभट्टारकायस्वाहा ३ ॐआईऊंव्योमव्यापिणेफट्स्वाहा ३ ॐबहुरूपभैरवायस्वाहा ३ ॐभूःस्वाहा, ॐभुवः, ॐस्वः, ॐमहः, ॐजनः, ॐतपः, ॐसत्यंस्वाहा । ततो ये देवाः पूजितास्तेषामऽपि एकैकाहुतिर्देया। सप्तावरणदेवताभ्यः स्वाहा ॥ ॥ "ततो गुरुशिवपूजनम्" गुरवेशिवाय गन्धादि । अपसव्येन । पितुः शिवगोत्रस्य वा मातुः शिवगोत्रायाः परलोके पुण्यवृद्ध्यर्थं शिवाष्टकप्रीत्या तिलाम्भसा पुण्यवृ-

द्धिरस्तु शिवाष्टकादेवताः प्रीताः सन्तु ॥ मध्यप्राणेति (पृ० २५६–१३) ॐहूंभैरवाप्यायनमस्तुस्वाहावौषट् अग्निसन्निधिरस्तु ॥ पूर्णामत्र न दद्यात् ॥ श्राद्धं यथावद्ब्राह्मणभोजनपिण्डदानादियुतं सम्पाद्य पूर्णां यथा ॥ हारमनोहरवक्षसमायतचक्षुषमहीशकृतभूषम् । पञ्चवदनं सितरुचिरुचिरं शशिखण्डमण्डितशिखण्डम् ॥ उद्यमनपाशविशिखामनवरखट्वाङ्गवल्लकीघण्टाः । दण्डद्रुघनाभ्यां सह वहन्तमिव वामबाहुनवकेन ॥ खड्गाङ्कुशविशिखाऽभयकपालडमरुत्रिशूलपविपरशून् । दक्षैर्दोर्भिर्नवभिः कलयन्तं चिन्तयेच्च भगवन्तम् ॥ सितमुपरितनवदनं पुरतः पीतं च मेचकं दक्षं वाममरुणं च । सितरुचिरुचिरं देवस्य पश्चिमं विचिन्तयेत् ॥ एवमुद्भासिताशेषभगवद्देहशालिनीम् । चिन्तयेदस्य चोत्सङ्गगामघोरीश्वरीमपि ॥ ध्यात्वा ॐजुंसः पितुः वा मातुः परातृप्तिः न्यूनाधिकाऽन्यथाकृतकर्मप्रायश्चित्तनिवृत्तिपूरणं चास्तु वौषट्स्वाहा "इतिपूर्णा"

गुह्याति० इतितर्पणं। ततो भस्मतिलकं। शिवमस्तु यजमानस्य च्छिद्रं माभूत्कदाचन। देवदेव्याः प्रसादेन रक्षरक्षाऽस्तु मे भृशम् ॥ ॥ अग्निरितिभस्म, वायुरिति भस्म, व्योमेतिभस्म, स्थलमितिभस्म, जलमितिभस्म, सर्वंहवाइदं भस्म, एतानि चक्षूंषि भस्मानि, अग्निरिति भस्मना ललाटमऽनुलिप्य" ॥ पशुपाशविमुक्तोभवति सर्वतीर्थस्नानफलं प्राप्नोति सर्वकर्माऽच्छिद्रं भवति ॥ ततःशाक्तिककुशजलेन स्रुचा चतुर्दिक्षु धारापातं कुर्यात् ॥ ॐफट्शिवाग्निंविसृजामिफट् इतित्रिः ॥ ततोऽग्नौक्षमापुष्पाणि ॥ "धर्मं देहि धनं देही" त्यादि ॥ तर्पितोऽसि विभो भक्त्या होमेनाऽनलमध्यतः। होमद्रव्येषु यत्पुण्यं तत्सर्वमात्मसात्कुरु ॥ संसारेऽस्मिन्विभो मोहात्प्रायश्चित्तं तु यद्गतम्। तत्सर्वं नाशमायातु होमादऽस्मान्महेश्वर ॥ क्षमस्व मन्त्रनाथाय नित्यानन्दधराय च। धर्मार्थकाममोक्षाय पुनरागमनाय च ॥ "इति बाह्याग्नितेजः स्वात्माग्नौ स्थापयेत् ॥" इति शिवाष्टकाविधिः ॥

अथ शिवान्वष्टकाविधिः (शाक्तंश्राद्धं) ॥

आदौ दीपाग्रे वृत्तत्रये व्योम त्रयं शालिचूर्णेन लिखित्वा शिष्यं प्राणायामं कारयेत्। शोषणादीनि च,ततो मूलाधारादुत्थितां सूक्ष्मनादमयीं वह्निशिखांकल्पां सुषुम्णापथा ब्रह्मरन्ध्रं प्रापय्य द्वादशान्तःस्थद्रवत्सम्पूर्णचन्द्रात्पतंतीं, तेनैव मार्गेण स्वधावृष्टिस्कन्दस्थाने स्वपितरमाऽप्यायन्तीं ध्यात्वा, ततोहृदि स्वधार्णवोपरि रक्तपुष्पोपविष्टां त्रिनेत्रामेकवक्त्रां खट्वाङ्गकाघडमरून्सव्यैर्भुजैर्वामैः च्छुरिकासिमुण्डानि बिभ्रतीं प्रेतारूढां रक्तां चण्डीं सञ्चिन्त्य मानसैः पञ्चोपचारैः सम्पूज्य, आनन्दपात्रे "ॐह्रींचण्डिकामालिनिस्वाहा" इति सम्पूज्य, **यमान्तकायैविकालरात्र्यैधी॰ तन्नोचण्डीप्र॰ ३ ॥ पराशक्तिकदीक्षाफलप्राप्त्यर्थं तेजोमयेतापत्रये अमुकस्य शाक्तं श्राद्धमहं करिष्ये।** इतिसङ्कल्प्य। व्योमत्रये न्यसेत्। व्योमत्रयस्य कर्षूत्रयसंज्ञा। "**कर्षन्ति विश्व**"मिति कर्षाइतिवचनात्। **कर्षूषु** दक्षिणाग्रान्दर्भानास्तीर्य तत्र, **आधारशक्त्यैस्वधानमः, वामायै, ज्येष्ठायै, ॐरौद्र्यै-**

स्वधानमः। पात्रमध्ये। भद्रकाल्यैस्वधानमः ॥ इतिकर्पत्रय-पूजनम्॥ ततश्चरुं शाक्तं बलवीर्यं परिकल्प्य। "सः सः अन्नाय शक्तबलायनमः" इति चरुं सम्पूज्य। "अन्नतिलमध्वाऽज्य-पयोभि"रित्यादि, "अग्निष्वात्तेभ्योवि-बर्हिषद्भ्योधी-तन्नः सोमः प्र-। ३। यमान्तकायेवि० ३ "पिण्डवर्तनमन्त्रः"। (ह्रींचण्डीकापालिनिस्वाहा हूंभगवति नरकार्णवशोषणि सद्योजातभैरव समयं पूरय २ परज्योतिर्विलीनस्याऽ"मुकस्य" पितुः शिवगोत्रस्य रुद्रस्य पिण्डमुत्पादयामिस्वाहा) अद्यतावत्। पितुः रुद्रस्य इच्छाशक्तिगर्भः शाक्तोऽयं पिण्डः स्वधानमः २ "इत्येकंपिण्डं दद्यात्"॥ "अन्नतिले" त्यादि,अग्निष्वात्तेभ्यो(ह्रींचण्डी-पिण्डमुत्पादयामिस्वाहा) अद्यतावत् पितुः रुद्रस्य ज्ञानशक्तिगर्भः शाक्तोऽयं पिण्डः स्वधानमः। २। "अन्नतिले"त्यादि। अग्निष्वात्तेभ्यो-(ह्रींचण्डीका-उत्पादयामिस्वाहा) अद्यतावत् पितुः रुद्रस्य क्रियाशक्तिगर्भः शाक्तोऽयं पिण्डः स्वधानमः, इतितृतीयं पिण्डं दद्यात्।

वासांसि स्वधानमः । वीरान्नं स्वधानमः । लेपं निवार्य । पित्रे रुद्राय शाक्तेश्राद्धे गन्धार्घपुष्पधूपदीपभक्ष्यभोज्यतिलमधुहिमपानादिस्वधानमः ॥ ततोविशेषपूजा ॥ ॐह्रींचण्डिकापालिनिस्वाहा मत्पितरं अमुकं भैरवगोत्रं रुद्रं नित्यतृप्तं नित्यानन्दमयं सम्पादय २ स्वाहा ॥ १ ॥ ॐह्रींचण्डिकापालिनिस्वाहा मत्पित्रे पादसरोजमूलेस्थितिं प्रयच्छ २ स्वज्ञानविभागं सन्दर्शय २ समीपतां कुरु २ अमेये मायामये परापरविभागेस्वाहा ॥ २ ॥ ॐह्रींचण्डिकापालिनिस्वाहा मत्पिता भैरवगोत्रो रुद्रो देवीधाम्नि जयतुस्वाहा ॥३॥ इतिसम्पूज्य ॥ ततो दीपपूजा ॥ ॐहसरक्षमलवऊं-उच्चण्डभास्करायस्वधानमः, ह्रींश्रींहंप्रभायै,[१] । ॐवं ह्रींश्रींहंप्रतापिन्यै,[२] ह्रींश्रींहंपिङ्गलायै,[३] ३ँतमोहारिण्यै,[४] ३ँचण्डायै[५] ३ँभास्वरायै,[६] ३ँज्येष्ठायै,[७] ३ँअरुणायै,[८] ३ँविश्वबोधिन्यै,[९] ३ँरसापहारिण्यै,[१०] ३ँतुष्टायै,[११] ३ँमनोन्मन्यैस्वधानमः[१२] (एता द्वादशमासेषु पूज्या दीपे विधानतः ॥)

ततोऽग्नौ । ॐह्रीश्रींआंदीप्तायैनमः,[१] । ३ँआंदहन्यै,[२] ३ँइं-घोषायै,[३] ३ँईंकरालायै,[३] ३ँउंघोरविक्रमायै,[५] ३ँऊंरौद्र्यै,[६] ३ँऐंलेलिहानायै,[७] ३ँऐंविद्युतायै,[८] ३ँॐरसभक्षिण्यै,[९] ॐऔंम होच्छुष्मायै, इत्यग्निं सम्पूज्य । ततःपात्रे । हस्त्रींसः सोमा-यनमः ॥ ह्रींश्रींसं अमृतायैनमः,[१] ३ँह्लादिन्यै,[२] ३ँज्योत्स्नायै,[३] ३ँस्वन्दिन्यै,[४] ३ँसुमनायै,[५] ३ँउषायै,[६] ३ँमनोन्मनायै,[७] ३ँमालिन्यै,[८] ३ँविमलायै,[९] ३ँवामायै,[१०] ३ँमहानन्दायै,[११] ३ँगोमायै,[१२] ३ँभद्रकाल्यै,[१३] ३ँरोहिण्यै,[१४] ३ँव्यापिन्यै,[१५] ३ँरसवर्षिण्यैनमः[१६] ॥ इतिपात्रे सम्पूज्य, शेषमन्नं पात्रे संस्थाप्य वामावर्तेनारार्तिकां कुर्यात् ॥ (पाताले चान्तरिक्षे च मध्ये वा भुवनत्रये । येकेचित्पितरः सर्वे तृप्यन्तु चरुपानकैः) इति । ततः त्रयीसप्तचतुर्युग्ममयीति पिण्डविसर्जनम् ॥ ततोऽग्निं विसृज्य । धर्मं देहि । आह्वानं । "सभार्यस्त्रिजगन्नाथ" ॥ (पृ० ३३६) इत्युत्तपूरपुष्पाणि

इतिमासानुमासिकश्राद्धविधावन्वष्टका समाप्ता ॥

अथ सांवत्सरिकशिवश्राद्धविधिः

ॐकृतशिवाऽन्नपूर्यऽर्चनः ॥ सव्येनाऽचम्य ॥ श्राद्धकाले गयां ध्यात्वा ध्यात्वा देवं गदाधरम् । स्वान्पितॄन्मनसा ध्यात्वा पश्चाच्छ्राद्धं समारभेत् ॥ श्राद्धे योगेश्वरं देवं मार्तण्डं ग्रहनायकम् । स्वान्पितॄन्मनसा ध्यात्वा शैवं श्राद्धं समारभेत् ॥ वामस्कन्धे दृष्टिं निधाय ॥ ॐगायत्र्यैनमः । ॐभूर्भुवः स्वस्त० ३ तन्महेशायविद्महे वाग्विशुद्धाय धीमहि । तन्नः शिवः प्रचोदयात् ३ ॥ "अपसव्येन" ॥ अग्निष्वात्तेभ्यो विद्महे बर्हिषद्भ्यो धीमहि । तन्नः सोमः प्रचोदयात् ३ ॥ अद्यतावत्० पितुःशिवगोत्रस्य ईश्वरस्य, पितामहस्य शिवगोत्रस्य सदाशिवस्य,प्रपितामहस्य शिवगोत्रस्य शिवस्य, "वा" मातुः शिवगोत्रायाबलविकारिण्याः, पितामह्याः शिवगोत्रायाबलप्रमथिन्याः, प्रपितामह्याः शिवगोत्रायाः सर्वभूतदमन्याः सांवत्सरिकं शिवश्राद्धं सदैवकं सान्नपूरपूजनं गुरुशिवपूजनमर्चामहं करिष्ये ॐकु-

कृत्य ॥ "अग्निं परिसमूह्य" ॥ तिलान्विकीर्य ॥ निहन्मि सर्वं यदऽमेध्यवद्भवेद्धताश्च सर्वेऽसुरदानवा मया । रक्षांसि यक्षाः सपिशाचगुह्यका हता मया यातुधानाश्च सर्वे ॥ (फट्श्राद्धविघ्नान् यातुधानान्निहन्मिफट्) ॥ सव्येन ॥ विश्वेषान्देवानां रुद्राऽनन्तयोरिदमासनं नमः । विश्वेभ्योदेवेभ्यः रुद्रानन्ताभ्यां गुरुं त्वां पूजयामि ॐपूजय विश्वान् देवान् रुद्रानन्तौ आवाहयिष्यामि ॐआवाहय ॥ यवान्विकीर्य । आगच्छन्तु महाभागाविश्वेदेवा वरप्रदाः । ये येऽत्र विहिताश्राद्धे सावधाना भवन्तु ते ॥ शन्नोदेवी ॥ "अस्त्रमन्त्रेण" । फट्अस्त्रायफट् ॥ लाजाश्च ॥ विश्वेभ्योदेवेभ्यः रुद्राऽनन्ताभ्यां पाद्यंनमः । शेषंनिवार्य । पुनः । फट्अस्त्रायफट् ॥ आपः क्षीरं ॥ स्वांस्वांसोमायस्वाहा "इतिजलं" । ॐहूंवागीश्वरि वाक्प्रदेसरस्वत्यैनमः "इतिक्षीरं" । ॐश्रींसावित्रि पापभक्षिणि सावित्र्यैनमः "इतिकुशाग्रं" । ॐपृथिव्यै धरित्रिशक्त्येनमः "इतितण्डुलान्" । ॐत्रिज-

टोर्ध्वपिङ्गलायरुद्रायनमः “इतिसर्षपान्” । ॐब्रह्मणेज्ये-
ष्ठायस्वाहा “इतियवान्” । ॐतत्सदोंपितृभ्योनम “इति
तिलान्” । ॐविष्णवेसुरपतयेमहाबलायनमः “इतिपुष्पं”
इत्यष्टाङ्गेन पूरयेत् ॥ भगवन्तौ अर्घ्यम् २ । विश्वेदेवाः रुद्रा-
नन्तौ इदंवामर्घ्यंनमः । विश्वेभ्योदेवेभ्यः रुद्रानन्ताभ्यां स-
मालभनं गन्धोनमः, अर्घोनमः पुष्पंनमः, धूपोनमः दी-
पोनमः, वासोनमः । विश्वेषांदेवानां रुद्रानन्तयोः अर्घ्य-
दानाद्यऽर्चनविधिः सर्वः परिपूर्णोऽस्तु ॥ ॥ ॐमास-
श्चर्षणीधृतो विश्वेदेवास आगत । दाश्वांसो दाशुषः सुत-
म् ॥ उपयाम गृहीतोऽसि विश्वेभ्यस्त्वा देवेभ्यः । एष
ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः ॥ विश्वेदेवास आगत शृण्व-
ताम इमं हवम् । इदं बर्हिर्निषीदत ॥ “अपः प्रदायापसव्यं
कृत्वा” । पितुः शिवगोत्रस्य ईश्वरस्य इदमाऽसनंस्वधानमः ॥
पित्रे शिवगोत्राय ईश्वराय–गुरुं त्वां पूजयामि ॐपूजय
पितृनावाहयिष्यामि ॐमावाहय । “तिलान्विकीर्य” ॥

श्राद्धाऽनुवाकौ तूखानामाऽर्षम् ॥ अपयन्त्वऽसुराः पितृरूपा ये रूपाणि प्रतिमुच्याऽचरन्ति परापरोनिपुरो ये हरन्ति । अग्निष्टांल्लोकान्प्रणुदत्त्वऽस्मान् । अपेतो यन्त्वऽसुरा पितृषदः उदीरतामऽवरा उत्परास उन्मध्यमाः पितरः सोम्यासः असुं यय ईयुरवृका ऋतज्ञास्ते नोऽवन्तु पितरो हव्येषु ॥ एत पितरो मनोजवैरागच्छन्त पितरो मनोजवैः । ये निखाता ये परोप्ता गर्भाद्येऽवपेदिरे सर्वास्तानऽग्न आवह पितृन्हविषे अत्तवे । आगच्छन्तु पितरो मनोजवसः पितरः पितरः शुन्धध्वम् । आ मे यन्तु पितरो भागधेयं विराजा हूताः सलिलात्समुद्रात् । अस्मिन्यज्ञे सर्वकामांल्लभन्तामऽक्षीयमाणानुपजीवत्वेतान् ॥ अन्तर्दधे पर्वतैरऽन्तर्मह्या पृथिव्या दिवा दिग्भिरऽनन्ताभिरन्तरन्यान्पितृन्दधे ॥ अन्तर्दधे ऋतुभिरहोरात्रैः ससन्धिकैरर्धमासैश्च मासैरृतुभिः परिवत्सरैः संवत्सरस्य कृत्तिभिश्चान्तरन्यान्पितृन्दधे ॥ ॥ यास्तिष्ठन्तीतित्रिष्टुप् ॥ या-

स्तिष्ठन्ति या धावन्ति या अद्रुग्घ्राः परिस्रुतुषीः । अद्भि-
र्विश्वस्य धर्त्रीभिश्वान्तरन्यान्पितॄन्दधे ॥ अमृता वागमृता
आपोऽग्निर्वाचोऽमृतं तत्रिषृदेकधाम ताभिर्मत्प्रत्ताभिः स्व-
धया मद्ध्वमिहास्मभ्यं वसीयोऽस्तु देवाः । यन्मे माता
प्रलुलोभ यश्चचाराऽननुव्रतं तन्मे रेतः पिता वृङ्क्तां मा
भूरऽन्योऽवपद्यताम् ॥ १ ॥ यास्तिष्ठन्ति-यन्मे पितामही-
पितामहो वृङ्क्तां ॥ २ ॥ यास्तिष्ठन्ति-यन्मे प्रपितामही-प्रपि-
तामहोवृङ्क्तां ॥ ३ ॥ "फट्अस्त्रायफट्" ॥ लाजाश्च । भग-
वन्तः पाद्यं २ पित्रे शिव-पाद्यंस्वधानमः । "सव्येन" ॥
आचम्य । अपसव्येन । यास्तिष्ठन्तीति षट् ॥ यास्तिष्ठन्ति-यन्मे
माता ॥ या-यन्मे माता । या-यन्मे पितामही ॥ या-यन्मे
माता । या-यन्मे पितामही । या-यन्मे प्रपितामही ॥
"फट् अस्त्रायफट्" ॥ आपः क्षीरं । स्वांस्वांसोमायेत्याद्यऽष्टा-
ङ्गेन पूरयेत् ॥ भगवन्तोऽर्घ्यं २ ॥ पितः शिवगोत्र ईश्वर
इदं वः अर्घ्यं स्वधानमः । पित्रे शिवगोत्राय ईश्वराय समा

लभनं गन्धःस्वधानमः ॥ "सव्येन" ॥ आचम्य "अप-
सव्येन"[१] ॥ पित्रे अर्घः-पुष्पं-धूपः-दीपः-वासांसिस्वधानमः।
थंईशानवक्रायनमः, यंतत्पुरुषव,-रंअघोर-, वंवामदेव,-लंस-
द्योजातवक्रायनमः,। सर्वज्ञताहृद-तृप्तिशिर-अनादिबोधशि-
खा-स्वतन्त्रकवचा-अलुप्तशक्तयेनेत्रा-अनन्तशक्तयेअस्त्रायफट् ।
(दक्षिणाग्रान्दर्भानास्तीर्य) "सव्येन"। शुन्धन्तां लोकाः। "अ-
पसव्येन" पितृषदनः पितृषदनमसि पितृभ्यः स्थानमसि,
पितृभ्यः गन्धःस्वधा, अर्घःस्वधा, पुष्पंस्वधा, पितृभ्य आच्छा-
दनं वासांसिस्वधा, पितुः शिवगोत्रस्य ईश्वरस्य अर्घ्यदानाद्यऽ-
र्चन० ॥ आदित्या रुद्रा वसवो मे सदस्यास्तेषां सख्ये स्वधया
मदध्वं स्वधां वहध्वमऽमृतस्य योनिं याऽत्र स्वधा पितरस्तां
भजध्वम् ॥ "सव्येन" । इदमऽन्नमिदं देवेभ्यः रुद्राऽन-
न्ताभ्यां शृतं चरुमभिघार्य । "अपसव्येन" । इदमन्नमिदं
पितृभ्यः शृतं चरुमऽभिघार्य । प्रक्षाल्य तुण्डलान्पवित्रा-
न्तर्हितानाऽवपति प्रक्षाल्य मूलतो मेक्षणमवदधाति । अग्ना-

वधिश्रित्य तत्रचाऽभिघार्य दक्षिणत उद्वास्य पुनश्चाभि-घार्य । पित्रे दक्षिणपश्चिमाग्रैस्तरैः "पुरस्तात्" इत्यास्तीर्य । श्रियै सोमवत्यै अन्नपूर्णाभगवत्यै गन्धादि ॥ श्रियन्देवीं० ॥ अग्नौ करवाणि ॐकुरु । सोमाय पितृमतेस्वधानमः । अग्नये आङ्गिरसे शिवाग्नयेस्वधानमः । "तूष्णींपात्रेषु निक्षि-पेत्" । इत्यग्नौ हुत्वा, ये मामकाः पितरः पार्थिवासो येऽन्त-रिक्षे ये दिवि ये समुद्रे ये वाचमाश्वा अमृता बभूवुस्तेऽ-स्मिन्यज्ञे सर्वकामांल्लभन्ताम् ॥ एतद्वः पितरो भागधेयं पात्रेषु दत्तममृतं स्वधावत् । अक्षीयमाणमुपजीवत्वेनं मया प्रत्तं स्वधया मदध्वम् ॥ अयं यज्ञः परमो यः पितृणां पात्रेषु देयं हविरग्यमग्नेः । मनश्च वाक्च पितरो वः प्रदा-नैरश्विभ्यां प्रत्तं स्वधया मदध्वम् ॥ एषा व ऊर्गेषा वः स्वधा तामऽत्त च पिवत च मा च वः क्षेष्ठ येह पितर ऊर्ग्देवतासु तस्यै वयं ज्योग्जीवन्तो भूयास्म । आ मासुपक्कमऽमृतं निविष्टं मया प्रत्तं स्वधया मदध्वम् ।

क्षीरंघृतंवाऽसिच्य ॥ ॐह्रींश्रींपापान्तकारिणि पापं मोचय २ पापंहन २ पापंदह २ माये मा चलरूपिणिविच्चेह्रींस्वाहा ॐह्रींश्रींह्रींसः क्षीरंघृतंवाऽसिच्य ॥ "सव्येन"। वैश्वदेवहविषि पिन्वमानं विश्वेषु भूतेषुपृथग्निविष्टं क्षीरं घृतंवाऽसिच्य ॥ रुद्रानन्ताभ्यां क्षीरं-घृतंवाऽसिच्य ॥ विश्वेभ्योदेवेभ्योरुद्रानन्ताभ्योऽन्नंनमः २ अन्नं मधुमधु पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखेऽमृतं जुहोमि ऊर्गऽस्योर्जोदा ऊर्जमेदेहिऊर्जमयिधेहि, अन्नंमेदेहिअन्नंमयिधेहि अक्षतिरसि मा मेक्षेष्ठाऽमुत्राऽस्मिल्लोक इह च ॥ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पांसुरे[1] । त्रीणि पदा[2]-। अतो धर्माणि[3]-। तद्विष्णो[4]ः-। तद्विप्रासो[5]-। विष्णो इदं रक्षस्व । पृथिव्यैनमःविष्णवेनमः "हसरक्षमलवयऊं रुद्रानन्त इदंरक्षस्व । विश्वेभ्योदेवेभ्यः रुद्रानन्ताभ्यां यथोपस्थितं दत्तंदास्यमानेनसह सव्यञ्जनमऽमृतमऽन्नंनमः ।

नमोदेवेभ्यः । "अपसव्येन" ॥ पित्रे शिवगोत्राय-
इत्यादि संवत्सरिके शिवश्राद्धे अन्नंस्वधानमः ३ । पिता-
महायाऽन्नंस्वधानमः ३ । प्रपितामहायाऽन्नंस्वधानमः ३ ॥
अन्नं मधुमधु-। पृथिव्यैनमः विष्णवेनमः हसरक्षमलव-
यऊं ईश्वरसदाशिवशिव इदं रक्षस्व ॥ पित्रे शिव-यथोप-
स्थितं दत्तं दास्यमानेन सह सव्यञ्जनममृतमन्नं स्वधा-
नमः स्वधापितृभ्यः ॥ पयःपृथिव्यां[1]-। दधि क्राव्णो[2]-। घृत-
वती[3]-। मधुवाता-। शर्कराभि-। पञ्चव्युष्टी[6]-। पुरुषसूक्तादि
पठित्वा ॥ "सव्येन" ॥ अद्यदिनेऽद्ययथा-॥ शन्नोदेवी ।
फट् अस्त्रायफट् ॥ विश्वेभ्योदेवेभ्योरुद्रानन्ताभ्यामपोशा-
नंनमः ॥ "अपसव्येन" ॥ यास्तिष्ठन्ति-। फट्अस्त्रायफट् ।
पित्रे शिव-सां-शिवश्रा-अपोशानंस्वधा ॥ (तिलमन्नं च
पानीयं सकुशं तेषु चाग्रतः । विकिरेत्पितृभूतेभ्यो जपन्नपहता
इति) अपहता असुरा रक्षांसि पिशाचाः । वेदिषदः
प्राश्नन्तु भवन्तोऽमृतं जुषध्वमऽमृतं भुञ्जीत ॥ "अमृतेन

सह भोक्तव्यमऽसुरा निवर्तन्तां ईश्वरादयः कारणा आगच्छन्तु ॥ ॥ "यन्मे प्रकामा"दिति भुञ्जानान्समीक्षमाणो जपति । यन्मे प्रकामादुत वाप्यकामादऽसमिद्धे ब्राह्मणेऽब्राह्मणे वा । यत्स्कन्दति निर्ऋतिः पाथमुग्रामऽग्निष्टत्सर्वं शुन्धतु । उशन्तस्तेन पितरो मदन्तां तेन पूतेन पितरो मदन्ताम् ॥ अहोरात्रैः ससन्धिकैरऽर्धमासैश्च मासैर्ऋतुभिः परिवत्सरैः संवत्सरस्य क्लृप्तिभिश्चान्तरन्यान्पितॄन्दधे ॥ यद्वः क्रव्यादऽजहादेकमऽङ्गं पितृलोकं जनयञ्जातवेदाः । तद्व एतेन पुनराप्यायतामऽरिष्टासः पितरो मादयध्वम् । स्वधां वहध्वममृतस्य योनिं याऽत्र स्वधा पितरस्तां भजध्वम् ॥ नारायणस्यार्षम् । मधुवाताऋतायते । अन्तश्चरसि० । ब्रह्मार्पणं० अमृतोपस्तरणमसिस्वाहा ॥ दक्षिणाग्रान्दर्भानास्तीर्य ॥ यास्तिष्ठन्ति० । फट्अस्त्रायफट् । पित्रे-शिवगोत्रायईश्वराय० सांव० शिवश्रा० भूपृष्ठे० अवनेजनंस्वधानमः ॥ उशन्तस्त्वा० । आधारशक्त्यैनमः,

पृथिव्यै, क्षीरार्णवाय, चन्द्रमण्डलाय, वह्निमण्डलाय, सितपद्माय, सत्त्वाय, रजसे, तमसे, अकारतत्त्वाय, उकारत०, मकारत०, नादत० नादान्ततत्त्वाय, समानाय, उन्मनायै, व्यापिन्यै, पराशक्त्यै, ऋग्वेदाय, यजुर्वे, सामवे, अथर्ववेदाय, कृतयुगाय, त्रेतायु, द्वापरयु, कलियुगाय, सहस्रदलपद्मासनाय, अष्टदलपद्मासनायनमः" ॥ तिलास्तोयं ॥ देवताभ्यः पि० ३ । अद्यतावत् । पृथिवीदर्विरक्षता तृप्तिः स्वधाऽनुपदस्तांस्तां पृथिवीं दर्विमक्षतां तृप्तिं स्वधामऽनुपदस्तामग्निरिव पृथिवीमुपजीव । पितः अमुकामुकगोत्र एष ते पिण्डः येचाऽत्रत्वाऽन्वेषा ते स्वधा वसुभ्यः स्वधा षष्ठ एष ते लेपः । "अप उपस्पृश्य" ॥ अन्तरिक्षं दर्विरऽक्षता तृप्तिः स्वधाऽनुपदस्तां तामन्तरिक्षं दर्विमऽक्षतां तृप्तिं स्वधामऽनुपदस्तां वायुरिवाऽन्तरिक्षमुपजीव पितामहाऽमुकाऽमुकगोत्र एष ते पिण्डः ये चाऽत्रत्वाऽन्वेषा ते स्वधा रुद्रभ्यः स्वधा पञ्चम एष ते लेपः ।

अप उपस्पृश्य ॥ द्यौर्दर्विरऽक्षता तृप्तिः स्वधाऽनुपदस्तां तां दिवं दर्विमऽक्षतां तृप्तिं स्वधामऽनुपदस्तां सूर्य इव दिवमुपजीव प्रपितामह अमुकामुकगोत्र एष ते पिण्डः ये चात्रत्वाऽन्वेषा ते स्वधा आदित्यभ्यः स्वधा चतुर्थएष ते लेपः। अपउ० ॥ मूलपुरुषा भूमिस्वामिनः पितरः, एष वः पिण्डः स्वधा, ये च वोऽन्वऽत्र पितरो मादयध्वम् । येऽत्र पितरः प्रेता युष्मांस्तेऽनु, य इह पितरो जीवा अस्मांस्तेऽनु, येऽत्र पितरः प्रेता यूयं तेषां वसिष्ठा भूयास्थ, य इह पितरो जीवा वयं तेषां वर्षिष्ठा भूयास्म ॥ एतानि वः पितरो वासांसि, अतो नोऽन्यत्पितरो मायूढ्वं, वीरान्नः पितरो दत्त। पिण्डलेपं निवारयेत् ॥ "शैवे" ॥ "अन्नतिलमध्वाज्यपयोभिर्दक्षिणहस्ततले वामावर्तेन पिण्डं वर्तयेत्"॥ ॐअग्निष्वात्तेभ्यो विद्महे० ३ अद्यतावत्० (लंदिव्यं शिवस्वरूपिणं सर्वबन्धविवर्जितं सर्वकर्मविनिर्मुक्तं धर्माधर्मबहिष्कृतं पिण्डमुत्पादयामिस्वधानमः) पितः शिवगोत्र ईश्वर सांवत्सरिके शि-

वश्राद्धे ॐजुंसःपिण्डःस्वधानमः । अपउपस्पृश्य ॥१॥ लंदि-
व्यं शिवस्वरू-पितामह शिवगोत्र सदाशिव ! ॐजुंसःपिण्डः
स्वधानमः । अपउपस्पृश्य ॥२॥ (लंदिव्यं-शिव)प्रपितामह
शिवगोत्र शिव ॐजुंसःपिण्डःस्वधानमः । अपउ० ॥ ३ ॥
एवं । लंदिव्यं-माता शिवगोत्रे बलविकरिणि ॐजुंसः पिण्डः
स्वधानमः । अपउपस्पृश्य ॥ लंदिव्यं-पितामहि शिवगोत्रे
बलप्रमथिनि ॐजुंसःपिण्डःस्वधानमः । अपउ ॥ लंदिव्यं-
प्रपितामहि शिवगोत्रे सर्वभूतदमनि ॐजुंसःपिण्डः स्वधा-
नमः । अपउपस्पृश्य ॥ वासांसिस्वधानमः । वीरान्नंस्वधा-
नमः ॥ पिण्डलेपं निवारयेत् ॥ पित्रे वा मात्रे सां० शिवश्राद्धे
समालभनं गन्धःस्वधा । मूलपुरुषेभ्यः समालभनं गन्धः स्व-
धानमः पित्रे सांवत्सरिके शिवश्राद्धे अर्घः, पुष्पं, दीपः धूपः,
भक्ष्यभोज्यफलमूलबलिनैवेद्यमऽन्नंस्वधानमः पित्रे सां०
तिलमधुमिश्रमुदकपात्रमाऽचमनीयंजलंस्वधानमः । पित्रे
हिमपानादि स्वधानमः ॥ "सव्येन" । आचम्य ॥ वसन्ता-

यनमः ॥ "अपसव्येन" ॥ [यास्तिष्ठन्ति ॥ ऊर्जं वहन्ती अमृतं घृतं मधु पयः कीलालं परिस्रुतं स्वधास्थ पितृन्मे तर्पयत] फट्अस्त्रायफट् ॥ ऊर्जांसिनमस्कारं करोमिनमः॥ पिण्डेषु पुष्पाणि ॥ ॐआंप्रभुशक्तयेस्वधानमः, ॐईज्ञानशक्तयेस्वधानमःॐऊंक्रियाशक्तये, क्षंईशानवक्त्राय, यंतत्पुरुषव, रंअघोरव,त्वंवामदेवव, लंसद्योजातव, सर्वज्ञत्वहृद, तृप्तिशिर, अनादिबोधशिखायैवषट्, स्वतन्त्रकवचाय, अलुप्तशक्तयेनेत्र, अनन्तशक्तये अस्त्रायफट्, पित्रे सांवत्सरिके शिवश्राद्धे वासांसिस्वधानमः ॥ "सव्येन" [मा मे क्षेष्ठेति सतृणमन्नमभ्युक्ष्य ॥ मामेक्षेष्ठाबहुमेपूतमऽस्तुब्रह्मानोमेजुषतामन्नमन्नम् । सहस्रधारममृतोदकं मे पूतमस्त्वेतत्परमे व्योमन्] ॥ देवतायै बलिमुपहरेत्, सावित्राणि० महागणपतये० पितृगणदेवताभ्योनमो नैवेद्यं निवेदयामिनमः ॥ "अपसव्येन" ॥ [सर्वमऽन्नमुपादाय सतिलं दक्षिणामुखः । वारिणाऽप्लाव्य तच्चान्नं पृच्छेत्प्रश्नत्रयं द्विजः ॥ विषदमऽ-

न्नमाऽनीय । कश्चित्सम्पन्नं भोः "सुसम्पन्नं" तृप्यन्तु भवन्तः "तृप्ताः स्मः" शेषमन्नमिष्टैः सह ॥ अग्निदग्धाश्च ये जीवा येऽप्यऽदुग्धा कुले मम । भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तु परां गतिम् ॥ येषां न पचते माता येषां न पचते पिता । उच्छिष्टं ये च कांक्षन्ति तेषां तृप्तिः स्वधानमः] "विकिरं" ॥ अस्मत्कुले प्रमीता ये पतिताः समयद्विषः । दग्धा अदग्धा कुगतयस्ते तृप्यन्तुस्वधावौषड् ॥ "सव्येन" ॥ [असोमपाश्च ये देवा यज्ञभागविवर्जिताः । तेषामन्नं प्रदास्यामि विकिरं वैश्वदेवके] ॥ ये रुद्रा रौद्रकर्माणः शिवयागाद्बहिष्कृताः । सर्वे ते परितृप्यन्तु विकिरेण हि सर्वदा ॥ "तृप्तानाचम्य" ॥ अपसव्येन । विप्रानाचमेत् ॥ पित्रे सांवत्सरिकेशिवश्राद्धे आचमनीयंस्वधानमः ॥ "सव्येन" विश्वेभ्योदेवेभ्यः रुद्राऽनन्ताभ्यामाऽचमनीयं नमः ॥ अपसव्येन ॥ [यन्मे रामः शकुनिरित्यर्ऽधप्रदक्षिणं कृत्वा दक्षस्कन्देन पिण्डानवेक्ष्य प्रत्येत्य च । यन्मे रामः शकुनिः

आपदाश्च यन्मे शुचिः मन्त्रकृतस्य प्राशत् । वैश्वानरः सविता तत्पुनातु तस्मिन्पूते देवता मादयन्तां तेन पूतेन पितरो मदन्ताम्] नमोऽस्तु सर्वयोगिभ्यः सिद्धेभ्यश्च नमोनमः । मूर्तामूर्त्तेश्वरग्राहिन्नमः शक्तिगणाय ते ॥ यास्तिष्ठन्ति ॥ फट् अस्त्रायफट्" ॥ पित्रे शिव० सां० शिव० दक्षिणायै तिलहिरण्य ॥ अभिरमन्तु भवन्तोऽभिरताः स्मः । देवाश्च पितरश्चैतत्पूतमत्रोपजीवतामस्मिंल्लोके मां धत्त जीवेम शरदः शतं पश्येम शरदः शतम् ॥ अथास्मभ्यमूर्जं धत्त ज्योतिर्धत्ताऽजरं न आयुः ॥ यदऽन्तरिक्षं पृथिवीमुत द्यां यत्पितरं मातरं वा जिहिंसिम । अग्निर्नस्तस्मादेनसो गार्हपत्यः प्रमुञ्चतु चकृम यानि दुष्कृता ॥ तृप्यन्तु भवन्तः पितरो ये च भवतोऽनु ये चाऽस्मास्वाऽशंसन्ते तृप्यतं । तृप्यन्तु भवन्तः पितामहा ये२० । तृप्यन्तु भवन्तः प्रपितामहा येच भवतोऽनु येचा-॥ तृप्यन्तु भवत्यो मातरो याश्च भवतीरनु याश्चास्मास्वां० । तृप्यन्तुभवत्यः पितामह्यो याश्च२० । तृप्यन्तु

भवत्यः प्रपितामह्यः याश्च भवतीरनु ॥ (एवं मातामहा इत्यादि) तृप्यत ३ एवमस्तु । पितुः सां० शिवश्राद्धे दत्तमन्नमक्षय्यमस्तुस्वधानमः ॥ "इदमन्नमक्षय्यमस्तु स्वधानमः, इति विप्राःप्रतिब्रूयुः ॥ दातारो नोऽभिवर्धन्तां वेदाः सन्ततिरेवच । श्रद्धा च नो मा व्यगमद्बहु देयं चनोस्त्विदम् ॥ अन्नं च नो बहु भवेदतिथींश्च लभेमहि । याचितारश्च नः सन्तु मा च याचिष्म कंचन" ॥ "एता एवाऽशिषः सत्यः सन्त्विति विप्राः प्रतिब्रूयुः ॥ "सव्येन" शन्नोदेवी ॥ विश्वेभ्योदेवेभ्यः रुद्रानन्ताभ्यां दक्षिणायै तिलहिरण्यरजतनिष्कर्णंददानि ॥ विश्वेदेवाः रुद्रानन्तौ प्रीयेतांप्रीतौभवेतां ॥ [शन्नो भवन्तु वाजिनो हव्येषु देवत्रातामितद्रवाः स्वर्काः । जम्भयन्तोऽहिवृकं रक्षांसिसनेम्यस्मद्यूयमऽनमीवाः । संस्रावपात्रमुत्तानं कृत्वा ताभिरद्भिः पुत्रकामो मुखमनक्ति ॥ "वाजेवाजे" इतिकुशविसर्जनम् ॥ वाजे वाजे वत वाजिनो नो धनेषु विप्रा अमृता ऋतज्ञाः । अस्य

मधु पिबतु मादयध्वं तृप्ता यात पथिभिर्देवयानैः ॥ अपसव्येन "अमावाजस्ये"ति पिण्डपरिषेकः ॥ आमा वाजस्य प्रसवोजगम्यादाऽमाद्यावापृथिवी विश्वरूपे । आमाऽगन्तां पितरं मातरं चामा सोमो अमृतत्वेन गम्यात्]॥ ततो वामदेवमन्त्रेण पिण्डान्परितः पितृपात्रेणवारिधारां प्रक्षिपेत् । "यथा" । वामदेवायस्वधानमः, ज्येष्ठाय, रुद्राय कालाय, कालविकरणाय बलविकरणाय बलप्रमथनाय, सर्वभूतदमनायस्वधानमः, मनोन्मनायस्वधानमः ॥ सव्येन ॥ कलशपृच्छां सम्पाद्य ॥ गायत्र्यैनमः ३ तन्महेशायविद्महे ३ । "अपसव्येन" देवताभ्यः ३ । अग्निष्वात्तेभ्यो ३ । अद्यतावत्० पितुः शिवगोत्रस्येश्वरस्य सांवत्सरिकं शिवश्राद्धं सदैवकं साभ्रपूरपूजनं गुरुशिवपूजनमऽच्छिद्रं सम्पूर्णमस्तु एवमस्तु ॥ शैवाग्नौ । "तेजोऽसि" ॥ हारमनोहरवक्षसमिति (पृ० ३५२-४) पूर्णांदत्त्वा । शिवमऽस्तु यजमानायेतिभस्मतिलकं ॥ विमुञ्चामि ॥ वैदिके । विमुञ्चामि[३] । नयामि ।

"सव्येन" परिसमूह्य९अग्नयेस्वाहा,प्रजापतये, सूर्याय, प्रजापतयेस्वाहाँविमुच्य। नयामि। धर्मंदेहि ॥ "अपसव्येन" पित्रे शिवगोत्रायेश्वराय सांवत्सरिक शिवश्राद्धे तिलोदकंस्वधा- नमः उदकतर्पणंस्वधानमः ॥ "सव्येन" ॥ ततो गवां-ग्रासादि । याकाचिद्योगिनी० । सौरभेयाः० । "अपसव्येन" । यमाय धर्म० । "सव्येन" यो विश्वभाविनोभूता । "अपसव्येन" आयुः प्रजां० । शैवे ॥ श्राद्धमेवंविधं शैवं शैवसायुज्यदं परम् । कर्तव्यं तेन तच्छ्राद्धं दीक्षितेन तदऽन्तिकम् ॥ त्रयीसप्तचतुर्युग्ममयी त्रितयवर्त्मनि । स्थितो यः शक्ति- सहितः स जयत्यऽमरेश्वरः ॥ "सव्येन" ॐगायत्र्यैनमः ३ तन्महेशाय विद्महे ३ अद्यतावत् । महागणपतेः० आत्मनो० पितुः सांवत्सरिकेशिवश्राद्धे कलशपूजनं क्षेत्रेशपूजनमच्छिद्रमस्तु एवमस्तु ॥ एताभ्योदेवताभ्यो यत्रोदकं- नमः । आपन्नोस्मि० । "अन्नपूरे" सभार्यस्त्रिजगन्नाथ० । (पृ० ३३५-१४) अपारसंसार० करचरण० । क्षमध्वंमम

क्षेत्रेशा- । उभाभ्यां० । नमोब्रह्मणे । पात्राणि चालयेत् । आचम्य ॥ उदकलशमुपनिधाय । शैवे ॥ उत्तिष्ठ देवदेवेश त्वं मण्डलसुरैः सह । रक्षाऽस्मान्पूर्वतो नित्यं धृततत्पुरुषाभिधः। तथा दक्षिणतो रक्ष धृताऽघोरात्मभैरवः ॥ तथैवोत्तरतोरक्ष वामदेवोऽसि शङ्करः। वारुणाशागतो नित्यं सद्योजातोऽसि रक्ष माम् ॥ ऊर्ध्वं रक्ष महेशान त्वमीशानोऽसि देवता । सर्वतः सर्वथा देव सर्वत्राऽस्मिन्भवाध्वनि ॥ पाहि मां याहि देवेशि नित्यानन्दमयं पदम् ॥ मन्त्रार्थाः ॥ "ब्राह्मणपुष्पं॥ अनन्तशाख ॥ नन्दन्तु साधकाः सर्वे विनश्यन्तु विदूषकाः । अवस्था शाम्भवी मेऽस्तु प्रसन्नोऽस्तु गुरुः सदा ॥

इति सांवत्सरिकशिवश्राद्धविधिः ॥

अथैकोद्दिष्टशिवश्राद्धविधिः

अन्नपूरपूजामष्टकां चाऽनु ॥ सव्येनाऽऽचम्य ॥ शान्ताकारंभुजगशयनंपद्मनाभं- । श्राद्धे योगेश्वरं चैव० । तिलमधु सम्भारान्संस्कृत्य वामस्कन्दे दृष्टिं निधाय ॥ ॐगायत्र्यैनमः ।

२ । तन्महेशाय विद्महे ३ ।। अपसव्येन । नमः पितृभ्यः ।। देवताभ्यः ३ अग्निष्वात्तेभ्यो वि ३ ।। अद्यतावत् पितुः वा मातुः आदिमौर्ध्वदैहिकं प्रथमं, प्रथममासिकंद्वितीयं, त्रिपाक्षिकंतृतीयं, द्वितीयमासिकंचतुर्थं,पञ्चपाक्षिकं पञ्चमं, तृतीयमासिकंषष्ठं, चतुर्थमासिकंसप्तमं, पञ्चमासिकं अष्टमं, ऊनषाण्मासिकंनवमं, षाण्मासिकंदशमं, सप्तममासिकंएकादशं, अष्टममासिकंद्वादशं, नवममासिकं त्रयोदशं, दशममासिकंचतुर्दशं, एकादशमासिकंपञ्चदशं, ऊनसांवत्सरिकंषोडशं, (मले) द्वादशमासिकंषोडशं, ऊनसांवत्सरिकंसप्तदशं एकोद्दिष्टंश्राद्धं अष्टकापूर्वकं सान्वष्टक्यं ब्राह्मणपूजनमर्चामहं करिष्ये ॐकुरुष्व ।। शैवे ।। पितुः शिवगोत्रस्य रुद्रस्य वा मातुः शिवगोत्रायाः रुद्राण्याः-एकादशाहनि आद्यमौर्ध्वदैहिकं सर्वमन्त्रमयंशुद्धं, प्रथममासिकंप्रथमं[२], त्रिपाक्षिकं द्वितीयं[३], द्वितीयमासिकं तृतीयं[४], पञ्चपाक्षिकंचतुर्थं[५], तृतीयमासिकंपञ्चकं[६], चतुर्थमासिकंषष्ठं[७], पञ्चमासिकंसप्तमं[८],

ऊनषाण्मासिकंअष्टमं[९], षाण्मासिकंनवमं[१०], सप्तमासिकं दशमं[११], अष्टममासिकंएकादशं[१२], नवममासिकंद्वादशं[१३], दशममासिकंत्रयोदशं[१४] एकादशमासिकंचतुर्दशं[१५], सार्धैकादशमासिकंपञ्चदशं[१६], ऊनसांवत्सरिकं षोडशं[१७], (मले) द्वादशमासिकं षोडशं[१७], ऊनसांवत्सरिकं सप्तदशं[१८], एकोद्दिष्टंशिवश्राद्धं सदैवकं सान्वष्टक्यं सान्नपूरविधानं गुरुशिवपूजनमऽर्चामहंकारिष्ये ॐकुरुष्व ॥ तिलान्विकीर्य । अग्निपरिसमूह्य १ ॥ निहन्मि सर्वं ॥ फट्श्राद्धविघ्नान् यातुधानान्निहन्मि ॥ पितुः वा मातुः आद्यमौर्ध्वदैहिकेप्रथमेएतत्ते आसनं । शैवे । पितुः आद्यमौर्ध्वदैहिकेसर्वमन्त्रमयेशुद्धे एकोद्दिष्टेशिवश्राद्धे इदमासनंस्वधानमः ॥ पितः आद्यमौर्ध्वदैहिकेप्रथमे ब्राह्मणं त्वा पूजयामि ॐपूजय ॥ पित्रेशिवगोत्राय ईश्वराय आद्यमौर्ध्वदैहिके सर्वमन्त्रमये शुद्धे एकोद्दिष्टेशिवश्राद्धे गुरुं त्वां पूजयामि । ॐपूजय ॥ नावाहनं । तिलान्विकीर्य ॥ अपयन्त्वऽसुरा ॥ यास्तिष्ठन्ति-यन्मेमाता ॥ फट्अस्त्रायफट् ॥ लाजाश्च ॥

पितः आद्यमौर्ध्वदैहिकेप्रथमे एतत्ते पाद्यं । शैवे । पित्रे आद्यमौर्ध्वदैहिके सर्वमन्त्रमये शुद्धे-पाद्यंस्वधानमः ॥ पाद्यशेषं निवार्य । "सव्येन" आचम्य । "अपसव्येन" ॥ यास्तिष्ठन्ति ॥ फट्अस्त्रायफट् ॥ आपःक्षीरं ॥ स्वांस्वांसोमायनमः "जले" । इत्यादि । पितः आद्यमौर्ध्वदैहिके सर्वमन्त्रमयेशुद्धे इदं तेऽर्घ्यम् ॥ शैवे । पितः इदं तेऽर्घ्यस्वधानमः ॥ पितः आद्यमौर्ध्व-एष ते गन्धः । शैवे । पित्रे शिवगोत्रायगन्धः स्वधानमः ॥ "सव्येन" । आचम्य । "अपसव्येन" ॥ पितः आद्य-एषतेऽर्घः । एतत्तेपुष्पं । "शैवे" । पित्रे शिव-अर्घः-स्वधानमः पुष्पंस्वधानमः । पितः आद्यमौएषते धूपः एषते दीपः ॥ पित्रे शिवगोत्राय धूपःस्वधानमः दीपःस्वधानमः ॥ पितः आद्यमौर्ध्वदै-एतत्ते वासः ॥ "शैवे" । (ॐ-आंप्रभुशक्तयेनमः ईंज्ञानशक्तयेनमः, ऊंक्रियाशक्तयेनमः) । रंप्रदीप्ताकलायैनमः, रंदहनीक-, रंघोराक-, रंक्रूराक-, रंरसभक्षिणीक-, रंविद्यातत्त्वक-, रंलेलिहानाक-, रंवैधृतिक-, रंरा-

विकलायैनमः, रंघोरविक्रमाक-, रंमहोच्छुमाकलायै नमः। हः अनन्तशक्तयेअस्त्रायफट्,हःअनन्तशक्तिस्वरूपाय "पित्रे शिवगोत्राय ईश्वराय आद्यमौर्ध्वदैहिके सर्वमन्त्रमये शुद्धे वासांसिस्वधानमः ॥१॥ (ॐआंप्रभु, ईंज्ञान,ऊंक्रिया-) अंमरीच्यैनमः, अंपूषायै, "पित्रेशिवगोत्रायईश्वराय, प्रथममासिकेप्रथमे वासांसिस्वधानमः ॥ २ ॥ (ॐआं, ईंज्ञा, ऊंक्रि) अंयशस्विनीकलायैनमः, "पित्रे, त्रिपाक्षिकेद्वितीये वासांसि ॥३॥ (ॐआंप्रभुशक्तयेनमः, ईंज्ञा, ऊंक्रि) इंज्वलित्यै, इंसुमनायै "पित्रे, द्वितीयमासिकेतृतीयेवासांसि ॥४॥ (ॐआं, ईं, ऊंक्रि) ईंप्रीत्यै "पित्रे पञ्चपाक्षिकेचतुर्थे वासां ॥ ५ ॥ ॐआंप्र, ईंज्ञा, ऊंक्रि) उंधूम्राकलायै, उंप्रीतिकयै, पित्रे, तृतीयमासिकेपञ्चमे वासांसिस्वधानमः ॥६॥ (ॐआं, ईं, ऊं) ईं तापिन्यै, ऊंधृत्यै "पित्रे, चतुर्थमासिकेषष्ठेवासां ॥७॥ (आं, ईंज्ञान, ऊं) ऋंसौम्यायै, ऋंतापिन्यै, ऋंधृतिकयै, पित्रे, पञ्चममासिके सप्तमे वासांसिस्वधानमः ॥८॥ (आं, ईं,

ऊं) ऐंसौम्यायै पित्रे ऊनषाण्मासिकेअष्टमे वासांसि ॥९॥ (आं, ई, ऊं) ऊंपाचिन्यै लंमरीच्यै पित्रे-षाणमासिकेनवमे वासांसि ॥१०॥ (आं, ई, ऊं) ॐहव्याकहनायै, लृंअंशुमालिन्यै पित्रे सप्तममासिके दशमेवासांसिस्वधानमः ॥११॥ (आं, ई, ऊ) ॐतेजोवत्यै, ॐशशिन्यै, पित्रे अष्टमासिके एकादशे वासांसि ॥१२॥ (आं, ई, ऊं) ॐशतधामायै ॐहृद्रतायै पित्रे नवममासिके द्वादशेवासांसि ॥१३॥ (आंप्रभुशक्तयेनमः, ई, ऊं) ॐस्वधामायै, ॐलक्ष्म्यै पित्रे दशममासिकेत्रयोदशे वासांसि ॥१४॥ (आं, ई, ऊं) ॐअंपद्मगर्भायै, ॐपित्रे एकादशमासिकेचतुर्दशे वासांसि ॥१५॥ (आं, ई, ऊं) अंसम्पूर्णमण्डलायै, पित्रे सार्धैकादशमासिकेपञ्चदशे वासांसिस्वधानमः ॥१६॥ (आं, ई, ऊं) सम्पूर्णकलायै तमोपहायै पित्रे, द्वादशमासिकेषोडशे वासांसिस्वधानमः ॥ १७ ॥ (ॐआंप्रभुशक्तये, ईज्ञानशक्तये, ऊंक्रियाशक्तयेनमः) अःतमोपहायै, अःअमृतकलायैनमः पित्रे शिवगोत्रायईश्वरायऊनसांवत्स-

रिकेसप्तदशेएकोद्दिष्टेशिवश्राद्धे वासांसिस्वधानमः ॥ १८ ॥
पितुः आद्यमौर्ध्वदेहिके अर्घ्यदानाद्यर्चनविधिः ॥ पितुः
शिवगोत्रस्य आद्यमौर्ध्वदैहिके सर्वमन्त्रमयेशुद्धे, अर्घ्य-
दानाद्यर्चनविधिः सर्वः परिपूर्णोऽस्तु ॥ वसवो मे स-
दस्या । इदं पित्रे शृतमभिघार्य प्रक्षाल्य मूलतो मेक्षणमव-
दधाति ॥ अग्नावधिश्रित्य तत्र चाभिघार्य दक्षिणत उद्वास्य
पुनश्चाभिघार्य ॥ यज्ञस्य सन्ततिरसि । "पुरस्तात्" ॥ श्रियै
सोमवत्यै समालभनं गन्धादि ॥ श्रियन्देवीं । प्रणवं मनसा
ध्यात्वा ॥ ॐ ॐ । "ॐअग्नये अङ्गिरसे शिवाग्नये स्वधा-
नमः ॥ पात्रेषुनिक्षिपेत् ॥ ये मामका-क्षीरं घृतंवाऽ-
सिच्य ॥ शैवे । ॐह्रींश्रींपापान्तकारिणियापंहनहनपापंद-
हदहमाये माचलेईंस्वाहा क्षीरंघृतंवाऽसिच्य ॥ पितः
आद्यमौ-इदंतेअन्नंइदंमधु । इदं विष्णुर्विचक्रमे० । तद्वि-
ष्णोः-विष्णो इदं रक्षस्व ॥ पित्रे शिवगोत्रायईश्वराय-आद्य-
मौर्ध्व-इदं ते अन्नं । अन्नंस्वधानमः २ अन्नं मधु २ रुद्र

इदं रक्षस्व । "स्त्रीविषये" ॥ रुद्राणि इदं रक्षस्व ॥ पितः आ-
द्यमौ-॥ पित्रे शिवगोत्राय-आद्यमौ-यथोपस्थितं दत्तं दास्य-
मानेन-एतत्ते अमृतमन्नं । अन्नंस्वधानमः ॥ "सव्येन" ॥
पयः पृथिव्यां । सहस्रशीर्षा । हिरण्यवर्णा । "अपसव्येन" ॥
यास्तिष्ठन्ति । पितः आद्यमौ-एतत्तेऽपोशानं । पित्रे शिव-
आद्यमौ-अपोशानं जलं स्वधानमः । प्राश्नातु भवान्, वा,
भवती ॥ अमृतं जुषस्वाऽमृतं भुंक्ष्व ॥ अमृतेन सह भोक्तव्यं
रुद्रादयः कारणा आगच्छन्तु ॥ दक्षिणाग्रान्दर्भानास्तीर्य ।
पितःआद्यमौ-एतत्तेऽवनेजनं ॥ पितः अद्यमौर्वं-शिवश्राद्धे
अवनेजनंस्वधानमः ॥ आधारशक्त्यैस्वधानमः, पृथिव्यै, स्व-
धानमः श्रीमदर्णवाय, चन्द्रमण्डलाय, वह्निमण्डलाय, सित-
पद्माय, सत्त्वाय, रजसे, तमसे, अकारतत्त्वाय, उकारत,
नमोऽस्तु सर्वयोगिभ्यः" इत्यऽर्धप्रदक्षिणं ॥ फट् अस्त्राय-फट् । दक्षिणायै ॥ नाऽक्षय्यं । ततो दीपचक्रोपरि समयां पूजयेत् ॥ ॐह्रींसर्वोत्तमे चिन्तामणे ह्रींपरमकाले ह्रींसर्वज्ञे ह्रींसर्वकामप्रदे ह्रींमहालक्ष्मीः ह्रींसःमहालक्ष्मीः मत्पितरं (अमुकं) भैरवगोत्रं रुद्रं तारय २ स्वाहावौषट् ॥ "दीपचक्रपृच्छां विसर्जयेत् ॥ ॐतन्महेशाय वि ३ । अग्निष्वात्तेभ्यो ३ यमान्तकायै ३ अद्यतावत् भगवतः शिवस्य सानुचरस्य भवस्यदेवस्य ८ ब्राह्मीस-असिताङ्गभैरवस्य, माहेश्वरीस-रुरु, कौमारीस-चण्ड, वैष्णवीस-क्रोध,-वाराहीस-उन्मत्तभै, ऐन्द्रीस-कपालेश, चामुण्डा-भीषण, अघोरेश्वरीसहितस्य स्वच्छन्दभैरवस्य। क्षारसमुद्रस्य, क्षीर-गुड-दधि-घृत-मधु-स्वादूदक-सुरा-गर्भोदकसमुद्रस्य । जम्बुद्वीपस्य,-शाकलि,-कुश-क्रौञ्च-शल्मलि-प्लक्ष-गोमेध-पुष्कर-सुवर्णद्वीपस्य । तेजस्य चण्डस्य । आत्मनो, पितुर्भैरवगोत्रस्यरुद्रस्य प्रकाशवृद्ध्यर्थे तमोहरणार्थं घोरान्धकारनिवारणार्थं परतेजोगम-

नार्थं दीपश्राद्धनिमित्ते द्वारपालदिव्यौघादिगुरुपूजनप्रथमं सपरिवारदेवीपीठेश्वरीनरकार्णवशोषिणीचण्डीकापालिनीपूजनं सदेवीकस्वच्छन्दभैरवपूजनमऽच्छिद्रं सम्पूर्णमस्तु एवमस्तु ॥ पित्रे भैरवगोत्राय रुद्राय यवोदकं नमः उदकतर्पणंनमः ॥ ततः क्षमापुष्पाणि ॥ तत्रादौ मध्ये ॥ आपञ्चोऽस्मि० । ये दीक्षिता वा नतुदीक्षिता वा शैवाश्च शाक्ता अपि वैष्णवा वा । मोहान्धकारे परतेजसि त्वं तांस्तारयाऽशेषजगच्छरण्ये ॥ भवः शर्वो महारुद्रस्तथा पशुपतीश्वरः । उग्रः सहो महाभीमस्तथेशाश्चाष्टभिः क्रमात् ॥ हरो महेश्वरश्चैव शूलपाणिः पिनाकभृत् । शिवः पशुपतिश्चेति महादेवविसर्जनम् ॥ ॥ प्रालेयामलमिन्दुकुन्दधवलं गोक्षीरफेणप्रभं, भस्माभ्यङ्गमऽनङ्गदेहदहनं ज्वालावलीलोचनम् । ब्रह्मेन्द्रादिमरुद्गणैः स्तुतिपदैरभ्यर्चितं योगिभिर्वन्देऽहं सकलं कलङ्करहितं स्थाणोर्मुखं पश्चिमम् ॥ १ ॥ रक्तं कुङ्कुमपिङ्गलं सतिलकं व्यापाण्डुगण्डस्थलं भ्रूविक्षेपकटाक्षवीक्ष-

चलसत्संसक्तकर्णोत्पलम् । स्निग्धं बिम्बफलाधरप्रहसितं नीलालकालङ्कृतं वन्दे पूर्णशशाङ्कमण्डलनिभं वक्त्रं हरस्योत्तरम् ॥ २ ॥ संवर्ताग्नितडित्प्रतप्तकनकप्रस्पर्धितेजोरुणं गम्भीरश्रुतिनिःसृतांशुदशनप्रोद्भासिताम्राधरम् । अर्धेन्दुद्युतिलोलपिङ्गलजटाभारं पिनद्धोरगं वन्दे सिद्धसुरासुरेन्द्रनमितं पूर्वं मुखं शूलिनः ॥ ३ ॥ कालाभ्रभ्रमराञ्जनद्युतिनिभं व्यावृत्तपिङ्गेक्षणं बालेन्दुद्युतिनिःसृतांशुवदनं प्रोद्भासिदंष्ट्राङ्कुरम् । सर्पप्रोतकपालशक्तिमुकुटाव्याकीर्णसच्छेखरं वन्दे दक्षिणमीश्वरस्य वदनं भ्रूभङ्गरौद्रं मुखम् ॥ ४ ॥ व्यक्ताव्यक्तगुणोत्तरं च वरदं षट्त्रिंशतत्त्वात्मकं तस्मादीश्वरतत्त्वमक्षयमिति ध्यातं सदा योगिभिः । वन्दे तामसवर्जितेन मनसा सूक्ष्मातिसूक्ष्मं परं शान्तं पश्चिममीश्वरस्य वदनं खं व्याप्य तेजोमयम् ॥ ५ ॥ यद्देवासुरकन्यकाधृतकरैः संवीजितं चामरैः पुंनागाम्बुजनागजातिबकुलैराशीर्विषैरर्चितम् । ज्वालामालसहस्रदीप्तिकिरणं कालाग्निरुद्रं महत्तत्संहारकरं

नमामि मनसा पातालसंस्थं सुखम् ॥ ६ ॥ देव्याः ॥ वन्दे
देवीं कुलेशीमसितचषकसुणीमुण्डयुक्तां स्वदक्षे वामे खट्वा-
ङ्गपाशौ हृदयसरसिजं घण्टिकां चावहन्तीम् । रक्तां ब्रा-
ह्म्यादिमातृप्रमुखनिजकुलाष्टाष्टकस्याधिनाथां मार्जारस्थां
सुरक्तां सुललितवसनां पापहर्त्रीं त्रिनेत्राम् ॥ १ ॥ पूर्वे ॥
चतुर्भुजमेकवक्त्रं कायखट्वाङ्गभूषितम् । शूलोद्यतकरं सौम्य-
मऽसिताङ्गं नमाम्यहम् ।१। चतुर्भुजा चतुर्वक्त्रा हंसारूढा
त्रिलोचना । सर्वाभरणसंयुक्ता ब्राह्म्यस्तु सौख्यदायिका
। २ ॥ आग्नेये । एकवक्त्रं चतुर्बाहुं कायखट्वाङ्गभूषितम् ।
रक्तसिन्दूरसङ्काशं वन्देऽहं रुरुभैरवम् ।१। चतुर्भुजा चतु-
र्वक्त्रा वृषभस्था त्रिलोचना । कपालखट्वाङ्गधरा दद्यान्मुक्ति
महेश्वरी[2] । २ । दक्षिणे । एकवक्त्रं चतुर्बाहुं कायखट्वाङ्गभू-
षितम् । नीलोत्पलनिभं नित्यं नमामि चण्डभैरवम् । १ ।
चतुर्भुजा षडास्या च मयूरस्था त्रिलोचना । कौमारी
सौख्यदा भूयात्सर्वाभरणभूषिता[3] ॥ २ ॥ नैर्ऋते । चतु-

र्भुजं चैकवक्त्रं कायखट्वाङ्गभूषितम् । नानावर्णद्युतिधरं नौम्यहं क्रोधभैरवम् ॥ १ ॥ चतुर्भुजा चैकवक्त्रा तार्क्ष्यसंस्था त्रिलोचना । सर्वाभरणसंयुक्ता वैष्णवी पातु मत्पितॄन् ॥ २ ॥ पश्चिमे । एकवक्त्रं चतुर्बाहुं कायखट्वाङ्गभूषितम् । हरतालद्युतिधरं वन्दे चोन्मत्तभैरवम् ॥ १ ॥ चतुर्भुजा चैकवक्त्रा दंष्ट्रोद्धूतधराऽस्तु सा । सर्वाभरणशोभाढ्या वाराही सर्वकामदा ॥ २ ॥ वायवे । चतुर्भुजं चैकवक्त्रं कायखट्वाङ्गभूषितम् । रक्तकृष्णद्युतिधरं कपालेशं प्रणौम्यहम् ॥ १ ॥ चतुर्भुजैकवदना सहस्राक्षा गजस्थिता । इन्द्राणी पातु मत्पितॄन् पूजिता सुरमण्डले ॥२॥ उत्तरे । चतुर्भुजं चैकवक्त्रं कायखट्वाङ्गभूषितम् । पद्मरागमणिप्रख्यं वन्दे भीषणभैरवम् ॥ १ ॥ चतुर्दोरेकवदना नरसंस्था त्रिलोचना । वामे खट्वाङ्गशूलाढ्या चामुण्डाऽस्तु शुभप्रदा ॥ २ ॥ ईशाने । एकवक्त्रं चतुर्बाहुं कायखट्वाङ्गभूषितम् । तुहिनोज्ज्वलमऽच्छाभं वन्दे संहा-

रभैरवम् ॥ १ ॥ चतुर्भुजैकवदना शुभ्रस्रग्धामभूषिता ।
चण्डिका सौख्यदा भूयादष्टमी मातृमण्डले ॥ २ ॥
आह्वानं ॥ दीपप्रतिपादनम् ॥ (यमान्तकायै ३ अद्यतावत्
पितुर्भैरव गोत्रस्य रुद्रास्य मोहान्धकारनिवारणार्थं परप्रका-
शप्राप्त्यर्थं) इदमऽसिताङ्गभैरवसहितं ब्राह्मीदीपं प्रतिपादयामि
नमः ॥ १ ॥ (यमान्तकाये ३ अद्यतावत्-रुरुभैरवसहितं
माहेश्वरीदीपं- ॥ २ ॥ चण्डभैरवसहितं कौमारीदीपं प-
॥ ३ ॥ क्रोधभैरवसहितं वैष्णवीदीपं ॥ ४ ॥ उन्मत्तभैरव-
सहितं वाराहीदीपं-॥ ५ ॥ कपालेशभैरवसहितं ऐन्द्रीदीपं
॥ ६ ॥ भीषणभै-चामुण्डादीपं ॥ ७ ॥ संहारभै महाल-
क्ष्मीदीपं परिकल्पयामि नमः ॥ ८ मध्यकलशप्रतिपादनं ॥
यमान्तकायै ३ अद्यतावत् पितुर्भैरवगोत्रस्य रुद्रस्य मोहा-
न्धकारनिवारणार्थं परप्रकाशप्राप्त्यर्थं श्रीशिवसहितं दे-
वीपीठेश्वरीपरिवृतमहामहेश्वरीचण्डीकापालिनीश्वरीशक्ति-
दीपं ददानि ३ प्रतिगृह्णामि ॥ २ ॥ ततोऽक्षय्यं । पितुर्भैर-

वगोत्रस्य रुद्रस्य दत्तमन्नमऽक्षय्यमऽस्तु स्वधानमः ॥ ततो ब्राह्मणपृच्छा। सव्येन। तन्महेशाय ॥ ३ ॥ अपसव्येन। अग्निष्वात्तेभ्यो ३ यमान्तकायै ३ अद्यतावत् पितुर्भै-परलोके प्रकाशप्राप्त्यर्थं श्रीचण्डीश्वरीमहालक्ष्मीप्रीत्यर्थं दीपश्राद्धनिमित्ते शाक्तश्राद्धं गुरुपूजनं चण्डीपूजनमच्छिद्रं सम्पूर्णमस्तु एवमस्तु ॥ गवांग्रासादि। कलशाच्छिद्रं। पात्राणि चालयेत्। आचम्य। उदकलशं। मन्त्रार्थः। अद्यतावत्। पितुः भैरवगोत्रस्य रुद्रस्य परलोके पाद-दाहादिपीडानिवारणार्थं तृणासनं तृणपादुकां काष्टपादिकां हसन्तिकां दण्डादि ददानि ॥ ३ ॥ अनन्तशास्त्रकल्पाय-। नन्दन्तु साधकाः सर्वे० । दीपस्थापनस्थलानि सन्ध्याकाले ॥ गोगृहे[१], देवगृहे[२], शून्यागारे, नद्यां[३], तीर्थे[५], मार्गे[६], गोमयराशौ[७], चतुष्पथे[८], । इति । सामग्री । शालिचूर्णं, अक्षोटा; दीपाः तृणासनं, काष्टपादिका, गोधूमाऽपूपाः, मीननमांसं, तृणआरि, सुवर्णदीपः रजतवर्तिका यज्ञोप-

वीत, वस्त्र, तिला मधु दधि क्षीरं तिलतैलं घृतं कर्पास-वर्तिका, कृष्णतैलं अग्निभाण्डं, दण्डं, काष्ठपीठिका (दी-पासन, भाषया(जुवोर) विष्णुप्रतिमा तस्या उपकरणानि च । इति शिवदीपश्राद्धविधिः ॥

अथ शैववैश्वदेवविधिः

तत्रादौ अग्निकुण्डमानीय स्वदक्षे सामान्यार्घपात्रं "गः अस्त्रायफट्, हः अस्त्रायफट्, यःअस्त्रायफट्, फट्अस्त्रायफट्" इति सम्पूज्य । "ॐफट्क्रव्यादं निष्कर्षयामिफट्" इति दर्भकाण्डद्वयं प्रज्वाल्य नैर्ऋते क्षिपेत् । "फट् अग्नेः क्रव्याद-शुद्धिं करोमिस्वाहा" इति तिलाहुतिपञ्चकं हुत्वा । प्राणा-यामः ॥ १६, ६४, ३२ । फट्अग्निंपरिसमूहामिफट् ३ फट्अग्निंपर्युक्षामिफट् ३ फट्अग्निंपरिषिञ्चामिफट् ३ ॥ इत्यभ्युक्ष्य । फट् यज्ञस्यसन्ततिरसियज्ञस्यत्वासन्तत्यैआ-स्तृणामिफट् । ४ । पूर्वे ब्रह्मणेनमः, दक्षिणे रुद्रायनमः, उत्तरे सदाशिवायनमः,पश्चिमे विष्णवेनमः, इतिस्तरणचतुष्ट-

...मास्तीर्य । रं इतिवह्निबीजमुच्चारयन्कुण्डाग्निंपूरकेनाऽनीय, पुन-
...ष्टिवारमुच्चरन्स्वनाभ्यग्निना सह कुम्भकेनैक्यंविधाय पुनर्द्वा-
...द्वारमुच्चरन्रेचकेनहृदिस्थानादागत्य "शिवाग्निस्त्वं" इति
...त्वा वामनासापुटेन कुण्डाग्नौ निवेशयेदिति प्राणायामः ॥
ततोऽग्निपूजा ॥ आग्नेये । ह्रांअग्नयेनमः । दक्षिणे । ह्रांसोमाय
नमः । नैर्ऋते । ह्रांसूर्यायनमः । पश्चिमे । ह्रांबृहस्पतयेनमः ।
वायव्ये । ह्रांप्रजापतयेनमः । उत्तरे । ह्रांसर्वेभ्योभूतेभ्योनमः ।
ईशाने । ह्रांविश्वेभ्योदेवेभ्योनमः । पूर्वे । ह्रांअग्नयेस्विष्ट-
कृतेनमः इति पूजांकृत्वा । चरुमानीय । ॐरंफट्वैश्वदेवस्य
सिद्धस्य...ग्नावधिश्रित्य । शृतमभिघार्य । ह्रांअग्नयेस्वाहे-
त्युत्तरतः । ह्रांसोमायस्वाहेतिदक्षिणतः । तयोर्मध्ये । ह्रांसूर्याय
स्वाहा, ह्रांबृहस्पतयेस्वाहा, ह्रांप्रजापतयेस्वाहा, ह्रांसर्वे-
भ्योभूतेभ्यःस्वाहा, ह्रांविश्वेभ्योदेवेभ्यःस्वाहा, ह्रांअग्नये
स्विष्टकृतेस्वाहा, ॐभूर्भुवः स्वःअग्नेजातवेद इहाऽवह सर्व-
कर्माणि साधयसाधयस्वाहा इतिहुत्वा सर्वमन्त्रचक्र गणेशा-

दीनामेकैकाहुतिं हुत्वा । नैवेद्यं अमृतमस्तु गणपत्यादिभ्यः पञ्चायतनदेवताभ्यश्च सर्वेभ्योमन्त्रवृन्देभ्यः ॥ हेमपात्रगतं दिव्यं परमान्नं सुसंस्कृतम् । पञ्चधाषड्सोपेतं गृहाण मम सिद्धये । ठःठः द्रव्यस्वरूपिणे अमृतंनिवेदयामिफट्नमः ॥ पूर्वाग्रान्दर्भानास्तीर्य । चुल्लिदक्षे । धर्मायनमः । चुल्लिवामे । अधर्मायनमः काञ्चिकभाण्डे सरसपरिवर्तमानायनमः जलभाण्डे जलाश्रयायवरुणायनमः गृहप्रधानद्वारे महाविघ्नराजायनमः आग्नेये नन्दिनेनमः नैर्ऋते सुभगेनमः वायवे सुमङ्गलायनमः ईशाने भद्रङ्कर्यैनमः । पूर्वे, मन्दिरशिरसि । वास्त्वधिपतयेब्रह्मणेनमः । पेषिण्यां हिरण्यकेश्यै उलूखले रौद्रकोटिपतयेनमः । मुसुले । बलभद्रप्रियायप्रहरणायनमः संमार्जन्यां मृत्यवेवेदमोदितायनमः १४ स्वशयनीयशिरसि कामायकुसुमायुधायनमः स्तम्भस्याधः स्कन्दायगृहाधिपतयेनमः १६ षोडशधर्मादिभ्योऽन्नंनमः षोडशधर्मादिभ्य आचमनीयंनमः । "अपसव्येन" दक्षिणाग्रान्दर्भानास्तीर्य ।

फट्अस्त्रायफट् समस्तशिवगोत्ररुद्रेभ्यः पितृभ्योभूपृष्ठेऽवनेजनं-स्वधानमः । आधारशक्त्यैनमः पृथिव्यै वह्निमण्डलाय सत्त्वाय रजसे तमसेनमः अकारतत्त्वाय उकारतत्त्वाय, मकारतत्त्वायनमः, शतदलपद्मासनायनमः सहस्रदलपद्मासनायनमः । अन्नतिलमध्वाज्यपयोभिः । अग्निष्वात्तेभ्यो २ अद्यतावत् पितः शिवगोत्रईश्वर एतत्तेऽन्नंयेचत्वाऽनु, पितामह, प्रपितामह । मातः शिवगोत्रेबलविकरिणि एतत्तेऽन्नंयाश्चत्वाऽनु । पितामहि, प्रपितामहि । मातामह एतत्तेऽन्नंयेचत्वाऽनु । प्रमातामह, वृद्धप्रमातामह । मातामहि एतत्तेऽन्नंयाश्चत्वाऽनु, प्रमातामहि, वृद्धप्रमातामहि, अन्ये चपितरः मातृपक्ष्यास्तुये केश्चित्-। लेपंनिवार्यं । समस्तशिवगोत्रेभ्यः पितृभ्यः समालभनं गन्धः स्वधानमः एवं अर्घपुष्पदीपधूपभक्ष्यभोज्यतिलमधुहिमपानादिस्वधानमः ॥ सव्येन । वसन्तायनमः । ६ । उत्तिष्ठ हरिपिङ्गललोहिताक्ष धनं देहि मे दापयतुस्वाहा, इतिहुत्वा । फट्शिवाग्निविष्णु-

श्वामिफट्ं फट्फट् । फट्यज्ञस्यसन्ततिरसि यज्ञस्यत्वा सन्त-त्यैनयामिफट् ॥ तर्पणं । तर्पितोऽसि विभो भक्त्या होमे-नानलमध्यगः । होमद्रव्योद्भवं वीर्यं तत्सर्वमात्मसात्कुरु । अग्नौपुष्पं क्षमस्व मन्त्रनाथाय नित्यानन्दकरायच । धर्मा-र्थकाममोक्षाय पुनरागमनायच ॥ तेजोऽसि तेजोमयि-देहि । इतिसंहारमुद्रयाऽग्निवह्नासापुटेन ब्रह्मरन्ध्रान्तं नीत्वा सुषुम्णामार्गेण स्वहृदयान्तरानीयमूलाधारवह्नौ संस्थापयेत् ॥ भगवन्यक्ष्म एतत्तेऽन्नंस्वधानमः आचमनीयंस्वधानमः । कण्ठो-पवीती हन्तमनुष्येभ्यः सनकादिभ्यऋषिभ्योऽन्नंनमः आच-मनीयंनमः । गोग्रासादि । क्षेत्रेशतर्पणम् ॥ इतिशैववैश्व-देवादिनित्यकर्मविधिः ॥

समाप्तोऽयं कर्मकाण्डग्रन्थः ।

ओ३म्

नित्यकर्मविधिः

प्रतः कृत्य—स्नानविधि—और सन्ध्योपासन

जिसको

पं गोविन्दराम भट्टहंड्
(रिटाइर सं० टीचर
गवर्नमेंट हाइस्कूल पाठशाला
श्रीनगर कश्मीर)

ने प्रचलित हिन्दीभाषा में इतिकर्तव्यता से संवलित किया

और

कश्मीर मर्कनटाइलप्रेस में छपायाहै
इसके सब मुद्रणाधिकार संरक्षित हैं

शाकाब्दाः १८५५ तृतीयावृत्तिः १०००

मूल्यम् 0-6-0

(दण्ड कसरत)

लाघवं कर्मसामर्थ्यं विभक्तघनगात्रता ।
दोषक्षयोऽग्निवृद्धिश्च व्यायामादुपजायते ॥ (इत्यादि)

दंडकसरत करनेसे देहमें हल्कापन, काम करनेकी ताकत अलग २ कठोर अंगोंका होना, वात पित्त कफके दोषोंका क्षय जाठर अग्निकी वृद्धि, इतने गुण हैं ॥

इससे दृढ गात्र वाले प्राणीको रोग कदाचित् नहीं होता, भोजनभी शीघ्र पचता है, इससे बुढापा जल्दी नहीं आता. चिकने (तरपदार्थ) खाने वाले और बली पुरुषोंको सदैव हितकारी है ॥

स्थूलता (मोटापन) हरण करनेका उपाय इससे अन्य नहीं, वसन्त और शीत कालमें व्यायाम निरन्तर हित करताहै । परन्तु अन्य ऋतुओंमें भी अपने बलके अनुसार बलार्द्ध पर्यंत अर्थात् व्यायाम करते २ हृदयकी प्राणवायु जब मुखमें आजाये, मुख सूखने लगे, माथे नाक शरीरके जोडों और कक्षोंमें पसीने आजावें तबतक व्यायाम करें ॥ शुभमस्तुसर्वजगताम् ॥

भूमिका

बहुत कारणों से भूमंडल के सब से प्रशंसनीय, पुण्य क्षेत्र, विद्वद्रत्नाकर विद्यास्थान, और सभ्यदेश इस भारतवर्ष के निवासी चार वर्णों में से श्रेष्ठ ब्राह्मण लोगों का ब्राह्मणपन उक्तगुणों समेत दिनाहिन अब घटता जाता है। जिन ब्राह्मणों की स्तुति पूर्वकाल में प्रत्यक जगह पर कीजाती थी। और जिनका माहात्म्य सुनकर क्या सजातीय क्या विजातीय राजे महाराजे धनी और शूरवीर पुरुष भी उनका नाममन्त्र उच्चारते वक्त सिर झुकाते थे। जो अपने विद्याप्रभाव से प्रत्येक राज्य में मन्त्री मित्र और आचार्य ही ठहरा करते थे। जिनका वर और शाप पत्थर की लकीर होता था। जो अपन ज्ञानबल से इन्द्रादिक देवों को भी अपने वश्य में रखते थे। जिन्हों ने प्राचीन समय में निस्सीम ज्ञानशक्ति से ऐसी ताकतें, ऐसी कलायें, ऐसी वैदंगी, ऐसा भूगोलविज्ञान और खगोलविज्ञान, ऐसा साइन्स, और ऐसा परमार्थतत्त्व प्रकट कर रखा है, कि जिस के मुकाबिल में आजकल एक आधि पुरुष भी इस पृथ्वी मण्डल में विद्यमान नहीं है। यदि कोई हो भी तो वह उन्हों के निर्मित पुस्तकों को मार्गदर्शक बनाकर अपने आप को पंडितमन्य मानता हो॥

हम वह ब्राह्मण थे। जो पूर्वकाल में सांसारिक तमाम सुखों और भूगों को भोगते हुये अपना परलोक वेद उपदेश के अनुसार चलकर सुधारते थे और नीचले तीन वर्णों में भी क्षत्रिय को प्रजा शासन के समय तथा युद्धके समय नीतिपूर्ण सदुपदेश जयदायकमन्त्र अथवा वैराग्य के समय ज्ञानपूर्ण आत्मोपदेश देदेतेथे, एवं और वर्णों को भी उनके धर्म कर्मों के अनुसार हितोपदेशों से दोनों लोकों के लिए सत्य-सुख से और नित्यसम्पदाओं से परिपूर्ण करदेते थे।

अब आज हम में उन्ही महिमाओं के घट जाने के 'पितृपैतामहिक विद्याओं का न पढना और न जानना उन की जैसी इच्छाओं का न करना, और परलोक को विस्मृति में डालना-इत्यादि बहुत से कारण है।

आजकल कुछ अंश के बिना जितने ब्राह्मण भाई हैं। वह सब के सब अन्य विद्याओं को ही-जो केवल शिल्पमात्र ही हैं, हितकारिणी मान कर अपने आचार, विचार, धर्म, कर्म, स्नान, सन्ध्या, वैश्वदेव, व्याहृति, वेदपाठ आदि नित्य नैमित्तिक क्रियाओं को छोड कर अत्यन्त हीनावस्था में पड रहे हैं। जिस अवस्था का नाम उन्हों ने आजादी रखा है। जिसका फल प्रत्यक्ष है कि उत्तम होकर अधम, बली होकर निर्बल, और स्वयं आचार्य होकर औरों के शिष्य बन रहे हैं॥

मुझे यह अत्यन्त शोक से कहना पडता है, कि इस किस्म की आजादी का विचार तो केवल हमारे ही भाइयों को सूझा है, क्योंकि और मजहबों के

लोग पूर्ववत् बल्कि उससे भी बढकर अपने धर्मी असूलों के पाबन्द् रहते हैं । और अपने सन्तानों में अन्य विद्याओं से पहिले अपनी धर्मविद्या का संस्कार डालते हैं । और उन को मजहबी असूलों पर कारबन्द् रहने की सख्त ताकीद् करते हैं ।

बरखिलाफ इस के हमारे भाई दिन बदिन अपने धर्म से गिरते जाते हैं । जिसका नतीजा यह होता है कि उनको न काफी वृत्ति मिलती है, न आदर सत्कार और न परलोक । क्योंकि यह लोग अन्य-भाषाओं में ही अपनी विद्याध्ययन की अवस्था समाप्त करते हैं । और अपनी सच्ची हितकारिणी पूर्वजों की संस्कृतविद्या से तो संस्कार हीन रहते हैं । जिस का फल—मैं बडे अफसूस से लिखता हूँ—यह होता है । कि स्वधर्म की अनभिज्ञता से कभी २ औरों के हथखण्डों में फँस कर वह अवर्णवर्ण भी हो जाते हैं ।

बल्कि जब कभी किसी सज्जन महात्मा विद्वान् पुरुष की प्रेरणा से अपनी प्राचीन सद्विद्या के, अपने प्राचीन आचार के, और अपने प्राचीन नित्य नैमित्तिक कर्म के तलाश में यह लोग पडते हैं । तो उस समय सुखदायिक संस्कृतविद्या का पढना उन्हें कठिन दिखाई देता है । जिस से यह लोग ऐसी प्रेरणा किये जाने पर भी अपने ब्राह्मणपन से वञ्चित ही रहते हैं ॥ अपने भाइयों की गिरी हुई अवस्था देख कर मेरे मन में बहुत काल से यह संकल्प उठता रहा है, कि संस्कृत से नावाकिफ नवयुवक भाइयों को कुछ आ-

चार विचार नित्यकर्म आदि का मार्ग ऐसी सरल रीति से मिले, जिस से वह घर बैठे ही आवश्यक कुछ आचार आदि को स्वयं सीख सकें, और औरों को भी सिखा सकें। इस संकल्प के पूर्ण करने का यही विचार आगया कि अत्यन्तावश्यक और मुख्यतम प्रथम पुस्तक "शौचकर्म स्नानविधि और सन्ध्योपासन आदि" ऐसी प्रचरितभाषा (हिन्दी) में लिखा जाये कि जिस से नित्यकर्म आदि आचार की प्राथमिक शिक्षा सुगम बन जाये। जिस से तमाम छोटे और बड़े मनुष्य केवल देवनागरी अक्षर सीखकर ही इस से फाइदा उठा सकें॥

प्रथम और द्वितीय आवृत्ति के २ सहस्र कापियों के हाथोंहाथ बिक जाने से और लोगों में इसका प्रभाव पड़जाने से इस अपने हार्दिक प्रेमपूर्ण अभिलाष को मैंने सफल मानलिया। और फिर मांग रहनेपर भी यद्यपि किसी कारण से आजतक कुछबर्सों में फिर छापने का अवसर न मिला तोभी विद्यार्थि पुरुषों के आग्रह से आज फिर यह तृतीय आवृत्ति प्रकाशन का उद्योग आगया जिसका अभिप्राय सनातनीभाइयों की केवल सन्तुष्टि है॥ श्री शिवः शरणम्॥

विनीत विज्ञापक

पंडित गोविन्दराम भट्टहुंडू। रिटयर

संस्कृत अध्यापक गवर्नमेंट हाइस्कूल

पाटशाला श्रीनगर कश्मीर

(महाराजगंज बाज़पुर)

प्रभुसम्मित उपदेश देने वाले वेद आदि शास्त्र हमें मङ्गलदायक शासन करते हैं :—**अहरहः सन्ध्यामुपासीत** । षड्विंशब्रा० प्रपा १५ खं० ५ ॥ द्विज प्रतिदिन सन्ध्या की उपासना किया करें ॥ **तस्माद्ब्राह्मणोऽहोरात्रस्य योगे सन्ध्यामुपासीत** । जिस कारण दिन और रात्रि के पापों का नाश सन्ध्या से होता है, और सन्ध्या ही ब्रह्म प्राप्ति कर देती है । इस लिये दिन और रात्रि के मिलने के समय इस की उपासना करनी चाहिये ॥ **उद्यन्तमस्तं यान्तमादित्यमभिध्यायन्कुर्वन्ब्राह्मणो विद्वान् सकलं भद्रमाश्नुते** । तैत्तिरेय आ० २ प्रापा० २ अनु० २ ॥ सूर्य के उदय और अस्त के समय विद्वान् ब्राह्मण आदित्य का ध्यान करने वाला तमाम मङ्गलों को पाता है ॥ **यदह्नात्कुरुते पापं तदह्नात्प्रतिमुच्यते । यद्रात्रियात्कुरुते पापं तद्रात्रियात्प्रतिमुच्यते** ॥ तैत्तिरेयारण्यक ॥ मनुष्य जिस पाप को दिन में करता है वह पाप दिन की (सायं की) सन्ध्या से नष्ट जाता है । और जिस पाप को रात्रि में करता है वह पाप रात्रिसन्ध्या (प्रभातसन्ध्या) से नष्ट जाता है ॥ **पूर्वां सन्ध्यां जपंस्तिष्ठेन्नैशमेनो व्यपोहति । पश्चिमां तु समासीनो मलं हन्ति दिवा कृतम्** ॥ मनुः २ । १०२ ॥ प्रातः काल की सन्ध्या में खड़ा रह कर जप करने वाला रात्रि के पापों से

छुट जाता है। और सायंकाल की सन्ध्या में बैठ कर जप करने वाला दिन के पापों से छुट जाता है ॥

इत्यादिक सब वेद पुराण धर्मशास्त्र गृह्य और कल्पों में द्विजों का अवश्यकर्तव्य नित्यकर्म प्रभात और सायं की सन्ध्या उपदेश किई गई है। और मध्याह्न की सन्ध्या भी गृह्य-परिशिष्ट-शौनक-जयन्त-पारिजात आदिकों ने उपदिष्ट जान लेनी चाहिये ॥ जैसा कि—

पूर्वापरे तथासन्ध्ये सनक्षत्रे प्रकीर्तिते ।
समसूर्येपि मध्याह्ने मुहूर्तसप्तमोपरि ॥

सांख्यायनगृह्य अर्थात् प्रातः और सायंकालकी सन्ध्यायें तारकों सहित करनी चाहियें और मध्याह्नकी संध्या जब सूय आकाशके मध्यमें पहोंचे, करनी चाहिये । मध्याह्नकाल दिनके तीन हिस्सोंमें से मध्यमहिस्साहोताहै, दिनका पहिले $\frac{1}{3}$ भागके बादका समय ॥ अथवा सप्तम मुहूर्त-१४ घटी के बादका समय ॥

शिवशक्तिसमायोगो यस्मिन्काले प्रजायते ।
तत् समाधिजसन्ध्यार्थं ध्यायेत् संन्ध्या त्रयं द्विजः ॥ शिव और शक्तिका योग जिस समाधि में होजाता है उस समाधिसन्ध्याके लिये तीनकालकी सन्ध्या करनी चाहिये इत्यादि ॥ इस त्रिकाल सन्ध्या के करने से द्विजवृन्द सब पापों से छुट जाता है और अनामय ब्रह्मलोक को पाता है। जैसा कि कहा है:—

सन्ध्यामुपासते ये तु सततं शंसितव्रताः ।
विधूतपापास्ते यान्ति ब्रह्मलोकं सनातनम् ॥

सन्ध्या का व्रत धारण किये हुये जो द्विज इस की उपासना नित्य किया करते हैं। वह पापों से मुक्त होकर सनातन ब्रह्मलोक को पाते हैं ॥
तथा इसके न करने से ब्राह्मण क्षत्रिय और वैश्य दोषी होजाते हैं। जैसा कि कहा है:—**नानुतिष्ठति यः पूर्वां नोपास्ते यश्च पश्चिमाम्। स शूद्रवद्बहिष्कार्यः सर्वस्माद्द्विजकर्मणः॥** मनु २ । १०३ ॥
जो द्विज दोनों वक्त की सन्ध्या नहीं करते हैं वह शूद्र की तरह द्विज कर्म से बाहिर करने के योग्य है ॥
अनर्हः कर्मणां विप्रः सन्ध्याहीनो यतः स्मृतः। छान्दोग्यपरिशिष्ट ॥ जिस कारण सन्ध्याहीन विप्र कर्मों के योग्य नहीं रहता है। इस लिये सन्ध्या को कभी न त्यागें। **सन्ध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु। यदन्यत्कुरुते कर्म न तस्य फलभाग्भवेत्** श्रीदक्षः ॥ सन्ध्या के बिन पुरुष नित्य अशुद्ध होता है। वह किसी कर्म के लाइक नहीं है। वह और जिस किसी कर्म को करता है। उसका फलही नहीं पाता है। अर्थात् उस के सब कर्म निष्फलही हो जाते हैं॥

सन्ध्या के समय इस की उपासना के विना और कोई काम निषिद्ध है ॥ **अथ य इमां सन्ध्यां नोपास्ते नाचष्टे न स जयति। ये तूपासते श्रोत्रिया भवन्तीत्युपनीताः। छेदन भेदन भोजन मैथुन स्वपन स्वाध्यायानाचरन्ति ये**

ते श्व सूकर सृगाल गर्दभ सर्पयोनिष्वभिसंपद्यमानास्तमोभिः सम्पद्यंते तस्मात्सायं प्रातः सन्ध्यामुपासीत ॥ गोभिलगृह्य ॥ फिर जो इस सन्ध्या की उपासना नहीं करता है। वा औरों को इस का उपदेश नहीं देता है। वह जय नहीं पाते हैं॥ जो पुरुष तो इसकी उपासना करते हैं, वह गायत्री संस्कारवान् होकर वेदाध्ययन के फलको पाते हैं ॥

जो लोग सन्ध्या काल में काटना, फाडना, खाना, स्त्रीसङ्ग, निद्रा, और वेदपाठ वगैरा काम करते हैं, वह कुत्ते, सुअर, गीदड, गधे, और साम्प आदिके जन्म में आकर अज्ञान रूपी अन्धेरे से ढाम्पेजाते हैं, इसलिये सुबह और शाम को सन्ध्या की उपासना करनी चाहिये।

सन्ध्या का उत्तम काल

प्रातः को 'तारामण्डल अभी सम्पूर्ण चमक रहा हो' इस समय से सूर्य के उदय होने तक गायत्रीका जप खडे होकर करते रहें और सायं को 'सूर्य का बिम्ब निस्प अभी अस्त को न हो गया हो' इस वक्त से तारामण्डल जब सम्पूर्ण चमक निकले तबतक बैठकर इसका जप करते रहें, तथा मध्याह्न की सन्ध्या 'सूर्य आकाश के मध्य में ठहरा हो' इस समय करनी चाहिये। अथवा दिनका मध्यम $\frac{1}{3}$ भाग वा सप्तम मुहूर्त के बाद का समय मध्याह्नसन्ध्या का काल है॥ इससे उलटा मध्यम और अधम समय है।

रोगादिआपत्ति में और मरते और बालक आदि उत्पन्न होने के अशौच के दिनों मेंभी सन्ध्या को न छोड देना, केवल देव ऋषि पितृ तर्पण ही अशौच में न करना चाहिए

ब्राह्ममुहूर्त (अरुण उदय से पहिले प्रायः ५ घडी रात) को नीन्द से उठें। हाथ पैर मुख धोकर ३ आचमन करके उपस्पर्शन (स्नानविधि में जैसा लिखा है) तथा प्राणायाम करके शुद्ध भूमि पर चैल के ऊपर मृगछाल, उस के ऊपर कुशा बिछाकर इसी आसन पर (जैसा गायत्री जप में आसन लिखा है) बाह्य आसन और शारीरिक आसन धर कर पूर्व की तरफ मुख करके ठहरें फिर ललाट पर तेजोमय अपने गुरु का ध्यान धर कर 'गुरुस्तुति' आदि जो यहां अलग लिखी गई है, पढें। फिर गुरु से आज्ञा लेकर उन के उपदेश के अनुसार यथेष्ठसमय अपने इष्टदेवता की ध्यानधारणा में रहें फिर उस से निकलकर शौच स्नान सन्ध्यावन्दन पूजा अग्निहोत्र पाठ तथा सदाचार आदि धर्म का पालन अपने २ वर्णाश्रमके अनुसार आरम्भ कियाकरें॥

विप्रो वृक्षः मूलतस्तस्य शौचं
वेदाः शाखा धर्मकर्माणि पत्रम्।
तस्माच्छौचं यत्नतः पालनीयं
छिन्ने मूले नैव वृक्षो न शाखाः॥

(अर्थ) ब्राह्मण एक दरख्त है। उस की झड शौच (शुद्धि) है, वेद उस की शाखें, और धर्म और कर्म उस के पत्ते हैं। इस कारण उस दरख्त (ब्राह्मण) के झडों (शौच) की हिफाजत अत्यन्त यत्नों से होनी आवश्यक है। क्योंकि झडों के सूख जाने पर न दरख्त रहता है और न उसकी शाखायें बढ सकती वा निकल सकती हैं शौच दो प्रकार का है। आभ्यन्तर और बाह्य (भीतर की शुद्धि और बाहिर की शुद्धि)॥

मित्रता, दया, हर्ष खुशी। और उपेक्षा (बे-परवाही) आदि गुणों की भावना (आरास्तगी) रखने से मद-मान-ईर्षा (बदज़ुनी) असूया (कीना) आदि चित्तके मलों का धोना अन्दर की शुद्धि है। अर्थात् मनुष्य अपने से सुखी पुरुषों को देखकर चित्त में प्रसन्नता रखे, न कि ईर्षा। दुःखी को देखकर वह भावना हो, जिस से इसका दुःख दूर हो सके। यह दया की भावना घृणा (नफरत) से और किसी की हानि से बचालेती है॥

इसी प्रकार पुण्यवान् को देखकर हर्ष की भावना रखने से असूया दूर हो जाती है। पापी को देख कर उदासीनता की भावना रखे। अर्थात् न उसके साथ प्रीति करे न वैर। इस भावना से अमर्ष (न सहारना) दूर होजाता है॥

इससे अधिक सनातनधर्मसेवन, सत्यभाषण, वेद और उपनिषद्ग्रन्थों का पढना, सत्संग, अग्निहोत्र सन्ध्योपासन, ईश्वर की शरणता और उसका नामस्मरण भीतरी शौच है॥

मिट्टी और पानी आदि से शरीर वस्त्र स्थान और पात्र आदि को सत्यतापूर्वक शुद्ध व्यापारकरने से द्रव्यों को, यथायोग्य वर्ताव से आचरणों को, शुद्ध रखना और निष्कपटभाव से कमाये शुद्ध अन्न पान आदि का भोजन करना बाहिर का शौच है॥

उपरोक्त प्रातःकृत्य को समाप्त करके तब आबादी से बाहिर मल मूत्र त्याग के वास्ते दिशाजंगल जावे॥

मूत्र करते समय नदी से १० हाथ, और तीर्थ से ४० हाथ, और मल करते समय नदी से ४० हाथ और

तीर्थ से १६० हाथ दूर जाकर शुद्ध * मिट्टी और जल का पात्र साथ लेवें । और उनको जरा फासले पर रखकर यज्ञोपवीत को दाईं कान पर धर कर, कीडे, मकोडे से रहित, और सूखी घास वाले स्थान पर, सुबह शाम और दिन को उत्तर की तरफ, और रातको दक्षिण की तरफ मुंह करके मल वा मूत्र छोडें, और इस वखत सिर को चादरी से ढाम्पें । और मौन धारण करके मुंह और नाक को बन्द रखकर दुर्गन्धि से बचें । उठते समय लिंगस्थान को बाईं हाथ में रखकर मिट्टी और जलपात्र उठाकर पहिले जलपात्र में तर्जनी डालें । और फिर शौच करें । लिंगस्थान को १ दफा और गुह्यस्थान को ३ दफा जल और मिट्टी से शुद्ध करें । फिर और किसी जगह जाकर बाईं हाथ को दसबार और फिर दोनों हाथों को सातबार नई मिट्टी और जल से धोयें ।

केवल मूत्रत्याग के समय एक मिट्टी से लिंगस्थान को और तीन से बाईं हाथ को, और दोनों हाथों को दोबार शुद्ध करें ॥

मार्ग में भस्म, गोस्थान, हल से खोदे स्थान, जल, पर्वत, देवस्थान के खंडरात, चियूटीयों की मिट्टी, सब्ज घास. और कीडों के बिलों पर, मल मूत्र न करना चाहिये

ब्राह्मण को गौरवर्ण की, क्षत्रिय को रक्तवर्ण की, वैश्य

---

* मिट्टी नदी के किनारे की रेतली वा शौरज़मीन की न हो । और चूहों आदि कीडों की निकाली हुई, रास्ते पर की कीचड वा किसी दूसरे आदमी की बाक़ी बची हुई भी न हो ॥

को हरिद्रवर्ण की, और शूद्र और स्त्रियों को कृष्णवर्ण की मिट्टी होनी चाहिए ॥

परदेश में जो जल हो, जैसी मिट्टी मिले, उसी से शौच करना योग्य है ॥

इस के बाद पैरों को ३ बार मिट्टी से धोये। और पानी से १२ कुर्लियां करके बाईं तरफ जमीन पर फेकें। फिर ३ आचमन और उपस्पर्शन करके प्राणायाम करें। और जलपात्र को ३ बार मिट्टी से शुद्ध करें ॥

यह शौचविधि स्वस्थ शरीर वाले पुरुष के लिये है। रोगी पुरुष जैसा कर सकें, वैसा ही करें ॥

अब दन्तधावन (दांतन) को जो १२ अंगुल लम्बा और कनिष्ठा के समान मोटा हो, लाकर धोयें। इस से उत्तर की तरफ मुख करके दान्तों आदि को साफ करके ६ कुर्लियां करें ॥

दांतन काटने का मन्त्रः—

आयुर्बलं यशो वर्चः प्रजा पशु वसूनि च ।
ब्रह्मप्रज्ञां च मेधां च त्वं नो देहि वनस्पते ॥

याद रखें, कि सूर्य निकलने के बाद और प्रतिपत्-षष्ठी-अष्टमी-चतुर्दशी-पूर्णिमा-अमावसी-संक्रान्ति-आतवार-व्रतउपवास-और श्राद्ध करने के दिन दांतन न किया करें ॥

ॐ शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम्
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ।
अभिप्रेतार्थसिद्ध्यर्थं पूजितो यः सुरैरपि
सर्वविघ्नच्छिदे तस्मै गणाधिपतये नमः ॥ १ ॥
ब्रह्मानन्दं परमसुखदं केवलं ज्ञानमूर्त्तिं
द्वन्द्वातीतं गगनसदृशं तत्त्वमस्यादिलक्ष्यम् ।
एकं नित्यं विमलमऽचलं सर्वधीसाक्षिभूतं
भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि ॥ २ ॥
स्मारं स्मारं जनिमृतिभयं जातनिर्वेदवृत्ति-
र्ध्यायं ध्यायं पशुपतिमुमाकान्तमन्तर्निषण्णम् ।
पायं पायं सपदि परमानन्दपीयूषधारां
भूयो भूयो निजगुरुपदाम्भोजयुग्मं नमामि ॥ ३ ॥
(१ गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुः साक्षान्महेश्वरः ।
गुरुरेव जगत्सर्वं तस्मै श्रीगुरवे नमः ॥ ४ ॥
२ अखण्डमण्डलाकारं व्याप्तं येन चराचरम् ।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥ ५ ॥
३ अज्ञानतिमिरान्धस्य ज्ञानांजनशिलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥ ६ ॥
श्लोकत्रयं पठेत्प्रातः गुरुपादाम्बुजं स्मरन् ।
त्रिवर्गफलभागत्र मृतौ मोक्षपदं व्रजेत्) ॥
हरौ रुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चन ।
सर्वदेवस्वरूपाय तस्मै श्रीगुरवे नमः ॥ ७ ॥
स्थावरं जङ्गमं व्याप्तं यत्किंचित्सचराचरम् ।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥ ८ ॥
चिन्मयं व्यापितं सर्वं यत्किञ्चित्सचराचरम् ।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥ ९ ॥
सर्वश्रुतिशिरोरत्नविराजितपदाम्बुजः ।
वेदान्ताम्बुजसूर्यो यः तस्मै श्रीगुरवे नमः ॥१०॥

चैतन्यः शाश्वतः शान्तो व्योमातीतो निरञ्जनः ।
बिन्दुनादकलातीतः तस्मै श्रीगुरवे नमः ॥ ११ ॥
ज्ञानशक्तिसमारूढः तत्त्वमालाविभूषितः ।
भुक्तिमुक्तिप्रदाता च तस्मै श्रीगुरवे नमः ॥ १२ ॥
अनेकजन्मसंप्राप्तकर्मबन्धविदाहिने ।
आत्मज्ञानप्रदानेन तस्मै श्रीगुरवे नमः ॥ १३ ॥
शोषणं भवसिन्धोश्च ज्ञापनं सारसम्पदः ।
गुरोः पादोदकं सम्यक् तस्मै श्रीगुरवे नमः ॥ १४ ॥
न गुरोरधिकं तत्त्वं न गुरोरधिकं तपः ।
तत्त्वज्ञानात्परं नास्ति तस्मै श्रीगुरवे नमः ॥१५॥
मन्नाथः श्रीजगन्नाथो मद्गुरुः श्रीजगद्गुरुः ।
मदात्मा सर्वभूतात्मा तस्मै श्रीगुरवे नमः ॥ १६ ॥
गुरुरादिरनादिश्च गुरुः परमदैवतम् ।
गुरोः परतरं नास्ति तस्मै श्रीगुरवे नमः ॥ १७ ॥
नमामि सद्गुरुं शान्तं प्रत्यक्षं शिवरूपिणम ।
शिरसा योगपीठस्थं धर्मकामार्थसिद्धये ॥ १८ ॥
श्रीगुरुं परमानन्दं वन्दाम्यानन्दविग्रहम् ।
यस्य सान्निध्यमात्रेण चिदानन्दायते पुमान् ॥१९॥
नमोऽस्तु गुरवे तस्मा इष्टदेवस्वरूपिणे ।
यस्य वागमृतं हन्ति विषं संसारसंज्ञकम् ॥ २० ॥
श्रीगुरुं ज्ञानसत्सिन्धुं दीनबन्धुं दयानिधिम् ।
दवीमन्त्रप्रदातारं ज्ञानानन्दं नमाम्यहम् ॥ २१ ॥
नमस्ते नाथ भगवन् शिवाय गुरुरूपिणे ।
विद्यावतारसंसिद्ध्यै स्वीकृतानेकविग्रह ॥ २२ ॥
नवाय नवरूपाय परमार्थैकरूपिणे ।
सर्वाज्ञानतमोभेदभानवे चिद्घनाय ते ॥ २३ ॥
स्वतन्त्राय दयाक्लृप्तविग्रहाय परात्मने ।
परतन्त्राय भक्तानां भव्यानां भव्यरूपिणे ॥ २४ ॥

विवेकिनां विवेकाय प्रकाशाय प्रकाशिनाम् ।
ज्ञानिनां ज्ञानरूपाय विमर्शाय विमर्शिनाम् ॥२५॥
पुरस्तात्पार्श्वयोः पृष्ठे नमस्कुर्यामुपर्यधः ।
सच्चिदानन्दरूपेण विधेहि भवदासनम् ॥ २६ ॥
ध्यानमूलं गुरोर्मूर्तिः पूजामूलं गुरोः पदम् ।
ज्ञानमूलं गुरोर्वाक्यं मोक्षमूलं गुरोः कृपा ॥२७॥
यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशयन्ते महात्मनः ॥२८॥
अहं देवो न चान्योऽस्मि ब्रह्मैवाहं न शोकभाक् ।
सच्चिदानन्दरूपोऽहं नित्यमुक्तस्वभाववान् ॥ २९ ॥
संसारसागरसमुत्तरणैकमन्त्रं
ब्रह्मादियोगिमुनिपूजितसिद्धिमन्त्रम् ।
दारिद्र्यदुःखभयरोगविनाशमन्त्रं
वन्दे महाभयहरं गुरुराजमन्त्रम् ॥ ३० ॥
॥ इति गुरुस्तुतिः ॥

देवताओं का प्रणाम ॥

आराधयामि मणिसन्निभमात्मलिंगं मायापुरीहृदयपंकजसन्निविष्टम् । श्रद्धानदीविमलचित्तजलाभिषेकैर्नित्यं समाधिकुसुमैर्न पुनर्भवाय ॥

जानामि धर्मं न च मे प्रवृत्तिर्जानाम्यधर्मं न च मे निवृत्तिः। त्वया हृषीकेश हृदि स्थितेन यथा नियुक्तोऽस्मि तथा करोमि

मत्स्यः कूर्मो वराहश्च नरसिंहोथ वामनः । रामो रामः श्रीकृष्णश्च बुधः कल्किस्तथैव च ॥ एतानि दश नामानि प्रातःकाले तु यः पठेत् । स मुक्तः सर्वपापेभ्यो विष्णुलोकं च गच्छति ॥

ब्रह्मा मुरारिस्त्रिपुरान्तकारीभानुः शशी भूमिसुतो बुधश्च । जीवोथ शुक्रः शनिराहुकेतवः सर्वे सुराः शान्ति-

करा भवन्तु ॥

केशवः पुण्डरीकाक्षो माधवो मधुसूदनः । चत्वारीमानि नामानि प्रातरुत्थाय यः पठेत् । अचलां श्रियमाप्नोति विष्णुलोकं च गच्छति ॥

अहल्या द्रौपदी तारा सीता मन्दोदरी तथा । पञ्च कन्याः स्मरेन्नित्यं महापातकनाशिनीः ॥

गङ्गा गौरी तु गायत्री गीता गरुडवाहनः । पञ्चैतानि गकाराणि नाशयन्ति महद्भयम् ॥

पुण्यश्लोको नलो राजा पुण्यश्लोको युधिष्ठिरः । पुण्यश्लोका च वैदेही पुण्यश्लोको जनार्दनः ॥

कार्कोटनागराजस्य दमयन्त्या नलस्य च । ऋतुपर्णस्य राजर्षेः कीर्तनं कलिनाशनम् ॥

कार्त्तवीर्य्यार्जुनो नाम राजा बाहुसहस्रभृत् । योऽस्य संकीर्त्तयेन्नाम प्रातरुत्थाय मानवः । न तस्य वित्तनाशं स्याद्धृतं नष्टं च लभ्यते ॥

लक्ष्मीः कौस्तुभपारिजातकतरुर्धान्वन्तरिश्चन्द्रमाः। धेनुः कामधुघा सुराः सुरगजो रम्भा च दिव्याङ्गना । अश्वः सप्तमुखस्तथा हरिधनुः शङ्खो विषं चामृतं । रत्नानीति चतुर्दश प्रतिदिनं कुर्वन्तु मे मङ्गलम् ॥

दिवा रक्षतु मां सूर्यो रात्रौ रक्षतु चन्द्रमाः । प्रातः काले चामुंडा सायं काले जनार्दनः ॥

प्रभातको वेदपाठी ब्राह्मण, सुन्दरभाग्यवती स्त्री, अग्नि, कामधेनु, और अग्निधारी पुरुषका दर्शन आपदाओंसे बचाता है ॥

जागकर दही, घी, दर्पण, सपेद सरसों, विल्व, गोरोचन. फूलमाला, इनका दर्शन और स्पर्श शुभकारी है ॥

ब्राह्मण, गौ, अग्नि, फूलमाला, घी, सूर्य, जल, और राजा, यह आठ मांगलिक पदार्थ हैं भोजनके समय इनका दर्शन आयु और धर्मको बडाता है ॥

श्रीगणेशाय नमः ।

॥ अथ स्नानविधि प्रारम्भः ॥

अब नदी पर जाकर पूर्व दिशाके सन्मुख ठहरकर स्नान विधि का आरम्भ करें

हाथोंको धोयें भुवनपुत्री विश्वकर्मा ऋषिः विश्वकर्मा देवता त्रिष्टुप् छंदः । ॐ विश्वतश्चक्षुरुत विश्वतो मुखो विश्वतो बाहुरुत विश्वतस्पात् । सं बाहुभ्यां धमति संपतत्रैर्द्यावाभूमी जनयन्देव एकः ॥

बायां पाद धोय ॐ नमोस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षि शिरोरुबाहवे । सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः ॥

दायां पाद धोयें ॐ नमः कमलनाभाय नमस्ते जलशायिने । नमस्ते केशवानन्त वासुदेव नमोस्तु ते ॥ १२ कुर्लियोंसे मुखशोधन करें ।

अञ्जलि में जल उठा कर पढ गंगाप्रयागगयनैमि-षपुष्करादितीर्थानि यानि भुवि सन्ति हरिप्र-सादात् । आयान्तु तानि करपद्मपुटे मदीये प्रक्षालयन्तु वदनस्य निशाकलङ्कम् ॥

उसी जल से मुंह धोयें "सप्त धृतिर्वारुणिः ऋ० ब्र-ह्मणस्पतिर्देव० गायत्री छं० मुखप्रक्षालने विनियोगः । तीर्थे स्नेयं तीर्थमेव समानानां भवति ॥ मा नः शँसोऽअररुषो धूर्तिः प्रणङ्मर्त्यस्य । रक्षा णो ब्रह्मणस्पते ॥ यज्ञोपवीतको हाथोंके अंगूठोंमें रखकर ३ बार मन्त्र पढते धोयें ओं गायत्र्यै न-मः । ओं भूर्भुवःस्वस्तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ओं ३ ॥ यज्ञोपवीतको प्रथम दाईं भुजामें फिर क-ण्ठमें डालें यज्ञोपवीतं परमं पवित्रं प्रजापते-र्यत्सहजं पुरस्तात् । आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः ॥ यज्ञो प-वीतमसि यज्ञस्य त्वोपवीतेनोपनह्यामि ॥

'तद्विष्णोः' मन्त्रसे धोकर अनन्तका नमस्कार करें । "अनन्तगुणरत्नाय विश्वरूपधराय च । महात्मने

स्वरूपाय अनन्ताय नमो नमः ॥"

गायत्री मन्त्रसे ही शिखा खोलें धोयें और बान्धें अब (*) इस निशानसे इस निशान तक उपस्पर्शन है (याद रखें कि जितनीबार दिन वा रात्रिमें भी मल मूत्र त्यागें उतनी बार अपने२ मन्त्रोंसे हाथ पैर मुख यज्ञोपवीतको जलका स्पर्श करके उपस्पर्शन और प्राणायाम किया करें ॥)

तीन आचमन करें··· ··· ओं ओं ओं

माथे पर दो बार मार्जन करें··· ··· ओं ओं

बायें हाथमें जल रखकर दायें हाथकी तर्जनी और अंगूठेसे नथनोंको शुद्ध करें ... ओं भूः

अंगूठे और अनामिकासे आंखोंको शुद्ध करें ओं भुवः

अंगूठे और कनिष्ठासे कानोंको शुद्ध करें··· ओं स्वः

हथेलीसे नाभिको शुद्ध करें············ ओं महः

हथेलीसे ही हृदयको शुद्ध करें······ ओं जनः

सब अङ्गुलियोंसे सिरको शुद्ध करें··· ओं तपः

अङ्गुलियोंसे ही दो कन्धोंको शुद्ध करें··· ओं सत्यम्

प्राणायाम करें (प्राणायामकरनेकी विधि सन्ध्यामें देखिये) ओंभूः ओंभुवः ओंस्वः ओंमहः ओंजनः ओंतपः ओंसत्यम् । ओंतत्सवितुर्वरेण्यं भर्गो

देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥ ओं आपोज्योती रसोमृतं ब्रह्म भूर्भुवः स्वरोम् । पू० १, कु० २, रे० ३, (*) । नमस्कार धरकर पढें ओं ब्रह्मणोऽग्न्यादयः ॥ नमो अग्नये अप्सुषदे नम इन्द्राय नमो वरुणाय नमो वारुण्यै नमोऽपां पतये नमोऽद्भ्यः ॥ उपस्थान करें (शुनःशेप आजीगर्तिः कृत्रिमो वैश्वामित्रो देवरात ऋषिः ।) अवभृथे त्रिष्टुप् वरुणः ॥ उरुं हि राजा वरुणश्चकार सूर्याय पन्थामन्वेतवा उ । अपदे पादा प्रतिधातवेकरुतापवक्ता हृदयाविधश्चित् ॥ हाथोंसे जलका ३ वार आवर्तन करें यमस्य राज्ञो जगती वरुणः ॥ ये ते शतं वरुण ये सहस्रं यज्ञियाः पाशा वितता महान्तः । तेभिर्नो देवः सविता बृहस्पतिर्विश्वे देवा मरुतो मुञ्चन्तु स्वर्काः ॥

काम-क्रोध-लोभ-मोह आदि शत्रोंके नाशका ध्यान करके ३ बार जलाञ्जलि उठाकर बाईं तरफ पृथिवी पर फेंकें ॥ निचाङ्कुणस्य शुनःशेपस्य यजुरापः ॥ सुमित्रिया न आप ओषधयः सन्तु । दुर्मि-

प्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यं च वयं द्वि-
ष्मः ॥ अञ्जलि धरकर पढ़ें (देवासुराणां राजर्षी-
णां) वसिष्ठस्य जगती वरुणः ।
यत्किं चेदं वरुण दैव्ये जनेऽभिद्रोहं मनुष्या-
श्चरामसि । अचित्ती यत्तव धर्मा युयोपि-
म मा नस्तस्मादेनसो देव रीरिषः ॥
आक्रम्य वाजिन् पृथिवीमग्निमिच्छ रुचा त्व-
भूम्या वृत्वाय नो ब्रूहि यतः खनेम तं
वयम् ॥
इस मंत्रसे मिट्टीको पहिले जल छिडककर शुद्ध करें
फिर इसी मिट्टीके तीन भाग बनाकर पहिले भागप-
र जल छिडकें (क) विश्वामित्र ऋ० सविता दे०
गायत्रं छं० मृदभिमन्त्रणे विनियोगः ।
ओं गायत्र्यै नमः ओं भूर्भुवः स्वः तत्सवितु-
र्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः
प्रचोदयात् ओं ३ ॥ दूसरे भागपर जल छिडकें (ख)
त्रितस्य महापांक्तिरादित्याः ॥ आदित्या अव हि
ख्याताधि कूलादिव स्पशः । सुतीर्थमर्वतो
यथानु नो नेषथा सुगमनेहसो वऽऊतयः

सुऽऊतयो वऽऊतयः ॥ तीसरे भागपर जल छि डके (ग) मेधातिथेर्गायत्रं विष्णुः (देवो वा) अतो देवा अवन्तु नो यतो विष्णुर्विचक्रमे । पृथिव्याः सप्त धामभिः ॥ तीसरे (ग) भागके ४ हिस्से करके एक हिस्सा पूर्वकी तरफ जल में फेंके भर्गस्य (प्रागाथस्य) बृहती इन्द्रः ॥ यत इन्द्र भयामहे ततो नो अभयं कृधि । मघवञ्छग्धि तव तन्न ऊतिभिर्विद्विषो विमृधो जहि ॥ दूसरा हिस्सा जलमें दक्षिणकी तरफ फेंके शासस्यानुष्टभौ विमृध इन्द्रः ॥ स्वस्तिदा विशस्पतिर्वृत्रहा विमृधो वशी । वृषेन्द्रः पुर एतु नः सोमपा अभयंकरः ॥ तीसरा हिस्सा जलमें पश्चिमकी तरफ फेंके वि रक्षो वि मृधो जहि वि वृत्रस्य हनू रुज । वि मन्युमिन्द्र वृत्रहन्नमित्रस्याभिदासतः ॥ चौथा हिस्सा जलमें उत्तरकी तरफ फेंके वसुक्रस्य त्रिष्टुविन्द्रः ॥ इदं सु मे जरितरा चिकिद्धि प्रतीपं शापं नद्यो वहन्ति । लोपाशः सिंहं प्रत्यंचमत्साः क्रोष्टा वराहं निरतक्त कक्षात् ॥ अब दूसरी (ख) मिट्टी और जलसे नाभिस्थानसे उपरके सब अङ्गोंको शुद्ध करें

यज्ञस्यानुष्टुप् मृत्तिका ॥ अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरे । उद्धृतासि वराहेन कृष्णेन शतबाहुना ॥ मृत्तिके त्वां च गृह्णामि प्रजया च धनेन च । मृत्तिके ब्रह्मदत्तासि कश्यपेनाभिमन्त्रिता ॥ मृत्तिके हर मे पापं यन्मया दुष्कृतं कृतम् । वाचा कृतं कर्मकृतं मनसा यत्तु चिन्तितम् ॥ मृत्तिके देहि मे पुष्टिं त्वयि सर्वं प्रतिष्ठितम् । त्वया हृतेन पापेन ब्रह्मलोकं व्रजाम्यहम् ॥

पहिली (क) मिट्टीमें से थोडीसी मिट्टीका तिलक करें कुत्सस्यरुद्रो जगती भस्मानुलेपनादौ विनियोगः ॥ मा नस्तोके तनये मा न आयौ मा नो गोषु मा नो अश्वेषु रीरिषः । वीरान्मा नो रुद्र भामितो वधीर्हविष्मन्तः सदमित्त्वा हवामहे ॥ उसी (क) मिट्टीकी थोडीसी मिट्टीसे बायें कन्देको शुद्ध कर ओं भूः ओं भुवः ओं स्वः उसी (क) मिट्टीसे दायें कन्देको शुद्ध करें ओं महः ओं जनः ओं तपः उसी (क) मिट्टीसे हृदयको शुद्ध करें ओं सत्यम् अब गोबर और जलसे शरीरको शुद्ध करें विश्वामित्रस्य महापांक्तिर्गो-

मयं गोमयानुलेपनादौ विनियोगः ॥ अग्रमग्रं चरन्तीनामोषधीनां रसं वने । तासामृषभपत्नीनां पवित्रं कायशोधनम् । त्वं मे रोगांश्च शोकं च पापं च नुद गोमय । पवित्राणां पवित्रेण शुध्यामि पृथिवीमिमाम् ॥ अपामार्ग [ओंगा] से अंगों और प्रत्यंगोंको शुद्ध करें सिन्धुद्वीपस्यानुष्टुबपामार्गः ॥ अपाघमप किल्बिषमप कृत्यामपो रपः । अपामार्ग त्वमस्मदप दुःष्वप्न्यँ सुव ॥ दूर्वासे शुद्ध करें अग्निदृष्टे दूर्वेष्टका (पत्नी) देवत्ये द्वेऽनुष्टुभौ ॥ काडात्काडात्प्ररोहन्ती परुषः परुषस्परि । एवा नो दूर्वे प्र तनु सहस्रेण शतेन च ॥ या शतेन प्रतनोषि सहस्रेण विरोहसि । तस्यास्ते देवीष्टके विधेम हविषा वयम् ॥ दर्भाकुरोंसे शरीरको जल छिडकें विरिञ्चिना सहोत्पन्न परमेष्ठिनिसर्गज । नुद पापानि सर्वाणि दर्भ स्वस्तिकरो भव ॥ अञ्जलि धरकर तीर्थका आवाहन करें तीर्थस्यावाहनं कुर्यात्तत्प्रवक्ष्याम्यनन्तरम् । कुरुक्षेत्रं गया गङ्गा प्रभासं पुष्कराणि च ॥ तीर्थान्येतानि स-

र्थानि स्नानकाले भवन्तु मे। गंगे च यमुने चैव गोदावरि सरस्वति नर्मदे सिन्धुकावेरि जलेस्मिन् सन्निधिं कुरु॥ यन्मे भुक्तमसाधूनां पापेभ्यश्च प्रतिग्रहात्। यन्मया मनसा वाचा कर्मणा दुष्कृतं कृतम्॥ तन्मे इन्द्रो वरुणो बृहस्पतिः सविता च पुनातु॥ नमस्कार करें प्रपद्ये वरुणं देवमम्भसां पतिमूर्जितम्॥ याचितं देहि मे तीर्थं सर्वपापापनुत्तये। रुद्रान्प्रपद्ये वरदान्सर्वानप्सुषदस्त्वहम्॥ सर्वानप्सुषदश्चैव प्रपद्ये प्रणतः स्थितः। देवमप्सुषदं वह्निं प्रपद्येऽघनिसूदनम्॥ आपः पुण्या पवित्राश्च प्रपद्ये शरणं तथा। रुद्रश्चाग्निश्च सर्पाश्च वरुणस्त्वाप एव च॥ शमयन्त्वाशु मे पापं पुनन्त्वेते सदा मम। इत्येवमुक्त्वा कर्तव्यं ततः संमार्जनं जले॥ अब (क) मिट्टी और चलूबर पानी उठाकर पढें। ओं अपां पतये विद्महे पाशपाणये धीमहि। तन्नो वरुणः प्रचोदयात् ३॥ लकीरों वाली जगहपर मास, कृष्णपक्ष वा शुक्लपक्ष, और तिथि के नाम लेने चाहियें। अंगोचा कन्धेपर रखकर

नदीमें उतरते पढे ओं तत्सद्ब्रह्म अद्य तावत्तिथावद्य–मासस्य–पक्षस्य तिथौ–आत्मनो वाङ्मनः कायोपार्जितपापनिवारणार्थं श्रीनारायणप्रीत्यर्थं वितस्ताप्रवाहे (गंगाप्रवाहे) स्नानमहं करिष्ये । मनमें यह निश्चय करना कि नदी मुझे स्नानकी आज्ञा देती है कि ओं कुरुष्व ॥

चलूके जलको नदीमें फेंककर विष्णुका ध्यानकरके और जलपर 'ओं' लिखकर गोतह मारें ॥

मेधातिथेः काण्वस्य गायत्रं विष्णुः ॥

ओं तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् ॥ तद्विप्रासो विपन्यवो जागृवांसः समिन्धते । विष्णोर्यत्परमं पदम् ॥ माथेपर सात मार्जन करें ओं भूः१ ओं भुवः२ ओं स्वः३ ओं महः४ ओं जनः५ ओं तपः६ ओं सत्यम्७ ।

प्राणायाम करके पूर्वकी तरफ उपस्थान करें

वामदेवस्य जगती सूर्यः ।

हँसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् । नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् ॥

सूर्य देवताको नमस्कार करें **नमो धर्मनिधानाय नमः सुकृतसाक्षिणे । नमः प्रत्यक्षदेवाय भास्कराय नमो नमः ॥** एकबार अंगुलियोंके सिरों परसे जलाञ्जलि देवें **ओं नमो देवेभ्यः ।** यज्ञोपवीतको गर्दन और दो अंगूठोंमें रखकर, २जलाञ्जलियां हाथोंके दर्मियानसे देवें **'कण्ठोपवीती।' स्वाहा ऋषिभ्यः ।** यज्ञोपवीतको थनोंके दर्मियानसे बाईं बाजोंमें रखकर ३ जलाञ्जलियां दाईं अंगूठे और तर्जनी के दर्मियानसे देवें **'अपसव्येन' । स्वधा पितृभ्यः ।** यज्ञोपवीतको थनोंके दर्मियानसे दाईं बाजोंमें रखकर ३ बार जलाञ्जलिया देवें सव्येन **आब्रह्मस्तम्बपर्यन्तं ब्रह्माण्डं सचराचरं जगत्तृप्यतु३ ॥** किनारेपर चढकर पहिली अवशिष्ट [क] मिट्टीका तिलक लगाते मन्त्र पढें, फिर उसको तत्कालही जलसे धो डालें **यत्त्वगस्थिगतं पापं जन्मान्तरकृतं च यत् । तन्मे हरस्व कल्याणि मूर्ध्नि स्पर्शेन वैष्णवि ॥** वस्त्रोंको जल छिडककर धारण करें **विश्वामित्रस्य त्रिष्टुप् विश्वेदेवाः ॥ युवा सुवासाः परिवीत आगात्स उ श्रेयान्भवति जायमानः। तन्धीरासः कवय उन्नयन्ति स्वाध्यो३मनसा देवयन्तः ॥**

शिरका जल देवता, छातीका पितर, नाभिका यक्ष और गन्धर्व, और उससे नीचेका जल राक्षस पीते हैं। इस कारण वस्त्रसे अङ्गोंको न पूंछना चाहिए ॥ अङ्गोंचे और स्नानपटको देव ऋषि, और पितर तर्पण 'जो सन्ध्याके अन्तपर करना है' से पहले नहीं निचोड़े ॥ और श्राद्धके दिन श्राद्धकरके निचोड़े ॥

गोविन्देति सदा स्नानं गोविन्देति सदा जपः । गोविन्देति सदा ध्यानं सदा गोविन्दकीर्तनम् ॥ गोविन्द गोविन्द हरे मुरारे गोविन्द गोविन्द रथांगपाणे । गोविन्द गोविन्द मुकुन्द कृष्ण गोविन्द गोविन्द नमो नमस्ते ॥ कृष्णाय वासुदेवाय देवकी नन्दनाय च । नन्दगोपकुमाराय श्रीकृष्णाय नमो नमः ॥ कृष्ण कृष्णेति कृष्णेति यो मां स्मरति नित्यशः । जलं भित्त्वा यथा पद्मं नरकादुद्धरामि तम् ॥ श्रीकृष्ण विष्णो नृहरे मुरारे प्रद्युम्न सङ्कर्षण वासुदेव । अजाऽनिरुद्धाऽखिल विश्वमूर्ते त्वं पाहि नः सर्वभयादऽजस्रम् ॥ यस्य केशेषु जीमूतो नद्यः सर्वांगसन्धिषु । कुक्षौ समुद्राश्चत्वारस्तस्मै तोयात्मने नमः ॥ जले विष्णुः स्थले विष्णुर्विष्णुराकाशमंडले । स्थाने स्थाने भवेद्विष्णुः सर्वं विष्णुमयं जगत् ॥ कैवल्योपनिषत्,

नारायणोपनिषत्, विष्णुसहस्रनाम, पांडवगीता, मुकुन्दमाला, श्रीगीता, आदि पाठ यहांपर वा सन्ध्याके समाप्तपर पढें ॥

॥ इति स्नानविधिः ॥

अथ

॥ सन्ध्योपासनप्रारम्भः ॥

सूर्यके सन्मुख नमस्कार धरकर पढें ओं श्रीमहागायत्र्यै नमः। सावित्र्यै नमः। सरस्वत्यै नमः॥

ओं प्रणवस्य ऋषिर्ब्रह्मा गायत्रं छन्द एव च । देवोग्निर्व्याहृतिषु च विनियोगः प्रकीर्तितः ॥ प्रजापतेर्व्याहृतयः पूर्वस्य परमेष्ठिनः । व्यस्ताश्चैव समस्ताश्च ब्राह्ममक्षरमोमिति । व्याहृतीनां समस्तानां दैवतं तु प्रजापतिः । व्यस्तानामयमग्निश्च वायुः सू-

र्यश्च देवताः ॥ छन्दश्च व्याहृतीनामेकाक्षराणामुक्ताख्यं ह्यक्षराणामत्युक्ताख्यम् ॥ विश्वामित्र ऋषिश्छन्दो गायत्रं सविता तथा। देवतोपनये जप्ये गायत्र्या योग उच्यते ॥ आवाहयामि गायत्रीं सर्वपापप्रणाशिनीम् । न गायत्र्याः परं जप्यं न व्याहृतिसमं हुतम् । आगच्छ वरदे देवि जपे मे सन्निधौ भव । गायन्तं त्रायसे यस्माद्गायत्री त्वं ततः स्मृता । अग्निर्वायुश्च सूर्यश्च बृहस्पत्याप एव च ॥ इन्द्रश्च विश्वेदेवाश्च देवताः समुदाहृताः । एवमार्षं छन्दो दैवतं विनियोगं चानुस्मृत्य ॥

गायत्र्या शिखामाबध्य गायत्र्यैव समन्ततः ।
आत्मनश्चापः परिक्षिप्य प्राणायामं कुर्यात् ॥

गायत्री मन्त्रसे बोधी धोयें, और बोधीकी ब्रह्मघांट भी लगायें । फिर इसी मन्त्रसे चारोंओर, और अपने आपको जल छिड़कें । यदि गंज आदि रोगोंसे बोधी न होगी । तो कुशाकी बोधी घांट लगाकर धरनी चाहिये ॥ अञ्जलि धरकर गायत्रीका आवाहन करें ।

ओजोसीति गायत्रीमावाह्य देवानामार्षम् ॥

ओं ओजोसि सहोसि बलमसि भ्राजोसि देवानां धाम नामासि विश्वमसि विश्वायुः सर्वमसि सर्वायुरभिभूः ॥

प्राणायाम करें

प्राणवायु और अपानवायु के रोकनेको प्राणायाम कहते हैं । यह योगका एक विशेष अंग है । मन्त्र-जपके सहित जो किया जाता है उसको सगर्भ प्राणायाम, और मन्त्र जपनेके बिना जो कियाजाता है उसको निर्गर्भ प्राणायाम कहते हैं ॥ यहां सगर्भ करना होता है ॥

(एक प्राणायाममें पूरक कुम्भक और रेचक किये जाते हैं ।)

पूरक=दाईं अंगूठेसे दायें नथनेको बन्दकरके, बायें नथनेसे सांसको शनैः २ अन्दर खींचते जाना और रक्तवर्ण (सुर्खरंग) ब्रह्माजीका नाभिस्थान (नाफ) पर ध्यानकरते एकबार मन्त्रका पढना ॥

कुम्भक=कनिष्ठा अनामिका और अंगूठेसे दोनों नथनोंको बन्दकरके सांस (प्राण) को हृदयमें ठहराकर, हृदयकमलपर नीलवर्ण विष्णुका ध्यानधरते, दो बार मन्त्रको जपते जाना ॥

रेचक=दायें नथनेपरसे अंगूठेको उठाकर बिलकुल आहिस्ता २ सांस छोडते जाना, और ललाटमें

सहस्रदलकमल [हजारवर्ग वाले कमल] पर स्फटिक [बिल्लोर] वर्ण शिवजीका ध्यान धारण करते तीन बार मन्त्रका पढना ॥

प्राणायाम करनेसे अनेक प्रकारके रोग (रूहानी और जिस्मानी) दूर हो जाते हैं। बल्कि हृदयमें बल और आनन्द पैदा होता है। खून साफ हो जाता है ॥ जिसतरह पर्वतके धातुओं की सफाई अग्निसे होजाती है, इसीतरह शरीरिक तमाम रोगों का और वासनामें बीज रूप दुष्कर्मोंका नाश प्राणायामसे हो जाता है। क्योंकि हृदयमें प्राण रोकनेसे इस प्राण-वायुसे अग्नि पैदा होजाती है, और उस अग्निसे जल उत्पन्न होजाता है, फिर मनुष्यका अन्तःकरण इन तीनों (प्राणवायु अग्नि और जल) के बलसे शुद्ध (मलरहित) होजाता है ॥

जिसतरह सूर्यके सामने आये बादल ब्रह्माण्डवा-युसे कभी २ बिल्कुल क्षीण होजाते हैं। इसी तरह विवेक और ज्ञानपर जो अविद्या आदि क्लेशोंके परदे पुरुषको संसारमें जकडे हुए हैं, वह प्राणायामके अभ्याससे दुर्बल होते २ क्षीण हो जाते हैं। प्राणा-यामसे बढकर कोई तप नहीं, इससे मल धोए जाते हैं। परमात्माके बीच मन और आत्माकी धारणा होती है। ज्ञानकी योग्यता बढती आती है, और मनुष्य एक ऐसे आनन्दमें मग्न होजाता है।

जो वर्णनसे दूर है। लिखाहै कि स्नानसे प्राणायामसे और मन्त्र के षडंगन्यास से शरीर के अन्दर के पांच महाभूत निर्मल होजाते हैं। महाभूत निर्मल होजाने से चित्त निर्मल और समाहित रहताहै। और फिर ज्ञानरूप दीपक चमकता है ॥

ओं भूः ओं भुवः ओं स्वः ओं महः ओं जनः ओं तपः ओं सत्यं ओं तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ओं आपो ज्योती रसोमृतं ब्रह्म भूर्भुवःस्वरोम् ॥

इसको पूरकमें एक बार कुम्भकमें दो बार, रेचकमें तीन बार पढ़ें॥ अब प्रत्येक मन्त्रसे तीन २ बार आचमन करें (आचमनका जल गोकर्ण (गायका कान) (देखो आकृति ३५) जैसा हाथ बनाकर उसमें उतना जल उठायें कि जितनेमें एक माषके दानेसे जियादा दाने न डूब सकें, ब्रह्मतीर्थसे 'ओं' बोल के तीन २ बार ऐसे पीना चाहिये कि पीते समय शब्द न होजाय)

सायंके तीन आचमन :—

अग्निश्चमेत्यस्य रुद्र (याज्ञवल्क्य उपनिषद्) ऋषिः। प्रकृतिश्छन्दः। अग्निमन्युमन्युपत्यहानि देवताः। आचमने विनियोगः ॥

ॐ अग्निश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षन्ताम्। यदह्ना पापमकार्षं मनसा वाचा हस्ताभ्याम्। पद्भ्या

मुदरेण शिश्ना अहस्तदवलुम्पतु । यत्किञ्चि-
द्दुरितं मयीदमहं मामऽमृतयोनौ सत्ये ज्यो-
तिषि जुहोमि स्वाहा ओं, ओं, ओं,

प्रभातके तीन आचमन :—

सूर्यश्च मेत्यस्य नारायण (याज्ञवल्क्य उपनिषद) ऋषिः । सूर्यमन्युमन्युपतिरात्रयोदेवता । प्रकृतिश्छन्दः आचमने विनियोगः ॥

ॐ सूर्यश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापभ्यो रक्षन्ताम् । यद्रात्र्या पापमकार्षं मनसा वाचा हस्ताभ्यां । पद्भ्यामुदरेण शिश्ना रात्रिस्तदवलुम्पतु । यत्किञ्चिद् दुरितं मयीदमहं मामऽमृतयोनौ सूर्ये ज्योतिषि जुहोमि स्वाहा ओं, ओं, ओं, ॥

मध्याह्नके तीन आचमन :—

आपः पुनन्त्वित्यस्य सिन्धुद्वीप ऋषिः । अष्टीछन्दः । आपः (पृथिवी) देवताः । आचमने विनियोगः ॥

ॐ आपः पुनन्तु पृथिवीं पृथिवी पूता पुनातु माम् । पुनन्तु ब्रह्मणस्पतिर्ब्रह्म पूता पुनातु माम् ॥ यदुच्छिष्टमभोज्यं वा यद्वा दुश्चरितं । मम सर्वं पुनन्तु मामाऽऽपोऽसतां च प्रतिग्रहं जुहोमि स्वाहा ओं, ओं, ओं, ॥

अब मार्जन करें :-

(कुशाके विष्टरसे वा मध्यमा और तर्जनीके अगले पर्वों (पोरों) से जलबून्धोंके छिडकनेका नाम मार्जन है)

आपो हि ष्ठा तृचस्य सिन्धुद्वीप ऋषिः । गायत्रं छन्दः । आपो देवता । मार्जने विनियोगः ॥

ओं आपो हि ष्ठा मयोभुवः । हृदय वा आकाश पर १

ओं ता न ऊर्जे दधातन । पादों पर वा नीचेकी तरफ २

ओं महेरणाय चक्षसे ॥ ललाट पर ३

ओं यो वः शिवतमो रसः । ललाट पर ४

ओं तस्य भाजयतेह नः । पादों पर वा नीचेकी तरफ

ओं उशती रिव मातरः ॥ हृदय वा आकाश पर ६

ओं तस्मा अरंगमाम वः । ललाट पर ७

ओं यस्य क्षयाय जिन्वथ । हृदय वा आकाश पर ८

ओं आपो जनयथा च नः । पादों वा नीचेकी तरफ ९

अगले प्रत्येक मन्त्रसे प्रत्येक वार ललाटपर मार्जन करें

हिरण्यवर्णा इत्यस्य कश्यप ऋषिः । त्रिष्टुप्छन्दः । आपो देवता । मार्जने विनियोगः ॥

ॐ हिरण्यवर्णाः शुचयः पावका यासु जातः कश्यपो यास्विन्द्रः । या अग्निं गर्भं दधिरे विरूपास्ता न आपः शं स्योना भवन्तु ॥

यासां देवा दिवि कृण्वन्ति भक्ष्यं या-

अन्तरिक्षे बहुधा भवन्ति । या अग्निं ग० ॥

यासां राजा वरुणो याति मध्ये सत्यानृते अवपश्यञ्जनानाम् । या अग्निं गर्भ० ॥

शिवेन मा चक्षुषा पश्यतापः शिवया तन्वोपस्पृशत त्वचं मे । मधुश्च्युतः शुचयो याः पावकास्ता न आपः शं स्योना भवन्तु ॥

अगले ७ मन्त्र इसके भाष्यमें अधिक पाते हैं ॥

हिरण्यवर्णाः शुचयः पावका विचक्रमुर्हित्वावद्यमापः । शतं पवित्रा विततान्यासां ताभिर्मा देवः सविता पुनातु ॥

अब ६ मन्त्र 'पावमानी' नामक हैं:—

पवमान ऋषिः । सोमो देवता । अनुष्टुप्छन्दः ॥

ओं यः पावमानीरध्येति ऋषिभिः सम्भृतं रसम् । सर्वं स पूतमश्नाति स्वदितं मातरिश्वना ॥ १ ॥ यः पावमानीरध्येति पवित्रकरणीरपाम् । तस्मै सरस्वती दुहे क्षीरं सर्पिर्मधूदकम् ॥ २ ॥ पावमानीः स्वस्त्ययनीः सुदुघा हि घृतश्च्युतः । ऋषिभिः सम्भृतो रसो ब्राह्मणेष्वमृतं हितम् ॥ ३
पावमानीः स्वस्त्ययनीर्याभिर्गच्छति नन्दनम् ।
पुण्यांश्च भक्ष्यान्भक्षयत्यमृतत्वं च गच्छति ॥

पावमानीर्दिशन्तु न इमं लोकमथो अमुम् ।
कामान्त्समर्धयन्तु नो देवैर्देवीः समाहृताः ॥
येन देवाः पवित्रेणात्मानं पुनते सदा । तेन
सहस्रधारेण पावमान्यः पुनन्तु नः ॥ ६ ॥
सिन्धुद्वीपस्याम्बरीषस्य वार्षम् । अब्दैवत्या । गाय-
त्री । मार्जने विनियोगः ॥

ओं शन्नो देवीरभीष्टय आपो भवन्तु पी-
तये । शंय्योरभिस्रवन्तु नः ॥
अब्दैवत्यानुष्टुप्सोमपुत्रस्याध्वरस्य मार्जने विनि० ॥

ओं शन्न आपो धन्वन्याः । ओं शन्नः स-
न्त्वनूप्याः ॥ ओं शन्नः समुद्रिया आपः ।
ओं शमु नः सन्तु कूप्याः ॥
देवश्रवसो यामायनस्य त्रिष्टुभापः मार्जने विनि० ॥
ओं आपो अस्मान्मातरः शुन्धयन्तु घृतेन
नो घृतप्वः पुनन्तु । विश्वं हि रिप्रं प्रवह-
न्ति देवीः । उदिदाभ्यः शुचिरापूत एमि ॥
सिन्धुद्वीप ऋ० अनुष्टुप्छ० आपो दे० मार्जने वि० ॥

ओं इदमापः प्रवहत यत्किं च दुरितं म-
यि । यद्वाहमभिदुद्रोह यद्वा शेप उतानृतम् ॥
अथर्वणस्य भिषजोऽनुष्टुप् आपः ।

ओं मुञ्चन्तु मा शपथ्याऽदथो वरुण्यादु-

त । अथो यमस्य पड्वीशात्सर्वस्माद्देवकिल्बिषात् ॥ गायत्री ॥ ओं यच्चाग्रयत्सुप्तः पापमभिजगाम सर्वस्मान्मा तस्मादेनसः प्रमुञ्चतु ॥

वामदेवस्य दधिक्राऽनुष्टुप् ।

ओं दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः । सुरभि नो मुखा करत्प्र ण आयूंषि तारिषत् ॥

अघमर्षणम् । = बुरे कर्म और अभक्ष्यभक्षण आदि पापोंसे बचनेके मन्त्रः—जिस प्रकार अश्वमेध सोमयाग आदि यज्ञोंसे पाप नष्ट होजाते हैं इसी प्रकार अघमर्षण सूक्तसे सब पाप दूर होजाते हैं ॥ और यदि आपत्कालमें द्विजने शूद्रके घरमें अन्न खाया हो तो वह मनमें पछताने और सौ बार 'द्रुपदा' मन्त्र जपनेसे शुद्ध होता है ॥

तीन बार अञ्जलिमें जल उठाकर तीन बार मन्त्र पढत सिर से उस जलका वन्दनकरके जलमें फेंक देवें ॥ फिर गोकर्ण जैसे हाथमें जल उठाकर उस जलको सूंघकर इसी मन्त्रको एक बार पढें, और जलको न देखकर बाईं तरफ फेंकें । और बायें नथनेसे सांस बाहिर छोडकर पापपुरुषको शरीरमें से निकाले ॥

कोकिलस्य राजपुत्रस्यानुष्टुबापः सौत्रामण्यवभृथस्नानेऽघमर्षणे विनियोगः ॥

ॐ द्रुपदादिव मुमुचानः स्विन्नः स्नातो मला-
दिव पूतं पवित्रेणेवाज्यमापः शुन्धन्तु मैनसः॥
जलमें दो हाथ रखकर [अघमर्षण सूक्त] अर्थात् ऊप-
रका एक मन्त्र, और नीचेके तीन मन्त्र द्रुपदा० ऋतंच
समुद्रा० सूर्याचन्द्र० इन चार मन्त्रोंको पढते जलका
आवर्तन (घुमाना) करें
माधुश्छन्दसोघमर्षणो भाववृत्तमनुष्टुप् । अघमर्ष-
णे विनियोगः ॥

ओं ऋतं च सत्यं चाभीद्धात्तपसोऽध्यजा-
यत । ततो रात्र्यजायत ततः समुद्रो अर्णवः ।

समुद्रादर्णवादधि संवत्सरो अजायत ।
अहोरात्राणि विदधद्विश्वस्य मिषतो वशी ॥

सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् ।
दिवं च पृथिवीं चान्तरिक्षमथो स्वः ॥ ३ ॥

सातों मन्त्रोंसे सात बार माथेपर मार्जन करें ।
ओं भूः ओं भुवः ओं स्वः ओं महः ओं जनः
ओं तपः ओं सत्यम् ॥

नीचेके मन्त्रसे तीन आचमन करें
ब्रह्मातिरश्चीनस्यानुष्टुप् परमात्मा दे० आचमने वि० ॥

ओं अन्तश्चरसि भूतेषु गुहायां विश्वतो-
मुखः । त्वं यज्ञस्त्वं वषट्कार आपो ज्यो
ती रसोऽमृतं ब्रह्म भूर्भुवः स्वरोम् ॥

अब **प्राणायाम** करें । फिर खडा होकर गायत्री मन्त्रसे तीन बार सूर्यमण्डलकी तरफ उछलकर तीन जलाञ्जलियां दे देवें ॥ उदय और अस्तमें तीस करोड राक्षस (मन्देहा नाम) सूर्य देवतासे लडनेको आते हैं इस कारण यह जल वज्र बनकर उनको हटाता है यह बात जानकर जो विप्र उपासना करता है उसकी बडी आयु होती है । और वह पापोंसे छूट जाता है ॥

ओं भूर्भुवः स्वस्तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ओं ३ ॥

खडा हो कर और जलाञ्जलि उठाकर उसमेंसे जल छोडते और दाईं ओरसे प्रदक्षिणा करते विपरीतगायत्री पढें ॥ [राक्षसोंपर उपरका जल फेंकने के समय गायत्री मन्त्र अस्त्र बनता है उसी अस्त्रको इस उलटे मन्त्रसे वापस लाया जाता है ॥]

त्यादचोप्र नः यो योधि हिमधी स्यवदे र्गोभ ण्यरेर्वतुवित्सत ॥

अब सायं और प्रातःका उपस्थान ॥

उप=ध्यान धारणासे ईश्वरके समीपमें ठहरकर, स्थान=उसकी स्तुति और उपासनामें ठहरना ।

[प्रातः कालको खडा होकर और हथेलियां ऊपर करके, सायं कालको बैठके और हथेलियां नीचे करके, और मध्याह्नको बैठ के और हथेलियां उपर करके उपस्थान करना चाहिये । परन्तु तीनों काल बगल छुपे रहें ॥]

उपस्थानसे वाणी मन और शरीरसे उत्पन्न पाप नष्ट होजाते हैं। और मनुष्यको दैवी सम्पत् [श्रीगीता अ०१६ श्लो० १-३] प्राप्त हो जाती है। तथा आसुरी सम्पत् [श्रीगीता अ० १६ श्लो० ४] नाशको जाती है ॥]

प्रस्कण्वस्यानुष्टुप्सूर्यः उपस्थाने विनियोगः ।

ओं उद्वयं तमसस्परि ज्योतिष्पश्यन्त उत्तरम् । देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम्

प्रस्कण्वस्य गायत्रं सूर्यः । उपस्थाने विनियोगः ।

ओं उदु त्यं जातवेदसं देवं वहन्ति केतवः । दृशे विश्वाय सूर्यम् ॥

कुत्सस्य त्रिष्टुप्सूर्यः

ओं चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः । आ प्रा द्यावापृथिवी अन्तरिक्षँ सूर्य आत्मा जगतस्तस्थुषश्च ॥

दध्यङ्ङाथर्वणस्य त्रिष्टुप्सूर्यः ॥

ओं तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् । पश्येम शरदः शतं जीवेम शरदः शतँ शृणुयाम शरदः शतं प्र ब्रवाम शरदः शतमऽदीनाः स्याम शरदः शतं भूयश्च शरदः शतात्

वामदेवस्य जगती परमात्मरूपः सूर्यो देवता ॥

ओं हँसः शुचिषद्वसुरन्तरिक्षसद्धोता वे-

दिषदऽतिथिर्दुरोणसत् । नृषद्वरसदृतसद्व्यो-
मसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् ॥

अब मध्याह्नका उपस्थानः—

(सिंहीसंवत्सरीयस्य) विभ्राट् सौर्यस्य जगती सूर्यः ॥

ओं विभ्राड्बृहत्पिबतु सोम्यं मध्वायुर्दधद्य-
ज्ञपतावविह्रुतम् । वातजूतो यो अभिरक्षति
त्मना प्रजाः पिपर्त्ति बहुधा विराजति ॥

[नीचले १६ मन्त्रोंका नाम 'पुरुषसूक्त' है। एक मा-
सतक इसके नित्य १६ पाठ करनेसे मनुष्य गुरुतल्प
गमनके पापसे छूट जाता है ॥ देखो मनुस्मृति अ०
११ श्लो० २५२]

अञ्जलि धरकर पढें

आनुष्टुबस्य सूक्तस्य त्रिष्टुबन्तस्य देवता। विश्वा-
त्मा पुरुषः साक्षादृषिर्नारायणः स्मृतः ॥

ओं पुरुषमेधः पुरुषस्य नारायणस्यार्षम् ॥

ओं सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपा-
त् । स भूमिं विश्वतो वृत्वाऽत्यतिष्ठद्दशांगु-
लम् ॥ १ ॥ पुरुष एवेदँ सर्वं यद्भूतं यच्च भ-
व्यम् । उतामृतत्वस्येशानो यदन्नेनातिरोह-
ति ॥ २ ॥ एतावानस्य महिमातो ज्यायाँ-
श्च पूरुषः । पादोऽस्य विश्वा भूतानि त्रिपा-
दस्यामृतं दिवि ॥ ३ ॥ त्रिपादूर्ध्व उदैत्पुरुषः

पादोस्येहाभवत्पुनः । ततो विष्वङ्व्यक्रामत्सा-
शनानशने अभि ॥ ४ ॥ तस्माद्विराळजायत वि-
राजो अधि पूरुषः । स जातो अत्यरिच्यत पश्चा-
द्भूमिमथो पुरः ॥ ५ ॥ यत्पुरुषेण हविषा देवा य-
ज्ञमतन्वत । वसन्तो अस्यासीदाज्यं ग्रीष्म इ-
ध्मः शरद्धविः ॥ ६ ॥ तं यज्ञं बर्हिषि प्रौक्षन्पु-
रुषं जातमग्रतः । तेन देवा अयजन्त साध्या
ऋषयश्च ये ॥ ७ ॥ तस्माद्यज्ञात्सर्वहुतः सं-
भृतं पृषदाज्यम् । पशूँस्ताँश्चक्रे वायव्याना-
रण्यान्ग्राम्याश्च ये ॥ ८ ॥ तस्माद्यज्ञा-
त्सर्वहुत ऋचः सामानि जज्ञिरे । छन्दाँसि
जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥ ९ ॥ तस्मा-
दश्वा अजायन्त ये के चोभयादतः गावो
ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः ॥१०॥
यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् । मु-
खं किमस्य कौ बाहू का ऊरू पादा उच्येते ११
ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः पद्भ्याँ शूद्रो अजायत ॥१२
चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत ।
मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत ॥१३॥

नाभ्या आसीदन्तरिक्षँ शीर्ष्णो द्यौः समवर्तत । पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ अकल्पयन् ॥ १४ ॥ सप्तास्यासन्परिधयस्त्रिःसप्त समिधः कृताः । देवा यद्यज्ञं तन्वाना अबध्नन्पुरुषं पशुम् ॥ १५ ॥ यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥ १६ ॥

[शिवसङ्कल्पके अनेक फलोंमें से एक फल यह है कि एक मास तक नित्य एक २ पाठ करनेसे ब्राह्मण सोना चुरानेके पापसे छूट जाता है। मनुः अ-११ श्लो-२५१

(शिवसंकल्पस्य) ब्रह्मणस्त्रिष्टुप्मनः उपस्थाने वि० ॥

ओं यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति । दूरंगमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसंकल्पमस्तु ॥ १ ॥ येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः । यदपूर्वं यक्षमन्तः प्रजानां तन्मे मनः शिव० ॥ २ ॥ यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु । यस्मान्न ऋते किञ्चन कर्म क्रियते तन्मे मनः शिव० ॥३॥ येनेदं भूतं भुवनं भविष्यत्परिगृहीतममृतेन

सर्वम् । येन यज्ञस्तायते सप्त होता तन्मे मनः शिव० ॥ ४ ॥ यस्मिन्नृचः साम यजूँषि यस्मिन्प्रतिष्ठिता रथनाभाविवाराः । यस्मिँश्चित्तँ सर्वमोतं प्रजानां तन्मे मनः शि० ५ सुषारथिरश्वानिव यन्मनुष्यान्नेनीयतेऽभीषुभिर्वाजिन इव । हृत्प्रतिष्ठं यदजिरं जविष्ठं तन्मे मनः शिव० ॥ ६ ॥ अथ य एष एतस्मिन्मण्डले पुरुषो यश्चैष हिरण्मयः पुरुषः । अथ य एष एतस्मिन्मण्डले पुरुषोऽयमेव स योऽयं दक्षिणेऽक्षन्पुरुषः ॥ उपस्थान करें

(रुद्र ऋ० सूर्यो दे० त्रिष्टुप्छ० उपस्थाने विनि०)

शुक्रियं रुद्रस्य । य उदगात्पुरस्तान्महतो अर्णवाद्विभ्राजमानः सरिरस्य मध्ये समामृषभो रोहिताक्षः सूर्यो विपश्चिन्मनसा पुनातु यद्ब्रह्मावादिष्म तन्मा माहिंसीत्सूर्याय विभ्राजाय वै नमो नमः ॥

अब गायत्री जप है ।

जपके आरम्भमें अङ्गन्यास करना होताहै ॥ नीचेके मन्त्रोंको पढते समय उन हाथोंकी अंगुलियोंसे नोबतवार स्पर्श करें । जिन स्थानोंके नाम मन्त्रोंके साथ हैं । न्यासमें अङ्गोंकी पुष्टिकी प्रार्थना करनी चा-

हिये ॥ अङ्गों पर 'अ' आदि देवता और , भूः' आदि लोकोंका स्थान मानना चाहिये ॥ बिना न्यासके जपफलका आधा भाग राक्षस लेजाते हैं ॥

अङ्गन्यासः

ओं =[अ+उ+म] अ नाभौ । [नाफको] उ अहृदि । म शिरसि । [सिरको] ओं भूः पादयोः ओं भुवः हृदि । ओं स्वः शिरसि ॥

करन्यासः

ओं भूः अङ्गुष्ठाभ्यां नमः । अंगुलियोंसे अंगूठोंको
ओं भुवस्तर्जनीभ्यां नमः । अंगूठोंसे तर्जनीयोंको
ओं स्वर्मध्यमाभ्यां नमः । अंगूठोंसे मध्यमाओंको
ओं महः अनामिकाभ्यां नमः । अंगूठोंसे अनामिकाओंको
ओं जनः कनिष्ठिकाभ्यां नमः । अंगूठोंसे कनिष्ठाओंको
ओं तपः सत्यं करतलकरपृष्ठाभ्यां नमः । अंगूठोंसे हथलियों और हाथों की पीठों को स्पर्श करें ॥

अङ्गन्यासः

ओं भूः पादयोः । ओं भुवः जान्वोः । घुठनोंको ओं स्वः गुह्ये । मल छोडनेके स्थानको ओं महः नाभौ । ओं जनः हृदि । ओं तपः कण्ठे । ओं सत्यं शिरसि । ओं भूः हृदयाय नमः । हृदयको तर्जनी , मध्यमा और अनामिकाओंसे

ओं भुवः शिरसे स्वाहा । सिरको मध्यमाओं और अनामिकाओंसे **ओं स्वः शिखायै वषट् ।** बोधीकी अंगूठोंसे **ओं महः कवचाय हुम् ।** वक्षों-को दसों अंगुलियोंसे **ओं जनः नेत्राभ्यां वौषट् ।** नेत्रोंको तर्जनी मध्यमा और अनामिकाओं से **ओं तपः सत्यमस्त्राय फट् ।** दायें हाथको सिरपरसे घुमाकर इसीकी तर्जनी मध्यमासे चटखायें ॥ उपरके करन्यासकी तरह स्पर्श करें **ओं तत्सवितुरङ्गुष्ठाभ्यां नमः । वरेण्यं तर्जनीभ्यां नमः । भर्गो देवस्य मध्यमाभ्यां नमः । धीमहि अनामिकाभ्यां नमः । धियो यो नः कनिष्ठिकाभ्यां नमः । प्रचोदयात्करतलकरपृष्ठाभ्यां नमः ।**

उपरके अङ्गन्यासकी तरह करें

ओं तत्पादयोः । सवितुर्जान्वोः । वरेण्यंकट्याम् । भर्गो नाभौ । देवस्य हृदये । धीमहि कण्ठे । धियो नासिकायाम् । यः चक्षुषोः । नः ललाटे । प्रचोदयात् शिरसि । उपरके षडङ्गन्यासकी तरह करें **ओं तत्सवितुर्हृदयाय नमः । वरेण्यं शिरसे स्वाहा । भर्गो देवस्य शिखायै वषट् । धीमहि कवचाय हुम् धियो यो नः नेत्राभ्यां वौषट । प्रचोदयाद-**

ऽस्त्राय फट्। अङ्गन्यासकी तरह करें ओं आपः स्तनयोः। ज्योतिर्नेत्रयोः। रसो मुखे। अमृतं ललाटे। ब्रह्मभूर्भुवः स्वरों शिरसि॥

अब मुद्रायें वस्त्रसे हाथोंको छिपाकर करें। किसीकी दृष्टिमें न करें। इनके करनेका आकार अन्तमें देखो तन्त्रशास्त्रोंमें लिखा है कि जो मुद्राओंको न जाने उसका जप निष्फल होता है

ओं 'तत्' समाय नमः। 'स' सम्पुटाय नमः। 'वि' विततााय नमः। 'तु' विस्तीर्णाय नमः। 'व' द्विमुखाय नमः। 'रे' त्रिमुखाय नमः। 'णि' चतुर्मुखाय नमः। 'यं' पञ्चमुखाय नमः। 'भ' षण्मुखाय नमः। 'र्गो' अधोमुखाय नमः। 'दे' व्यापकाञ्जलये नमः। 'व' शकटाय नमः। 'स्य' यमपाशाय नमः। 'धी' ग्रन्थिकायै नमः। 'म' संमुखोन्मुखाय नमः। 'हि' विलम्बाय नमः। 'धि' मुष्टिकायै नमः। 'यो' मीनाय नमः। 'यो' कूर्माय नमः। 'नः' वराहाय नमः। 'प्र' सिंहाक्रान्ताय नमः 'चो' महाक्रान्ताय नमः। 'द' मुद्गराय नमः 'यात्' पल्लवाय नमः॥ प्राणायाम करें

गायत्री सर्वोत्कृष्ट मन्त्र है इसके यथार्थ ज्ञानसे विशेष फल होता है जिन मनुष्योंके लिये गर्भाधानसे लेके मरणपर्यन्त षोडश संस्कार कहे हैं उनही को गायत्रीका अधिकार है औरोंको नहीं ॥ जो मनुष्य तीन वर्षतक निरालस्य गायत्रीका जप करे। तो वायुकी तरह बिन रुकावटके वह ब्रह्मरूप होकर ब्रह्मको पाताहै ॥ मनुः अ० २ श्लो० ८० ८१ ८२

गायत्रीके आदि और अन्तमें प्रणव अवश्य लगाना चाहिये नहीं तो जप निष्फल होगा। जब मनुष्यको वेदपाठ पढनेकी शक्ति नहो वह बनमें जलके समीप केवल गायत्रीको विधि पूर्वक पढे तो भी फल विशेष है। मनुः अ० २ श्लो० १०४

'ओं भूः' 'ओं भुवः' 'ओं स्वः' और गायत्रीके तीनों चरण परमात्माके मिलनेके द्वार हैं। इनको वेद पढनेवाले ब्राह्मण दोनों वक्तकी सन्ध्यामें जपें तो कुल वेदपाठके फलको प्राप्तकर लेते हैं। मनुः अ० २ श्लो० ८१-८७ जो एक मासतक घरसे बाहिर नित्य १००० बार जप करे। तो बडे पापसे छूट जाता है जैसे साम्प केञ्चलसे छूटता है। मनुः अ० २ श्लो० ७९ ॥

अब दायें हाथसे जलको उठाकर जलमें छोडते पढें ॥ मनमें निश्चय करें कि मैं धर्म, अर्थ, काम, और मोक्षके अर्थ गायत्री मन्त्रका दशांश, एकमाला वा दस मालायें जपों

ओं अस्य श्रीतत्सवितुरितिमन्त्रस्य विश्वामित्र

ऋषिः । गायत्रं च्छन्दः । सविता देवता । आत्मनो वाङ् मनः कायोपार्जितपापनिवारणार्थे धर्मार्थ काम मोक्षार्थे श्रीमाहागायत्री सहस्रजपे (एक मालाजपे) दशांशजपे) विनियोगः ॥

नमस्कार धरके पढ़े

अथ ध्यानम् । मुक्ता विद्रुमहेमनीलधवलच्छायैर्मुखैस्त्रीक्षणैर्युक्तामिन्दुनिबद्धरत्नमुकुटां तत्त्वात्मवर्णात्मिकाम् । गायत्रीं वरदाभयांकुशकरां शूलं कपालं गुणं शङ्खं चक्रमथारविन्दयुगलं हस्तैर्वहन्तीं भजे ॥

प्रभातकी सन्ध्या "गायत्री" सुर्खवर्ण ऋग्वेद मुखवाली भूलोकस्थित ब्रह्मरूपिणी राजहंस पर आरूढ है । मध्याह्नकी सन्ध्या "सावित्री" सफेदवर्ण यजुर्वेद मुखवाली अन्तरिक्षस्थित शिवरूपिणी वृषभारूढ है । सायंकालकी सन्ध्या "सरस्वती" नीलवर्ण सामवेद मुखवाली स्वर्लोकस्थित विष्णुरूपिणी गरुड सवार है ॥ अञ्जलि धरकर पढ़े ॥

आगच्छ वरदे देवि त्र्यक्षरे ब्रह्मवादिनि ।
गायत्रि छन्दसां मातर्ब्रह्मयोने नमोऽस्तुते ३॥

फिर प्राणायाम करें

गायत्री रहस्यमें लिखा है—कि शापसे मुक्त गायत्री चतुर्वर्ग फलको देनेवाली है और शापमुक्त न

होनेपर चतुर्वर्गका नाश करती है । इसी प्रकार तन्त्रोंमें भी शापमोचन करनेकी आवश्यकता लिखी है । और यहां पूर्वकालसे ही इसके करनेका शिष्टाचार है । इस कारण इसके कई शापमोचनोंमें से जो एक यहां प्रचलित है उसको लिख रखते हैं ॥

अथ शापोद्धारः

ओं विश्वामित्र ऋ० विष्टारपांक्तिः छ० प्रजापतिर्दे० शापोद्धारे विनियोगः ॥

ओं ब्रह्मणाग्निः संविधानो रक्षोहा बाधतामितः । अमीवायुस्ते गर्भं दुर्नामयोनिमाशये ॥

हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् । स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥

सुभद्रा पावनी सुधा गायत्री विश्वभेषजम् । विशापामेनां कृत्वा तु यथास्तं विपरीतन ॥

ओं एं ऐं आवाय व्ययात्रायव्यायान्यौत्रेयाय वा ओं ३

ओं हरोसि पाप्मानं मे विद्धि । इति प्रातः ।

ओं तद्भर्गोसि पाप्मानं मे विद्धि । इति मध्याह्ने

ओं संविदसि पाप्मानं मे विद्धि । इति सायम्

ओं काराक्षेण नित्यं त्वं बिन्दुबीजेन शोभिता । मुनीनामनुरोधेन शापमोक्षो भवेत्त्वयि ॥ अहो देवि

महादेवि देवि सिद्धे सरस्वति । अजरे अमरे देवि वसि-
ष्ठशापमोचिता ॥ इति शापमोचनम् ॥

अञ्जलि धरकर विज्ञप्ति करे ।

ॐ दुर्निवारभवध्वान्तध्वंसनैककृतेक्षणाम् । नौ-
मि मोहविनाशाय भीतो ब्रह्मादिदेवताम् ॥ दुर्गतिं
हर मे देवि बहुजन्मशतार्जिताम् । प्राप्य कल्पत-
रुच्छायां कथं संतप्यते जनः ॥ पश्य मामाशु गा-
यत्रि विभ्रान्तं स्निग्धचक्षुषा । न बालमबलं पुत्रं
मुञ्चत्यप्रगमऽम्बिका ॥ एहि मां पाणिपद्मेन देहि
तूर्णं वरं शुभम् । महामोहाकुलं पुत्रं देवि मां स्पृ-
श नित्यशः ॥ मातः प्रतीक्षते नार्तो यत्तदाशु
प्रसीद मे । धृताक्षसूत्रं सावित्रि निर्विघ्नं पश्य मा-
मिह ॥ शृण्वतो नान्यकृत्यं स्यात्त्वं परहितं कुरु ।
ब्रह्मविष्णुहराद्यास्त्वामाश्रयन्ति सुरेश्वरि ॥

अब अक्षमालाको जो १०८ दाने समेरु और ब्र-
ह्मगान्ठ वाली हो, धोकर समेरु पर तिलक, अर्घ
पुष्प, धूप, दीप, नैवेद्य, और दक्षिणा हरएक वस्तु
"ह्रीं सिद्ध्यै अक्षमालाभगवत्यै नमः" इस मन्त्रसे नि-
वेदनकरके और "माले माले महामाले सर्वतत्त्वस्व-
रूपिणि । चतुर्वर्गस्त्वयि न्यस्तं तस्मान्मे सिद्धिदा भव ॥"
इस मन्त्रसे प्रार्थना करके ताम्बूल मुखमें डालकर
प्रातः सन्ध्यामें खडे और सायं और मध्याह्न म-

...में पद्मासन वा सिद्धासन से बैठकर मन्त्रका जप किया करें ॥

चौकड़ी लगानेमें दाईं रानपर बायां पैर और बाईं रान पर दायां पैर रखकर भुजाओंको पीठके पीछेसे घुमाकर दायें हाथ से बायें पादके अंगूठेको, और बायें हाथसे दायें पादके अंगूठेको पकड़े, और ठोडी हृदयसे लगावे, और नासिकाके अग्रको वा भ्रूमध्यको देखे, यह पद्मासनका प्रकार है । समाधिके उपयोगी है । मालाजपके समय केवल पैर और आसनही जमावे ॥

मुख जिह्वा आदिसे मन्त्रका उच्चारण नकरें। केवल मनमें जपे । जपकालमें दायें हाथ और मालाको हृदयके साथ धराकरें । और छुपा रखें ॥ छाती गर्दन और सिर न झुकाकर रखे । नाकके अग्रपर वा भ्रूमध्यपर वा सूर्यउदय होनेके स्थान (उफक) पर दृष्टिको जमायें । जिह्वा हुएठ वा कोई अङ्ग न हिलायें, दांत न दिखलायें ॥

अनामिका और कनिष्ठाके सहारेपर मध्यमाको रखकर इसके अगले पर्वपर अंगूठेसे एक२ मन्त्रजपकर एक २ दानेको हथेलीकी तरफ छोडते जायें। अन्त के दानेपर पहुंचकर अगर दूसरी तीसरी माला जपनी हो तो मालाको मोडकर अन्तके दानेसेही फिर आरम्भकरना चाहिये ॥ तर्जनीसे मालाको न छूवें। इसको मालासे दूर रखें ॥ घरसे नदीतक मालाको पगड़ी के नीचे रखकर लाया करें ॥ यह माला न

किसीको देदेनी न दिखानी । अवसर जियादा नहो-नेपर दशांश तो अवश्य जपना चाहिये ॥

दशांशकी विधि अनामिकाकी नीचली दो गांठ कनिष्ठाकी नीचेसे उपरतक तीन, अनामिका और मध्यमाकी उपरली दो, तथा तर्जनीके उपरसे नीचेतक तीन गांठ "न कि रेखायें" यह सब दस "दशांश" के पर्व हैं ॥ मध्यमाके बचे दो पर्वोंको समेरु माने ॥ हाथपर जपके समय आपसमें अंगुलियां मिलाकर रखनी और अंगूठेको गांठोंपर फिराते गसीटते लेना न कि उपर उठाकर लेजाना ॥

ब्राह्मणगायत्री मन्त्रः

ओं भूर्भुवः स्वस्तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ओं १०८ ॥

मालाको सिरपर रखकर प्राणायाम करें । जप निवेदनमें जलका तर्पण करें:—

मनस्पति ऋषिः, विराट् छन्दः, वातो देवता, विसर्जने विनियोगः ॥ देवा गातुश्रोत्रियाः

ओं देवा गातुविदो गातुं वित्त्वा गातुमित । मनसस्पत इमं देवयज्ञँ स्वाहा वाते धाः ॥

तर्पणके बचे जलसे माथेको छिडकायें ।

आठ मुद्रायें करें (पुस्तकके अन्तपर मूर्तियां देखो)

सुरभि-ज्ञान-चक्रं च, योनिः-कूर्मो-ऽथ पङ्कजम् ।

लिंगं-निर्याणकं चैव अष्टौ मुद्राः प्रकीर्तिताः ॥
तर्पण करेंः— अनेन श्रीमहागायत्रीसहस्रजपेन (एक मालाजपेन, दशांशजपेन) धर्मार्थकाममोक्षार्थं श्री-महागायत्री सावित्री सरस्वती प्रीयतां प्रीता भवतु ॥
माथेको छिडकें । अब गायत्री विसर्जनमें नमस्कार करें ॥
महेशवचनोत्पन्ने विष्णोर्हृदयसम्भवे । ब्रह्म-णा समनुज्ञाते गच्छ देवि नमोऽस्तु ते ॥
उत्तमे शिखरे देवि भूम्यां पर्वतमूर्धनि । ब्राह्मणेभ्योऽभ्यनुज्ञाता गच्छ देवि यथासु-खम् ॥ गायत्री जपके फलका चिन्तन प्रार्थनामें पढें ॥
दशभिर्जन्मचरितं शतेन तु पुरा कृतम् । त्रियुगं तु सहस्रेण गायत्री हन्ति किल्विषम् ॥

अर्थात् दशांशसे इस जन्मके पाप छूट जाते हैं । एकमालासे पूर्व जन्मके । और हजार मालासे तीन युगोंके पाप नष्ट जाते हैं ॥

तीनों कालकी सन्ध्या यदि प्रभातको ही करनी हो तो सायंसे आरम्भ करना चाहिये । अर्थात् प्रथम सायंके मन्त्र फिर प्रातः के फिर मध्याह्नके ॥ व्याहृति वैश्वदेव हवनमें भी इसी प्रकार सायंसे आरम्भ करना चाहिये ॥

सन्ध्या छूटनेका प्रायश्चितः—

यदि किसी कारणसे सन्ध्या छूट गई हो तो उसका सुलभ उपाय यह है कि ८००० गायत्रीका जप

शुभ दिनमें शुद्ध चित्तसे करें । और अगर सम्भव हो तो व्याहृति हवनभी करें ॥ उस हवनका भी सायंके मन्त्रोंसे ही आरम्भ करें । और मनमें यह निश्चय करें कि फिर कदापि सन्ध्याका त्याग न होगा ॥

प्रायश्चित्तेन्दुशेखरः—नित्य कर्ममें जो कदापि ठीक समयपर सन्ध्या न की जाये तो एकमालाका उस दिन जियादा जप करना उसका प्रायश्चित है । धर्म सिन्धु । पूर्वार्द्ध ३ परिच्छेद ॥

प्रत्येक मन्त्रसे प्रत्येक दिशाकी तरफ नमस्कार करें ॥

पूर्वको नारायणस्य दिग्विदिगादि च ।

ओं नमः प्राच्यै दिशे याश्च देवता एतस्यांप्रतिवसन्त्येताभ्यश्च वो नमः ।

पूर्वदक्षिणकोणको नमोऽवान्तरायै दिशे याश्च देवता एतस्यां प्रति वसन्त्येताभ्यश्च वो नमः । दक्षिणको ओं नमो दक्षिणायै दि० । दक्षिणपश्चिमकोणको ओं नमोऽवान्तरायै दि० । पश्चिमको ओं नमः प्रतीच्यै दि० । पश्चिमोत्तर कोणको ओं नमोऽवान्तरायै दि० । उत्तरको ओं नम उदीच्यै दि० । पूर्वोत्तरकोणको ओं नमोऽवान्तरायै दि० । उपरको ओं नम ऊर्ध्वायै दि० । नीचेको ओं नमोऽधरायै दि० । तर्पण करें:— ओं नमो ब्रह्मणे । नमो अस्त्वग्नये ।

नमः पृथिव्यै । नम ओषधीभ्यः । नमो वाचे । नमो वाचस्पतये । नमो विष्णवे । बृहते कृणोमि ॥ इत्येतासामेव देवतानां सार्ष्टिं सायुज्यं सलोकतां सामीप्यमाप्नोति । य एवं विद्वान् स्वाध्यायमधीते ॥ माथेको छिड़कें ।

तर्पणकी विधि :— देवता ऋषि और पितरोंका तर्पण सोने रांपे उदुम्बर वा गेरडाके पात्रसे अथवा अञ्जलिसे, दूध, दही, सर्षप, अक्षत, तिल, शहद, घी, और कुशाके बिष्टरके समेत जल से करना चाहिये । परन्तु तर्पणकी धार गायके सींगके बराबर ऊंची हो । अञ्जलि धरके पूर्वकी तरफ मुखकरके देवताओंका आवाहन करें ॥ गृत्समदस्य गायत्री विश्वेदेवाः ।

ओं विश्वे देवास आगत शृणुता म इमँ हवम् । एदं बर्हिर्निषीदत ॥

हर एक नाम पर एक २ बार अञ्जलिसे वा पात्रसे अंगुलियोंके सिरोंपरसे देवताओंको जल देवें :—

ओंब्रह्मा तृप्यताम् । विष्णुस्तृप्यताम् । रुद्रास्तृप्यन्ताम् । प्रजापतिस्तृप्यताम् । देवास्तृप्यन्ताम् । छन्दांसि तृ० । वेदास्तृ० । ऋषयः तृ० । तपोधनाः तृ० । आचार्याः तृ० । गन्धर्वाः तृ० । इतराचार्याः तृ० । संवत्सराः

सावयवाः तृप्यन्ताम् । देव्यः तृप्यन्ताम् । अप्सरसः तृ० । देवानुगाः तृ० । नागाः तृ० । सागराः तृ० । पर्वताः तृ० । सरितः तृ० । मनुष्याः तृ० । यक्षाः तृ० । रक्षांसि तृ० । पिशाचाः तृ० । सुपर्णाः तृ० । भूतानि तृ० । पशवः तृ० । ओषधयः तृ० । वनस्पतयः तृ० । भूतग्रामश्चतुर्विधः तृप्यताम् । असुराः तृप्यन्ताम् । क्रूराः तृ० । सर्पाः तृ० । जम्बुकाः तृ० । तरवः तृ० । खगाः तृ० । विद्याधराः तृ० । वाय्वाधाराः तृ० । जलाधाराः तृ० । निराधाराः तृ० । आकाशगामिनः तृ० । धर्मरताः तृ० । सर्वे ग्रहाः तृप्यन्ताम् । यमः तृप्यताम् । धर्मराजः तृ० । मृत्युः तृ० । अन्तकः तृ० । वैवस्वतः तृ० । कालः तृ० । सर्वप्राणहरः तृ० । औदुम्बरः तृ० । नीलः तृ० । दध्नः तृ० । परमेष्ठी तृ० । वृकोदरः तृ० । भीमः तृ० । चित्रः तृ० । चित्रगुप्तः तृ० । पाशहस्तः तृ० । कृतान्तस्तृप्यताम् ॥

ईशान कोनकी तरफ मुखकरके गर्दन और दो अंगूठोंमें यज्ञोपवीत रखे और अञ्जलि धरके ऋषियोंका आवाहन करें

कण्ठोपवीती । ओं अग्निर्ऋषिः पवमानः पाञ्चजन्यः पुरोहितः । तमीमहे महागयम् ॥

हर एक नामपर दो२ बार अञ्जलिसे वा उपरके पात्रों-से कनिष्ठाओंके मूलपरसे ऋषियोंको जल देवें :—

ओं सनकः तृप्यताम् २ । सनन्दनः तृ० २ । सनातनः तृ० २ । सनत्कुमारः तृ० २ । कपिलः तृ० २ । आसुरिः तृ० २ : वोढा तृ० २ । पंचशिखः तृ० २ । मरीचिः तृ० २ । अत्रिः तृ० २ । अङ्गिराः तृ० २ । पुलस्त्यः तृ० २ । पुलहः तृ० २ । क्रतुः तृ० २ । प्रचेताः तृ० २ । भृगुः तृ० २ । वसिष्ठः तृप्यताम् २ । नारदः तृप्यताम् २ ॥

दक्षिणकी तरफ मुखकरके गर्दन और बाईं भुजामें यज्ञोपवीत धरें और अञ्जलि धरकर पितरोंका आवाहन करें

ततः प्राचीनावीती । शंखस्य त्रिष्टुप् पितरः । ओं उशन्तस्त्वा हवामह्युशन्तः समिधीमहि । उशन्नुशत आ वह पितॄन्हविषे अत्तवे ॥

प्रत्येक नामपर तीन २ बार जलाञ्जलिसे वा पात्रसे दाईं अंगूठे और तर्जनीके मध्यमेंसे जल देवें :—

ओं कव्यवाडनलः स्वधा नमः तृप्यताम् ३ । सोमः स्व० ३ । अर्यमा स्व० ३ । यमः स्व० ३ । अग्निष्वात्ताः स्व० तृप्यंताम् ३ । बर्हिषदः

स्व० ३ । हविष्मन्तः स्व० ३ । सोमपाः स्व० ३ । सुकालिनः स्व० ३ । आज्यपाः स्व० ३ । वसवः स्व० ३ । रुद्राः स्व० ३ । आदित्याः स्वधा नमः तृप्यताम् ३ ॥ अञ्जलि धरकर अपने मृत पितरोंका आवाहन करते जल देवें शंखस्य त्रिष्टुप् पितरः ॥ ओं उदीरतामवर उत्परास उन्मध्यमाः पितरः सोम्यासः । असुं य ईयुरवृका ऋतज्ञास्ते नोऽवन्तु पितरो हवेषु ॥ यमस्य त्रिष्टुबङ्गिरसः ॥

ओं अङ्गिरसो नः पितरो नवग्वा अथर्वाणो भृगवः सोम्यासः । तेषां वयँ सुमतौ यज्ञियानामपि भद्रे सौमनसे स्याम ॥

शंखस्य त्रिष्टुप् पितरः । आ यन्तु नः पितरः सोम्यासोऽग्निष्वात्ताः पथिभिर्देवयानैः । अस्मिन्यज्ञे स्वधया मदन्तोऽधि ब्रुवन्तु तेऽवन्त्वस्मान् ॥

देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च । नमः स्वधा च स्वाहा च नित्यमेव भवन्त्विह । आजके मास पक्ष, तिथि और वारका नाम उच्चारणकरके मृतपितरोंके नाम पर, सब पुरुषों और माता पितामही प्रपितामहीको तीन २ बाकी स्त्रियोंको एक २

जलाञ्जलि देवें ॥ दाईं अंगूठे और तर्जनीके मध्यसे स्वर्गवासी पिताका नाम और गोत्र लेकर जलकी अञ्जलियां देवें :—

अमुक गोत्र तावत्—पिता—स्वधा नमः तृप्यताम् ३ ।

पढ़ते २ जल देते जायें :— वामदेवस्योष्णिगापः ।

ओं ऊर्जं वहन्तीरमृतं घृतं मधु पयः कीलालं परिस्रुतम् । स्वधा स्थ तर्पयत मे पितृन् ॥ प्रजापतेस्त्रिष्टुप् पितरः । पितृभ्यः स्वधायिभ्यः स्वधा नमः । पितामहेभ्यः स्वधायिभ्यः स्वधा नमः । प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः । अक्षन् पितरोऽमी मदन्त पितरोऽतीतृपन्त पितरः । पितरः शुन्धध्वम् ॥ ओं ये चेह पितरो ये च नेह याँश्च विद्म याँ २ ॥ उ च न प्रविद्म । त्वं वेत्थ यति ते जातवेदः स्वधाभिर्यज्ञं सुकृतं जुषस्व ॥

पितामहका नाम और गोत्र बोलकर तीन बार जल देवें—

पितामहः—स्वधा नमः तृप्यताम् ३ ।

पितरोंका ध्यान करते जल देते जायें :—

(गौतमस्य) गायत्री विश्वेदेवाः ॥

नारायणस्यार्षम् ॥ ओं मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः । माध्वीर्नः सन्त्वो-

षधीः ॥ १ ॥ मधु नक्तमुतोषसो मधुमत्पार्थिवँ रजः । मधु द्यौरस्तु नः पिता ॥ २ ॥ मधुमान्नो वनस्पतिर्मधुमाँ २ ॥ अस्तु सूर्यः । माध्वीर्गावो भवन्तु नः ॥ ३ ॥

प्रपितामहका नाम और गोत्र बोलकर तीन बार जल देवें

प्रपितामहः—स्वधा नमः तृप्यताम् ३ ॥

श्रद्धासे झुककर और अञ्जलि धरकर नीचेके मन्त्र पढ़ें ।

ओं नमो वः पितरो मन्यवे । नमो वः पितरः शुष्माय । नमो वः पितरो जीवाय । नमो वः पितरो रसाय । नमो वः पितरो बलाय । नमो वः पितरः क्रूराय । नमो वः पितरः स्वधा वः । पितरो यत्र पितरः । स्वधा यत्र यूयं स्थ सा युष्मासु तथा यूयं यथाभागं मादयध्वं येह पितर उग्र्यत्र वयं स्मः सास्मासु तस्यै वयं ज्योग्जीवन्तो भूयास्म ॥

स्वर्गवासिनी माईका नाम और गोत्र लेकर तीन बार जल देवें-- माता—स्वधा नमः तृप्यताम् ३ ॥

इसीतरह आगे पितामही आदि सब पितरोंको जल दे देवें ॥ (परन्तु पितामही और प्रपितामहीको भी तीन २ बार बाकी स्त्रियों को एक २ बारही देवें) ॥

पितामही स्व० प्रपितामही स्व० मातामहः

स्व० प्रमातामहः स्व० वृद्धप्रमातामहः स्व० मातामही स्व० प्रमातामही स्व० वृद्धप्रमातामही स्व० जल देवें २ पढ़े ॥ मातृपक्ष्यास्तु ये केचिद्ये चान्ये पितृपक्षजाः । गुरुश्वशुरबन्धूनां ये कुलेषु समुद्भवाः ॥ ये प्रेतभावमापन्ना ये चान्ये श्राद्धवर्जिताः । जलदानेन ते सर्वे लभन्तां तृप्तिमुत्तमाम् ॥ समस्तमातापितृभ्यो द्वादशदैवतेभ्यः पितृभ्यो हिमपानं स्वधा, क्षीरपानं स्वधा, मधुपानं स्वधा तिलोदकं स्वधा, उदकतर्पणं स्वधा । हिमं २ रजतम् २ ॥

यज्ञोपवीतको गर्दन और दाईं भुजामें रखकर अङ्गुलियोंके सिरों परसे जल देवेंः—

सव्येन । वसन्ताय नमः । ग्रीष्माय नमः । वर्षाभ्यो नमः । शरदे नमः । हेमन्ताय नमः । शिशिराय नमः । षडृतुभ्यो नमः ॥ देवासुरास्तथा यक्षा नागा गन्धर्वकिन्नराः । पिशाचा गुह्यकाः सिद्धाः कूष्माण्डास्तरवः खगाः ॥

यज्ञोपवीतको गर्दन और दो अंगूठोंमें रखकर कनिष्ठाओंके मूल परसे जल देवेंः—

कण्ठोपवीती । जलेचरा भूनिलया वाय्वाधाराश्च जन्तवः । तृप्तिमेते प्रयान्त्वाशु

मद्दत्तेनाम्बुनाखिलाः ॥

बाईं भुजामें यज्ञोपवीत रखकर दाईं अंगूठे और तर्जनीके मध्यसे जल देवें :—

अपसव्येन । नरकेषु च सर्वेषु यातनासु च ये स्थिताः । तेषामाप्यायनायैतद्दीयते सलिलं मया । येऽबान्धवा बान्धवा वा येऽन्यजन्मनि बान्धवाः । ते तृप्तिमखिला यान्तु यश्चास्मत्तोभिवाञ्छति ॥ येषां गृहे, मया भुक्तं येषां भुंजाम्यहं पुनः । पुत्रदारविहीनाश्च नरके वा वसन्ति ये ॥ तेभ्यः सर्वेभ्यः पितृभ्य इदमस्तु तिलोदकम् ॥

माघकी शुक्ल पक्ष अष्टमीके दिन भीष्म पितामहका तर्पण और श्राद्ध करना महाभारत हेमाद्रि व पद्मपुराणकी आज्ञासे ब्राह्मण आदिकोंका आवश्यक कर्म और पुत्र पौत्र वर्द्धक लिखा है उस का नकरना बर्समें किये पुण्यका नाशकभी लिखा है इस कारण उस तर्पणकी विधि लिखी जाती है :— अपसव्येन करके ॐ तत्सद्ब्रह्मेत्यादि पढकर तिल, दर्भ, विष्टर, और जलसे, वैयाघ्रपद (य) गोत्राय संकृतिप्रवरायच । अपुत्राय ददाम्येतत्सलिलं भीष्मवर्मणे । पितामहः भीष्मभारद्वाजगांगेयः स्वधा नमः तृप्यताम् ॥ ३ ॥ भीष्मः

शान्तनवो वीरः सत्यवादी जितेन्द्रियः । आ-
भिरद्भिरवाप्नोतु पुत्रपौत्रोचितां क्रियाम् ॥
यज्ञोपवीतको गर्दन और दाईं भुजामें रखकर जल देवें—
सव्येन । नमो देवेभ्यः । यज्ञोपवीतको गर्दन
और दो अंगूठोंमें रखकर जल देवेंः— कण्ठोपवीती
स्वाहा ऋषिभ्यः । यज्ञोपवीतको गर्दन और बाईं
भुजामें रखकर जल देवेंः— अपसव्येन । स्वधा
पितृभ्यः । यज्ञोपवीतको दाईं भुजा और गर्दनमें
रखकर जल देवेंः— सव्येन । आब्रह्मस्तम्बप-
र्यन्तं ब्रह्माण्डं सचराचरम् । जगत्तृप्यतु ३
एवमस्तु ॥ सूर्य देवताको गायत्रीमन्त्र और
हंसः शुचिषत्—इत्यादि मन्त्र पढकर तिल, दर्भ, स-
मेत जलसे अर्घ्य देकर नमस्कार करेंः—

नमो धर्मनिदानाय नमः सुकृतसाक्षिणे ।
नमः प्रत्यक्षदेवाय भास्कराय नमो नमः ॥
ॐ नमो विवस्वते ब्रह्मन्भानवे विष्णुतेजसे ।
जगत्पवित्रे शुचये सवित्रे शर्मदायिने ॥

अङ्गोछा बाईं तरफकी शिला वा देहलीपर निचोडें,
नदी आदि तीर्थमें कभी न निचोडें, स्नान निष्फल
होजाता है ॥ और देव ऋषि पितरोंके तर्पणसे पह-
लेभी न निचोडें ॥ देवों और ऋषिओं समेत पितर निरा-
श होकरवापस आते हैं । श्राद्धके दिन श्राद्ध करके

अंगोचा को देहलीपर निचोडें ॥ निचोडनेका मन्त्रः—
अपसव्येन । अस्मत्कुले तु ये जाता अपुत्रा गोत्रजा मृताः । ते पिबन्तु मया दत्तं वस्त्रनिष्पीडनोदकम् ॥ तीर्थको नमस्कार करें सव्येन । शान्तिः पुष्टिस्तथा तुष्टिरऽस्तु मे त्वत्प्रसादतः । सर्वपापप्रशान्तिश्च तीर्थराज नमोस्तु ते ॥ गङ्गा और वितस्ताको नमस्कार ॥ अक्षसूत्राम्बुजकरामादर्शकलशान्विताम् । मीनपद्मासनासीनां वितस्तां शरणं श्रिये ॥ गङ्गैव मुक्तिदा क्षेत्रे गङ्गा किल्विषनाशिनी । त्रैलोक्यां पाहि मे गङ्गे हरिगङ्गे नमोस्तु ते ॥

इति सन्ध्योपासनविधिः समाप्तः ॥

॥ यज्ञोपवीत बनानेका तरीका ॥

१ जीवितपति ब्राह्मणीके वा ब्राह्मणकन्याके हाथसे, उनके न मिलनेमें पतिव्रतास्त्रीके हाथसे उसकेभी न मिलनेमें सच्चरित्रवाली विधवाब्राह्मणीके ही हाथसे, शुद्ध रूईको विनौलोंसे अलग करके हाथ सेही धुनवाके, फिर कतवाके जो यह सूतकी तार छेद रहित बने, उसी तारसे ब्राह्मण शुद्ध स्थानमें बैठकर यज्ञोपवीत बनाना आरम्भ

करे । आरम्भसे समाप्त तक गायत्री मन्त्र मनमें जपना चाहिए ॥

२ खोलकर रखे हुये बायें हाथकी मिली हुई चार अङ्गुलियोंकी जडपर कनिष्टाकी हथेलीकी तरफकी जडसे आरम्भ करके उसीके पीठकी तरफकी जड तक लपेटकर कुल नौ अंगुल लम्बाईका नाम वामाहै

३ इसी वामापर विवाहित पुरुषके ६ लडी यज्ञोपवीतके वास्ते १९२ बार तार लपेटें और अविवाहित ब्रह्मचारी के ३ लडी यज्ञोपवीतके वास्ते ९६ बार तार लपेटें जिससे १९२ (व ९६) वामा लम्बी तार बने । अन्तपर पहोंचकर बाकी तारसे काटनेके विनाही गिनी हुई तारको दुहरी बनाके फिर अन्तपर पहोंछ कर उस दुहरी तारको तिहरी बनावें अब तिहरी तार बननेके बाद बाकी बची तारको काट छोडे ॥

४ अब उस तिहरी तारको शुद्ध पानीमें थोडे समय भिगो रखकर फिर उपरको बटकर त्रिवलित करें । ताकि यह १९२ वामा लम्बी तिहरी तार ६४ वामा लम्बी और ९ गुणी बने (और ९६ वामा लम्बी तिहरी तार ३२ वामा लम्बी और ९ गुणी तार बने) फिर इसे नीचेको बटकर ६४ वामावाली तार ६ लडी (और ३२ वामावाली लम्बी तार ३

लडी) वाले यज्ञोपवीतके वास्ते तैयार हुई ॥
बनाना एकबार परोहितसे सीख रखना चाहिए ॥

यज्ञोपवीत रीडकी हडी नाभिस्थान और कमर पर रहना चाहिये, स्तन से उपर वा नाभि से नीचे तक न होना चाहिये । कहाहै कि—द्विज गांठवाली शिखा को और दाई भुजामें एक गांठवाले यज्ञोपवीत को हरवक्त धारणे वाले होने चाहियें ॥

अथ ब्रह्मीविद्या पाठः ॥

ओं ओं ओं त्रिगुणपुरुष क्षेत्रचर मोहं भिन्द्धि रजस्तमसी भिन्द्धि प्राकृतं पाशजालं सावरणं परिहर सत्त्वं प्रहाण पुरुषोत्तमोऽसि सोमसूर्यानल प्रवर परमधामन्ब्रह्मविष्णुमहेश्वररूप सृष्टिस्थितिसंहारकारक भ्रूमध्यनिलय तेजोऽसि धामासि महात्मन् ओं तत्सत् २ ओं हंसः शुचिषद्वसुरन्तरिक्षसद्धोतावेदिषदतिथिर्दुरोणसत् नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतम् परम्ब्रह्मस्वरूप सर्वगत सर्वशक्ते सर्वेश्वर सर्वग्रन्थिभेदनं कुरु २ परमंपदं परामर्श ब्रह्मद्वारं सर कुमार्गं जहि षाट्कोशकं शरीरं त्यज शुद्धोसि बुद्धोसि विमलोसि क्षमस्व स्वपदमासादय स्वाहा ॥
ओं हंसो नारायणः प्रोक्तो हंस आत्मेति निश्चितम् । स एवात्मा स भगवान्विष्णुस्तद्ब्रह्मसर्वगम् ॥ इमां महाब्रह्मविद्यां प्रातः काले पठेत्तु यः । स याति परमं स्थानं यत्र गत्वा न शोचते ॥ इति ॥

वस्त्रेणाच्छादितकरं दक्षिणं यः सदा जपेत् तस्य स्यात्स-
फलं जप्यं तद्धीनमफलं स्मृतम् ॥ अंगुलीर्न वियुञ्जीत
किञ्चिदाकुञ्चिते तले अंगुलीनां वियोगाच्च छिद्रे च स्रवते
जपः ॥ गणनाविधिमुल्लंघ्य यो जपेत्तज्जपं यतः
गृह्णन्ति राक्षसास्तेन गणनं कीर्तितं बुधैः ॥
हृदये हस्तमारोप्य तिर्यक् कृत्वा कराङ्गुलीः आच्छा-
द्य वाससा हस्तौ दक्षिणेन सदा जपेत् ॥ अनामामध्य-
मारभ्य कनिष्ठादित एव च तर्जनीमूलपर्यन्तं दशपर्व-
सु संजपेत् ॥ पर्वद्वयं मध्यमायाः मेरुत्वेनोपकल्पये-
त् ॥

गायत्री जपने, दशपोरुआ जपने के लिए १० पोर

चार अंगुलियों को मिलाकर रखना चाहिए ऊपर अं-
गूठा फिराने के वक्त अंगूठे को उठाकर ले जाना -
चाहिए

वस्त्र से हाथ को ढ़क कर जप करना चाहिए

पातकनिहत्यर्थं ततसमायनमः	उपपातकनिहत्य० ससम्पुटायनमः
१ 	२
महापातकनि० वि विततायनमः	दुष्टग्रहदोषनिवा० रु विस्तीर्णायनमः
३	४ 
भ्रूणहत्यानिवार० व द्विमुखायनमः	ब्रह्महत्यानि० रे त्रिमुखायनमः
५	६ 

मृगमस्तकमूलनिका ०
[illegible] चतुर्मुखाय नमः

७

एकहस्तालिकार् ०
ॐ पंचमुखाय नमः

८

[illegible] हस्तालिका ०
ॐ षण्मुखाय नमः

९

[illegible] हस्त लिकाव ०
ॐ अधोमुखाय नमः



[illegible] हस्ता लिकार ०
[illegible]



[illegible]
[illegible]



कृतघ्नहत्यानिवा॰
स्य यमपाशाय नमः

१३



मातृपितृहत्यानि॰
री गुल्मिकायै नमः

१४



सप्तजन्मान्तरगतहत्या
नि॰ म सन्मुखोन्मुखा,
य नमः

१५



ब्रह्मघ्नपापापहं
हि विलम्बाय नमः

१६



प्राणिहत्यानिवार॰
धि मुष्टिकायै नमः

१७



सर्व सर्व पापप्रशं
धो भीजाय नमः १८

१९
२०
२१
२२
२१
२४

सुरभिः १	ज्ञानम् २
	
चक्रम् ३	योनिः ४
कूर्मः ५	पंकजम् ६
	

लिंगम् ७	निर्वाणकम् ८





देवतीर्थ



जप के समय हृदय के साथ हाथ रखना

आचमन के लिए गो कर्ण जैसा

हाथ

देवतीर्थ
देव नर्पण के लिए

और बायां हाथ बाईं रान पर

ऋषितीर्थ ऋषियोंके तर्पणके लिए	पितृतीर्थ पितरोंके जलदेनेके
	

चतुर्विंशति मुद्राहि गायत्र्याः सुप्रतिष्ठिताः ॥
वृथा स्नानं वृथा संध्या वृथा होमो वृथा जपः ॥
योहि मुद्रां नजानाति सर्वं तद्विष्फलं भवेत् ॥

मोदनात्सर्वदेवानां द्रावणात्पापसन्ततेः
तस्मान्मुद्रेयमाख्याता सर्वकर्मार्थसाधिनी ॥

मिलनेका पता

पंडित मधुसूदन कौल दूकानदार मदु बाजार अनंतनाग पं० सुदर्शन सर्कीन टाहल बुस पर कोठीबाग श्रीनगर
पं० गोविंदराज भट्ट ठठु महाराजगंज बाजार श्रीनगर ॥

ओ३म्

गर्भाधानादि संस्कार विधिः ॥

अथवा - प्राधान्यात्

उपनयनविधिः ॥

संस्कर्तृ सगृहीतोपयुक्तानुरूप श्रुति स्मृति मूलोपोद्घातपरिष्कृतः

राजकीयपाठशाला मुख्याध्यापक कह्नत्यूपाह्व-

पण्डितनाथरामशास्त्रि संस्कृतः शोधितश्च ॥

सोऽयम्

पंडित माधवराम - केशवरामाभ्यां श्रीनगरान्तर्वर्ति

कोठीबागान्तरे स्वकीय मार्कण्टायल मुद्रणालये

मुद्रितः प्रकाशितश्च विक्रम संवत १९९३

ॐ

गर्भाधानादिसंस्कारविधिः ॥

अथवा प्राधान्यात्—

उपनयनविधिः ॥

ॐश्रीगणेशाय नमः ॥ ओंसंस्काराणामानुपूर्व्यं वक्ष्ये लौगाक्षिभाषितम् । यथोक्तकर्महोमानां यथाकालं यथाक्रमम् ॥ ऋतौ चतुर्थ्यां स्नातायां प्राजापत्यं चरुं श्रपेत् । नि[1]श्चये बीजवापस्य गृह्यसूत्रे विधिः स्मृतः ॥ सीमन्तश्च यथाकालं कार्यं पुंसवनं ततः । जातकर्म नामकर्म दर्शनं सूर्यचंद्रयोः ॥ अन्नप्राशनहोमोऽथ चूडोपायनमेव च । ऋतुनक्षत्रयागात्प्राग्भैक्षस्याचरणं विदुः ॥ व्याख्यानं ब्रह्मचर्यस्य होमे सम्पादिते भवेत् । शौचशिक्षा सन्ध्योपास्तिर्मन्त्राणा-

---

१ निशायामित्यपि पाठः ।

मुपदेशनम् ॥ तथाग्नीन्धनमन्त्राणां ततो भैक्षस्य भोजनम् । तिष्ठन्तं तदहःशेषं स्थापयेद्ब्रह्मचारिणम् ॥ सन्ध्योपासाग्निकार्यं च भैक्षचर्या ततोऽन्वहम् । त्रैविद्यकं यथाकालमुपाकर्म यथोदितम् ॥ चातुर्होतृकहोमौ द्वावारण्यानि व्रतान्यथ । गोदानहोमस्त्रैविद्यापवर्गोऽपि ततः स्मृतः ॥ यथाकालमध्ययनमुत्सर्जनविधिस्ततः । प्रास्याग्नौ दण्डमजिनं मेखलां चाप्सु निक्षिपेत् ॥ मधुपर्कस्ततो देय आचार्याय यथाविधि । स्नानव्रते स्नात..ाय मधुपर्कं प्रदापयेत् ॥ एकादशानुवाकेन ततः स्यादनुशासनम् । स्नातस्य स्वस्तिपुण्यत्वाद्धोमोऽथ स्यात्त्रिकादिभिः ॥ पुत्रं पितार्हयेत्तत्र स्वस्तिपुण्येष्वतः परम् । मधुपर्कविधेरन्ते विद्यातीर्थव्रतादिकम् । सर्वं कुर्याद्विधानेन ततो गृहसमाश्रयः ॥ अनेन क्रमयोगेन यथाकालं द्विजन्मनाम् । कार्यः शरीरसंस्कारः पावनः शुभकर्मकृत् ॥ न निर्वापश्च सीमन्ते जातकर्मणि वै तथा । चूडोपायनयोस्तद्वत्त्रैविद्यकव्रतद्वये ॥ उपाकर्मणि गोदाने वैवाहे प्रायश्चित्तके । चतुर्गृहीत्वा

प्रधानं यथाकर्म समाचरेत् ॥ पुंसवने नामकरणे सूर्यसोमादिदर्शने । अन्नप्राशे चतुर्होत्रे वर्गे चैवापवर्गके ॥ एषां चरुः प्रदातव्यश्चान्येषां जुहुयाद्‌घृतम् ॥ सीमन्ते जातकरणे चूडोपायनके तथा । सापवर्गे त्रैविद्येऽथ ह्युपाकर्मणि वै तथा । गोदाने चैव सर्वेषां प्रत्यृचं जुहुयाद्‌घृतम् ॥ सकृत्संस्कृतसंस्काराः सीमन्तेन द्विजस्त्रियः । यं यं गर्भं प्रसूयन्ते स सर्वः संस्कृतो भवेत् ॥ अनेकदेवतायागे त्वेक एव चरुर्भवेत् । ऋते पुंसवनाद्‌गृह्ये लौगाक्षिवचनं यथा ॥

[मौञ्जीबन्धे रक्तश्वेते मण्डले सूर्यचन्द्रयोः । वर्तुले नवरेखाढ्ये वितस्तिसंमिते यजेत् ॥ केशान्तिको ब्राह्मणस्य दण्डः कार्यः प्रमाणतः । ललाटसंमितो राज्ञः स्यात्तु नासान्तिको विशः ॥ नाङ्गुष्ठादधिका कार्या समित्स्थूला तथा क्वचित् ॥ उपवीतं षट्तोरकं द्वे तदितरयोः स्मृते ॥ ओंकारं पूर्वमुच्चार्य व्याहृतीस्तदनन्तरम् । सावित्री प्रणवश्चान्ते जप एवमुदाहृतमिति ॥]

आदावश्मचूर्णेन ग्रहमण्डलं । तद्दक्षिणत ऊर्ध्वाधश्चन्द्रसूर्ययोर्न-
वरेन्द्रायुने द्वादशांगुलमिते श्वेतरक्ते वर्तुले मण्डले चोल्लिख्य कल-
शं पूजयेत् ॥ ओंकारो यस्य मूलमित्यादि । वषट्नेऽ तावत् ।
ततः कलशे प्रधानानि । ओंप्रजापते नहि त्वदन्य एता विश्वा
जातानि परिता बभूव । यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम
पतयो रयीणाम्, नमः ॥ १ ॥ ये के च उमा महिनो अहिमाया
दिवो जज्ञिरे अपां सधस्थे । ते अस्मभ्यमिषये विश्वमायुः क्षप
उस्रा वरिवस्यन्तु देवाः, नमः ॥ २ ॥ अग्निस्तुविश्रवस्तमं तुवि-
ब्रह्माणमुत्तमम् । अतूर्तं श्रावयत्पतिं पुत्रं ददाति दाशुषे, नमः ॥
इन्द्र क्षत्रमभि वाममोजोऽजायथा वृषभश्चर्षणीनाम् । अपानुदो
जनममित्रयन्तमुरुं देवेभ्यो अकृणोरु लोकम्, नमः ॥ प्र तद्विष्णुः
स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठः । यस्योरुषु त्रिषु
विक्रमणेष्वधि क्षियोन्त भुवनानि विश्वा, नमः ॥ ३ ॥ हिरण्यगर्भः
समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् । स दाधार पृथिवीं

थामुतेमां कस्मै देवाय हविषा विधेम, नमः ॥ संवत्सरस्य प्रतिमां ये त्वा रात्र्युपासते । तेषामायुष्मतीं प्रजां रायस्पोषेण संसृज, नमः ॥ काय नमः। कस्मै० । कतमस्मै नमः । प्रजापतये नमः । प्रजापते–इति द्वाभ्याम् । प्रजापते नहि त्वदन्य एता विश्वा जातानि परिता बभूव । यत्कामास्ते जुहुमस्तन्नो अस्तु, नमः ॥ असावमुष्य पुत्रोऽमुष्यासौ पुत्रो वयं स्याम पतयो रयीणाम्, नमः ॥ (देवदत्तो यज्ञदत्तस्य पुत्रो यज्ञदत्तस्य देवदत्तः पुत्रो वयं स्याम पतयो रयीणाम्, नमः) ॥ ४ ॥ कया नश्चित्र आभुवदूती सदावृधः सखा । कया शचिष्ठया वृता, नमः ॥ कस्त्वा सत्यो मदानां मँहिष्ठो मत्सदन्धसा । दृढा चिदारुजे वसु, नमः ॥ कयातदिनि तृखानां द्वैव्रतस्य ॥ कया तच्छृण्वे शच्या शचिष्ठो यया कृणोति मुहुः काचिदृष्वः । पुरु दाशुषे विचयिष्ठो अंहोथादधाति द्रविणं[1] जरित्रे, नमः ॥ प्रजापतये नमः । प्रजापते–इति द्वाभ्याम् । प्रजापते

---

१ जनित्रे ।

नहि त्वदन्य० इत्यादि नमः । असावमुष्येत्यादि नमः ॥ (देवदत्तो यज्ञदत्तस्य पुत्रो यज्ञदत्तस्य देवदत्तः पुत्रो वयं स्याम पतयो रयीणां. नमः) ॥५॥ मित्रो जनान्यातयति ब्रुवाणो मित्रो दाधार पृथिवीमुत द्याम् । मित्रः कृष्टीरनिमिषाभिचष्टे मित्राय हव्यं घृतवद्विधेम, नमः ॥ प्र स मित्र मर्तो अस्तु प्रयस्वान्यस्त आदित्य शिक्षति व्रतेन । न हन्यते न जीयते त्वोतो नैनमंहो अश्नोत्यन्तितो न दूरात्, नमः ॥ ६ ॥ आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम् । भवावाजस्य सङ्गथे, नमः ॥ सं ते पयांसि समुयन्तु वाजः सं वृष्ण्यान्यभिमातिषाहः । आप्यायमानो अमृताय सोम दिवि श्रवांस्युत्तमानि धिष्व, नमः ॥ ७ ॥ अन्नपते अन्नस्य नो देह्यनमीवस्य शुष्मिणः । प्र प्रदातारं तारिष ऊर्जं नो देहि द्विपदे चतुष्पदे, नमः ॥८॥ ये के च ज्मा० ॥९॥ ओं मेधां मह्यमङ्गिरसो मेधां सप्तर्षयो ददुः। मेधामग्निश्च वायुश्च मेधां धाता दधातु मे, नमः ॥ मेधां मे

१ उदाहरण भूतमेवैतत् । असावित्यादि तु मन्त्रः ।

वरुणो राजा मेधामग्निर्ददातु मे । मधामिन्द्रश्च सूर्यश्च मेधां देवी सरस्वती, नमः ॥ या मेधा अप्सरस्सु गन्धर्वेषु च यन्मनः । देवी मानुषी[1] या मेधा सा मामाविशतादिह, नमः ॥ शरीरं मे विचक्षणं वाङ्मे मधु मदूदुहे । निशामितं निशामये मयि श्रुतं, नमः ॥ यन्मेऽनूक्तं तद्रमतां शकेयं यदनुब्रुवे प्रियेः[2] श्रुतस्य भूयासं, मेधया संविधीमहि अवृधमहमवृधस्त्वमसौ सौम्य प्राणस्त्वं मे गोपाय ब्रह्मणस्तदणी[3] स्थ श्रुतं मे मा प्रहासीत्, नमः ॥ छन्दोभ्यो नमः ॥ उपायनाय नमः । ये के च ज्मा० ॥१०॥ ये के च ज्मा० । छन्दोभ्यो नमः । त्रैविद्यकाय नमः ॥११॥ उपाकरणदेवताभ्यो नमः ॥१२॥ चातुर्होतृकाश्चतुर्होतॄणां देवानाम् । चितिः स्रुक्चित्तमाज्यं वाग्वेदिराधीतंबर्हिः केतो अग्निर्विज्ञातमग्निर्वाचस्पतिर्होता मन उपवक्ता प्राणो हविः सामाध्वर्युरिन्द्रं गच्छ, नमः ॥ पृथिवी होता द्यौरध्वर्युस्त्वष्टाग्निर्मित्र उपवक्ता वाचस्पते वाचो वीर्येण सम्भृततमेन

---

१ मनुष्ये । २ प्रियाः श्रुतस्य भूयास्म । ३ ब्रह्मण अणी स्थ

यद्यसे यज्ञपतये वार्यमा स्वस्करो वाचस्पतिः सोमं पिबतु जजनदिन्द्रमिन्द्रियाय, नमः,, सोमः सोमस्य पुरोगाः शुक्रः शुक्रस्य पुरोगाः । आतस्त इन्द्र सोम वातापे हवनश्रुतः, नमः ॥ अग्निर्होताश्विनाध्वर्यूरुद्रोऽग्निद्बृहस्पतिरुपवक्ता वाचस्पते हृद्विधे नामन्वाचस्पतिः सोममपादस्मासु नृम्णं धाः, नमः । सोमः सोमस्य पुरोगाः शुक्रः शुक्रस्य पुरोगाः । आतस्त इन्द्र सोम वातापे हवनश्रुतः, नमः ॥ वाग्घोता वातोऽध्वर्युर्दीक्षा पत्न्यापोऽभिगरो मनो हविस्तपसि जुहोमि वाचस्पते च्छिद्रया वाचाच्छिद्रया जुह्वा[1] दिवि देवावृधद्धोत्रा[2] मैरयस्व नमः ॥ महाहविर्होता सत्यहविरध्वर्युरचित्तपाजा अग्निदचित्तमन उपवक्तानाधृष्यश्चाप्रतिधृष्यश्चाभिगरा अयास्य उद्गाता वाचस्पते विधे नामन्विधेम ते नाम विधेस्त्वमस्माकं नाम मा देवानां तन्तुश्छेदि मा मनुष्याणां, नमः ॥ छन्दोभ्यो नमः । चातुर्होतृकाय नमः ॥ १३ ॥ [पुनः] चित्तिः

---

१ जिह्वा । २ वृधद्धोत्रा ।

स्रुक्० ॥ पृथिवी होता० ॥ अग्निर्होता० ॥ वाग्घोता० ॥ महाहविर्होता० ॥ छन्दोभ्यो नमः । अपवर्गे चातुर्होतृकाय नमः ॥१४॥ ओं ब्रह्मणे नमः । प्रजापतये नमः । घर्माय–सम्राजे नमः । सूर्याय-विभ्राजे नमः । देवेभ्यो–घर्मपेभ्यो नमः । पितृभ्यो–घर्मपेभ्यो नमः । छन्दोभ्यो नमः । प्रवर्ग्यव्रताय नमः ॥१५॥ ब्रह्मणे नमः । प्रजापतये नमः । घर्माय सम्राजे नमः । सूर्याय विभ्राजे नमः । देवेभ्यो घर्मपेभ्यो नमः । पितृभ्यो घर्मपेभ्यो नमः । छन्दोभ्यो नमः । अपवर्गे प्रवर्ग्यव्रताय नमः ॥१६॥ अग्नये नमः । वायवे नमः । सूर्याय नमः । ब्रह्मणे नमः । प्रजापतये नमः । संवत्सराय नमः । ऋतुभ्यो नमः । अरुणेभ्यः काण्वर्षिभ्यो नमः । छन्दोभ्यो नमः । अरुणव्रताय नमः ॥१७॥ अग्नये नमः । वायवे नमः । सूर्याय नमः । ब्रह्मणे नमः । प्रजापतये नमः । संवत्सराय नमः । ऋतुभ्यो नमः । अरुणेभ्यः काण्वर्षिभ्यो नमः । छन्दोभ्यो नमः । अपवर्गे अरुणव्रताय नमः ॥१८॥ अग्नये नमः । वायवे नमः ।

सूर्याय नमः । ब्रह्मणे नमः । प्रजापतये नमः । छन्दोभ्यो नमः ।
ऋषिभ्यो नमः । छन्दोभ्यो नमः । औपानिषद्व्रताय नमः ॥१९॥
आवहन्ती वितन्वाना कुर्वाणा वरमात्मनः । वासांसि मम गाव-
श्चान्नपानेन वर्धय, नमः । सुवर्णां हरिणीं लक्ष्मीं धनदामश्वपूजि-
ताम् । ततो मे श्रियमावह लोमशां पशुभिः सह, नमः ॥२०॥
आ मा यन्तु ब्रह्मचारिणो नमः । सं मा यन्तु ब्रह्मचारिणो
नमः । तपो यशोयशानि नमः । जनो यशोयशानि नमः ।
श्रेयान्वसो यशोयशानि नमः । तं त्वा भग प्रविशामि नमः ।
स मा भग प्रविश नमः । अस्मिन्सहस्रशाखे [1]अरण्यमहं त्वयि
मृजे नमः ॥ २० ॥ अग्नये नमः । वायवे नमः । सूर्याय नमः ।
ब्रह्मणे नमः । प्रजापतये नमः । छन्दोभ्यो नमः । ऋषिभ्यो
नमः । छन्दोभ्यो नमः । अपवर्गे औपनिषद्व्रताय नमः ॥२२॥
ये के च ज्मा० । गोदानव्रतदेवताभ्यो नमः ॥२३॥ ये के च ज्मा० ।

१ विभजाहं ।

छन्दोभ्यो नमः । अपवर्गे त्रैविद्यकव्रतदेवताभ्यो नमः ॥ २४ ॥ स्नातकव्रतदेवताभ्यो नमः । त्रिकाहोमदेवताभ्यो नमः । तद्विष्णोः० वासुदेवाय० । विष्णुपश्चायननदेवताभ्यो नमः ॥ इन्द्रः पर्वता बृहतारथेन० । ऐन्द्राग्नं० तावत् ॥ सावित्राणि सावित्रस्य देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे । महागणपतये कुमाराय श्रियै सरस्वत्यै लक्ष्म्यै विश्वकर्मणे द्वारदेवताभ्यः । प्रजापतये ब्रह्मणे कलशदेवताभ्यः ब्रह्मविष्णुमहेश्वरदेवताभ्यः चतुर्वेदेश्वराय सानुचराय ऋतुपतये नारायणाय । दुर्गायै त्र्यम्बकाय वरुणाय यज्ञपुरुषाय अग्निष्वात्तादिभ्यः–पितृगणदेवताभ्यः । प्रजापतये । सीमन्तकरणदेवताभ्यः । अग्नये इन्द्राय विष्णवे पुंसवनदेवताभ्यः । जातकरणदेवताभ्यः । कायप्रजापतये नामकरणदेवताभ्यः । मित्राय । सोमाय । अन्नपतये । चूडाकरणदेवताभ्यः । मेधायै सरस्वत्यै छन्दोभ्यः उपायनदेवताभ्यः । छन्दोभ्यः त्रैविद्यकव्रतदेवताभ्यः । उपाकरण-

देवताभ्यः । छन्दोभ्यः चातुर्होतृकव्रतदेवताभ्यः । छन्दोभ्यः, अपवर्गे–चातुर्होतृकव्रतदेवताभ्यः । ब्रह्मणे, प्रजापतये, घर्माय सम्राजे, सूर्याय विभ्राजे, देवेभ्यो घर्मपेभ्यः, पितृभ्यो घर्मपेभ्यः, छन्दोभ्यः, प्रवर्ग्यव्रताय । ब्रह्मणे, प्रजापतये, घर्माय–सम्राजे, सूर्याय–विभ्राजे, देवेभ्यो–घर्मपेभ्यः, पितृभ्यो–घर्मपेभ्यः, छन्दोभ्यः अपवर्गे–प्रवर्ग्यव्रताय । अग्नये वायवे सूर्याय ब्रह्मणे प्रजापतये संवत्सराय ऋतुभ्यः अरुणेभ्यः काण्वर्षिभ्यः छन्दोभ्यः अरुणव्रताय । अग्नये वायवे सूर्याय ब्रह्मणे प्रजापतये संवत्सराय ऋतुभ्यः अरुणेभ्यः–काण्वर्षिभ्यः छन्दोभ्यः अपवर्गे–अरुणव्रताय । अग्नये वायवे सूर्याय ब्रह्मणे प्रजापतये छन्दोभ्यः ऋषिभ्यः छन्दोभ्यः औपनिषदव्रताय । श्रियै–श्रीकामदेवताभ्यः । यशसे–यशस्कामदेवताभ्यः । अग्नये वायवे सूर्याय ब्रह्मणे प्रजापतये छन्दोभ्यः ऋषिभ्यः छन्दोभ्यः अपवर्गे औपनिषदव्रताय । गोदानव्रतदेवताभ्यः । छन्दोभ्यः अपवर्गे

त्रैविद्यकव्रतदेवताभ्यः स्नातकव्रतदेवताभ्यः । त्रिकाहोमदेवताभ्यः । वासुदेवादिभ्यो विष्णुपञ्चायतनदेवताभ्यः । अभयंकरीदेव्यै क्षेमंकरीभवान्यै सर्वशत्रुघातिन्यै इहराष्ट्राधिपतये अमुकभैरवाय । इन्द्राय वज्रहस्ताय अग्नये शक्तिहस्ताय यमाय दण्डहस्ताय निर्ऋतये खड्गहस्ताय वरुणाय पाशहस्ताय वायवे ध्वजहस्ताय कुबेराय गदाहस्ताय ईशानाय त्रिशूलहस्ताय ब्रह्मणे पद्महस्ताय विष्णवे चक्रहस्ताय अनन्तादिभ्योऽष्टाभ्यः कुलनागदेवताभ्यः । अग्न्यादित्याभ्यां वरुणचन्द्रमोभ्यां कुमारभौमाभ्यां विष्णुबुधाभ्यां इन्द्राबृहस्पतिभ्यां सरस्वतीशुक्राभ्यां प्रजापतिशनैश्चराभ्यां, गणपतिराहुभ्यां, रुद्रकेतुभ्यां, ब्रह्मध्रुवाभ्यां, अनन्तागस्त्याभ्यां, ब्रह्मणे, कूर्माय, ध्रुवाय, अनन्ताय हरये, लक्ष्म्यै, कमलायै, शिख्यादिभ्यः पञ्चचत्वारिंशद्वास्तोष्पतियागदेवताभ्यः, ब्राह्म्यादिभ्यो मातृभ्यः, गौर्यादिभ्यो मातृभ्यः, ललितादिभ्यो मातृभ्यः, दुर्गाक्षेत्रगणेश्वरदेवताभ्यः, राकादेवता-

भ्यः, त्रिकादेवताभ्यः, सिनीवालीदेवताभ्यः, यामीदेवताभ्यः, रौद्रीदेवताभ्यः, वारुणीदेवताभ्यः, बार्हस्पत्यदेवताभ्यः, ॐभूदेताभ्यः, ॐभुवोदेवताभ्यः, ॐस्वर्देवताभ्यः, ॐभूर्भुवःस्वर्देवताभ्यः, अखण्डब्रह्माण्डयागदेवताभ्यः, धूर्भ्यः, उपधूर्भ्यः, महागायत्र्यै, सावित्र्यै, सरस्वत्यै, हेरुकादिभ्यो वटुकादिभ्यः तण्डुलमात्रं दधि मधुपर्कं ॐनमो नैवेद्यं निवेदयामि नमः ॥ हिरण्यगर्भः० । यः प्राणतो० । य ओजोदा० । येन द्यौ० । य इमे द्यावा० । यस्येमे विश्वे० । आपो ह यन्० । आ नः प्रजाम्० । अर्चन्तस्त्वा० ॥

यजमानमानीय । आसनशोधनंकुर्यात् । शुक्लाम्बरधरं० । बिभ्रद्दक्षिण० । सुमुखश्चैकदन्तश्च० । गुरुर्ब्रह्मा० । गन्धर्वैः सहचारिणीं स्तुतिकथालापैर्नुतां तारिणीं वेदानां जननीं द्विजैः स्तुतिपरैः सूर्योदये वीक्षिताम् । सिंहस्थां सुरसेवितां वटुक्रियां सप्त-

स्वरैर्भूषितामोङ्कारेण विराजितां त्रिनयनां तां मेखलां नौम्यहम् ॥

अ नाभौ० । अपसर्पन्तु० । तीर्थे स्नेयं० ! वसोः पवित्र०। (शकुनानयनम् ।) आ ब्रह्मन्० । यदाबध्नन् । परमात्मने० । स्वप्रकाशो० । वनस्पति० । नमो धर्म० । यत्रास्ति माता० । अद्य तावत्० । महागणपतये० । प्रजापतये० हेरुकादिभ्यो वटु० सुतस्य सुतयोः सुतानां वा मौञ्जीबन्धननिमित्तं धूपदीपसङ्कल्पात्तिसिद्धिरस्तु धूपो नमः दीपो नमः ॥ "अपसव्येन" । नमः पितृभ्यः० । देवताभ्यः० ॐतत्सद्ब्रह्माद्यतावत्० पित्रे इत्यादि, समस्तमातापितृभ्यो० धूपः स्वधा दीपः स्वधा ॥ "सव्येन"। गायत्र्यै नमः ॐभूर्भुवःस्वः० ३ । अद्य तावत्० । महागणपतेः कुमारस्य श्रियः सरस्वत्याः लक्ष्म्याः विश्वकर्मणः द्वारदेवतानां प्रजापतेः ब्रह्मणः कलशदेवतानां ब्रह्मविष्णुमहेश्वरदेवतानां चतुर्वेदेश्वरस्य सानुचरस्य ऋतुपतेर्नारायणस्य दुर्गायाः त्र्यम्बकस्य वरुणस्य यज्ञपुरुषस्य अग्निष्वात्तादीनां पितृगणदेवतानां । प्रजापतेः। समिन्त-

करणदेवतानां । अग्नेः इन्द्रस्य विष्णोः पुंसवनदेवतानां । जातकरणदेवतानां। कस्य प्रजापतेः नामकरणदेवतानां । मित्रस्य । सोमस्य । अन्नपतेः । चूडाकरणदेवतानां । मेधायाः सरस्वत्याः छन्दसां उपायनदेवतानां । छन्दसां त्रैविद्यकव्रतदेवतानां । उपाकरणव्रतदेवतानां । छन्दसां चातुर्होतृकव्रतदेवतानां । छन्दसां अपवर्गे-चातुर्होतृकव्रतदेवतानां । ब्रह्मणः प्रजापतेः घर्मस्य संम्राजः सूर्यस्य विभ्राजः देवानां-घर्मपाणां पितृणां-घर्मपाणां छन्दसां प्रवर्ग्यव्रतदेवतानां । ब्रह्मणः प्रजापतेः घर्मस्य-सम्राजः सूर्यस्य-विभ्राजः देवानां-घर्मपाणां पितृणां-घर्मपाणां छन्दसां अपवर्गे-प्रवर्ग्यव्रतदेवतानां । अग्नेः वायोः सूर्यस्य ब्रह्मणः प्रजापतेः संवत्सरस्य ऋतूनां अरुणानां-काण्डवर्षीणां छन्दसां अरुणव्रतदेवतानां । अग्नेः वायोः सूर्यस्य ब्रह्मणः प्रजापतेः संवत्सरस्य ऋतूनां अरुणानां-काण्डवर्षीणां छन्दसां अपवर्गे-अरुणव्रतदेवतानां । अग्नेः वायोः सूर्यस्य ब्रह्मणः प्रजापतेः छन्दसां ऋषीणां छन्दसां औप-

निषद्व्रतदेवतानां । श्रियः श्रीकामदेवतानां । यशसः यशस्कामदेवतानां । अग्नेः वायोः सूर्यस्य ब्रह्मणः प्रजापतेः छन्दसां ऋषीणां छन्दसां अपवर्गे–औपनिषदव्रतदेवतानां । गोदानव्रतदेवतानां । छन्दसां अपवर्गे–त्रैविद्यकव्रतदेवतानां । स्नातकव्रतदेवतानां । त्रिकाहोमदेवतानां वासुदेवादीनां विष्णुपञ्चायतनदेवतानां । अभयङ्करीदेव्याः क्षेमंकरीभवान्याः सर्वशत्रुघातिन्याः । इहराष्ट्राधिपतेः अमुकभैरवस्य । इन्द्रस्य वज्रहस्तस्य अग्नेः शक्तिहस्तस्य यमस्य दण्डहस्तस्य निर्ऋतेः खड्गहस्तस्य वरुणस्य पाशहस्तस्य वायोः ध्वजहस्तस्य कुबेरस्य गदाहस्तस्य ईशानस्य त्रिशूलहस्तस्य ब्रह्मणः पद्महस्तस्य विष्णोश्चक्रहस्तस्य अनन्तादीनां अष्टानां कुलनागदेवतानां अग्न्यादित्ययोः वरुणचन्द्रमसोः कुमारभौमयोः विष्णुबुधयोः इन्द्राबृहस्पत्योः सरस्वतीशुक्रयोः प्रजापतिशनैश्चरयोः गणपतिराह्वोः रुद्रकेत्वोः ब्रह्मध्रुवयोः अनन्तागस्त्ययोः । ब्रह्मणः कूर्मस्य ध्रुवस्य अनन्तस्य हरेः लक्ष्म्याः कमलायाः शिख्यादीनां

पञ्चचत्वारिंशद्वास्तोष्पतियागदेवतानां ब्राह्म्यादीनां मातॄणां गौर्यादीनां मातॄणां ललितादीनां मातॄणां दुर्गाक्षेत्रगणेश्वरदेवतानां राकादेवतानां त्रिकादेवतानां सिनीवालीदेवतानां यामीदेवतानां रौद्रीदेवतानां वारुणीदेवतानां बार्हस्पत्यदेवतानां । ओंभूदेवतानां ओंभुवोदेवतानां ओंस्वर्देवतानां ओंभूर्भुवःस्वर्देवतानां अखण्ड-ब्रह्माण्डयागदेवतानां धुरां उपधुरां महागायत्र्याः सावित्र्याः सरस्वत्याः हेरुकादीनां वटुकादीनां आत्मनो वाक्य० सुतस्य सुतयोः सुतानां वा मौञ्जीबन्धननिमित्तं अर्चामहं करिष्ये ओंकुरुष्व ॥ तिलसर्षपयवान्विकीर्य । एवमेव । महागणपतेरिदमासनं नमः कुमारस्य० । हेरुकादीनां० इदमासनं नमः ॥ महागणपतये० । हेरुकादिभ्यो० । युष्मान् पूजयामि ओंपूजय । महागणपतिं कुमारं श्रियं सरस्वतीं लक्ष्मीं विश्वकर्माणं द्वारदेवताः प्रजापतिं ब्रह्माणं कलशदेवताः ब्रह्मविष्णुमहेश्वरदेवताः चतुर्वेदेश्वरं सानुचरं ऋतुपतिं नारायणं दुर्गां त्र्यम्बकं वरुणं यज्ञपुरुषं अग्निष्वा-

त्तादीन् पितृगणदेवताः । प्रजापतिं सीमन्तकरणदेवताः । अग्निं इन्द्रं विष्णुं पुंसवनदेवताः । जातकरणदेवताः । कं प्रजापतिं नामकरणदेवताः । मित्रं सोमं । अन्नपतिं । चूडाकरणदेवताः । मेधां सरस्वतीं छन्दांसि उपायनदेवताः । छन्दांसि त्रैविद्यकव्रतदेवताः । उपाकरणव्रतदेवताः । छन्दांसि चातुर्होतृकव्रतदेवताः । छन्दांसि अपवर्गे चातुर्होतृकव्रतदेवताः । ब्रह्माणं प्रजापतिं घर्मं सम्राजं सूर्यं विभ्राजं देवान् घर्मपान् पितॄन् घर्मपान् छन्दांसि प्रवर्ग्यव्रतदेवताः । ब्रह्माणं प्रजामतिं घर्मं सम्राजं सूर्यं विभ्राजं देवान् घर्मपान् पितॄन् घर्मपान् छन्दांसि अपवर्गे प्रवर्ग्यव्रतदेवताः । अग्निं वायुं सूर्यं ब्रह्माणं प्रजापतिं संवत्सरं ऋतून् अरुणान् काण्वर्षीन् छन्दांसि अरुणव्रतदेवताः । अग्निं वायुं सूर्यं ब्रह्माणं प्रजापतिं संवत्सरं ऋतून् अरुणान् काण्वर्षीन् छन्दांसि अपवर्गे अरुणव्रतदेवताः । अग्निं वायुं सूर्यं ब्रह्माणं प्रजापतिं छन्दांसि ऋषीन् छन्दांसि औपनिषदव्रतदेवताः । श्रियं श्रीकामदेवताः

यशसं यशस्कामदेवताः । अग्निं वायुं सूर्यं ब्रह्माणं प्रजापतिं छन्दांसि ऋषीन् छन्दांसि अपवर्गे औपनिषदव्रतदेवताः । गोदानव्रतदेवताः । छन्दांसि अपवर्गे त्रैविद्यकव्रतदेवताः स्नातकव्रतदेवताः त्रिकाहोमदेवताः । वासुदेवादीन् विष्णुपञ्चायतनदेवताः । अभयङ्करीदेवीं क्षेमङ्करीभवानीं सर्वशत्रुघातिनीं इहराष्ट्राधिपतिं अमुकभैरवं । इन्द्रं वज्रहस्तं अग्निं शक्तिहस्तं यमं दण्डहस्तं निर्ऋतिं खड्गहस्तं वरुणं पाशहस्तं वायुं ध्वजहस्तं कुवरं गदाहस्तं ईशानं त्रिशूलहस्तं ब्रह्माणं पद्महस्तं विष्णुं चक्रहस्तं अनन्तादीन् अष्टौ कुलनागदेवताः । अग्न्यादित्यौ वरुणचन्द्रमसौ कुमारभौमौ विष्णुबुधौ इन्द्राबृहस्पती सरस्वतीशुक्रौ प्रजापतिशनैश्चरौ गणपतिराहू रुद्रकेतू ब्रह्मध्रुवौ अनन्तागस्त्यौ ब्रह्माणं कूर्मं ध्रुवं अनन्तं हरिं लक्ष्मीं कमलां शिख्यादीन् पञ्चचत्वारिंशद्वास्तोष्पतियागदेवताः ब्राह्म्यादीः मातॄः गौर्यादीः मातॄः ललितादीः मातॄः दुर्गाक्षेत्रगणेश्वरदेवताः राकादेवताः त्रिकादेव०

सिनीवालीदे० यामीदे० रौद्रीदे० वारुणीदे० बार्हस्पत्य० ओंभूदे ओंभुवोदे० ओंस्वर्दे० ओंभूर्भुवःस्वर्दे० अखण्डब्रह्माण्डयागदे० धुरः उपधुरः महागायत्रीं सावित्रीं सरस्वतीं हेरुकादीन् वटुकादीन् आवाहयिष्यामि ओंआवाहय ॥ यवान्विकीर्य । पाद्यार्थमुदकं नमः । शन्नो देवी० । लाजाश्च० । महागणपतये० । हेरुकादिभ्यो० । वटुकादिभ्यः पाद्यं नमः ॥ शेषं निवार्य । [पुनः] शन्नो देवी० । आपः क्षीरं० । महागणपते कुमार श्रीः सरस्वति लक्ष्मि विश्वकर्मन् द्वारदेवताः प्रजापते ब्रह्मन् कलशदेवताः । ब्रह्मविष्णुमहेश्वरदेवताः चतुर्वेदेश्वर सानुचर ऋतुपते नारायण दुर्गे त्र्यम्बक वरुण यज्ञपुरुष अग्निष्वात्तादयः पितृगणदेवताः । प्रजापते । सीमन्तकरणदेवताः । अग्ने इन्द्र विष्णो पुंसवनदेवताः । जातकरणदेवताः । क प्रजापते नामकरणदेवताः । मित्र । सोम । अन्नपते । चूडाकरणदेवताः । मेधे सरस्वति छन्दांसि उपायनदेवताः । छन्दांसि त्रैविद्यकव्रतदेवताः । उपाकरणव्रतदेवताः । छन्दांसि चातुर्हो-

तृकव्रतदेवताः । छन्दांसि अपवर्गे चातुर्होतृकव्रतदेवताः । ब्रह्मन् प्रजापते घर्म सम्राट् सूर्य विभ्राट् देवाः घर्मपाः पितरः घर्मपाः छन्दांसि प्रवर्ग्यव्रतदेवताः । ब्रह्मन् प्रजापते घर्म सम्राट् सूर्य विभ्राट् देवाः घर्मपाः पितरः घर्मपाः छन्दांसि अपवर्गे प्रवर्ग्य-व्रतदेवताः । अग्ने वायो सूर्य ब्रह्मन् प्रजापते संवत्सर ऋतवः अरुणाः काण्वर्षयः छन्दांसि अरुणव्रतदेवताः । अग्ने वायो सूर्य ब्रह्मन् प्रजापते संवत्सर ऋतवः अरुणाः काण्वर्षयः छन्दांसि अपवर्गे अरुणव्रतदेवताः । अग्ने वायो सूर्य ब्रह्मन् प्रजापते छन्दांसि ऋषयः छन्दांसि औपनिषद्व्रतदेवताः । श्रीः श्रीकामदेवताः । यशः यशस्कामदेवताः । अग्ने वायो सूर्य ब्रह्मन् प्रजापते छन्दांसि ऋषयः छन्दांसि अपवर्गे औपनिषद्व्रतदेवताः । गोदानव्रतदेवताः । छन्दांसि अपवर्गे त्रैविद्यकव्रतदेवताः । स्नातकव्रतदेवताः, त्रिकाहोमदेवताः । वासुदेवादयः विष्णुपञ्चायतन-देवताः । अभयङ्करीदेवि क्षेमङ्करीभवानि सर्वशत्रुघातिनि इह-

राष्ट्राधिपते अमुकभैरव । इन्द्र वज्रहस्त अग्ने शक्तिहस्त यम दण्डहस्त निर्ऋते खड्गहस्त वरुण पाशहस्त वायो ध्वजहस्त कुबेर गदाहस्त ईशान त्रिशूलहस्त ब्रह्मन् पद्महस्त विष्णो चक्रहस्त अनन्तादयोऽष्टौकुलनागदेवताः अर्कादित्यौ वरुणचन्द्रमसौ कुमारभौमौ विष्णुबुधौ इन्द्राबृहस्पती सरस्वतीशुक्रौ प्रजापतिशनैश्चरौ गणपतिराहू रुद्रकेतू ब्रह्मध्रुवौ अनन्तागस्त्यौ ब्रह्मन् कूर्म ध्रुव अनन्त हरे लक्ष्मि कमले शिख्यादयः पञ्चचत्वारिंशद्वास्तोष्पतियागदेवताः । ब्राह्म्यादयो मातरः गौर्यादयो मातरः ललितादयो मातरः दुर्गाक्षेत्रगणेश्वरदेवताः राकादे० त्रिकादे० सिनीवालीदे० यामीदे० रौद्रीदे० वारुणीदे० बार्हस्पत्यदे० । ओंभूदे० ओभुवोदे० ओंस्वर्दे० ओंभूर्भुवःस्वर्दे० अखण्डब्रह्माण्डयागदेवताः धुरः उपधुरः महागायत्रि सावित्रि सरस्वति हेरुकादयो वटुकादयः इदं वोऽर्घ्यं नमः । महागणपतये समालभनं गन्धो नमः ॥ एवमर्घो नमः पुष्पं नमः ॥ धूरसीति धूपः । तेजोऽसीति रत्नदीपः ।

चामरं, छत्रमादर्शादि । एताभ्यो गणपति कलशयागदेवताभ्यो धूपदीपसंकल्पात्सिद्धिरस्तु धूपो नमः दीपो नमः । एताभ्योदेवताभ्यो वासो नमः इत्यादि सर्वं । अन्नं नमः २ इत्यादि । शन्नो देवी० एताभ्यो देव० ॥ अपो० ॥ शन्नो० ॥ दक्षिणा० । एतादेवताः० ॥ तद्विष्णोः० ॥ इति । मुक्ताविद्रुम० इति च पुष्पम् ॥

अथाग्निकर्म । पात्रं तिला० । निर्दग्धं रक्षो० । अग्निं परिसमुह्य पर्युक्ष्य परिषिच्य ६ आदौ पञ्च० । १६

अथाग्निकुण्डपूजा । (वेदेरावाहनं) आगच्छ वरदे ज्ञानमुद्रे यज्ञैर्विभूषिते । वेदि वेदमयैर्मन्त्रैः संस्कृते ते नमो नमः ॥ त्वामाश्रित्य स्थिता देवा घृताहुतिं पिबन्ति ये । ते देवास्तुष्टिमायान्तु मा विघ्नो यज्ञकर्मणि ॥ (अथाञ्जलिः) संमुखा तिष्ठ वेदि त्वं यथा स्थास्यन्ति देवताः । स्थानभूता शिवादीनां शक्तीनां सुरपूजिते । ब्रह्माज्ञयाद्य मे यज्ञं सफलीकर्तुमर्हसि ॥ देवस्य त्वे ति मंत्रेण यज्ञवेदिमुपस्पृशेत्—देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां

पूष्णो हस्ताभ्यामाददे । आदित्यमणे नमः । अनुमतिमणे नमः । सरस्वतिमणे नमः (वेद्यै यज्ञाङ्गायै इति नामभ्याम्) गन्धपुष्पाद्यर्पणम् ॥ (गणपतयेऽक्षोटं ज्वालालिङ्गे श्रीफलं च संस्थाप्य) संञ्वः सृजामि० । अश्विनोः प्राण० इति जीवाधानम् ॥ ओं गायत्र्यै नमः ३ । तत्पुरुषाय विद्महे वक्रतुण्डायधी० तन्नो दन्ती प्र० ३ । तत्पुरुषाय वि० महादेवायधी० तन्नो रुद्रः प्र० ३ ॥ वैश्वानराय विद्महे सप्तार्चिषे धी० तन्नोऽग्निः प्र० ३ । पावकाय विद्महे हेलालीलाय धी० तन्नोऽग्निः प्र० ३ ॥ अद्य तावत्ति० विनायकस्य चतुर्विंशतितत्त्वानां, भवस्य देवस्य, ८ । (पूर्वे) देवमुखस्य (आग्नेये) सप्तजिह्वस्य (दक्षिणे) वैश्वानरस्य (नैर्ऋते) जातवेदसः (पश्चिमे) अग्नेः (वायवे) हुताशनस्य (उत्तरे) हुतवाहनस्य (ईशाने) कृष्णवर्त्मनः (मध्ये) अग्नेः सहस्राक्षस्य शतमूर्ध्नः शतं ते प्राणाः सहस्रं व्यानाः शतं ते तेजः (ऊर्ध्वे) ब्रह्मविष्णुमहेश्वरदेवतानां काल्याः कराल्याः मनोजवायाः सुलोहितायाः धूम्रायाः स्फुलिंगिन्याः सुमनसायाः

विश्वचर्याः ब्रह्माण्डव्यापिन्याः ज्वालालिङ्गतेजसः धूम्रवर्णायाः नीलवर्णायाः कपिलायाः विस्फुलिङ्गिन्याः ज्वालायाः तेजोवत्याः हव्यवाहनायाः कव्यवाहनायाः रौद्र्याः संहारिण्याः तापिन्याः पाचिन्याः । सप्तजिह्वासहितस्य पावकस्य ब्रह्माण्डव्यापकतेजोमयपरमशिवज्वालालिङ्गदेवतानां (१स्रुवमूले) सोमस्य शुक्रस्य अग्नेः (मध्ये) महेश्वरस्य (मूर्ध्नि) ब्रह्मणः । (स्रुचोमूले) अपां (मध्ये) भास्करस्य (रन्ध्रयोः) गौर्याः दुर्गायाः कात्यायन्याः मह्याः स्रुक्स्रुवदेवतानां आत्मनो० सुतस्य सुतयोः सुतानां वा मौञ्जीबन्धननिमित्तमर्चामहं करिष्ये ॐ कुरुष्व ॥ एवमेवासनं ॥ विनायकाय० चतुर्विंशतितत्त्वेभ्यः, भवायदेवाय, ८ पूर्वे देवमुखाय आग्नेये सप्तजिह्वाय दक्षिणे वैश्वानराय नैरृते जातवेदसे पश्चिमे

१ सोम शुक्रौ तथा ह्यग्निं स्रुवमूले प्रपूजयेत् । मध्ये महेश्वरश्चैव ब्रह्मा मूर्ध्नि व्यवस्थितः ॥ स्रुचि च पूजिता ह्यापो मध्ये भास्कर पूजनम् । रन्ध्रद्वये ऽर्चयेद्गौरीं दुर्गां कात्यायनीं महीम् ॥ एते देवाः प्रपूज्यन्ते होमेषु फलदायकाः ॥

अग्नये वायव्ये हुताशनाय उत्तरे हुतवाहनाय ईशाने कृष्णवर्त्मने मध्ये अग्नये सहस्राक्षाय शतमूर्ध्ने शतं ते प्राणाः सहस्रं व्यानाः शतं ते तेजः ऊर्ध्वे ब्रह्मविष्णुमहेश्वरदेवताभ्यः काल्यै कराल्यै मनोजवायै सुलोहितायै धूम्रायै स्फुलिङ्गिन्यै सुमनसायै विश्वचर्यै ब्रह्माण्डव्यापिन्यै ज्वालालिङ्गतेजसे धूम्रवर्णायै नीलवर्णायै कपिलायै विस्फुलिङ्गिन्यै ज्वालायै तेजोवत्यै हव्यवाहनायै कव्यवाहनायै रौद्र्यै संहारिण्यै तापिन्यै पाचिन्यै । सप्तजिह्वासहिताय पावकाय ब्रह्माण्डव्यापकतेजोमयपरमशिवज्वालालिङ्गदेवताभ्यः । सोमाय शुक्राय अग्नये महेश्वराय ब्रह्मणे । अद्भ्यः भास्कराय गौर्यै दुर्गायै कात्यायन्यै मह्यै स्रुक्स्रुवदेवताभ्यः युष्मान् पूजयामि ॐ पूजय । विनायकं चतुर्विंशतितत्त्वानि, भवंदेवं ८। (पूर्वे) देवमुखं (आग्नेये) सप्तजिह्वं (दक्षिणे) वैश्वानरं (नैर्ऋते) जातवेदसं (पश्चिमे) अग्निं (वायव्ये) हुताशनं (उत्तरे) हुतवाहनं (ईशाने) कृष्णवर्त्मानं (मध्ये) अग्निं सहस्राक्षं शतमूर्धानं

शतं ते प्राणाः सहस्रं व्यानाः शतं ते तेजः [ऊर्ध्वे] ब्रह्मविष्णुमहेश्वरदेवताः कालीं करालीं मनोजवां सुलोहितां धूम्रां स्फुलिङ्गिनीं सुमनसां विश्वचरीं ब्रह्माण्डव्यापिनीं ज्वालालिङ्गतेजसं धूम्रवर्णां नीलवर्णां कपिलां विस्फुलिङ्गिनीं ज्वालां तेजोवतीं हव्यवाहनां कव्यवाहनां रौद्रीं संहारिणीं तापिनीं पाचिनीं सप्तजिह्वासहितं पावकं ब्रह्माण्डव्यापकतेजोमयपरमशिवज्वालालिङ्गदेवताः सोमं शुक्रं अग्निं महेश्वरं ब्रह्माणं । अपः भास्करं गौरीं दुर्गां कात्यायनीं महीं स्रुक्स्रुवदेवताः आवाहयिष्यामि ॐमावाहय ॥ आवाहयाम्यहं देवं गणेशं सुरपूजितम् । सदैव विघ्नहर्तारं सर्वकामफलप्रदम् ॥ रक्तवर्णो महातेजा रक्तस्रग्दामभूषितः । बलिः पुष्पं चरुश्चैव धूपोयं प्रतिगृह्यताम् ॥ [ज्वालालिङ्गे] आवाहयामि वृषभासनमीश्वरं तं गौरीपतिं सकलभीतिहरं सुरेशम् । चर्माम्बरं दशभुजं च त्रिशूलहस्तं ज्वालैर्विभूषिततनुं मखरक्षणार्थम् ॥ अग्नौ अग्निं स्वाहासमेतं दितिजसुरनुतं रक्तवर्णं त्रिनेत्रं

कण्ठे हारं भुजाभ्यां वरमभयमथो दक्षिणाभ्यां वहन्तम् । वामाभ्यामक्षमालाममृतकलशकं रम्यहासं सुवेषं नानालङ्कारयुक्तं मृगवरसहितं त्वाह्वये होमकाले ॥ आवाहयामि दहनं धृतवेदसुद्रं साक्षस्रजं शुकगतिं निजदक्षहस्ते । वामेऽग्निकुण्डसहितं च तथा सशक्तिं त्र्यक्षंत्रिलोचनपरं मखरक्षणार्थम् ॥ आवाहयाम्यहं देवं देवदेवं हुताशनम् । जगतोऽस्य समुत्पत्तिस्थितिसंहारकारकम् ॥ देवमूर्तिं तु दातारं सर्वदेवमुखं प्रभुम् । पिङ्गाक्षं पिङ्गजटं धूमकेतुं विभावसुम् ॥ शुकयानगतं देवं सर्वाभरणभूषितम् । सर्वदा वरदातारं जठरस्थं च देहिनाम् ॥ तेजोमूर्ति—दुराधर्षं सप्तजिह्वं महाबलम् । सप्तर्षिसप्तहोतारं समित्सप्तकमच्युतम् । विष्णुजांशकनिर्देशं भानुं वै जातवेदसम् ॥ पावकं पुष्टिदं सौम्यं भक्तानां भूतिवर्धनम् । याजकं यजमानं च पुष्ट्या विभज सर्वशः । इदमर्घ्यमिदं पाद्यं धूपोऽयं प्रतिगृह्यताम् ॥ [स्रुवस्रुचोरावाहनम्] ॥ आवाहम्यहं देवं स्रुवं च विधिपूजितम् । स्वाहाकार-

स्वधाकार वषट्कारसमन्वितम् ॥ अष्टाङ्गुलं त्यजेन्मूलमग्रे त्यक्त्वा दशाङ्गुलम् । कर्तव्यं गोपदाकारं दण्डस्याग्रे तु कङ्कणम् ॥ विष्णुस्थानं च गृह्णीयादाहवनीये च हुताशने । पद्मयोनिं समादाय होता च सुखमाप्नुयात् ॥ अथादित्यादि सोमादि देवस्थितिप्रदाविमौ । आवाहयामि स्रुक्स्रुवौ यज्ञसाफल्यहेतवे ॥ भगवन्पुण्डरीकाक्ष० । यवान्विकीर्य । शन्नो देवी० । लाजाश्च० विनायकाय० इत्यादि । पाद्यं नमः । [पुनः] शन्नो देवी० । आपः क्षीरं० । विनायक चतुर्विंशतितत्त्वानि भवदेव ८ । पूर्वे देवमुख आग्नेये सप्तजिह्व दक्षिणे वैश्वानर नैर्ऋते जातवेदः पश्चिमे अग्ने वायव्ये हुताशन उत्तरे हुतवाहन ईशाने कृष्णवर्त्मन् मध्ये अग्ने सहस्राक्ष शतमूर्धन् शतं ते प्राणाः सहस्रं व्यानाः शतं ते तेजः ऊर्ध्वे ब्रह्मविष्णुमहेश्वरदेवताः कालि करालि मनोजवे सुलोहिते धूम्रे स्फुलिङ्गिनि सुमनसे विश्वचरि ब्रह्माण्डव्यापिनि ज्वालालिङ्गतेजः धूम्रवर्णे नीलवर्णे कपिले विस्फुलिङ्गिनि ज्वाले तेजोवति हव्य-

वाहने कव्यवाहने रौद्रि संहारिणि तापिनि पार्थिनि सप्तजिह्वा-
सहित पावक ब्रह्माण्डव्यापकतेजोमयपरमशिवज्वालालिङ्गदेवताः
सोम शुक्र अग्ने महेश्वर ब्रह्मन् आपः भास्कर गौरि दुर्गे कात्या-
यनि महि स्रुक्स्रुवदेवताः इदं वोर्घ्यं नमः । विनायकाय चतुर्विंश०
समालभनं गन्धो नमः ॥ एवं विनायकाय चतुर्विंशतितत्त्वेभ्यः ।
भवायदेवाय ८ । पूर्वे देवमुखायेत्यादिसर्वनामानि । पृथिवीतत्त्वाय
अप्तत्त्वाय तेजस्तत्त्वाय वायुत० आकाशत० ॥ शब्दतत्त्वाय आका-
शतन्मात्राय । स्पर्शतत्त्वाय वायुतन्मात्राय । रूपतत्त्वाय तेज-
स्तन्मात्राय । रसतत्त्वाय अप्तन्मात्राय । गन्धतत्त्वाय पृथिवीतन्मा-
त्राय । वाक्तत्त्वाय पाणित० पादत० पायुत० उपस्थतत्त्वाय ।
प्राणाय अपानाय समानाय उदानाय व्यानाय नागाय कूर्माय
कृकराय देवदत्ताय धनञ्जयाय मनसे बुद्ध्यै अहंकाराय प्रकृति-
पुरुषाभ्यां नमः । पृथिव्यप्तेजोवाय्वाकाशेभ्यः पञ्चभूतेभ्यो नमः ।
शब्दस्पर्शरूपरसगन्धेभ्यः पञ्चतन्मात्रेभ्यो नमः । वाक्पाणि-

पादपाय्यूपस्थेभ्यः पञ्चकर्मेन्द्रियेभ्यो नमः । श्रोत्रत्वक् चक्षुर्जिह्वाघ्राणेभ्यः पञ्चधीन्द्रियेभ्यो नमः । मनोबुद्ध्यहङ्कारेभ्यो नमः । प्रकृतिपुरुषाभ्यां नमः । सप्तजिह्वासहिताय वैश्वानराय ब्रह्माण्डव्यापकाय तेजोमयाय परमशिवाय अर्घो नमः पुष्पं नमः ॥

अथ स्रुवस्रुचोः पुष्पपूजा– सोमो धेनुं सोमो अर्वन्तमाशुं सोमो वीरं कर्मण्यं ददाति । सादन्यं विदथ्यं सभेयं पितृश्रवणं यो ददाश तस्मै ॥ सोमाय नमः। अन्नात्परिस्रुतो रसँ ब्रह्मणा व्यपिबत्क्षत्रम् । अनेन सत्यमिन्द्रियं विपानँ शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृत मधु । शुक्राय नमः ॥ अग्निः सप्तिं वाजम्भरं ददात्यग्निर्वीरं श्रुत्यं कर्मनिष्ठम् । अग्नी रोदसी विचरत्समञ्जन्नग्निर्नारीं वीरकुक्षिं पुरन्धिम् । अग्नये नमः ॥ इति स्रुवमूले ॥ ईशानं त्वा शुश्रुमा वयं धनानां धनपते गोमदग्ने अश्ववद्भूरिपुष्टं हिरण्यवदन्नवद्धेहि मह्यम् । महेश्वराय नमः ॥ इति मध्ये । ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगा-

णाम् । श्येनो गृध्राणाँ स्वधितिर्वनानाँ सोमः पवित्रमत्येति रेभन् । ब्रह्मणे नमः इति शिरसि ॥

अथ स्रुचो मूले– आपः पृणीत भेषजं वरूथं तन्वो मम ज्योक् च सूर्यं दृशे । अद्भयो नमः [वरुणाय नमः] ॥ चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः । आप्रा द्यावापृथिवी अन्तरिक्षँ सूर्य आत्मा जगतस्तस्थुषश्च । भास्कराय नमः इति मध्ये ॥ रन्ध्रद्वये, इन्द्रं कुत्सो वृत्रहणं शचीपतिं काटे निबाळ ऋषिरह्वदूतये । रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन ॥ इन्द्रं मित्रं वरुणमग्निमूतये मारुतं शर्धो अदितिं हवामहे । रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन ॥ सरस्वतीं देवयन्तो हवन्ते सरस्वतीमध्वरे तायमाने । सरस्वतीं सुकृतो अह्वयन्ते सरस्वती दाशुषेवार्यान्दात् ॥ मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम् । पिपृतान्नो भरीमभिः । गौर्यै नमः दुर्गायै नमः कात्यायन्यै नमः

मध्यै नमः स्रुक्स्रुवदेवताभ्यः अर्घो नमः पुष्पं नमः ॥ एताभ्यो-ऽग्निकुण्डज्वालालिङ्ग स्रुक्स्रुवदेवताभ्यो धूपो नमः दीपो नमः वासो० स्रुक्स्रुवयोः कङ्कणं । एवं दक्षिणान्तं । नैवेद्यं ॥

अथ स्रुक्स्रुवप्रतिपादनम । सावित्राणि सावित्रस्य देवस्य त्वा स० अद्य० आत्मनो० यज्ञसाफल्यद्वारा सर्वात्मकविष्णुप्रीत्यर्थं ब्राह्मणाय स्रुक्स्रुवौ प्रतिपादयामि ३ प्रतिगृह्णामि ३ ॥ त्रातार-मिन्द्रमवितारमिन्द्रं हवे हवे सुहवं शूरमिन्द्रम् । ह्वयामि शक्रं पुरुहूतमिन्द्रं स्वस्ति नो मघवा धात्विन्द्रः । १ । इन्द्रं कुत्सो वृत्र-हणं शचीपतिं काटे निबाढ ऋषिरह्वदूतये । रथं न दुर्गाद्वसवः सदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन । २ । चितिः स्रुक्चि-त्तमाज्यं वाग्वेदिराधीतं बर्हिः । केतोरग्निर्विज्ञातमग्निर्वाचस्पति-र्होता मन उपवक्ता प्राणो हविः सामाऽध्वर्युरिन्द्रं गच्छ नमः ३ स्रुवं दक्षिणहस्तस्थं ब्राह्मणदक्षिणहस्ते प्रतिपादयेत् । कया न श्चित्र आभुवदूती सदावृधः सखा कया शचिष्ठया वृता ॥ अज्ञातपरि-

सुतो रसं ब्रह्मणा व्यपिबत्क्षत्रम् अनेन सत्यमिन्द्रियं विपानं शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु । ब्रह्मा देवानां पदवीकवीनां० स्रुचं वामहस्तस्थां ब्राह्मणवामहस्ते प्रतिपादयेत् । ततोऽञ्जलिनाभ्यर्थना । पृथिवी शान्तिरन्तरिक्षं शान्तिर्द्यौः शान्तिर्दिशः शान्तिरापः शान्तिरोषधयः शान्तिर्वनस्पतयः शान्तिः तयाहं शान्त्या सर्वं शान्त्या मह्यं द्विपदे चतुष्पदे शान्तिं करोमि शान्तिर्नो अस्तु शान्तिरसीति शान्तिः शान्तिः शान्तिः ॥ [ततोऽग्निं प्रार्थयेत्] । सप्तहस्तश्चतुःशृङ्गः सप्तजिह्वो द्विशीर्षकः । त्रिपात्प्रसन्नवदनः सुखासीनः शुचिस्मितः १ । यावद्धोमं तथा यज्ञं करिष्ये त्वदनुज्ञया । तावत्कालमिहातिष्ठ वह्ने विघ्नं निवारय २ । (ततोऽग्निकोणे धमयेत्) ॐ हूं हुतभुजे नमः ३ ॥

[अथ समित्पूजा] । ॐभूर्भुवःस्वर्मन्त्रेण समिधो स्थानयेद्बुधः ॥ [आदौ नमस्कारः] । पृथिवी समित्तामग्निः समिन्धे तामहं समिन्धे सा मा समिद्धा सुषमिद्धा तेजसा वर्चसा यशसा ब्रह्म-

वर्चसेन समिन्ध्यात् १। अन्तरिक्षं समित्तां वायुः समिन्धे तामहं समिन्धे० २। द्यौः समित्तां सूर्यः समिन्धे तामहं० ३ । ओषधीनां पते सोम हव्यकव्येष्वऽयुक्तताम् । यथातथा गतां सम्यग्दूरीकुरु नमोस्तुते ॥ ततो दर्भकाण्डद्वयं प्रज्वाल्य तदुपर्यावर्तयेत् । येन देवा ज्योतिषोर्ध्वा उदायन्येनादित्या वसवो येन रुद्राः । येनाङ्गिरसो महिमानमानशुस्तेनैतु यजमानाय स्वस्ति ॥ ततो घृतधारापातं कुर्यात्– समिधाग्निन्दुवस्यत घृतैर्बोधयतातिथिम् अस्मिन्हव्या जुहोतन ॥ क्षीरेणाप्लाव्य– यदन्तरिक्षस्य यद्दिवो अनामृतं सम्बभूव ते सचा । तदग्निरग्नयेददत्तस्मिन्नाधीयतामयम् ॥ [ततः पूजा] हव्यै कव्यै कुरुकुल्लायै सिन्धव्यै सिद्ध्यै अमृतवासिन्यै अमृतरूपिण्यै पावकवर्धिन्यै वह्निप्रियायै। गन्धादि नैवेद्यान्तमर्चयित्वा प्रणमेत् ॥ (श्रुतिः) हव्यं प्रीणीहि हव्यं श्रृणीहि हव्यं श्रपय हव्यं पच हव्यमसि हव्यंत्वा हव्यवाडसि हव्यं सीद स्वयंकृच्छ्रामः सुगमं प्रयासि सुश्रृङ्गोवृषभः

शुभा वाचा ॥

तिस्रः समिधोऽग्नौ दद्यात् । समिधाग्निं दुवस्यत घृतैर्बोधयतातिथिम् । अस्मिन्हव्या जुहोतन ॥ उदग्ने शुचयस्तव शुक्रा भ्राजन्त ईरते तव ज्योतींष्यर्चयः ॥ उपत्वाग्ने दिवे दिवे दोषा वस्तर्धिया वयम् । नमो भरन्त एमसि ॥

ततो गुरुपूजनम् । बृहस्पते अति यदर्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु । यद्दीदयच्छवसर्त प्रजात तदस्मासु द्रविणं धेहि चित्रम् ॥ आचार्यस्तु यथा स्वर्गे शक्रादीनां बृहस्पतिः । तथैव भव यज्ञेऽस्मिन्नाचार्यवर सुव्रत ॥ यथा चतुर्मुखो ब्रह्मा सर्वलोके द्विजोत्तमः । तथा त्वं मम यज्ञेस्मिन् ब्रह्मन्सन्निहितो भव ॥ इति नमस्कारः । गुरवे आचार्याय इति गन्धादि नैवेद्यान्तं पूजनम् ॥ [ततः पुस्तक पूजा] सरस्वतीं देवयन्तो हवन्ते सरस्वतीमध्वरे तायमाने । सरस्वतीं सुकृतो आह्वयन्ते सरस्वती दाशुषो वार्यादात् । लक्ष्म्यै मेधायै धरायै तुष्ट्यै पुष्ट्यै गौर्यै प्रभायै मत्यै

वागीश्वर्यै वाग्देवतायै सरस्वत्यै । गन्धादि नैवेद्यान्तमर्चयित्वा अग्निभद्रं पठेत ॥ अग्नये समनमत्० । वायवे० । सूर्याय० वरुणाय० साम्ने० ब्रह्मणे० राज्ञे० रथाय समन० ॥

आदौ बीजवापनम् । उत्तरतः संस्तीर्णे० । सावित्राणि० प्रजापतये जुष्टं निर्वपामि । विष्णोर्मनसेति० सावित्राणि० प्रजापतये जुष्टं प्रोक्षामि । पात्राणि च तूष्णीं० पृश्न्याः पयोऽसि० । इदं हविः प्रजननं० आज्यदर्शनं । आत्मनो वाऽमनः० सुतस्य मौञ्जीबन्धननिमित्तं प्रजापतये अग्नये वैश्वानराय इदमाज्यमर्पयामि नमः ॥ आघारादाज्यभागान्तंहुत्वा । यजमानपत्नीमानीय । या आपो दिव्याः पयसा सम्बभूवु र्या अन्तरिक्ष्या उत पार्थिवासः । तासां त्वा सर्वासां रुचाभिषिञ्चामि वर्चसा ॥ अभि त्वा वर्चसासिचं यज्ञेन पयसा सह । यथासो मित्रवर्धनस्तथा त्वा सविताकरत । इन्द्रं विश्वा अवीवृधत्समुद्रव्यचसं गिरः रथीतमं रथीनां वाजानां सत्पतिं पतिम् ॥ [ऋतौ चतुर्थ्यां

स्नातायां निशि प्राजापत्यं चरुं श्रपयित्वा ।] स्थालीपाकेन प्रधानं । तेजोसि० प्रजापते नहि त्वदन्य एता विश्वा जातानि परिता बभूव । यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम् स्वाहा । तत ऋतुतिथियागादितन्त्रसमाप्तिः । अग्निं विमुच्य ॥ इति बीजवापनम् ॥ १ ॥

अथ सीमन्तोन्नयनम् ॥ अग्निं परिसमुह्य पर्युक्ष्य परिषिच्य ६ आदौ पञ्च० । उत्तरतः संस्तीर्य० सावित्रादिना यथा दैवतं० न निर्वापः । पृश्न्याः पयांसि ० आज्यदर्शनम् । आत्मनो० सुतस्य मौञ्जी० सीमन्तकरणयागदेवताभ्योऽग्नये वैश्वा० इद्माज्यं० आघारादाज्यभागान्तं हुत्वा । [तृतीये गर्भमासे सीमन्तं कारयते शुक्लपक्षस्य पुण्याहे पर्वणि वा यथोक्तमुपसमाधाय जयप्रभृतिभिर्हुत्वा । पश्चादग्नेर्दर्भेषु प्राक्कासीनायाः सर्वान्केशान्प्रमुच्य प्रसाधयते यं सीमन्तमिति ।] यं सीमन्तं कंकतस्ते चकार यद्वा क्षुरः परिवर्ज वपंस्ते । स्त्रीषु रूपमश्विनौ

तन्निधत्तं पौंस्नेनेमं संसृजतं वीर्येण ॥ इन्द्राणी चक्रे कङ्कतं ससीमन्तं विसर्पतु । पुनः पतिभ्यो जायान्दा अग्ने प्रजया सह ॥ पुनः पत्नीमग्निरदादायुषा सह वर्चसा । दीर्घायुरस्या यः पतिर्जीवाति शरदः शतम् इति, ॥ (त्रिःश्वेतया शलल्या शमीशाखया सपलाशया वा सीमन्तं विचिनोति] ॥ "ललाटमध्यादारभ्य कृकाटिकां यावद्द्विधा करोति इत्यर्थः" (समिद्द्वयं त्यक्त्वा हस्तौ प्रक्षालयेत्) । " यास्ते राके इत्यथास्याः पृथक्केशपक्षौ सन्नह्यति " । यास्ते राके सुमतयः सुपेशसो याभिर्ददासि दाशुषे वसूनि । ताभिर्नो अद्य सुमना उपागहि सहस्रपोषं सुभगे रराणा ॥ (नीललोहितेन सूत्रेण केशान् ग्रन्थयेत्) । नीललोहितं भवति कृत्या [1]शक्तिर्व्यज्यते । एधन्ते अस्या ज्ञातयः पतिर्बन्धेषु बध्यताम् ॥ (यजमानपत्न्याः) या आपो दिव्याः [यजमानपत्नीतिलकमाज्यदर्शनं च] । तेजोऽसीति चतु-

---

१ शक्तिर्गर्भस्य पुंस्त्वं । सक्तिरित्यपि पाठः

गृहीतेनाज्यप्रधानम् । ये के च ज्मा महिनो अहिमाया दिवो जज्ञिरे अपां सधस्थे । तेअस्मभ्यमिषये विश्वमायुः क्षप उस्रा वरिवस्यन्तु देवाः ॥ तत ऋतुतिथियागादितन्त्रसमाप्तिः ॥ विमुच्य नयामि । यो गुरुस्तमर्हयेदेतदेव कुमारीणां सटोद्धरणमत्रैवा-[1]नुलेपनम् ॥ इति सीमन्तोन्नयनम् ॥ २ ॥

अथ पुंसवनम् । अग्निं परिसमुह्य पर्युक्ष्य परिषिच्य । आदौ पञ्च० । उत्तरतः संस्तीर्णे० सावित्राणि० । पृथक् २ चरुत्रयम् । अग्नये जुष्टं निर्वपामि । इन्द्राय जुष्टं निर्वपामि । विष्णवे जुष्टं निर्वपामि । विष्णोर्मनसेति० सावित्राणि० अग्नये जुष्टं प्रो० । इन्द्राय जुष्टं प्रो० । विष्णवे जुष्टं प्रो० । पात्राणि च० । पृश्न्याःपयोऽसि० । आत्मनो० अग्नये इन्द्राय विष्णवे पुंसवनदेव० अग्नये वैश्वा० इदमाज्यं० । आज्यभागान्तं हुत्वा । या आपो दिव्याः यजमानपत्न्याः ॥ [अथ पुंसवनं भूयिष्ठ-

---

१ अनुलेपनं सीमन्तशोभाधायि कुङ्कुमप्रभृतिभिः । अनवलाभनमित्यपि पाठः तच्च गर्भरक्षार्थं कर्मान्यगृह्योक्तम् ।

गतेषु गर्भमासेषु त्रीन् स्थालीपाकान् श्रपयेत् आग्नेयं ऐन्द्रं वैष्णवं च तेषां यथादैवतं जुहोति ।] "अग्निस्तुविश्रवस्तममिति स्थालीपाकस्य।" तेजोसि० । अग्निस्तुविश्रवस्तमं तुविब्रह्माणमुत्तमम् । अतूर्त्तं श्रावयत्पतिं पुत्रं ददाति दाशुषे स्वाहा ॥ [पुमानग्निरितिस्रुवेणाज्यहोमः ।] पुमानग्निरजायत पुमांसं जनयेत्पुत्रं दशमे मासि सूतवे, येन जातेन विभुना जीवेम शरदः शतं पश्येम शरदः शतम्, इति तन्नो मंहस्व शतिनं सहस्रिणं गोसनिमश्वसनिं वीरम् स्वाहा ॥"इन्द्र त्वत्रमिति स्थालीपाकस्य।" तेजोसि०। इन्द्र त्वत्रमभि वाममोजोऽजायथा वृषभश्चर्षणीनाम् । अपानुदो जनममित्रयन्तमुरुं देवेभ्यो अकृणोरु लोकम् स्वाहा ॥ (पुमानिन्द्र इति स्रुवेणाज्यहोमः।) पुमानिन्द्रो अजायत पुमांसं० [इत्यादिसर्वमुपरितनवत्]॥(प्र तद्विष्णुरिति स्थालीपाकस्य।) तेजोसि०। प्र तद्विष्णुः स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठः। यस्योरुषु त्रिषु विक्रमणेष्वधि क्षियन्ति भुवनानि विश्वा स्वाहा ॥ (पुमान्वि-

ष्णुरिति स्रुवेणाज्यहोमः,, । पुमान्विष्णुरजायत पुमांसं जनये-त्पुत्रं दशमे मासि सूतवे. येन जातेन विभुना जीवेम शरदः शतं पश्येम शरदः शतम्, इति तन्नोमंहस्व शतिनं सहस्रिणं गोसनिमश्वसनिं वीरं स्वाहा ॥ तत ऋतुतिथियागादितन्त्रसमाप्तिः । विमुच्य० नयामि० ॥ इति पुंसवनम् ॥ ३ ॥

अथ जातकरणम् ॥ परिसमुह्य पर्युक्ष्य परिषिच्य । आदौ पञ्च० । उत्तरनःसंस्नीर्णं[१]० ॥ न निर्वपणम् । पृश्न्याःपयोऽसि० । आत्मनो० सुतस्य मौञ्जी० जानकरणदेव० अग्नये वैश्वा० इदमाज्य-म० ॥ आज्यभागान्तं हुत्वा ॥ या आपो दिव्याः यजमानपत्न्याः । (पुत्रे जाते नाम धीयते घोषवद्याद्यन्तरन्तःस्थं चतुरक्षरं यथोपपत्ति वा । अग्निमत्रानीय तस्मिन्नाज्यभागान्तं हुत्वा सहिरण्ये कांस्ये सम्पातानवनयेत[२] ॥ चतुर्गृहीतेनाज्येनाष्टौ प्रधानाहुतीर्जुहुयात्) । हिरण्यगर्भ इति–ऋषिपुत्राणाम् । संवत्सरस्येति

१ हुतशेषबिन्दून् २ स्रावयेत् । पुत्रबहुत्वे पृथक् पात्रेषु ।

जनयत आत्रेयस्य । हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पति-
रेक आसीत् । स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हवि-
षा विधेम स्वा "इत्यग्नौ" हा (इति सहिरण्यकांस्ये प्रति-
मंत्रं आहुतिशेषमवनयेत्) ॥ १ ॥ संवत्सरस्य प्रति मां ये त्वा
रात्र्युपासते । तेषामायुष्मतीं प्रजां रायस्पोषेण संसृज स्वा-,
हा ॥ २ ॥ काय स्वा-, हा ॥ ३ ॥ कस्मै स्वा-, हा ॥ ४ ॥
कतमस्मै स्वा-, हा ॥ ५ ॥ प्रजापतये स्वा-, हा ॥ ६ ॥ "प्रजा-
पते इति द्वाभ्याम् ।" प्रजापते नहि त्वदन्यः एता विश्वा जाता-
नि परिताबभूव । यत्कामास्ते जुहुमस्तन्नो अस्तु स्वा-, हा ॥७॥
असा अमुष्य पुत्रोऽमुष्यासौ पुत्रो वयं स्याम पतयो रयीणां
स्वा-, हा (देवदत्तो यज्ञदत्तस्य पुत्रो यज्ञदत्तस्य देवदत्तः पुत्रो
वयं स्याम पतयो रयीणां स्वा-, हा) ॥८॥ बहुत्वे पृथगाहुतिः ॥
"अग्नेरायुरसीति हिरण्येन मुखं मेध्यं कृत्वा" । अग्नेरायुरसि
तस्य ते मनुष्या आयुष्कृतस्तेनास्मा अमुष्मा अमुकदेवायायुर्धे-

हि । (पितृहस्तेन स्वस्वपाणितः) (पाणिना मुखमद्भिः संस्पृश्य प्रक्षाल्य स्तनावनुमन्त्रयते पतिः स्वस्त्रियाः) ॥ मधु वात इति प्रत्यृचमुभावुत्तमया नारायणस्यार्षम् ॥ मधु वात ऋतायते मधु क्षरन्ति सिन्धवः । माध्वीर्नः सन्त्वोषधीः । (इति दक्षिणस्तन-मनुमन्त्रयेत) मधु नक्तमुतोषसा मधुमत्पार्थिवं रजः । मधु द्यौर-स्तु नः पिता । (इति वामस्तनं) । मधुमान्नो वनस्पतिर्मधुमां अस्तु सूर्यः । माध्वीर्गावो भवन्तु नः । (इत्युभौ) । (ततो हिरण्येन सम्पातान्सन्निघृष्य मधु चेत्येके तन्मुखेकृत्वा प्रपा-ययति । आयुर्धयेति (बालकस्य नाम संगृह्य) सप्तभिराज्यं स्तनौ च पाययेत् स्वस्वपात्रतः पृथक् २) । "अमुकदत्त" आयु-र्धय । जरान्धय । सत्यन्धय । श्रियन्धय । ऊर्जन्धय । राय-स्पोषन्धय । ब्रह्मवर्चसं धय । जीव शरदः शतं पश्य शरदः शतम् । "इति मूर्ध्नि निघ्राप्य बोधश्चमेति स्वस्त्ययनं वाचयति" । बोधश्च मा प्रतीबोधश्च पुरस्ताद्गोपायताम् । अस्वप्नश्च माऽनव-

द्राणश्च दक्षिणतो गोपायताम् । गोपायमानो मा रक्षमाणश्च पश्चिमतो गोपायताम् । जागृविश्च माऽरुन्धती चोत्तराद्गोपायताम् । अनमित्रं नो अधरागऽनमित्रमुदक्कृधि । इन्द्राऽनमित्रं नः पश्चाद्ऽनमित्रं पुरस्कृधि । अनमित्रैरहोभिः सचेमहि विश्वेदेवाः । अनमित्रा न उशसः सन्तु निम्रुचः । याः षड्डुर्वीः पञ्च प्रादिशस्ता नःपान्तु, मित्रधा नो मित्रे दधात अभयं नो अस्तु, ये रात्रीमनुतिष्ठथ ये च भूतेषु जागृथ, पशून्ये सर्वान्रक्षत तेन आत्मसु जागृत ॥ बोधप्रतीबोधाऽस्वप्नानवद्राणगोपायमान रक्षमाण जागृवेरुन्धति, ये देवास्तनूपा स्थ ते म इह तन्वम्पात, बोधप्रतीबोधेत्यसौ वा आदित्यो बोधः, प्रतीबोधोऽग्निः, स्वप्नाणवद्राणेति चन्द्रमा वा अस्वप्नोयं य्यः पवते सोनवद्राणो गोपायमानरक्षमाणेत्यहर्वै गोपायमानो रात्रीरक्षमाणो जागृवेरुन्धतीति यज्ञो वै जागृविर्दक्षिणारुन्धत्येते वै देवा राष्ट्रभृतस्तानेवेट्ट आत्मनो गोपीथाय इति ॥ मंत्रार्थाः० ॥ तत ऋतुतिथ्यादि तत्र-

समाप्तिः ॥ विमुच्य० नयामि० ॥ इति जातकरणम् ॥४॥

अथ नामकरणम् ॥ अग्निं परिसमुह्य पर्युक्ष्य परिषिच्य । आदौ पञ्च० ॥ उत्तरतः सं० । सावित्राणि० काय प्रजापतये नामकरणदेवताभ्यो जुष्टं निर्वपामि । विष्णोर्मनसे० एवं प्रोक्षामि आज्यदर्शनं । आज्यभागान्तं हुत्वा ॥ (दशम्यां व्युष्टायां तस्मिन्नेवाग्नौ पयसि स्थालीपाकं श्रपयित्वा) । सर्वगन्धैः फलोत्तरैः [1]सशिरस्कं स्नापयित्वाऽहतेन वाससा प्रच्छाद्य । या आपो दिव्याः० । (बालकस्य मन्त्रस्नानम्) ॥ "स्थाली पाकस्य जुहोति" कयानश्चित्र–इति द्वे व्रतस्य गायत्री । तेजोसि० ॥ कया नश्चित्र आभुवदूती सदा वृधः सखा । कया शचिष्ठया वृता स्वाहा ॥१॥ कस्त्वा सत्यो मदानां मंहिष्ठो मत्सदन्धसः । दृढा चिदारुजे वसु स्वाहा ॥ २ ॥ कयातादिति तूष्णीनाम् । कया तच्छृण्वे शच्या शचिष्ठो यया कृणोति मुहुः काचिदृष्वः । पुरु दाशुषे

१ पुंलिङ्गनिर्देशः स्त्रियं वर्जयति ।

विचयिष्ठो अंहोथादधाति द्रविणं [1]जनित्रे स्वाहा ॥ ३ ॥ प्रजापतये स्वाहा ॥ ४ ॥ प्रजापते नहि त्वदन्य० ॥ ५ ॥ असावमुष्येत्यादि० (देवदत्तो यज्ञदत्तस्य पुत्रो यज्ञदत्तस्य देवदत्तः पुत्रो वयं स्याम पतयो रयीणां स्वाहा) ॥ ६ ॥ तत ऋतुतिथ्यादि । परिते दूळ भोरथो अस्मां अश्नोति विश्वतः । येन रक्षसि दाशुषः ॥ सावित्राणि० काय प्रजापतये नामकरणदेवताभ्यो नमो नैवेद्यं निवेदयामि नमः । इत्यन्तं कृत्वा ॥ अग्नेरायुरसीति तुल्यमाललाटाभिमर्शनात् । तदेव नामधीयते । अन्यादित्येके ॥ अग्नेरायुरसि तस्य ते मनुष्या आयुष्कृतस्तेनास्मा अमुष्मा (अमुकदेवाय) आयुर्धेहि । ततः प्राक्स्विष्टकृतः कांस्ये पूतमाज्यमासिच्य हिरण्यं चाबन्धनीयं बहिस्तान्त्रिकेण विधिनाज्यं "पृश्न्याः पयोसि, इत्यादिना युजुषे युजुषे इत्यन्तं" संस्कृत्य । अग्नेरायुरसीति अवधाय[2] (यजमानः बालश्च कांस्ये हिरण्येनाज्यं

---

१ जरित्रे २ घृते हिरण्यम् । अस्मै–यजमानाय । अमुष्मै–बालकाय च ।

वीक्ष्य) । अग्नेरायुरसि तस्य ते मनुष्या आयुष्कृत स्तेनास्मा अमु-
ष्मा- (अमुकदेवाय) आयुर्धेहि ॥ इन्द्रस्य प्राण इति पञ्चभिः
स्रुवेण तस्य जुहोति ॥ इन्द्रस्य प्राणः स ते प्राणं ददातु यस्य
प्राणस्तस्मै ते स्वाहा ॥ १ ॥ पितॄणां प्राणस्ते ते प्राणं ददतु येषां
प्राणस्तेभ्यो वः स्वाहा ॥२॥ मरुतां प्राण ॥३॥ विश्वेषां देवानां ॥४॥
प्रजापतेः प्राणः स ते प्राणं ददातु, परमेष्ठिनः प्राणः स ते प्राणं
ददातु ययोः प्राणस्ताभ्यां वां स्वाहा ॥ ५ ॥ (ततः इळामग्ने इत्यतः
आश्राविते त्यन्तं हुत्वा) । (ततः प्राक्संस्थितयजुषो ब्रह्मा घृते
हिरण्यमवपद्यते । सर्वे च ऋत्विजो यदसर्प इति ॥) यदसर्पस्त-
त्सार्पिरभवो यन्नवमैस्तन्नवनीतमभवो यदध्रियथास्तद्घृतमभवः,
घृतस्य धारामममृतस्य पन्थामिन्द्रेण दत्तं प्रयतं मरुद्भिः, तत्त्वा
विष्णुरन्वपश्यत्तत्त्वेळा गव्यैरयत् ॥ (पावमानेत्याज्यात्सुवर्णमुद्-
धृत्य ॥) पावमानेन त्वा स्तोमेन गायत्र्या वर्तन्योपांशोर्वीर्येणो-
द्धराम्यसौ ॥ १ ॥ अमुकदेव । (असौ शब्दस्थाने कुमारस्य आमन्त्र-

णप्रथमान्तं नाम ग्राह्यम्) ॥ बृहता त्वा रथन्तरेण त्रिष्टुभा वर्तन्या शुक्रस्य वीर्येणोत्सृजाम्यसौ अमुकस्वामिन् ॥ २ ॥ अग्नेस्त्वा मात्रया जगत्या वर्तन्या देवस्त्वा सवितोन्नयतु जीवातवे जीवनस्याया असौ ॥ ३ ॥ अमुकशर्मन् ॥ (देवा आयुष्मन्त इति षड्भिर्यजमानाय प्रयच्छति ॥) देवा आयुष्मन्तस्तेऽमृतेनायुष्मन्तस्तेषामयमायुषायुष्मानस्त्वसौ अमुकच्छन्दः ॥ १ ॥ (असौ शब्दस्थाने शिशोः प्रथमान्तं नाम ग्राह्यम्) । ब्रह्मायुष्मत्तद्ब्राह्मणैरायुष्मत्तस्यायमायुषायुष्मानस्त्वसौ ॥ अमुकवत्सः ॥ २ ॥ अग्निरायुष्मान् स वनस्पतिभिरा० । अमुकस्वामी ॥ ३ ॥ यज्ञ आयुष्मान् स दक्षिणाभिरा० । अमुकदेवः ॥ ४ ॥ सोम आयुष्मान् स ओषधीभिरा० । अमुकशर्मा ॥ ५ ॥ ओषधय आयुष्मतीस्ता अद्भिरायुष्मतीस्तासाम० । अमुकसोमः ॥ ६ ॥ तत्पिवत्यायुरेव तत्पिवति यदेव तस्य तन्निरवधयेदिति ॥ [हिरण्या-

१ निःशेषेण पिबेत् ।

दृघृतं प्रक्षाल्य इममग्न इति कण्ठे आबध्नाति सुवर्णं]॥ इममग्न आयुषे वर्चसे कृधि तिग्ममोजो वरुण संशिशाधि । मातेवास्मा अदिते शर्म यच्छ विश्वे देवा जरदष्टिर्यथासत् ॥ (तस्य ललाटमभिमृश्याश्विनोः प्राण इति जपति ।) अश्विनोः प्राणस्तौ ते प्राणं दत्तां तेन जीव । मित्रावरुणयोः प्राणस्तौ ते प्राणं दत्तां तेन जीव । बृहस्पतेः प्राणः स ते प्राणं दत्तात्तेन जीव ॥ " बालकालिङ्गनं पित्रोरङ्गादिति " ॥ अङ्गादङ्गात्संभवसि हृदयादभिजायसे । आत्मा वै पुत्रनामासि जीव शरदः शतं पश्य शरदः शतमिति मूर्ध्नि निघ्राप्य, पूर्णां दत्त्वा ॥ मा नस्तोके० ॥ पश्चात् बोधश्च मा इति स्वस्त्ययनं वाचयति ॥ विमुच्य० । नयामि ॥ इति नामकरणम् ॥ ५ ॥

अथ सूर्यदर्शनम् ॥ परिसमुह्य पर्युक्ष्य परिषिच्य । आदौ पञ्च० । उत्तरतः संस्तीर्णे० सावित्राणि० मित्राय जुष्टं निर्वपा-

---

१ ऋत्विक् पितुः प्रयोजकः ।

मि । विष्णोर्मनसेति० एवं प्रोक्षामि आज्यदर्शनं । आत्मनो० मित्राय अग्नये वै० इदमाज्यमर्पं० । आज्यभागान्तं हुत्वा ॥ (तृतीयेऽर्धमासे दर्शनमादित्यस्योदिते त्वादित्ये रथचक्रमात्रं स्थण्डिलमुपलिप्य तस्मिन्यथोक्तमुपसमाधाय जयप्रभृतिभिर्हुत्वा । तरणि र्दिवोरुक्म उदुत्यांश्चित्रन्देवानामिति स्रुवेणाज्यस्य जुहोति । तरणिरिति–ऋषिपुत्राणामार्षम् ।) तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य । विश्वमाभासि रोचनम् स्वाहा ॥ १ ॥ दिवो रुक्म उरुचक्षउदेति दूरेअर्थस्तरणिर्भ्राजमानः । नूनं जनः सूर्येण प्रसूता अयन्नर्थानि कृणवन्नपांसि स्वाहा ॥ २ ॥ द्विव्यस्य शाकरस्य । उदुत्यं जातवेदसं देवं वहन्ति केतवः । दृशे विश्वाय सूर्य स्वाहा ॥ ३ ॥ चित्रन्देवानामुद्गादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः । आप्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च स्वाहा ॥ ४ ॥ ततः सूर्यपूजनम् ॥ मण्डलं वर्तुलं कृत्वा दर्शने सोम-

---

१ अष्टाचत्वारिंशदङ्गुलपरिमाणं

सूर्ययोः । नवरेखाः प्रकर्तव्या अर्चयेन्मौञ्जिबन्धने ॥ अष्टचत्वारिंशदङ्गुलपरिमाणं प्रतिदिशं सोमसूर्यमण्डलं कार्यम् । द्वादशाङ्गुलमध्ये पूजनं कार्यम् । तत्रोक्तं– "नवरेखास्तु कर्तव्याः कुर्यात्सूर्येन्दुमण्डलम् । द्वादशाङ्गुलमध्ये तु यत्नेन पूजयेत् क्रमात्" ॥ संव्रः सृजामि० । अश्विनोः० । गायत्र्यै नमः० ३ । भास्कराय विद्महे सहस्ररश्मये धीमहि । तन्नः सूर्यः प्रचोदयात् । ३ । अद्यतावत्० । मित्रस्य सानुचरस्य आत्मनो० सुतस्य मौञ्जीबन्धननिमित्तं अर्चामहं करिष्ये ॐ कुरुष्व । मित्रस्य सानुचरस्येदमासनं नमः । मित्राय सानुचराय त्वां पूजयामि ॐ पूजय । मित्रं सानुचरमावाहयिष्यामि ॐ आवाहय ॥ आवाहयाम्यहं देवं भानुं सर्वजगद्गुरुम् । अरुणः सारथिर्यस्य सप्ताश्वरथवाहनः ॥ प्रीयतां यजमानस्य तुष्टो भूयाज्जगत्पतिः । रक्तवर्णो महातेजा रक्तस्रग्दामभूषितः । बलिः पुष्पं चरुश्चैव० । यवान्विकीर्य । शन्नो देवी० । लाजा गन्धो वचा कुष्ठं वालुकं

पद्मकेसरम् । नागकेसरसंयुक्तं पाद्यमेतत्प्रकल्पयेत् । मित्राय सानुचराय पाद्यं नमः । (पुनः) शन्नो देवी० । कुङ्कुमागुरुकर्पूरचन्दनैश्च सुगन्धिभिः । मृगजातीसमायुक्तैरर्घ्यमेतत्प्रकल्पयेत् । मित्र सानुचर इदं वोऽर्घ्यं नमः । मित्राय सानुचराय समालभनं गन्धो नमः ॥ एवमर्घो नमः पुष्पं नमः । दक्षिणान्तं । अमृतमस्तु० सावित्राणि० । ॐ नम आदित्याय कश्यपपुत्राय अदितेर्गर्भसम्भूताय रक्तवर्णाय रक्ताम्बरचीरवाससे तपसोग्ररूपधराय भक्तिभावनाय आरुह्य मेरुं प्रदक्षिणं कृत्वा ग्रहमण्डलं प्रविश्य इत्यक्षतगन्धपुष्पधूपदीपसुवर्णरचितं बलिं निवेदयामि स्वगणैः परिवृतः प्रीतमानसो भव ऋतं ते नमः ॥ मित्राय सानुचराय नमो नैवेद्यं निवेदयामि नमः । (मित्रो जनान्यात० । प्रसमित्र० इति स्थालीपाकस्य) तेजोसि० ॥ मित्रो जनान्यातयति ब्रुवाणो मित्रो दाधार पृथिवीमुत द्याम् । मित्रः कृष्टीरनिमिषाभिचष्टे मित्राय हव्यं घृतवद्विधेम स्वाहा १ ॥ प्र स मित्र मर्त्तो अस्तु प्रय-

स्वान्यस्त आदित्य शिक्षति व्रतेन । न हन्यते न जीयते त्वोतो नैनमंहो अश्नोत्यन्तितो न दूरात् स्वाहा २ ॥ (अभ्यावर्तस्वेति कुमारमभ्युदानयति[1] शार्यातस्य मानवकस्य ।) अभ्यावर्तस्व पृथिवि यज्ञेन पयसा सह । वपां ते अग्नीरिषितो आरोहत् । (द्रष्ट्रे नम इति अहश्रन्निति चोपस्थानम्) ॥ घोराणामार्षम् ॥ द्रष्ट्रेनम उपद्रष्ट्रे नमोऽनुद्रष्ट्रे नमः ख्यात्रे नमः उपख्यात्रे नमोऽनुख्यात्रे नमः शृण्वते नम उपशृण्वते नमः सते नमोऽसते नमो जाताय नमो जनिष्यमाणाय नमो भूताय नमो भविष्यते नमश्चक्षुषे नमः श्रोत्राय नमो मनसे नमो वाचे नमो ब्रह्मणे नमः श्रान्ताय नमस्तपसेनमः ॥ अहश्रन्नस्य केतवो विरश्मयो जनाननु । भ्राजन्तो अग्नयो यथा ॥ (सर्पिष्मदन्नं ब्राह्मणान्भोजयेत्) । तत ऋतुतिथ्यादि-तंत्रसमाप्तिः ॥ विमुच्य ३ ॥ नयामि० । इति सूर्यदर्शनम् ॥ ६ ॥

---

१ अभिमुखं कृत्वोन्नमय्यानयति

अथ चन्द्रदर्शनम् ॥ अग्निं परिसमुह्य पर्युक्ष्य परिषिच्य । आदौ पञ्च० । उत्तरतः० सावित्राणि० सोमाय जुष्टं निर्वपामि । विष्णोर्मनसेति० । एवं प्रोक्षामि । आज्यदर्शनम् । आज्यभागान्तं हुत्वा ॥ स्रुवेण मक्षूदाता, भूयो जात इत्याज्यस्य जुहोति ॥ [१]मक्षूदाता मातरिश्वा वचोभिश्चन्द्रो अमृताद्वर्धते जायमानः । आयुः प्रजाममृतं सौभगत्वं प्र चन्द्रमास्तिरते दीर्घमायुः, स्वाहा १ भूयो जातो हविषश्चन्द्रअस्मात्पूर्णः पुरस्तात्पयसो हविर्भिः । पयो गर्भो देवताः पिन्वमानश्चन्द्रोऽमृतत्वमभयं कृणोतु स्वाहा २ ततः सोमपूजनम् । सूर्यस्योपरिभागे नवरेखात्मकं वर्तुलं सोममण्डलमुल्लिख्य ॥ संव्वः सृजामि० । अश्विनोः० । गायत्र्यै नमः ॐभूर्भुवः स्वः ३ ॥ निशाकराय विद्महे शीतरश्मये धीमहि । तन्नः सोमः प्रचोदयात् ३ अद्य तावत् सोमस्य सानुचरस्य । आत्मनो० सुतस्य मौञ्जीबन्धननिमित्तं अर्चामहं करिष्ये ओं कुरु-

१ पूजितस्य चतुर्थपुरुषार्थस्य दाता । मह्पूजायामिति धातुः

ष्व । सोमस्य सानुचरस्येदमासनं नमः । सोमाय सानुचराय त्वां पूजयामि ओं पूजय । सोमं सानुचरमावाहयिष्यामि ओंआवाहय । आवाहयाम्यहं देवं चन्द्रं नक्षत्रनायकम् । शम्भोः शिरस्यलंकारं प्रत्यक्षं लोकनायकम् । शुक्लवर्णो० । यवान्विकीर्य ॥ शन्नो देवी० । लाजाश्च० । सोमाय सानुचराय पाद्यं नमः । (पुनः) शन्नो देवी० । आपः क्षीरं० । सोम सानुचर इदं वोऽर्घ्यं नमः । सोमाय सनुचराय समालभनं० । एवं दक्षिणान्तं । सावित्राणि० ओं नमः सोमाय अत्रिपुत्राय अमृतोद्भवाय शुक्लवर्णाय शुक्लाम्बरक्षीरवाससे तपसोग्ररूपधराय भक्तिभावनाय अरुह्य मेरुं प्रदक्षिणं कृत्वा ग्रहमण्डलं प्रविश्य इत्यक्षतगन्धपुष्पधूपदीपसुवर्णरचितं बलिं निवेदयामि स्वगणैः परिवृतः प्रीतमानसो भव अतं ते नमः ॥ सोमाय सानुचराय नमो नैवेद्यं निवेदयामि नमः ॥ आप्यायस्व, सन्ते पयांसीति स्थालीपाकस्य । तेजोसि० । आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम् । भवा वाजस्य सङ्गथे, स्वाहा १ सन्ते

पयांसि समु यन्तु वाजाः संवृष्ण्यान्यभिमातिषाहः । आप्यायमानो अमृताय सोम दिवि श्रवांस्युत्तमानि धिष्व, स्वाहा २ । (अभ्यावर्तस्वेति कुमारमभ्युदानयति शार्यातस्य माणवकस्य ।) अभ्यावर्तस्व पृथिवि यज्ञेन पयसा सह । वपां ते [1]अग्नी रिषितो आरोहत् ॥ (यथादित्यं; नवो० इत्युपस्थानम् ।) यथादित्यमादित्या आप्याययन्ति यथाक्षितिमक्षितयो मदन्ति । एवं मामिन्द्रो वरुणो बृहस्पतिराप्याययन्तु भुवनस्य गोपाः ॥ १ ॥ नवो नवो भवति जायमानोऽह्नां केतुरुषसामेत्यग्रम् । भागन्देवेभ्यो विदधात्यायन्प्रचन्द्रमास्तिरते दीर्घमायुः ॥ २ ॥ प्रकाशो आदर्शपर्यायः दक्षिणा । तत ऋतुतिथ्यादितन्त्रसमाप्तिः विसृज्य ३ । नयामि ॥ इति चन्द्रदर्शनम् ॥ ७ ॥

अथान्नप्राशनम् । अग्निं परिसमुह्य पर्युक्ष्य परिषिच्य । अदो पश्च० । उत्तरतः० । सावित्राणि० अन्नपतये जुष्टं निर्वपामि

---

१ अग्निरिषित इत्यपि पाठः ।

विष्णोर्मनसेति० सावित्राणि० अन्नपतये जुष्टं प्रोक्षामि । आज्य-
दर्शनम्—आत्मनो० अन्नपतये इदमाज्यं० । आज्यभागान्तं हुत्वा ।
(षष्ठे मासेऽन्नप्राशनं दन्तेषु वा जातेषु सर्वाण्यन्नानि संयूय सा-
धयित्वा आयुर्धा देव, घृतप्रतीक इति च द्वाभ्यां स्रुवेणाज्यहोमः ।)
आयुर्धा[1] देव जरसं वृणानो घृतं वसानो घृतपृष्ठो अग्ने । घृतं
पिबन्नमृतं चारु गव्यं पितेव पुत्रं जरसे नयेमं, स्वाहा ॥ १ ॥
घृतप्रतीको घृतपृष्ठो अग्निर्घृताहवनो घृतमस्य धाम । घृतप्रुषो
हरितस्त्वा वहन्तु घृतं पिबन्यजताद्देव देवान् , स्वाहा ॥ २ ॥
(अन्नपतेरिति स्थालीपाकस्य ।) तेजोसि० ॥ अन्नपते अन्नस्य
नो देह्यनमीवस्य शुष्मिणः । प्र प्रदातारं तारिष ऊर्जं नो देहि
द्विपदे चतुष्पदे स्वाहा । (अनयैव कुमारमपि अन्नं प्राशयेत्)।
[देवाग्रतोथ विन्यस्य शिल्पभाण्डानि सर्वशः । अस्त्राणि सर्व-
शास्त्राणि ततः पश्येत्तु लक्षणम् । प्रथमं यत्स्पृशेद्बालस्ततो भाण्डं

१ आयुर्दा इत्यपि पाठः ।

स्वयं तदा । जीविका तस्य बालस्य तेनैव तु भविष्यति ।]

तत ऋतुतिथ्यादितंत्रसमाप्तिः । विमुच्य ३ नयामि ॥ इत्यन्न-प्राशनम् ॥ ८ ॥

अथ चूडाकरणम् ॥ परिसमुह्य पर्युक्ष्य परिषिच्य । आदौ पञ्च० । उत्तरतः० न निर्वापः । पृश्न्याः पयोसि० । आज्यदर्शनम् । आत्मनो० चूडाकरणयागदेवताभ्य इदमाज्यं० आज्यभागान्तंहुत्वा ॥ [एकस्मिन् शरावे गोमयाच्छोट तिल क्षुर दर्भकाण्डचतुष्काणि निधाय] (तृतीयस्य वर्षस्य भूयिष्ठेषु गतेषु चूडाः कारयते । दक्षिणतः कपुजा वसिष्ठानाम्, उभयतोऽत्रिकश्यपानाम्, मुण्डा भृगवः, पञ्च चूडा आङ्गिरसानाम्, वाजिमेके[1] मङ्गलार्थं शिखिनो[2]ऽन्ये यथाकुलधर्मं वा ॥ शुद्धपक्षस्य पुण्याहे पर्वणि वा यथोक्तमुपसमाधाय जयप्रभृतिभिर्हुत्वा ।) अयमागात्सविता क्षुरेणोष्णेन वाय उदकेन एहि । आदित्या रुद्रा वसवः सचेत-

---

१ वाजि—केशपङ्क्तिम् । २ अमेध्यमेतच्छिरो यदशिखमिति श्रुतिः ।

सः सोमस्य राज्ञो वपत प्रचेतस इत्युष्णा अपोऽभिमन्त्रयते । उष्णाश्च शीताश्च समेत्य सर्वा बृहस्पतिः सविता सत्यधर्मा तदनुमन्यताम् । सोमपुत्रस्याध्वरस्य । आर्द्रदानवः स्थ जीवदानवः स्थोन्दतीरिहैनमवताप उन्दन्तु जीवसे दीर्घायुत्वाय वर्चसे इत्यभ्युन्देत् । ओषधे त्रायस्वेति दर्भमन्तर्धाय ओषधे त्रायस्वैनम् । स्वधित इति क्षुरेणाभिनिधाय स्वधिते मैनं हिंसीः । येनावपत्सविता क्षुरेण सोमस्य राज्ञो वरुणस्य विद्वान् ॥ तेन ब्रह्मणो वपतेदमस्यायुष्माञ्जरदष्टिर्यथासत् ॥ अयमसौ अमुकदेवः इति दक्षिणे केशान्ते । (प्रागग्रेण दर्भेण) ॥ १ ॥ एवं । आर्द्रदानवः स्थ जीवदानवः स्थोन्दतीरिहैनमवताप उन्दन्तु जीवसे दीर्घायुत्वाय वर्चसे इत्यभ्युन्देत् । ओषधे त्रायस्वेति दर्भमन्तर्धाय ओषधे त्रायस्वैनम् । स्वधित इति क्षुरेणाभिनिधाय स्वधिते मैनं हिंसीः । येन धाता बृहस्पतिरग्नेरिन्द्रस्य चायुषे वपत् । तेनास्यायुषे वप सुश्लोक्याय स्वस्तये ॥ अयमसौ अमुकदत्तः इति

पश्चिमे केशान्ते (उदगग्रेण दर्भेण) ॥ २ ॥ आर्द्रदानवः स्थ जीवद्दानवः स्थोन्दतीरिहैनमवताप उन्दन्तु जीवसे दीर्घायुत्वाय वर्चसे इत्यभ्युन्देत् । ओषधे त्रायस्वेति दर्भमन्तर्धाय ओषधे त्रायस्वैनम् । स्वधित इति क्षुरेणाभिनिधाय स्वधिते मैनं हिंसीः । येन पूषा प्रजापतेरग्नेः सूर्यस्य चायुषे वपत् । तेनास्यायुषे वप सुश्लोक्याय स्वस्तये ॥ अयमसौ अमुकच्छन्दः इत्युत्तरे केशान्ते (उदगग्रेण दर्भेण०) ॥ ३ ॥ आर्द्रदानवः स्थ जीवदानवः स्थोन्दतीरिहैनमवताप उन्दन्तु जीवसे दीर्घायुत्वाय वर्चसे इत्यभ्युन्देत् । ओषधे त्रायस्वेति दर्भमन्तर्धाय ओषधे त्रायस्वैनम् । स्वधित इति क्षुरेणाभिनिधाय स्वधिते मैनं हिंसीः । येन भूयश्च रात्री ज्योक् पश्या च सूर्यम् । तेनास्यायुषे वप स्वश्लोक्याय स्वस्तये ॥ अयमसावमुकशर्मा इति पूर्वे केशान्ते (उदगग्रेण दर्भेण) ॥ ४ ॥ (इति प्रदक्षिणं प्रतिदिशं प्रतिमंत्रं दर्भक्षुरकर्म) यत्क्षुरेण वर्तयता सुपेशसा वप्त्वंपसि केशान् । शुन्धि शिरो

माऽस्यायुः प्रमोषीरिति (लोहायसं क्षुरं केशवापाय प्रयच्छति) मा ते केशाननुगात्तेज एतत्तथा धाता दधातु ते । तुभ्यमिन्द्रो बृहस्पतिः सविता वर्च आदधुरिति (प्रपततोऽनुमन्त्रयते) (सुहृत्परिग्राह्यानुप्यमानान्हरितगोमये समवचिनोति) उप्त्वाय राज्ञो वरुणस्य केशान्सोमो धाता सविता विष्णुरग्निः । तेभ्यो निधानं बहुधान्वविन्दन्नन्तरा द्यावापृथिवी अवस्युः (इति प्रागुदीच्यां ह्रियमाणाननुमन्त्रयते) [1]अरिक्ते पर्याश्लेषयते इतिश्रुतिः। बालकं स्नापयित्वा । या आपो दिव्याः० ॥ चतुर्गृहीतेनाज्यप्रधानं । तेजोसि० । ये के च ज्मा० । तत ऋतुतिथ्यादितन्त्रसमाप्तिः ॥ विमुञ्चामि ३ । नयामि । कर्त्रे वरं ददाति । [2]पेद्मगुणं तिलपेशलं केशवापाय प्रयच्छति ॥ सर्पिष्मदन्नं ब्राह्मणान्भोजयेत् ॥ इति चूडाकरणम् ॥ ६ ॥

---

१ दूर्वालतादिभरिते शीतप्रदेशे समाश्लेषयते केशान् मित्रम् । २ और्णगुणवेष्टितं तिलपूर्णशरावं नापिताय देयम् । वरमिति दक्षिणाम, साच चतुर्वर्षा गौः । सूक्ष्मगुणमित्यपि पाठः । सूक्ष्मतन्तुं वस्त्रम् ।

अथोपायनम् ॥ अग्निं परिसमुह्य पर्युक्ष्य परिषिच्य । आदौ पञ्च० । उत्तरतःसं० न निर्वापः । पृश्न्याः पयोऽसि० यजमानस्यैव आज्यदर्शनम् । आत्मनो० मेधायै सरस्वत्यै छन्दोभ्यः उपायनदेवताभ्यः अग्नये वैश्वानराय इदमाज्यमर्पयामि नमः । आज्यभागान्तं हुत्वा ॥ (तत्रादौ विद्यारम्भः ॥) लग्नवेलायामेव । शुक्लाम्बरधरं० । धूपदीपादि संकल्पं बालकमाचार्यः कारयेत् । अक्षराणि कुङ्कुमादिना बालकं लेखयित्वा वाचयित्वा च तत्पूजां कारयेत् । लक्ष्म्यै मेधायै धरायै तुष्ट्यै गौर्यै पुष्ट्यै प्रभायै मत्यै वाग्देव्यै सरस्वत्यै इति नामभिः ॥ दक्षिणां च दद्यात् । ततो नैवेद्यम् । प्रार्थना च ॥ करबधिर सदृशमखिलं भुवनतलं यत्प्रसादतः कवयः । पश्यन्ति सूक्ष्ममतयः सा देवी सरस्वती जयति ॥ (प्राङ्मुखो गुरुरासीनो वरुणाशामुखं शिशुम् । अध्यापयीत प्रथमं द्विजाशीर्भिः सुपूरितम् ॥) वासोऽहतं ब्रह्मसूत्रमश्मानं दधि मेखलाम् । आजि-

नं नवनीतं च दण्डं चात्रोपकल्पयेत् ॥ (सप्तमे वर्षे ब्राह्मणस्योपायनम् । नवमे राजन्यस्य । एकादशे वैश्यस्य । आ षोडशाद्ब्राह्मणस्यानतिक्रमः । आ द्वाविंशाद्राजन्यस्य । आ चतुर्विंशाद्वैश्यस्य । स्नातोप्तकेशे यथोक्तमुपसमाधाय जयप्रभृतिभिर्हुत्वा ।) रेवतीस्त्वा[1] व्यदणन्कृत्तिकाश्चकृतुस्त्वा अपसस्त्वा व्यतन्वत धियोऽवयन्नवग्ना अमृजन्सहस्रमन्तां अभितो[2] दधन्ताऽशीतिर्मध्यमवयन्नु नारीरित्यहतं वासोऽभिमन्त्रयते । देवीर्देवाय परिधे सवित्रे[3] परिधत्त वर्चसे[4] इमं शतायुषं कृणोतु जीवसे कामिति परिधापयति ॥ जरां गच्छ परिधत्स्व वासो भूरापीवानाभिशस्तिपा वा शतं च जीव शरदः पुरूची रायश्च पोषमुपसंव्ययस्व ॥ परीमं सोमं तेजसे महे श्रोत्राय दधमसि यथैनं जरसं नयज्ज्योक्श्रोत्राय जागरज्ज्योक्श्रोत्रेऽधिजागरादिति ब्राह्मणस्य ॥ (परीममिन्द्रमोजसे महे क्षत्राय दधमसि यथैनं जरसं नयज्ज्योक्क्षत्रायजागरज्ज्यो-

१ सूत्रमेखलां कौपीनं च बालकहस्ते संस्थाप्य वाचयति । २ अभितोतयच्छन् अशीतिर् ॥ ३ सविता । ४ वर्चसं नयेमं ।

क्षत्रेऽधिजागरदिति राजन्यस्य) (परीमं मनुमायुषे महे पोषाय दध्मसि यथैनं जरसं नयज्ज्योक्पोषाय जागरज्ज्योक्पोषेधिजागरदिति वैश्यस्य) परीदं वासो [1]ऽधिथाः स्वस्तये भवापीवानभिशस्तिपावा शतं च जीव शरदः सुवीरो वसूनि चोग्रो विभज सुजीवन्निति (परिहितवाससमनुमन्त्रयते)॥ योगेयोगे युवासुवास इति चैताभ्याम् । योगेयोगे इति कश्यपस्य । योगे योगे तवस्तरं वाजे वाजे हवामहे । सखायमिन्द्रमूतये ॥ युवा सुवासःपरिवीत आगात्स उच्छ्रियान्भवति जायमानः । तं धीरासः कवय उन्नयन्ति स्वाध्यो मनसा देवयन्तः ॥ [ततः कृताचमनं [2]यज्ञोपवीतमिति—ब्रह्मसूत्रं परिधापयति ॥] यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् । आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः ॥ यज्ञोपवीतमसि यज्ञस्य त्वोपवीतेनोपनह्यामि इति यदा स्वयं परिदध्यात ।

---

१ अधिधाः । २ शकुनं दध्यन्न तण्डुल लवणादि सर्वत्रात्र ।

ततः कृताचमनं [१]पवित्रपाणिं आब्रह्मणात ललाटे तिलकं कारयित्वा [यदाबध्नन्] ॥ अग्निमभि दक्षिणमानीय । एह्यश्मानमातिष्ठाश्मेव त्वं स्थिरो भव । कृण्वन्तु विश्वेदेवा आयुष्टे शरदः शतम् । इति "दक्षिणेन पदाश्मानमास्थापयति" [उपवेश्य] मम व्रते हृदयं ते ददामि मम चित्तमनु चित्तं ते अस्तु । मम वाचमेकव्रतो जुषस्व बृहस्पतिस्त्वा युनक्तु मह्यम् । [इति नाभिदेशादूर्ध्वं पाणिनोन्मार्ष्टि] ॥ [पवित्रं निवार्य] दधिक्राव्णो "इति त्रिर्दधि भक्षयित्वा" ॥ दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः । सुरभि नो मुखा करत्प्रा ण आयूंषि तारिषत् ॥ ततः कृताचमनं "ब्रह्मचर्यमागामुप मा नयस्वेति वाचयित्वा ॥" (पश्चादग्नेर्दर्भेष्वासीनं कृतपादोपसंग्रहणं गुरुः प्रणवं व्याहृतीश्चाध्यापयति) ॥ "अधीहि भोः ! व्याहृतीर्मे भवाननुब्रवीतु" ॥ प्रणवस्य ऋषिर्ब्रह्मा गायत्रं छन्द एव च ।

१ वसोः पवित्रमसीति ।

देवोऽग्निर्व्याहृतिषु च विनियोगः प्रकीर्तितः ॥ प्रजापतेर्व्याहृतयः पूर्वस्य परमेष्ठिनः । व्यस्ताश्चैव समस्ताश्च ब्राह्ममक्षरमोमिति ॥ व्याहृतीनां समस्तानां दैवतं तु प्रजापतिः । व्यस्तानामयमग्निश्च वायुः सूर्यश्च देवताः ॥ छन्दश्च व्याहृतीनामेकाक्षराणामुक्ताख्यं, त्र्यक्षराणामत्युक्ताख्यमिति बोधयित्वा "ओंभूर्भुवःस्वः" [इति दक्षिणकर्णे श्रावयित्वा त्रिर्वाचयति] । इयं दुरुक्तादिति वाचयन्मेखलां त्रिगुणां त्रिप्रदक्षिणामाबध्नीते । [आचार्यः] इयं दुरुक्तात्परिबाधमाना वर्णं पवित्रं पुनती म आगात् । प्राणापानाभ्यां बलमाभजन्ती सखा देवी सुभगा मेखलेयम् ॥ ऋतस्य गोप्त्री तपसस्तरुत्री घ्नती रक्षः सहमाना अरातिम् । सा नः समन्तमनु परीहि [1]भद्रे भर्तारस्ते मेखले मा रिषाम ॥ श्रद्धाया दुहिता तपसोऽधिजाता स्वसर्षीणां मन्त्रकृतां बभूव । सा मा मेखले परिरेरिहस्व मयि देहि तप इन्द्रियं च ॥ [इति वाच-

---

१ भद्रेया

यन्मेखलामाबध्नाति] "मौञ्जीं त्रिवृतं ब्राह्मणाय प्रयच्छति । मौर्वीं [1]धनुर्ज्या राजन्याय । सौत्रीं वैश्याय" ॥ चित्तस्य समोसि दैव्यो ग्रन्थिरसि मा विस्रसः [इति त्रिगुणं प्रवरसंख्यया वा ग्रन्थिं कृत्वा] ॥ "मित्रस्य चक्षुरित्यजिनम्" । मित्रस्य चक्षुर्धरुणं बलाय तेजो यशस्वि स्थविरं समृद्धम् । अनाहनस्यं वसनं चरिष्णु परीदं वाज्यजिनं दधेयम् (इति वाचयन्नैणेयं चर्म ब्राह्मणाय प्रयच्छति । वैयाघ्रं राजन्याय । रौरवं वैश्याय) ॥ (तच्चक्षुरित्यादित्यमुपस्थापयति) तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् । पश्येम शरदः शतं जीवेम शरदः शतम् ॥ "को नामासीत्युक्ते (गुरुणा) अभिवादने प्रोक्ते असौ अहं भोरिति प्रत्याह" (वटुः) ॥ गुरोः पादावुपसंगृह्य ब्रह्मचार्यभिवादयते । यथा । अभिवादये देवशर्माहं भोः । "इत्येवमभिवादयेत्" ॥ आयुष्मान्भव सौम्य देवशर्म ३ न् "इति प्रत्यभिवादनम्" ॥

---

१ तत्प्रमाणाम्

व्यत्यस्तपाणिना कार्यमुपसंग्रहणं गुरोः । सव्येन सव्यः स्प्रष्टव्यो दक्षिणेन तु दक्षिणः ॥ अभिवादात्परं विप्रो ज्यायांसमभिवादयेत् । असौ नामाहमस्मीति स्वं नाम परिकीर्तयेत् ॥ भोः शब्दं कीर्तयेदन्ते स्वस्य नाम्नोऽभिवादने । नाम्नः स्वरूपभावो हि भोर्भाव ऋषिभिः स्मृतः ॥ आयुष्मान्भव सौम्येति वाच्यः प्रत्यभिवादने । अकारश्चास्य नाम्नोन्ते वाच्यः पूर्वाक्षरप्लुतः । यो न वेत्त्यभिवादस्य विप्रः प्रत्यभिवादनम् । नाभिवाद्यः स विदुषा यथा शूद्रस्तथैव सः ॥) देवस्य ते सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां हस्तं गृह्णामि असौ अमुकशर्म ३ न् उंपनयेऽसौ अमुकस्वामिन् ॥ सविता ते हस्तमग्रहीत् अमुकच्छन्दः! अग्निराचार्यस्तवामुकदेव कस्त्वां कमुपनयेऽसौ अमुकशर्मन्! काय त्वा परिददामि अमुकदेव! कस्य ब्रह्मचार्यसि । प्राणस्य ब्रह्मचार्यस्मी " ति प्रत्याह " । एवं । प्रजापतये त्वा परि-

१ प्रत्यभिवादनानन्तरं दक्षिणं साङ्गुष्ठं ब्रह्मचारिहस्तं गृह्णाति अत्रासौशब्दस्थाने सम्बुद्ध्यन्तं नाम सर्वत्र ब्रह्मचारिणो ग्राह्यम् ।

ददामि । देवाय त्वा सवित्रे परिददामि । बृहस्पतये त्वा परिददामि असौ अमुकदत्तः ॥ देव! सवितरेष ते ब्रह्मचारी तं गोपायस्व दीर्घायुः स मामृत ।१। अग्निपुत्रैष ते० । २ । वयुपुत्रैष ते० ।३। सूर्यपुत्रैष ते० ।४। विष्णुपुत्रैष ते० ।५। ब्रह्मपुत्रैष ते० ।६। (ततो ब्रह्मचार्यसि इति पञ्चभिरनुशास्ति । बाढमिति प्रत्याह ॥) ब्रह्मचार्यसि । अपोशान । कर्म कुरु । दिवा मा सुष्वप्सीः । वाचं यच्छ । मेधां मह्यमिति वाचयति । मेधां मह्यमङ्गिरसो मेधां सप्तर्षयो दधुः । मेधामग्निश्च वायुश्च मेधां धाता दधातु मे । १ । मेधां मे वरुणो राजा मेधामग्निर्ददातु मे । मेधामिन्द्रश्च सूर्यश्च मेधां देवी सरस्वती ।२। या मेधा अप्सरस्सु गन्धर्वेषु च यन्मनः । दैवी [1]मानुषी या मेधा सा मामाविशतादिह । ३ । शरीरं मे विचक्षणं वाङ्मे मधुमद्दुहे । निशामितं निशामये मयि श्रुतम् ।४

[1] मनुष्ये ।

यन्मेऽनूक्तं तद्रमतां शकेयं यदनु ब्रुवे, [1]प्रियाः श्रुतस्य भूयास्म मेधया संविधीमहि । अवृधमहमवृधस्त्वमसौ सौम्य प्राणस्तन्मे गोपाय [2]ब्रह्मणस्तवृणी स्थ श्रुतं मे मा प्रहासीत् ॥ ५ ॥ (ततो हस्तौ विमुच्य) । बालकस्य आज्यदर्शनम् ॥ आत्मनोवाङ्० मेधायै सरस्वत्यै छन्दोभ्यः उपायनदेवताभ्यः अग्नये वैश्वानराय इदमाज्यमर्पयामि नमः ॥ (एताभिरेव चतसृभिरनुप्रवचनीयाज्जुहुयात् यजुषोत्तमां छन्दोभ्यः स्वाहेति ऋतुनामधेयेन च यथोपाचरितः ऋतुर्भवति एवं वेदोक्तानि सर्वाणि । मेधां मह्यमिति सप्त प्रधानाहुतीर्वैश्वदेवीं च चतुर्गृहीतेनाज्येन जुहुयात्) ॥ मेधां मह्यमङ्गि० ॥ १ ॥ मेधां मे वरुणो राजा० ।२ या मेधा अप्सरःसु० ॥३॥ शरीरं मे० ॥४॥ यन्मेऽनूक्तं० ॥ ५ ॥ छन्दोभ्यः स्वाहा ॥७॥ उपायनाय स्वाहा ॥७॥ ये के च ज्मा । ८। पश्चादग्नेर्दर्भेषु प्राङासीनः प्रत्यङ्ङासीनाय तत्सवितुरिति सावित्रीं

---

१ प्रियः श्रुतस्य भूयासम् । २ ब्रह्मण अणी स्थ ।

त्रिरन्वाह ॥ तां सवितुरिति राजन्याय । विश्वारूपाणीति वैश्याय । "अधीहि भोः सावित्रीत्रिजपपूर्वानुपायनव्रतमन्त्रान्मे भवाननुब्रवीतु" ॥ विश्वामित्र ऋषिश्छन्दो गायत्रं सविता तथा । देवतोपनये जप्ये गायत्र्या योग उच्यते । आवाहयामि गायत्रीं सर्वपापप्रणाशिनीम् ॥ न गायत्र्याः परं जप्यं न व्याहृतिसमं हुतम् । आगच्छ वरदे देवि जपे मे सन्निधौ भव ॥ गायन्तं त्रायसे यस्माद्गायत्री त्वं ततः स्मृता । [1]गायत्र्या शिखामाबद्ध्य। "ओजोसीति" गायत्रीमावाह्य देवानामार्षम् । ओजोसि सहोसि बलमसि भ्राजोसि देवानां धाम नामासि विश्वमसि विश्वायुः सर्वमसि सर्वायुरभिभूः । तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥

पच्छः । अर्धर्चशः । सर्वामन्ततः ॥ "इति ब्राह्मणस्य" (प्रथमोच्चारणे पादं पादं ब्रूयात्, द्वितीयोच्चारणे अर्धमर्धं, तृतीयोच्चारणे सर्वाम्,)

---

१ गुरुरेव गायत्रीमन्त्रेण कुशाग्रेण सहितां शिखां बध्नीयात् ।

(तां सवितुर्वरेण्यस्य चित्रामहं वृणे सुमतिं विश्वजन्याम् । यामस्य कण्वो अदुहत्प्रपीनां सहस्रधारां पयसा महीं गाम् "इति राजन्यस्य" विश्वारूपाणि प्रतिमुञ्चते कविः 'प्रसावीद्भद्रं द्विपदे चतुष्पदे । वि नाकमख्यत्सविता वरेण्योऽनु प्रयाणमुषसो विराजति ॥ "इति वैश्यस्य ॥)

[अत्र सावित्रीमन्त्रोपदेशः प्रणवरहित एवोपपद्यते ॥ अधीहि भोः सावित्रीत्रिजपपूर्वानित्यादि प्रार्थनायां प्रणवानिर्देशात् — ओंभूर्भुवःस्वरित्युपदेशकाले व्याहृतिभिरेव सह प्रणवस्य पूर्वं प्रयुक्तत्वाच्च । सावित्रीमन्त्रस्य च सर्वत्र प्रणवरहितस्यैव 'तदित्यृचोऽस्याः सावित्र्या इति तत्पदप्रतीकारम्भेणैव निर्दिष्टत्वात् । अन्यथा 'सव्याहृतिं सप्रणवां गायत्रीं,- इति 'ओंकारं पूर्वमुच्चार्य, इत्यादिना प्राणायामे जपे च पृथक् प्रणवो न निर्दिश्येत । व्रतशिक्षायां 'ओंभूर्भुवःस्वरित्युक्त्वा तत्सवितुरिति सावित्रीमनुब्रूयाः, इत्युक्तत्वाच्च । चतुर्विंशतिरेवाक्षराणि सावित्र्या इति चात्र ध्यातव्यम । तां सवितुरित्यादिमन्त्रयोरपि न प्रणवः संयोज्यते । न चात्र विषये प्रणवयोजनायां काचिद्विशेषसूचना । ब्राह्मणः प्रणवं कुर्यादादावन्ते च सर्वत्रेति तु वेदाध्ययनस्यैवारम्भान्तयोरिति ॥]

१ प्रासावीदित्यपि पाठः

"यश्च मेधाकामः स्यात्" ॥ "पालाशमेक[1]सरं दण्डं नवनीतेनाभ्यज्य तस्य च्छायायां वा[2]चयति" ॥ सुश्रवः सुश्रवा असि यथा त्वं सुश्रवा अस्येवं मा सुश्रवः सौश्रवसं कुरु । यथा त्वं सुश्रवो देवानां वेदस्य निधिगोपोसि । एवमहं ब्राह्मणानां ब्राह्मणो वेदस्य निधिगोपो [3]भूयासम् ॥ (इति पालाशं दण्डं ब्राह्मणाय प्रयच्छति ॥ आश्वत्थं राजन्याय । नैयग्रोधं वैश्याय) ॥ स्मृतं च मे० इति वाचयति ॥ "स्मृतं निन्दा च विद्या च श्रद्धा सत्यं तथैव च । मृतं श्रुतं व्रतं चैवमित्यष्टावुभयव्रतम्" । स्मृतं च मे अस्मृतं च मे तन्मे उभयव्रतम् ।१। निन्दा च मे अनिन्दा च मे तन्मे उभयव्रतम् ।२। विद्या च मे अविद्या च मे तन्मे उ० ।३। श्रद्धा च मे अश्रद्धा च मे० ।४। सत्यं च मे असत्यं च० ।५। मृतं च मे अमृतं० ।६। श्रुतं च मे अश्रुतं च मे० ।७। व्रतं च मे अव्रतं च मे तन्मे उभय-

१ अवान्तरशाखारहितम् २ स्वहस्तेन गृहीत्वा गुरुः, तस्य छायायां शिष्यं व्यवस्थाप्य वाचयति ॥ ३ क्वचित् भूयांसमित्यपि पाठो विधिलिङि वैदिक्या प्रक्रिययोपसर्गव्यत्ययेन शपोऽभावे च संभूयामिति स्यात् । संभवेय मिति लौकिकप्रयोगः,

व्रतम् ।८। यद्ब्राह्मणस्य ब्रह्मणि व्रतं, यदग्नेः सेन्द्रस्य सप्रजापतिकस्य सर्षिकस्य सपितृकस्य समनुष्यस्य समनुष्यराजन्यस्य सगन्धर्वाप्सरोजनस्कस्य ससर्पेतरजनस्कस्य सौषधिवनस्पतिकस्य सहग्राम्यैश्च पशुभिरारण्यैश्च साकाशस्य सप्रकाशस्य सानूकाशस्य सातीकाशस्य सह यन्मे आत्मन आत्मनि व्रतं तन्मे सर्वव्रतमिदमहमग्नौ समिधमभ्यादधाम्यग्ने सर्वव्रतो भवामि ॥ अधीते हैतेषां वेदानामेकं द्वौ त्रीन्सर्वान्वायमेवं विद्वानुपनयते इतिश्रुतिः ॥ (प्रतिगृह्येप्सितं दण्डमुपस्थाय च भास्करम् । प्रदक्षिणं परीत्याग्निं चरेद्भैक्षं यथाविधि ॥ भवत्पूर्वं चरेद्भैक्षमुपनीतो द्विजोत्तमः । भवन्मध्यं तु राजन्यो वैश्यस्तु भवदुत्तरम् ॥ ऋतुनक्षत्रयागात्प्राग्भैक्षस्याचरणं विदुः । मातरं वा स्वसारं वा मातुर्वा भ-

---

१ आदौ वामकरे पात्रं दण्डमादाय दक्षिणे । ततः प्रसन्नहृदयः कुर्याद्भिक्षाटनं शुभम् भिक्षाकाले यदा रिक्तं पात्रं सन्दर्शयेद् बुधः । ब्रह्महत्यासमं पापं प्राप्नोत्यत्र न संशयः॥ स्वस्तीति ब्राह्मणो ब्रूयादायुष्मानिति भूमिपः । वर्धतामिति वैश्यश्च शूद्रस्तु स्वागतं वदेत् ॥ भवति भिक्षां देहीति ब्राह्मणविषये, भिक्षां भवति देहीति राजन्ये, भिक्षां देहि भवतीति वैश्यविषयः ।

गिर्नीं निजाम् ॥ भिक्षेत भिक्षां प्रथमं या चैनं नावमानयेत् ॥ सुवर्णं रजतं वापि सा पात्रे तस्य निक्षिपेत् । समाहृत्य तु तद्भैक्ष्यं यावदर्थममायया । निवेद्य गुरवेऽश्नीयादाचम्य प्रयतः शुचिः ॥ ब्राह्मणस्य धनं भिक्षा क्षत्रियस्य धनुर्धनम् । वैश्यस्य कृषिवाणिज्यं शूद्रस्य सेवनं स्मृतम् ॥) भवति भिक्षां देहि स्वस्ति ॥ "इति स्त्रीविषये" । भो भिक्षां देहि स्वस्ति ॥

"इति पुंविषये" ॥ तत आदौ पितृयज्ञोपवीतं पश्चात्तद्भिक्षा ॥ ततः सर्वेषां बान्धवानां च भिक्षा ॥ ततः ऋतुतिथ्यादियाग तन्त्रं समाप्तिः ॥ ततो [1]ब्राह्मणपूजनम् । ओंभूर्भुवः स्वः० ३ ।

---

१ मातरिश्वना कश्चित्पृष्टः—दैव्यस्य होतुरग्ने र्यद्विज्ञानं तत्किमयं ब्राह्मणो मनुष्यहोता यज्ञमुपायन् बिभर्ति, स तं प्रत्याह—यावन्मात्रमुषसो न प्रतीकं सुपर्ण्यो वसते मातरिश्वः । तावद्दधात्युपयज्ञमायन् ब्राह्मणो होतरवरो निषीदन् ॥ ऋ० सं० ८,४, १३,४निरुक्तस्याध्याय७ खण्ड ३१ ॥ अतो दैव्याद्धोतुरग्नेरवरो—यविष्ठो होतृत्वे वृतो ब्राह्मणः । दुर्गाचार्योपि "दैव्यस्याग्नेःपरस्य भूयोविदोऽवरोऽन्योऽल्पविदित्यनुकरोत्यल्पम् ॥ इति मानुषो ह्यग्न्यनुग्रहादेवायमल्प विज्ञानापि होता हौत्रं करोति" इति व्याख्यातवान् इति बहुत्र निरूपितमस्ति ॥ अतोऽध्वर्यु [ब्राह्मण] पूजने "गन्धादौ अग्नये यविष्ठायेति" न समीचीनम् ॥ किन्तु "अग्नेर्यविष्ठाय" इत्येव ॥ (षष्ठ्यन्तमेवात्र सर्वत्राग्निपदं प्रयोज्यम् इति तात्पर्यम्)

अथ तावत्० अग्नेर्यविष्ठस्य सानुचरस्यादित्यस्येत्यादि मेधायाः सरस्वत्याः छन्दसामुपायनव्रतदेवतानां आत्मनो० मौञ्जीबन्धननिमित्तमर्चामहं करिष्ये ओंकुरुष्व । दक्षिणान्तं । दक्षिणां दत्त्वा ब्राह्मणपूजनाच्छिद्रं पूर्ववत्कर्तव्यम् ॥ कर्त्रे वरं दद्यादहः शेषं स्थापयेत् । व्याख्यातं ब्रह्मचर्यम् ॥ पूर्णां दत्त्वा । विमुच्य नयामि० ॥ पुनरग्निं परिसमुह्य पर्युक्ष्य ६ ॥

अथ व्रतशिक्षा ॥ ब्रह्मचारी बाढमिति प्रत्याह । उपनयनप्रभृति व्रतचारी स्याः । मार्गवासाः स्याः, संहृतकेशः स्याः, भैक्षाचार्यवृत्तिः स्याः, सवल्कदण्डः स्याः, सप्तमुञ्जां मेखलां धारयेः, न मधुमांसे अश्नीयाः, क्षारलवणवर्जी स्याः, आचार्यस्याप्रतिकूलः स्याः, सर्वकार्यास्वतन्त्रः स्याः, पूर्वोत्थायी स्याः, जघन्यसंवेशी स्याः, यदेनमुपेयात्तदस्मै दद्याः, बहूनां येन संयुक्तस्तदस्मै दद्याः, नास्य शय्यामाविशेः, न रथमारुहेः, न संवक्षयेथाः, सर्वाणि सांस्पर्शकानि स्त्रीभिः सह वर्जयेः, न मुषितां प्रेक्षेः,

न विहारार्थं जल्पेः, न रुच्यर्थं किञ्चन धारयेथाः, न स्नायाः, उदकं वाभ्युपेयाः, यदि स्नाया दण्ड इवाप्सु परिप्लवेथाः, मुण्डो भव, जटिलो भव, एकशिखी वा भव, सायं प्रातः सन्ध्यामुपासीथाः, तिष्ठेः पूर्वामासीथा उत्तराम्, ओंभूर्भुवःस्वरित्युक्त्वा तत्सवितुरिति सावित्रीमनुब्रूयाः, प्रागस्तमयान्निष्क्रम्य समिध आहरेः ; हरिणीर्ब्रह्मवर्चसकाम इति श्रुतिः । सायं प्रातः सन्ध्यानिःसरणं कर्तव्यम्, भैक्षाचरणं कर्तव्यम्, अग्नीन्धनं कर्तव्यम्, सायमेवाग्नीन्धनमित्येके ॥ भैक्षस्याचरणे दोषः पावकस्यासमिन्धने । सप्तरात्रमकृत्वैतदवकीर्णिव्रतं चरेत् ॥ सप्तागारं चरेद्भैक्षं स्वकर्म परिकीर्तयन् । तेभ्यो लब्धेन भैक्षेण वर्तयेदेककालिकम् । उपस्पृशंस्त्रिषवणमब्देन स विशुद्ध्यति ॥ कामावकीर्णोस्म्यवकीर्णोस्मि कामकामाय स्वाहा । १ । कामाभिद्रुग्धोस्म्यभिद्रुग्धोस्मि कामकामाय स्वाहा । २ । "इत्यवकीर्णिव्रतम्" इति व्रतशिक्षा ॥ [अथ शौचशिक्षा] ॥ उपनीय गुरुः शिष्यं शि-

क्षयेच्छौचमादितः । आचारमग्निकार्यं च सन्ध्योपासनमेव च । प्रतिश्रयाद्दक्षिणपश्चिमेन क्षिप्रं गत्वा क्षेपमात्रं शरस्य । कृत्वा पुरीषं च शिरोऽवगुण्ठ्य न तु स्पृशेज्जातु शिरः करेण ॥ शुष्कैस्तृणैर्वा काष्ठैर्वा पर्णैः पत्रदलेन वा । सुसंवृते प्रदेशे वा ह्यन्तर्धाय वसुन्धराम् ॥ मूत्रोच्चारसमुत्सर्गं दिवा कुर्यादुदङ्मुखः । दक्षिणाभिमुखो रात्रौ सन्ध्ययोश्च यथा दिवा । एका लिङ्गे गुदे तिस्रस्तथा वामकरे दश । उभयोः सप्त दातव्या मृदः शुद्धिमभीप्सता ॥ एकां लिङ्गे मृदं दद्याद्वामहस्ते तु मृत्त्रयम् । उभयोर्हस्तयोर्द्वे तु मूत्रशौचं प्रचक्षते ॥ विप्रे गौरमृदः शौचे क्षत्रे रक्ताः प्रकीर्तिताः । हरिद्र्वर्णा वैश्ये तु कृष्णाः स्त्रीशूद्रयोः स्मृताः ॥ नाहरेन्मृत्तिकां वप्रान्न कूलात्सैकतात्तथा । नाखुकृष्टान्न वल्मीकात्पांसुलान्नच कर्दमात् ॥ न मार्गान्नोषराच्चैव शौचशिष्टां परस्य नो । एतच्छौचं गृहस्थानां द्विगुणं ब्रह्मचारिणाम् ॥ त्रिगुणं तु वनस्थानां यतीनां तु चतुर्गुणम् ॥ दिवाशौचस्य रात्र्यर्धं पथि

पादो विधीयते । आर्तः कुर्याद्यथाशक्ति स्वस्थः कुर्याद्यथोदितम् होमे भोजनकाले च सन्ध्ययोरुभयोरपि । आचान्तः पुनराचामेदन्यत्र तु सकृत्सकृत् ॥ इति शौच शिक्षा ॥

अथ सन्ध्योपासनविधिः ।

ॐश्रीमहागायत्र्यै नमः सावित्र्यै नमः
सरस्वत्यै नमः

ॐप्रणवस्य ऋषिर्ब्रह्मा–इत्यादि ॥ ततः प्राणायामः ॥ अग्निश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षन्तां यदह्ना पापमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना अहस्तदवलुम्पतु यत्किञ्चिद् दुरितं मयीदमहममृतयोनौ सत्ये ज्योतिषि जुहोमि स्वाहा ॥ सूर्यश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षन्तां यद्रात्र्या पापमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना रात्रिस्तदवलुम्पतु यत्किञ्चिद् दुरितं मयीदमहममृतयोनौ सूर्ये ज्योतिषि जुहोमि स्वाहा ॥ आपः पुनन्तु

पृथिवीं पृथिवी पूता पुनातु मां पुनातु ब्रह्मणस्पतिर्ब्रह्म पूतं पुनातु मां यदुच्छिष्टमभोज्यं च यद्वा दुश्चरितं मम सर्वं पुनन्तु मामापोऽसतां च प्रतिग्रहं जुहोमि स्वाहा ॥ ओं आपो हि ष्ठा मयोभुवः । (हृदय पर) ओं ता न ऊर्जे दधातन । (पादों पर) ओं महे रणाय चक्षसे । (ललाट पर) ओं यो वः शिवतमो रसः । (ललाट पर) ओं तस्य भाजयतेह नः । (पादों पर) ओं उशतीरिव मातरः । (हृदय पर) ओं तस्मा अरं गमाम वो । (ललाट पर) ओं यस्य क्षयाय जिन्वथ । (हृदय पर) ओं आपो जनयथा च नः । (पादों पर) हिरण्यवर्णाः शुचयः पावका यासु जातः कश्यपो यास्विन्द्रः । या अग्निं गर्भं दधिरे विरूपास्ता न आपः शंस्योना भवन्तु ॥ यासां देवा दिवि कृण्वन्ति भक्षं या अन्तरिक्षे बहुधा भवन्ति । या अग्निं गर्भं० ॥ यासां राजा वरुणो याति मध्ये सत्यानृते अवपश्यञ्जनानाम् । या अग्निं गर्भं० ॥ शिवेन मा चक्षुषा पश्यतापः शिवया तन्वोपस्पृशत त्वचं मे मधुश्च्युतः शुचयो याः पावकास्ता न आपः

शंस्योना भवन्तु ॥ शन्नो देवीरभीष्टय आपो भवन्तु पीतये शंय्यो-
रभिस्रवन्तु नः ॥ शन्न आपो धन्वन्याः शन्नः सन्त्वनूप्याः । शन्नः-
समुद्रिया आपः शमु नः सन्तु कूप्याः ॥ आपो अस्मान्मातरः
शुन्धयन्तु घृतेन मा घृतप्वः पुनन्तु । विश्वं हि रिप्रं प्रवहन्ति देवी-
रुदिदाभ्यः शुचिरापूतएमि ॥ इदमापः प्रवहत यत्किंचिद् दुरितं
मयि । यद्वाहमभिदुद्रोह यद्वा शेप उतानृतम् । मुञ्चन्तु मा शपथ्या
दथो वारुण्यादुत । अथो यमस्य पड्वीशात्सर्वस्माद्देवकिल्बिषात् ॥
यज्जाग्रद्यत्सुप्तः पापमभिजगाम सर्वस्मान्मा तस्मादेनसः प्रमुञ्चतु ॥
दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः । सुरभि नो मुखा
करत्प्राण आयूंषि तारिषत् ॥ द्रुपदादिवोन्मुमुचानः स्विन्नःस्ना-
त्वीर्मलादिव । पूतं पवित्रेणेवाज्यमापः शुन्धन्तु मैनसः ॥ ऋतं च
सत्यं चाभीद्धात्तपसोऽध्यजायत ततो रात्रिरजायत ततः समुद्रो
अर्णवः समुद्रादर्णवादधि संवत्सरो अजायत अहोरात्राणि विद-
धद्विश्वस्य मिषतो वशी सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्

दिवं च पृथिवीं चान्तरिक्षमथो स्वः ॥ ओं भूः ओं भुवः ओं स्वः ओं महः ओं जनः ओं तपः ओं सत्यम् ओं अन्तश्चरसि भूतेषु गुहायां विश्वतोमुखः । त्वं यज्ञस्त्वं वषट्कार आपो ज्योती रसोमृतं ब्रह्म भूर्भुवः स्वरोम् ॥ (प्राणायामः) त्रीञ्जलाञ्जलीन्क्षिपेत् ॥ ओं भूर्भुवः स्वस्तत्सवितुः० ॥ उपस्थानम् । उद्वयन्तमस० । उदु त्यञ्जात० । चित्रन्देवाना० । तच्चक्षुर्देवहितं० । हंसः शुचिषद्० । विभ्राड्बृहत्पिवतु सोम्यं मध्वायुर्दधद्यज्ञपतावविह्रुतम् । वातजूतयो अभिरक्षातित्मना प्रजाः पिपर्त्ति बहुधा विराजति ॥ पुरुषसूक्तम् १६ मन्त्राः ॥ ओं यज्जाग्रतो दूरमुदेति दैवं तदु सुप्तस्य तथैवेति । दूरंगमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसंकल्पमस्तु ।१। येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः । यदपूर्वं यक्षमन्तः प्रजानां तन्मे मनः शिव० ।२। यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु । यस्मान्न ऋते किञ्चन कर्म क्रियते तन्मे मनः शिव० । येनेदं भूतं भुवनं भविष्यत्परिगृहीतममृतेन सर्वम् । येन यज्ञस्ता-

यते सप्त होता तन्मे मनः शिव०।४। यस्मिन्नृचः साम यजूंषि यस्मिन्प्रतिष्ठिता रथनाभाविवाराः। यस्मिंश्चित्तं सर्वमोतं प्रजानां तन्मे मनः शिव० ।५। सुषारथिरश्वानिव यन्मनुष्यान्नेनीयतेऽभीषुभिर्वाजिन इव। हृत्प्रतिष्ठं यदजरं जविष्ठं तन्मे मनः शिव० ।६। अथ य एष एतस्मिन्मण्डले पुरुषो यश्चैष हिरण्मयः पुरुषः। अथ य एष एतस्मिन्मण्डले पुरुषोऽयमेव सोऽयं दक्षिणेऽक्षन्पुरुषः॥ शुक्रियं रुद्रस्य यउद्गात् पुरस्तात्० ॥ अनाभौ इत्यादि सर्वम् ॥ तत् समाय नमः स सम्पुटाय नमः। वि विततय नमः। तु विस्तीर्णाय नमः। व द्विमुखाय नमः। रे त्रिमुखाय नमः। ण्य चतुर्मुखाय०। भं पञ्चमुखाय०। भ षण्मुखाय०। गों अधोमुखाय०। दे व्यापकाञ्जलये०। व शकटाय०। स्य यमपाशाय०। धी ग्रन्थिकायै०। म संमुखोन्मुखाय०। हि विलम्बाय०। धि मुष्टिकायै०। यो मीनाय०। यो कूर्माय०। नः वराहाय०। प्र सिंहाक्रान्ताय०। चो महाक्रान्ताय०। द मुद्गराय०। यात् पल्लवाय नमः॥ ततः प्राणायामः॥ तत्सवितुरिति मन्त्रस्य,

विश्वामित्र ऋषिः गायत्रं छन्दः, सविता देवता, आत्मनो० जपे विनियोगः ॥ ध्यानं, मुक्ताविद्रुम० । ओं भूर्भुवःस्वस्तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ओं ॥ इति जपः । तदन्ते । प्राणायामः । देवा गातुविदो इति तर्पणम् । महेशवचनोत्पन्ने० नमः प्राच्यै दिशे याश्च देवता एतस्यां प्रतिवसन्त्येताभ्यश्च वो नमः । नमोऽवान्तरायै० । नमो दक्षिणायै० । नमोऽवा० । नमः प्रतीच्यै० । नमोऽवा० । नम उदीच्यै० । नमोऽवा० । नम ऊर्ध्वायै० । नमोऽधरायै ॥ नमो ब्रह्मणे नमोस्त्वग्नये इत्यादि० । ओं नमो देवेभ्य इत्यादि ॥ नमो धर्म निधानायेत्यादि ॥

अथाग्निं परिषिञ्चामि ३ । " नात्र परिस्तरणं " विभूरसीत्यनुवाकेनाग्निमुपस्थाय । (धिष्ण्यानामङ्गिरसामग्निगणानां चार्षम् ।) विभूरसि प्रवाहणो वह्निरसि हव्यवाहनः श्वात्रोसि प्रचेतास्तुथोसि विश्ववेदा उशिगसि कविरङ्घारिरसि बम्भारिरवस्युरासि दुवस्वाञ्छुन्ध्युरसि मार्जालीयः सम्राळसि कृशानुः परिषद्योस्याः

स्तव्यो नभोसि प्रतक्वा समृष्टोसि हव्यसूदन ऋतधामासि स्व-
र्ज्योतिः समुद्रोसि विश्वव्यचा अजोस्येकपादहिरसि बुध्न्यः क-
व्योसि कव्यवाहनो रौद्रेणानीकेन पाहि माग्ने पिप्रीहि माग्ने
नमस्ते अस्तु मा मा हिंसीः । (तत उपाविश्य) । एधोसीति
समिध आदधाति । विहव्यस्याङ्गिरसस्यार्षम् ॥ एधोस्येधिषीमहि ।
"इति प्रथमां" । समिदसि समिधिषीमहि "इति द्वितीयां" ॥
इदमहमग्नौ समिधमभ्यादधाम्यग्ने सर्वव्रतो भवामि "इति तृ-
तीयां" ॥ इदमहमग्नौ समिधमाहार्षं बृहति जातवेदसि स मे
श्रद्धां च मेधां च दीर्घं चायुर्जातवेदाः प्रयच्छतु "इति चतुर्थीम्"
तेजोसीत्यग्निमनुमन्त्रयते ॥ तेजोसि तेजो मयि धेहीत्यात्मानं हृद-
यदेशे । शेषेणोपतिष्ठते ॥ विहव्यस्याङ्गिरसस्य । अपो अद्यानु-
चारिषं रसेन समगन्महि । पयस्वानग्न आगमन्तम्मा संसृज
वर्चसा । सं माग्ने वर्चसा सृज प्रजया च धनेन च । विद्युर्मे
अस्य देवा[1] इन्द्रो विद्यात्सहर्षिभिः इत्युपस्थानम् ॥ तत उप-

१ य इन्द्रो ।

विश्य ॥ ततः प्रातः प्रागुदयाद्द्वादश चतुर्विंशतिं षट्त्रिंशतमष्टचत्वारिंशतं वा वर्षाणि यो ब्रह्मचर्यं चरति मलज्जुरबलः कृशः सर्वं स विन्दते स्नात्वा, यत्किञ्चिन्मनसेच्छति, एतेनैव धर्मेण साध्वधीते । अग्निं विमुच्य ३ । नयामि । "इत्यग्नीन्धनम्" ॥ इत्युपायनम् ॥ १० ॥

अथ त्रैविद्यकम् ॥ अग्निं परिसमुह्य पर्युक्ष्य परिषिच्य ॥ आदौ पञ्च० । उत्तरतः सं० ॥ नास्ति निर्वपणम् । पृश्न्याः पयोसि० । आज्यदर्शनम् । आत्मनो० छन्दोभ्यः । त्रैविद्यकाय इदमाज्यमर्पयामि नमः ॥ आज्यभागान्तं हुत्वा । [त्रैविद्यकम् आचार्यस्य विधिर्यो वेदमधीते पुरस्ताद्योपरिष्ठाद्वांहोमुग्भिः समिधोभ्यादध्यादुक्तं व्रतोपायन–विमोचनम् ॥ वसनं मेखलां चर्म दण्डं समिधमेव च । व्रतालम्भं प्रधानं च कुर्यात्सर्वव्रतेष्वपि ॥ यद्यस्य विहितं चर्म यत्सूत्रं या च मेखला । यो दण्डो यच्च वसन तत्तत्सर्वव्रतेष्वपि] ॥ रेवतीस्त्वा० । इयं दुरुक्तात्० । मित्रस्य चक्षुः०।

सुश्रवः० । "इति वसनमेखलाजिनदण्डमप्सानावर्तयेत्" ॥ यद्देवा
देवहेळनमिति अंहोमुग्भिस्तिष्ठन्तं समिदाधानं कारयित्वा अग्ने-
व्रतपत इत्युपस्थापयति निचाकुणस्य ॥ यद्देवा देवहेळनं देवा-
सश्चकृमा वयम् । अग्निर्मा तस्मादेनसो विश्वान्मुञ्चत्वंहसः । १
यदि दिवा यदि नक्तमेनांसि चकृमा वयम् । वायुर्मा तस्मादेनसो
विश्वान्मुञ्चत्वंहसः ।२। यदि जाग्रद्यदि स्वप्न एनांसि चकृमा वयम् ।
सूर्यो मा तस्मादेनसो विश्वान्मुञ्चत्वंहसः ।३। अथ व्रतालम्भ यजूंषि
विहव्यस्याङ्गिरसस्य । तथाच तत्रत्यं सूत्रम्—पाणी प्रक्षाल्य दक्षिण-
तोऽग्नेस्तिष्ठन् ब्रूयात् इति ॥ उपस्थानम् । अग्ने व्रतपते व्रतमालभे
तत्ते प्रब्रवीमि तच्छकेयं तेनर्ध्यासम् ।१। वायो व्रतपते व्रतमालभे
तत्ते प्रब्रवीमि तच्छकेयं तेनर्ध्यासम् ।२। सूर्यव्रतपते व्रतमालभे तत्ते
प्रब्रवीमि तच्छकेयं तेनर्ध्यासम् ।३। इत्यालभ्य ॥ चतुर्गृहीतेना-
ज्यप्रधानम् । तेजोसि० ॥ ये के च ज्मा० । छन्दोभ्यः स्वाहा ।
त्रैविद्यकाय स्वाहा ॥ "पश्चादग्नेर्दर्भेषु आसीनं कृतपादोपसंग्र-

इत्थं गुरुः प्रणवं व्याहृतीश्चाध्यापयति । अधीहि भोः सावित्री-
त्रिजपपूर्वांश्चैविद्यकव्रतमन्त्रान्मे भवाननुब्रवीतु" ॥ ओंभूर्भुवःस्व-
स्त० ३ ॥ इषे त्वोर्जेत्वेति त्रीननुवाकान् । इषे त्वोर्जे त्वा वायवः
स्थोपायवः स्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मण आप्या-
यध्वमघ्न्या देवभागं प्रजावतीरनमीवा अयक्ष्माः मा वस्तेन
ईशत माघशंसः परि वो रुद्रस्य हेतिर्वृणक्तु ध्रुवा अस्मिन्गोपतौ
स्यात बह्वीर्यजमानस्य पशून्पाहि यजमानस्य पशुपा असि ।१।
देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे
गोषदसि प्रत्युष्टं रक्षः प्रत्युष्टारातिः प्रेयमगाद्धिषणा बर्हिरच्छ
मनुना कृता स्वधया वितष्टा उर्वन्तरिक्षं वीहीन्द्रस्य परिषूतमसि
माधो मोपरि परुस्त ऋध्यास मा च्छेत्ता ते मारिषत् देवबर्हिः
शतवल्शं विरोह सहस्रवल्शा वि वयं रुहेम आदित्या रास्नासी-
न्द्राण्याः सन्नहनं पूषा ते ग्रन्थिं ग्रथ्नातु स ते मा स्थादिन्द्रस्य त्वा
बाहुभ्यामुद्यच्छे बृहस्पते स्त्वा मूर्ध्नां हरामि देवङ्गमसि तदाहरन्ति

कवयः पुरस्ताद्देवेभ्यो जुष्टमिह बर्हिरासदे ।२। वसोः पवित्रमसि शतधारं वसूनां पवित्रमसि सहस्रधारमयक्ष्मा वः प्रजया संसृजामि रायस्पोषेण बहुला भवन्तीः । मधुमद्घृतवत्पिन्वमाना जीवा जीवन्तीरुप वः सदेम मातरिश्वनो घर्मोसि द्यौरसि पृथिव्यसि विश्वधायाः परेण धाम्नाहुतासि स्वाहाः सा विश्वायुः सा विश्वव्यचा सा विश्वधायाः हुतस्तोको हुतो द्रप्सोग्नये बृहते नाकाय स्वाहा द्यावापृथिवीभ्यां सम्पृच्यध्वमृतावरी ऊर्मिणा मधुमत्तमा मन्द्रा धनस्य सातयः इन्द्रस्य त्वा भागं सोमेनातनच्म्यदस्तमसि विष्णवे विष्णो हव्यं रक्षस्वापो जागृत ।३। यजुर्वेदो भवान् ॥ अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्, होतारं रत्नधातमम् ॥ अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत. स देवानिह वक्ष्यति ॥ अग्निना रयिमश्नवत्पोषमेव दिवे दिवे, यशसं वीरवत्तमम् ॥ अग्नेयं यज्ञमध्वरं विश्वतः परिभूरसि, स इद्देवेषु गच्छति ॥ अग्निर्होता कविक्रतुः सत्यश्चित्रश्रवस्तमः, देवो देवेभिरागमत् ॥ यदङ्ग दाशुषे

त्वमग्ने भद्रं करिष्यसि, तवेत्तत्सत्यमङ्गिरः ॥ उप त्वाग्ने दिवे दिवे दोषावस्तर्धिया वयम्, नमो भरन्त एमसि ॥ राजन्तमध्वराणां गोपामृतस्य दीदिविम्, वर्धमानं स्वे दमे ॥ स नः पितेव सूनवेग्ने सूपायनो भव, सचस्वा नः स्वस्तये ॥ "इत्यृक्संहिताद्यसूक्तम् ॥" "ऋग्वेदो भवान्" अग्न आयाहि वीतये० इति सामर्चं च वाचयित्वा ॥ अग्न आयाहि वीतये गृणानो हव्यदातये निहोता सत्सि बर्हिषि ॥ "सामवेदो भवान्" । नमो ब्रह्मणे नमो अस्त्वग्नये नमः पृथिव्यै नम ओषधिभ्यः नमो वाचे नमो वाचस्पतये नमो विष्णवे बृहते कृणोमीत्येतासामेव देवतानां सार्ष्टितां सायुज्यं सामीप्यं सलोकतामाप्नोति य एवं विद्वान्स्वाध्यायमधीते ॥ ३ ॥ इति परिधानीयांत्रिरन्वाह ॥ तत ऋतुतिथ्यादितंत्रसमाप्तिः विमुच्य० ३ ॥ नयामि ॥ इति त्रैविद्यकमन्त्राः ॥ ११ ॥

अथोपाकर्म ॥ अग्निं परिसमुह्य पर्युक्ष्य परिषिच्य ॥

चातुष्कोष्ठैः स्तरैःपरिस्तीर्य । (उपाकर्मणि चोत्सर्गे यथाकालं समेत्य च । ऋषीन्दर्भमयान्कृत्वा पूजयेत्तर्पयेत्ततः ॥ पूर्वापरावुदग्ग्रौ प्रागग्रौ दक्षिणोत्तरौ । चातुष्कोष्ठाः स्तरा ज्ञेयाः पित्र्ये दक्षिणपश्चिमौ ॥) पृश्न्याः पयोसि० । आज्यदर्शनम् ॥ आत्मनोवा० उपाकरणदेवताभ्य इदमाज्यमर्पयामि नमः ॥ अभ्युत्स्य पवित्रमग्नावभ्यादधाति स्रुवं प्रतिताप्य (यैःकैश्चिद्दर्भाग्रैः (उपयामरहितं) स्रुवं संसृज्य होमः ।) अप्वा नामासीऽत्यष्टौ स्रुवेणाज्याहुतीर्जुहुयात् । अप्वा नामासि तस्यास्ते जोष्ट्रीयं गमेयमहमिद्धमेधः परि मेधामृतस्य जगृभ[1] अहं सूर्य इवाजनि स्वाहा । १ । रन्तिर्नामासि तस्यास्ते० । २ । युक्तिर्नामासि तस्या० । ३ । योगो नामासि तस्यास्ते जो० । ४ । युजे स्वाहा । ५ । उद्युजे स्वाहा । ६ । युक्त्यै स्वाहा । ७ । योगाय स्वाहा । ८ । अन्तेवासिनां योगमिच्छन् ॥ दधि क्राव्णो० " इति त्रिर्दधि भक्षयित्वा (आत्मना दधि

---

१ जगृहुः इत्यपि पाठः । २ उपवेदग्रहणार्थं प्रज्ञातिशयसम्बन्धम् ॥

प्राश्यान्तेवासिनं च प्राशयित्वा)" ॥ पश्चादग्नेर्भैक्ष्यासीनं कृत-
पादोपसंग्रहणं गुरुः प्रणवं व्याहृतीश्चाध्यापयति ॥ अधीहि भोः
सावित्रीत्रिजपपूर्वानुपाकरणव्रतमन्त्रान्मे भवाननुब्रवीतु" ॥ ओंभू-
र्भुवःस्वस्तत्स० ॥३॥ इषे त्वोर्जे त्वा "इत्यनुवाकत्रयं हव्यं रक्ष-
स्वापो जागृतेत्यन्तं पठित्वा" ॥ कस्त्वा युनक्तीति घोराणामार्षम् ॥
कस्त्वा युनक्ति स त्वा युनक्तु विष्णुस्त्वा युनक्त्वऽस्य यज्ञस्य-
र्द्ध्यै मह्यं सन्नत्यै अध्ययनाय अमुष्मै कामायाऽऽयुषे त्वा प्राणाय
त्वा व्यानाय त्वाऽपानाय त्वा व्युष्ट्यै त्वा रय्यै त्वा राधसे त्वा
पोषाय त्वा घोषाय त्वाऽऽराद्धोषाय त्वा प्रच्युत्यै त्वा ॥ नमो
ब्रह्मणे० ।२। प्रागग्रानुदगग्रांश्च विंशतिसंख्याकानृषीन् संस्थाप-
येत् ॥ तत ऋषिपूजनम् ॥ संवः सृजामि० । अश्विनोः प्राण० ।
गायत्र्यै नमः । ओंभूर्भुवः स्वः० ३ अद्यतावत् । अग्नेः वायोः
सूर्यस्य ब्रह्मणः इन्द्रस्य प्रजापतेः भवस्य शर्वस्य ईशानस्य ईश्व-
रस्य विष्णोः बृहस्पतेः यजुर्वेदस्य छन्दसां ऋषीणां वेदानां ब्राह्म-

णानां सोमानां सोमपानां आचार्याणां विंशतिऋषीणां आत्मनो० सुतस्य मौंजीबन्धननिमित्तमर्चामहं करिष्ये ओंकुरुष्व ॥ एवमेव षष्ठ्यासनम् ॥ अग्नये वायवे सूर्याय ब्रह्मणे इन्द्राय प्रजापतये भवाय शर्वाय ईशानाय ईश्वराय विष्णवे बृहस्पतये यजुर्वेदाय छन्दोभ्यः ऋषिभ्यः वेदेभ्यः ब्राह्मणेभ्यः सोमेभ्यः सोमपेभ्यः आचार्येभ्यः विंशतिऋषिभ्यो युष्मान् पूजयामि ओंपूजय । अग्निं वायुं सूर्यं ब्रह्माणं इन्द्रं प्रजापतिं भवं शर्वं ईशानं ईश्वरं विष्णुं बृहस्पतिं यजुर्वेदं छन्दांसि ऋषीन् वेदान् ब्राह्मणान् सोमान् सोमपान् आचार्यान् विंशतिऋषीन् आवाहयिष्यामि ओमावाहय ॥ यवान्विकीर्य । शन्नो देवी० । लाजाश्च० । अग्नये वायवे [२०] विंशतिऋषिभ्यः पाद्यं नमः । पुनः शन्नो देवी० । आपः क्षीरं० । अग्ने वायो सूर्य ब्रह्मन् इन्द्र प्रजापते भव शर्व ईशान ईश्वर विष्णो बृहस्पते यजुर्वेद छन्दांसि ऋषयः वेदाः ब्राह्मणाः सोमाः सोमपाः आचार्याः विंशतिऋषयः इदं वोऽर्घ्यं नमः । एवं गन्धपु-

ष्पादि दक्षिणांतं ॥ नैवेद्यम् ॥ विमुच्य० ३ । नयामि० ॥ (अग्नेः समीपे दक्षिणतः स्थाप्याः) इत्युपाकरणम् ॥ १२ ॥

अथ चातुर्होतृकम् ॥ अग्निं परिसमुह्य पर्युक्ष्य परिषिच्य । आदौ पञ्च० ॥ उत्तरतः सं० । सावित्राणि० ॥ चतुर्होतृभ्यः छन्दोभ्यः चातुर्होतृकाय जुष्टं निर्वपामि । विष्णोर्मनसेति० । एवं प्रोक्षामि ॥ आज्यदर्शनम् । आज्यभागान्ते ॥ [अथातः चातुर्होतृकं ब्रह्मचारिकल्पेन व्रतमुपैति । संवत्सरमष्टौ मासांश्चतुरो मासान्वा शुद्धपक्षस्य पुण्याहे पर्वणि वा यथोक्तमुपसमाधाय जयप्रभृतिभिर्हुत्वा ॥ "ब्रह्मचारिणो वसनादिमन्त्रानावर्तयेत्"]॥ रेवतीस्त्वा० । इयं दुरुक्तात्० । मित्रस्य चक्षुः० । सुश्रवः सुश्रवाः० ॥ (पूर्वेणाग्निं गोमयपिण्डे षट्पञ्चाशता दर्भाङ्कुरैर्ब्रह्मप्रकृतिं दर्भस्तम्भं संस्थाप्यार्चयेत्) ॥ संवः सृजामि० । अश्विनोः० । ओंगायत्र्यै नमः ओंभूर्भुवःस्वः० । ३ । चतुर्मुखाय विद्महे कमण्डलुधराय धीमहि, तन्नो ब्रह्मा प्र० ३ अद्य तावत् । पृथिव्याः अग्नेः

ऋग्वेदस्य ब्रह्मणः छन्दसां । अन्तरिक्षस्य वायोः यजुर्वेदस्य ब्रह्मणः छन्दसां दिवः सूर्यस्य सामवेदस्य ब्रह्मणः छन्दसां दिशां चन्द्रमसः अथर्ववेदस्य ब्रह्मणः छन्दसां चतुर्मुखस्य ब्रह्मणः आत्मनो० सुतस्य मौञ्जीबन्धननिमित्तं अर्चामहं करिष्ये ओंकुरुष्व ॥ एवं षष्ट्यासनम् ॥ पृथिव्यै अग्नये ऋग्वेदाय ब्रह्मणे छन्दोभ्यः । अन्तरिक्षाय वायवे यजुर्वेदाय ब्रह्मणे छन्दोभ्यः । दिवे सूर्याय सामवेदाय ब्रह्मणे छन्दोभ्यः । दिग्भ्यः चन्द्रमसे अथर्ववेदाय ब्रह्मणे छन्दोभ्यः चतुर्मुखाय ब्रह्मणे त्वां पूजयामि ओंपूजय ॥ पृथिवीं अग्निं ऋग्वेदं ब्रह्माणं छन्दांसि । अन्तरिक्षं वायुं यजुर्वेदं ब्रह्माणं छन्दांसि । दिवं सूर्यं सामवेदं ब्रह्माणं छन्दांसि । दिशः चन्द्रमसं अथर्ववेदं ब्रह्माणं छन्दांसि चतुर्मुखं ब्रह्माणं आवाहयिष्यामि ओमावाहय ॥ आवाहयामि कमलासन संस्थितं तं मुद्रां श्रुतीः परिवहन्तमथाक्षसूत्रम् । दण्डं कमण्डलुमथो सततं वहन्तं ब्रह्माणमीश्वरपरं मखरक्षणार्थम् ॥ आवाहयाम्यहं देवं ब्रह्माणं

कमलोद्भवम् । कमण्डल्वक्षसूत्राभ्यामन्वितं हंसवाहनम् ॥ रक्त-
वर्णो० । ब्रह्मा देवानां० ॥ यवान्विकीर्य ॥ शन्नो देवी० । लाजाश्च०ः
पृथिव्यै० इत्यादि चतुर्मुखाय ब्रह्मणे पाद्यं नमः । (पुनः) शन्नो
देवी० । आपः क्षीरं० । पृथिवि अग्ने ऋग्वेद ब्रह्मन् छन्दांसि ।
अन्तरिक्ष वायो यजुर्वेद ब्रह्मन् छन्दांसि । द्यौः सूर्य सामवेद
ब्रह्मन् छन्दांसि । दिशः चन्द्रमः अथर्ववेद ब्रह्मन् छन्दांसि चतु-
र्मुख ब्रह्मन् इदं वोऽर्घ्यं नमः । एवं गन्धपुष्पादि नैवेद्यान्तम् ॥
[हिरण्यवर्णा इति चतसृभिः समिधोऽभ्यादध्यात्]॥ हिरण्य-
वर्णाः शुचयः० । १ । यासां देवा० । २ । यासां राजा० । ३ ।
शिवेन मा चक्षुषा पश्यतापः शिवया तन्वोपस्पृशत त्वचं मे मधु-
श्च्युतः शुचयो याः पावकास्ता न आपः शंस्योना भवन्तु ॥४॥
"पाणी प्रक्षाल्य"॥ अग्ने व्रतपते इत्युपस्थापयाति ॥ अग्ने व्रतपते
व्रतमालभे तत्ते प्रब्रवीमि तच्छकेयं तेनर्ध्यासम् । १ । वायो व्रत-
पते० । २ । सूर्य व्रतपते० । ३ । ब्राह्मणा व्रतपतयो व्रतमालभे

तद्वः प्रब्रवीमि० ।४। अथ व्रतहोमान् (वक्ष्यामः) ॥ (प्रधानानि स्थालीपाकस्य, चतुर्गृहीतैश्चतुर्होतृभिराज्येन तेजस्कामो, यावकेन पशुकामोऽन्नाद्येन वीर्यकामः पयसि स्थालीपाकं श्रपयित्वा, ब्रह्मवर्चसकामो मनसैकैकं हुतमनुमन्त्रयते) चित्तिः स्रुगिति सप्त प्रधानाहुतीर्जुहुयात्। चतुर्होतॄणामार्षम्। (तेजोसि०) चित्तिः स्रुक्चित्तमाज्यं वाग्वेदिराधीतं बर्हिः केतो अग्निर्विज्ञातमग्निर्वाचस्पतिर्होता मन उपवक्ता प्राणो हविः सामाध्वर्युरिन्द्रं गच्छ, स्वाहा । १ । मनसा, चित्तिः स्रुगित्यनुमन्त्रयते ॥ पृथिवी होता द्यौरध्वर्युस्त्वष्टाग्निन् मित्र उपवक्ता वाचस्पते वाचो वीर्येण सम्भृततमेनायक्ष्यसे यज्ञपतये वार्यमास्वस्करो वाचस्पतिः सोमं पिबतु जजनदिन्द्रमिन्द्रियाय स्वाहा सोमः सोमस्य पुरोगाः शुक्रः शुक्रस्य पुरोगाः श्रातास्त इन्द्र सोम वातापे हवनश्रुतः, स्वाहा २। मनसा, "पृथिवी होता" ॥ अग्निर्होताश्विनाध्वर्यू रुद्रोग्निदूबृहस्पतिरुपवक्ता वाचस्पते हृद्विधेनामन्वाचस्पतिः सोममपादा-

स्मासु नृम्णं धाः स्वाहा सोमः सोमस्य पुरोगाः शुक्रः शुक्रस्य पुरोगाः श्रातास्त इन्द्र सोम वातापे हवनश्रुतः स्वाहा । ३ । मनसा, "अग्निर्होता" ॥ वाग्घोता वातोध्वर्युर्दीक्षा पत्न्यापोऽभिगरो मनो हविस्तपसि जुहोमि वाचस्पतेऽच्छिद्रया वाचाऽच्छिद्रया जिह्वा दिवि देवा [1]मृधद्धोता मैरयस्व स्वाहा ।४। मनसा, "वाग्घोता" ॥ महाहविर्होता सत्यहविरध्वर्युरचित्तपाजा अग्निदचित्तमना उपवक्ता नाधृष्यश्चाप्रतिधृष्यश्चाभिगरा अयास्य उद्गाता वाचस्पते विधे नामन्विधेम ते नाम विधेस्त्वमस्माकं नाम मा देवानां तन्तुश्छेदि मा मनुष्याणां स्वाहा ।५। मनसा "महाहवि०"। छन्दोभ्यः स्वाहा ।६। मनसा छन्दोभ्यः। चातुर्होतृकाय स्वाहा ७। मनसा चातु० ॥ यद्वेदव्रतं तदत्र व्रतं, पञ्च विकाराननुक्रमिष्यामः ॥ ब्रह्मचारी बाढमिति प्रत्याह ॥ ब्रह्मचार्यसि, अपोऽशान, कर्म कुरु, दिवा मा [2]सुष्वप्सीः, वाचं यच्छ, न चतुर्भिः

१ वृधादित्यपि पाठः । २ स्वाप्सीः ।

सहासीथाः, न चतुर्णां समक्षं भुञ्जीथाः, न चतुर्भिः सह भुञ्जीथाः, एकतमो वा भुञ्जीथाः ॥ "पश्चादग्नेर्दर्भेषु० । अधीहि भोः सावित्रींस्त्रिजपपूर्वांश्चातुर्होतृकव्रतमन्त्रान्मे भवाननुब्रवीतु" ॥ ओंभूर्भुवः स्वस्तत्सवितुः० । चित्तिः स्रुगितिवाचयति ॥ चित्तिः स्रुक्० ।१। पृथिवी होता० ।२। अग्निर्होता० ।३। वाग्घोता० ।४। महाहविः० ।५। इति अनुवाकं वाचयित्वा, नमो ब्रह्मणे० "इति त्रिर्वाचयेत्" ॥ ऋतुतिथ्यादितन्त्रसमाप्तिः ॥ विमुच्य० । नयामि ॥ इति चातुर्होतृकम् ॥ १३ ॥

एवमेवापवर्गे वास आचार्याय ददाति वरं दक्षिणत आसीनाय ॥ अथापवर्गः । अग्निं परिसमुह्य पर्युक्ष्य परिषिच्य । आदौ पञ्च० । उत्तरतः सावित्राणि० चतुर्होतृभ्यः, छन्दोभ्यः, अपवर्गे चातुर्होतृकाय जुष्टं निर्वपामि । विष्णोर्म० ॥ एवं प्रोक्षामि । आज्यदर्शनम् ॥ आज्यभागान्ते । रेवतीस्त्वा "इत्यादि वसनादीननुमन्त्रयेत् । रेवतीस्त्वा० । इयं दुरु० । मित्रस्य चक्षुः० ।

सुश्रवः० ।" चित्तिः स्रुगिति सप्तप्रधानाहुतीर्जुहुयात् तेजोसि० । चित्तिः स्रुक् । १ । (मनसा) चित्तिः० ॥ पृथिवी होता । २ । (मनसा) पृथिवी० ॥ अग्निर्होता । ३ । (मनसा) अग्निर्होता० ॥ वाग्घोता ४ । (मनसा) वाग्घोता० ॥ महाहवि । ५ । (मनसा) महाहवि० ॥ छन्दोभ्यः स्वाहा । ६ । (मनसा) छन्दोभ्यः० ॥ अपवर्गे चातुर्होतृकाय स्वाहा । ७ । (मनसा) अपवर्गे चातु० ॥ प्रधानानन्तरं समिदाधानम् । हिरण्यवर्णाः शुचयः । १ । यासां देवा । २ । यासां राजा । ३ । शिवेनमा० । ४ । अग्ने व्रतपते "इत्युपस्थाय व्रतं विसृजेत् ।" अग्ने व्रतपते व्रतमचारिषं तदशकं तन्मे प्रब्रूमस्तन्नो गोपाय । १ । एवं वायो० । २ । सूर्य० । ३ । व्रतानां व्रतपतयो व्रतमचारिषं तदशकं तद्वः प्रब्रूमस्तन्नो गोपाय ॥४॥ (इहाग्न्यादीनां क्रमः समान एव ॥) तत ऋतुतिथ्यादितन्त्रसमाप्तिः । विसृज्य । नयामि । नात्र व्रतादेशः । न चतुर्होतृमन्त्रोपदेशः । इति चातुर्होतृकापवर्गः ॥ १४ ॥

चातुर्होतृकापवर्गादनन्तरमारण्यव्रतानि तानि चरितानि [व्रतशिक्षादौ] ॥

अथ प्रवर्ग्यव्रतम् । अथात्र व्रतविधिः । (सर्वत्र रहस्यमन्त्रप्रयोगे प्रपत्तिं मार्जनं चोर्ध्वं वेदव्रतादविच्छिन्नं प्रवर्ग्यव्रतं चरिष्यंस्त्रीणि वर्षाणि द्विसंवत्सरं वापराह्णेऽधिवृक्षसूर्ये ग्रामस्यासन्निकाशे उदक्रान्तेऽग्निं प्रज्वाल्य तत्रादौ पूर्वेद्युःकर्म तस्मिन्नग्नौ परिसमुह्य पर्युक्ष्य । नमो वाचे इति प्रावर्ग्यिकीं पूर्वां शान्तिं पठेत् ॥) पुनरग्निं परिसमुह्य पर्युक्ष्य । शुक्रियं रुद्रस्य । 'नमो वाचे नमो वाचस्पतये या वागुदिता या चानुदिता तस्यै वाचे नमः, नम ऋषिभ्यो मन्त्रकृद्भ्यो मन्त्रविद्भ्यो मा मामृषयो मन्त्रकृतो मन्त्रविदः परादुर्दैवीं वाचमुद्यासं शिवामजस्रां जुष्टां देवेभ्यः स्वधावतीं पितृभ्यः शुश्रूषेण्यां मनुष्येभ्यः तं मा देवा अवन्तु शोभायै पितरोऽनुमदन्तु सुचक्षा अहमक्षिभ्यां सुवर्चा मुखेन

---

१ वत्सः सन्निधापयितव्यः ।

सुश्रुत्कर्णाभ्यां भूयासम्, ओं भूर्भुवःस्वः, प्राच्या त्वा दिशा अग्नि-
ना देवतया गायत्रेण च्छन्दसा वसन्तमृतुं प्रविशामि । दक्षि-
णया त्वा दिशा इन्द्रेण देवतया त्रैष्टुभेन च्छन्दसा ग्रीष्ममृतुं
प्रविशामि । प्रतीच्या त्वा दिशा सवित्रा देवतया जागतेन
छन्दसा वर्षाश्च्रतुं प्रविशामि । उदीच्या त्वा दिशा मित्रावरु-
णाभ्यां देवतयाऽऽनुष्टुभेन च्छन्दसा शरदमृतुं प्रविशामि । ऊर्ध्व-
या त्वा दिशा बृहस्पतिना देवतया पांक्तेन च्छन्दसा हेमन्तमृतुं
प्रविशामि । [1]अनया त्वा दिशा प्रजापतिना देवतया अनाप्तेन
च्छन्दसा शिशिरमृतुं प्रविशामि ॥ गायत्रीं च्छन्दः प्रविशामि,
त्रिष्टुभं च्छन्दः प्रविशामि, जगतीं च्छन्दः प्रविशामि, अनु-
ष्टुभं च्छन्दः प्रविशामि, पंक्तिं च्छन्दः प्रविशामि, अतिच्छन्दसं
च्छन्दः प्रविशामि । च्छन्दांसि प्रविशामि । तानि नः पारयन्तु
तानि नोऽवन्तु तानि स ऋच्छतु योऽस्मान्द्वेष्टि यं च वयं द्विष्मः ॥

१ अधरया ।

आपो अस्मान्प्रविशन्त्वापो अस्मासु जागृत आयुर्विश्वायुर्विश्व-
मायुर्व्यश्नवै सर्वमायुर्व्यश्नवै, दिव्यो गन्धर्वो भुवनस्य यस्पति-
रेकाव्यो मनसा विद्वीड्यः, तन्त्वा यामि ब्रह्मणा देव दैव्य-
न्नमस्ते अस्तु दिवि ते सधस्स्थम्, दिविपृष्टो यजत सूर्यत्वग-
वयातो हरसो दिव्यस्य एकाव्यो मनुष्यः सुशेवः, मृळाद्गन्धर्वो
भुवनस्य यस्पतिरनवद्याभिः समजग्माभिरप्सरःस्वपि गन्धर्व आ-
सीत् समुद्र आसां सदनं व आहुस्ततः सद्य्या च परा च चर-
न्त्यभ्रिये दिद्युन्नक्षत्रिये याः, विश्वावसुं गन्धर्वं सस्रधे ताभ्यो नमो
अस्तु ता नो मृळयन्तु ता नः शर्म यच्छन्तु ता यं द्विष्मो यश्च
नो द्वेष्टि तमासां जम्भे दध्मः, आहुस्ते भग चक्षुषी ताभ्यां
विपश्य मामभि यदेतत्सारघं मधु तेन रूपमनाज्मि ते तेन
रूपमनग्धि मे, देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो
हस्ताभ्यां देवानां क्रतुभिर्देवाभ्यञ्जनैरभ्यञ्जे भगवन्नामासि, तस्य
त ऋचश्च यजूंषि च सामानि च वागग्ना अन्यच्चक्षुः सूर्येऽन्य-

त्सूर्येऽन्यदग्ना अन्यद्भगवान्भूयासम् , ऐळोसि चक्षुरसि श्रोत्रमसि पुरन्ध्रिर्नाम वागसि येन शतक्रतुर्भागमुपजुह्वे तेन त्वोपह्वये भग, तद्वाभरा सनयेदं स उग्रमाविष्कृणोमि तन्यतुर्न वृष्टिम्, दध्यङ् ह यन्मध्वाथर्वणो वामश्वस्य शीर्ष्णा सुमतिमवोचत्, अग्निरीशो वसव्यस्याग्निर्महः सौभगस्य तान्यस्मभ्यं रासति ॥ इति प्रावर्ग्यिकी पूर्वा शान्तिः ॥ उद्वयन्तमित्युपस्थानम् । उद्वयन्तमसस्परि ज्योतिष्पश्यन्त उत्तरम् । देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ॥ "उष्णीषं त्रिरावर्तं वेष्टयित्वा" शुक्रियं रुद्रस्य । आयुर्दा आयुर्मे देहि आयुषे नः पुनर्देहि, प्राणदाः प्राणं मे देहि आयुषे नः पुनर्देहि, व्यानदा व्यानं मे देहि आयुषे नः पुनर्देहि, अपानदा अपानं मे देहि आयुषे नः पुनर्देहि, चक्षुर्दा चक्षुर्मे देहि आयुषे नः पुनर्देहि, श्रोत्रदाः श्रोत्रं मे देहि आयुषे नः पुनर्देहि, वर्चोदा वर्चो मे देहि आयुषे नः पुनर्देहि ।

१ उग्रामित्यपि पाठः ।

"एनानि सप्त यजूंषि । (सप्तानामपि आयुषे नः पुनर्देहि इति साधारणोऽनुषङ्गः)॥" नमो रुद्राय दिविषदे यस्य वर्षमिषवस्तस्मै नमस्ते नमः समरे स मा मा हिंसीः । नमो रुद्रायाऽन्तरिक्षसदे यस्य वात इषवस्तस्मै नमस्ते नमः समरे स मा मा हिंसीः । नमो रुद्राय पृथिवीषदे यस्यान्नमिषवस्तस्मै नमस्ते नमः समरे स मा मा हिंसीः॥ ब्रह्मण उपस्तरणमसि ब्रह्मणे त्वोपस्तृणामीळायै वास्त्वसि वास्तुमद्वास्तुमान्भूयासमवास्तुः स भूयाद्योऽस्मान्द्वेष्टि यं च वयं द्विष्मः । प्रतिष्ठासि प्रतिष्ठा मे भूयादप्रतिष्ठः स भूयाद्योऽस्मान्द्वेष्टि यं च वयं द्विष्मः ॥ आ वात वाहि भेषजं वि वात वाहि यद्रपः । त्वं हि विश्वभेषजो देवानां दूत ईयसे । यदृदो वात ते गृहेऽमृतस्य निधिर्हितः । ततो नो धेहि जीवसे ततो नो अभयं कृधि । द्युभिरक्तुभिःपरिपातमस्मानरिष्टेभिरश्विना सौभगेभिः । तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः॥ पृथिवी शान्तिर-

न्तरिक्षं शान्तिर्द्यौः शान्तिर्दिशः शान्तिरापः शान्तिरोषधयः शान्तिर्वनस्पतयः शान्तिस्त्वयाहं शान्त्या सर्वशान्त्या मह्यं द्विपदे चतुष्पदे शान्तिं करोमि शान्तिर्नो अस्तु शान्तिरसि शान्तिः शान्तिः शान्तिः । या वागुदिता या चानुदिता शिवा नः शन्तमा भव सुमृळीका सरस्वति मा ते व्योम सन्दृशे । मित्रस्य त्वा चक्षुषा प्रेक्षे मित्रस्य त्वा चक्षुषान्वीक्षे, सूर्यस्य त्वा चक्षुषा प्रेक्षे सूर्यस्य त्वा चक्षुषाभिर्वीक्षे । मित्रस्य चर्षणीधृतः श्रवो देवस्य सानसि द्युम्नं चित्रश्रवस्तमम् । मित्रस्य चर्षणीधृतः श्रवो देवस्य सानसि सत्यं चित्रश्रवस्तमम् ॥ आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन, महे रणाय चक्षसे । यो वः शिवतमो रसस्तस्य भाजयतेह नः, उशतीरिव मातरः । तस्मा अरङ्गमाम वो यस्य क्षयाय जिन्वथ, आपो जनयथा च नः ॥ आपः पृणीत भेषजं वरूथं तन्वो मम, ज्योक्च सूर्यं दृशे । शन्नो देवीरभिष्टय आपो भवन्तु पीतये, शँय्योरभिस्रवन्तु नः । शन्नो मित्रः शँ वरुणः

शन्नो भवत्वर्यमा । शन्न इन्द्रो बृहस्पतिः शन्नो विष्णुरुरुक्रमः ॥ शन्नो मित्रः शं वरुणः शन्नो अस्त्वर्यमा । शन्न इन्द्रश्चाग्निश्च शन्नो विष्णुरुरुक्रमः ॥ त्यमू षु वाजिनं देवजूतं सहोवानन्तरुतारं रथानाम् । अरिष्टनेमिं पृतनाजमाशुं स्वस्तये तार्क्ष्यमिहाहुयेम ॥ कया नश्चित्र आभुवदूती सदावृधः सखा, कया शचिष्ठया वृता । कस्त्वा सत्यो मदानां मंहिष्ठो मत्सदन्धसः, दृढा चिदारुजे वसु । अभीषुणः सखीनामविता जरितॄणाम, शतं भवास्यूतिभिः । "शुक्रियं रुद्रस्य ।" य उद्गात्पुरस्तान्महतो अर्णवाद्विभ्राजमानः सरिरस्य मध्ये । स मामृषभो रोहिताश्वः सूर्यो विपश्चिन्मनसा पुनातु । यद्ब्रह्मावादिष्म तन्मा मा हिंसीत्सूर्याय विभ्राजाय वै नमो नमः ॥ इति प्रावर्ग्यिकी उत्तरा शान्तिः ॥ अग्निं परिषिञ्चामि ३ । विभूरसीत्यादि अनुवाकेनोपस्थाय–एधोसीति समिधामाधानम् । तेजोसीत्यग्निमनुमन्त्रयते । आपोअद्येत्युपस्थानम् । ततः प्रातः प्रागुदयादित्यादि ॥ इत्यग्नीन्धनम् ॥ नमो वाचे० । "इति पूर्वां शान्ति

पठित्वा ।" उष्णीषं निवार्य । इयं कन्या, अयं वत्सः, अयमादित्यः, इदं क्षीरौदनम् । आयुर्दा० इत्युत्तरां शान्तिं पठेत् ॥ विमुच्य० । इति पूर्वेद्युःकर्म ॥ २ ॥

(केश्चिद्दिनद्वयस्यापि यज्ञोपवीतसंस्कारकर्म क्रियते । तत्रायं विधिः, प्रथमदिने कलशे प्रधानानि सर्वाणि दत्त्वा, पूजां च पूर्वनिर्दिष्टामखिलां विधाय चातुर्होतृकापवर्गान्तं कर्म निर्वर्त्य प्रवर्ग्यव्रतस्य पूर्वेद्युः कर्म कृत्वाग्निं विमुच्य, परिसमुह्य पर्युक्ष्य (१) च, पृथगग्नौ वैश्वदेवादि कुर्यात् ॥ गुडादिना क्षेत्रेशबलिः ॥ सव्यञ्जनमन्नादि च सङ्कल्पनीयमेव । सूर्याचन्द्रमसौ तथैव स्थाप्यौ ॥ अग्निरपि ज्वलित एव स्थाप्यः । न विसर्जनीयः । मण्डलं द्वितीयदिने कर्तव्यम् ॥ अथ द्वितीयदिने पुनरपि गन्धपुष्पादिना सङ्क्लृप्तां कलशार्चां सूर्यसोमार्चां ऋषिपूजां ब्रह्मपूजां च धूपदीपादिसंकल्प

---

१ यस्मिन्नग्नौ उपनयनहोमः कृतस्तं ज्ञानं यावद्धारयेत्, तस्मिन्नेव त्रैविद्यकादयो व्रतहोमाः, तमेव सायं प्रातरिन्धीतेतिहि गृह्यकाराः ।

पूर्विकां विधाय विहितस्नानसन्ध्योपासनाय ब्रह्मचारिणे रेवतीस्त्वेत्यादिना वसनादि दत्त्वाभिवादनं च तं कारयित्वा पुनरपि पात्रंतिलाज्यतैर्मिश्रमित्यारभ्य निर्दग्धंरक्षोऽग्निं परिसमुह्य ॥ ६ ॥ इत्यादिना प्रवर्ग्यव्रतमारभेत ॥ [अभिवादनं च यथा–पादावुपसंगृह्य अभिवादये देवशर्माहं भोः– आयुष्मान्भव सौम्य देवशर्म ३ न्] ॥) पुनरग्निं परिसमुह्य पर्युक्ष्य परिषिच्य । आदौ पश्च० । उत्तरतः संस्तीर्णे० स्रुचं पूरयित्वा सावित्रादिना यथा दैवतं निर्वपतीत्यन्तम् ॥ नमो वाचे० । सावित्राणि० । ब्रह्मणे, प्रजापतये, घर्माय सम्राजे, सूर्याय विभ्राजे, देवेभ्यो घर्मपेभ्यः, पितृभ्यो घर्मपेभ्यः, छन्दोभ्यः प्रवर्ग्यव्रताय ८ जुष्टं निर्वपामि ॥ आयुर्दा० । विष्णोर्मनसेति० । सावित्रादिना यथा दैवतं प्रोक्षतीत्यन्तम् । नमो वाचे० । सावित्राणि० । ब्रह्मणे० । ८। जुष्टं प्रोक्षामि । आयुर्दा० आज्यदर्शनं० आत्मनो० ब्रह्मणे० ८ । आज्यभागान्ते । रेवतीस्त्वा० इत्यादिना वसनादीननुमन्त्रयेत् रेवतीस्त्वा० इयन्दुरु०

मित्रस्य० सुश्रवः० ॥ नमो वाचे० । ततः समिदाधानम् । पृथिवी समित्तामग्निः समिन्धे नामहं समिन्धे सा मा समिद्धा सुषमिद्धा तेजसा वर्चसा यशसा ब्रह्मवर्चसेन समिन्ध्यात् ॥ १ ॥ अन्तरिक्षं समित्तां वायुः समिन्धे ना० ॥ २ ॥ द्यौः समित्तां सूर्यः समिन्धे० ॥ ३ ॥ पाणी प्रक्षाल्य उपस्थानम् । अग्ने व्रतपते सम्राळसि व्रतपा असि व्रतभृदसि व्रतपतिरसि व्रतमालभे तत्ते प्रब्रवीमि तच्छकेयं तेनर्ध्यासम् ॥ १ ॥ वायो व्रतपते० ॥ २ ॥ सूर्य व्रतपते० ॥ ३ ॥ "उदुत्यमिति दशर्चेन प्रथमेन प्रतीकानुवाकेन स्रुवेण प्रत्यृचमाज्यं जुहुयात् ।" उदुत्यं जातवेदसं देवं वहन्ति केतवः, दृशे विश्वाय सूर्यम् ॥ १ ॥ इममू षु त्वमस्मभ्यं सनिं गायत्रं नवीयांसम्, अग्ने देवेषु प्रवोचः[1] ॥ २ ॥ समिन्द्र नो मनसा नेषि गोभिः सं सूरिभिर्हरिवः सं स्वस्त्या । सं ब्रह्मणा देवकृतं यदस्ति स देवानां सुमत्या यज्ञियानाम् ॥ ३ ॥ सं वर्चसा पयसा सन्त-

१ प्रवोचात् इत्यपि पाठः ।

नृभिरगन्महि मनसा सं शिवेन । त्वष्टा सुदत्रो विदधातु रायोऽनु नो मार्ष्टु तन्वो यद्विलिष्टम् ॥४॥ अन्वग्निरुषसामग्रमख्यदन्वहानि प्रथमो जातवेदाः । अनु सूर्यस्य पुरुत्रा च रश्मीननु द्यावापृथिवी आततन्थ ॥ ५ ॥ या वाङ्कशा मधुमत्यश्विना सूनृतावती, तया यज्ञं मिमिक्षतम् ॥ ६ ॥ धाता दधातु नो रयिमीशानो जगतस्पतिः । स नः पूर्णेन वावनत् ॥ ७ ॥ धाता प्रजानामुत राये ईशिषे धातेदं विश्वं भुवनं जजान । सन्दाशुषे किरति भूरि वामं वयं स्याम पतयो रयीणाम् ॥ ८ ॥ त्रयस्त्रिंशत्तन्तवो यान्वितन्वत इमं यज्ञं स्वधया ये ददन्ते । तेषां च्छिद्रं प्रतिदध्मो यदत्र स्वाहाऽयं यज्ञो अप्येतु देवान् ॥ ६ ॥ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्, समूढमस्य पांसुरे ॥ १० ॥ (उक्तं स्थालीपाकस्य प्रधानहोमः ।) ब्रह्मणे स्वाहा, प्रजापतये स्वाहा, घर्माय सम्राजे स्वाहा, सूर्याय विभ्राजे स्वाहा, देवेभ्यो घर्मपेभ्यः स्वाहा, पितृभ्यो घर्मपेभ्यः स्वाहा, छन्दोभ्यः स्वाहा, प्रवर्ग्यव्रताय स्वाहा, ॥ "पश्चादग्नेर्दर्भेष्वासीनं

कृतपादोपसंग्रहणं सावित्रीत्रिजपपूर्वं शुक्रियं प्रथमानुवाकमध्याप्यानुशास्ति ॥ अधीहि भोः सावित्रीं त्रिजपपूर्वान्प्रवर्ग्यव्रतमन्त्रान्मे भवाननुब्रवीतु ।" ओंभूर्भुवःस्वस्तत्स० ३ । शुक्रियं रुद्रस्य । युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः । विहोत्रादधे वायुनाविदेक इन्मही देवस्य सवितुः परिष्टुतिः ॥ 'देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे नारीःस्थ ॥ उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे उपप्रयन्तु मरुतः सुदानव इन्द्र प्राशूर्भवा सचा । प्रैतु ब्रह्मणस्पतिः प्रदेव्यतु सूनृता, अच्छावीरन्नर्यम्पंक्तिराधसन्देवा यज्ञं नयन्तु नः । देवी द्यावापृथिवी देवयजनेनुमीमांसाथामृतस्यर्ध्यासमद्य मखस्य शिरो मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ १ ॥ एवं । इयत्यग्र आसीर्मृतस्यर्ध्यासमद्य म० ॥ २ ॥ देवीवम्रियोस्य भूतस्य प्रथमजार्मृतस्यर्ध्यासमद्य० ॥ ३ ॥ इन्द्रस्योजोस्यृतस्यर्ध्यासमद्य० ।४।

---

१ देवस्य वः

प्रजापतेस्तनूरस्यृतस्यध्र्यासमद्य० ॥ ५ ॥ मधु त्वा मधुना करोतु यज्ञस्य पदे स्थः, गायत्रोसि त्रैष्टुभोसि जागतोसि मखोसि मखस्य रास्नासि सूर्यस्य हरसाश्राय विष्णोर्निष्प'दसि प्राजापत्यं देवानां त्वा पत्नी वृष्णो अश्वस्य निष्पदा धूपयन्तु अर्चिषे त्वा शोचिषे त्वा हरसे त्वा, मित्रस्य चर्षणीधृतः श्रवो देवस्य सानसि द्युम्नं चित्रश्रवस्तमम् , देवस्त्वा सवितोद्वपतु सुपाणिः स्वङ्गुरिः सुबाहुरुत शक्त्या । अव्यथमानाः पृथिव्यामाशा दिश आपृण उत्तिष्ठ बृहद्भवोर्ध्वस्तिष्ठ ध्रुवस्त्वम् ॥ इदमहममुमामुष्यायाणममुष्याः पुत्रं तेजसा ब्रह्मवर्चसेन समर्धयामि । इदमहममुमामुष्यायणममुष्याः पुत्रं तेजसा ब्रह्मवर्चसेन व्यर्धयामि । इदमहममुमामुष्यायणममुष्याः पुत्रमोजसा वीर्येण समर्धयामि । इदमहममुमामुष्यायणममुष्याः पुत्रमोजसा वीर्येण व्यर्धयामि । इदमहममुमामुष्याणममुष्याः पुत्रमूर्जा पशुभिः समर्धयामि । इदमहममु-

१ निष्पदोसि ।

मामुष्यायणममुष्याः पुत्रमूर्जा पशुभिर्वर्धयामि । इदमहममुमामुष्यायणममुष्याः पुत्रं तेजसा ब्रह्मवर्चसेन, ओजसा वीर्येण, प्रजया पशुभिरन्नाद्येन समर्धयामि । ऋजवे त्वा, साधवे त्वा, सुक्षित्यै त्वा सूर्यस्य त्वा चक्षुषान्वीक्षे, [1]छृणतु त्वा वाक्, छृणतु त्वोर्क्, छृणतु त्वा पयः, छृणतु त्वा रसः, छृणतु त्वा हविः, छृणतु त्वा सोमः, छृणतु त्वा यज्ञः, छृणतु त्वा ब्रह्म, छृणतु त्वा प्रजापतिः ॥ यद्वेदव्रतं तदत्र व्रतं ब्रह्मचारी बाढमिति प्रत्याह । 'पञ्च विकारानन्नुक्रमिष्यामः ।' ब्रह्मचार्यसि, अपोशान, कर्म कुरु, दिवा मा सुषुप्सीः[2], वाचं यच्छ, मा मलवद्वाससोऽद्राक्षीः, मा सम्भाषयेथाः, मलवद्वाससो भवन्ति, उदक्याः सूतिकाः श्वपाका अशुचयोऽन्त्यावसायिन इति, न श्मशानं गच्छेः, न शवशरीरं पश्येः, अनातृणं शवशरीरं दृष्ट्वा त्रिरात्रमुपवसेः, मधुमांसे प्राश्यालभ्य वा शरीरं पुनर्व्रतमालभेथाः, यानि ह्यावर्दूषणानि तानि भोज-

---

१ छृणतु ॥ २ स्वाप्सीः ।

नदूषणानि, नोच्छिष्टं भुञ्जीथाः, नोच्छिष्टमन्यस्मै दद्याः मा गुरु भुञ्जीथाः व्याधितविषयमेतत् । येनेच्छेत्तेन चिकित्सेत्, कामं गुरूच्छिष्टमश्नीयादिति ह्याचार्याः । न नक्तं भुञ्जीथाः, उपज्वाल्य वा भुञ्जीथाः, न मृन्मये भुञ्जीथाः, न प्रतिसन्दध्या इत्येके । स्थानासनं पर्वान्तेषूपवासः, वाग्यमनं च, किंचिदप्रयतं दृष्ट्वा प्राणायामैः स शुद्ध्यति, सन्दर्शने त्रयः कार्याः संव्याहृत्य तु सप्त, समासाद्य तु द्वादश, सर्वत्र ज्योतिर्दर्शनमुदकोपस्पर्शनम्, सूर्याचन्द्रमसौ गौरग्निर्ब्राह्मण इत्येतानि पञ्च ज्योतींष्येतेषामेकेनापि शुद्ध्यति, अबद्धं मनो दरिद्रं चक्षुः, सूर्यो ज्योतिषां श्रेष्ठो दीक्षे मा मा हिंसीरिति, सूर्यं दिवाग्निं रात्रौ रेतसि स्कन्ने पुनर्मामैत्विन्द्रियमिति जपेत् ॥ ओं पुनर्मामैत्विन्द्रियं पुनरायुः पुनर्भगः । पुनर्ब्राह्मणमैतु मां पुनर्द्रविणमैतु मा ॥ यन्मेऽद्य रेतः पृथिवीमस्कान्यदोषधीरप्यसरद्यदपः, तदहं पुनराददे ॥ यन्मे रेतः प्रसिच्यते यन्म

१ दप्यसरत्

आजायते पुनः । यद्वा मे प्रतितिष्ठति तेन माममृतं कुरु तेन सुप्रजसं कुरु ॥ नमो ब्रह्मणे "इति त्रिः पठेत् ।" आयुर्दा० । ऋतुतिथ्यादितन्त्रसमाप्तिः ॥ विमुच्य, ३ । नयामि ॥ इति प्रवर्ग्यव्रतम् ॥ १५ ॥

अथापवर्गे प्रवर्ग्यव्रतम् ॥ आदौ पूर्वेद्युः कर्म । अग्निं परिसमुह्य पर्युक्ष्य ॥ नमो वाचे० । उद्वयन्तमित्यादित्यमुपस्थाय । उष्णीषं त्रिरावर्तं वेष्टयित्वा । आयुर्दा० । परिषिञ्चामि ३ । विभूरसि० इत्यनुवाकेनोपस्थाय । एधोसीति समिदाधानं । तेजोसीत्यग्निमनुमन्त्रयते । अपो अद्येत्युपस्थानम् । ततः प्रातः प्रागुदया. दित्यादिसर्वम् साध्वधीत इत्यन्तम् ॥ नमो वाचे० । उष्णीषं निवार्य । इयं कन्या अयं वत्सः अयं आदित्यः इदं क्षीरौदनम् ॥ आयुर्दा० । विमुच्य । इति पूर्वेद्युः कर्म ॥ ६ ॥ अग्निं परिसमुह्य पर्युक्ष्य परिषिच्य । आदौ पञ्च० । उत्तरतः संस्तीर्य स्रुचं पूरयित्वा सावित्र्यादिना यथादैवतं निर्वपतीत्यन्तं । नमो वाचे० ।

सावित्राणि० । ब्रह्मणे, प्रजापतये, घर्माय सम्राजे, सूर्याय विभ्राजे, देवेभ्यो घर्मपेभ्यः, पितृभ्यो घर्मपेभ्यः, छन्दोभ्यः, अपवर्गे प्रवर्ग्यव्रताय, जुष्टं निर्वपामि ॥ आयुर्दा० । विष्णोर्मनसेति० सावित्रादिना यथादैवतं प्रोक्षतीत्यन्तं । नमो वाचे० । सावित्राणि । ब्र० प्र० ॥ ८ ॥ जुष्टं प्रोक्षामि । आयुर्दा० । पात्राणि च तूष्णीं० । आज्यदर्शनमात्मनो० ब्रह्मणे ८ ॥ आज्यभागान्ते ॥ रेवतीस्त्वा० । इत्यादिना वसनादीननुमन्त्रयेत् ॥ रेवतीस्त्वा० इयंदु० मित्रस्य० स्रुश्रवः० ॥ नमो वाचे० ("मा नो घर्म" इत्येकोनत्रिंशतर्गिभरुत्तमेन प्रतीकानुवाकेन स्रुवेण प्रत्यृचमाज्यं जुहुयात् ॥) शुक्रियं रुद्रस्य ।
मा नो घर्म व्यथितो विव्यथो नो मा नः परमधामाहुतो नैः ।
मो ष्वस्मांस्तमस्यन्तराधा मा रुद्रियासो अभिकुर्वतो नः ॥ १ ॥
मा नः क्रतुभिरीळतेभिर्द्विषो अस्मान्त्सुनीते मापराधाः । मा नो अग्निर्निर्ऋतिमरातिं मा नो द्यावापृथिवी हेळते हेळयेथाम् ॥ २ ॥
अनु नो मित्रावरुणा इहावतामनुर्दाध्याना अभि नः सखायौ ।

आदित्यानां प्रसूतिर्हेनिरुग्रा शिवा [1]काष्ठा हविषः परि णो
वृणक्तु ॥ ३ ॥ विधुन्दद्राणं समने बहूनां युवानं सन्तं पलितो
जगार । देवस्य पश्य काव्यं महि त्वा द्यां ममार सद्यः समानः ।४।
ओंभूः ॥ ५ ॥ ओंभुवः ॥ ६ ॥ ओंस्वः ॥ ७ ॥ ओंभूर्भुवःस्वः । ८ ।
उदुत्यं जातवेदसं देवं वहन्ति केतवः, दृशे विश्वाय सूर्यम् ।९।
उद्वयन्तमसस्परि० ॥१०॥ उदु तिष्ठ स्वध्वराव नो [2]देव्या कृपा
दृशे च भासा । बृहता सुशुक्कभिरग्ने याहि सुशस्तिभिः ।११।
ऊर्ध्व ऊ षु ण ऊतये तिष्ठा देवो न सविता । ऊर्ध्वो वाजस्य
सनिता यदञ्जिभिर्वाघद्भिर्विह्वयामहे ॥ १२ ॥ पुनरूर्जा निवर्तस्व
पुनरग्न इषायुषा । पुनर्नः पाह्यंहसः ॥१३॥ सह रय्या निवर्तस्व
अग्ने पिन्वस्व धारया, विश्वप्स्न्या विश्वतस्परि ॥१४॥ धाता दधा
तु नो रयिमीशानो जगतस्पतिः, स नः पूर्णेन वावनत् ॥१५॥
धाता प्रजानामुत राये ईशिषे धातेदं विश्वं भुवनं जजान ।

---

१ पाष्टा इत्यपि पाठः । २ देव्या ।

सन्दाशुषे किरति भूरिवामं वयं स्याम पतयो रयीणाम् ।१६।
अग्न आयूंषि पवस आसुवोर्जमिषञ्च नः, आरे बाधस्व दुच्छु-
नाम् ॥ १७ ॥ अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यम्, दधद्रयिं
मयि पोषम् ॥ १८ ॥ त्वन्नो अग्ने वरुणस्य विद्वा० ॥१९॥ स त्वन्नो
अग्नेवमोभवोती नेदिष्ठो० ॥ २० ॥ वायुरग्रेगा यज्ञप्रीस्साकं गन्म-
नसा यज्ञम्, शिवो नियुद्भिः शिवाभिः ॥ २१ ॥ प्रयाभिर्यासि
दाश्वांसमच्छानियुद्भिर्वाय इष्टये दुरोणे । नि नो रयिं सुभोजसं
युवस्व नि वीरं गव्यमश्व्यं च राधः ॥ २२ ॥ हिरण्यगर्भ इति सप्त ।
हिरण्यगर्भः० ॥ २३ ॥ यः प्राणतो० ॥ २४ ॥ य ओजोदा० ।२५।
येन द्यौ० ॥ २६ ॥ य इमे द्या० ॥ २७ ॥ यस्येमे विश्वे० ॥२८॥
यं क्रन्दसी [1]अवसा तस्तभाने अभ्यैक्षेतां मनसा रेजमाने । यत्रा-
धिसूर उदितो विभाति कस्मै देवाय हविषा विधेम ॥ २९ ॥
"उक्तं स्थालीपाकस्य व्रतहोमः ।" ब्र० प्र० घ० सू० दे० पि०

---

१ अपसा ।

ऌ० अपवर्गे प्रवर्ग्यव्रताय स्वाहा ॥ "प्रधानानन्तरं समिदाधानं । ओंः समित्तामितितिस्रः समिध आधाय।" ओंः समित्तां सूर्यःसमिन्धे तामहं समिन्धे सा मा समिद्धा सुषमिद्धा तेजसा वर्चसा यशसा ब्रह्मवर्चसेन समिन्ध्यात् ॥ १ ॥ अन्तरिक्षं समित्तां वायुः समिन्धे० ॥ २ ॥ पृथिवी समित्तामग्निः समिन्धे० ॥ ३ ॥ सूर्यव्रतपत इति व्रतविमोकः ॥ सूर्य व्रतपते सम्राळसि व्रतपा असि व्रतभृदसि व्रतपतिरसि व्रतमचारिषं तदशकं तत्ते प्रब्रूमस्तन्नो गोपाय । वायो व्र० ॥ अग्ने व्रत०॥ आयुर्दा० । ऋतुनिथ्यादिनत्रसमाप्तिः । विमुच्य ३ । नयामि ॥ इत्यपवर्गे प्रवर्ग्यव्रतम् ॥ १६ ॥

अथारुणव्रतम ॥ आर्द्रां पूर्वेद्युः कर्म । अग्निं परिसमुह्य पर्युक्ष्य । नमो वाचे० । उद्वयन्तमस० इत्यादित्यमुपस्थाय ॥ उष्णीष त्रिरावर्तं वेष्टयित्वा ॥ आयुर्दा० । परिषिच्य० ३ । विभूसि इत्याद्यनुवाकेनोपस्थाय एधोसीति समिदाधानम् । तेजोसी

त्यांग्नमनुमन्त्रयते । अपो अद्येत्युपस्थानम् । ततः प्रातः प्रागुद्याद्दित्यादि साध्वधीत इत्यन्तम् ॥ नमो वाचे० । उष्णीषं निवार्य । इयं कन्या० । अयं वत्सः । अयमादित्यः । इदं वीरौदनम् । आयुर्दा० । विमुच्य० ॥ इति पूर्वेद्युः कर्म ॥ ४ ॥ परिसमुह्य पर्युक्ष्य परिषिच्य । आर्द्रा पञ्च० । उत्तरतः संस्तीर्णे० । स्रुचं पूरयित्वा सावित्रादिना यथा दैवतं निर्वपति । (एवं स्वाध्यायधर्मेणारण्येऽधीयीत तपस्वी पुण्यो भवति तपस्वी पुण्यो भवतीति ॥) ओं आपमापमपः सर्वा अस्मादस्मादितोऽमुतः अग्निर्वायुश्च सूर्यश्च सह सञ्चस्करुर्धिया । वाय्वश्वा रश्मिपतयो मरीच्यात्मानो अद्रुहः । देवीर्भुवनसूवरीः पुत्रवत्त्वायिमेऽसुवः । महानाम्नी महामाना महायामा महासोमासस्परि । देवीः पर्जन्यसूवरीः पुत्रवत्त्वायिमं सुव । अपाश्नुष्टिमपारत्नमपाश्नुष्टिमपारसम् । अपाघमनुजावर्ति मम देवीर्ऋते हिताः । वज्रन्देवीरनुदिताः स्थ वरुणं देवसूवरीः । आदित्यानुदितं देवायोनिनो-

१ देवीरुदिताः । २ योगिनो ।

र्ध्वमुदीषत ॥ भद्रङ्कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः । स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥ केतवोऽरुणासश्चर्षणयो वातरशनाः प्रतिष्ठां शतधाय समाहिताः । अथो सहस्रधाय सं शिवा नः शन्तमा भवाथ दिव्या आप ओषधयो वनस्पतयः सुमृळीका सरस्वति मा ते व्योम सन्दृशि ॥ (इत्यारुण्यौ पूर्वोत्तरे शान्ती ।) सावित्राणि० । अग्नये वायवे सूर्याय ब्रह्मणे प्रजापतये संवत्सराय ऋतुभ्यः अरुणेभ्यःकाण्डर्षिभ्यः छन्दोभ्यः अरुणव्रताय जुष्टं निर्वपामि ॥ आपमापं० । विष्णोर्मनसेति० । सावित्रादिना यथादैवतं प्रोक्षति ॥ आपमापं० । सावित्राणि० । अ० वा० सू० ब्र० प्र० सं० ऋ० अ० छ० अरुणव्रताय जुष्टं प्रोक्षामि ॥ आपमापं० । पात्राणि च तूष्णीं० । आज्यदर्शनं० आत्मनो० अग्नये० इत्यादि इदमाज्यमर्पयामि नमः ।

आज्यभागान्ते । रेवतीस्त्वा० इत्यादिना वसनादाननुमन्त्रयेत् ॥ रेव० इयं दुरुक्ता० मित्रस्यचक्षुः० सुश्रवः० ॥ नमो वाचे० । समिदाधानम् ॥ पृथिवी समित्तामग्निः समिन्धे तामहं समिन्धे सा मा समिद्धा सुषमिद्धा तेजसा वर्चसा यशसा ब्रह्मवर्चसेन समिन्ध्यात् । अन्तरिक्षं समित्तां वायुः० । द्यौः समित्तां सूर्यः० । (पाणी प्रक्षाल्य) उपस्थानं । अग्ने व्रतपते सम्राळसि व्रतपा असि व्रतभृदसि व्रतपतिरसि व्रतमालभे तत्ते प्रब्रवीमि तच्छकेयं तेनर्ध्यासम् । वायो व्र० । सूर्य व्र० ॥ उदुत्यमिति दशर्चेन० स्रुवेण प्रत्यृचमाज्यं जुहुयात् ॥ दश ऋचः ॥ आयुर्दा०। आपमापं० ॥ " उक्तं स्थालीपाकस्य व्रतहोमः । " तेजोसि० । अ० वा० सू० ब्र० प्र० सं० ऋ० अ० छ० अरुण० स्वाहा ॥ " पश्चादग्नेर्दर्भेषु० । अधीहि भोः सावित्रीत्रिजपपूर्वानरुणव्रतमन्त्रान्मे भवाननुब्रवीतु ॥ ' ओंभूर्भुवःस्वस्तत्सवितु० ३ । " अरुणोरुणानामित्यनुवाकं वाचयित्वा ॥ " अरुणोरुणानां केतू-

नाम् ॥ योऽसौ तपन्नुदेति स सर्वेषां भूतानां प्राणानादायो-
देति । मा मे प्रजाया मा पशूनां मा मम प्राणानादायोद्गाः ।
असौ योऽस्तमेति स सर्वेषां भूतानां प्राणानादायास्तमेति ।
मा मे प्रजाया मा पशूनां मा मम प्राणानादायास्तङ्गाः । असौ
य आपूर्यते स सर्वेषां भूतानां प्राणैरापूर्यते । मा मे प्रजाया
मा पशूनां मा मम प्राणैरापूरिष्ठाः । असौ य उपक्षीयते स
सर्वेषां भूतानां प्राणैरुपक्षीयते । मा मे प्रजाया मा पशूनां मा
मम प्राणैरुपक्षेष्ठाः । अमूनि यानि नक्षत्राणि भूतानि चोपसर्पन्ति
चोत्सर्पन्ति च । तानि सर्वेषां भूतानां प्राणैरुपसर्पन्ति चोत्सर्पन्ति
च । मा मे प्रजाया मा पशूनां मा मम प्राणैरुपसृपत मोत्सृपत ॥
अयं संवत्सरः ॥ स सर्वेषां भूतानां प्राणैरुपप्रसर्पति चोत्सर्पति
च । मा मे प्रजाया मा पशूनां मा मम प्राणैरुपप्रसृप मोत्सृप ॥
इमे ऋतव-स्ते सर्वेषां भूतानां प्राणैरुपप्रसर्पन्ति चोत्सर्पन्ति च ।
मा मे प्रजाया मा पशूनां मा मम प्राणैरुपप्रसृपत मोत्सृपत ॥

इमे मासाश्चार्धमासा स्ते सर्वेषां भूतानां प्राणैरुपप्रसर्पन्ति चोत्सर्पन्ति च । मा मे प्रजाया मा पशूनां मा मम प्राणैरुपप्रसृपत मोत्सृपत ॥ इदमह–स्तत्सर्वेषां भूतानां प्राणैरुपप्रसर्पति चोत्सर्पति च । मा मे प्रजाया मा पशूनां मा मम प्राणैरुपप्रसृप मोत्सृप ॥ इयं रात्रिः, सा सर्वेषां भूतानां प्राणैरुपप्रसर्पति चोत्सर्पति च । मा मे प्रजाया मा पशूनां मा मम प्राणैरुपप्रसृप मोत्सृप ॥ यद्वेदव्रतं तदत्रव्रतं पञ्चविकाराननुक्रमिष्यामः ब्रह्मचार्यसि, अपोशानेत्यादि ॥ नमो ब्रह्मणे० " इत्यन्तं । " आपमापं० । ऋतुतिथ्यादितन्त्रसमाप्तिः विमुच्य ३ । नयामि ॥ इत्यरुणव्रतम् ॥ १७ ॥

अथापवर्गेऽरुणव्रतम् ॥ आदौ पूर्वेद्युः कर्म । परिसमुह्य पर्युक्ष्य० । नमो वाचे० । उद्वयन्त० इत्यादित्यस्योपस्थानम् । उष्णीषं त्रिरावर्तं वेष्टयित्वा ॥ आयुर्दा० । परिषिच्य० । विभूरसि० इत्युपस्थानम् । एधोसीतिसमिदाधानम् । तेजोसीत्यग्निमनुमन्त्र-

यते । अपो अद्येत्युपस्थानम् । ततः प्रातः प्रागुदयादित्यादि० साध्वधीत इत्यन्तम् ॥ नमो वाचे० । उष्णीषं निवार्य । इयं कन्या अयं वत्सः अयमादित्यः इदं क्षीरौदनम् ॥ आयुर्दा० । विमुच्य ३ । इति पूर्वेद्युः कर्म ॥ ५ ॥ अग्निं परिसमुह्य पर्युक्ष्य परिषिच्य परिस्तीर्यादौ पश्च० ॥ उत्तरतः संस्तीर्णे० । यथादैवतं निर्वपतीत्यन्तं । आपमापं० । सावित्राणि० । अग्नये वायवे सूर्याय ब्रह्मणे प्रजापतये संवत्सराय ऋतुभ्यः, अरुणेभ्यः काण्डर्षिभ्यः, छन्दोभ्यः अपवर्गे अरुणव्रताय जुष्टं निर्वपामि ॥ आपमापं० । विष्णोर्मनसेति० सावित्रादिना यथादैवतं प्रोक्षती-त्यन्तं । आपमापं० । सावित्राणि० । अ० वा० सू० ब्र० प्र० सं ऋ० अ० छ० अपवर्गेऽरुणव्रताय जुष्टं प्रोक्षामि । आपमापं० । पात्राणि च तूष्णीं० । आज्यदर्शनम् । आत्मनो० अग्नये इत्यादि इदमाज्यं० ॥ आज्यभागान्तं । रेवतीस्त्वा० इयन्दुरु० मित्रस्य० सुश्रवः० ॥ नमो वाचे० । मा नो घर्म इत्येकोनत्रिंशतर्ग्भिरुत्त-

मेन प्रतीकानुवाकेन स्रुवेण० ॥ २६ ॥ अग्ने त्वा० । आयुर्दा० । आपमापं० । उक्तं स्थालीपाकस्य व्रतहोमः तेजोसि० ॥ अ० वा० सू० ब्र० प्र० सं० ऋ० अ० छ० अपवर्गेऽरुणव्रताय स्वाहा ॥ आपमापं० । नमो वाचे० । प्रधानानन्तरं समिदाधानम् ॥ द्यौः समित्तां सूर्यः समिन्धे तामहं समिन्धे सा मा समिद्धा सुष-मिद्धा तेजसा वर्चसा यशसा ब्रह्मवर्चसेन समिन्ध्यात् । अन्त-रिक्षं समित्तां वायुः० । पृथिवी समित्तामग्निः समिन्धे० । उप-स्थानम् ॥ सूर्य व्रतपते सम्राळसि व्रतपा असि व्रतभृदसि व्रत-पतिरसि व्रतमचारिषं तदशकं तत्ते प्रब्रूमस्तन्नोगोपाय । वायो-व्रतपते० अग्नेव्रत० । आयुर्दा० । ऋतुतिथ्यादितन्त्रसमाप्तिः ॥ विमुच्य ३ । नयामि ॥ इत्यपवर्गेऽरुणव्रतम् ॥ १८ ॥

अथौपनिषदव्रतम् ॥ आदौ पूर्वेद्युः कर्म । परिसमुह्य पर्युक्ष्य नमो वाचे० । उद्वयन्तमेत्युपस्थानम् । उष्णीषं त्रिरावर्तं वेष्ट-यित्वा । आयुर्दा० । परिषिच्य ३ । विभूरसि इत्युपस्थाय एधो-

सीति समिदाधानं, तेजोसीत्यग्निमनुमन्त्रयते । अपो अद्योत्युपस्थानं । ततः प्रातरित्यादि ॥ नमो वाचे० । उष्णीषं निवार्य । इयं कन्या० इत्यादि । आयुर्दा० । विमुच्य ३ । इति पूर्वेद्युः कर्म ॥ ६ ॥ परिसमुह्य पर्युक्ष्य परिषिच्य । आदौ पञ्च० । उत्तरतः० यथा दैवतं निर्वपति इत्यन्तं ॥ [ब्राह्मणानि] "सुमन्तोः कश्यपस्य तदन्तेवासिनां चार्षम्" ओं शन्नो मित्रः शं वरुणः शन्नो भवत्वर्यमा । शन्न इन्द्रो बृहस्पतिः शन्नो विष्णुरुरुक्रमः । नमो ब्रह्मणे नमो वायवे नमस्ते वायो त्वमेव प्रत्यक्षं ब्रह्मासि त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि ऋतं वदिष्यामि सत्यं वदिष्यामि तन्मामवतु तद्वक्तारमवत्ववतु मामवतु वक्तारं शान्तिः शान्तिः शान्तिः । सह नाववतु सह नौ भुनक्तु सह वीर्यं करवावहै तेजस्वि नावधीतमस्तु मा विद्विषावहै शान्तिः शान्तिः शान्तिः ॥ सावित्र्याणि० । अग्नये वायवे सूर्याय ब्रह्मणे प्रजापतये छन्दोभ्यः ऋषिभ्यः छन्दोभ्यः औपनिषदव्रताय जुष्टं निर्वपामि ॥ शन्नो

मित्रः शँ वरुणः शन्नो अस्त्वर्यमा, शन्न इन्द्रश्चाग्निश्च शन्नो विष्णु-
रुरुक्रमः । नमो ब्रह्मणे नमो वायवे नमस्ते वायो त्वमेव प्रत्यक्षं
ब्रह्मासि त्वामेव प्रत्यक्षं ब्रह्मावादिषमृतमवादिषं सत्यमवादिषं
तन्मामावीत्तद्वक्तारमावीदावीन्मामावीद्वक्तारं शान्तिः शान्तिः
शान्तिः । सह नाववतु सह नौ भुनक्तु सह वीर्यं करवावहै
तेजस्वि नावधीतमस्तु मा विद्विषावहै शान्तिः शान्तिः शा-
न्तिः ॥ (इत्यौपनिषद्युत्तरा शान्तिः ॥) विष्णोर्मनसेति सावि-
त्र्यादिना यथादैवतं प्रोक्षतीत्यन्तम् । शन्नो मित्रः शँ वरुणः शन्नो
भवत्वर्यमा० । सावित्राणि । अ० वा० सू० ब्र० प्र० छ० ऋ० छ०
औपनिषदव्रताय जुष्टं प्रोक्षामि ॥ शन्नो मित्रः शँ वरुणः शन्नो
अस्त्वर्यमा० । पात्राणि च तूष्णीं० । आज्यदर्शनम् ॥ आज्यभा-
गान्ते । रेवतीस्त्वा० इयं दुरुक्ता० मित्रस्य० सुश्रवः० ॥ नमो वाचे०
पृथिवी समित्तां अग्निः समिन्धे तामहं समिन्धे सा मा समिद्धा
सुषमिद्धा तेजसा वर्चसा यशसा ब्रह्मवर्चसेन समिन्ध्यात् ।

अन्तरिक्षं समित्तां वायुः० । द्यौः समित्तां सूर्यः समिन्धे० ॥ अग्ने व्रतपते इत्युपस्थानम् । अग्ने व्रतपते सम्राडसि व्रतपा असि व्रतभृदसि व्रतपतिरसि व्रतमालभे तत्ते प्रब्रवीमि तच्छकेयं तेनर्ध्यासम् । एवं वायो० । सूर्यव्रत० । उदुत्यमिति दशर्चेन प्रथमेन प्रतीकानुवाकेन स्रुवेण प्रत्यृचमाज्यं जुहुयात् ॥ उदुत्यमित्यादि । १० ऋ० ॥ आयुर्दा० । शन्नो मित्रः० भवत्वर्यमा० । इति पूर्वां शान्तिं पठेत् । उक्तं स्थालीपाकस्य व्रतहोमः तेजोसि ४ ॥ अ० वा० सू० ब्र० प्रजापतये छु० ऋ० छु० औपनिषदव्रताय स्वाहा ॥ "पश्चादग्नेर्दर्भेषु० अधीहि भोः सावित्रीत्रिजपपूर्वानौपनिषदव्रतमन्त्रान्मे भवाननुब्रवीतु ॥" ओंभूर्भुवःस्वस्तत्सवि० ३ । यश्छन्दसामिति द्वे वाचयति । यश्छन्दसामृषभो विश्ववेदाश्छन्दोभ्योऽध्यमृतात्सम्बभूव । स मामिन्द्रो मेधया स्पृणोत्वमृतस्य वेदं धारणो भूयासम् ॥ १ ॥ शरीरं मे विचक्षणं वाङ्मे मधुमद्दुहे । कर्णाभ्यां भूरि सुश्रवं ब्रह्मणः कोशो-

---

१ देव धारणो ।

ऽस्मि मेधयापिहितः श्रुतं मे गोपाय ॥ यद्वेद्व्रतं तदत्रव्रतं० इत्यादि सर्वं नमो ब्रह्मणे इत्यन्तम् ॥ शन्नो मित्रः शं वरुणः शन्नो अस्त्वर्यमा० इत्युत्तरां शान्तिं पठेत् ॥ ऋतुतिथ्यादितन्त्रसमाप्तिः । विमुच्य ३ नयामि इत्यौपनिषदव्रतम् ॥ १६ ॥

अथ श्रीकामः ॥ अग्निं परिसमुह्य पर्युक्ष्य परिषिच्य० । आदौ पञ्च० । उत्तरतः संस्तीर्य० सावित्राणि० श्रियै श्रीकाम-देवताभ्यो जुष्टं निर्वपामि । विष्णोर्मनसेति० ॥ एवं प्रोक्षामि । आज्यदर्शनम् । आज्यभागान्ते ॥ (श्रीकामः श्वेताया गोः सरूपवत्सायाः पुंवत्सायाः पयसि स्थालीपाकं श्रपयित्वा । आवहन्तात द्वाभ्यां स्थालीपाकस्य जुहुयात् ।) तेजोसि ४ । आवहन्ती वितन्वाना कुर्वाणा वरमात्मनः । वासांसि मम गावश्चान्नपानेन वर्धय, स्वाहा ॥ १ ॥ सुवर्णां हरिणीं लक्ष्मीं धनदामश्वपूजिताम् । [1]ततो मे श्रियमावह लोमशां पशुभिः सह, स्वाहा[2] ॥ २ ॥ असौ

१ अतो । २ ऋग्यजुर्भ्यामाभ्यां द्वे आहुती जुहुयात् । एकामित्येके । ऋग्यजुषान्ते एकस्वाहाकारात् ॥

श्रीरेनमनपगा भवतु । (एनमिति सगोत्रोपपदं नाम ग्राह्यम्)॥ ऋतुतिथ्यादितन्त्रसमाप्तिः विमुच्य ३। नयामि ॥ (अन्येनान्नाद्येन च ब्राह्मणान्भोजयित्वा हुतशेषस्य स्वयं प्राश्नीयात् ॥) इति श्रीकामः ॥ २० ॥

अथ यशस्कामः ॥ अग्निं परिसमुह्य पर्युदय परिषिच्य । आदौ पश्च० । उत्तरतः संस्ती० सावित्राणि० यशसे यशस्कामदेवताभ्यो जुष्टं निर्वपामि० । विष्णोर्मनसेति० सावित्राणि० । एवं प्रोक्षामि । आज्यदर्शनम् । आत्मनो० ॥ आज्यभागान्ते० ॥ (यशस्कामो रोहिण्या गोः सरूपवत्सायाः पुंवत्सायाः पयसि स्थालीपाकं श्रपयित्वा । आ मा यन्त्वित्यष्टाभिः स्थालीपाकस्य जुहुयात् ॥) तेजोसि० ४ ॥ आ मा यन्तु ब्रह्मचारिणः स्वाहा । सं मा यन्तु ब्रह्मचारिणः स्वाहा । तपो यशो यशानि स्वाहा । जनो यशो यशानि स्वाहा । श्रेयान्वसो यशो यशानि स्वाहा । तं त्वा भग प्रविशामि स्वाहा । स मा भग प्रविश स्वाहा । अस्मिन्सह-

स्वशाखे विभजाहं त्वयि मृजे स्वाहा ॥ ८ ॥ [1]यथापः प्रवणा [2]यन्ति, यथा मासा अहर्जरम् । एवं मा ब्रह्मचारिणो धातरायन्तु [3]सर्वशः । प्रतिवेशोऽसि, प्र मा भाहि, प्र मा पद्यस्व, नमो ब्रह्मणे २ ॥ धारणं मेस्त्वऽनिराकरणं, धारयितास्मि कर्णयोः, श्रुतं मे माप्च्योष्ट, माऽमुष्य मेधाव्यऽनिराकरिष्णुर्भवति । (अन्येनान्नेन च ब्राह्मणान्भोजयित्वा हुतशेषस्य स्वयं प्राश्नीयात्) ॥ असौ अमुकदत्तः यशस्वी भवतु । ऋतुनिथ्यादितन्त्रसमाप्तिः ॥ विमुच्य ३ । नयामि ॥ (नानयोः पूर्वेद्युः कर्म, न वसनानुमन्त्रणादि, नात्र व्रतादेशः, न व्रतमन्त्रवाचनम् , नापवर्गः ।) इति यशस्कामः ॥ २१ ॥

अथापवर्गे औपनिषदव्रतम् ॥ आदौ पूर्वेद्युः कर्म । परिसमुह्य पर्युक्ष्य० । नमो वाचे० । उद्वयन्तमेत्यादित्यस्योपस्थानम् । उष्णीषं त्रिरावर्तं वेष्टयित्वा । आयुर्दा० । अग्निं परिषिच्य० ३

---

१ यथाप इति ब्रह्मचारी केवलं पठेत् ॥ २ प्रवतायान्ति । ३ सर्वतः ।

विभूरसि० इत्युपस्थाय एधोसीति समिदाधानम् । तेजोसीत्य-
ग्निमनुमन्त्रयते । अपो अद्येत्युपस्थानम् । ततः प्रातः प्रागुदया-
दित्यादि सर्वम् । नमो वाचे० । उष्णीषं निवार्य । इयं कन्या
अयं वत्सः । अयमादित्यः । इदं क्षीरौदनम् ॥ आयुर्दा० ।
विमुच्य ३ । इति पूर्वेद्युः कर्म ॥ ७ ॥ अग्निं परिसमुह्य पर्युक्ष्य
परिषिच्य ३ । आदौ पञ्च० । उत्तरतः संस्तीर्णे० निर्वपतीत्यन्तं ।
शन्नो मित्रः शं वरुणः शन्नो भवत्वर्यमा० । सावित्राणि । अग्नये
वायवे सूर्याय ब्रह्मणे प्रजापतये छन्दोभ्यः ऋषिभ्यः छन्दोभ्यः
अपवर्गे औपनिषदव्रताय जुष्टं निर्वपामि ॥ शन्नो मित्रः शं वरुणः
शन्नो अस्त्वर्यमा० । विष्णोर्मनसेति० यथादैवतं प्रोक्षति इत्यन्तं ।
शन्नो मित्रः शं वरुणः शन्नो भवत्वर्यमा० । सावित्राणि । अ०
वा० सू० ब्र० प्र० छ० ऋ० छ० अपवर्गे औपनिषदव्रताय जुष्टं
प्रोक्षामि । शन्नो मित्रः शं वरुणः शन्नो अस्त्वर्यमा० । पात्राणि० ।
आज्यदर्शनम्० । आत्मनो० ॥ आज्यभागान्ते । रेवतीस्त्वा० ।

इयम्बुरुक्का० । मित्रस्य० । सुश्रवः० ॥ नमो वाचे० । मा नो घर्म इत्येकोनत्रिंशताग्भिरुत्तमेन प्रतीकानुवाकेन स्रुवेण प्रत्यृचमाज्यं जुहुयात् ॥ मानो घर्म इत्यादि २९ ॥ आयुर्दा० । शन्नो मित्रः शं वरुणः शन्नो भवत्वर्यमा० । उक्तं स्थालीपाकस्य व्रतहोमः ॥ तेजोसि० । अ० वा० सू० व्र० प्र० छ० ऋ० छ० अपवर्गे औपनिषद्व्रताय ॥ शन्नो मित्रः शं वरुणः शन्नो अस्त्वर्यमा० । नमो वाचे० । द्यौः समित्तां सूर्यः समिन्धे तामहं समिन्धे सा मा समिद्धा सुषमिद्धा तेजसा वर्चसा यशसा ब्रह्मवर्चसेन समिन्ध्यात् । अन्तरिक्षं समित्तां वायुः० पृथिवी समित्तामग्निः० ॥ सूर्य व्रतपते सम्राडऽसि व्रतपा असि व्रतभृदसि व्रतपतिरसि व्रतमचारिषं तदशकं तत्ते प्रब्रूमस्तन्नो गोपाय । वायो व्रतपते० । अग्ने व्रतपते० व्रतमचारिषं० ॥ "सर्वैं बान्धवैः सहोत्थाय यजमानः पाणौ पुष्पं गृहीत्वा, शुक्रियं रुद्रस्य 'आयुर्दा'० इति पठित्वाग्नौ प्रक्षिपेत् ॥ " ऋतुतिथ्यादितन्त्रसमाप्तिः । विमुच्य ३

नयामि ॥ इत्यपवर्गे औपनिषद्व्रतम् ॥ २२ ॥

अथ गोदानम् ॥ परिसमुह्य पर्युक्ष्य परिषिच्य । आदौ पश्च० । न निर्वापः । पृश्न्याः पयोसि० । आज्यदर्शनं । आत्मनो० गोदानदेवताभ्य इदमाज्यमर्पयामि नमः ॥ आज्यभागान्ते । (षोडशे वर्षे गोदानमग्नौ वा समाप्ते तद्व्याख्यातं जटाकर्मणा ।) अयमागात्सविता क्षुरेण उष्णेन वाय उदकेनेहि । आदित्या रुद्रा वसवः सचेतसः सोमस्य राज्ञो वपत प्रचेतसः "इत्युष्णा अपोऽभिमन्त्रयते ॥" उष्णाश्च शीताश्च समेत्य सर्वा बृहस्पतिः सविता सत्यधर्मा तदनुमन्यतामिति ॥ सोमपुत्रस्याध्वरस्य ॥ आर्द्रदानवः स्थ जीवदानवः स्थोन्दतीरिहैनमवताप उन्दन्तु जीवसे दीर्घायुत्वाय वर्चसे इत्यभ्युन्देत् । ओषधे त्रायस्वेति दर्भमन्तर्धाय ओषधे त्रायस्वैनं स्वधित इतिक्षुरेणाभिनिधाय स्वधिते मैनं हिंसीः ॥ येनावपत्सविता क्षुरेण सोमस्य राज्ञो वरुणस्य विद्वान् । तेन ब्रह्मणो वपतेदमस्याऽऽयुष्माञ्जरद-

ष्टिर्यथासत् ॥ अयमसावमुकदत्तः दक्षिणे केशान्ते । आर्द्रदानव० । येन धाता बृहस्पतिरग्नेरिन्द्रस्य चायुषेऽवपत् । तेनास्यायुषेवप सुश्लोक्याय स्वस्तये अयमसावमुकदेवः पश्चिमे केशान्ते ॥ आर्द्रदानव० । येन पूषा प्रजापतेरग्नेः सूर्यस्य चायुषेऽवपत् । तेनास्यायुषेवप सुश्लोक्याय स्वस्तये । अयमसावमुकशर्मा उत्तरे केशान्ते । आर्द्रदान० । येन भूयश्च रात्र्यां ज्योक्पश्याच सूर्यम् । तेनास्यायुषेवप सुश्लोक्याय स्वस्तये । अयमसावमुकस्वामी पूर्वे केशान्ते ॥ इति प्रदक्षिणं प्रतिदिशं प्रतिमंत्रं दर्भक्षुरकर्म यत्क्षुरेण वर्तयता सुपेशसा वप्तर्वपसि केशान् । शुन्धि शिरो मास्यायुःप्रमोषीरिति लोहायसं क्षुरं केशवापाय प्रयच्छति ॥ मा ते केशाननुगात्तेज एतत्तथा धाता दधातु ते । तुभ्यमिन्द्रो बृहस्पतिः सविता वर्च आदधु " रिति प्रपततोऽनुमन्त्रयते ॥ " सुहृत्परिग्राह्यानुप्यमानान्हरितगोमये समवचिनोति । उप्त्वाय राज्ञो वरुणस्य केशान्सोमो धाता सविता विष्णुरग्निः । तेभ्यो

निधानं बहुधान्वविन्दन्नन्तरा द्यावापृथिवी अवस्युरिति प्रागुदीचीं ह्रियमाणाननुमन्त्रयते। अरिक्ते पर्याश्रेषयत इति श्रुतिः ॥

वपननिमित्तं स्नानं कारयित्वा (दर्भेष्वासीनं दर्भानध्यधिकृत्य हिरण्यं चाभिषिञ्चति आग्नेयीभी राजसूयिकीभिर्वा या आपो दिव्या इति द्वाभ्याम् । एवं राजानम् ॥ सावीर्हि देवेतिचानुवाकेनान्यद्यथोक्तमक्रतुज्यानिम्) ॥ पूर्वं या आपो दिव्या० अभित्वा वर्चसा० सविताकरदित्यन्ताभ्यां द्वाभ्याम् ॥ सावीर्हि देव प्रथमाय पित्रे वर्ष्माणमस्मै वरिमाणमस्मै । अथास्मभ्यं सवितर्वार्याणि दिवे दिव आसुवा भूरि पश्वः ॥ भूतो भूतेषु चरति प्रविष्टस्स भूतानामधिपतिर्बभूव । तस्य मृत्योश्चरति राजसूयं स राजा राज्यमनुमन्यतामिदम् ॥ येभिःशिल्पैः पप्रथानामदृंहयेभिर्द्या-

---

१ ब्रह्मचारिणः शिरसि दर्भास्तदुपरि सुवर्णं च निधायेत्यर्थः ॥ प्रसन्नाद्याभिः षड्विधाभिरद्भिर्ब्रह्मचारिणमभिषिञ्चति । नतुक्षीरोदकेन ॥

२ क्रतुर्मृत्युसवः, ज्यानिरर्थत्यागादिकृत आयासस्तद्वर्जम् ॥

मभ्यपिंशत्प्रजापतिः । येभिर्वाचं विश्वरूपेभिरव्ययंस्तेनेममग्न इह वर्चसा समङ्ग्धि ॥ येभिरादित्यस्तपति प्रकेतुभिर्येभिः सूर्यो ददृशे चित्रभानुः । येभिर्वाचं पुष्कलेभिरव्ययंस्तेनेममग्न इह वर्चसा समङ्ग्धि ॥ आयम्भातु शवसा पञ्च कृष्टीरिन्द्र इव ज्येष्ठो भवतु प्रजानाम् । अस्मिन्नस्तु पुष्कलं चित्रभान्वायं पृणातु रजसो विमानम् ॥ यत्ते शिल्पं कश्यप रोचनावदिन्द्रियावत्पुष्कलं चित्रभानु । यस्मिन्सूर्या अर्पिताः सप्त साकं तस्मिन् राजानमधि विश्रयेमम् ॥ व्याघ्रो वैयाघ्रे अधिविक्रमस्व दिशो महीः, विशस्त्वा सर्वा वाञ्छन्त्वापो दिव्याः पयस्वतीः । या आपो दिव्याः पयसा सम्बभूवुर्या अन्तरिक्ष्या उत पार्थिवासः । तासां त्वा सर्वासां रुचाभिषिञ्चामि वर्चसा, अभि त्वा वर्चसा सृजं यज्ञेन पयसा सह, यथासो मित्रवर्धनस्तथा त्वा सविता करत् ॥ इन्द्रं विश्वा अवीवृधन्त्समुद्रव्यचसङ्गिरः, रथीतमं रथीनां वाजानां सत्पतिं पतिम् ॥ अभिप्रेहि वीरयस्वोग्रश्चेता सपत्नहा ।

आतिष्ठ मित्रवर्धन स्तुभ्यन्देवा अधिब्रुवन् ॥ आतिष्ठ वृत्रहन्रथं युक्ता ते ब्रह्मणा हरी । अर्वाचीनं सुते मनो ग्रावा कृणोतु वग्नुना ॥ आतिष्ठन्तं परि विश्वे अभूषञ्छ्रियो वसानश्चरति स्वरोचिः । महत्तदस्यासुरस्य नाम विश्वरूपो अमृतानि तस्थौ ॥ अनु त्वेन्द्रो मदत्वनु बृहस्पतिरनु सोमो अन्वग्निरावीत् । अनु त्वा विश्वे अवन्तु देवाः सप्तराजानो यउताभिषिक्ताः ॥ अनु त्वा मित्रावरुणा इहावतामनुद्यावापृथिवी ओषधीभिः । सूर्योऽहोभिरनु त्वावतु चन्द्रमा नक्षत्रैरनु त्वावीत् ॥ द्यौश्च त्वा पृथिवी च प्रचेतसा यज्ञो बृहद्दक्षिणा त्वा पिपर्तु । अनु स्वधा चिकिते सोमो अग्निरन्तु त्वावतु सविता सवेन ॥ एना व्याघ्रं परिषस्वजानं सिंहं हिन्वन्ति महते धनाय । मर्मृज्यन्ते द्वीपिनमप्स्वन्तररुषन्न सुत्वं-स्तस्थिवांसम् ॥

तेजोसि० । ये के च ज्मेत्याज्यप्रधानम् । ऋतुतिथ्यादितश्रस-

---

१ सुभ्व इत्यपि पाठः ।

माप्तिः विमुञ्चामि ३ । नयामि ॥ नात्र वसनानुमन्त्रणादि व्रातिकं किञ्चित् । नचास्यापवर्गः ॥ इति गोदानम् ॥ २३ ॥

अथापवर्गे त्रैविद्यकम् ॥ अग्निं परिसमुह्य पर्युक्ष्य परिषिच्य । आदौ पञ्च० । न निर्वापः । पृश्न्याः पयोसि० । आत्मनो० । छन्दोभ्यः अपवर्गे त्रैविद्यकाय इदमाज्यमर्पयामि नमः । आज्यभागान्ते । रेवतीस्त्वा० । इयन्दुरुक्ता० । मित्रस्य० । सुश्रवः० । आज्यप्रधानं तेजोसि० । ये के च ज्मा० । छन्दोभ्यः स्वाहा । अपवर्गे त्रैविद्यकाय स्वाहा ॥ "प्रधानानन्तरं समिदाधानम्" ॥ यद्देवा देवहेळनं देवासश्चकृमा वयम् । अग्निर्मा तस्मादेनसो विश्वान्मुञ्चत्वंहसः ॥ यदि दिवा यदि नक्तमेनांसि चकृमा वयम् । वायुर्मा० ॥ यदि जाग्रद्यदि स्वप्न एनांसि चकृमा वयम् । सूर्यो मा० ॥ "उपस्थानम्" अग्ने व्रतपते व्रतमचारिषं तदशकं तत्ते [1]प्रब्रूमस्तन्नो गोपाय ॥ वायो० । सूर्य० ॥ ऋतुति-

---

१ प्रब्रवीमि ।

ध्यादि० । सावित्राणीत्यन्तं ॥ नात्र व्रतादेशः । न त्रैविद्यक व्रतम-
ग्न्वाधनम् ॥ सर्वेषां बान्धवानां नैवेद्यम् । अमृतेश-
मुद्रया अमृतीकृत्य । अमृतमस्तु अमृतायतां नैवेद्यं, सावित्राणि
सावित्रस्य देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ता-
भ्यामाददे । महागणपतये० इत्यादि । प्रजापतये सीमन्तकरण-
देवताभ्यः अग्नये इन्द्राय विष्णवे पुंसवनदेवताभ्यः जातकरण-
देवताभ्यः काय प्रजापतये नामकरणदेवताभ्यः मित्राय सोमाय
अन्नपतये चूडाकरणदेवताभ्यः मेधायै सरस्वत्यै छन्दोभ्यः उपा-
यनदेवताभ्यः छन्दोभ्यः त्रैविद्यकव्रतदेवताभ्यः उपाकरणदेवता-
भ्यः छन्दोभ्यः चातुर्होतृकदेवताभ्यः छन्दोभ्यः अपवर्गे चातुर्हो-
तृकव्रतदेवताभ्यः ब्रह्मणे प्रजापतये घर्माय सम्राजे सूर्याय विभ्राजे
देवेभ्योघर्मपेभ्यः पितृभ्योघर्मपेभ्यः छन्दोभ्यः प्रवर्ग्यव्रतदेवताभ्यः
ब्र० प्र० घ० सू० दे० पि० छ० अपवर्गे प्रवर्ग्यव्रतदेवताभ्यः । अ०
वा० सू० ब्र० प्र० सं० ऋतुभ्यः अरुणेभ्यः काण्डर्षिभ्यः छ० अरु-

णव्रतदेवताभ्यः । अ० वा० सू० ब्र० प्र० सं० ऋ० अ० छ० अप-
वर्गेऽरुणव्रतदेवताभ्यः । अ० वा० सू० ब्र० प्र० छ० ऋषिभ्यः छ०
औपनिषदव्रताय । श्रियै श्रीकामदेवताभ्यः । यशसे यशस्कामदे-
वताभ्यः । अ० वा० सू० ब्र० प्र० छ० ऋषिभ्यः छ० अपवर्गे
औपनिषदव्रतदेवताभ्यः । गोदानव्रतदेवताभ्यः । छ० अपवर्गे त्रै-
विद्यकव्रतदेवताभ्यः । स्नातकव्रतदेवताभ्यः लिकाहोमदेवता० ।
भगवते वासुदेवाय० विष्णुपञ्चायतनदेवताभ्यः अभयङ्करीदेव्यै०
इन्द्राय वज्रहस्ताय० हेरुकादिभ्यो वटुकादिभ्यः ॥ उत्पन्नममृतं
दिव्यं प्राक्क्षीरोदधिमन्थनात् । अन्नममृतरूपेण नैवेद्यं प्रतिगृ-
ह्यताम् ॥ मुक्ताविद्रुम० । अद्य तावत् । सुतस्य मौञ्जीबन्ध-
ननिमित्तं ॐनमो नैवेद्यं निवेदयामि नमः ॥ इळामग्ने० इत्यादि
पूर्णान्तं । पूर्णादौ ब्राह्मणपूजनम् ॥ गायत्र्यै नमः ॐभूर्भुवःस्वः३
अद्य तावत् अग्नेर्यविष्ठस्य सानुचरस्य आदित्यस्य अध्वर्योः ब्रह्म-
विष्णुमहेश्वरदेवतानां आत्मनो० सुतस्य मौञ्जीबन्धननिमित्तं

अर्चामहं करिष्ये ॐकुरुष्व ॥ यवान्विकीर्य । अग्नेर्यविष्ठाय सानुचराय आदित्याय अध्वर्यवे ब्रह्मविष्णुमहेश्वरदेवताभ्यः समालभनं गन्धादि दक्षिणान्तं । दक्षिणां च दत्त्वा । एता देवताः । गायत्र्यै नमः ३ अद्य तावत् । अग्नेर्यविष्ठस्य० आत्मनो० सुतस्य मौञ्जीबन्धननिमित्तं पूजनमच्छिद्रं सम्पूर्णमस्तु एवमस्तु ॥ एताभ्यो देवताभ्यो यथोदकं नमः० ॥ सर्वैं बान्धवैःसह आश्रावितमिति पूर्णां दत्त्वा त्र्यायुषं० अग्नौ दण्डं प्रास्येदप्सु मेखलां वासश्च । विमुच्य नयामि ॥ पुनरग्निं परिसमुह्य पर्युक्ष्य । इत्यपवर्गे त्रैविद्यकम् ॥ २४ ॥

उष्णीषं, वस्त्रद्वयं नवीनं, अलङ्करणादि च, स्नातकं परिधापयेत् ॥ (ब्रह्मचारी आचार्यं मधुपर्केण पूजयेत्)। अथ स्नानव्रतमन्त्राः॥ छन्दस्यऽर्थान्बुद्ध्वा स्नास्यन् गां कारयेदाचार्यमर्हयेत्। यथा षडर्घ्यार्हा भवन्ति आचार्य ऋत्विक् राजा विवाह्यः प्रियः स्नातक इत्यऽथैनमर्हयन्ति। आदौ च कर्मणोऽर्घ्यमुदकं सौषधं दर्भा इति, कंसे चमसे वा

दध्यासिच्य मधु च, वर्षीयसा पिधाय, विष्टराभ्यां परिगृह्य, पाद्य-
प्रथमैः प्रतिपद्यन्ते ॥ मयि दोहोसि विराजो दोहः पद्यायै विराजो
दोहमशीयेत्याह्रियमाणमनुमन्त्रयते ॥ "भगवन् विष्टरो विष्टरो
विष्टरः" भगवतः (आचार्यस्य वा) ब्रह्मचारिणः इदमासनम् ॥ आ-
स्यतां। विष्टरोसि मातरि सीदेति विष्टरमास्तीर्य तस्मिन्नुपविशति।
विष्टर आसीनायैकैकं त्रिः प्राह ॥ पाद्यं ३ अर्घ्यं ३ मधुपर्कः ३ आच-
मनीयं ३ नैव [1]भोरित्याह, न मार्षेति ॥ शन्नो देवी०, रित्यपोऽभिमन्त्र्य
पाद्याभिः प्रक्षालयते ॥ लाजाश्च० ॥ भगवन्पाद्यं २ ॥ ओं भगवन्पाद्यं
ददानि ते ३ । ओं भगवन् पाद्यं प्रतिगृह्णामि ३ । पाद्यपात्रे गृहीते
सति तद्दक्षिणेन पाणिनादाय सव्ये पाणौ निधाय स्वयं पादाववने-
निज्यात् । दक्षिणं पादमवनेनिज, इदमहमस्मिन्कुले ब्रह्मवर्चसं ददा-
मि । उत्तरं पादमवनेनिज, इदमहं मां मयि तेजो वीर्यमन्नाद्यं प्रजां

१ भोरिति सामान्यसम्बोधनं-मार्षेति नामसम्बोधनं चनात्र कर्तव्यम् केवलं भगव-
न्निति पूज्यसम्मान वचनं ब्रूयात् ॥

पशून् ब्रह्मवर्चसं ददामि ॥ आपो हिष्ठीयाभिरर्घ्यं परिगृह्य सावित्रेण मधुपर्कम् ॥ शन्नो देवी० । आपः क्षीरं० । भगवन्नर्घ्यं २ ॥ भगवन्नर्घ्यं ददानि ते ३. पाद्यपात्रवदर्घ्यपात्रमादाय । ओं भगवन्नर्घ्यं प्रतिगृह्णामि ३ ॥ इति त्रिरुक्त्वा प्रतिग्रहीता आपो हिष्ठेति तिसृभिः शिरसि कुशपवित्रेणापः क्षिपेत् ॥ पवित्रं निवार्य । (आचार्याय वा) ब्रह्मचारिणे गन्धादि० । अर्घ्यदानाद्यर्चनविधिः सर्वः परिपूर्णोस्तु । अन्नं नमः २ । इत्युक्त्वा ॥ सावित्राणीति मधुपर्कः ॥ "मधुपर्कं विदुस्त्र्यङ्गं याज्ञिका यज्ञकर्मणि । माक्षिकं च घृतं चैव सुजातं शोभनं दधि" ॥ भगवन्मधुपर्को मधुपर्को मधुपर्कः ३ । ओंभगवन्मधुपर्कं ददानि ते ३ इति त्रिरुच्चार्य दाता । सावित्राणि० । भगवन्मधुपर्कं प्रतिगृह्णामि ३ इति त्रिरुच्चार्याञ्जलिनादाय सव्ये पाणौ निधाय ग्रहीता विष्टरोस्यन्तरिक्षमधि विश्रयस्वेति वर्षिष्ठपात्रस्योपरिस्थितं विष्टरमुत्क्षिपेत् । विष्टरमवकृष्य । उरुत्वेत्यवसार्य उरुत्वा वाताय० । तच्चक्षुरित्यवेक्ष्य तच्चक्षुर्देवहितं० ॥ पृथिव्यास्त्वा नाभौ साधयाम्यऽ-

नेन विष्टरेऽधःस्थिते भूमौ निधाय। मधुवाता इति तिसृभिः प्रदेशि-
न्याऽलोडयति॥मधुवाता ऋतायते मधुक्षरन्ति सिन्धवः माध्वीर्नः स
न्त्वोषधीः। मधु नक्तमुतोषसा मधुमत्पार्थि वं रजः मधु द्यौरस्तु नः
पिता। मधुमान्नोवनस्पति र्मधुमाँ अस्तु सूर्यः माध्वीर्गावो भवन्तु
नः॥ वसवस्त्वाऽग्निराजानो भक्षयन्तु, पितरस्त्वा यमरा०, रुद्रा-
स्त्वा सोमरा०, आदित्यास्त्वा वरुणरा०, विश्वे त्वा देवा बृहस्पति-
राजानो० ॥ इति प्रदक्षिणं प्रतिदिशं प्रतिमंत्रं पात्रस्यान्तेषु लेपान्नि-
र्मार्ष्टि॥ यन्मधुन इति च। यन्मधुनो मधव्यस्य परमस्यान्नाद्यस्य प-
रममन्नाद्यं रूपं तेनाहं मधुनो मधव्यस्य परमस्यान्नाद्यस्य परमोऽ-
न्नादो मधव्यो भूयासं त्रय्यै विद्यायै यशोसि श्रियै यशोसि यशसे
ब्रह्मणो दीप्तिरसि इति। सत्यश्रीः, यशःश्रीः, मयिश्रीः, श्रीः श्रय-
तामिति मधुपर्कस्य चतुष्प्राश्नाति अङ्गुष्ठद्वितीयाभिः कनिष्ठया प्रथ-
ममेवमनुपूर्वं सर्वाभिस्तदवशिष्टं सुहृदे प्रयच्छति। भगवन्नाचम-
नीयं ३ त्रिरित्युक्ते आचार्याय वा ब्रह्मचारिणे आचमनीयं नमः। अ-

मृतोपस्तरणमसि स्वाहेत्यप आचामयेत् ॥ आचार्याय वा ब्रह्मचारिणे दक्षिणा ॥ [1]तस्मा असिपाणिर्गां प्राह । तां शास्ति । मम चामुष्यच पाप्मानं जहि, हतो मे पाप्मा, पाप्मानं मे हत ओंकुरुतेति, चतुरो नानागोत्रान्ब्राह्मणान्भोजयेत् । एष आद्यो-पायो, यद्युत्सृजेत् [2]माता रुद्राणामिति जपेत् माता रुद्राणां दुहिता वसूनां स्वसाऽऽदित्यानाममृतस्य नाभिः। प्रनुवोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट ॥ सूयवसाद्भगवती हि भूयाअथो वयं भगवंतः स्याम। अद्धि तृणमघ्न्ये विश्वदानीं पिब शुद्धमुदकमाचरन्ती । ॐ ३ उत्सृजत तृणान्यत्त्वित्युक्त्वा तामुत्सृष्टां पशुमङ्गंवा,

(१ यदाचार्य एवोक्त विधिना ब्रह्मचारिणं मधुपर्कादिना पूजयेत्तदा पूजाङ्गभूता दक्षिणापि किंचिन्मात्रा देया आचार्यमर्हयेदित्युक्त्या चाचार्यकृतार्चास्वीकारानन्तरं ब्रह्मचारिणापि स दक्षिणाभिरर्हणीयः ॥)

२ देवपालकृतभाष्ये–निश्चितेऽपि यदिशब्दो दृष्टः ' यदि वेदाः प्रमाणम् इति यथा । उक्तामितिकर्तव्यतां विधाय गामुत्सृजेत् एव न हन्यादित्यर्थः मातारुद्राणामितिचपठेत्

नामांसो मधुपर्कः स्यादिति ह विज्ञायते अपिवा घृतौदन एव स्यात्॥ मधुपर्के च यज्ञे च पितृदैवतकर्मणि। अत्रैव पशवो हिंस्या नान्यत्र मनुरब्रवीत्। इति मधुपर्कविधिः॥ श्रोत्रियोऽन्यो वेदाध्यायी, न तस्य स्नानम्, अथास्य स्नानं व्रजपरिहितं प्रपाद्य जटाश्मश्रुलोमनखमभिसंहार्य, "आपो हिष्ठा० ३" इति तिसृभिः स्नायात्। हिरण्यवर्णाः इति च द्वाभ्याम्। हिरण्यवर्णाः०। १। हिरण्यवर्णाः शुचयः पावका विचक्रमुर्हित्वावद्यमापः। शतं पवित्रा वितता ह्यासां ताभिर्मा देवः सविता पुनातु ॥ २ ॥ शन्न इति च द्वाभ्याम् शन्न आपो धन्वन्याः०, ॥ ३ ॥ आपो अस्मान्मातरः० ॥ ४॥ द्यौस्ते इति छत्रं धारयेत्। द्यौस्ते पृष्ठं पृथिवी सधःस्थमात्मान्तरिक्षं समुद्रो योनिः। विख्याय चक्षुषा त्वमभितिष्ठ प्रतन्यतः। इममग्न इति हिरण्यं बध्नीयात् ॥ गृत्समदस्य भार्गवस्य। इममग्नआयुषे० ॥ प्रतिष्ठे इति वाराह्युपानहौ[1] प्रतिमुञ्चेत्। प्रतिष्ठे स्थो देवते मा मा हिंसिष्टम् इति। द्विवस्त्रोऽत ऊ-

१ वाराह्योपानहौ। वाराही उपानहौ इति वा ॥

र्ध्वम् । तस्माच्छोभनं वासो भर्तव्यमिति श्रुतिः । ततो ब्रह्मचारी बाढमिति प्रत्याह ॥ वैणवदण्डधारी स्याः नित्यं, छत्रधारी स्याः, अपन्थदायी स्याः, अदत्तहरणं प्रतिषिद्धम्, अपरया द्वारा निःसरणं प्रतिषिद्धम्, मलवद्वाससा सह संभाषा प्रतिषिद्धा, रजोवाससा सह शय्या प्र०, गुरोर्गुरुकवचनं प्रतिषिद्धम्, अस्थाने स्वपनं प्र०, सरणं प्र०, गायनं प्र०, नर्तनं प्र०, तस्य चेक्षणं प्रति०, ॥ वेदमनूच्यैकादशानुवाकेनानुशास्ति । (वेदमनूच्याचार्यो ब्रह्मचारिणमन्तेवासिनमनुशास्ति)। सत्यं वद, धर्मं चर, स्वाध्यायान्मा प्रमद, आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः, सत्यान्न प्रमदितव्यम, धर्मान्न प्र०, यत्नान्न प्र०, कुशलान्न प्र०, स्वाध्यायप्रवचनाभ्यां न प्र०, यज्ञाद्देवपितृकार्येभ्यो न प्र०, मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव, अतिथिदेवो भव, यान्यनवद्यानि कर्माणि तानि त्वया कर्तव्यानि नो इतराणि । अथ यान्यस्माकं सुचरितानि तानि त्वया कर्तव्यानि नो इतराणि । अथ ये केचनास्मच्छ्रेयांसो ब्राह्मणा आगच्छे-

रंस्तेषां त्वयाऽऽसनेन प्रश्वसितव्यम्, श्रद्धया देयमश्रद्धया देयं, सं-
विदा देयमसंविदा देयं, ह्रियादेयं भिया देयं वित्त्यै देयमवित्त्यै देयं
भूत्यै देयमभूत्यै देयम् ॥ अथ यदि ते कर्मविचिकित्सा वृत्तिविचि-
कित्सा वा स्यात् ॥ ये तत्र ब्राह्मणाः सम्मर्शिनो युक्ता आयुक्ता रूक्षा अ
रूक्षा लुब्धा अलुब्धा धर्मकामा वा स्युः, यथा ते तत्र वर्तेरंस्तथा त्वं ते-
षु वर्तेथाः, अथाभ्याख्याता स्तेषु ये तत्र ब्राह्मणाः संमर्शिनो युक्ता
आयुक्ता रूक्षा अरूक्षा लुब्धा अलुब्धा धर्मकामा वा स्यु यंथा ते तत्र
वर्तेरन् तथा त्वं तत्र वर्तेथाः ॥ एष आदेशः, एष उपदेशः, एषा वे-
दोपनिषदेतदनुशासनमेवमेवैतदुपास्यम् ॥ अथातोष्टाचत्वारिंशत्सं-
मितम् । तत्र विधिविशेषः । नियमेष्वचार्यप्रधानः स्यात् । १ । निल-
यार्थी यूनबद्धं न प्रविशेत् । २ । अनिलयः स्यात् । ३ । अन्यत्र वृक्षा-
द्वल्मीकाद्वा । ४ । निस्तान्तवमित्येके । यथोक्तमेकं तु वासः शाणी चीरं
कुतपं वा । ५ । परिमितमुरःप्रमाणमुपरि जानु । ६ । चतुर्थकालपान-
भक्षः । ७ । असञ्चयवान् । ८ । अहरहर्वा भैक्षमश्नीयात् । ९ । अह-

स्तिष्ठेत् । १० । रात्रावासीत । ११ । उभयं मुनिव्रतः स्यात् । १२ । स्त्री-शूद्रपतितरभसरजस्वलैर्वा न सम्भाषेतेतिच्यवनोभृगुः । १३ । द्वाद-शरात्रं वोभयतः । १४ । अमावस्यां पौर्णमासीं च । १५ । पालाश्यः समिधो नित्याः । १६ । परिधिवृक्षाणां वा । १७ । मेधां मह्यमिति पाणिना मार्गं दत्वा त्रिषवणमहोरात्रमुदकोपस्पर्शनम् । १८ । नमो हमाय मोहमायेति चानुसवनम् । अग्नये वैश्वानराय तपाय ताप-साय तपन्ताय विन्दवे विन्दाय वसुविन्दाय सर्वविन्दाय नमः पा-राय सुपाराय पारयन्ताय शान्ताय नम ऊर्ध्याय नमः सूर्य्याय नम-श्च्यवनाय भार्गवाय इत्येता एव देवतास्तर्पयन्नुदकेन । १९ । एष संवत्सरं चरित्वा विमलो विपापो भवति । २० । सर्वेषां वेदानां च-रितब्रह्मचर्यो यदि नान्यत्कुरुते । २१ । स तु खलु चरितब्रह्मचर्यो दश दश पुरुषान्पुनाति पूर्वापरानात्मानं चैकविंशम् । २२ । पंक्तिं च यावदनुपश्यति यस्यामुपविशति । २३ । समाप्त एतासामेव देवता-नामन्नस्य जुहोति । धेनुर्दक्षिणा । २४ । इति शिक्षाः ॥ पुनस्तीर्थं ग-

च्छेत् प्राचीमुदीचीं वा तत्र मंत्राः ॥ ये ते पन्थानः सविता पूर्व्यासो रेणवो वितता अन्तरिक्षे । तेभिर्नो अद्य पथिभिः सुगेभी रक्षा च नो अधि च ब्रूहि देव ॥ नमोऽग्नये पृथिवीक्षिते लोकस्पृते लोकमस्मै यजमानाय देहि, नमो वायवेऽन्तरिक्षक्षिते लोकस्पृते लोकमस्मै यजमानाय देहि, नम आदित्याय दिविक्षिते लोकस्पृते लोकमस्मै यजमानाय देहि ॥ नदीतीरं गत्वा सन्ध्योपासनं कुर्यात् ॥ ततो नदीतीरादागत्य स्वस्तिपुण्यत्वाद्धोमस्य चानाम्नातत्वात्त्रिकादिभिर्होमः ।

तत्रायं विधिः । परिसमुह्य पर्युक्ष्य परिषिच्य । चतुष्कोष्ठैः स्तरैः परिस्तीर्य । यज्ञस्य सन्तति० । ४ ॥ आज्यं संस्कृत्य, प्रश्न्याः पयोऽसि० इत्यादिभिर्यजुषे यजुष इत्यन्तं सम्पाद्य हविरसीति० आज्यदर्शनम् । आत्मनो० त्रिकाहोमदेवताभ्यः इदमाज्यं० । अभ्युक्ष्य पवित्रमग्नौ० । स्रुवं प्रतिताप्य, यैः कैश्चिद्दर्भाग्रैः स्रुवं संसृज्य होमः ॥ (वामहस्ते दर्भकाण्डचतुष्टयमुपयामार्थं धार्यम्) तव श्रिये इति पञ्चविंशति-

माज्याहुतीर्जुहुयात् स्रुवेण ॥

तव श्रिये व्यजिहीत पर्वतो गवां गोत्रमुदसृजो यदङ्गिरः ।
इन्द्रेण युजा तमसा परीवृतं बृहस्पते निरपामौब्जो अर्णवम् ॥१॥
बृहस्पते अति यदर्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु । यद्दी-
दयच्छवसर्तप्रजात तदस्मासु द्रविणं धेहि चित्रम् ॥ २॥ बृह-
स्पतिः समजयद्वसूनि महोव्रजान्गोमतो देव एषः । अपः सि-
षासन्त्स्वरप्रतीतो बृहस्पतिर्हन्त्यमित्रमर्कैः ॥ ३ ॥ यमो दाधार
पृथिवीं यमो द्यामुत सूर्यम् । यमाय सर्वमित्तस्थे यत्प्राण-
द्वायुरक्षितम् ॥ ४ ॥ यथा पञ्च यथा षड्यथा पञ्च दशर्षयः। यमं
यो विद्यात्स ब्रूयाद्यथैकर्षिर्विजानते ॥ ५ ॥
त्रिकद्रुकेभिः पतति षडुर्वीरेकमिद्बृहत् । गायत्री त्रिष्टुप्छन्दाँसि
सर्वा ता यम आहिता ॥ ६ ॥ मृळा नो रुद्रोत नो मयस्कृधि
क्षयद्वीराय नमसा विधेम ते । यच्छं च योश्च मनुरायेजे पिता
तदश्याम तव रुद्र प्रणीतिषु ॥ ७॥ अश्याम ते सुमतिं देव-

यज्यया त्वयद्वीरस्य तव रुद्र मीढ्वः । सुम्ना यन्निद्विशो अस्मा-
कमा चरारिष्टवीरा जुहवाम ते हविः ॥७॥ त्वेषं वयँ रुद्रं
यज्ञसाधनं वङ्कुं कविमवसे नि ह्वयामहे । आरे अस्मद्दैव्यं हेळो
अस्यतु सुमतिमिद्वयमस्या वृणीमहे ॥ ९ ॥ अव ते हेळो० ॥१०॥
उदुत्तमं वरुण० ॥ ११ ॥ इमं मे वरुण० ॥ १२ ॥ तत्त्वायामि०
॥ १३ ॥ ओंभूर्लोकाय स्वाहा ॥१४॥ ओंभुवर्लोकाय स्वाहा ॥ १५ ॥
ओंस्वर्लोकाय स्वाहा ॥ १६ ॥ ओंभूर्भुवः स्वर्लोकाय स्वाहा ॥ १७॥
अग्निर्मूर्धा० ॥ १८ ॥ उभा वामिन्द्राग्नी० ॥ १९ ॥ अयमिह० ॥२०॥
अयं ते योनि० ॥ २१ ॥ स्तोमो देवानां । उपप्रयन्तो० ॥ २२ ॥ अ-
स्य प्रत्ना० ॥ २३ ॥ अरुणेः । कदाचनस्तरी० ॥२४॥ आज्यदर्शनस्य
अक्षोटेन सहिताहुतिः । परि ते दूळभो० ॥ २५ ॥ विमुच्य ३ । न-
यामि । इति त्रिकाहोमाः ॥ ब्रह्मचर्यात्समावृत्तं पिता पुत्रं
मधुपर्केणार्हयेत् तदुक्तं । तं प्रतीतं स्वधर्मेण ब्रह्मदायहरं पितुः ।
स्रग्विणं तल्पआसीनमर्हयेत्प्रथमं गवा ॥ स्नातकेति नाम्ना

पिता पुत्रं गन्ध पुष्प पाद्यार्घ्यादिना मधुपर्केण चार्हयेत् ॥ (१४६ पृष्ठे द्रष्टव्यम्) ॥ अथ यजमानः पुनरग्निं परिसमुह्य पर्युक्ष्य परिषिच्य परिस्तीर्य ४ स्तरैः वैश्वदेवं विदध्यात् । वैश्वदेवस्य सिद्धस्य० आद्रावग्नये स्वाहेत्युत्तरतः इत्यादि० । नैवेद्यम्० । पूर्वाग्रान्दर्भानास्तीर्य, तत्त्वायनमः इत्यादि० ॥ अपसव्येन दक्षिणाग्रान्दर्भानास्तीर्य, समस्तमाता पितृभ्योऽन्नम् ॥ गन्धादि च० सर्वं हिमपानादि० ॥ सव्येन । वसन्ताय नमः० इत्यादि ॥ ज्वालालिङ्ग स्रुक् स्रुवाणामच्छिद्रम् ॥ (पृष्ठे २५ द्रष्टव्यम्) ॥ अग्नये स्विष्टकृते स्वाहा ॥ प्राणायामः ॥ विमुच्य० ३ ॥ नयामि ॥ क्षमापुष्पाणि — क्षमस्व देवदेवेश देवाधिष्ठित विग्रह । पुत्र पौत्रादिकं सौख्यं देहि मे हव्यवाहन ॥ १ ॥ राज्यं देहि धनं देहि पुत्रान्कामांश्च देहि मे । आयुरारोग्यं मे देहि भगवन् हव्यवाहन ॥ २ ॥ देहि पुत्रं तथा पौत्रं देहि मे मत्त कुञ्जरान् । सुखं सौभाग्यं मे देहि भगवन् हव्यवाहन ॥३॥

नित्योत्सवकरो भूया नित्यानन्दं च देहि मे । गोपशुवृद्धिं मे
देहि भगवन् हव्यवाहन ॥ ४ ॥ बुद्धिं कीर्तिं यशो देहि भोगं
च विभवं तथा । देहि कुटुम्बकुशलं भगवन् हव्यवाहन ॥५॥
जयं देहि श्रियं देहि सुखं देहि सुमन्त्रितम् । आयुरारोग्यं मे
देहि भगवन् हव्यवाहन ॥ ६ ॥ सर्वलक्षणसम्पूर्णः सर्वदेव-
नमस्कृतः । प्रसन्नो भव मे देव यज्ञेऽस्मिन्हव्यवाहन ॥ ७ ॥
सप्तजन्मकृतं पापं वाङ्मनःकायकर्मजम् । सर्वं तद्विलयं यातु
प्रसादं कुरु सर्वदा ॥ ८ ॥ अद्य मे सफलं जन्म तथा मे सफलं
तपः । अद्य मे सफलं ज्ञानं धनञ्जयप्रसादनात् ॥ ९ ॥ धनं गणं
देहि पुनीहि चित्तं लुनीहि पापेन्धनसञ्चयं च । अकारणाद्वै-
रपराननार्यांश्शत्रून्समस्ताञ्जहि जातवेदः ॥ १० ॥ राज्ञां शिवं
चास्तु तथा प्रजानां गवां शिवं चास्तु तथा द्विजानाम् । आ-
तङ्कहीनं जगदस्तु सर्वं दोषाः समस्ताः प्रलयं प्रयान्तु ॥११॥
धर्मं देहि धनं देहि पुत्रपौत्रांश्च देहि मे । आयुरारोग्यं मे

देहि देहि मे हव्यवाहन ॥ १२ ॥ भक्तिं देहि श्रियं देहि सुखं देहि शुभं तथा । देहि भोगं च मोक्षं च मनोभिलषितं मम ॥१३॥ हव्यं वहसि वह्ने त्वं कव्यं वहसि पावक । मह्यं धनायुरारोग्यं दत्त्वा गच्छ हुताशन ॥ १४ ॥ देहि पुत्रांस्तथा पौत्रान्देहि लक्ष्मीं च पुष्कलाम् । भक्तिं देहि श्रियं देहि सुखं देहि स्वतन्त्रताम् ॥ १५ ॥ गच्छ गच्छ सुरश्रेष्ठ० ॥ १६ ॥ तेजोसि तेजो मयि धेहि इत्यात्मानं धेहि ॥ भगवन् यद्म० ॥ कण्ठोपवीती हन्तमनुष्येभ्यः० ॥ सव्येन या काचिद्योगिनी० ॥ सौरभेयाः स्वर्गहिताः० इत्यादि गोग्रासादि सर्वम् ॥ ये विश्वभाविनो भूताः० इत्यादिना क्षेत्रेशबलिः ॥ अपसव्येन आयुः प्रजां धनं० ॥ ततः कलशस्य विसर्जनं पूर्ववत् ॥ सव्येन॥ गायत्र्यै नमः ओं भूर्भुवः स्वस्तत्सवितु० ३ ॥ तत्सद्य० । महागणपतेः ० प्रजापतेः सीमन्तकरणदेवतानां, अग्नेरिन्द्रस्य विष्णोः पुंसवनदेवतानां, जातकरणदेवतानां, कस्य प्रजापतेः नामकरणदेवतानां, मित्रस्य,

सोमस्य, अन्नपतेः, चूडाकरणदेवतानां, मेधायाः सरस्वत्याः छन्दसां उपायनदेवतानां, छन्दसां त्रैविद्यकव्रतदेवतानां, उपाकरणव्रतदेवतानां, छन्दसां चातुर्होतृकव्रतदेवतानां, छन्दसां अपवर्गे चातुर्होतृकव्रतदेवतानां, ब्रह्मणः प्रजापतेः घर्मस्य सम्राजः सूर्यस्य विभ्राजः देवानां घर्मपाणां पितॄणां घर्मपाणां छन्दसां प्रवर्ग्यव्रतदेवतानां, ब्रह्मणः प्रजापतेः घर्मस्य सम्राजः सूर्यस्य विभ्राजः देवानां घर्मपाणां पितॄणां घर्मपाणां छन्दसां अपवर्गे प्रवर्ग्यव्रतदेवतानां, अग्नेः वायोः सूर्यस्य ब्रह्मणः प्रजापतेः संवत्सरस्य ऋतूनां अरुणानां काण्वर्षीणां छन्दसां अरुण व्रतदेवतानां, अग्नेः वायोः सूर्यस्य ब्रह्मणः प्रजापतेः संवत्सरस्य ऋतूनां अरुणानां काण्वर्षीणां छन्दसां अपवर्गे अरुणव्रतदेवतानां, अग्नेः वायोः सूर्यस्य ब्रह्मणः प्रजापतेः छन्दसां ऋषीणां छन्दसां औपनिषदव्रतदेवतानां, श्रियः श्रीकामदेवतानां, यशसः यशस्कामदेवतानां, अग्नेः वायोः सूर्यस्य ब्रह्मणः प्रजापतेः छन्दसां ऋषी-

णां छन्दसां अपवर्गे औपनिषदव्रतदेवतानां, गोदानव्रतदेवतानां, छन्दसां अपवर्गे त्रैविद्यकव्रतदेवतानां, स्नातकव्रतदेवतानां, त्रिकाहोमदेवतानां, वासुदेवादीनां, विष्णुपञ्चायतन देवतानां अभयङ्करीदेव्याः क्षेमङ्करी० सर्वशत्रु० इहराष्ट्राधिपतेः भैरवस्य, इन्द्रस्य वज्रहस्तस्य इत्यादि सर्वं पूर्ववत् अग्नेः वायोः सूर्यस्य ब्रह्मणः इन्द्रस्य प्रजापतेः भवस्य शर्वस्य ईशानस्य ईश्वरस्य विष्णोः बृहस्पतेः यजुर्वेदस्य छन्दसां ऋषीणां वेदानां ब्राह्मणानां सोमानां सोमपानां आचार्याणां विंशतिऋषीणां, पृथिव्याः अग्नेः ऋग्वेदस्य ब्रह्मणः छन्दसां इत्यादि चतुर्मुखस्य ब्रह्मणः हेरुकादीनां वटुकादीनां आत्मनो० सुतस्य मौञ्जीबन्धननिमित्तं पूजनमच्छिद्रं सम्पूर्णमस्तु एवमस्तु ॥ एताभ्यो देवताभ्यो यवोदकं नमः उदकं० ॥ आज्ञा मे दीयतां नाथ० ॥ आपन्नोऽस्मि शरण्योऽसि० ॥ ईशानविष्णु० । कलिकलुष० ॥ आरोग्यं तरणिः० ॥ आयुश्च विद्या च ० ॥ क्षमध्वं मम क्षेत्रेशाः ० ॥ आह्वानं नैव० ॥

यदक्षरपद० ॥ उभाभ्यां जानुभ्यां० ॥ नमो ब्रह्मणे० ३ तर्पणम् ॥ यज्ञेनयज्ञमयजन्त० ॥ उत्सृजामहेध्यायान्प्रतिविश्वसन्तु च्छन्दांसि कस्त्वा विमुञ्चतु इति पठेत् — ऋषिविसर्जनं ॥ कस्त्वा विमुञ्चति सत्वा विमुञ्चतु विष्णुस्त्वा विमुञ्चत्वऽस्य यज्ञस्यर्द्ध्यै मह्यं सन्नत्या अध्ययनायामुष्मै कामायायुषे त्वा, प्राणाय त्वा, व्यानाय त्वा, ऽपानाय त्वा, व्युष्ट्यै त्वा, रय्यै त्वा, राधसे त्वा, पोषाय त्वा, घोषाय त्वा, रादूघोषाय त्वा, प्रतिष्ठित्यै त्वेति ॥ ब्रह्मविसर्जनं ॥ सोमानं स्वरणङ्कृणुहि ब्रह्मणस्पते कक्षीवन्तं य औषजः इति ॥ उदकलशमुपनिधाय उत्तिष्ठ ब्रह्मणस्पते० इत्यादि ॥ बोधश्चमेति स्वस्त्ययनं वाचयति० ॥ मन्त्रार्थाः सफलाः सन्तु० ॥ ततः सर्पिष्मदन्नं ब्रह्मणान्भोजयेत् ॥ अथ पुनः शुद्धीभूय- आब्रह्मन् इति पठित्वाऽऽशीर्वादेन सह पुष्पाणि गृहीत्वा यज्ञच्छिद्रमित्यादि - प्रार्थयेत् ॥ यज्ञच्छिद्रं तपश्छिद्रं यच्छिद्रं यजने मम । अच्छिद्रमस्तु तत्सर्वं भास्करस्य प्रसादतः ॥ सत्याः

सन्तु यजमानस्य कामाः इत्यग्नौ पुष्पम् ॥ राजस्वस्ति० सर्वे भवंतु० राज्ञां शिवं चास्तु० ॥ नन्दन्तुसाधकाः० ॥ इति प्रार्थना ॥

सम्पूर्णोऽयं गर्भाधानादि संस्कार विधिः ॥

केचिच्चेत्स्युः क्वचन विषये बुद्धिमान्द्यात्प्रमादाः
सन्तव्यास्तेऽशरणशरणैर्बुद्धिमद्भिः समाद्यैः ।
जन्तोर्बुद्धिर्ह्यखिलविषयेष्वस्वतन्त्रा परात्मा -
धीना, तस्माद्भवत शरणं सद्वरा भूसुरा! मे ॥

अपिच - धीचोदको यद्भगवान्परात्मा तद्दर्शितं वस्तु नरोऽनुपश्येत् ।
तस्मादुपालम्भपरोऽस्वतन्त्रे, वाच्यः स्वयं स्याद्विदुषां समाजे ॥

वर्होत्तंसित चारुकुन्तलधरं श्रीचन्दनालंकृतं ।
भास्वत्पूर्णसुधांशुमञ्जुवदनं वंशीधरं सुन्दरम् ॥
नानारत्नविभूषणैश्च सुमनःस्रग्भिर्मनोहारिणं ।
राधाखेलन तत्परं प्रभुवरं श्रीकृष्णचन्द्रं श्रये ॥

इति निवेदयति काश्मीरस्थ राजकीय पाठशाला मुख्याध्यापको नाथराम शास्त्री

ॐ

ॐ नमो नारायणाय ॥

प्रकृतग्रन्थप्रास्ताविकोपयोगि किञ्चिदुल्लिख्यते ॥

इह खलु स्वाध्यायोऽध्येतव्य इति, ब्राह्मणेन निष्कारणो धर्मः साङ्गो वेदोऽध्येतव्य इति, स्वाध्यायेन व्रतैर्होमैरिति, यथा काष्टमयो हस्ती यथा चर्ममयो मृगः । यश्च विप्रोऽनधीयानस्त्रयस्ते नाम बिभ्रति इति, तथा विप्रोऽनृचोऽफल इति, वेदः कृत्स्नोऽधिगन्तव्यः सरहस्यो द्विजन्मना । वेदाभ्यासो हि विप्रस्य तपः परमिहोच्यते इति, योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम् स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वय इत्यादिश्रुतिभिः स्मृतिभिश्च मुक्तकण्ठमवाघुषितमुद्घुषितं च, आचार्यमुपगम्य तच्चरणसंवहनादिना तद्दयास्पदीभूतस्य द्विजमात्रस्य स्वाध्यायाध्ययनमत्यन्तमावश्यकम् ॥

नाविदितं चैतन्निगमकल्पलतापुष्पभ्रमरायमाणानां तज्ज्ञानज्योत्स्नानिर्धूतान्तःस्थान्धतमसानां निपुणं निरूपयतां पण्डितधुरन्धराणाम् । यत् 'कृतोपनयनस्यास्य व्रतादेशनमिष्यते, ब्रह्मणो ग्रहणं चैव क्रमेण विधिपूर्वक-

मित्यादिम न्तयोपनयनसंस्कारमन्तरा द्विजात्मजो नार्हति तत्स्वाध्याया-ध्ययनम्, नचासंस्कृतः सन्ध्यावन्दनादिरहितत्वात्कस्मिंश्चिदपि वेदविहिते दैवे यज्ञादिकर्मणि, पित्र्ये वा श्राद्धादिकर्मणि लभतेऽधिकारम् ॥

नच द्विजबालानां विनोद्दिष्टसंस्कारैः—"आचार्यस्त्वस्य यां जातिं विधिवद्वेदपारगः । उत्पादयति सावित्र्या, सा सत्या साऽजराऽमरा," इत्यादि स्मार्तवचनप्रामाण्याद् द्विजत्वमेव संगच्छते । नचापि संस्कारविहीनस्य बैजिकगार्भिकैनःशुद्धिः सम्भवति । नचैषामार्यविगर्हितः कालातिक्रमोऽपि व्रात्यत्वापादकः प्रायश्चित्तीयत्वविधानात्पराङ्मुखः ॥

एवं च गर्भाधानादारभ्य सीमन्तोन्नयनादयो गर्भसंस्कारा जातकरणादयोऽन्ये चान्तःकरणोन्मार्जका इति सर्वे चतुर्विंशतिः संस्कारा यावन्न विधीयेरन्, तावच्छाणानुल्लीढः पाषाणबुद्धिनिरस्तमणिभावो मणिरिवासंस्कृतो द्विजबालः सुवंशोत्पन्नोऽपि कर्मानुपयुक्तशरीरो मोघरूपेण वेदज्ञानफलेन दूरतो धिक्कृतो न शोभामावहति । नच वैदुष्यमाप्य विद्वन्मण्डल्यन्तर्गतो ज्ञानगोष्ठीसुखमनुभवितुमनुभावयितुं वा पारयति, इत्येतावदेव पर्याप्तं

द्विजत्वप्राप्त्यर्थं द्विजबालानां संस्काराणामावश्यकत्वे ॥
ते चैते संस्काराः शुद्धस्योपनयनसंस्कारविधिपुस्तकस्य सत्त्व एव याज्ञे कर्मणि सुप्रयुक्ता भवितुं शक्नुयुरित्याशया चिरन्तन्या व्याप्तः, पंडितमाधवराम केशवरामयोर्यन्त्रालयाधिपत्योः सम्प्रार्थनया प्रेरितश्चाहमस्य पुस्तकस्य यथामति शोधनाय भगवत्कृपाधारः प्रयतिष्ये ॥ क्षीरनीरविवेककुशला हंसा इव निर्मत्सरा ब्राह्मणोत्तंसाः पुस्तकस्यास्य स्वीकारेण मदीयं प्रयासमवलोक्य मां मुद्रकावपि कृतार्थयन्तु, इत्याशासे—राजकीय पाठशालामुख्याध्यापकः काश्मीरदेशाभिजनो गणेशघाट्टवास्तव्यः कल्लेत्युपाह्वो **नाथरामशास्त्री**,,

अत्र पण्डितटीकारामशास्त्रिवर्यः पुस्तकार्पणेन प्रशस्यकार्यकारित्वाद्धन्यवादार्हः तत्रतारकावतंसस्य पण्डित—ईश्वरचन्द्रस्य पौत्रः, पण्डितराजेश्वरस्य पुत्रः पं०वागीश्वरोऽपिपुस्तकार्पणेन प्रशस्यतरः ॥ पण्डित प्रकाशजुवचन्द्र पौत्रेण पं० भास्करचन्द्रेणापि पुस्तकदानेनात्र विषये सहायो दत्तः ॥
सवत् १९९३ वैशाखमासः ॥

त्र्यायुषम्— त्रयाणां बाल्यादीनामायुषां समाहारः— त्र्यायुषम् जमदग्न्यादीनां यादृशं बाल्यादिषु चरितं तादृशं नो भूयादिति ॥

प्रस्तुतचतुर्विंशतिसंस्कारानुगतं किञ्चिन्मात्रमत्र प्रस्तूयते—

१. बीजवापनम्—

षोडशाहर्ऋतुः स्त्रीणां तस्मिन्युग्मासु संविशेत् ।
ब्रह्मचार्येव पर्वाण्याद्याश्चतस्रश्च वर्जयेत् ॥ १ ॥
चित्रकर्म यथानेकैः रङ्गैरुन्मील्यते शनैः ।
ब्राह्मण्यमपि तद्वत्स्यात् संस्कारैर्विधिपूर्वकैः ॥ २ ॥
गार्भैं र्होमै र्जातकर्मचौडमौञ्जिनिबन्धनैः ।
गार्भिकं बैजिकं चैनो द्विजानामपमृज्यते ॥ ३ ॥

२. सीमन्तकरणम्—

सीमन्तं कारयेतेति - विद्वानपि सीमन्तोन्नयनसंज्ञया यौगिक्या प्रसिद्धं यत्संस्कारकर्म तत्कारयेत, न तु स्वयं कुर्यादिति शिष्ट प्रयोगः ॥ इदं कर्माधारस्यैव ॥ यो गुरुस्तमर्हयेत् इति - यो गुरुर्होमकर्ता मातुलादिस्तमर्हयेत् योनिसंबद्धं कश्चिदेतत्कर्म कारयेत् न त्वृत्विङ्मात्रम् । एतदेवात्रैव काले वाग्दत्तानां कुमारीणां सटोद्धरणं - केशरचनाविशेषात्मकम् । अत्रैवानुलेपनं—सीमन्तशोभाधायि । अथवा, अत्रैवानवलोभनं गर्भरक्षार्थमन्यगृह्योक्तं कार्यमिति प-

ष्टिकायाम् ॥ गर्भपातनिवृत्त्यर्थं संस्कारोऽनवलोभनमिति ॥ स्त्रियो ह्यापद्ग्रस्ता एकवेणीधराः प्रायो वर्तन्ते, अस्य तु संस्कारस्योत्सवसम्बद्धत्वात् स्त्रीणां शमीशाखादिना सीमन्तविचयः [प्रसाधनम्] पृथक् केशपक्षग्राहो, नीललोहितेन सूत्रेण वेणीद्वयग्रन्थनं चेति त्रीणि कर्माणि मन्त्रैर्विधेयानि ॥

३. पुंसवनम्—

भूयिष्ठगतेषु इति—दशमे मासि सूतवे इति श्रुतिदर्शनाद्गर्भमासा दश, तत्र पञ्चार्धभागः। भूयिष्ठः सप्तमो गतो येषां तेष्वष्टमे मासि इति शिष्टाचारात् ॥

यत्रैकः स्थालीपाकस्तत्र देवताभेदेऽपि एककर्म। द्रव्यदेवतासंयोगस्यैक्यात्। इह तूभयभेदात्संयोगभेदेन कर्मबहुत्वम् ॥ अत एवाग्नये- इन्द्राय- विष्णवे-इति देवताभेदेन भिन्नेषु स्थालीपाकेषु निर्वपणादि ॥

४. जातकरणम्—

दुहितरि न होमो, नाम तु क्रियतेऽमन्त्रकम्, सशिरस्कं स्नपयित्वेति पुंलिङ्गनिर्देशात् ॥ नाभिवर्धनादनन्तरं नामधीयते।

वैदिकैः कर्मभिः पुण्यैर्निषेकाद्यैर्द्विजन्मनाम्।
कार्यः शरीरसंस्कारः पावनः प्रेत्य चेह च ॥ १ ॥
स्वाध्यायेन व्रतैर्होमैस्त्रैविद्येनेज्यया सुतैः।
महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः ॥ २ ॥

गार्भैर्होमैर्जातकर्म चौडमौञ्जिनिबन्धनैः ।
गार्भिकं बैजिकं चैनो द्विजानामपमृज्यते ॥ २ ॥

जातकर्म कृत्वा नामकरणम्, नाम्न आदौ घोषवदक्षरम्, मध्येऽन्तःस्थाक्षरम्, यथोपपत्ति वा— देवताप्रसादलब्धत्वादिना वा ॥ स्वस्त्ययनं- अविनाशप्रापणं ॥ वाचयतीति पुरोहितेन । स्वयं ब्रातृत्वे तु स्वार्थेऽत्र णिच् ॥

५ नामकरणम्—

दशम्यां रात्रौ व्युष्टायां व्यतीतायां एकादश्यां द्वादश्यां वाऽशौचशुद्धौ यस्मिन्नग्नौ जातकरणं कृतम्, तस्मिन्नेवाग्नौ सूतिकागारस्थे सूतकाग्नौ स्थालीपाकं श्रपयेत् । यावच्छिशोर्गृहान्निष्क्रमणं न कृतं तावदन्यत्रायुक्तम् ॥

तदेव नामधीयतेऽन्यादित्येक-अत्रानुवाकेऽसावित्यस्य स्थाने तदेव नामधीयते यज्जातकर्मणि कृतं नान्यत् ॥ एके पुनराहुः- अत्रान्यन्नाम निधीयते । द्वे हि नाम्नी ब्राह्मणस्य कर्तव्ये तत्र यद्रहस्यं जातकर्मण्युक्तं "पुत्रे जाते नामधीयत, इति । तस्य प्रयोजनं परैरभिचारे क्रियमाणेऽनुच्चारात् । प्रकटं त्वेकादशादौ व्यावहारिकम् ॥ निग्राप्येति पाठे स्वार्थे णिच् शिङ्घनं कृत्वेत्यर्थः ॥ पित्रसन्निधौ मातरं प्रयुज्येति केचित् । ऋत्विग्वा पितुः प्रयोजको विवक्षितः ॥ (एवमत ऊर्ध्वं विप्रोष्य) नामकरणादूर्ध्वं यदा प्रवासात्पिताऽऽयाति पिता शिरसि शिङ्घेत् ॥

६. सूर्यदर्शनं—

जन्मनः प्रभृति तृतीयमासस्यार्धमासे व्यतीते बाल आदित्यस्य दर्शनं पुण्याह कारयितव्यः । बालं सम्मुखमुत्संगे कृत्वा बालपित्रा परंब्रह्मरूपत्वेन सर्वमयत्वादादित्यः स्तूयते ।

७ चन्द्रदर्शनम्—

चतुर्थे मासि कर्तव्यं शिशोश्चन्द्रस्य दर्शनम् ।
द्वादशेऽहनि राजेन्द्र शिशोर्निष्क्रमणं गृहात् ॥ १ ॥

अत्र दक्षिणादर्शापरपर्यायः प्रकाशः । अधिवासो वा, तच्चोत्तरीयं वासः ॥

८. अन्नप्राशनम्—

षष्ठे मास्यन्नप्राशनम्— आज्यमन्नादिकामः । घृतौदनं तेजस्कामः । दधिघृतमधुमिश्रमन्नं प्राशयेत्सर्वकामः इति ।

अलङ्कृतस्य दातव्यमन्नं पात्रेऽथ काञ्चने ।
मध्वाज्यकनकोपेतं प्राङ्मुखं प्राशयेच्छिशुम् ॥ १ ॥

अन्नपते इत्यादि मन्त्रः प्राशने ॥

९. चूडाकरणम्—

अर्धमवधिं कृत्वा सप्तमो मासो भूयान्, अष्टमश्च भूयिष्ठस्तस्मिन्गते नवमे मासीत्यर्थः, इत्याह तृतीयस्य वर्षस्य भूयिष्ठेषु गतेषु चूडाः कारयते इति–

विदुषाऽपि स्वयं न कार्यमिति शिक्षा दर्शितम् । दक्षिणे शिरोभागे कपुजाः [चूडाः] वसिष्ठगोत्रजानाम् । उभयतो (दक्षिणोत्तरभागयोः) अत्रिकश्यप-गोत्रजानाम् । मुण्डाः (निःशिखाः) भृगुगोत्रजाः । पञ्चचूडाः (चतुर्दिक्षूर्ध्वं च) अङ्गिरोगोत्रजातानाम् । एके चाङ्गिरसानां वाजि— केशपङ्क्तिमिच्छन्ति ॥ अन्येऽगस्त्यविश्वामित्रादिगोत्रजा मङ्गलार्थं शिखिनो भवन्ति ॥ निःशिखत्वं हि अमङ्गलमनिष्टहेतुः ॥ तथा च पठन्ति— अमेध्यमेतच्छिरो यदशिखमिति । यथा कुलधर्मं वा — कुलधर्मानतिक्रमेणैवैकशिखत्वादि कर्त्तव्यम् ॥ कुलाचारो हि परो धर्मः ॥

दर्भक्षुरकर्म कर्तव्यमृत्विजा इति शेषः ॥ सुहृत्परिग्राह्यानुप्यमानान्समवचि-नोति— सुहृदा पतन्तः केशा ग्राह्या इति हि नियमः । हरितगोमयेन मिश्रीकृत्य पिण्डीकरोतीति कश्चिदाचारः ॥

१०. उपायनम्—

सप्तमे वर्षे० इति ॥ जन्मनः प्रभृति सप्तमे वर्षे गर्भादष्टमे ब्राह्मणस्यो-पायनमाचार्यसमीपगमनं मेखलाबन्धनसंस्कारः प्रधानभूतः । तस्मिन्हि सति श्रुतिस्मृत्यधिकारो भवति । यतोऽनेन द्वितीयजन्मत्वं स्मर्यते ।

प्रथमं मातृतो जन्म द्वितीयं मौञ्जिबन्धनात् ।
तत्रास्य माता सावित्री पिता त्वाचार्य उच्यते ॥ १ ॥

१

१० सप्तदशे तु प्राप्तेऽतिक्रमः। अतिक्रमे हि प्रायश्चित्तम्—

येषां द्विजानां सावित्री नानूच्येत यथाविधि ।
तांश्चारयित्वा त्रीन्कृच्छ्रान्यथाविध्युपनाययेत् ॥ इति ॥

मेखला— मेहनसम्बन्धिनः खस्य मालेति निर्वचनं कुर्वन्ति ॥ मयूरव्यंसकादित्वात्साधुः ॥ मिह्यते सिच्यते वीर्यादिकमनेनेति मेहनमानन्देन्द्रियं । तस्योपरि नाभेरधो यत् खमाकाशस्तस्य मालेति मेखला ॥ बद्धायां ह्यस्यां वाक्पाणिपादचापलस्य नियमचोदनया वारणात् 'यतो मा स्खल सत्यादिति'— नियमादिति मेखला ॥ अथवा, मेखो — मोहस्तं लाति— धारणया निगृह्णाति इति मेखला ॥ अत्रिः ॥ दक्षिणं पाणिमुद्धृत्य प्रकाममभिवादयेत्। श्रोत्रिये त्वञ्जलिः कार्यो गुरोः पादोपसंग्रहमित्युपसंग्रहणं केवलं गुरुविषयम् ॥

अकारश्चास्य नाम्नोऽन्ते वाच्यः पूर्वाक्षरःप्लुत इति । प्रत्यभिवादने गुरुणाभिवादकस्य नाम्नोऽन्तेऽकारः प्लुतो वाच्यः, इत्यन्वयः । अत्राकारग्रहणमन्तिमस्वरोपलक्षणार्थम् । ततश्च य एवास्ति अन्त्यः स्वरः स प्लुतः कार्यः, ततश्च पूर्वाक्षर इति विशेषणोपादानाद्व्यञ्जन सहित एव स्वरः प्लवनीयः। न पुनरपूर्वोऽकारो नामान्ते विधीयते इति । [किं विशिष्टोऽन्त्यः स्वरः प्लवनीयः इत्याह पूर्वाक्षर इति । पूर्वाक्षरविशिष्टः, न तु केवलः, पूर्वमक्षरं च स्वरसामर्थ्याद्व्यञ्जनमेव ज्ञेयमित्याशयः] ॥ अप्रगृह्यं सन्ध्यक्षरं तु क्रमेण आ, इ, भावं आ, उ,

भावं च प्राप्नोति, यथा यज्ञभूता ३ इ । देवबन्धा ३ उ इति ॥

अनुप्रवचनीयसंज्ञका हि होमाः । अनुप्रवचनं प्रयोजनं येषां ते । अनु-उत्तरकालं हि सावित्र्याः प्रवचनं ब्रह्मचारी कारयिष्यते गुरुणा ॥ अत्र मन्त्रा-नुपाध्यायो वक्ति. शिष्योऽनुप्रवक्ति ॥

पालाशं दण्डं, एकसरं—अवान्तरशाखारहितं सत्वचमव्रणमृजुं गुरुः स्वह-स्तेन परिगृह्य तस्य छायायां शिष्यमवस्थाप्य पाठयति ॥ तत्र दण्डस्य कार्य-मवलम्बनं गवादिनिवारणमप्सु प्रवेशनं तमोऽवगाहनमित्यादि ॥

अजिनोपवीतमेखलादीनामरष्टम् इति ॥

पालाशं दण्डं ब्राह्मणाय प्रयच्छतीति पुनः पालाशग्रहणात्क्षत्रियवै-श्ययोरपि पालाशच्छायायामेवावस्थितयोर्वाचनं न प्रातिस्विकच्छायागतयोरिति ॥ दानं पुनरश्वत्थवटयोर्वाचनं तु पालाश इति भावः ॥

प्रयच्छतीति—ब्रह्मचारिणोनुप्रवचनान्ते आचार्यः प्रयच्छति ॥ अत्र यमः-एतेषामप्यलाभे तु सर्वेषां सर्वे यज्ञियाः इति ॥

स्मृतं च मेऽस्मृतं च मे—मन्वादिभिरनुष्ठेयत्वेन यदुक्तं, यच्चास्मृतं-वर्जनी यत्वेनोक्तं तदुभयव्रतमवश्यं पालनीयमेवं सर्वत्र ॥

प्रागुपनयनात्कामचारः, कृतोपनयनस्यास्य व्रतान्यादिश्यन्ते, अत एव व्रतशि-क्षायारम्भः । उपनयनं गुरुसमीपप्राप्तिस्तदनन्यत्वप्राप्तिश्च, वेदाध्ययनान्तं च

११

व्रतनियमाः शास्त्रोक्ताः ॥

सन्ध्या

उत्तमा दृष्टसूर्या च मध्यमास्तङ्गते रवौ ।
अधमा दृष्टतारा च सायं सन्ध्या त्रिधा मता ॥ १ ॥
उत्तमा दृष्टतारा च मध्यमाभ्युदिते रवौ ।
अधमा दृष्टसूर्या च प्रातः सन्ध्या त्रिधा मता ॥ २ ॥
यस्मात्सम्यगत्र ध्याने मनो लीयेत सर्वतः ।
तस्मात्सन्ध्येति लोकेषु ख्याता देवि भविष्यति ॥ ३ ॥
शिवशक्त्योः समायोगो यस्मिन्काले प्रजायते ।
सा सन्ध्या कुलनिष्ठानां समाधिस्था प्रजायते ॥ ४ ॥
अङ्गुष्ठानामिकाभ्यां तु यन्नासापुटधारणम् ।
प्राणायामः स विज्ञेयस्तर्जनी-मध्यमे विना ॥ ५ ॥

मूत्रोत्सार० अत्र सर्वथा सूर्यादिसांमुख्यं वर्ज्यम्, तथा चान्यत्र—'सूर्यस्य पृष्ठे दक्षिणे वा स्थितस्येनासांमुख्यात्, ध्रुवारुन्धत्योश्चासाम्मुख्यात्,' ॥

कुक्कुटाण्डप्रमाणं तु ग्रासमाहुर्मनीषिणः । तथा चैवाहुतिश्चाग्नौ शौचार्थे चैव मृत्तिका ॥ इति ॥ मृत्तिकावर्णोपदेशस्तु प्रातिस्विकगुणानुरूप्येण ॥

ब्रह्मचर्यकालो द्वादशवर्षादि युगानुरूपः । शक्तिप्रज्ञाध्यवसायाद्यपेक्षया वा ।

नैष्ठिकापेक्षयाऽष्टाचत्वारिंशद्वर्षाण्यध्ययनं वेदस्य बोध्यम् ॥ अग्नीन्धनं-प्रातर्यदग्निसमिन्धनमस्यावश्यकतयोपदिष्टं तदादित्योदयात्प्रागेव कर्तव्यम् । सायमव्यस्तमयात्पूर्वमेव ॥

११. त्रैविद्यकम्

त्रैविद्यकम्-तिसृषु विद्यासु वेदत्रयात्मिकासु भवं व्रतम् । वेदत्रय्यध्ययनार्थमित्यर्थः । आख्यातं च ब्रह्मचर्यव्रतं वेदाध्ययनार्थमेव । तच्चोपदेश्यस्याप्रबुद्धत्वादाचार्येणैव कारयितव्यम् ॥

१२. उपाकर्म

उपाकर्म-स्वीकरणं मनसा संकल्पनमेतत्स्थानकविशेषादिकमुपवेदरूपं मयास्मै शिष्याय प्रवक्ष्यमिति । शिष्यो हि शिल्पाङ्गोपाङ्गादिपरिज्ञानाय गुरौ वसन् तदपि गुरोः सकाशादधीते ॥ उपाकरणं चास्य होमस्य नाम ॥ तत्र-संस्कार पूर्वं ग्रहणं स्यादुपाकरणं श्रुतेरिति ।

श्रावण्यां प्रौष्ठपद्यां वाप्युपाकृत्य यथाविधि ।
युक्तश्छन्दांस्यधीयीत मासान्विप्रोऽर्धपञ्चमान् ॥ १ ॥

१३. चातुर्होतृकम्

चातुर्होतृकम्- चित्तिः स्रुगित्यादयश्चतुर्होतारस्तेषु भवं व्रतं चातुर्होतृकम् । अस्य ग्राम्यत्वमेव नारण्यत्वं, अविशेषेण च वेदव्रतत्वं सर्वेषाम् ॥ तथा च गौतमः प्राह-चत्वारि वेदव्रतानि चतुर्होतारः शुक्रियोपनिषदश्चेति ।

१३

भक्त्या ब्रह्म विवर्तं वा परिणाममुपाश्रिताम् ।
आध्यात्मिकैकरूपांस्तांश्चतुर्होतॄन् नमाम्यहम् ॥ १ ॥

चतुर्णां धर्मार्थकाममोक्षाणां होतारो जुह्वति, ददतीति दातारश्च चतुर्होतारः प्रद्युम्नानिरुद्ध विष्णुसंकर्षणाः प्रथमो विवर्तः ॥ तथा च ब्राह्मणम्–ब्रह्मैव चतुर्होतार इति

१४. चातुर्होतृकापवर्गः

अत्रापवर्गश्च व्रतसमाप्तिः ॥

१५. प्रवर्ग्यव्रतम्

अथारण्यव्रतानि प्रवर्ग्यव्रतादीनि । अत्र रहस्यमन्त्रप्रयोगो ग्रामस्यासन्निकाशेऽग्निं प्रज्वाल्य विधीयते ॥

१६. प्रवर्ग्यव्रतापवर्गः

एवमेवैतदपवर्गश्च, उष्णीषबन्धनव्याजाद्गुरुर्व्यावृत्य बाह्यतः । अन्तर्मुखं करोत्येव शिष्यं मन्त्रांश्च तादृशान् । पृथिवी शान्तिरित्यादीन्पाठयत्यग्निसन्निधौ ॥
करणबहिःप्रसररोधोऽन्तःस्थचित्सूर्यप्रकाशसम्मुखीकरणाय ॥ बुद्धीन्द्रियाश्रय–मुखाच्छादनाय नेत्राच्छादनम् ॥ उष्णीषेण तेजः, कन्यादर्शनेन प्रजां, वत्सेन पशून्, आदित्येन ब्रह्मवर्चसं, क्षीरौदनेनान्नादि अधिगच्छति । अतस्तेजस्वी प्रजावान् पशुमान् ब्रह्मवर्चस्वी अन्नादो भवति ॥

कन्या मुक्तिरिति प्रोक्ता वत्सो धर्मस्तथैव च ।
आदित्यो ब्रह्मरूपोऽत्र क्षीरान्नं ब्रह्मवर्चसम् ॥ १ ॥

एतेषां दर्शनं नित्यमुत्तमं वनवासिनाम् ।

कथितं शाश्वतस्थाने ब्रह्मसायुज्यकाङ्क्षिणाम् ॥ २ ॥

१७. अरुणव्रतम्

ऋग्मन्त्राध्ययनकालेऽरुणव्रतहोमः ॥ आपमापमित्यादयो मन्त्राः परमरहस्या, औपनिषदाः पावना घोरसंसारसागर सन्तरणोपायाः प्रायः सर्वत्र समर्थाः, प्रवर्ग्य-व्रतेऽपि शान्तिप्रस्तावोपयोगिनः ॥ आपमित्यादिनाऽपः पात्रे निधायोपस्तौति ॥

१८. अरुणव्रतापवर्गः

एवमस्यापवर्गोऽपि ॥

१९. औपनिषदव्रतम्

उपनिषदध्ययनकाले औपनिषदव्रतहोमः । अथोपनिषदर्हाः—ब्रह्मचारी सुचरिती मेधावी कर्मकृद्धनदः प्रियो विद्यया विद्यामन्विच्छंस्तानि तीर्थानि ब्रह्मणः ॥

२०. श्रीकामः

श्रीविहीनेन सत्त्वशुद्ध्यर्थं यागाद्यनुष्ठातुं न शक्यते- इति श्रीकामहोमोऽपि परम्परया ब्रह्मविद्योपयोगीति ॥

२१. यशस्कामः

ब्रह्मविद्याप्राप्त्यैव यशोलाभाय यशस्कामहोमः ॥ अखिलं हि कर्मोपात्त-दुरितक्षयार्थं, ततश्च ज्ञानोत्पत्तिः । अनन्तरमेव यशोलाभः । तदुक्तम्—

ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः ।

१५

यथादर्शतलप्रख्ये पश्येदात्मानमात्मनि ॥ १ ॥

२२. औपनिषदव्रतापवर्गः

एवमपवर्गे औपनिषदं व्रतम् ॥

२३. गोदानम्

आरण्यव्रतसमाप्तौ च गावः केशा दीयन्ते खंड्यंते यत्र तद्गोदानम् । अत्र च केशान्त समावर्तनशब्दौ पर्यायौ । यस्त्वरितं दारस्वीकारार्थी तस्य जन्मनः प्रभृति षोडशे वर्षे स्नातस्य दारकर्मोच्यते । त्वराभावे तूपनयनादारभ्य षोडशे वर्षे गोदानम् ॥

२४. त्रैविद्यकापवर्गः

पूर्वारब्धस्य वेदत्रय्यध्ययनव्रतस्यापवर्गः समाप्तिस्त्रैविद्यकापवर्गे क्रियते वेदाध्ययनं च समाप्यते । अथ छन्दस्यर्थान्बुद्ध्वा गां कारयेदाचार्यमर्हयेदिति स्नानव्रतमन्त्रेषूक्तम् । अत्र वेदार्थान् ज्ञात्वा दारपरिग्रहार्थं स्नातकधर्ममिच्छन्ना-चार्यं गां-मधुपर्कं स्वधनं दत्त्वाऽऽहारयेत् । आचार्यो हि शिष्याय सिस्नासवे मधुपर्कं ददाति । शिष्यश्चाचार्याय दक्षिणाम् ॥

अन्ये तु वाक्यद्वयेनेति कथयन्ति-आचार्येण शिष्याय मधुपर्को देय इति आचार्यपूजितश्च गृहीतदक्षिणः स आचार्यमर्हयेत् इति ॥

केचित्तु दण्डाद्यग्नौ प्रास्य ब्रह्मचारी एवाचार्यं मधुपर्केणार्हयेत् इति ॥

१ (क) किं नाम यज्ञोपवीतम्— "यज्ञाख्यः परमात्मा य उच्यते चैव होतृभिः । उपवीतं यतोऽस्यास्त्यै तस्माद्यज्ञोपवीतकमिति" – 'विष्णुर्वै यज्ञः, इति श्रुत्या यज्ञरूपस्य विराजः सगुणस्य परमात्मनः प्राप्तये मुख्यं साधनं यत्तद्यज्ञोपवीतम् ॥ अथवा यज्ञे संस्कृतं यज्ञसंस्कृतं, यज्ञसंस्कृतं च तदुपवीतं नवसूत्रात्मकं चिह्नं यज्ञोपवीतम्, मध्यपदलोपसमासः ॥ अथवा— उप समीपेऽर्थाद्गुरोर्वीयते गम्यते वेदाध्ययनार्थं येन सह तदुपवीतम् ॥ एतदेव यज्ञसूत्रमपि कथ्यते ॥ एतद्धारणादेव यज्ञादिकरणायाधिकारो द्विजमात्रस्य ॥

(ख) यज्ञोपवीतहीनेन न कदापि भाव्यम्— "सदोपवीतिना भाव्यं सदा बद्धशिखेन च" 'विशिखो व्युपवीतश्च यत्करोति न तत्कृत,मित्यादिना द्विजमात्रस्य यज्ञोपवीत राहित्यं सर्वथा निषिद्धं तद् हीनस्य च सर्वथा कर्मस्वनधिकारः ॥ अन्तरैतत्प्रायश्चित्तीयत्वमपि स्मृतिकारा ब्रुवन्ति— विना यज्ञोपवीतेन तोयं यः पिबति द्विजः । उपवासेन चैकेन पञ्चगव्येन शुध्यति ॥ विना यज्ञोपवीतेन मूत्रोच्चारकृदप्यसौ । उपवासद्वयं कृत्वा दानै र्होमैस्तु शुध्यतीति ॥

(ग) कथंब्रह्मसूत्रमिति ॥ सूचनाद्ब्रह्मतत्त्वस्य वेदतत्त्वस्य सूचनात् । तत्सूत्रमुपवीतत्वाद्ब्रह्मसूत्रमिति स्मृतम् इति ॥ निराकारब्रह्मणोऽप्यधिगमहेतुत्वादिदं ब्रह्मसूत्रमिति विख्याततमम् इत्यतोऽन्वर्थं नाम ब्रह्मसूत्रमिति ॥ उपर्युक्तं यज्ञसूत्रं तु साकारब्रह्मप्राप्त्यर्थमतः कृतदार उभयप्राप्त्यर्थमुभयमेव धारयति ॥

१७

[घ] सनातनत्वमस्य— ॥ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात्— इत्यादिरयं मन्त्रस्तु ब्रह्मोपनिषदि, नारद परिव्राजकोपनिषदि, छन्दोग परिशिष्ट पारस्करगृह्यसूत्रेषु च दृश्यतेऽतोऽस्य यज्ञोपवीतस्यानादित्वं सनातनत्वं च प्रतीयते ॥ यजुर्वेदेऽपि अ० १६ मं० १७ "हरिकेशायोपवीतिने पुष्टानां पतये नमः" इति- अस्मिश्च मन्त्रे 'उपवीतिने' इति पदस्य दर्शनादुपवीतस्यानादिकालात्प्रचारः ॥ वेदाविर्भावकर्तुः स्वयम्भुवोऽप्याविर्भावकालेऽस्यसहजासिद्धत्वाद्वेदेभ्योपि प्राक्कालिकत्वम् ॥ उक्तं च प्रजापतेर्यत्सहजं पुरस्तादिति॥ वैदिकमतानुसारतोप्यनुपवीतस्य वेदाध्ययनानधिकारत्वे, पञ्चयज्ञेषु च वेदपाठस्य मुख्यतरत्वे, वेदस्य ब्रह्मयज्ञ यज्ञाद्यनुष्ठान ब्रह्मज्ञानानामेव प्रयोजनत्वे चास्य वैदिक कालिकत्वं सर्वथा ज्ञायते ॥ इति ॥

२. यज्ञोपवीतस्थानम्—

नाभेरूर्ध्वं मेध्यतरः पुरुषः परिकीर्तितः इति मनुः । पृष्ठवंशे च नाभ्यां च धृतं यद्विन्दते कटिम् । तद्धार्यमुपवीतं स्यान्नातिलम्बं नचोच्छ्रितम् , इति कात्यायनस्मृतौ कर्मप्रदीपे च ॥ एतत्तु तर्हि सुसङ्गतं भवेद्यदि स्वहस्तपरिमाणेनैव कृतं कारितं वा स्यादिति ॥ अतः स्वयमप्यस्य निर्माणे नास्ति कोपि दोषः

३. अस्याकारः, ह्रस्वतादैर्घ्य निषेधश्च—

सिद्धार्थफलमानेन धार्यं स्यादुपवीतकम् । यशोहरमतिस्थूलमतिसूक्ष्मं धनापहम् इति ॥ स्मृतिप्रकाशे— आयुर्हरत्यतिह्रस्वमतिदीर्घं तपोहरमिति ॥

४. यज्ञोपवीत निर्माणविधिः (कात्यायन परिशिष्ट) उपपत्तिश्च—
अथातो यज्ञोपवीत निर्माण प्रकारं वक्ष्यामः । ग्रामाद्बहिस्तीर्थे गोष्ठे वा गत्वाऽनध्यायवर्जितपूर्वाह्णे कृतसन्ध्योऽष्टोत्तरशतं सहस्रं वा यथाशक्ति गायत्रीं जपित्वा ब्राह्मण स्तत्कन्यया सुभगया धर्मचारिण्या ब्राह्मण्या वा कृतं सूत्रमादाय भूरिति प्रथमां षण्णवतिं परिमाति । भुव रिति द्वितीयां स्वरिति तृतीयां च ॥ पृथक् पलाशपत्रे संस्थाप्य १ आपो हिष्ठेति तिसृभिः, २ शन्नो देवी रित्यनेन, ३-सावित्र्या चाभिषिच्य वामहस्ते कृत्वा त्रिःसन्ताड्य व्याहृतिभिस्त्रिवलितं कृत्वा, पुनस्ताभिस्त्रिगुणितं कृत्वा पुनस्त्रिवृतं च कृत्वा प्रणवेन ग्रन्थि कृत्वोंकारमग्निं नागान्यमं पितॄन्प्रजापतिं वायुं सूर्यं विश्वान्देवान् नवतन्तुषु क्रमेण विन्यस्य संपूजयेत् ॥ ४ देवस्यत्वेत्युपवीतमादाय, ५ उद्वयमित्यादित्यं दर्शयित्वा ६ यज्ञोपवीतमित्यनेन धारयेदित्याह भगवान् कात्यायनः कृष्णयजुर्वेदाश्रितानामप्येवमेव तत्र प्रदर्शितमस्ति ॥ सामवेदीय छान्दोग्यसूत्र परिशिष्टेऽपि तुल्य एवाशयोऽयं वर्णितोऽस्ति ॥ मदनपरिजातेदेवलः— विधवारचितं सूत्रमनध्यायकृतं च यत् । विच्छिन्नं वाप्यधो यातं भुक्त्वा निर्मितमुत्सृजेत् । भोजनमकृत्वैव नवीनमुपवीतं सम्पादयेदन्यथातूत्सृजेत् ॥ शुचौ देशे शुचिः सूत्रं संहताङ्गुलिमूलके । आवेष्ट्य षण्णवत्या तत्त्रिगुणीकृत्य यत्नतः ॥ अब् लिङ्गकै स्त्रिभिः सम्यक् प्रक्षाल्योर्ध्ववृतं त्रिवृत् । अप्रदक्षिणमावृत्तं सा·

वित्र्या त्रिगुणीकृतम् ॥ अधः प्रदक्षिणावृत्तं समं स्यान्नवसूत्रकम् । यज्ञोपवीतं कुर्वीत सूत्राणि नवतन्तवः ॥ (५) किमर्थं संहत चतुरङ्गुलिमूल एवमानम् चत्वारो वेदाः, पदक्रमादिभेदेन तत्पाठश्च चतुर्विधः । अतः संहतचतुरङ्गुलिमूले–एव मानम् ॥ [६] षण्णवतिर्वामाः ॥ लक्षश्रुत्यात्मकवेदस्य कर्मोपासनाज्ञानात्मकानि त्रीणि काण्डानि मलत्रयापहृत्यै विभक्तानि सन्ति । अशीतिसहस्रश्रुत्यात्मकं कर्मकाण्डं, षोडश सहस्रश्रुत्यात्मकं तूपासनाकाण्डं । उक्तोभयकाण्डगतश्रुतिसंख्या हि षण्णवतिसहस्रात्मिकैव, प्रतिसहस्रं त्वेका वामा। अतो यज्ञसूत्रं षण्णवतिवामापरिमाणकमेव विधीयते । सूच्यते चैतद्धारणानन्तरमेव षण्णवतिसहस्रश्रुतिविहितं सर्वं त्वयोपासितव्यमिति ॥ ज्ञानकाण्डस्य श्रुतिसहस्रचतुष्कं तु सन्न्यासिनामेवोपयुज्यते ॥ न च तेषां यज्ञोपवीत कर्तव्यतानुशिष्यते ॥ उक्तं च ब्रह्मोपनिषदि—कर्मण्यधिकृता ये तु वैदिके ब्राह्मणादयः। तैर्हि धार्यमिदं सूत्रं क्रियाङ्गं तद्धि वै स्मृतम्—इति ॥ अथवा—चतुर्वेदेषु गायत्री चतुर्विंशतिकाक्षरी। तांवै चतुर्गुणां कृत्वा ब्रह्मतन्तुमुदीरयेदिति षण्णवतिवामोपपत्तिः । सामवेदीयच्छान्दोग्यसूत्रपरिशिष्टे हि प्रकारोऽन्य एवै तन्निर्माणोपपत्तेः । तिथिर्वारश्च नक्षत्रं तत्त्ववेदगुणान्वितम् । कालत्रयं च मासाश्च ब्रह्मसूत्रं हि षण्नवम्–इति अनेन हि ब्रह्मसूत्रस्य विराड्रूपत्वम ॥ कालचक्रात्मकत्वं वा ॥ एतद्धारणाद्धि सार्वात्म्यगवेषणा सूच्यते ॥ सामुद्रिकशा-

लेषु च पुरुषाणां मध्यम परिमाणं स्वकीय षराणवत्यङ्गुलिमितं लिखितमस्ति । अतस्तदानुरूप्येणापि पृष्ठवंशेचेत्यादि श्लोक कथित विन्यास विशेष निष्पत्त्यर्थं युक्तियुक्तमेव षराणवत्या संहताङ्गुलिमूलैरुपवीतपरिमाणम् ॥ (७) किमर्थं त्रिगुणीकरणत्वम्—कात्यायनस्मृत्याम्— त्रिवृदूर्ध्ववृतं कार्यं तन्तुत्रयमधो वृतम्—इति ॥ त्रिगुणनिर्मिता हि सृष्टिरत एतदपि सूच्यते त्रिभिरेव गुणैः ॥ त्रिगुणात्मकत्वं प्रकृतेरपि ॥ त्रिभिर्गुणैः सूच्यते च वर्णत्रयस्यैवाधिकार इति ॥ त्रिभिस्तन्तुभि र्निष्पादितमेतत् 'सर्वथैतद्धारणानन्तरं 'त्रीण्येवर्णानि देवर्षिपितृसंबद्धान्यपाकर्तव्यानी' त्यभिप्रायसूचकमिति ॥ त्रिवेणीधारावदेतदपि त्रितन्तुनिष्पन्नमुपवीतमनन्तं माहात्म्यमावेदयति ॥ द्वितीयवारं त्रिगुणीकरणेन च सत्त्वरजस्तमोमयानां विष्णवादीनामत्राश्रयः, एतत्करणक एव धारयितॄणां तत्परिचयः, एतदुपकरणोपकृतानामेव वेदत्रयीकृतोपकारश्च सूच्यते ॥ [८] ब्रह्मग्रन्थिः ।। भगवता कात्यायनेनोक्तमेव प्रणवेन ग्रन्थिं कृत्वेत्यादि । तदेव देवलोक्त्या दृढीक्रियते—त्रिवृतं चोपवीतं स्यात्तस्यैको ग्रन्थिरिष्यते, ग्रन्थिकालेच—त्रिरावेष्ट्य दृढं बद्ध्वा ब्रह्मविष्णुशिवान्नमेदिति । देवत्रयात्मको हि प्रणवः ॥ ब्रह्मग्रन्थिना च-यथाविधि विहितकर्माचरणेनर्णमुक्तिमधिगम्य सत्त्वशुद्धिद्वारकात्मज्ञानलाभेन च ब्रह्मैक्यं प्राप्यत इति सूच्यते ॥ [९] जीर्णोपवीत विसर्जनमन्त्रः—एतावद्दिनपर्यन्तं ब्रह्म त्वं धारितं मया । जीर्णत्वात्त्वत्परित्यागो

गच्छ सूत्र यथासुखम् ॥ (१०) एतत्संस्कारकालः । उपनयनसंस्कारस्य काम्य-मुख्य गौण भेदेन कालस्त्रिविधः ॥ —तथाहि ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पञ्चमे । राज्ञो बलार्थिनः षष्ठे वैश्यस्यार्थार्थिनोऽष्टमे । मनुः २ । ३७ इति काम्यः ॥ गर्भाष्टमेऽब्दे कुर्वीत ब्राह्मणस्योपनायनम् । गर्भादेकादशे राज्ञो गर्भात्तु द्वादशे विशः ॥ मनुः २ । ३६ ॥ याज्ञवल्क्यश्च—गर्भाष्टमेऽष्टमेऽब्दे वेत्याद्याह ॥ — इति मुख्यः ॥ आ षोडशाद्ब्राह्मणस्य सावित्री नातिवर्तते । आ द्वाविंशात्क्षत्रबन्धोराचतुर्विंशते र्विशः ॥ मनुः २ । ३८ ॥ इति गौणः ॥ अतऊर्ध्वं त्रयोऽप्येते यथा कालमसंस्कृताः । सावित्रीपतिता व्रात्या भवन्त्यार्यविगर्हिताः ॥ नैतैरपूतैर्विधिवदापद्यपि हि कर्हिचित् । ब्राह्मान्यौनांश्च सम्बन्धानाचरेद्ब्राह्मणः सह ॥ इति व्रात्यत्वेऽनिष्टत्वम् ॥ देश–कालावस्थानां विशेषवैशिष्ट्यादखिलं कर्म समृद्धं जायते । इति विशिष्टावस्थाग्रहणम् ॥ अत्रोपपत्तिः ॥ वसवोऽष्टौ, बृहदारण्यकोपनिषदि तेष्वग्निः प्रथमो गणितः । स च ब्राह्मणानां देवः । विराजो मुखस्थानादृद्वयोरेवोत्पत्तिः अत एवाष्टमे वर्षे ब्राह्मणस्योपनयनम् ॥ ११ कुर्यैतद्विसर्जितं विधेयम् (मदनपारिजाते) ॥ छेदे विनाशे वा सूतक मृताशौचान्ते मलमूत्रसंस्पृष्टे ह्युपवीतं जीर्णं वा सरिद्वापि-तडाकाद्यन्यतमोदके समुद्रं गच्छ स्वाहेति मन्त्रेण प्रणवेन व्याहृतिभिर्वा विसृजेत् ॥ [१२] हेमाद्रौ द्वयोस्त्रयाणामप्येषां धारणं विहितम् ॥ यज्ञोपवीते द्वे

धार्ये श्रौते स्मार्ते च कर्मणि । तृतीयमुत्तरीयार्थे वस्त्राभावे तदिष्यते ॥ (१३) उपवीतमलङ्कारं स्रजं करकमेव च । उपानहौ च वासश्च धृतमन्यैर्न धारयेत् । (१४) मेखलामजिनं दण्डमुपवीतं कमण्डलुम् । भिन्नं क्षिप्त्वाप्सु गृह्णीयान्नवं मन्त्रेण कोविदः ॥ [१५] कलौ कार्पासस्यैवास्य विहितता ॥ कार्पासमुपवीतंस्याद्विप्रस्योर्ध्ववृतं त्रिवृत् । शणसूत्रमयं राज्ञो वैश्यस्याविकसौत्रिकम् ॥ निर्णयसिन्ध्वादिधर्मग्रन्थेषु "कलौ कार्पाससम्भवम्" इति— कार्पासमुपवीतार्थं निर्मितं ब्रह्मणा पुरेत्यादिदर्शनात्- सर्ववर्णेष्वस्यैव प्रायः प्रचारदर्शनाच्च कार्पासमेवोपवीतं सर्वैर्धार्यमिति ॥ (१६) सव्यत्वापसव्यत्वयो र्निर्णयः ॥ मनुः २ । ६२ उद्धृते दक्षिणे पाणावुपवीत्युच्यते द्विजः । सव्ये प्राचीनआवीती निवीती कण्ठसज्जने ॥ तथाच गोभिलः— दक्षिणं बाहुमुद्धृत्य शिरोऽवधाय सव्येऽंसे प्रतिष्ठापयति दक्षिणस्कन्धमवलम्बनं भवति-एवं यज्ञोपवीती भवति ॥ सव्य बाहुमुद्धृत्य शिरोऽवधाय दक्षिणेऽंसे प्रतिष्ठापयति सव्यं कक्षमवलम्बनं भवति । एवं प्रीचीनावीती भवति । शिरोऽवधाय दक्षिणपाण्यादावप्यनुद्धृते कण्ठादेव सज्जने ऋजु प्रालम्बे यज्ञसूत्रे वस्त्रे च निवीती भवति—इति ॥ [१७] कथं किं कार्यम् । कृतोपवीती देवेभ्यो, निवीती च भवेत्ततः । मनुष्यांस्तर्पयेद्भक्त्या, ऋषिपुत्रानृषींस्तथा ॥ आह्निकतत्त्वे ॥ मनुः ३ । २७१—प्राचीनावीतिनासम्यगपसव्यमतन्द्रिणा । पित्र्यमानिधनात्कार्यं विधिवद्दर्भपाणिना ॥

इति दैविकादिकर्मसूपवीतविन्यासशिक्षा ॥ (१८)   का चात्रोपपत्तिरिति- यजु० शत० का० २ प्र० ३ ब्रा० ४— प्रजापतिं वै भूतान्युपासीदन् प्रजा वै भूतानि विनो धेहि यथा जीवामेति, ततो देवा यज्ञोपवीतिनो भूत्वा दक्षिणं जान्वाच्योपासीदंस्तानब्रवीत् यज्ञो वोऽन्नं अमृतत्वं च ऊर्क् सूर्यो वो ज्योतिरिति ॥ अथैनं पितरः प्राचीनावीतिनः सव्यं जान्वाच्योपासीदंस्तानब्रवीत् मासि मासि-वोऽशनं स्वधा, मनोजव श्चन्द्रमा वो ज्योतिरिति ॥ अथैनं मनुष्याः (ऋषयः) प्रावृता उपस्थं कृत्वोपासीदंस्तानब्रवीत् सायंप्रातर्वोऽशनं, प्रजा वो, मृत्युर्वोऽ-ग्निर्वो ज्योतिरिति ॥ देव पितृषीणां प्रजापत्युपस्थितिकालानुरूपयैव प्रक्रि-यया एतेषां कर्माणि सर्वथोपपन्नानि- इत्याशयः ॥

अपरंच हिरण्यगर्भस्य शरीरे 'तिथि र्वारश्च नक्षत्रं तत्त्वं वेदा गुणत्रयम् । का-लत्रयं च मासाश्च ब्रह्मसूत्रं हि षण्णवम्, इत्यागमप्रामाण्यात् षण्णवतित-त्त्वात्मकं राशिचक्रमेव यज्ञोपवीतं स्थितमस्ति । दक्षिणायनोत्तरायणेति संज्ञया तद्द्विधा विभक्तम् । पितृयान देवयानेति नाम्ना च तत् कथ्यते । आगमेषु पि-तृलोको दक्षिणस्यां देवलोकश्चोत्तरस्यां वर्ण्यते । अत एव पितृसम्बन्धी सम-स्तः क्रियाकलापो दक्षिणाभिमुखै र्दक्षिणांसस्थितयज्ञसूत्रैश्च क्रियते ॥ एवं देवस-म्बद्धश्च समस्तः क्रियाकलापो वामस्कन्धस्थितयज्ञसूत्रैरेव विधीयते ॥ देव-सम्बद्धमेव सदा सामान्योद्दिष्टं कर्मजातमतः सामान्येन वामस्कन्धस्थितयज्ञोप

वाता यत्र सन्तस्तिष्ठन्ति ॥ इत्यनेनाप्युपपद्यते यज्ञसूत्रस्य सव्यापसव्यत्वम् ॥

अनेन च सव्यापसव्यप्रक्रियाविशेषेण कर्मादृष्टद्वारा कर्तॄणां देवलोक पितृलोकप्राप्तिः पूर्वमेव सूच्यते ॥

अन्योक्ताः कल्पनाश्च

१ गायत्री प्रकृतिर्ज्ञेया गुणत्रयमयी, चतुर्विंशत्यक्षराणि मन्त्रस्थानि, अमा कामादिदेव्यष्टकं चेति द्वात्रिंशत्संख्या त्रिभिर्गुणैः संगुणिता जायते षण्णवत्यात्मिका । अथवा सैकापि सती शक्तिः शिवरूपिणी "मंत्रस्थ चतुर्विंशत्यक्षरमयी, अमादिशक्त्यष्टकमयी च, इच्छा ज्ञान क्रियारूपत्वेन त्रिगुणीकृता षण्णवत्यात्मिका जायते । अथवा द्वासप्ततिर्नाड्यः गायत्र्यक्षराणि चतुर्विंशतिरिति मिलित्वा षण्णवतिर्भवति । षण्णवतिश्चात्र वामा ज्ञेयाः । क्षत्रियार्थं चतुरशीतिपर्वभिर्द्वासप्ततिपर्वभिस्तु वैश्यार्थमुपवीतम् । (पर्व-वामा) ॥

२ नवाङ्गुलपरिमाणास्तु वामाः । तदुक्तम्— तन्तुभिः साध्यते मूलपर्वभिश्चतुरङ्गुलैरिति । पृथिवी हि नवखण्डास्ति ॥

३ अत्राहि—सत्त्वादिभेदेन सोमसूर्याग्निभेदेनेच्छाज्ञानक्रियाभेदेन वा त्रिगुणीकरणे नवतन्तवः । अथवा—त्वक् असृक् मांसं मेदः अस्थि मज्जा शुक्रं प्राणः जीवः इति नवतन्तवः । अथवा ब्रह्माविष्णुमहेश्वराः गायत्री सावित्री सरस्वती च इडा पिंगला सुषुम्णा चेति नवतन्तवः । गायत्र्यक्षराणि २४ व्याहृतयश्च त्रयः इति

मिलित्वा सप्तविंशतिस्तन्तवो यज्ञोपवीते ॥

४ अत्र हि परंब्रह्मस्वरूपो ग्रन्थिः ॥ गुणत्रयमयं सूत्रं प्रोतं ब्रह्मणि यत्परे । ब्रह्मग्रन्थियुतं तस्माद्धृदये धारयेद्द्विजः ॥ गुणत्रयमयं विश्वं ब्रह्मणि ग्रथितं परे । हृदये धारयेत्स्मृत्यै सदा सर्वत्र संस्थितम् ॥ सूत्रात्मिकायाः प्रकृतेर्ग्रन्थिभूतो महेश्वरः । चिद्रूपः पुरुषो देवो निष्कलो निष्क्रियः परः ॥

५ कृते पद्ममयं सूत्रं त्रेतायां कांचनोद्भवम् । द्वापरे राजतं ज्ञेयं कलौ कार्पास-मुच्यते ॥ कार्पासं तु समासाद्य शुचिक्षेत्राद्विशोधितम् । जीवद्भर्तृकया नार्या ब्राह्मण्या कर्तितं तु यत् ॥ कन्या वा कर्तयेत्सूत्रं प्रमदापि पतिव्रता । विधवापि साधुशीला दुःशीला नहि कर्तयेत् ॥ (उपयुक्तानि स्मार्तवचनानि) —

६ यथा वज्रं सुरेशस्य यथा शूलं हरस्य च । यथा विष्णोर्गदा चक्रं तथा-ब्रह्मपवित्रकम् ॥ सर्वात्मभूतमहादेवकर्तृकतदङ्गुलिकरणक ब्रह्मशिरःकर्तनदोष-निवारकं पावयितृ च पवित्रं सर्वकर्मसु ॥

७ तिलकं ब्रह्मसूत्रं च पवित्रं धौतवस्त्रकम् । शिखा ग्रन्थिसमायुक्ता पंचमुद्रा धरो द्विजः ॥

८ नदीवेगोद्भवं नीलं सुदृढं च सुवर्तुलम् । अश्मानं सर्वदोषघ्नं देवर्षिभिराधि-ष्ठितम् ॥ जन्मन्युपायने यज्ञे विवाहे शान्तिकर्मणि । प्रेतगृहे च निर्दिष्टं मति-मानानयेद्बुधः ॥ यक्षरक्षःपिशाचाश्च भूतग्रहविनायकाः । एते हि प्रशमं

यान्ति दर्शनादश्मनो यतः ।।

९ मौञ्जी त्रिवृत्समा श्लक्ष्णा कार्या विप्रस्य मेखला, मुञ्जालाभे तु कुशैः कार्या ॥

१० ब्रह्मणो विहितां चर्यां यो जानाति सकृदपि । स लोके ब्रह्मचारीति कथितो वेदपारगैः ॥ अथवा– ब्रह्म वेदस्तदध्ययनार्थं व्रतं चरतीति ब्रह्मचारी ॥

११ येन बाह्यान्तरं सद्यो याति नित्यं पवित्रताम् । अपोशानं तु विज्ञेयं सर्वकर्मसु पावनम् ॥

१२ वाचं यच्छेति कथितं सत्यत्वरक्षायै ॥

१३ नवनीतप्रयोगेण च ब्राह्मणेन नवनीतहृदयेन भाव्यमिति सूच्यते ॥

१४ यज्ञात्प्रचलिता वेदाः पलाशे संस्थिताः पुरा ।
तस्मात्पालाशदण्डस्य वेदविच्छुद्धिमिच्छति ॥

१५ संन्ध्यास्नानविहीनो यो जपस्वाध्यायवर्जितः ।
चण्डालादपि स ज्ञेयो ब्राह्मणोऽप्यधमाधमः ॥
प्रातः संन्ध्यां परित्यज्य यो देवपूजनं चरेत् ।
अशुद्धः स दुराचारः सर्वकर्मबहिष्कृतः ॥
सन्ध्यामुपासते ये तु सततं शंसितव्रताः ।
विधूतपापास्ते यान्ति ब्रह्मलोकमनामयम् ॥
सूतके मृतके चैव सन्ध्याकर्म न संत्यजेत् ।

मनसोच्चारयेन्मंत्रान्प्राणायाममृते द्विजः ॥

१६ प्राणो वायुः शरीरस्थ आयामस्तस्य निग्रहः ।

प्राणायाम इति प्रोक्तो मुनिभिः शास्त्रपारगैः ॥

षष्ट्यक्षराणि प्राणायामस्य । पूरकादिना षड्वारं तान्यावर्त्यन्ते । भवन्ति च तानि ३६० तावानेव वर्षः ॥ एतान्येव षष्ट्या घटिकाभिः गुणितानि जायन्ते २१६०० । षष्ट्या प्राणायामैरजपामन्त्रजप इव निष्पद्यते ॥

१७ पञ्चाङ्गुलिभिर्नासाग्रपीडनं प्रणवाभिधा । मुद्रेयं सर्वपापघ्नी वानप्रस्थ गृहस्थयोः ॥ कनिष्ठानामिकाङ्गुष्ठै नासाग्रस्य च पीडनम् । ओङ्कारमुद्रा सा प्रोक्ता यतेश्च ब्रह्मचारिणः ॥

१८ पितैवोपनयेत्पुत्रं तदभावे पितुः पिता । तदभावे पितुर्भ्राता स्वकुल्यो गात्रजो गुरुः ॥

१९ द्विधा केशाः प्रकर्तव्याः सीमन्तकरणे स्त्रियाः । रक्तश्वेतेन सूत्रेण वेष्टयेत्कचबन्धनम् ॥ शिवशक्तिस्वरूपार्थं द्विधा केशस्य बन्धनम् । वेदे मन्त्रोपनिषदि बृहदारण्यके तथा ॥ स्रावपातनिवृत्त्यर्थं संस्कारोऽनवलोभनम् ॥

२० पुंसवने—

दर्पणे दर्शयेत्क्षीरं पूजां कृत्वा विधानतः । श्वेतेन जायते बालः पीतवर्णेन कन्यका । कपिशेन भवेच्छण्ढो ह्येतद्गर्भस्य लक्षणम् ॥

२१ चूडाकरणे—

एकदर्भे त्रयो देवा ब्रह्मविष्णुमहेश्वराः । तस्माद्दर्भः प्रयत्नेन बहिःस्थाप्यः प्रयत्नतः ॥ पूर्वदक्षिणभागे तु दर्भं प्रागुत्तराशिरः । पश्चिमे चोत्तरे चैव वाम भागेन धारयेत् ॥

उपनयने—

२२ पट्टिकायां सुवर्णस्य प्रसार्य कुङ्कुमादिकम् । तदभावे तु रौप्यस्य कुर्याद्वित्तानुसारतः ॥

अहतं वासः—

ईषद्धौतं नवं श्वेतं सदशं यन्न धारितम् । अहतं तद्विजानीयात् सर्वकर्मसु पावनम् ॥ द्वादशाङ्गुलविस्तारो दैर्घ्यं च द्विगुणं तथा । अष्टसूत्रकृता रज्जुः कौपीनो नातिलम्बितः ॥

२३ वृथा स्नानं वृथा सन्ध्या वृथा होमो वृथा जपः । तत्सर्वं निष्फलं याति यो वै कौपीनवर्जितः ॥ २४ शिखा धार्या मूलतो गोखुरमात्रा ॥

२५ आनृशंस्यं क्षमा सत्यमहिंसा च दया शमः । दानं प्रसादो माधुर्यमार्जवं च यमा दश ॥ शौचमिज्या तपो दानं स्वाध्यायोपस्थनिग्रहः । व्रतोपवासौ मौनं च स्नानं च नियमा दश ॥

२६ शौचम्— विप्रो वृक्षः शौचमेतस्य मूलं वेदाः शाखा धर्मकर्माणि पत्रम् । तस्माच्छौचं यत्नतः पालनीयं छिन्ने मूले नैव वृक्षो न शाखाः ॥

२७ अग्निर्हि पूर्वं देवेभ्यः पलाय्य च मृगाश्रितः । मार्गस्य चर्मणस्तस्मा-

२६

ब्राह्मिवच्छुद्धिरिष्यते ॥ नचात्र हिंसादोषः— यज्ञार्थमुपयोग्यं तु यद्यद्वस्तु भवेन्नृणाम् । तत्र हिंसां न जानीयात्कथितं मुनिपुङ्गवैः ॥

२८ विष्णुधर्मोत्तरे— सौवर्णमणिपात्रेषु कांस्यरौप्यायसेषु च । भिक्षां दत्त्वा न धर्मोऽस्ति गृहीत्वा नरकं व्रजेत् ॥ अलाबुं दारुपात्रं च मृण्मयं वैदलं तथा । एतानि भैक्षपात्राणि विज्ञेयानि मनीषिभिः ॥ विदलं वंशादिकृतपात्रविशेषः ॥

२९ वेदस्य निधिरूपोऽयं दण्डःप्रोक्तो मनीषिभिः । सद्यस्तद्भावनां ज्ञात्वा धार्यते ब्रह्मचारिभिः ॥ सत्वचं धारयेद्यस्तु दण्डं पलाशसम्भवम् । बुद्धिर्वृद्धिस्तथा सिद्धिः सन्ततिस्तस्य वर्धते ॥

३० नाभिस्थानादधो भूमिर्नाभेरूर्ध्वं च खमिति । मुञ्जकाण्डैः कृतां तत्र धारयेद्रशनां व्रती ॥ चतुर्दशभुवनाश्रयो देहः । मेखलाया अधः सप्त भुवनानि । उपरि सप्त । तेषां परस्परयोगाभावसूचिका मेखला ॥

१३ न मधुमांसे अश्नीयाः— यदि वा न समर्थःस्यान्मधुमांसे विवर्जितुम् । तथापि वर्जयेत्पर्वस्वपि व्रतदिनेष्वपि ॥ चतुर्दश्यष्टमी चैव- अमावस्या च पूर्णिमा । पर्वाण्येतानि सर्वाणि रविः सङ्क्रान्तिरेवच ॥

३२ उपनीय तु यः शिष्यं वेदमध्यापयेद् द्विजः । साङ्गं च सरहस्यं च तमाचार्यं प्रचक्षते ॥ एकमंशं तु वेदस्य वेदाङ्गान्यपि वा पुनः । योऽध्यापय-

ति वृत्त्यर्थमुपाध्यायः स उच्यते ॥ निषेकादीनि कर्माणि यः करोति यथाविधि । सम्भावयति चान्नेन सविप्रो गुरुरुच्यते ॥ मन्त्र ब्राह्मण कल्पानां छन्दसां यजुषामृचाम् । षण्णां यः प्रविभागज्ञः सोऽध्वर्युः श्रेष्ठ उच्यते ॥

३३ स्वप्नेऽपि न स्पृशेद्देवि गुरूणामासनं पदा । आसनस्पर्शनान्नश्येदायुस्तेजो बलं यशः ॥

३४ ब्रह्मग्रन्थियुतं सूत्रं गुरुभ्यः प्रापितं सदा । यः स्नाति सम्यग्गायत्र्या स योग्यः सर्वकर्मसु ॥ यज्ञोपवीतं यः स्नाति तस्मै प्रीणन्ति देवताः ॥ संस्कृतमुपवीतं तु मतिमान्धारयेन्नवम् । मासद्वयान्तेऽप्यच्छिन्ने मनुरित्येवमब्रवीत् ॥

३५ ऊर्ध्वकेशो भवेद्ब्रह्मा लम्बकेशस्तु विष्टरः । सकेशं चोपयामं तु निष्केशं तु पवित्रकम् ॥

३६ संहताङ्गुलिना तोयं गृहीत्वा पाणिना द्विज । मुक्त्वाङ्गुष्ठकनिष्ठे तु शेषेणाचमनं पिबेत् । माषमज्जनमात्रास्तु संगृह्य त्रिःपिबेदपः ॥

३७ यदा तु प्राङ्मुखी छाया पुरुषाद्द्विगुणा भवेत् । तदा नक्तं विजानीयान्नकुर्यात्तत्र भोजनम् ॥

३८ अङ्गुष्ठमूले ब्राह्मं स्याद्दैवं चाङ्गुलिमूर्धनि । अङ्गुष्ठस्य प्रदेशिन्या मध्ये पित्र्यं प्रकीर्तितम् ॥ प्राजापत्यं त्वङ्गुलिमूले ॥ ब्राह्मणस्य दक्षिणहस्तेऽन्तरे (मध्ये) प्राजापत्यं तीर्थम् । तेन लाजाहोमं कुर्यात् । प्राजापत्येनैव तीर्थेन यज्ञ आ-

हुतयो दीयन्ते । अतएव स्रुक्स्रुवावाहुतिदानायाङ्गुलिमूल एवाङ्गुष्ठेन गृह्येते ॥

३९ अग्नीन्धनम्— पुरा जग्राह वै मृत्यु हिंसयन् ब्रह्मचारिणम् । अग्निस्तं मोचयामास तस्मात्परिचरेद्धि तम् ॥ अवधीयताम् यस्मिन्नग्ना उपायनहोमः कृतः स्यात्तं स्नानव्रतं यावद्धारयेत् । तस्मिन्नेवैविद्यकादयो व्रतहोमाः । तमेव सायं प्रातरिन्धीत ॥ ननु दिनद्वयव्यापिन्यस्मिन्संस्कारे सति प्रथमदिनाग्निर्विसर्ज्यः ॥

मण्डलनिर्माणोपपत्तिः—

४० दिनद्वयव्यापिनो यदि केनचिद्बीजवापादिसंस्कारा विधेयाः स्युस्तदा कर्तव्यारण्यकव्रतविषये द्वितीयस्मिन्नेव दिने, एकाहःसमाप्येष्वप्यारण्यकसंस्कारावसर एव च मण्डलं विरच्यते । तदपि विविधै रङ्गैः । अग्निप्रतिकृतिरपि रेखारूपात्र निर्मीयते । तत्रापि यागवह्निविधरङ्गावश्यकता । यजमानोऽपि तत्पूजात्र कार्यते— इति हि स्थितिः । अतोऽत्र विषये स्पष्टं प्रतीयते, यदारण्यकव्रतेष्वरण्यावश्यकतापूर्त्यै तस्यारण्यस्य प्रतिकृतिरूपमेतन्मण्डलं निष्पाद्यते । अतएवात्र विविधवर्णपुष्पलतादिचित्रविभूषितमेतन्मण्डलमाश्रममण्डलमिव संपाद्यते । तेषु च संस्कारेष्वग्नीन्धनं सायंप्रातर्विधिविहितं विधेयमेव । अत एवात्राग्निः प्रतिष्ठाप्यते पूज्यते च । आरण्यकव्रतेष्वेवास्यावश्यकत्वं मत्वेदं द्वितीयदिन एव तदवसरे विद्वांसो विदधति । एकदिनसमाप्येष्वपि तदवसर एव । अरण्येऽपि लतापुष्पादिशोभा । अत्रापि पुष्पलतादिप्रतिकृति-

निर्मीयते — इति हि मण्डलनिर्माणमुपपद्यत एव ॥

कथमुपनयनसंस्कारात्प्रागेव विद्यारम्भः—

४१ उपायनारम्भे हि उपनयनसंस्कारात्पूर्वमेव विद्यारम्भनाम्नाक्षरारम्भो विधीयते, एष तु न विद्यारम्भः । अक्षरारम्भविद्यारम्भयोर्मुहूर्तचिन्तामण्यादिषु पार्थक्येन विहितत्वात् । तथाहि— निर्णयसिन्धौ-"अथ विद्यारम्भ इत्यनन्तरं (मदनरत्ने) अक्षरस्वीकृतिं कुर्यादित्यादि, (श्रीधरः) हस्तादित्य—प्राक्काक्षरस्वीकृतिः" इत्यादिचोक्तम् । धर्मसिन्धौच— अथ विद्यारम्भ इत्युक्त्वा पञ्चमे वर्षेऽक्षरलेखनारम्भ उत्तरायणे कार्य इत्यादि, विघ्नेशं—प्रणवपूर्वकमक्षरमारभेतेत्यादिचोक्तम् । एवमन्येष्वपि स्मृतिशास्त्रेषु ॥ अस्य विद्यारम्भेतिनामख्यातिस्तु लोकप्रसिद्धया अक्षररूपत्वेन वा विद्यायाः । वेदाध्ययन रूपविद्यारम्भस्तु "कृतोपनयनस्यास्य व्रतादेशनमिष्यते । ब्रह्मणो ग्रहणं चैव क्रमेण विधिपूर्वक,, मित्यादिना मन्वादिभिरुपायनसंस्कारमन्तरा सर्वथाऽविहितत्वान्निषिद्धः । ऋग्वेदभाष्योपोद्घाते चोपनयनसंस्कारात्प्रागस्य वेदविद्यारम्भस्य निषेधः सर्वथा प्रपञ्चितः । अत एवाक्षरारम्भादनन्तरं विहितोपनयनसंस्कारः परिहिताहतवासा धृतयज्ञोपवीतादि विधिवत्कृताभिवादनादि ब्रह्मचारिभूतः शिष्य आचार्येण गायत्रीमन्त्रादिरूपवेदविद्यारम्भः कार्यते । तस्मादकृतोपनयनसंस्कारायापि उपनेतव्यायाक्षरारम्भमात्रं न किंचिदपि विरुध्यते । वेदाध्यय-

नस्यैवोक्तसंस्कारात्पूर्वं विरुद्धत्वात् ॥

उपनयनकाले द्वितीययज्ञोपवीतम्

४२ उपनयनसंस्कारकाले हि शुभलग्नवेलायां यज्ञोपवीतमेकं वटुः पित्राद्युपनेतृभिर्मन्त्रपूर्वकं परिधाप्यते । तदनु कतिचनान्यान् कर्मविशेषान्विधाय भिक्षादानकाल उपनेता भिक्षादानात्पूर्वमस्मै द्वितीयमपि यज्ञोपवीतं परिधाप्य भिक्षामर्पयति । परं नात्र शुभलग्नापेक्षा पूर्वोपवीतवत्–ज्ञायते । अत्र विषये 'उपवीतं वटोरेकं द्वे तथेतरयोः स्मृते, इति स्मृतिवचनप्रामाण्यादुपनयनसंस्कारे वटोर्यज्ञोपवीतद्वयधारणं यद्यपि समीचीनं न प्रतिभात्यापाततस्तथापि नैतदसमीचीनम् ॥ यत्— 'यज्ञोपवीते द्वे धार्ये श्रौते स्मार्ते च कर्मणि । तृतीयमुत्तरीयार्थे वस्त्राभावे तदिष्यते' इति स्मृत्युपदेशेन वस्त्रार्थमप्युपयोगो यज्ञोपवीतस्य कथ्यते ॥ वैवाहिके संस्कारे च श्वशुरेण पूजाकाले वरः पाद्यादि दत्वा विष्णवे महाराजाय यज्ञोपवीतं वासो नम इत्युक्त्वा यज्ञोपवीतमेवामूल्यं वस्त्रं परिधाप्यते । ततः प्रभृत्येव स गृहस्थो भूत्वा "द्वे तथेतरयोः स्मृते" इति स्मृत्यनुशासनादुपवीतद्वयाधिकारी सम्पद्यते । विष्णुपूजादिष्वप्येवं वस्त्रार्पणानन्तरमेवोपवीतं निवेद्यते । अतो वस्त्रार्थमेतदप्यपेक्ष्यत इति हि निश्चयः । अथवा अपरार्के 'यज्ञोपवीतं यो दद्याद्दानकाले तु धर्मवित् । पावनं सर्वविप्राणां ब्रह्मदानस्य तत्फलम्' —इति स्मृत्या सर्वोत्तमं दानमेत-

द्दानम् । अत एवोपनयनसंस्कारेऽप्युपनेत्रा भिक्षादानकालेऽमूल्यमेतद्वासः सर्वोत्कृष्टं वैतद्दानमितिमत्वाऽयं-बटुः परिध्याप्यते द्वितीयमपि यज्ञोपवीतम् । इत्थं चास्य वस्त्रधिया दत्तत्वाद्वस्त्रत्वेनैव ग्रहीतव्यत्वाद्यज्ञोपवीतं बटोरेकमिति न विरुध्यते ॥ अन्यद्वा विवेचनाकुशलैरत्र विवेचनीयमिति ॥

कुलगुरोरुपनेतृत्वप्रचारोपपत्तिः—

४३ यद्यपि पितैवोपनयेत्पुत्र मित्यादि स्मार्तवाक्यानुपूर्वीबलात् पित्रादिष्वेवोपनेतृत्वं मुख्यं, कुलगुरुस्त्वत्रान्तिमस्तथापि कश्मीरेषु प्रचालितः कुलगुरुकर्तृको यज्ञोपवीतसंस्कारः सर्वथा नानुचितः ॥ श्रुतिभिः स्मृतिभिर्गृह्यकारैश्चोपनेतृकर्तृकमन्त्रवाचनस्यानेकशः संस्कारेषु चोदितत्वमस्ति । पौरोहित्यबहिर्भूतानामन्येषां च व्यावहारिककर्मधुरन्धराणामनभ्यस्तवैदिकमंत्राणां मंत्रानभिज्ञत्वे तत्तन्मंत्रवाचनमुपदेशादिदानञ्चानभिज्ञानां सर्वथोपनेतृत्वे दुर्घटं दुष्करं च माभूदिति मंत्राभिज्ञस्यैवामुख्यस्यापि कुलगुरोरुपनेतृत्वं मंत्रानभिज्ञपित्रादिसद्भावेऽपि मुख्यतामावहतीति ॥ संस्कार्यस्य हि संस्कर्त्रा सह योनिसम्बन्धाद् विद्यासम्बन्धः पारम्पर्यागतो गरिष्ठ एवेत्यप्यत्र विवेचनीयम् ॥

४४ यज्ञोपवीतमिति मंत्रस्य विशिष्टार्थः—हे शिष्य ! यदिदं यज्ञोपवीतं यज्ञस्य – अतिपूज्यस्य परमात्मनः, उप – समीपे वि – विशेषेण तदैक्येन इतं – ज्ञातम्, भावे निष्ठाप्रत्ययः ज्ञानमित्यर्थः, तत् प्रतिमुञ्च – स्वानुभूत्या स्वरू-

पभूतं परमात्मानं प्रकटीकुर्विति गुरुरुपदिशति । कीदृशं तत् यज्ञोपवीतं-यज्ञेन संगत्या ईक्षणादिरूपया उप - आधिक्येन वि - विविधं इतं - गतं प्राप्तं, "स ऐक्षत बहुः स्यां" इति श्रुतेः, आध्यात्मिकाधिभौतिकाधिदैविकरूपेण तदेवैकं सम्पन्नमित्यर्थः । परमं - उत्कृष्टम्, पवित्रम् - धर्मादिभ्योऽप्यत्युत्कृष्टं पवित्रतापादकम्, धर्मादयो हि नात्यन्तिकीं शुद्धिं जनयन्ति विनाशित्वात्, तदुक्तं श्रीमद्भगवद्गीतासु "क्षीणे पुण्ये मर्त्यलोकं विशन्ति" इत्यादि ॥ अद्वैतैक्यज्ञानं तु न तथा निर्विकारत्वात्, अत एव जीवन्मुक्तानां बाह्यधर्माधर्मादिलेपो न लिम्पति परधर्मवेत्तृत्वाद्विमलत्वाच्च तदुक्तं "परमार्थविन्न पापैर्नच पुण्यैर्लिप्यते विमलः" इति । प्रजापतेः - प्रकर्षेण जायन्ते इति प्रजा इन्द्रियाणि तद्विषयास्तेषां वृत्तयश्च, तान् पाति स्वसत्ताविधानेन रक्षति इति प्रजापति र्जीवः, तस्य यत् सहजं - स्वाभाविकं रूपं न त्वविद्यादिवन्नैमित्तिकम्, जीवाधीनैव हीन्द्रियादीनां सत्ता, सुषुप्तिमरणादिषु तथोपलम्भात् । यच्च जीवात्परस्तात् - परम् "अक्षरात्परतः परः" इति श्रुतेः, जीवस्यापि सत्तादायकं अन्यथा जडात्मवादिमतप्रतिष्ठितत्वं प्रसज्येतेति । आयुष्यम् - आयुषो हितं साफल्यदमित्यर्थः, एतज्ज्ञानेन ह्यायुषः सफलत्वम्, अन्यथा क्षणिकभोगादिषु प्रसक्तत्वात् प्रमादित्वेन निष्फलत्वमेवेति । अग्र्यं - अग्रे सृष्ट्यादौ भवं सगुणमूर्तिं समापन्नं भूतानामनुग्रहाय । यद्वा क्षराक्षरादिप-

दार्थजातादप्यत्युत्कृष्टं पुरुषोत्तममित्यर्थः, यदुक्तं श्रीमद्भगवद्गीतासु "द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च। क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते" इत्युपक्रम्य "यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः। अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः इति ॥ शुभ्रं—अविद्या मलेनास्पृष्टं घनेनेव सूर्यः, यदुक्तं वार्तिके "धूमाभ्रधूलिनीहारैरस्पृष्टोऽपि दिवाकरः। यथा छन्न इवाभाति तथैवात्मापि मायया" इति, तदीदृशं यज्ञोपवीतं परब्रह्मैक्यं प्रतिमुञ्च – स्वस्वरूपभूतं परमात्मस्वरूपं प्रकटीकुर्विति गुरुणा जीवब्रह्मैक्यदृष्टिरेवानेन प्रहिता न तु बाह्यत्रिवृत् - कार्पास सूत्रदानमिति तात्पर्यम्,। तदुक्तं — विस्मृत स्वात्मतत्त्वस्य स्मृतिदानं प्रयोजनम्। यज्ञोपवीतबन्धस्य नापूर्वं दानमिष्यते—इति ॥ किं च शिष्या ब्रह्मविद्याविविदिषवो निवृत्तकर्माणो मोक्षाय ये प्रवृत्तास्तेषां निर्विघ्नतया ब्रह्मप्राप्तिमाशास्ते आचार्य इति गुरुः शिष्यमाशीर्भिरभिनन्दति ॥

बलमस्तु तेजः इति, बलं – विद्यानिमित्तं वीर्यं मिथ्याज्ञानानभिभाव्यतालक्षणोऽतिशयस्तदस्तु। तेजः – दुर्ज्ञेयार्थज्ञानेषु तीक्ष्णत्वं, अन्तःकरणशुद्धिश्चास्तु, "क्षुरस्य धारा निशिता दुरत्यया दुर्गं पथस्तत्कवयो वदन्ती" ति श्रुत्युक्तोपदेशेन सूक्ष्मतमे यज्ञोपवीताख्यपरमात्मज्ञानेऽवहितो भव, मा कदाचित् तद्विमुखस्तद्रिक्तो वा भवेत्याशयः ॥ एवं सद्गुरुणा तत्त्वमस्यादिश्रुतिप्रतिपादितेन श्रवणमयेनानुगृहीतः स्वयं मनननिदिध्यासनाभ्यां कृताभ्यासः अहं

ब्रह्मास्मीति श्रुत्युक्तां स्वानुभूतिं प्रकटयति, असि त्वं जीवश्चिदाभासलक्षणको यज्ञस्य परमात्मनो, यज्ञोपवीतं - यज्ञेन संगत्या प्रेर्यप्रेरकत्वादिरूपया उप—समीपे तस्य वीतं — ज्ञातम् मया हि त्वं चिदाभासोऽपि तत्त्वमसीत्यादि महावाक्यार्थबलाच्चित्स्वरूप एव मतोऽसीति भावः, अतोऽहं संहृत समस्त प्रपञ्चस्त्वा—त्वामुपवीतेन लक्षणयानुकूल्येन तदभेदज्ञानेनेतियावत् उप—समीपे परमात्मनो नह्यामि— बध्नामि तत्परामर्शदार्ढ्यात्त्वां तत्रैव लयं नयामीति भावः। अनेन च स्वरूपप्रकाशनबलेन जीवत्वसुलभसंसृत्यापदम्भोधिमग्नस्त्वं न भवेरित्याशयः। यज्ञोपवीतमिति॰ (सामान्यार्थः) हे ब्रह्मचारिन्! यज्ञस्य—विष्णोः परमात्मनः सामीप्ये वर्तमानस्य जीवस्य प्रतिकृतिभूतं यज्ञोपवीतं चैतन्यविशेषाधिष्ठाने हृदि त्रैवर्णिकैर्बहिर्धार्यमाणं त्रिवृत्सूत्रात्मकं परमं — सर्वोत्कृष्टतया वरणीयं पवित्रं—पवित्राणामप्यतिपवित्रतापादकं प्रजापतेः— प्रजानां पालयितुर्ब्रह्मणोऽपि यत् प्रसिद्धं सहजं—देहेन्द्रियादिभिः सहोत्पन्नं, परेभ्योऽपि परमायुषः साफल्यकारि सर्वश्रेष्ठतमं अग्रे भवं वा शुभ्रमुज्वलं निर्मलमिति यावत्, तदेतत् प्रतिमुञ्च— हृदि धारय, एतद्धारणेन च तव विद्यानिमित्तं बलं—वीर्यं तेजश्च - दुर्ज्ञेयार्थपाटवमस्तु भूयादित्यहमाशासे— त्वं यज्ञोपवीतं जीवस्वरूपोऽसि, तात्त्विकं रूपं मम किमस्तीति स्मृत्यै यज्ञोपवीतेनानेन त्वां योजयामि, इति ॥

गायत्रीमन्त्रस्य सामान्यार्थः— ॥

अकारोकारमकाराणां, विष्ण्वादिकारणत्रयवाच्यानां समुच्चयः, वेदत्रयसारभूतः प्रणवापरपर्यायः सर्वाश्रयः, सृष्टिस्थितिलयकारणम्, ब्रह्मात्मैक्यहेतु श्चित्प्रकाशरूपः ओमिति । यमेवैष वृणुते तेन लभ्य इति श्रुतिदृशा स्वस्वरूपप्रकाशनेनावति संसारभयाद्रक्षतीति ओम् ॥ भवति तत्तद्रूपेणेति भूः विश्वमय इत्यर्थः । भावयति स्वस्मिन्सर्वं लयं प्रापयतीति भुवः । स्वरति – तापयति भीषयति सर्वानिति स्वः, तथा च श्रुतिः "भयादस्याग्नि स्तपति भयात्तपति सूर्यः । भयादिन्द्रश्च वायुश्च मृत्युर्धावतिपञ्चमः ॥ " अथवा भूरादिलोकत्रयव्यापकः, एतादृशस्य प्रणववाच्यस्य तदिति षष्ठ्यर्थे प्रथमा, तस्यानिर्वाच्यस्य देवस्य द्योतनात्मकस्य सर्वप्रकाशकस्य सर्वसत्तादायकस्य सर्वस्तुत्यस्य, आनन्दघनस्य सवितुः – सर्वप्रेरकस्यान्तर्यामिनो विज्ञानानन्दस्वभावस्य हिरण्यगर्भोपाध्यवच्छिन्नस्य वा आदित्यान्तरपुरुषस्य वा ब्रह्मणो वरेण्यं – वरणीयं सर्वैः प्रार्थनीयं भर्गः – सर्वपापानां संसारस्य च भर्जनसमर्थं तेजः सत्यज्ञानादि वेदान्तप्रतिपाद्यम् वयं धीमहि – ध्यायामः छान्दसं संप्रसारणम्, तस्य कस्य, यः सवितान्तर्यामी भूत्वा सर्वप्रेरकः सर्वकर्मसु प्राणिनो भ्रामयन् सदा तिष्ठति ॥ स नोऽस्माकं धियो – बुद्धीः प्रचोदयात् प्रकर्षेण चोदयतु प्रेरयतु सत्कर्मानुष्ठानाय, ॥ तत्प्रेरितयैव बुद्ध्याखि-

ला मनुष्या आत्मज्ञाने शक्ता अनन्तभवाम्भोधिपारगमनसमर्था त्रिविधक्लेशमु·
क्ताश्च भवन्ति ॥ उक्तं च 'दृश्यते त्वग्र्यया बुद्धया इति, एष एव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य ऊर्ध्वं निनीषति ; एष एवासाधु कर्म कारयति तं यमेभ्यो लोकेभ्योऽधो निनीषति ।। न देवा यष्टिमादाय रक्षन्ति पशुपालवत् । यं हि रक्षितुमिच्छन्ति धिया संचोदयन्ति तमिति ॥ अपिच— तेषां सत-
तयुक्तानाम्भजताम्प्रीतिपूर्वकम् । ददामि बुद्धियोगन्तं येनमामुपयान्तिते ॥ ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति । भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया । एष हि प्रपन्नानामेव प्रसादकर्ता न त्वात्मविमुखानामित्याह— तमेव शरणङ्गच्छ सर्वभावेन भारत। तत्प्रसादात्परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम् ॥

अन्यप्रकारको मन्त्रार्थः

भूरिति सन्मात्रमुच्यते । भुव इति सर्वं भावयति प्रकाशयतीति व्युत्पत्त्या चि-
द्रूपमुच्यते । सुव्रियते इति व्युत्पत्त्या स्वरिति सुष्ठु सर्वैर्व्रियमाणं सुखस्व-
रूपमुच्यते इति शङ्करभाष्यम् । मह इति सर्वातिशायिमहत्तरस्य नाम । जन इति सर्वकारणम् । तप इति सर्वतेजोरूपं परं तेजः । सत्यमिति सर्व बा-
धारहितं कथ्यते ॥

तच्छब्देन प्रत्यग्भूतं स्वतःसिद्धं परं ब्रह्मोच्यत इति शङ्करभाष्यम् ॥ सवितु-
रिति सृष्टिस्थितिलयलक्षणकस्य सर्वप्रपञ्चस्य समस्तद्वैतविभ्रमस्याधिष्ठानं

लक्ष्यत इति शङ्करभाष्यम् । सवितुःसर्वान्तर्यामितया प्रेरकस्य जगत्स्रष्टुः परमेश्वरस्येति सायणभाष्यम् । वरेण्यमिति सर्ववरणीयं निरतिशयानन्दरूपमिति शङ्करभाष्यम् । सवितुर्वरेण्यमित्यत्र षष्ठी राहोःशिर इतिवदभेदे ॥ अविद्यातत्कार्ययोर्भर्जनाद्भर्गः ॥ देवस्येति पदेन—'एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा । कर्माध्यक्षः सर्वभूताधिवासः साक्षीचेता केवलो निर्गुणश्च' इत्यादिश्रुतिप्रतिपाद्यः सर्वसाक्षी चेता – केवलो – निर्गुणब्रह्मरूप आत्मा गृह्यते ॥ धीमहीत्यनेन 'आत्मेत्येवोपासीत' इत्यादि श्रुत्यर्थानुष्ठानं सूच्यते ॥ धियो योनः प्रचोदयादिति–यो भर्गः सर्वान्तर्यामी ज्योतीरूपः परमेश्वरोऽस्माकं संसारिणां जीवानां बुद्धिवृत्तीर्धर्मार्थकाममोक्षादिषु सदा प्रेरिताः कुर्वंस्तिष्ठति ॥ अविद्यातत्कार्ययोर्भर्जनाद्भर्गः स्वयंज्योतिः परब्रह्मात्मकं तेजः धीमहि – तद्योऽहं सोऽसौ योऽसौ सोऽहमिति वयं ध्यायमेति सायणभाष्यम् ॥

प्रणवान्ता गायत्री जपादिभिरुपास्या । तत्र शुद्धगायत्री प्रत्यग् ब्रह्मैक्यबोधिका । बुद्ध्यादिसर्वदृश्यसाक्षिलक्षणं यन्मे स्वरूपं तत्सर्वाधिष्ठानभूतं परमानन्दं निरस्तसमस्तानर्थरूपं स्वप्रकाशचिदात्मकं ब्रह्मेत्येवं धीमहि ध्यायेमेति सर्वात्मकब्रह्मबोधकोऽयं गायत्रीमन्त्रःसम्पद्यते । इति शङ्करभाष्यम् ॥

'भूर्भुवः स्वरिति लोकत्रयात्मको हि प्रणवः इत्यनया सर्वसम्मतया रीत्या ब्रह्मणि सर्वं दृश्यवर्गात्मकं जगद्विलाप्य तत्सवितुरित्यादि मन्त्रार्थचिन्तनेन

स्वात्मानमपि तद्रूपेणैव भावयति साधक इति काश्मीरिक श्रीशिवोपाध्याय-कृते गायत्रीनिर्णये ॥ अद्वितीयं ब्रह्मैव गायत्रीशिरसापि बोध्यते—
आप इत्याप्नोतीति व्युत्पत्त्या व्यापित्वमुच्यते । ज्योतिरिति प्रकाशरूपत्वम् । रस इति सर्वातिशयत्वम् । अमृतमिति मरणादिसंसारनिर्मुक्तत्वमिति—सर्वव्यापि-सर्वप्रकाशक-सर्वोत्कृष्ट-नित्यमुक्तमात्मरूपं सच्चिदानन्दात्मकं भूर्भुवःस्वरात्मकं यदोङ्कारवाच्यं ब्रह्म तदहमस्मीति ॥

यद्यपि वेदेष्वनेकानि कर्माणि नानाविधाश्चोपासनाः सन्ति, तथापि द्विजात्यर्थे सुखप्राप्तये दुःखनिवृत्तये च मोक्षहेतुर्गायत्रीमंत्रोपासनैव वेदसारा सर्वसम्मता ॥

'गायत्री वा इदं सर्वं भूतं यदिदं किञ्च' (छा) इत्यादि श्रुतिभि गायत्री सर्वात्मिका, नतु केवलं चतुर्विंशत्यक्षरात्मिकैव, नापि-अवयवयुक्ता विशिष्टाकृतिर्देवतैव बोद्धव्या । सैषाऽभेदभावनयैवोपास्यात्मानमपि तत्स्वरूपं मन्यमानेनोपासकेन । उक्तं च 'देवो भूत्वा देवान्यजेत्, 'अथ योऽन्यां देवतामुपास्ते ऽन्योऽसावन्योहमस्मीति न स वेद, यथा पशुरेवं स देवानाम्, इति ॥

गायत्रीमन्त्रमाहात्म्यम्

चतुर्ष्वेव वेदेषु छान्दोग्ये बृहदारण्यके तथान्येष्वपि सर्वमान्यशास्त्रेषु गायत्रीमन्त्रमाहात्म्यं विशेषतया सामवेदस्य सावित्र्युपनिषदि, अथर्ववेदस्य सूर्योपनिषदि, नारायणोपनिषद्यपि वर्णितमस्ति ॥ ओङ्कारपूर्विकास्तिस्रो महा-

ब्रह्मचर्यं चरन्ति तत्ते पदं सङ्ग्रहेण ब्रवीम्योमित्येतत् ॥ एतद्ध्येवाक्षरं ब्रह्म-एतद्ध्येवाक्षरं परम् । एतद्ध्येवाक्षरं ज्ञात्वा ब्रह्मलोके महीयते ॥ एतदालम्बनं श्रेष्ठमेतदालम्बनं परम् । एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते ॥ इत्यादि कठोपनिषदि ॥ एतद्वै सत्यकाम ! परं चापरं च ब्रह्म यदोङ्कारः । तस्माद्वि-द्वानेतेनैवायतनेनैकतरमन्वेति ॥ इत्यादि प्रश्नोपनिषदि ॥ सम्पूर्णा माण्डूक्यो-पनिषदपि ओङ्कारवर्णन एव समाप्तास्ति ॥ गीतायामपि ओमित्येकाक्षरं ब्रह्मे-त्यादि ॥ योगदर्शने— तस्य वाचकः प्रणवः तज्जपस्तदर्थभावनम् ॥ मनुः— अकारं चाप्युकारं च मकारं च प्रजापतिः । वेदत्रयान्निरदुहद् भूर्भुवःस्वरितीति च ॥ त्रिभ्य एव तु वेदेभ्यः पादं पादमदूदुहत्— इति ॥

ॐ

श्रीमहागायत्र्यै नमः

ओमिति सारं त्रय्या, अवति संसारकदर्थनायासात् ॥
ब्रह्मादिवाचकं यत्, तत्प्रपद्येऽहं परं ब्रह्म ॥ १ ॥

ब्रह्मचर्यं चरन्ति तत्ते पदं सङ्ग्रहेण ब्रवीम्योमित्येतत् ॥ एतद्ध्येवाक्षरं ब्रह्म- एतद्ध्येवाक्षरं परम् । एतद्ध्येवाक्षरं ज्ञात्वा ब्रह्मलोके महीयते ॥ एतदालम्बनं श्रेष्ठमेतदालम्बनं परम् । एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते ॥ इत्यादि कठोपनिषदि ॥ एतद्वै सत्यकाम ! परं चापरं च ब्रह्म यदोङ्कारः । तस्माद्वि- द्वानेतेनैवायतनेनैकतरमन्वेति ॥ इत्यादि प्रश्नोपनिषदि ॥ सम्पूर्णा माण्डूक्यो- पनिषदपि ओङ्कारवर्णन एव समाप्तास्ति ॥ गीतायामपि ओमित्येकाक्षरं ब्रह्मे- त्यादि ॥ योगदर्शने— तस्य वाचकः प्रणवः तज्जपस्तदर्थभावनम् ॥ मनुः— अकारं चाप्युकारं च मकारं च प्रजापतिः । वेदत्रयान्निरदुहद् भूर्भुवःस्वरितीति च ॥ त्रिभ्य एव तु वेदेभ्यः पादं पादमदूदुहत्— इति ॥

ॐ

श्रीमहागायत्र्यै नमः

ओमिति सारं त्रय्या, अवति संसारकदर्थनायासात् ॥
ब्रह्मादिवाचकं यत्, तत्प्रपद्येऽहं परं ब्रह्म ॥ १ ॥

प्राणानायम्योर्ध्वं, यज्जपसक्तो महीयते सत्ये ॥
ओमिति तद्वन्देऽहं, यदालम्बनं परं श्रेष्ठम् ॥ २ ॥
उपनिषत्स्वभिमतं यद्, यदुपास्त्याखिलतपः फलप्राप्तिः ॥
यदर्थं ब्रह्मचर्यं, तन्मृग्यमोमिति परं ब्रह्म ॥ ३ ॥
तिर्यक् चोर्ध्वमधस्ताद्, यस्यान्तो न लभ्यते तदनन्तम् ॥
हृदयेषु नादरूपं, तद्ध्येयमोमिति परं ब्रह्म ॥ ४ ॥
यद्गर्भजन्मव्याधि, -जरामरण संसार महाभीतेः ॥
त्रायते तारयत्यपि, तत् तारमोमिति परं ब्रह्म ॥ ५ ॥
निर्गुणमपि सगुणं यद्, यदक्षरं त्रिकालाक्षरं ज्योतिः ॥
ओमिति भातु पुरस्ताद्, -अशेष भासकं परं ब्रह्म ॥६॥
श्रुतिसारांशत्र्यक्षर, -योगजस्त्रिवर्गान्वितास्त्रिमात्रः ॥
तदतीतोऽपि तुरीयो, यस्तमोङ्कारमुपासेऽहम् ॥ ७ ॥
योगी यदुपासनया, जनिमृतिसंसारबन्धनान्मुक्तः ॥
तत्सायुज्यं भजते, प्राणोत्क्रमणे स ओङ्कारः ॥ ८ ॥

४५

विधिविष्णुमहेशादिभि, रपि यः प्रणूयते प्रयतैर्भक्त्या ॥
प्रणवः सोऽयं सर्वै, र्ध्येयो दुष्कृताशनिपातः ॥ ९ ॥
अन्तेऽन्तकखेदादपि, यदुच्चारमहामहिमलीनाघः ॥
दुर्लभं लभते धाम तदोमिति परं प्रपद्येऽहम् ॥ १० ॥
भूर्भुवः स्वरित्यशेष, - लोकेषु व्यापकं परं तेजः ॥
भवति भावयति स्वरति, यदखिलं तदुपास्महे ब्रह्म ॥ ११
तदिति चातिप्रसिद्धं, वाङ्मनसगोचरातीतमनन्तम् ॥
सच्चिदानन्दरूपं, ब्रह्म भर्ग श्रये शान्तम् ॥ १२ ॥
सवितुः सर्वोत्कृष्टं, सर्वसवितृ सवितृमण्डलान्तःस्थम् ॥
सत्यं स्तवीमि धाम, प्रदीप्तमज्ञानतमोहारि ॥ १३ ॥
रत्नराशींश्च विहाय, मृग्यमभिनन्द्यमनर्घ्यमनुत्तरम् ॥
वन्दे धाम वरेण्यं, परार्घ्यतममनुपममनन्तम् ॥ १४ ॥
सर्वाविद्याप्लोषक, उत्कटभवबीजभर्जको भर्गः ॥
अखिलापत्कल्पाग्निः, सोऽघौघान्मे द्रुतं दहतात् ॥ १५ ॥

सृष्टिस्थित्यन्तनाट्य, – केलिनिर्वहणसततोद्युक्ता या ॥
ज्योतिर्मूर्तिर्देव, – स्याविर्भूयात्पुरो मे सा ॥ १६ ॥
यद्ध्यानेनोदयत, स्तत्काले गलति विश्वनीहारः ॥
सोऽहमितिमतिकरं तद्, ध्यायेयं ध्येयचमत्कारि ॥ १७ ॥
सदसत्कर्मादेशी, बुद्धिवृत्तीश्चारयन्ननीशस्य ॥
निनीषुरूर्ध्वमधो वा यः परमात्मा स नः शरणम् ॥१८॥
प्रचोदयतु नः सोऽयं, धीवृत्तीरनवद्येषु कार्येषु ॥
भगवानन्तर्यामी, भूयो भूयो नमोऽस्त्वस्मै ॥ १६ ॥
रचितहृदन्तः शय्यां, परां प्रेयसीं चिरवियोगखिन्नाम् ॥
मदनमोहन मद्भक्ति – मपि कृतार्थयाबलां बालाम् ॥२०॥
विश्वनाथपदद्वन्द्वा, – र्पितमनोहरस्तवसुमनोहारः ॥
प्रीणयतु भगवच्चरण, – सततचिन्तनोत्सुकान्भक्तान् ॥२१
गायत्रीमन्त्रभावार्थ विकसत्पुष्पमालिका ॥
सदामोदप्रदा भूयान्नाथपत्पङ्कजार्पिता ॥ २२ ॥

१

शुक्रियं रुद्रस्य। नमो वाचे नमो वाचस्पतये या वागुदिता या चानुदिता तस्यै वाचे नमः, नम ऋषिभ्यो मन्त्रकृद्भ्यो मन्त्रविद्भ्यो मा मामृषयो मन्त्रकृतो मन्त्रविदः पराढुर्दैवीं वाचमुद्यासं शिवामजस्रां जुष्टां देवेभ्यः स्वधावतीं पितृभ्यः शुश्रूषेण्यां मनुष्येभ्यः तं मा देवा अवन्तु शोभायै पितरोऽनुमदन्तु सुचक्षा अहमक्षिभ्यां सुवर्चा मुखेन सुश्रुत्कर्णाभ्यां भूयासं, ओंभूर्भुवःस्वः, प्राच्या त्वा दिशा अग्निना देवतया गायत्रेण च्छन्दसा वसन्तमृतुं प्रविशामि। दक्षिणया त्वा दिशा इन्द्रेण देवतया त्रैष्टुभेन च्छन्दसा ग्रीष्ममृतुं प्रविशामि। प्रतीच्या त्वा दिशा सवित्रा देवतया जागतेन च्छन्दसा वर्षा ऋतुं प्रविशामि। उदीच्या त्वा दिशा मित्रावरुणाभ्यां देवतयाऽऽनुष्टुभेन च्छन्दसा शरदमृतुं प्रविशामि। ऊर्ध्वया त्वा दिशा बृहस्पतिना देवतया पांक्तेन च्छन्दसा हेमन्तमृतुं प्रविशामि। अनया त्वा दिशा प्रजापतिना देवतया अनाप्तेन च्छन्दसा शि-

शिरमृतुं प्रविशामि ॥ गायत्रीं छन्दः प्रविशामि, त्रिष्टुभं छन्दः प्रविशामि, जगतीं छन्दः प्रविशामि, अनुष्टुभं छन्दः प्रविशामि, पंक्तिं छन्दः प्रविशामि, अतिच्छन्दसं छन्दः प्रविशामि। छन्दांसि प्रविशामि। तानि नः पारयन्तु तानि नोऽवन्तु तानि स ऋच्छतु योस्मान्द्वेष्टि यं च वयं द्विष्मः ॥ आपो अस्मात्प्रविशन्त्वापो अस्मासु जागृत आयुर्विश्वायुर्विश्वमायुर्व्यश्नवै सर्वमायुर्व्यश्नवै, दिव्यो गन्धर्वो भुवनस्य यस्पतिरेकाव्यो मनसा विदवीड्यः, तन्त्वा यामि ब्रह्मणा देवदैव्यन्नमस्ते अस्तु दिवि ते सधस्थम्, दिविपृष्ठो यजत सूर्यत्वगवयातो हरसो दिव्यस्य एकाव्यो मनुष्यः सुशेवः, मृळाद्गन्धर्वो भुवनस्य यस्पतिरनवद्याभिः समजग्माभिरप्सरःस्वपि गन्धर्व आसीत् समुद्र आसां सदनं व आहुस्ततः सद्या च परा च चरन्त्यग्निर्येदिद्युम्नव्रिये याः, विश्वावसुं गन्धर्वं ससभ्रे ताभ्यो नमो अस्तु ता नो मृळयन्तु ता नः शर्म यच्छंतु ता यं द्विष्मो यश्च नो द्वेष्टि त-

मासां जम्भे दध्मः, आहुस्ते भग चक्षुषी ताभ्यां विपश्य मामभि ताभ्यां विपश्य मामभि यदेतत्सारघं मधु तेन रूपमनज्मि ते तेन रूपमनग्धि मे, देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां देवानां ऋतुभिर्दैवाभ्यञ्जनैरभ्यञ्जे भगवन्नामासि, तस्य त ऋचश्च यजूंषि च सामानि च वागग्ना अन्यच्चक्षुः सूर्येऽन्यत् सूर्येऽन्यदग्ना अन्यद्भगवान्भूयासम्, ऐळोसि चक्षुरसि श्रोत्रमसि पुरन्धिर्नाम वागसि येन शतक्रतुर्भागमुपजुह्वे तेन त्वोपह्वये भग, तद्वान्नरा सनयेदं स उग्रमाविष्कृणोमि तन्यतुर्न वृष्टिम्, दध्यङ्ह यन्मध्वाथर्वाणो वामश्वस्य शीर्ष्णा सुमतिरवोचत्, अग्निरीशो वसव्यस्याग्निर्महः सौभगस्य तान्यस्मभ्यं रासति ॥

उद्वयन्तमेत्युपस्थानम् । उद्वयन्तमसस्परि ज्योतिष्पश्यन्त उत्तरम् । देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ॥
उष्णीषं त्रिरावर्तं वेष्टयित्वा शुक्रियं रुद्रस्य ।

आयुर्दा आयुर्मे देहि आयुषे नः पुनर्देहि, प्राणदाः

प्राणं मे देहि आयुषे नः पुनर्देहि, व्यानदा व्यानं मे देहि आयुषे नः पुनर्देहि अपानदा अपानं मे देहि आयुषे नः पुनर्देहि, चक्षुर्दाश्चक्षुर्मे देहि आयुषे नः पुनर्देहि, श्रोत्रदाः श्रोत्रं मे देहि आयुषे नः पुनर्देहि, वर्चोदा वर्चो मे देहि आयुषे नः पुनर्देहि । "एतानि सप्त यजूंषि । सप्तानामपि आयुषे नः पुनर्देहि । इति साधारणोनुषङ्गः ॥" नमो रुद्राय दिविषदे यस्य वर्षमिषवस्तस्मै नमस्ते नमः समरे स मा मा हिंसीः । नमो रुद्रायाऽन्तरिक्षसदे यस्य वात इषवस्तस्मै नमस्ते नमः समरे स मा मा हिंसीः । नमो रुद्राय पृथिवीषदे यस्यान्नमिषवस्तस्मै नमस्ते नमः समरे स मा मा हिंसीः ॥ ब्रह्मण उपस्तरणमसि ब्रह्मणे त्वोपस्तृणामीळायै वास्त्वसि वास्तुमद्वास्तुमान्भूयासमवास्तुः स भूयाद्योस्मान्द्वेष्टि यं च वयं द्विष्मः । प्रतिष्ठासि प्रतिष्ठा मे भूयादप्रतिष्ठः स भूयाद्योस्मान्द्वेष्टि यं च वयं द्विष्मः ॥ आ वात वाहि भेषजं वि वात वाहि यद्रपः । त्वं हि

५

विश्वभेषजो देवानां दूत ईयसे । यदऽदो वात ते गृहेऽमृतस्य
निधिर्हितः । ततो नो धेहि जीवसे ततो नो अभयं कृधि ।
द्युभिरक्तुभिः परिपातमस्मानरिष्टेभिरश्विना सौभगेभिः । तन्नो
मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥ पृ-
थिवी शान्तिरन्तरिक्षं शान्तिर्द्यौः शान्तिर्दिशः शान्तिरापः शा-
न्तिरोषधयः शान्तिर्वनस्पतयः शान्तिस्त्वयाहं शान्त्या सर्वशान्त्या
मह्यं द्विपदे चतुष्पदे शान्तिं करोमि शान्तिर्नो अस्तु शान्ति-
रसि शान्तिः शान्तिः शान्तिः । या वागुदिता या चानुदिता शिवा
नः शन्तमा भव सुमृळीका सरस्वति मा ते व्योम सन्दृशि । मि-
त्रस्य त्वा चक्षुषा प्रेक्षे मित्रस्य त्वा चक्षुषान्वीक्षे, सूर्यस्य त्वा
चक्षुषा प्रेक्षे सूर्यस्य त्वा चक्षुषा अभिवीक्षे ॥ मित्रस्य चर्षणी-
धृतः श्रवो देवस्य सानसि द्युम्नं चित्रश्रवस्तमम् । मित्रस्य चर्ष-
णीधृतः श्रवो देवस्य सानसि सत्यं चित्रश्रवस्तमम् ॥ आपो
हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन, महे रणाय चक्षसे ।

यो वः शिवतमो रसस्तस्य भाजयतेह नः, उशतीरिव मातरः। तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ, आपो जनयथा च नः॥ आपः पृणीत भेषजं वरूथं तन्वो मम, ज्योक्च सूर्यं दृशे। शन्नो देवीरभिष्टये आपो भवन्तु पीतये, शँ य्योरभिस्रवन्तु नः। शन्नो मित्रः शँ वरुणः शन्नो भवत्वर्यमा शन्न इन्द्रो बृहस्पतिः शन्नो विष्णुरुरुक्रमः॥ शन्नो मित्रः शं वरुणः शन्नो अस्त्वर्यमा। शन्न इन्द्रश्चाग्निश्च शन्नो विष्णुरुरुक्रमः॥ त्यमूषु वाजिनं द्ववजूतं सहोवानन्तरुतारं रथानाम्। अरिष्टनेमिं पृतनाजमाशुं स्वस्तये तार्क्ष्यमिवाह्वयेम। कया नश्चित्र आभुवदूती सदावृधः सखा, कया शचिष्ठया वृता। कस्त्वा सत्यो मदानां मंहिष्ठो मत्सदन्धसः, दृढा चिदारुजे वसु। अभी षु णः सखीनामविता जरितॄणाम्, शतं भवास्यूतिभिः। "शुक्रियं रुद्रस्य।" य उदगात्पुरस्तान्महतो अर्णवाद्विभ्राजमानः सरिरस्य मध्ये। स मामृषभो रोहिताक्षः सूर्यो विपश्चिन्मनसा पुनातु। यद्ब्रह्मा-

७

वादिष्म तन्मा मा हिंसीत्सूर्याय विभ्राजाय वै नमोनमः ॥

विभूरसीत्यनुवाकेनाग्निमुपस्थापयति धिष्ण्यानामङ्गिरसामग्निगणानां चार्षम् । विभूरसि प्रवाहणो वह्निरसि हव्यवाहनः श्वात्रोसि प्रचेतास्तुथोसि विश्ववेदा उशिगसि कविरङ्घारिरसि बम्भारिरवस्युरसि तुवस्वाञ्छुन्ध्युरसि मार्जालीयः सम्राळसि कृशानुः परिषद्योस्याऽऽस्तव्यो नभोसि प्रतक्वाऽसंमृष्टोसि हव्य सूदन ऋतधामासि स्वर्ज्योतिः समुद्रोसि विश्वव्यचा अजोस्येकपादहिरसि बुध्न्यः कव्योसि कव्यवाहनो रौद्रेणानीकेन पाहि माग्ने पिप्रीहि माग्ने नमस्ते अस्तु मा मा हिंसीः । तत उपविश्य । एधोसीति [समिध आदधाति ।] एधोस्येधिषीमहि "इति प्रथमां" समिदसि समेधिषीमहि "इति द्वितीयां" इदमहमग्नौ समिधमभ्यादधाम्यग्ने! सर्वव्रतो भवामि "इति तृतीयां" इदमहमग्नौ समिधमाहार्षं बृहते जातवेदसे स मे श्रद्धां च मेधां च दीर्घं चायुर्जातवेदाः प्रयच्छतु "इति चतुर्थीम्" ॥

तेजोसि तेजो मयि धेहीत्यात्मनि हृदयदेशे । शेषेणोपतिष्ठते ॥ विहव्यस्याङ्गिरसस्य ॥ अपो अद्यानुचारिषं रसेन समगन्महि । पयस्वानग्न आगमन्तं मा संसृज वर्चसा ॥ संमाग्ने! वर्चसा सृज प्रजया च धनेन च । विद्युर्मे अस्य देवा इन्द्रो विद्यात्सहर्षिभिः ॥ तत उपविश्य ॥ ततः प्रातः प्रागुदयाद्द्वादश चतुर्विंशतिं षट्त्रिंशतमष्टाचत्वारिंशतं वा वर्षाणि यो ब्रह्मचर्यं चरति मलज्जुरवलः कृशः सर्वं स विन्दते स्नात्वा, यत्किञ्चिन्मनसेच्छति, एतेनैव धर्मेण स्नाध्वर्यीते ॥

वसनादीननुमंत्र्य । रेवतीस्त्वा व्यक्षन्कृत्तिकाश्चकृतुस्त्वा अपसस्त्वा व्यतन्वत धियोऽवयन्नव ग्ना अमृजन्सहस्रमन्तां अभितो वृधन्ताऽशीतिर्मध्यमवयन्नु नारीरित्यहतं वासोभिमन्त्रयते ॥ देवीर्देवाय परिधे सवित्रे परिधत्त वर्चस इमं शतायुषं कृणोतु जीवसे कमिति परिधापयति ॥ जरां गच्छ परिधत्स्व वासोभूराऽऽपीवानभिशस्तिपावा शतं च जीव शरदः पुरूची रायश्च

पोषमुपसंव्ययस्व ॥ परीमं सोमं तेजसे महे श्रोत्राय दध्मसि यथैनं जरसं नयज्ज्योक्श्रोत्राय जागरज्ज्योक्श्रोत्रेऽधिजागरदिति ब्राह्मणस्य ॥ परीदं वासोऽधिथाः स्वस्तये भवा पीवानभिशस्तिपावा शतं च जीव शरदः सुवीरो वसूनि चोग्रो विभज सुजीवन्निति (परिहितवाससमनुमन्त्रयते) ॥ योगे योगे तवस्तरं वाजे वाजे हवामहे । सखायमिद्रमूतये ॥ युवा सुवासःपरिवीत आगात्स उ श्रेयान्भवति जायमानः । तं धीरासः कवय उन्नयन्ति स्वाध्यो मनसा देवयन्तः ॥ (मेखला)

इयं दुरुक्तात्परिबाधमाना वर्णं पवित्रं पुनती म आगात् । प्राणापानाभ्यां बलमाभजन्ती सखा देवी सुभगा मेखलेयम् ॥ ऋतस्य गोप्त्री तपसस्तरुत्री घ्नती रक्षः सहमाना अरातिम् । सा नः समन्तमनु परेहि भद्रे भर्तारस्ते मेखले मा रिषाम ॥ श्रद्धाया दुहिता तपसोऽधिजाता स्वसर्षीणां मन्त्रकृतां बभूव । सा मा मेखले परिरिरिहस्व मयि देहि तप इन्द्रियं च ॥ (मित्रस्य

चक्षुरित्यजिनम्) ॥ मित्रस्य चक्षुर्धरुणं बलाय तेजो यशस्वि स्थविरं समृद्धम् । अनाहनस्यं वसनं चरिष्णु परीदं वाज्यजिनं दधेयमिति वाचयन्नैणेयं चर्म ब्राह्मणाय प्रयच्छति । "प्राङ्मुखं वाचयति" ॥ सुश्रवः सुश्रवा असि यथा त्वं सुश्रवा अस्येवं मा सुश्रवः सौश्रवसं कुरु । यथा त्वं सुश्रवो देवानां वेदस्य निधिगोपोसि । एवमहं ब्राह्मणानां ब्रह्मणो वेदस्य निधिगोपो भूयासम् ॥ (इति पालाशं दण्डं ब्राह्मणाय प्रयच्छति) ॥

उदुत्यमिति दशर्चेन प्रथमेन प्रतीकानुवाकेन स्रुवेण प्रत्यृचमाज्यं जुहुयात् । उदु त्यञ्जातवेदसं देवं वहन्ति केतवः, दृशे विश्वाय सूर्यम् ॥ १ ॥ इममू षु त्वमस्मभ्यं सनिं गायत्रं नवीयांसम्, अग्ने देवेषु प्रवोचः (प्रवोचात्) ॥ २ ॥ समिन्द्र नो मनसा नेषि गोभिः संसूरिभिर्हरिवः संस्वस्त्या । सं ब्रह्मणा देवकृतं यदस्ति सं देवानां सुमत्या यज्ञियानाम् ॥ ३ ॥ सं वर्चसा पयसा सन्तनूभिरगन्महि मनसा सं शिवेन । त्वष्टा सुदत्रो

विद्धातु रायोऽनु नो मार्ष्टु तन्वो यद्विलिष्टम् ॥ ४ ॥ अन्वग्नि-रुषसामग्रमख्यदन्वहानि प्रथमो जातवेदाः । अनु सूर्यस्य पुरुत्रा च रश्मीननु द्यावापृथिवी आततन्थ ॥ ५ ॥ या वाङ्कशा मधुमत्याश्विना सूनृतावती, तया यज्ञं मिमिक्षतम् ॥६॥ धाता दधातु नो रयिमीशानो जगतस्पतिः स नः पूर्णेन वावनत् ॥ ७ ॥ धाता प्रजानामुत राय ईशिषे धातेदं विश्वं भुवनं जजान । सन्दाशुषे किरति भूरिवामं वयं स्याम पतयो रयीणाम् ॥ ८ ॥ त्रयस्त्रिंशत्तन्तवो यान्वितन्वत इमं यज्ञं स्वधया ये ददन्ते । तेषां छिद्रं प्रतिदध्मो यदत्र स्वाहाऽयं यज्ञो अप्येतु देवान् ॥ ९ ॥ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्, समूढमस्य पांसुरे ॥ १० ॥

"मा नो घर्म" इत्येकोनत्रिंशतर्भिरुत्तमेन प्रतीकानुवाकेन स्रुवेण प्रत्यृचमाज्यं जुहुयात् ॥ शुक्रियं रुद्रस्य । मा नो घर्म व्यथितो विव्यथो नो मा नः परम धामाहुतो नैः । मोष्वस्मांस्तमस्यन्तराधा मा रुद्रियासो अभिकुर्वतो नः ॥ १ ॥ मा नः

क्रतुभिरीळतेभिद्विषो अस्मान्सुनीते मापराधाः । मा नो अग्नि- र्निर्ऋतिमरातिं मानो द्यावापृथिवी हेडते हेळयेथाम् ॥ २ ॥ अनु नो मित्रावरुणा इहावतामन्वादीध्याना अभि नः सखायौ । आदित्यानां प्रसृतिर्हेतिरुग्रा शिवा काष्ठा हविषः परि णो वृ- णक्तु ॥ ३ ॥ विधुन्दद्राणं समने बहूनां युवानं सन्तं पलितो जगार । देवस्य पश्य काव्यं महित्वा द्यां ममार सद्यः समानः ॥ ४ ॥ ओं भूः ॥ ५ ॥ ओंभुवः ॥ ६ ॥ ओंस्वः ॥ ७ ॥ ओंभूर्भुवः- स्वः ॥ ८ ॥ उदुत्यं जातवेदसं देवं वहन्ति केतवः, दृशे विश्वाय सूर्यम् ॥ ९ ॥ उद्वयन्तमसस्परि० ॥ १० ॥ उदु तिष्ठ स्वध्वराव नो दिव्या कृपा दृशे च भासा । बृहता सुशुकभिरग्ने याहि सुश- स्तिभिः ॥ ११ ॥ ऊर्ध्व ऊ षु ण ऊतये तिष्ठा देवो न सविता । ऊर्ध्वो वाजस्य सनिता यदञ्जिभिर्वाघद्भिर्विह्वयामहे ॥१२॥ पुनरूर्जा निवर्तस्व पुनरग्न इषायुषा । पुनर्नः पाह्यंहसः ॥१३॥ सह रय्या निवर्तस्वाग्ने पिन्वस्व धारया, विश्वप्स्न्या विश्वतस्परि ॥ १४ ॥

धाता दधातु नो रयिमीशानो जगतस्पतिः स नः पूर्णेन वा-
वनत् ॥ १५ ॥ धाता प्रजानामुत राये ईशिषे धातेदं विश्वं
भुवनं जजान । सन्दाशुषे किरति भूरिवामं वयं स्याम पतयो
रयीणाम् ॥ १६ ॥ अग्न आयूंषि पवस आसुवोर्जमिषञ्च नः,
आरे बाधस्व दुच्छुनाम् ॥ १७ ॥ अग्ने पवस्व स्वपा अस्मे वर्चः
सुवीर्यम्, दधद्रयिं मयि पोषम् ॥ १८ ॥ त्वन्नो अग्ने वरुणस्य
विद्वान्० ॥ १९ ॥ स त्वन्नो अग्नेवमोभवोती नेदिष्ठो० ॥ २० ॥
वायुरग्रेगा यज्ञप्रीस्साकं गन्मनसा यज्ञम्, शिवो नियुद्भिः शि-
वाभिः ॥ २१ ॥ प्रयाभिर्यासि दाश्वांसमच्छानियुद्भिर्वायं इष्टये
दुरोणे । निनो रयिं सुभोजसं युवस्व नि वीरं गव्यमश्व्यं च
राधः ॥ २२ ॥ हिरण्यगर्भः० ॥ २३ ॥ यः प्राणतो० ॥ २४ ॥ य
आोजोदा ॥ २५ ॥ येन द्यौ० ॥ २६ ॥ यइमे द्यावा ॥२७॥ यस्येमे
विश्वे० ॥ २८ ॥ यं क्रन्दसी अवसा तस्तभाने अभ्यैक्षेतां मनसा
रेजमाने । यत्राधिसूर उदितो विभाति कस्मै देवाय हविषा

विधेम ॥ २६ ॥

यद्वेदव्रतं तदत्र व्रतं ब्रह्मचारी बाढमिति प्रत्याह । 'पञ्च विकारानतुक्रमिष्यामः ।' ब्रह्मचार्यसि, अपोशान, कर्म कुरु, दिवा मा सुषुप्सीः, वाचं यच्छ, मा मलवद्वाससोद्राक्षीः, मा सम्भाषयेथाः, मलवद्वाससो भवन्ति, उदक्याः सूतिकाः श्वपाका अशुचयोऽन्त्यावसायिन इति, न श्मशानं गच्छेः, न शवशरीरं पश्येः, अनातृणं शवशरीरं दृष्ट्वा त्रिरात्रमुपवसेः, न मधुमांसे प्राश्यालभ्य वा शरीरं पुनर्व्रतमालभेथाः, यानि हविर्दूषणानि तानि भोजनदूषणानि, नोच्छिष्टं भुञ्जीथाः, नोच्छिष्टमन्यस्मै दद्याः मा गुरु भुञ्जीथाः, व्याधितविषयमेतत् । येनेच्छेत्तेन चिकित्सेत्, कामं गुरूच्छिष्टमश्नीयादिति आचार्याः । न नक्तं भुञ्जीथाः, उपज्वाल्य वा भुञ्जीथाः, न मृन्मये भुञ्जीथाः, न प्रतिसन्दध्या इत्येके । स्थानासनं पर्वान्तेषूपवासः, वाग्यमनं च, किंचिदप्रयतं दृष्ट्वा प्राणायामैः स शुध्यति ः सन्दर्शने त्रयः

कार्याः संव्याहृत्य तु सप्त समासाद्य तु द्वादश, सर्वत्र ज्योतिर्दर्शनमुदकोपस्पर्शनम्, सूर्याचन्द्रमसौ गौरग्निर्ब्राह्मण इत्येतानि पञ्च ज्योतींष्येतेषामेकेनापि शुध्यति, अबद्धं मनो दरिद्रं चक्षुः, सूर्यो ज्योतिषां श्रेष्ठो दीक्षे मा मा हिंसीरिति (सूर्य दिवाग्निं रात्रौ रेतसि स्कन्ने पुनर्मा मैत्विन्द्रियमिति जपेत् ॥) ओं पुनर्मा मैत्विन्द्रियं पुनरायुः पुनर्भगः। पुनर्ब्राह्मणमैतु मां पुनर्द्रविणमैतु मा॥ यन्मेऽद्य रेतः पृथिवीमस्कन्यदोषधीरप्य सरद्यदपः, तदहं पुनराददे ॥ यन्मे रेतः प्रसिच्यते यन्म आजायते पुनः। यद्वा मे प्रतितिष्ठति तेन माममृतं कुरु तेन सुप्रजसं कुरु ॥ नमो ब्राह्मणे "इति त्रिः पठेत्"

एवं स्वाध्यायधर्मेणारण्येऽधीयीत तपस्वी पुण्यो भवति तपस्वी पुण्यो भवति ॥ आपमापमपः सर्वा अस्मादस्मादितोऽमुतः। अग्निर्वायुश्च सूर्यश्च सह सञ्चिस्करुर्धिया। वाय्वश्वा रश्मिपतयो मरीच्यात्मानो अद्रुहः। देवीर्भुवनसूवरीः पुत्रवत्त्वा

यिमेऽसुव: । महानाम्नी महामाना महायामा महासोमास-
स्परि । देवी: पर्जन्यसूवरी: पुत्रवत्स्वायिमं सुव । अपारनुष्टि-
मपारत्वमपारनुष्टिमपारसम् । अपाघमनुजावर्ति मम देवी श्रृते
हिता: । वज्रन्देवीरनुदिता: (देवीरुदिता:) स्थ वरुणं देवसूवरी: ।
आदित्यानुदितं देवीर्योनिनो (योगिनो) र्ध्वमुदीषत ॥ भद्रङ्क-
र्णेभि:० । स्वस्ति न इन्द्रो० ॥ केतवोऽरुणासश्चर्षणयो वातर-
शना: प्रतिष्ठां शतधाय समाहिता: अथो सहस्रधाय सं शि-
वा नः शन्तमा भवाथ । दिव्या आप ओषधयो वनस्पतय:
सुमृडीका सरस्वति माते व्योम सन्दृशि ॥ ॥

शुद्धिपत्रम् ।

कृपा करके यह शुद्धियां अपनी २ पुस्तक पर उस २ स्थान अपनी कलम से पहिले ही करदेवें, फिर पुस्तक को उपयोग में लायाजावे इति प्रार्थना ॥

पृष्ठ	पंक्ति	अशुद्धि	शुद्धि
१	३	स्नता	स्नाता
२	२	सध्यो	सन्ध्यो
४	१३	यान्त	यन्ति
७	१	मधा	मेधा
७	१०	चिति:	चित्तिः
७	१३	र्मित्र	न्मित्र
७	१३	मेन	मेना
८	३	श्रात	श्राता
८	३	सोम	सोमा
८	६	श्रात	श्राता
८	६	सोम	सोमा
८	१०	मन	मना
८	१४	द्धा	द्धो
१०	४	ब्रचान्न	ब्रान्न
१२	१४	न्द्राभ्ये:	न्द्राभ्यः
१३	१४	तृस्या	तृभ्यः
१५	१३	दुर्गागाः	दुर्गायाः
१७	७	इन्द्	इन्द्र
१९	८	मार्ति	पर्ति
२०	७	वरं	वेरं
२३	६	ह्मन्	ब्रह्मन्
२६	७	ह्रस्तो	ह्रास्तो

पृष्ठ	पंक्ति	अशुद्धि	शुद्धि
२५	११	वायवे	वायव्ये
२८	१३	व्वालै	व्यालै
३२	१	मृत	मृतं
३४	१०	सदा	सुदा
३४	१०	चितिः	चित्तिः
३४	१४	ष्ठंवा	ष्ठया
३५	६	तया	त्वया
३६	१३	श्रृणीहि	श्रीणीहि
हव्याय त्वा - हव्ये सीद इत्यपि पाठः			
३९	१४	परिववर्ज इत्यपि	
४२	१३	मृ ो	मृगो
४६	४	सचे	सर्चा
४६	७	त्तत	त्तथ
४६	१०	ग्निः	ग्निर
५१	६	दत्तात्तेन	ददातु तेन

पृष्ठ	पंक्ति	अशुद्धि	शुद्धि
५२	८	चत्त	चत्ता
५४	१	पद्मकेसरं वालुकं (मुष्कबाला)	शंखपुष्पकं शंखाहोली
५५	१	शित्तति	शित्तते
५५	४	अग्नी	अग्नि
५७	७	सनु	सानु
५८	१	काशो	काश
६०	१२	अयमागात्	आयमगात्
६३	४	चितोति	चिनोति
६४	१०	बधिर	बदर
६६	८	उच्छ्रियान्	उ श्रेयान्
६७	१	प्राण	प्रण
७१	७	सुष्वप्सी	सुषुप्सी
७२	३	आणीस्थ इत्यपि	
७४	१४	विषय	विषये

३

पृष्ठ	पंक्ति	अशुद्धि	शुद्धि	पृष्ठ	पंक्ति	अशुद्धि	शुद्धि
७५	५	ब्राह्म	ब्रह्म	९९	१२	सोम	सोमा
७७	६	अं	अ	१००	२	,,	,,
७७	१०	हातु	होतु	१००	१०	छन्दोभ्य आतुर्होतृकायेत्याहु-तिद्वयं मनसा नानुमंत्रयेत्	
७९	७	भेषा	भैष				
८४	७	जूत	जूतो	१०४	६	गायत्रीं छन्दः प्रविशामीत्या-दिषु प्रायश्चेन हीनश्छकारः	
८६	१२	रक्षा	रक्षा				
८६	१३	बम्बा	बम्भा	१०६	४	सुमतिम	सुमतिर
८६	१४	घोस्याः	घोस्या ऽऽ	१०६	६	न्तमि	न्तमे
८७	१	सम्‌	संमृ	१०६	१२	चक्षु	अक्षु
८७	६	समिधि	समेधि	१०७	३	रुद्रायाः	रुद्राया
८७	८	बृहति	बृहते	१०८	५	सन्दृशे	सन्दृशि
८७	८	वेदसि	वेदसे	१०९	१३	आपो	अपो
९०	१२	आदित्या	अदित्या	११२	१३	सदे	सन्दे
९१	५	व्यचा	व्यचाः	११३	६	च्छिद्रं	छिद्रं
९२	६	वीये	वीतये	११४	५	वायुना	वयुना

पृष्ठ	पंक्ति	अशुद्धि	शुद्धि	पृष्ठ	पंक्ति	अशुद्धि	शुद्धि
११५	८	याण	यण	१४२	४	नाम	नामा · इत्यपि
११८	१४	दव	दैव	१४२	१०	रन्तु	रन्तु
१२२	१३	ष	षं	१४८	६	पर्कः ३	पर्कः
१२३	१०	न्ता ात	र्न्ताति	१५१	११	प्रत	पृत
१३८	६	अयमा	आयम	१५६	४	यद्दी	यद्दी
१४१	१२	सृजं	सिचामित्यपि	१५८	६	स्विष्टि	स्विष्ट
१४१	१४	श्वेता	श्वेता	१६३	६	औषजः	औशिजः

उपोद्घात के सूक्ष्माक्षरों का शुद्धि पत्र—

पृष्ठ	पंक्ति	अशुद्धि	शुद्धि	पृष्ठ	पंक्ति	अशुद्धि	शुद्धि
१	११	पुष्य	पुष्प	७	३	पुण्याह	पुण्याहे
१	१२	तान्नः	तान्तः	१०	१६	व्रतता	व्रता
२	१	मन्क्यो	मनूक्यो	१५	५	तद्वादो	तद्वोदा
३	१३	सवत	संवत्	१६	३	यदाः	वेदाः
५	१	निवृन्य	निवृत्य	२७	१०	गात्रजो	गोत्रजो
५	६	दसमे	दशमे	२८	८	रज्जुः	रज्जुः
६	१६	याति	याति तदापि				

ओ३म्

ब्राह्मदेयाप्रदानविधिः ॥

अथवा-प्रसिद्धितो

विवाहविधिः ॥

मातृकापूजन-तद्भवनविधि-कन्यासंस्कारादिविधिसहितः

संस्कर्तृसंगृहीतोपयुक्तैतद् गृह्यसूत्रार्थालङ्कृतो

राजकीयपाठशाला-भूतपूर्वमुख्याध्यापक-कल्लेत्युपाह्व-

पण्डितनाथरामशास्त्रिसंस्कृतः शोधितश्च ॥

सोऽयं

पण्डितमाधवराम-केशवरामाभ्यां श्रीनगरान्तर्वर्ति-

कोठीबागस्थितस्वकीयमार्कण्टायलमुद्रणालये

मुद्रितः प्रकाशितश्च ॥ विक्रमसंवत् १९९६

पृष्ठ	पंक्ति	अशुद्धम्	शुद्धम्
२०	६	त्वान्त्रि	त्वात्रि
२१	१५	स्वहा	स्वाहा
२२	१	स्वहा	स्वाहा
३६	११	मद्यो	नतु मद्यो
३६	१२	गृहे वा	गृहेऽपि
४४	१६	प्रह	प्राह
४६	१७	पवित्रण	पवित्रेण
५३	७	वत्तम्	वत्तमम्
५४	१०	द्विभ्योः	द्विभ्यो
६०	४	दयून्	द्यून्
६७	६	अमुष्या	आमुष्या
७१	१०	क्षुत्व	धुत्व
७४	१३	विंशी	विंशी
१००	४	ससदश्यान्	ससदश्या
१०१	११	नक्र	नक्र्
१०४	१२	दत्वाय	दत्वाया
१०६	७	श्वराम्यां	श्वश्वां
१०६	४	ष्यायुष्यं	ष्यायुषं

॥ ओ३म् ॥

॥ राधाकृष्णौ मङ्गलं मे भवेताम् ॥

अथ

कन्यासंस्कारविधिः ॥

अश्मचूर्णेन ग्रहमण्डलमुल्लिख्य। ऐशान्यां देवताकुम्भं तत्क्षेत्रेशंच संस्थाप्य दक्षे क्षेत्रेशद्वयं च न्यस्य। वषट्ते विष्ण० इति मंत्रान्तं कलशपूजां कृत्वा। प्रधानानि। ब्रह्मा देवानां० ॥ ब्राह्म्यै नमः माहेश्वर्यै कौमार्यै वैष्णव्यै वाराह्यै नारसिंह्यै ऐन्द्र्यै नमः ॥ ७ ॥ गौरीर्मिमाय०। गौर्यै नमः पद्मायै शच्यै मेधायै सावित्र्यै विजयायै जयायै नमः ॥ ७ ॥ दिव्यं सुपर्णं०।

देवसेनायै नमः स्वधायै स्वाहायै मातृभ्यः लोकमातृभ्यः धृत्यै तुष्ट्यै नमः ॥ ७ ॥ जातवेदसे० । पुष्ट्यै नमः आत्मदेवतायै नमः ॥ २ ॥ ये के च ज्मा० । ललितायै नमः उमायै गौर्यै अम्बिकायै सलिलाश्रयायै भगायै भगाद्यै ॥ ७ ॥ राकामहं० । अनुमत्यै नमः राकायै सिनीवाल्यै कुह्वै धात्र्यै सर्वेश्वर्यै अङ्गेश्वर्यै नमः ॥ ७ ॥ देवताकुम्भे ॥ यां विश्वचक्षु० । एकान्तवासिन्यै नमः ॥ क्षेत्रेशदेवतापात्रे । क्षेत्रस्य पतिना० । गणानां त्वा० । दुर्गाक्षेत्रगणेश्वरदेवताभ्यो नमः ॥ (कन्यासंस्कारविषये) ये के च ज्मा० ॥ सीमन्तकरणसटोद्धरणयागदेवताभ्यो नमः ॥ इन्द्राणीमासु नारिषु सुपत्नीमहमश्रवम् । नह्यस्या अपरश्चन जरसामरते पतिर्विश्वस्मादिन्द्र उत्तरः ॥ इन्द्राणीयागदेवताभ्यो नमः ॥ इन्द्राय नमः इन्द्राण्यै कामाय भगाय ह्रियै श्रियै लक्ष्म्यै पुष्ट्यै 'विश्वावसवे गन्धर्वराजाय, गोदानदेवताभ्यः नमः ॥ ६ ॥ अलक्ष्मीनिर्णोदनदेवताभ्यः नमः ॥ अर्यम्णे प्रजापतये हविष्यकल्पदेव-

ताभ्यः नमः ॥ इन्द्राण्यै नमः वरुणान्यै गन्धर्वाण्यै उदकान्यै 'अग्नये जीवपुत्राय' प्रजापतये महाराजाय स्कन्दाय अर्यम्णे भगाय प्रजानकाय हविष्यपुण्याहदेवताभ्यः नमः ॥ ११॥

(कन्याया विवाहात्पूर्वरात्रिकर्तव्ययागे) अग्नये नमः सोमाय मित्राय वरुणाय इन्द्राय उदकाय भगाय अर्यम्णे पूष्णे त्वष्ट्रे राज्ञे प्रजापतये नमः ॥ १२ ॥

(वरस्य विवाहपूर्वरात्रिकर्तव्ययागे) अग्नये नमः सोमाय मित्राय वरुणाय इन्द्राय उदकाय भगाय अर्यम्णे पूष्णे त्वष्ट्रे राज्ञे प्रजापतये कुम्भाय वैश्रवणाय ईशानाय ॥ १५ ॥ अग्निनारयिमश्नवत्० । प्रजापतेनहि० । पूर्वेद्युः कर्मदेवताभ्यो नमः ॥ अग्निना रयिमश्नवत्० । प्रजापते नहि० । प्रास्थानिकयाग देवताभ्यः नमः । (जातकर्मादिविषये) हिरण्यगर्भः०। संवत्सरस्य प्रतिमां ये त्वा रात्र्युपासते । तेषामायुष्मतीं प्रजां रायस्पोषेण संसृज नमः । काय नमः । कस्मै नमः । कतमस्मै नमः

प्रजापतये नमः । प्रजापते इतिद्वाभ्याम् । प्रजापते नहि त्वदन्यः०। असावमुष्य पुत्रोऽमुष्यासौ पुत्रो वयं स्याम पतयो रयीणाम् नमः। जातकरणदेवताभ्यो नमः ॥ कयानश्चित्र० । कस्त्वा सत्यो० । कया तच्छृण्वे शच्या शचिष्ठो यया कृणोति मुहु: काचिदृष्वः । पुरो दाशुषे विचयिष्ठो अंहोथादधाति द्रविणं जनित्रे नमः ॥ प्रजापतये नमः । प्रजापते नहि० । असावमुष्य पुत्रो० ॥ काय प्रजापतये नामकरणदेवताभ्यो नमः ॥

(जातकरणदेवताभ्यः, काय प्रजापतये नामकरणदेवताभ्यः इति कलशपूजायां योज्यं । यदि एतत्संस्कारद्वयमपि कर्तव्यं स्यात्) ॥ तद्विष्णोः० वासुदेवादिभ्यो विष्णुपञ्चायतनदेवताभ्यः नमः ॥ यतइन्द्र भयामहे० ॥ इन्द्रापर्वता० ॥ ऐन्द्राग्नं० तावत् । सावित्राणीतिमधुपर्कः । महागणपतये इत्यादीनि सर्वाणि नामानि ॐ नमो नैवेद्यं निवेदयामि नमः ॥ हिरण्यगर्भः० ॥ ८ ॥ अर्चन्तस्त्वा० ॥

(यजमानमानीय) आसनशोधनं० ॥ अ नाभौ०।

तीर्थे स्नेयं० । वसो पवित्रं० । आशीर्वादं । कंकणबन्धनं । परमात्मने० । स्वप्रकाशो० । वनस्पति० । नमो धर्म० । यत्रास्ति माता० अथ तावत् महागणपतये० पितृगणदेवताभ्यः । ब्राह्म्यै माहेश्वर्यै कौमार्यै वैष्णव्यै वाराह्यै नारसिंह्यै ऐन्द्र्यै गौर्यै पद्मायै शच्यै मेधायै सावित्र्यै विजयायै जयायै देवसेनायै स्वधायै स्वाहायै मातृभ्यः लोकमातृभ्यः धृत्यै तुष्ट्यै पुष्ट्यै आत्मदेवतायै ललितायै उमायै गौर्यै अम्बिकायै सलिलाश्रयायै भगाह्यै भगाद्यै अनुमत्यै राकायै सिनीवाल्यै कुह्वै धात्र्यै सर्वेश्वर्यै अन्नेश्वर्यै एकान्तवासिन्यै मातृमण्डलदेवताभ्यः दुर्गाक्षेत्रगणेश्वरदेवताभ्यः ॥ सीमन्तकरणसटोद्धरणदेवताभ्यः । इन्द्राणीयागदेवताभ्यः । इन्द्राय इन्द्राण्यै कामाय भगाय ह्रियै श्रियै लक्ष्म्यै पुष्ट्यै 'विश्वावसवे गन्धर्वराजाय, गोदानदेवताभ्यः। अलक्ष्मीनिर्णोदनदेवताभ्यः। अर्यम्णे प्रजापतये हविष्यकल्पदेवताभ्यः । इन्द्राण्यै वरुणान्यै गन्धर्वाण्यै उदकान्यै 'अग्नये-जीवपुत्राय, प्रजापतये महाराजाय

स्कन्दाय अर्यम्णे भगाय प्रजानकाय हविष्यपुण्याहदेवताभ्यः । अग्नये सोमाय मित्राय वरुणाय इन्द्राय उदकाय भगाय अर्यम्णे पूष्णे त्वष्ट्रे राज्ञे प्रजापतये । कन्यायाः विवाहपूर्वरात्रिकर्तव्ययागदेवताभ्यः ॥ अग्नये सोमाय मित्राय वरुणाय इन्द्राय उदकाय भगाय अर्यम्णे पूष्णे त्वष्ट्रे राज्ञे प्रजापतये कुम्भाय वैश्रवणाय ईशानाय । वरस्य विवाहपूर्वरात्रिकर्तव्ययागदेवताभ्यः ॥ अग्नये पुष्टिपतये प्रजापतये पूर्वेद्युःकर्मदेवताभ्यः ॥ अग्नये पुष्टिपतये प्रजापतये प्रास्थानिकयागदेवताभ्यः ॥ वासुदेवाय० विष्णुपञ्चायतनदेवताभ्यः ॥ इन्द्राय वज्रहस्ताय० ॥ हेरुकादिभ्यो बटुकादिभ्यः धूपो नमः दीपो नमः ॥ अपसव्येन । समस्तमातापितृभ्यः० । सव्येन । गायत्र्यै नमः ॐभूर्भुवःस्वः० ३ ॥ सुभगायै विद्महे० ३ ॥ अद्य तावत् । महागणपतेः० ॥ ब्राह्म्याः माहेश्वर्याः कौमार्याः वैष्णव्याः वाराह्याः नारसिंह्याः ऐन्द्र्याः गौर्याः पद्मायाः शच्याः मेधायाः सावित्र्याः विजयायाः

जयायाः देवसेनायाः स्वधायाः स्वाहायाः मातॄणां लोकमातॄणां धृतेः तुष्टेः पुष्टेः आत्मदेवतायाः ललितायाः उमायाः गौर्याः अम्बिकायाः सलिलाश्रयायाः भगाख्याः भगाढ्याः अनुमत्याः राकायाः सिनीवाल्याः कुह्वाः धाम्याः सर्वेश्वर्याः अग्नेश्वर्याः एकान्तवासिन्याः मातृमण्डलदेवतानां दुर्गाक्षेत्रगणेश्वरदेवतानां ॥ सीमन्तकरण-सटोद्धरणदेवतानां इन्द्राणियागदेवतानां इन्द्रस्य इन्द्राण्याः कामस्य भगस्य ह्रियाः श्रियाः लक्ष्म्याः पुष्ट्याः 'विश्वावसोः-गन्धर्वराजस्य' गोदानदेवतानां अलक्ष्मीनिर्णोदनदेवतानां अर्यम्णः प्रजापतेः हविष्यकल्पदेवतानां इन्द्राण्याः वरुणान्याः गन्धर्वाण्याः उदकान्याः 'अग्नेः-जीवपुत्रस्य' प्रजापतेः महाराजस्य स्कन्दस्य अर्यम्णः भगस्य प्रजानकस्य हविष्यपुण्याहदेवतानां अग्नेः सोमस्य मित्रस्य वरुणस्य इंद्रस्य उदकस्य भगस्य अर्यम्णः पूष्णः त्वष्टुः राज्ञः प्रजापतेः । कन्याया विवाहपूर्वरात्रियागदेवतानां । अग्नेः सोमस्य मित्रस्य वरुणस्य इन्द्रस्य

उदकस्य भगस्य अर्यम्णः पूष्णः त्वष्टुः राज्ञः प्रजापतेः कुम्भस्य वैश्रवणस्य ईशानस्य । वरस्य विवाहपूर्वरात्रियागदेवतानां ॥ अग्नेः पुष्टिपतेः प्रजापतेः पूर्वेद्युःकर्मदेवतानाम् । अग्नेः पुष्टिपतेः प्रजापतेः प्रास्थानिकयागदेवतानां वासुदेवस्य० विष्णुपञ्चायतनदेवतानां । इन्द्रस्य वज्रहस्तस्य० हेरुकादीनां० । आत्मनो वाचनः० मातृकादेवीसन्तोषणार्थमर्चामहं करिष्ये ओंकुरुष्व ॥ महागणपतेरिदमासनम् नमः इत्यादि ॥

महागणपत्यै० युष्मान् पूजयामि ओंपूजय । महागणपतिं० ब्राह्मीं माहेश्वरीं कौमारीं वैष्णवीं वाराहीं नारसिंहीं ऐन्द्रीं गौरीं पद्मां शचीं मेधां सावित्रीं विजयां जयां देवसेनां स्वधां स्वाहां मातः लोकमातः धृतिं तुष्टिं पुष्टिं आत्मदेवतां ललितां उमां गौरीं अम्बिकां सलिलाश्रयां भगाहीं भगाख्यीं अनुमतिं राकां सिनीवालीं कुहूँ धात्रीं सर्वेश्वरीं अखेश्वरीं एकान्तवासिनीं मातृमण्डलदेवताः दुर्गाक्षेत्रगणेश्वरदेवताः ॥ सीमन्तकरण सटोद्धरण-

देवताः इन्द्राणीयागदेवताः इन्द्रं इन्द्राणीं कामं भगं ह्रियं श्रियं लक्ष्मीं पुष्टिं 'विश्वावसुं-गन्धर्वराजं' गोदानदेवताः अलक्ष्मीनिर्णोदनदेवताः अर्यमणं प्रजापतिं हविष्यकल्पदेवताः इन्द्राणीं वरुणानीं गन्धर्वाणीं उदकानीं 'अग्निं-जीवपुत्रं' प्रजापतिं महाराजं स्कन्दं अर्यमणं भगं प्रजानकं हविष्यपुण्याहदेवताः अग्निं सोमं मित्रं वरुणं इन्द्रं उदकं भगं अर्यमणं पूषणं त्वष्टारं राजानं प्रजापतिं अग्निं सोमं मित्रं वरुणं इन्द्रं उदकं भगं अर्यमणं पूषणं त्वष्टारं राजानं प्रजापतिम् कुम्भं वैश्रवणं ईशानं अग्निं पुष्टिपतिं प्रजापतिं पूर्वेद्युःकर्मदेवताः। अग्निं पुष्टिपतिं प्रजापतिं प्रास्थानिकयागदेवताः वासुदेवं० विष्णुपश्चायतनदेवताः इन्द्रं वज्रहस्तं० हेरुकादीन्० एता देवता आवाहयिष्यामि ॐ आवाहय। पाद्यार्थे उदकं नमः। शन्नो देवी०। लाजाश्च०। महागणपतये पाद्यं नमः सर्वाणि नामानि॥ पुनः शन्नो देवी०। आपः क्षीरं०। महागणपते० ब्राह्मि माहेश्वरि कौमारि वैष्णवि वाराहि नार-

सिद्धि ऐन्द्रि गौरि पद्मे शचि मेधे सावित्रि विजये जये देवसेने स्वधे स्वाहे मातरः लोकमातरः धृते तुष्टे पुष्टे आत्मदेवते ललिते उमे गौरि अम्बिके सलिलाश्रये भगाहि भगाद्वि अनुमते राके सिनीवालि कुहु धात्रि सर्वेश्वरि अग्नेश्वरि एकान्तवासिनि मातृमण्डलदेवताः दुर्गाक्षेत्रगणेश्वरदेवताः सीमन्तकरणसटोद्धरणदेवताः इन्द्राणीयागदेवताः इन्द्र इन्द्राणि काम भग ह्रीः श्रीः लक्ष्मि पुष्टे 'विश्वावसो—गन्धर्वराज' गोदानदेवताः अलक्ष्मीनिर्णोदनदेवताः अर्यमन् प्रजापते हविष्यकल्पदेवताः। इन्द्राणि वरुणानि गन्धर्वाणि उदकाणि 'अग्ने—जीवपुत्र' प्रजापते महाराज स्कन्द अर्यमन् भग प्रजानक हविष्यपुण्याहदेवताः। अग्ने सोम मित्र वरुण इन्द्र उदक भग अर्यमन् पूषन् त्वष्टः राजन् प्रजापते कन्यायाः पूर्वरात्रियागदेवताः। अग्ने सोम मित्र वरुण इन्द्र उदक भग अर्यमन् पूषन् त्वष्टः राजन् प्रजापते कुम्भ वैश्रवण ईशान वरस्य पूर्वरात्रियागदेवताः। अग्ने पुष्टिपते

प्रजापते पूर्वेद्युःकर्मदेवताः । अग्ने पुष्टिपते प्रजापते प्रास्थानिकयागदेवताः । वासुदेव० विष्णुपञ्चायतनदेवताः ॥ इन्द्र वज्रहस्त० । हेरुकादयः० । इदं वोऽर्घ्यं नमः ॥

महागणपतये समालभनं गन्धो नमः ॥ एवं महागणपतये० । अर्घो नमः पुष्पं नमः ॥ एवं धूपदीपादि सर्वं दक्षिणान्तम् ॥ तद्विष्णोः० । जातवेदसे० इति च कलशे पुष्पाणि ॥

अथाग्निकर्म ॥ पात्रं तिला० । परिसमुह्य० पर्युक्ष्य परिषिच्य परिस्तीर्य । आदौ पञ्च० । अग्नये समनमत्० ८ ॥ उत्तरतः संस्तीर्णे० । सावित्राणि महागणपतये ब्राह्म्यै० (इत्यादीनि सर्वनामानि पूर्वोक्तानि । नव कन्यासंस्कारनामानि) वासुदेवाय । इन्द्राय वज्रहस्ताय० । हेरुकादिभ्यो वटुकादिभ्यः जुष्टं निर्वपामि । एवं प्रोक्षामि । पृश्नयाः पयोसि० । आज्यदर्शनं । महागणपतये ब्राह्म्यै इत्यादि नामानि इदमाज्यमर्प० ॥

आज्यभागान्तं । गणपतिध्यानं । निषुसीदेत्यन्नहोमं वषट्ने विष्ण इतिमन्त्रान्तं विधाय प्रधानाहुतीर्दद्यात् । ब्रह्मादेवानां० ब्राह्मयै स्वाहेत्यादि ७ ॥ गौरीर्मिमाय० गौर्यैस्वाहेत्यादि ७ ॥ दिव्यंसुपर्णं० देवसेनायै इत्यादि ७ ॥ जातवेदसे० पुष्ट्यै आत्मदेवतायै २ ॥ ये के च ज्मा० ललितायै इत्यादि ७ ॥ राकामहं० अनुमत्यै ७ ॥ यो विश्वचक्षुः० एकान्तवासिन्यै स्वाहेति १ ॥ क्षेत्रस्य पतिना० गणानां त्वा० दुर्गाक्षेत्रगणेश्वरदेवताभ्यः स्वाहा ॥ तद्विष्णोः० वासुदेवाय स्वाहेत्यादि । यत इन्द्र० । इन्द्रापर्वता० ऐन्द्राग्नं० ॥

(यजमानपत्नीमानीय मातृकापूजनं कारयेत् यथा)

तीर्थे स्नेयं० । ब्रसोपवित्रं० आशीर्वादं । परमात्मने० । यत्रास्ति माता० ॥ अथ तावत् महागणपतये आहूय्ये० धूपदीपसंकल्पात्० ॥ [गणेशार्थं मृत्पिण्डमूर्तिं संस्थाप्य । आद्याः पञ्च घृतैः प्रोक्ताः मधुमांसान्वितं द्वयम् । दधिक्राव्णेति मन्त्रेण वर्तयेद्रक्तगोलकान् । आनो भद्रेति सूक्तेन स्थापयेदन्नगोलकान् ॥ आनोभद्रेति पठि-

स्वाऽनुमत्यै नमः ७ (इत्येवं सप्त) पात्रान्तरे तु तदन्नं नैवेद्यार्थं तु स्थापयेत् ॥ ब्राह्म्याद्याः सप्ताङ्कोटेषु घृतधारासु सप्त च । गौर्याद्या, देवसेनाद्याः शिरोवस्त्रे विमिश्रिते । पुष्ट्यात्मदेवते स्वस्मिंश्चलिताद्याश्च कुम्भके भक्तपिण्डेष्वनुमत्याद्याश्च सप्ताथ कुम्भके । एकान्तवासिनीत्येवं मातृकार्चनभूमिकाः ॥ एवं संस्थाप्य]

संत्वः सृजामि० । अश्विनोः० । गायत्र्यै नमः ओंभूर्भुवः स्वः० ३ ॥ सुभगायै विद्महे० ३ ॥ महागणपतेः द्वारदेवतानां । ब्राह्म्याः० । मातृमण्डलदेवतानां आत्मनो० मातृकादेवीसन्तोषणार्थं अर्चामहं करिष्ये० । दक्षिणान्तं कृत्वा । भद्रं पश्येमेति प्रदक्षिणत्रयं च कृत्वाज्यदर्शनं कुर्यात् ॥ पुनर्यजमानमानीय । (पशूपहारमनु ।) पूर्ववत् आज्यहोमं तर्पणं च, कुर्यात् ॥

ततः ओंकारो यस्येति यवातिलहोमं तर्पणं पुरुषसूक्तं लक्ष्मीसूक्तं रुद्रमन्त्रं च सतर्पणं विधाय कन्यायाः वरस्य वा स्नानं कार्यम् ॥ ततः स्वस्तिकरेखायां पीठिकां निधाय पूजयेत् ॥

तीर्थे स्नेयं० । इत्यादि० । यत्रास्ति माता० ॥ धात्र्यै विधात्र्यै देह-
ल्यै विश्वशक्त्यै मायाशक्त्यै [अथवा] पृथिव्यै अग्नये ऋग्वेदाय
ब्रह्मणे छन्दोभ्यः, अन्तरिक्षाय वायवे यजुर्वेदाय ब्रह्मणे छ० ,
दिवे सूर्याय सामवेदाय ब्रह्मणे छ० दिग्भ्यः चन्द्रमसे अथर्ववे-
दाय ब्रह्मणे छन्दोभ्यः धूपदीपसंकल्पात् सिद्धिरस्तु धूपो नमः
दीपो नमः ॥ संव्वः सृजामि० । अश्विनोः० । ओंगायत्र्यै नमः
ओंभूर्भुवःस्वः० ३ ॥ अद्य तावत्० । धात्र्याः विधात्र्याः देहल्याः
विश्वशक्त्याः मायाशक्त्याः (अथवा) पृथिव्याः अग्नेः ऋग्वेदस्य
ब्रह्मणः छन्दसां अन्तरिक्षस्य वायोः यजुर्वेदस्य ब्रह्मणः छन्दसां
दिवः सूर्यस्य सामवेदस्य ब्रह्मणः छन्दसां दिशां चन्द्रमसः अ-
थर्ववेदस्य ब्रह्मणः छन्दसां आत्मनो० अर्चामहं करिष्ये । एवं
आसनादि सर्वं दक्षिणान्तं ॥ ततः भद्रपीठोपविष्टयोः कन्याच-
तुष्कगृहीतकोणवस्त्रान्तरिते कन्याया वरस्य वा शिरसि सर्वौष-
धिजातीफलयुतां जलधारां क्षिपेत् ॥ सर्वगन्धैः फलोत्तरैः सशि-

रस्कं स्नापयित्वाऽहतेन वाससा प्रच्छाद्य । सावीर्हि देव० ॥ ॐगायत्र्यै नमः ॐभूर्भुवः स्वः० ३ । पूर्ववत् भद्रपीठाच्छिद्रम् ॥ स्नापयित्वाग्निमण्डपमानीय कन्यां वरं वा । या आपो दिव्याः०। तिलकं । आज्यदर्शनं । देवीसूक्तं । रक्षोघ्नमन्त्रं च विधाय । स्तुतिध्यादि । नैवेद्यं सावित्राणि महागणपतये ब्राह्मथे इत्यादि० ओं नमो नैवेद्यं निवेदयामि नमः ॥ तत्रसमाप्तिः ॥ विमुच्य । नयामि ॥ (कन्यासंस्काराभावेऽत्रैव पूर्णादौ ब्राह्मणपूजनं पूर्णान्ते वैश्वदेवादि नान्दीमुखादि च कर्तव्यमिति) ॥ इति मातृकायागविधिः ॥

अथ कन्यासंस्कारः ॥ आदौ सीमन्तकरणसटोद्धरणयागः । १ । परिसमुह्य पर्युक्ष्य परिषिच्य ॥ परिस्तीर्य ॥ आदौ पश्च० ॥ न निर्वापः । पृश्न्याः पयोसि । आज्यदर्शनम् । आत्मनो० सीमन्तकरणसटोद्धरणयागदेवताभ्यः इदमाज्यमर्पयामिनमः ॥ आज्यभागान्ते (पश्चादग्नेर्दर्भेषु प्राङासीनायाः सर्वान्केशान्प्रमुच्य

प्रसाधयते) ॥ यं सीमन्तं कङ्कतस्ते चकार यद्वा क्षुरः परिवर्जे वपंस्ते । स्त्रीषु रूपमाश्विनौ तन्निधत्तं पौंस्नेनेमं संसृजतं वीर्येण ॥ इन्द्राणी चक्रे कङ्कतं ससीमन्तं विसर्पतु । पुनः पतिभ्यो जायन्दा अग्ने प्रजया सह ॥ पुनः पत्नीमग्निरदादाऽऽयुषा सह वर्चसा । दीर्घायुरस्या यः पतिर्जीवाति शरदः शतम् इति ॥ [त्रिःश्वेतया शलल्या शमीशाखया सपलाशया वा सीमन्तं विचिनोति यास्ते राक इति ।] यास्ते राके सुमतयः सुपेशसो याभिर्ददासि दाशुषे वसूनि । ताभिर्नो अद्य सुमना उपागहि सहस्रपोषं सुभगे रराणा ॥ [नीललोहितेन सूत्रेण केशान्ग्रन्थयेत् ॥] नीललोहितं भवति कृत्यासक्तिर्व्यज्यते । एधन्ते अस्या ज्ञातयः पतिर्बन्धेषु बध्यताम् ॥ या आपो दिव्याः० । ये के च ज्मेत्याज्यप्रधानम् । ऋतुतिथ्यादितंत्रसमाप्तिः ॥ विमुच्य नयामि ॥ इति सीमन्तकरणसटोद्धरणम् ॥ १ ॥

अथ इन्द्राणीयागः ॥ परिसमुह्य पर्युक्ष्य परिषिच्य ॥ परिस्तीर्य ॥ आदौ पञ्च० । न निर्वापः । पृश्नथाः पयोसि० आत्मनो० इन्द्राणीयागदेवताभ्यः इदमाज्यमर्पयामि नमः ॥ आज्यभागान्ते । या आपो दिव्याः० ॥ आज्यप्रधानं । इन्द्राणीमासु नारिषु सुपत्नीमहमश्रवम् । न ह्यस्या अपरञ्चन जरसा मरते पतिर्विश्वस्मादिन्द्र उत्तरः ॥ ऋतुतिथ्यादितंत्रसमाप्तिः ॥ इति इन्द्राणीयागः ॥ २ ॥

—:*:*:—

अथ गोदानम् ॥ परिसमुह्य पर्युक्ष्य परिषिच्य ॥ परिस्तीर्य ॥ आदौ पञ्च० । उत्तरतः० ॥ इन्द्राय इन्द्राण्यै कामाय भगाय ह्रियै श्रियै लक्ष्म्यै पुष्ट्यै 'विश्वावसवे–गन्धर्वराजाय' (गोदानदेवताभ्यः) ॥ ९ ॥ जुष्टं निर्वपामि । एवं प्रोक्षामि । आज्यदर्शनम् । आत्मनो० इन्द्रायेत्यादिभ्यः९ इदमाज्यमर्प० ॥ आज्यभागान्ते । (ततः पात्रे दातव्यमलङ्करणादि अन्यदपि सर्वं च ए-

कत्रीकृत्य यजमानः हिरण्यवर्णाः शुचयः० १ । यासां देवा० २ । यासां राजा० ३ । शिवेन मा० ४ । इति, आपो हिष्ठाः० ३ । इममग्न आयुषे० । शन्नो देवी ० । इति चाभिषिच्य कन्यायै संकल्पपूर्वकं दद्यात् ॥) सावित्राणि० अद्य तावत् आत्मनो० ऋणत्रयविमोचनार्थमिमानि सूर्य सोमाग्नि प्रजापति मरुद्गणदैवतानि यौतकदेयानि सौवर्ण राजतालङ्करणानि, कर्ण कण्ठ नासा वेणीभूषण ताटङ्क हार कटक कंकण केयूराङ्गुलीयकादीनि, रूप्यकांस्यरीतिधातुमयानि कंस कमण्डलु कर्करी भोजनपानपात्रादीनि, नानाविधानि कौशेय राङ्कवादीनि वस्त्राणि, अन्यानि उपकरणजातानि च, यथाशक्ति कन्यायै ददानि ३, (स्वस्था भव सुखिनी भव पुण्यवती भव यशस्विनी भव ॥) प्रतिगृह्णामीति स्वस्त्यस्तु ते इति च कन्या प्रतिब्रूयात् ॥ क इदं कस्मै अदात्, कामः कामाय, कामो दाता, कामः प्रतिग्रहीता, कामः समुद्रमाविशत्, कामेन त्वा प्रतिगृह्णामि, कामैतत्तेऽस्तु ॥

(ततो गोदानिकैर्मन्त्रैः कन्यामलंकृत्य चतुष्पादे भद्रपीठे गुरोः दक्षिणतः प्राङ्मासीनामविधवाः स्त्रियः चतस्रः माता पिता गुरुश्च सप्तमस्तां सहस्रच्छिद्रेण पवित्रेण स्नापयित्वाऽहतेन वाससा प्रच्छाद्य स्थालीपाकस्य जुहोति ॥) (सर्वगन्धमिश्रितैर्दक्षिणपाणिस्थैर्वारिपूर्णकलशै र्या आपो दिव्या इति द्वाभ्यामेना व्याघ्रमिति च स्नानम्) या आपो दिव्याः पयसा सम्बभूवुर्या अन्तरिक्ष्या उत पार्थिवासः । तासां त्वा सर्वासां रुचाभिषिञ्चामि वर्चसा ॥ १ ॥ अभि त्वा वर्चसासिचं यज्ञेन पयसा सह । यथासो मित्रवर्धनस्तथा त्वा सविताकरत् ॥ २ ॥ एना व्याघ्रं परिषस्वजानं सिंहं हिन्वन्ति महते धनाय । मर्मृज्यन्ते द्वीपिनमप्स्वन्तरक्षणं सुत्वस्तस्थिवांसम् ॥ १ ॥ स्थालीपाकेन प्रधानानि— तेजोसि० ॥ इन्द्राय स्वाहा, इन्द्राण्यै, कामाय, भगाय, ह्रियै, श्रियै, लक्ष्म्यै, पुष्ट्यै, विश्वावसवे-गन्धर्वराजाय स्वाहा,।६। (प्रधानानन्तरं वादित्राणि गन्धोदकेन समुपलिप्य कन्या पूर्वं वाद-

यते) ॥ (स्वनं) शुनं वद दुन्दुभे सुप्रजस्त्वाय गोमुख । प्रक्रीडयन्तु कन्याः सुमनस्यमानाः सहेन्द्राण्या कृतमङ्गलाः ॥ तत ऋतुतिथ्यादितन्त्रसमाप्तिः ॥ विमुच्य ३ नयामि ॥ इति गोदानम् ॥ ३ ॥

—:※:※:※:—

अथालक्ष्मीनिर्णोदनं ॥ त्रिकाहोमपर्यायम् । परिसमुह्य पर्युक्ष्य परिषिच्य ॥ चातुष्कोष्ठैः स्तरैः परिस्तीर्य ॥ आज्यमुत्पूय पृश्नयाः पय इति ॥ आज्यदर्शनम् । आत्मनो० अलक्ष्मीनिर्णोदनदेवताभ्य इदमाज्यं० ॥ यैः कैश्चिद्दर्भाग्रैः स्रुवं संमृज्य अत्र होमस्यानाम्नातत्वात्त्रिकादिभिर्होमः ॥ (स्रुवेण) तव श्रिये व्यजिहीत पर्वतो गवां गोत्रमुदसृजो यदङ्गिरः । इन्द्रेण युजा तमसा परीवृतं बृहस्पते निरपामौब्जो अर्णवम् ॥ १ ॥ बृहस्पते अति यदर्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु । यद्दीदयच्छवसर्तप्रजात तदस्मासु द्रविणं धेहि चित्रम् ॥ २ ॥ बृहस्पतिः समजयद्वसूनि महोव्रजान्गोमतो देव एषः । अपः सिषासन्त्स्वरप्रतीतो बृहस्प-

तिर्हन्त्यमित्रमर्कैः ॥ ३ ॥ यमो दाधार पृथिवीं यमो द्यामुत सूर्यम् । यमाय सर्वमित्तस्थे यत्प्राणद्वायुरक्षितम् ॥ ४ ॥ यथा पञ्च यथा षड्यथा पञ्च दशर्षयः । यमं यो विद्यात्स ब्रूयाद्यथैकर्षिर्विजानते ॥ ५ ॥ त्रिकद्रुकेभिः पतति षडुर्वीरेकमिद्बृहत् । गायत्री त्रिष्टुप्छन्दांसि सर्वा ता यम आहिता ॥ ६ ॥ मृळा नो रुद्रोत नो मयस्कृधि क्षयद्वीराय नमसा विधेम ते । यच्छं च योश्च मनुरायेजे पिता तदश्याम तव रुद्र प्रणीतिषु ॥ ७ ॥ अश्याम ते सुमतिं देव यज्यया क्षयद्वीरस्य तव रुद्र मीढ्वः । सुम्नायन्निद्विशो अस्माकमा चरा रिष्टवीरा जुहवाम ते हविः ॥ ८ ॥ त्वेषं वयं रुद्रं यज्ञसाधनं वङ्कुं कविमवसे नि ह्वयामहे । आरे अस्मद्दैव्यं हेळो अस्यतु सुमतिमिद्वयमस्या वृणीमहे ॥ ९ ॥ अवते हेळो० ॥ १० ॥ उदुत्तमं वरुण० ॥ ११ ॥ इमं मे वरुण० ॥ १२ ॥ तत्त्वायामि० ॥ १३ ॥ ओंभूर्लोकाय स्वाहा ॥ १४ ॥ ओंभुवर्लोकाय स्वहा ॥ १५ ॥ ओंस्वर्लोकाय स्वाहा ॥ १६ ॥ ओंभूर्भुवः स्वर्लो-

काय स्वहा ॥ १७ ॥ अग्निर्मूर्धा० ॥ १८ ॥ उभा वामिन्द्राग्नी० ॥१९॥ अयमिह० ॥ २० ॥ अयं ते योनि० ॥ २१ स्तोमो देवानां । उप प्रयन्तो० ॥ २२ ॥ अस्य प्रत्ना० ॥ २३ ॥ अरुणेः । कदाचनस्त-री० ॥ २४ ॥ (आज्यदर्शनस्य अखोटेन सहिताहुतिः) । परि ते दूळभो० ॥ २५ ॥ (यज्ञियस्य वृक्षस्य प्रांगायतां शाखां सूत्र-तन्तुना प्रच्छाद्य सावित्रेण कन्यायै प्रयच्छति गुरुः ॥) देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रयच्छामीति कन्यायै प्रददाति गुरुः ॥ (ततो गृहीतशाखां कन्यां मंत्रयते गु-रुः ॥) या तेऽलक्ष्मीर्मातृमयी पितृमयी संक्रामणी सहजा वापि काचित् । तां तिष्येण सह देवतया निर्भजामि निर्णुदामि सा द्विषन्तं गच्छतु तिष्यबृहस्पतिभ्यां नमो नम इति ॥ (तस्या उ त्सर्गः स्थावरोदके शुचौ वा देशे देवतायतने) ॥ विमुच्य न-यामि ॥ इत्यलक्ष्मीनिर्णोदनम् ॥ ४ ॥

—::❀::—

अथ हविष्यकल्पः ॥ परिसमुह्य पर्युक्ष्य परिषिच्य ॥ परिस्तीर्य ॥ अद्रौ पञ्च० । उत्तरतः० ॥ अर्यम्णे जुष्टं निर्वपामि । प्रजापतये जुष्टं निर्वपामि । एवं प्रोक्षामि । आज्यदर्शनं । आत्मनो० अर्यम्णे प्रजापतये (हविष्यकल्पदेवताभ्यः) इदमाज्यमर्प० ॥ आज्यभागान्ते । या आपोदिव्याः० ॥ प्रधानं । अर्यम्णे स्वाहा (इति दक्षिणे) प्रजापतये स्वाहा (इत्युत्तरे) ॥ प्रधानानन्तरं कुंकुमचन्दनादिसुगन्धद्रव्यसहिताः स्रुवेणाज्याहुतीः सप्तदश जुहुयात् । अग्नये स्वाहा । सोमाय । वरुणाय । मित्राय । इन्द्राय । बृहस्पतये । स्कन्दाय । रुद्राय । वात्सीपुत्राय । भगाय । भगनक्षत्रेभ्यः । काल्यै । षष्ठ्यै । भद्रकाल्यै । पूष्णे । त्वष्ट्रे । महिषिकायै स्वाहा ॥ १७ ॥ ऋतुतिथ्यादितंत्रसमाप्तिः ॥

इति हविष्यकल्पः ॥ ५ ॥

—:※:※:—

अथ हविष्यपुण्याहः ॥ परिसमुह्य पर्युक्ष्य परिषिच्य ॥

परिस्तीर्य ॥ आदौ पञ्च० ॥ उत्तरतः० ॥ इन्द्राण्यै, वरुणान्यै, गन्धर्वाण्यै, उदकान्यै, अग्नये-जीवपुत्राय, प्रजापतये, महाराजाय, स्कन्दाय, अर्यम्णे, भगाय, प्रजानकाय ११, (हविष्यपुण्याहदेवताभ्यः) जुष्टं निर्वपामि ॥ एवं प्रोक्षामि ॥ आज्यदर्शनम् । आत्मनो० इन्द्राण्यै ॥ ११ ॥ इदमाज्यमर्प० ॥ आज्यभागान्ते । या आपो दिव्याः० । प्रधानानि । इन्द्राण्यै स्वाहा । इत्यादीनि ॥ ११ ॥ ऋतुलिङ्ग्यादितन्त्रसमाप्तिः ॥ इति हविष्यपुण्याहः ॥ ६ ॥

—:*:*:—

अथ कन्याया विवाहात्पूर्वरात्रिकर्तव्ययागः ॥ परिसमुह्य पर्युक्ष्य परिषिच्य ॥ आदौ पञ्च० । उत्तरतः संस्तीर्य० सावित्राणि० । अग्नये सोमाय मित्राय वरुणाय इन्द्राय उदकाय भगाय अर्यम्णे पूष्णे त्वष्ट्रे राज्ञे प्रजापतये ॥ १२ ॥ जुष्टं निर्वपामि । एवं प्रोक्षामि । आज्यदर्शनम् ॥ आत्मनो० । आज्यभागान्ते । या आपो दिव्याः० ॥ प्रधानानि । अग्नये स्वाहा इत्यादीनि ॥ १२ ॥

ऋतुतिथ्यादितंत्रसमाप्तिः ॥ इति ॥ ७ ॥

अथ वरस्य विवाहात्पूर्वरात्रिकर्तव्ययागः ॥ परिसमुह्य प-र्युक्ष्य परिषिच्य ॥ आदौ पञ्च० ॥ उत्तरतः० ॥ अग्नये सोमाय मित्राय वरुणाय इन्द्राय उदकाय भगाय अर्यम्णे पूष्णे त्वष्ट्रे राज्ञे प्रजापतये कुम्भाय वैश्रवणाय ईशानाय १५ जुष्टं निर्वपा-मि एवं प्रोक्षामि ॥ आज्यदर्शनम् ॥ आज्यभागान्ते ।। या आ-पो दिव्याः० । प्रधानानि । अग्नये इत्यादीनि ॥ १५ ॥ ऋतुति-थ्यादितन्त्रसमाप्तिः ॥ विमुच्य ॥ नयामि ॥ ८ ॥

पूर्वेद्युःकर्म गेयनृत्तानुमंत्रणं नामेदम् ॥ परिसमुह्य पर्युक्ष्य परिषिच्य । परिस्तीर्य । आदौ पंच० । उत्तरतःसं० । सावित्रा-णि० अक्षतचरुः । अग्नये पुष्टिपतये प्रजापतये जुष्टं निर्वपामि । एवं प्रोक्षामि । आज्यदर्शनम् ॥ आज्यभागान्ते ॥ (चतस्रोऽष्टौ वा अविधवाः शाकपिण्डीभिः स्त्रियोऽन्नेन च ब्राह्मणान्भोजयित्वा

वीणागायिभिः सह सङ्गायेयुरपिवा चतुरो नर्तनं कुर्यात् क्रीडं-
वः इति ॥) क्रीडं वः शर्धो मारुतमनर्वाणं रथे शुभम् । कण्वा
अभिप्रगायत ॥ (इति गेयनृत्तानुमंत्रणम्) प्रधान द्वयम् । अग्नि-
ना रयिं० ॥ प्रजापतेनहि० ॥ तत ऋतुतिथ्यादितन्त्रसमाप्तिः ॥ ६ ॥

अथ वरस्य प्रास्थानिकहोमः ॥ परिसमुह्य पर्युक्ष्य परिषि-
च्य ॥ परिस्तीर्य आदौ पञ्च० ॥ उत्तरतः० । अच्युतचरौ अग्नये
पुष्टिपतये प्रजापतये जुष्टं निर्वपामि । एवं प्रोक्षामि । आज्यद-
र्शनम् ॥ आत्मनो० । आज्यभागान्ते । या आपो दिव्याः० ॥
(तस्मिन्यथोक्तमुपसमाधाय जयप्रभृतिर्हुत्वा पश्चाद्गगिनी सिचं
गृह्णाति शस्त्रं गृहीत्वा ॥ २ ॥ पूषामेति यान्ति यत्रोदकम् ३ ॥
शन्नोदेवीरित्युपस्पृश्य प्राचीदिगिति यान्ति यथादिशम् ॥) पूषा
मा प्रपथे पातु पूषा मा पशुपाः पातु पूषा माधिपतिः पातु ॥
शन्नोदेवीरितिजलमुपस्पृशेत् ॥ ततः प्राचीदिगिति ॥ प्राची दि-
गग्निर्देवता अग्निं स ऋच्छतु यो मैतस्या दिशोऽभिदासति ।

दक्षिणा दिगिन्द्रो देवतेन्द्रं स ऋच्छतु यो मैतस्या० ॥ प्रतीची दिक् सोमो देवता सोमं स ऋच्छतु यो मैतस्या० ॥ उदीची दिङ्मित्रावरुणौ देवता मित्रावरुणौ स ऋच्छतु यो मैत० ॥ उर्ध्वा दिग्बृहस्पतिर्देवता बृहस्पतिं स ऋच्छतु यो मैत० ॥ इयं दिगदितिर्देवताऽदितिं स ऋच्छतु यो० ॥ ततोऽक्षतसक्तूनां प्रधानं । अग्निं पुष्टिपतिं प्रजापतिं च यजेत । अग्निना रयिं० १ ॥ प्रजापते नहि० २ ॥ ऋतुतिथ्यादितन्त्रसमाप्तिः ॥ पूर्णामवशेषयेत् ॥ अग्नेर्यविष्ठब्राह्मणपूजनं ॥ आश्रावितमिति पूर्णां दत्त्वा विमुच्य० नयामि ॥ (यदि जातकर्म नामकर्म च कर्तव्यं स्यात्तदपि विधिपूर्वकमत्रैव विधेयम्) ॥ १० ॥

ततो वैश्वदेवं विदध्यात् तद्यथा—अग्निं परिसमुह्य पर्युक्ष्य परिषिच्य परिस्तीर्य । यज्ञस्य सन्ततिरिति ४ स्तरैः ॥ वैश्वदेवस्य सिद्धस्य० आदावग्नये स्वाहेत्यादि० ॥ नैवेद्यम् । तत्त्वाय नम इत्यादि ॥ अपसव्येन दक्षिणाग्रान्दर्भानास्तीर्य समस्तमातापित

भ्योऽन्नं स्वधा ॥ एवं गन्धादि च सर्वं ॥ हिमपानादि० ॥ सव्येन वसन्ताय नमः इत्यादि ॥ ततः अग्नये स्विष्टकृते स्वाहा ॥ प्राणायामः । विमुच्य ३ । नयामि । धर्मं देहि धनं देहि० ॥ भगवन्यद्म० । कण्ठोपवीती । हन्तमनुष्येभ्यः० ॥

अथ नान्दीमुखश्राद्धविधिः । आभ्युदयिके श्राद्धे इति सर्वत्र ॥

(पूर्वाग्रान्दर्भान् दूर्वा वा आस्तीर्य ।) नान्दीमुखेभ्यो द्वादशदैवतेभ्यः पितृभ्यः क्षीरयवैरवनेजनं नमः । (दधिबदरयवघृतमिश्रान् पिण्डान् श्रीफलसन्निभान् कृत्वा) (सव्यं जानुं भूमौ निधाय नैर्ऋतकोणादारभ्य पूर्वान्तास्त्रयस्त्रयश्चतुःश्रेणिषु पिण्डाः ईशानकोणं तावत् स्थाप्याः ॥) जितं ते पुण्डरीकाक्ष० ३ ॥ अद्य तावत्० । नान्दीमुख्यः मातरः एष वः पिण्डो याश्चात्र वोऽन्वेतद्वो नमः । अप उपस्पृश्य । नान्दीमुख्यः पितामह्यः एष वः पिण्डो याश्चात्र वोऽन्वेतद्वो नमः ॥ अप उ० । नान्दीमुख्यः प्रपितामह्यः एष वः पिण्डः० ॥ जितं ते० ३ ॥ अद्य तावत् ।

नान्दीमुखाः पितरः एष वः पिण्डो येचात्र वोऽन्वेतद्वो नमः अप उपस्पृश्य ॥ एवमन्यत्र । नान्दीमुखाः पितामहाः एष वः पि० ॥ नान्दीमुखाः प्रपितामहाः एष वः पि० ॥ जितं ते० ३ ॥ अद्य तावत् नान्दीमुख्यः मातामह्यः एष वः पिण्डो याश्चात्र वोन्वेतद्वो नमः । अप उपस्पृश्य । नान्दीमुख्यः प्रमातामह्यः एष वः पि० । नान्दीमुख्यः वृद्धप्रमातामह्यः एष वः पि० ॥ जितं ते ३ ॥ अद्य तावत् नान्दीमुखाः मातामहाः एष वः पि० । नान्दीमुखाः प्रमातामहाः० । नान्दीमुखाः वृद्धप्रमातामहाः एष वः पिण्डो येचात्र वोनुएतद्वो नमः । अपउप० । नान्दीमुखेभ्यो द्वादशदै० शोभनं वासो नमः । नान्दीमुखेभ्यः वीराम्नं नमः । नान्दीमुखीभ्यो मातृभ्यः नान्दीमुखीभ्यः पितामहीभ्यः नान्दीमुखीभ्यः प्रपितामहीभ्यः ॥ नान्दीमुखेभ्यः पितृभ्यः । एवं पितामहेभ्यः प्रपितामहेभ्यः ॥ नान्दीमुखीभ्यः मातामहीभ्यः । नान्दीमु० प्रमातामहीभ्यः । नान्दीमु० वृद्धप्रमातामहीभ्यः ॥ नान्दीमुखेभ्यः मातामहेभ्यः इत्यादि ।

समालभनं गन्धो नमः। एवं अर्घो नमः पुष्पं नमः॥ धूपो नमः दीपो नमः। नान्दीमुखेभ्यो द्वा० भक्ष्यभोज्यफलमूलबलिनैवेद्य-मन्नं नमः। नान्दीमुखेभ्यो० हिमपानादृद्धिः क्षीरपानादृद्धिः म-धुपानादृद्धिः यवोदकादृद्धिः उदकतर्पणादृद्धिः हिमं हिमं रजतं २। वसन्ताय नमः ६॥ (षड्तुतर्पणान्ते) श्रिय एवैनं तच्छ्रियमादधाति सन्ततं ऋचा वषट्कृतं। सन्तत्यै सन्धीयते प्र-जया च पशुभिर्य एवं वेद॥ ऊर्जासि नमस्कारं करोमि नमः॥ यो विश्वमाद्यं भुवनस्य गोप्ता येनेदं विश्वं सचराचरं च। स वै देवो यजमानं च मां च या दक्षिणा सर्वमेतत्पुनातु इति पि-ण्डदर्शनं॥ भद्रं पश्येम० इति च प्रदक्षिणनर्तनम्॥ शन्नो दे-वी०। नान्दीमुखेभ्यो० दक्षिणायै यवहिरण्य रजत निष्क०॥ नान्दीमुखा द्वादशदैवताः पितरः प्रीयन्तां प्रीता भवन्तु॥

इति नान्दीमुखश्राद्धविधिः॥

या काचिद्योगिनी०। सौरभेयाः स्वर्गहिताः०॥ इत्यादि स-

र्वम् ॥ ये विश्वभाविनो० इत्यादिना क्षेत्रेशबलिः ॥ अपसव्येन आयुःप्रजां० ॥ ततः कलशविसर्जनं पूर्ववत् ॥ सव्येन— गायत्र्यै नमः ॐभूर्भुवःस्वः ३ । सुभगायै विद्महे० ३ । अद्यतावत्० महागणपतेः० । ब्राह्मयाः० इत्यादेः । सीमन्तकरणसटोद्धरणदेवतानां । इन्द्राणीयागदेवतानां । इन्द्रस्य इन्द्राण्याः कामस्य भगस्य ह्रियाः श्रियाः लक्ष्म्याः पुष्ट्याः विश्वावसोर्गन्धर्वराजस्य गोदानदेवतानां । अलक्ष्मीनिर्णोदनदेवतानां । अर्यम्णः प्रजापतेः हविष्यकल्पदेवतानां । इन्द्राण्याः वरुणान्याः गन्धर्वाण्याः उदकान्याः अग्नेर्जीवपुत्रस्य प्रजापतेः महाराजस्य स्कन्दस्य अर्यम्णः भगस्य प्रजानकस्य हविष्यपुण्याहदेवतानां । अग्नेः सोमस्य मित्रस्य वरुणस्य इन्द्रस्य उदकस्य भगस्य अर्यम्णः पूष्णः त्वष्टुः राज्ञः प्रजापतेः कन्याया विवाहपूर्वरात्रिकर्तव्ययागदेवतानां । अग्नेः सोमस्य मित्रस्य वरुणस्य इन्द्रस्य उदकस्य भगस्य अर्यम्णः पूष्णः त्वष्टुः राज्ञः प्रजापतेः कुम्भस्य वैश्रवणस्य ईशानस्य वरस्य विवाहपूर्व-

रात्रिकर्तव्ययागदेवतानां । अग्नेः पुष्टिपतेः प्रजापतेः पूर्वेद्युः कर्म देवतानां । अग्नेः पुष्टिपतेः प्रजापतेः प्रास्थानिकयागदेवतानां । वासुदेवादीनां विष्णुपञ्चायतन देवतानां । इन्द्रस्य वज्रहस्तस्येत्यादीनां । हेरुकादीनां वटुकादीनां आत्मनो० पूजनमच्छिद्रं सम्पूर्णमस्तु एवमस्तु ॥ एताभ्यो देवताभ्यो यवोदकं नमः उदकतर्पणं नमः । आज्ञा मे दीयतां नाथ० ॥ आपन्नोस्मीत्यादि ॥ नमो ब्रह्मणे ३ इति तर्पणम् ॥ अथानुमत्यै- इत्यादि सप्तनामभिः सव्यञ्जनान्नपूर्णसप्तपात्रपूजा सप्तक्षीरपात्रपूजा वा यजमानपत्नीद्वारा विधातव्या ॥ ताभ्यश्च देवताभ्यस्तदन्ननिवेदनम् । तदन्नांशैश्च दुर्गाक्षेत्रतर्पणम् ॥ कलशाच्छिद्रात् पूर्वमेवैषा पूजा कार्या ॥ तत उदकलशमुपनिधाय स्वस्त्ययनं वाचयति ऋत्विक् ॥ ॥

इति कन्यासंस्कारविधिः समाप्तः ॥

सीमन्तकरणसंस्कारोद्धरणाध्यायः ॥ १ ॥

तृतीये गर्भमासे सीमन्तं कारयते ॥ १ ॥ शुक्लपक्षस्य पुण्याहे पर्वणि वा यथोक्तमुपसमाधाय जयप्रभृतिभिर्हुत्वा पश्चादग्नेर्दर्भेषु प्राक्कासीनायाः सर्वान्केशान्संप्रमुच्य प्रसाधयते यं सीमन्तामिति ॥ २ ॥

[गर्भग्रहणादारभ्य तृतीये मासे कस्मिंश्चित्पर्वदिने वा सीमन्तोन्नयनसंज्ञया यौगिकया प्रसिद्धं संस्कारकर्म कारयते, नतु विद्वानपि स्वयं कुर्यात् । णिचः प्रयोगात् ॥ एष च संस्कारः पात्रस्याधारस्यैव । तेन च गर्भोपकारः । अन्ये तु गर्भस्यैव संस्कारं मन्यन्ते । अपरे तूभयसंस्कारमाहुः ॥ तत्र क्षेत्रसंस्कार एवानुमततमप्रायो वेदार्थविदाम् ॥ अग्नेः पश्चाद्भागे दर्भेषु प्राङ्मुख्या उपविष्टायाः सर्वान् केशान् सम्यक् प्रकर्षेण मुक्तान् कृत्वा कंकतेन बालस्पष्टीकरणेन प्रसाधयते स्पष्टीकरोति यंसीमन्तामिति तिसृभिर्ऋग्भिः ॥]

त्रिः श्वेतया (श्येतया) शलल्या शमीशाखया सपलाशया वा सीमन्तं विचिनोति यास्तेराकइति ॥ ३ ॥

(शुक्लया, श्वाविच्छलाका—शललिरुपचारात्, तया त्रिवारं सीमन्तं विचिनोति विभजते-ललाटमध्यादारभ्य कृकाटिकां यावद् द्विधाकरोति केशान्॥)

अथास्याः पृथक्केशपक्षौ सन्नह्यति नीललोहितेन सूत्रेण नीललोहितमित्यनुष्टुभा ॥ ४ ॥

(कङ्कतसमीकृतानां, शलल्या कृतसीमन्तानां, केशानां पङ्क्तौ पार्श्वद्वयगतौ बध्नाति ॥) यो गुरुस्तमर्हयेत् ॥ ५ ॥

(सीमन्तोन्नयनस्य कर्ता यो ब्राह्मणस्तं मधुपर्कादिना पूजयेत् ॥)
एतदेव कुमारीणां सटोद्धरणमत्रैवानुलेपनम् ॥ ६ ॥

(वाग्दानात्पूर्वं कुमारीणां सटोद्धरणं-वेणीगूहनं केशरचनाविशेषात्मकं कर्मैतदेव मन्त्रवत्कर्तव्यमन्यत्तूष्णीम् ॥ अत्र ये के च ज्मेत्याज्यप्रधानम् ॥ अत्रैवानुलेपनं सर्वौषधिकुङ्कुमप्रभृतिभिः सीमन्तस्य शोभाविशेषाधायि कर्म कर्तव्यम् ॥)

इन्द्राणीयागः ॥ २ ॥

कुमारीणां यदा केशा वेणीबन्धनयोग्याः स्युस्तदा सीमन्तोन्नयनविधिना सटोद्धरणं प्राग्वाक्प्रदानात्कर्तव्यम् ॥ इन्द्राणीमासु नारिष्विति तु यद्वक्ष्यति तद्वाचा दत्तायां कन्यायाम् । इन्द्राणीयाग आज्येन वाग्दानदिवसे भवेत् । तत्राज्यं हविः ॥ आज्यभागान्ते चतुर्गृहीतेन प्रधानम् ॥ इन्द्राणीमासु० इति ॥

गोदानसंस्कारः ॥ ३ ॥

गोदानिकैर्मन्त्रैः कन्यामलङ्कृत्य चतुष्पादे भद्रपीठे प्राङ्मासीनायाश्चतस्रोऽविधवा माता पिता च गुरुः सप्तमस्तां सहस्रच्छिद्रेण पवित्रेण स्नापयित्वाऽहतेन वाससा प्रच्छाद्य स्थालीपाकस्य जुहोति ॥ इन्द्राय स्वाहा इन्द्राण्यै कामाय भगाय ह्रियै श्रियै लक्ष्म्यै पुष्ट्यै विश्वावसवे-गन्धर्वराजाय स्वाहा इति ॥ १ ॥

(संकल्पितैरलंकरणैरलंकृतायाः कन्यायाः सौभाग्यविवृद्धये गोदानिकमन्त्र-स्नापनपूर्वमिन्द्राद्या नव देवता स्थालीपाकेनेष्टव्याः ॥ विश्वावसवे गन्धर्वराजा-येत्येकैवाहुतिः ॥ अत्र पल्लवचतुष्टयं पवित्रस्य वस्त्रस्य चतस्रोऽविधवाः सव्येन पाणिना अवष्टभ्नन्ति । वामदक्षिणभागयोः मातापितरौ च जलमभिषिञ्चतः , अग्रे गुरुर्मन्त्रपाठं करोति ॥ सर्वगन्ध कुङ्कुमकर्पूरजातीफलादिमिश्रितवारिपूर्ण-कलशैर्दक्षिणपाणिस्थैर्या आपो दिव्याः इति द्वाभ्यामेनाव्याघ्रमिति च स्नानम्॥ अत्र गोदानिकैर्मन्त्रैः क्षुरेण कन्यायाः केशवपनं सर्वत्र सर्वैः प्रत्याख्यातम् । अ-न्यथा समाचारविरोधोऽमङ्गलं च स्यात् ॥ कुतश्च नात्र चूडाकरणमेव तर्हि अतिदिशेत्-इति ॥)

(अत्र वस्त्राभूषणपात्रादिदानसंकल्पे प्रजाभ्यस्त्वेति रायस्पोषाय त्वेतिच न वाचयितव्यौ यजमानः कन्याच ॥ एतत्प्रयोगन्तु शुल्कदेयाविवाहे दातृप्रति ग्रहीतारौ-वरयजमानौ कुरुतः ॥ तदुक्तं काठकगृह्ये— "अथ शुल्कदेयायाः।१। हिरण्यं व्यतिहरतः (समर्पयतः) ।२। प्रजाभ्यस्त्वेति प्रददाति (वरः) ।३। रायस्पोषायत्वेति प्रतिगृह्णाति (कन्यापिता) ॥ ४ ॥)

नाडीं तूणवं मृदङ्गं पणवं सर्वाणि च वादित्राणि गन्धोदकेन समुपलि-प्य कन्या प्रवादयते शुनंवदेति ॥ २ ॥

(नाडी वंशः, तूणवं गोमुखः वाद्यविशेषः, एतानि वाद्यानि चन्दनकुङ्कु-

मादिकल्केनोपालिप्य गुरौ मन्त्रं शुनंवददुन्दुभ इत्यादि कृतमंगलेत्यन्तं पठति सति कन्यैव पूर्वं वादयते) ॥ प्रतिसखि प्रक्रीडयत्येकमहर्द्धं वाऽहो-रात्रे ॥ ३ ॥ (ताः सर्वानर्तयति गापयति क्रीडयति च) ॥

अलक्ष्मीनिर्णोदनसंस्कारः ॥ ४ ॥

यज्ञियस्य वृक्षस्य प्राक् आयतां शाखां सकृदाच्छिन्नां सूत्रतन्तुना प्रच्छाद्य सा-वित्रेण कन्यायै प्रयच्छति ॥ १ ॥ (अश्वत्थोदुम्बरवटादियज्ञियवृक्षोद्भवां पूर्वदिक्प्रसृतां एकप्रहारच्छिन्नामेकसरेण लोहितसूत्रतन्तुना प्रच्छाद्य सावित्रेण कन्यायै शाखां प्रयच्छति ॥) । २ । (या तेऽलक्ष्मीरिति गुरुर्गृहीतशाखां कन्यां मन्त्रयते अलक्ष्मीनिर्णोदनमेतच्छाखाप्रदानम् ॥)

तस्या उत्सर्गः स्थावरोदके शुचौ वा (देशे) देवतायतने ॥ ३ ॥

(शाखायास्त्यागः कूपतडागादिषु, पवित्रे वा प्रदेशे, मद्योपहारशोणिताद्य-पवित्रीकृते देवगृहे वा । अत्र त्रिकादिभिर्होमः ।)

अथातो हविष्यकल्पं व्याख्यास्यामः ॥ ५ ॥

। १ । दशवार्षिकं ब्रह्मचर्यं कुमारीणां द्वादशवार्षिकं वा । २ । ब्रह्मचर्यान्ते गन्धर्वे देवकुले वा द्वावग्नी प्रज्वाल्य द्वौ पशू उपाकरोत्यर्यम्णे दक्षिणं प्राजापत्यमुत्त-रम् । ३ । असम्भवेत्वेकपशुः ॥ ४ ॥ तण्डुलैर्वा कुर्यात् । ५ । यथास्थानं पशुर्यथा-स्थानमवदानानि तथा हविः । ६ । अग्निं सोमं वरुणं मित्रमिन्द्रं बृहस्पतिं स्कन्दं

रुद्रं वात्सीपुत्रं भगं भगनक्षत्राणि काली षष्ठीं भद्रकालीं पूषणं त्वष्टारं मह्रिषिकां च गन्धाहुतिभिर्यजेत ॥ ७ ॥ [१ हविष्यकल्प इति पारिभाषिकी कर्मविशेषसंज्ञा । अतिक्रान्तद्वादशवर्षाणां कन्यानां दोषनिवृत्तयेऽयं संस्कारः ॥ अत्र कर्मणि कुमार्या ब्रह्मचर्यस्खलनं रजस्वलात्वमेव च निमित्तम् । द्वादशवर्षानन्तरं कुमारीणां स्वप्नादौ रेतःसेकसम्भवः । अतो द्वादशवर्षोर्ध्वं कर्मैतदवश्यं कर्तव्यम् ॥ एतद्वयसोऽर्वाङ् न कर्तव्यम् ॥

२ अगत्यापि विवाहे द्वादश वर्षाणि नातिक्रमणीयानि इति तात्पर्यम् ॥

५ पश्वलाभे तण्डुलपिष्टेन वा पश्वाकृतिं कुर्यात् ॥ ६ पिष्टपशावपि मुख्यपशुवत्सर्वं (स्थानमाज्यभागाभ्यां पूर्वं स्थितिः, अवदानानि हृदयाद्यङ्गानि, पशुपुरोडाशस्थाने स्थालीपाकः) इति कर्तव्यम् ॥ ७ सुगन्धिद्रव्याहुतिभिः प्रधानानन्तरं सप्तदश देवता यजेत]

अथातो हविष्यपुण्याहः ॥ ६ ॥

१। उदकान्तं गत्वा यथोपपत्ति वा पयसि स्थालीपाकं श्रपयित्वा सर्वगन्धैः फलोत्तरैः सशिरस्कां स्नापयित्वाऽहतेन वाससा प्रच्छाद्य स्थालीपाकस्य जुहोतीन्द्राणी वरुणानी गन्धर्वाण्युदकान्यग्निर्जीवपुत्रः प्रजापतिर्महाराजः स्कन्दोऽर्यमा भगः प्रजानक इति २ ॥ [१ हविष्येण व्रीह्यादिना पुण्येऽहनि क्रियमाणतात्र शब्दप्रवृत्तिनिमित्तम् ॥ २—देवतापदेषु चतुर्थ्या परिणामः।

जीवपुत्रोऽग्निरित्येकैव देवता । एकादश प्रधानाहुतयः । केचिन्महाराजेत्याकारान्तं मूलस्थं मत्वा महाराजे स्वाहेति पठन्ति । उदकसमीपे गत्वा यत्र वा कर्तुमुपपद्यते कर्मैतत्कर्तव्यम् । पयस्येव स्थालीपाकः श्रपयितव्यः नाप्सु ॥]

कन्याया विवाहपूर्वरात्रिकर्तव्ययागः ॥ ७ ॥

यामेव द्वितीयां रात्रिं कन्यां विवाहयिष्यन्स्यात्तस्यां रात्र्यामतीते निशाकाले नवां स्थालीमाहृत्य पयसि स्थालीपाकं श्रपयित्वा सर्वगन्धैः फलोत्तरैः सशिरस्कां स्नापयित्वाहतेन वाससा प्रच्छाद्य स्थालीपाकस्य जुहोत्यग्नये सोमाय मित्राय वरुणायेन्द्रायेन्द्राण्यै भगायार्यम्णे पूष्णे त्वष्ट्रे राज्ञे प्रजापतय इति ।१।

(विवाहदिनस्य पूर्वेद्युररुणोदयवेलायां इत्यर्थः अग्नये स्वाहेत्याद्या द्वादशाहुतीर्जुहुयात् ॥)

वरस्य विवाहपूर्वरात्रिकर्तव्ययागः ॥ ८ ॥

एता एव देवताः पुंसः कुम्भं वैश्रवणमीशानं च यजेत ॥ २ ॥

[पुंसोपि (वरस्यापि) तस्यां रात्र्यां संस्कारार्थमतयैवेतिकर्तव्यतया एता एव (पूर्वोक्ता द्वादश) देवता यजेत । कुम्भादयश्च तिस्र इति । एतावानेव च विशेषः । स्त्रियो द्वादशाहुतयः पुंसो (वरस्य) पंचदश ॥ निर्वपणादिष्वप्यत्र पंचदश देवताः] केचित् वन्ध्यात्वदोषनिवृत्तये संस्कारमेनं कथयन्ति तन्मूलं मृग्यम् ॥

पूर्वेद्युःकर्म गेयनृत्तानुमंत्रणं नाम ॥ १ ॥

चतस्रोऽष्टौ वा अविधवाः शाकपिण्डीभिः स्त्रियोऽन्नेन च ब्राह्मणान्भोजयित्वा वीणागायिभिः सह संगायेयुरपिवा चतुरो नर्तनं कुर्यात् क्रीडंवः शर्धो-० इति ।१।

[अन्यूनाश्चतसृभ्योऽविधवाः स्त्रियः समसंख्याः षट्कवर्जाः शाकमिश्राभिः पिण्डीभिरन्यैश्च भोजनविशेषैर्ब्राह्मणान् भोजयित्वा वीणया ये गायन्ति तच्छीलैः सह सम्भूता मंगलाचारं गायेयुः । अपिवा चतुरो-नर्तनप्रवीणो नर्तनं कुर्यात् । यदि शीलादिगुणयुक्तो भवेत् । अन्यथा न ताभिः सह नर्तनं कुर्यात् इत्यनेनाभिप्रायेणाऽपिवाशब्दः ॥ अथवा— 'अपिवा, इति समुच्चये सकलोऽसौ स्त्रीगणश्चतुरः सोत्साहो भूत्वा नर्तनाद्युत्सवं कुर्यात् इति॥ अक्षोटातिललवणदध्यादिसंस्कृताः शाकपिण्डयः ॥]

अक्षतसक्तूनामग्निं पुष्टिपतिं प्रजापतिं च यजेत ॥ अग्निना रयिं० । प्रजापते नहि० इतिच ॥ २ ॥ [अक्षतानामनवहतानां यवानां सक्तुभिरग्निं पुष्टिपतिं प्रजापतिं च स्वमंत्राभ्यां यजेत ॥] सर्वत्रोद्वाहकर्मस्वनादिष्टदेवतेष्वग्निं पुष्टिपतिं प्रजापतिं च यजेत ॥ ३ ॥ [पूर्वेद्युरेव विवाहाह्नः इदमपि कर्म । यत्र गेयं नृत्तं चानुमन्त्रयति क्रीडं वइत्यनया ऋत्विक् । अतो गेयनृत्तानुमन्त्रणं नाम पूर्वेद्युः कर्मेदम् ॥ अत्र ऋत्विजः— इदंकर्म, प्रास्थानिकं द्वितीयमपि कर्म, प्रधानद्वयस्यैकरूपत्वात्सहैव (युगपदेव) आचरन्ति ।

तन्मूलं मृग्यम् ॥ मम तु पृथक्कर्मत्वमेव समीचीनं भाति]

अथ प्रास्थानिकम् ॥ १० ॥

[इदं प्रास्थानिकं कर्म वरस्य विवाहार्थं श्वशुरगृहागमनसमये कर्तव्यम् ।] तस्मिन्यथोक्तमुपसमाधाय जयप्रभृतिभिर्हुत्वा पश्चाद् भगिनी सिचं गृह्णाति शस्त्रं गृहीत्वा ॥ २ ॥ [अत्राप्यक्षतसक्तव एव हविः । आज्यभागान्ते मजतो महाराजस्य भगिनी पश्चाद्वस्त्रान्तमादत्ते छुरिकादिकं शस्त्रमादाय ॥ अन्यैः सह पूषामेति गृहान्निष्क्रम्य स्वसा सिचान्तहस्तैव सह जलसमीपं गच्छति] ॥ पूषा मेति यान्ति यत्रोदकम् ॥ ३ ॥

पूषामेत्यादिमंत्रेणोदकसंमुखा गच्छन्ति अन्याः वरश्च शन्नोदेवीरित्युपस्पृश्य प्राचीन्दिगिति यान्ति यथादिशम् ॥ ४ ॥ [तत्र शं नो देवीरित्युदकमुपस्पृश्य शिरसि प्रक्षिप्याचम्य च प्राचीं दिगिति यान्ति यथादिशम् । उदकान्तात्कल्याणं वदन्ती स्वसा प्रत्येति । ततो होमकर्ताग्निं पुष्टिपतिं प्रजापतिं च सक्तुभिरिष्ट्वा स्तुतिथ्यादि समापयेत् ॥]

(१५) पंचदशी काण्डिका-अथ ब्राह्मदेयायाः प्रदानविधिं वक्ष्यामः० १-इत्यादिका ॥

अथशब्दो मङ्गलार्थः । ब्राह्मो दैवः आर्षः प्राजापत्यः आसुरः गान्धर्वः राक्षसः पैशाच इत्यष्टौ विवाहा मन्वादिस्मृतिषु कृतलक्षणाः सन्ति । तेषु च ब्राह्मो विवाहः 'आच्छाद्य चार्चयित्वा च श्रुतिशीलवते स्वयम् । आहूय दानं कन्याया ब्राह्मो धर्मः प्रकीर्तितः, इति मनुना लक्षितो मुख्यतामावहति । अनेनैव ब्राह्मेण विवाहेन दीयते या सा ब्राह्मदेया । तस्याः प्रकृष्टे दाने विधिमितिकर्तव्यतां वक्ष्यामः इति ॥ शुक्लपक्षस्येत्यादि० २ ॥

शुक्लपक्षस्य प्रशस्ते दिवसे, पौर्णमास्यादिरूपे पर्वणि वा, उत्तरादिगग्रेषु दर्भेषूपविष्टयोः सुहृद्बन्धुभृत्यैः सह दातृप्रतिग्रहीत्रोर्मध्यादेकः प्रतिग्रहीता पूर्वाभिमुखः,अन्यश्च प्रदाता पश्चिमाभिमुख इति ॥ मध्ये प्रागग्रेति० ३ ॥

ऋत्विक् यथाचारं मण्डलं कृत्वा स्वस्त्ययनं च विधाय तत्र पूर्वाग्रान्दर्भान्प्रथममास्तृणाति तेषूपरि उत्तराग्रान्, तत्रोदकपूर्णं कंसं परिवर्तुलं मङ्गल्यपात्रं व्रीहियवगर्भं सन्निधाय दक्षिणत उदङ्मुख उपविष्टः उपयमनं दातृग्रहीतृसम्बन्धं तयोर्मध्ये कुर्यात् ॥ उप्य-ओप्य-वोप्येतिपाठान्तराणि ॥ समेतेष्वाहेत्यादि० ४

समेतेषु सङ्गतेषु ज्ञातिष्वाह । किम् । कन्यां दद्रात्वस्मै भवान् इति त्रिर्दातारं चोदयेत् कन्यां प्रतिगृह्णात्वस्माद्भवानिति च त्रिर्वरम् । ततः द्दानि ते, इति त्रीन् वारानुच्चैर्भाषयते दातारम् । उदकपूर्वं दत्तायां कन्यायां प्रणवोच्चारणपूर्वं ओंभगवन्कन्यां प्रतिगृह्णामीति त्रिर्वरमुच्चैर्भाषयते । त्रिसत्या हि देवा इति श्रुतिः, त्रिरभिहितं न व्यभिचारि ॥ नात्र सावित्रः प्रतिग्रहमंत्रः॥

एतद्वः सत्यमित्यादि० ५ ॥ एतद्दानप्रतिग्रहकर्म युष्माकमव्यभिचारितमस्त्विति दातृवरपक्षौ पश्यन्नाह । एतन्नः सत्यमिति तौ प्रतिवदतः। इति त्रिवारम् । ततो वरस्योत्तरत उपविष्टायां वध्वां समाना वः इति ऋत्विग्वधूवरौ उभौ वीक्षमाणो जपति केचित्तु उभौ दातृप्रतिग्रहीतारौ—इति वदन्ति ॥ चतुर्विंशी कण्डिका ॥ षडर्घ्यार्हा भवन्ति इत्यादि० ॥ विवाहात्पूर्वमेव पाद्यार्घ्यमधुपर्कैर्विवाह्यः श्वशुरेण, आचार्यउपनेताऽध्यापयिता शिष्यस्य, ऋत्विग्याज्यस्य, राजा जनपदस्य, गुणोत्कर्षेण प्रियो यो यस्य स तस्य, सद्यः स्नातकस्त्वाचार्यस्यार्घ्य-पूजामर्हन्तीत्यर्घ्यार्हाः षट् भवन्ति इति ॥ तुल्यं पूजाविधानं षण्णामपीति षण्णामेवात्रोद्देशः ॥ अथैनमर्हयन्ति । २ ।

अथ- वक्ष्यमाणप्रकारेण । एनं—एतेषामन्यतमं । अर्हयन्ति—पूजयन्ति संमानयन्ति ॥ आदौ च कर्मणः ३ ॥ विवाहात्पूर्वमेवार्घ्यादिदानम् । विवाह्य इत्यर्हे आवश्यके वा कृत्यप्रत्ययः । विवहनमर्हतीति, विवहति वा-

वश्यं कन्यामिति विवाह्यः । नच विवाहादूर्ध्वं विवाहार्हो भवतीति पूर्वमेव विवाहात् इदं कर्तव्यं नतु विवाहादूर्ध्वम् ॥ अर्घ्यमुदकं सौषधं दर्भा इति ।४।

उदकं व्रीहियवयोश्चान्यतरत् दर्भा इति एतत्त्रयमर्घ्यशब्देनोच्यते ॥ आ० सौषधं–सतण्डुलाक्षत बदरादि ॥ कंसे चमसे वा० इत्यादि ॥५॥ कांस्यपात्रे चमसे वा दारुपात्रविशेषे दधि मधु चासिच्य मधुपर्क उच्यते । तच्च पात्रं वर्षीयसा बृहता पात्रेण पिधायाधस्तादुपरिष्ठाच्च विष्टराभ्यां गृहीत्वा पाद्यं प्रथमं येषां तैः पाद्यार्घ्यमधुपर्कैः प्रतिपद्यन्ते उपक्रमन्ते पूजयितारः॥

मयिदोहोऽसीति० ॥ ६ ॥ पाद्यमर्घ्यं मधुपर्कं चानीयमानं मयि दोहोऽसीत्यादिमंत्रेण विवाह्योऽनुमंत्रयते । अमंत्रज्ञश्चेद्विवाह्यस्तदा ऋत्विगेवैनं पाठयति ॥ विष्टरोऽसि मातरि सीद ॥ ७ ॥ इति मंत्रेणासनान्तरस्योपरि भगवन्निदमासनमास्यतामित्युक्त्वा दत्तं दर्भविष्टरमास्तीर्य विवाह्यस्तस्मिन्नुपविशति तूष्णीम् ॥ विष्टर आसीनायैकैकं त्रिः प्राह ॥ ८ ॥ विष्टरे आसीने विवाह्ये सति कन्याप्रदातैकैकं त्रिवारमाह । पाद्यं ३ अर्घ्यं ३ मधुपर्कः ३ आचमनीयं ३ ॥ नैव भो इत्याह न मार्षेति ॥ ९ ॥ भगवन्निति पूज्यसम्मानवचनमाभिमुख्यापादनायात्र ब्रूयात् । नैव भो इति न मार्षेति च ॥ शन्नोदेवीरित्यपोऽभिमंत्र्येत्यादि ॥ १० ॥ शन्नो० इत्यपोऽभिमंत्र्य भगवन्पाद्यं ३ इति पाद्ये निवेदिते पाद्यपात्रं दक्षिणेन पाणिनादाय

सव्ये पाणौ निधाय पाद्याभिः–पाद शोधनसमर्थाभिस्ताभिर्यथालिङ्गं वर एव स्वयं पादाववनेनिज्यात् ॥ आपोहिष्ठीयाभिरित्यादि० ॥ ११ ॥

भगवन्नर्घ्यं ३ इति उक्ते पाद्यपात्रवदर्घ्यपात्रमादायापोहिष्ठेति तिसृभिः शिरसि कुशपवित्रेणापः क्षिपेत् ॥ भगवन्मधुपर्को ३ इति त्रिराह दाता । देवस्य त्वेति मंत्रेण अञ्जलिना प्रतिगृह्य सव्ये पाणौ निदधाति । विष्टरोऽसीत्युपरितनं विष्टरमाकृष्यापास्य, उरुत्वेति उद्घाट्य तच्चक्षुरित्यवलोक्य, पृथिव्यास्त्वा नाभौ सादयामीत्यधस्तने विष्टरे स्थापयित्वा दधिमधुनी प्रदेशिन्याङ्गुल्या मधुवात इति तिसृभिः प्रदक्षिणावृत्तं मिश्रयति ॥ प्रदिशति तर्जयतीति प्रदेशिनी तर्जनी ॥ वसवस्त्वेत्यादि० ॥ १२ ॥ प्राच्या आरभ्य प्रदक्षिणं कृत्वा भक्षयन्त्वन्तैर्मन्त्रैर्मधुपर्कपात्रप्रान्तेष्वङ्गुलिलेपान्निर्मार्ष्टि । प्रतिदिशं प्रतिमंत्रमिति वचनात्पञ्चमेन मंत्रेणार्थात्पूर्वोक्तादिक्कोणे निर्माजनमापतति ॥ यन्मधुनो०–इत्यादि ॥ १३ ॥ यन्मधुनो० इति मंत्रेण मधुपर्कभागान् अङ्गुष्ठसहितयैकैकया कनिष्ठाद्यङ्गुल्या क्रमेण गृहीत्वा चतुरो वारानश्नाति ॥ आचामत्यमृतोपस्तरणमसीति ॥ १४ ॥ भगवन्नाचमनीयमित्येवं त्रिरुक्तेऽमृतोपस्तरणमसीत्यप आचामति ॥ तस्मा असिपाणिर्गां प्राह० ॥ १५ ॥

अर्हयिता खड्गपाणिर्भूत्वा तस्मा अर्हणीयाय गां प्रह–गां प्रकरिष्य इत्यनुज्ञां प्रार्थयते ॥ इत्याद्युक्तं युगान्तरीणं धर्मम् ॥

दर्भनिर्मितेन वा योक्त्रेण ॥ स्वयमेव कन्या वासोऽन्तरतो मौञ्जेन दार्भेण वा योक्त्रेण सन्नह्यति–बध्नाति इत्यन्ये ॥ योक्त्रं त्रिगुणं दाम ॥ ४ ॥

प्रेतो मुञ्चामि–इत्यादिभिस्तिसृभिरुदानीय–स्नानस्थानादुत्क्षिप्य ऋत्विक् पिता ज्येष्ठो भ्राता वा आनयति ॥ ५ ॥ उक्तं वाससः कर्म ॥ ६ ॥

या अकृन्तन् इत्येतयैवोत्तरीयं च वासः परिधापयति ॥ तत्तु उक्तमेव ॥ आचारिकाणि० ॥ ७ ॥ अस्मिन्नवसरे देशजातिकुलोचितानामाचारादागतानां मङ्गल्यानां कर्मणां कालः ॥ यथा कश्मीरेषु श्वश्रूरन्या वाविधवा वधूवरयोः शिरसि मङ्गल्यमालामाबध्नाति पूजापूर्वकम् ॥

तूष्णीं निर्मन्थ्यमित्यादि० ॥ ८ ॥ सद्योऽरणिभ्यां निर्मथितो य स्तत्र निर्मन्थ्यशब्दो रूढः ॥ तूष्णीमित्यमंत्रकमित्यर्थः । भ्राष्ट्राद् द्वितीयः ॥ अश्मानमग्निना संताप्य, सूर्यसंमुखं सूर्यकान्तमणिं वा स्थापयित्वा कर्पासगोमयचूर्णादिसंसर्गं कृत्वोत्पाद्यते यस्तं साम्तपनम् ॥ यत्र दीप्यमानं वा–सूतकाग्नि शवाग्नि संकराग्निपतिताग्निवर्जम् । तथाच–चण्डालाग्निरमेध्याग्निः सूतकाग्निश्च कर्हिचित् । पतिताग्निः शवाग्निश्च ते [नष्ट] नेष्टा ग्रहणोचिताः ॥

उपसमाधायेति प्रत्येकं सम्बन्धनीयम् ॥ सोदकेन पाणिना चतुर्दिशं समन्तात्समुह्य पर्युक्ष्य परिषिच्य समन्तात्परिस्तीर्याज्यस्य विलयनं विगलनं, उत्पवनं पवित्रेण पवनं कृत्वाघारावाज्यभागान्तं हुत्वाऽग्नेः पश्चात् शकटं रथं वाव-

दर्भनिर्मितेन वा योक्त्रेण ॥ स्वयमेव कन्या वासोऽन्तरतो मौञ्जेन दार्भेण वा योक्त्रेण सन्नह्यति-बध्नाति इत्यन्ये ॥ योक्त्रं त्रिगुणं दाम ॥ ४ ॥

प्रेतो मुञ्चामि-इत्यादिभिस्तिसृभिरुदानीय-स्नानस्थानादुत्क्षिप्य ऋत्विक् पिता ज्येष्ठो भ्राता वा आनयति ॥ ५ ॥ उक्तं वाससः कर्म ॥ ६ ॥

या अकृन्तन् इत्येतयैवोत्तरीयं च वासः परिधापयति ॥ तत्तु उक्तमेव ॥ आचारिकाणि० ॥ ७ ॥ अस्मिन्नवसरे देशजातिकुलोचितानामाचारादागतानां मङ्गल्यानां कर्मणां कालः ॥ यथा कश्मीरेषु श्वश्रूरन्या वाविधवा वधूवरयोः शिरसि मङ्गल्यमालामाबध्नाति पूजापूर्वकम् ॥

तूष्णीं निर्मन्थ्यमित्यादि० ॥ ८ ॥ सद्योऽरणिभ्यां निर्मथितो य स्तत्र निर्मन्थ्यशब्दो रूढः ॥ तूष्णीमित्यमंत्रकमित्यर्थः । आष्ट्राद् द्वितीयः ॥ अश्मानमग्निना संताप्य, सूर्यसंमुखं सूर्यकान्तमणिं वा स्थापयित्वा कर्पासगोमयचूर्णादिसंसर्गं कृत्वोत्पाद्यते यस्तं साम्तपनम् ॥ यत्र दीप्यमानं वा-सूतकाग्नि शवाग्नि संकराग्निपतिताग्निवर्जम् । तथाच-चण्डालाग्निरमेध्याग्निः सूतकाग्निश्च कर्हिचित् । पतिताग्निः शवाग्निश्च ते [नष्ट] नेष्टा ग्रहणोचिताः ॥ उपसमाधायेति प्रत्येकं सम्बन्धनीयम् ॥ सोदकेन पाणिना चतुर्दिशं समन्तात्समुह्य पर्युक्ष्य परिषिच्य समन्तात्परिस्तीर्याज्यस्य विलयनं विगलनं, उत्पवनं पवित्रेण पवनं कृत्वाघारावाज्यभागान्तं हुत्वाऽग्नेः पश्चात् शकटं रथं वाय-

पतिघ्नीत्यवनयनं मूर्द्धनि ॥ द्वितीयं अग्निर्ऋषिरित्यग्नौ हुत्वा याते ऽपुत्रियेत्यवनयनं मूर्द्धि । तथा तृतीयमग्ने पवस्वेत्यग्नौ हुत्वा या ते ऽपशव्येति मूर्द्धि सम्पातावनयनम् ॥ उदगग्नेर्दर्भेषु०– इत्यादि ॥ २१ ॥ अग्नेरुदीच्यां दिशि दर्भानास्तीर्य तेषु प्राङ्मुखीं वधूमवस्थाप्य तस्या वरः प्रत्यङ्मुखस्तिष्ठन्नेव शुचिः शुद्धसंकल्पः सन् दक्षिणं पाणिं अङ्गुष्ठसहितमुत्तानं नीचा दक्षिणेन पाणिना नीचा न्यग्भूतेनेत्यावृत्त्या अरिक्तं साभरणं अतिदौर्गत्ये पुष्पफलादिसहितं वा । अरिक्तेनेत्यपि तद्वत् । एवं सव्यं सव्येन देवस्यत्वेति सावित्रेण गृह्णाति ॥ यदि पृथक्तन्त्रमित्यादि० ॥ २४ ॥ यदि उद्वाहविवाहयोः पृथक् तन्त्रं तदा सरस्वतीवाचनानन्तरं, वधूवरौ प्रदक्षिणमग्निमानीय, यत्र पाणिग्रहणं कृतं तत्रैवोपवेश्य, ऋतुतिथियागादितन्त्रं समापयेत् । पुनश्च परिसमूहनादिनोपक्रम्य लाजान्संकल्पयेदिदमर्यम्ण इत्यादिना चतुरञ्जलिमात्रान् ॥

पश्चादग्नेर्दर्भेषु सात्वमसीति वाचयति ॥ २७ ॥ तत उत्तरेणाग्निं वधूवरावानीय पश्चादग्नेर्दर्भेषूपवेश्य सात्वमसीति वरं वाचयति ॥ अग्निमभिदक्षिणमानीयैह्यश्मानामिति वरं दक्षिणेन पदाश्मानमास्थापयति । आतिष्ठेममिति वधूम् ॥ २८ ॥ गुरुः प्रयोजकः । वधूवरावश्मानमाक्रमतः । वधूरपि दक्षिणेनैव पदा ॥ आज्यस्याञ्जलावुपस्तीर्य० इत्यादि ॥ २९ ॥ तानविच्छिन्दती जुहोत्वर्यमणमिति ॥ ३० ॥ आज्येन वध्वा अञ्जलावुपस्तृणाति च-

तुरवदानेन ऋत्विक् । तत इदं हविरित्यादिमंत्रेण शूर्पस्थान् शमीपर्णमिश्रां-
ल्लाजानभिमृशति वरः । अनन्तरमस्या वध्वा अञ्जलौ भ्राता लाजानावपति ॥
तानृत्विगभिघारितान्वधूरविच्छेदं कुर्वती एकेनैव प्रक्षेपेणार्यमणमित्यादिना जु-
होति । अमुष्येति षष्ठ्यन्तं भर्तृनाम लक्ष्यते ॥ अग्निर्मां जनिमानिति
वाचयति ॥ ३१ ॥ वरम् । गुरुरित्यर्थात् ॥ इयं नारीति सर्वत्रानुषजति॥३२॥
हुतेषु तेष्वग्निर्मेति–इयंनारीति च वरं वाचयति ॥ एवं द्विरुत्तरम् ॥३३॥
एवमुत्तरं कर्म द्वौ वारौ कर्तव्यम् ॥ तदेवाह— ॥ पर्ययणे पर्ययणे
इत्यादि ॥ ३४ ॥ परितोऽयनमग्नेः । प्रदक्षिणमित्यर्थः । ततोऽश्मास्था-
पनम् । परिस्तीर्य लाजानामावपनम् ॥ ३५—गन्धर्वमिति वदन्ती वधू-
र्लाजान् जुहोति ॥ ३६—सोमो मेत्यादि–इयं नारीति च वरं वाचय-
ति ॥ ३७—त्र्यम्बकमित्यादिस्तृतीयो होमः ॥ ३८—पूषामेति इयं
नारीति च वरं वाचयति । (वरं वाचयतीति सर्वत्र वाचनमेव नत्वनेन होमः)
(लाजाशब्दः सूत्रकृतोभयलिङ्गो दृष्टः) शिष्टान् स्विष्टकृते जुहोति शूर्पेण कर्ता
॥ ३९ ॥ कन्यया हि प्रधानहोमः कृतोऽञ्जलिना च । तन्निवृत्तये शू-
र्पग्रहणं कर्तृग्रहणं च ॥ वरो दक्षिणां [णा] ॥ ४० ॥ वर एव
दक्षिणां लाजाहोमकर्त्रे भ्रात्रे दद्यात् । अथवा वरोऽत्र गौः । वरं गां तु वि-
जानीयाच्चतुर्वर्षामिति श्रुतिः ॥ गौर्दक्षिणात्वेन देयेत्यर्थः ॥ तूष्णीं हस्तौ

विमुच्य वि ते मुञ्चामीति सन्नहनम् ॥ ४१ ॥ सन्नहनं योक्त्रं विमुं-
चति कर्ता मंत्रलिङ्गात् नतु स्वयम् ॥ उत्तरतोऽग्नेर्दर्भेषु प्रक्रामयति इ-
त्यादि ॥ ४२ ॥ अग्नेरुत्तरेणास्तीर्णेषु दर्भेषु प्राङ्मुखीं वधूं प्रक्रामयति
कर्ता सप्त पदानि सप्तभिर्मन्त्रैः । सखा सप्तपदा भवेत्यादि विष्णुस्त्वान्वेत्वि-
त्यन्तं सर्वत्रानुषङ्गः ॥ केषांचिन्मते विष्णुस्त्वान्वेतु इति एतावन्मात्रस्यैवानु-
षङ्गः ॥ तच्चक्षुरित्यादित्यमुपस्थापयति ४३ वधूमितिशेषः अस्त-
मितेऽग्निम् ॥ ४४ ॥ अस्तंगते रवौ सति रात्रिविवाहे इत्यर्थः । तच्च-
क्षुरित्यनयाग्निमेवोपस्थापयेत् ॥ जीवन्तीं ध्रुवं स्वस्त्यात्रेयं दर्शयत्यरुन्ध-
तीं च । एतेषामेकैकं पश्यसीत्याह पश्यामीति प्रत्याह ॥ ४५ ॥ ततो जीवन्त्यादी-
न्दर्शयति गुरुः । जीवन्तीं पश्यसि । पश्यामीति सर्वत्र वधूः प्रत्याह । एवं
ध्रुवं स्वस्त्यात्रेयं अरुन्धतीं । जीवन्तीमिति वध्वा विशेषणमित्यन्ये । जीवन्तीं
कन्यामिच्छन्नित्यर्थः ॥ दिवापि स्मरणरूपं दर्शनं-ज्ञानं सम्भवति दर्शनस्यात्र
सामान्यमात्रे विवक्षितत्वात् । तस्माद्दिवापि ॥ सुमंगलीत्यादिना वीक्षि-
तानुमंत्रयते ॥ ४६ ॥ वीक्षितान् ध्रुवादीन् । गुरुः ॥ उदुत्तममिति
प्रागुदीचीमावसथं यतीमनुमन्त्रयते यतो वा स्यात् ॥ ४७ ॥ उदुत्तम-
मिति चतसृभिरैशानीं दिशं अभिमुखीकृत्य गृहं यतीं-गच्छन्तीमनुमन्त्रयते यत्र
वा ऽऽवसथः स्यात्तस्मिन्पितृवेश्मनि तदभिमुखी गच्छेत् ॥

उलपराज्जीं स्तृणात्याशयनीयात् (अष्टाविंशी काण्डिका) ॥ १ ॥ उलपो वीरणः तृणविशेषः तस्य पंक्तिं अवतरणस्थानादारभ्य वधूशयनगृहविशेषं यावत् स्तृणाति रचयति ऋत्विक् ॥ तया प्रविशति ॥ १ ॥ रथादिकादवतीर्य वधूसहितो वरस्तया राज्या प्रविशति गृहम् ॥ अध्याहिताग्निं सोदकं सौषधमावसथं प्रतिपद्यते ॥ ३ ॥ स्थापितविवाहाग्निं, उदकुम्भभूषितं, व्रीह्याद्योषधिसनाथमेतादृशं गृहविशेषं प्रविशति । यो ऽसौ वैवाहनोऽग्निः स तत्र पूर्वमेवाहितो भवति ॥ रोहिण्या मूलेन वेत्यादि ॥ ४ ॥ रोहिण्या मूलेन वा नक्षत्रेण युक्ते चन्द्रमसि । यद्वा ज्योतिःशास्त्रोक्ते पवित्रे दिने । आवसथ्याग्निमपरेण । अनडुह इदमानडुहं । तत्र रोहिते चर्मण्युपविश्य वध्वा सह वरः केवलेष्वेव वा दर्भेषु, स्वयमिमं होममारभते अग्निरैतु-इत्यादिना ॥ आज्यस्यैकदेशे दध्यासिच्येत्यादि ॥५॥

पृथक्पात्रोद्धृते घृतैकदेशे दध्यासिच्य त्रिवारं दधि भक्षयित्वा वधूमिति देवपालः। आत्मना त्रिर्दधि प्राश्येति अन्ये ॥ माणवकाय वध्वा उत्सङ्गे स्थिताय वरो इडामग्न इति फलानि प्रददाति । [काश्मीरिकाचार एवं प्रकारकः—ऋत्विग्वराय । वरो वध्वा वस्त्राञ्चले । सा च श्वशुरवस्त्राञ्चलेऽर्पयति फलानि] ॥ एकोनत्रिंशी काण्डिका-तूष्णीमुपचरितं स्थालीपाकं श्रपयित्वा तस्याग्निमिष्ट्वा प्रजापतिं च शेषं प्राश्नीतः ॥ १ ॥

तूष्णीममन्त्रकमेव यत्रोपचारो निर्वापादिस्तं चरुं श्रपयित्वा श्रृतमभिघार्योद्गुद्वास्य च तस्यांशेनाग्निं प्रजापतिंचेष्ट्वा हस्तेनाहुतिद्वयं हुत्वा मेक्षणेन वा अवशेषमन्नमेवेति चतसृभिरभिमंत्र्य सौवर्णे राजतं पात्रं शालिचूर्णमण्डले प्रतिष्ठाप्य तस्मिन्दधिमिश्रितं प्राश्नीतः । मन्त्रो वरस्यैव न वध्वाः । मम चामुष्याश्च भूयादित्यत्र वध्वाः षष्ठ्यन्तं नाम ग्राह्यम् ॥ इति समशनम् ॥ भुक्त्वोच्छिष्टं वध्वै दद्यादिति गोभिलः ॥ संवत्सरं ब्रह्मचर्यमित्यादि-१ ॥ विकल्पो वयोविशेषौत्सुक्यापेक्षया ॥ अतः (तौ) संविशतः २ ॥ सहशयितौ भवतः ॥ स्त्र्यादिव्यत्यासं जपतः ॥ ३ ॥ व्यत्यासो विपर्ययः । स्त्री आदिर्यत्र व्यत्यासे स स्त्र्यादिव्यत्यासः ॥ एवमेवर्तौ प्रजाकामौ संविशतः ॥ ४ ॥ ऋतौ प्रजाकालेऽप्यनेनैव विधिना ॥ करदिति०५ ॥ करदिति यजुषा भसदं स्त्रीचिह्नं वरोऽभिमृशति ॥ भसदिति०६ ॥ तदुपरि निहितं जननं शेपं भसदिति यजुषाभिमृशति ॥ बृहदिति०७ ॥ बृहदितिअनेन जातं रेतः सिञ्चतीत्यर्थः

॥ इति गर्भाधानम् ॥

मेघैर्मेदुरमम्बरं वनभुवः श्यामास्तमालद्रुमै-र्नक्तं भीरुरयं त्वमेव तदिमं राधे गृहं प्रापय । इत्थं नन्दनिदेशतश्चलितयोः प्रत्यध्वकुञ्जद्रुमं राधामाधवयोर्जयन्ति यमुनाकूले रहः केलयः ॥ हृदयहर्षकरैर्मधुरस्वरैः प्रियजनान्मदयन्मुरलीरवैः । दुरितदुःखहरः करुणाकरो दिशतु मेऽभिमतं परमेश्वरः ॥

ॐ ।

ॐनमोनारायणाय ॥ श्रीगणेशाय नमः ॥

श्रीवाग्देव्यै सरस्वत्यै नमः ॥

अथ विवाहपद्धतिः ॥

आदौ कलशमुल्लिख्य स्वस्तिभद्रपाठादि० वषट्ते० इति तावत् ॥ कलशे प्रधानानि ॥ अग्निना रयिमश्नवत्पोषमेव दिवे दिवे। यशसं वीरवत्तम् नमः ॥ प्रजापते नहि त्वदन्य एता विश्वा जातानि परिता बभूव। यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणां नमः ॥ अर्यम्णे नमः, गन्धर्वाय नमः, त्र्यम्बकाय नमः, विवाहोद्वाहदेवताभ्यो नमः ॥ ये के च ज्मा महिनो अहिमाया दिवो जज्ञिरे अपां सधस्थे। ते अस्मभ्यमिषये वि-

श्वमायुः त्वप उस्रा वरिवस्यन्तु देवाः नमः ॥ अग्नये नमः, वायवे नमः, सूर्याय नमः, चन्द्रमसे नमः, विष्णवे नमः प्रायश्चित्त देवताभ्यो नमः ॥ तद्विष्णोः० वासुदेवाय नमः ८ ॥ एवं योरुद्रो० इत्यादि-पंचायतन देवताभ्यो नमः ॥ इन्द्रापर्वता० ॥ इत्यादि सर्वं कलशपूजनम् ॥ ऐन्द्राग्नं० ॥ मधुपर्कः ॥ सावित्राणि सावित्रस्येत्यादि महागणपतये इत्यादि० अग्नये पुष्टिपतये प्रजापतये अर्यम्णे गन्धर्वाय त्र्यम्बकाय विवाहोद्वाहदेवताभ्यः । अग्नये वायवे सूर्याय चन्द्रमसे विष्णवे प्रायश्चित्तदेवताभ्यः । मेषादिभ्यो द्वादशलग्नेभ्यः । अश्विन्यादिभ्यः सप्तविंशतिनक्षत्रेभ्यो वासुदेवादिभ्योः विष्णुपञ्चायतनदेवताभ्य अभयङ्कर्यै इत्यादि० इन्द्राय वज्रहस्तायेत्यादि सर्वं हेरुकादिभ्यः० मधुपर्कं ओंनमो नैवेद्यं निवेदयामि नमः ॥ हिरण्यगर्भः ८ ॥

द्वारपूजनं ॥ शुक्लाम्बरधरं० ॥ तीर्थेस्तेयं ॥ वसोपवित्र० ॥ वर यजमान कन्या तिलकं ॥ यदाबध्नं ॥ परमात्मने०॥

स्वप्रकाशो० ॥ वनस्पतिरसो० ॥ नमोधर्म० ॥ यत्रास्तिमाता०॥ अद्यतावत्० महागणपतये० द्वारदेवताभ्यो, धर्माय, अधर्माय, देहल्यै, खिंखिन्यै, मेरुप्राकारदेवताभ्यः, धूपदीपसंकल्पात्सिद्धिरस्तु धूपो नमः दीपो नमः ॥ सं वः सृजामि० ॥ अश्विनोरिति द्वारस्य जीवाधानम् ॥ गायत्र्यै नमः ओंभूर्भुवःस्वः ३ । अद्यतावत्० महागणपतेः० द्वारदेवतानां ॥ धर्मस्य अधर्मस्य देहल्याः खिंखिन्याः मेरुप्राकारदेवतानां आत्मोद्वाहनिमित्तं (इतिवरः) कन्योद्वाहनिमित्तं (इतियजमानः) द्वारपूजनमहं करिष्ये ओंकुरुष्व ॥ एवमासनादि० ॥ आवाहनकाले स्वागतं भोः इति (कन्यापिता वरपितरं कथयेत् । सच वरपिता सुस्वागतमिति–उत्तरयेत् ॥ अत्रैव काले रूप्यकसहितजातीफलस्यान्योन्यमर्पणम् ॥) एवं पाद्य–अर्घ्य–गन्धाऽर्घ पुष्पार्पणम् ॥ (महागणपतये इत्यादि नामभिर्द्वारदेशे । धर्मायाधर्मायेति दक्षिणवामप्रदेशे द्वारस्य । देहल्यै इत्यधः । खिंखिन्यै मेरुप्रा० इत्युपरि ॥) इत्यादि

दक्षिणान्तं ॥ अथात्रैव पूर्ववत्-अच्छिद्रं ॥ ऋत्विक् च यज्ञभूमिं गच्छन् कनिक्रददितिसूक्तं पठेत् ॥

अथ रक्षोघ्नमंत्राः ॥ ओंमारुणेर्वेगवतः प्राचीदिगिति सूर्यस्याध्वानमीप्सिता आरुणे स्थानान्तरे ॥ अच्छिन्नो दैव्यस्तन्तुर्मा मनुष्यश्छेदि निन्नदोऽसीदमहन्तान्निमृणामि योऽस्मान्द्वेष्टि यश्च वयं द्विष्मो, विभूरस्यभ्यहन्तम्भूयासं योऽस्मान्द्वेष्टि यश्च वयं द्विष्मः, प्रभूरसि प्राहन्तमति भूयासं योऽस्मान्द्वेष्टि यं च वयं द्विष्मः, पूषा मा प्रपथे पातु पूषा मा पशुपाः पातु पूषा माधिपतिः पातु, प्राची दिगग्निर्देवता ऽग्निं स ऋच्छतु यो मैतस्या दिशोऽभिदासति, दक्षिणा दिगिन्द्रो देवतेन्द्रं स ऋच्छतु यो मैतस्या दिशोऽभिदासति, प्रतीची दिक् सोमो देवता सोमं स ऋच्छतु यो मैतस्या दिशोऽभिदासत्युदीची दिङ्मित्रावरुणौ देवता मित्रावरुणौ स ऋच्छतु यो मैतस्या दिशोऽभिदासत्यूर्ध्वा दिग्बृहस्पतिर्देवता बृहस्पतिं स ऋच्छतु यो मैतस्या दिशोऽ-

भिदासतीयन्दिग्ऽदितिर्देवतादितिं स ऋच्छतु यो मैतस्या दि-
शोऽभिदासति, ज्योतिषे तन्तव आशिषमाशास्तेऽसा अनु मा
तनु, ॥ इष्टिर्वा ब्राह्मणानि प्रजापतिरग्नावैष्णवी ॥ अग्नये
पथिकृतेऽष्टाकपालन्निर्वपेद्यस्य पौर्णमासी वामावस्या वातिपद्येत
बर्हिष्पथं वा एष एति यस्य पौर्णमासी वामावस्या वातिपद्यते
ऽग्निर्देवानाम्पाथिकृत्तमेवान्वारभते स एनम्पन्थामपि नयति वि
वा एतद्यज्ञं छिनत्ति यद्यज्ञे प्रनत एतामन्तरेष्टिन्निर्वपते ॥ य ए-
वासा आग्नेयोऽष्टाकपालः पूर्णमासे योऽमावस्यायान्नमग्नये प-
थिकृते कुर्यात्तेनैव पुनः पन्थामेवैति न यज्ञं विच्छिनत्त्यग्नये वा-
जसृतेऽष्टाकपालन्निर्वपेत् ॥ सङ्ग्रामेऽग्निर्वै देवानां वाजसृ-
द्वाजमेष धावति यः सङ्ग्रामञ्जयति तमेव भागधेयेनोपधावति
वाजमेव धावति जयति सङ्ग्राममथो अग्निरिव न प्रति धृषे भ-
वत्यग्नये व्रतपतयेऽष्टाकपालन्निर्वपेद्य आहिताग्निः सन्नव्रत्यञ्चरे-
दानीतो वा एष देवानां य आहिताग्निरदन्त्यस्यान्नं व्रतपतिमेतस्य

व्रतङ्गच्छति य आहिताग्निः सन्नव्रत्यञ्चरत्यग्निर्देवानां व्रतपतिस्तमेव भागधेयेनोपधावति व्रतपतेरेवाधि व्रतमालभतेऽग्नये रक्षोघ्नेऽष्टाकपालन्निर्वपेत् ॥ आमयावीन्द्रं वै जातं रक्षांस्यसचन्त स आदीयमानो रक्षोभिः संमृश्यमानोऽग्निम्प्राविशत्तस्मादग्नी रक्षांस्यपाह रक्षांस्येतं सचन्ते य आमयाव्यग्निर्देवानां रक्षोहा तमेव भागधेयेनोपधावति सोऽस्माद्रक्षांस्यपहन्त्यमावस्यां रात्रीन्निशि यजेताऽमावस्यां वै रात्रीन्निशि रक्षांसि प्रेरते पूर्णान्येवैनान्यपवपति परिश्रिते यजेत रक्षसामन्तार्हित्यै ॥ वामदेवस्यैतत्पञ्चदशं राक्षोघ्नं सामिधेन्यो भवंति वामदेवश्च वै कुसिदायी चात्मनो राजिमयातान्तस्य कुसिदायी पूर्वस्यातिद्रुतस्य कूबरं व्ययमृणात्सा द्वितीयमुपपर्यावर्ततेषां वाचं वा छेत्स्यामीति स वामदेव उक्थ्यमग्निमऽबिभस्तमवैक्षत स एतत्सूक्तमपश्यत्कृणुष्व पाजः प्रसितिं न पृथ्वीमिति तामग्निरनूद्रुत्य समदहत्सा दह्यमाना ह्रदङ्कौसिदम्प्रामज्जयदेतदनूच्यते रक्षसान्तुत्यै ॥

कृणुष्व पञ्चोना राक्षोघ्नं वामदेवस्य गौतमपुत्रस्य ॥
कृणुष्व पाजः प्रसितिन्न पृथ्वीं याहि राजेवामवाँ इभेन । तृष्वीमनु प्रसितिन्द्रूणानोऽस्तासि विध्य रक्षसस्तपिष्ठैः ॥ तव भ्रमास आशुया पतन्त्यनुस्पृश धृषता शोशुचानः । तपूंष्यग्ने जुह्वा पतङ्गानसन्दितो विसृज विष्वगुल्काः ॥ प्रति स्पशो विसृज तूर्णितमो भवा पायुर्विशो अस्या अदब्धः । यो नो दूरे अघशंसो यो अन्त्यग्ने माकिष्टे व्यथिरादधर्षीत् ॥ उदग्ने तिष्ठ प्रत्यातनुष्वन्यमित्रां ओषतात्तिग्महेते । यो नो अरातिं समिधान चक्रे नीचा तन्धक्ष्यतसन्न शुष्कम् ॥ ऊर्ध्वो भव प्रतिविध्याध्यस्मदाविष्कृणुष्व दैव्यान्यग्ने ॥ अव स्थिरा तनुहि यातजूनाञ्जामिमजामिम्प्रमृणीहि शत्रून् ॥ स ते जानाति सुमतिं यविष्ठ य ईवते ब्रह्मणे गातुमैरत् । विश्वान्यस्मै सुदिनानि रायो द्युम्नान्यर्यो विदुरो अभिद्यौत् ॥ सेदग्ने अस्तु सुभगः सुदानुर्यस्त्वा नित्येन हविषा य उक्थैः । पिप्रीषति स्व आयुषि दुरोणे विश्वेदस्मै

सुदिना सा सदिष्टिः ॥ अर्चामि ते सुमतिङ्घोष्यर्वाक्सन्ते वावाता जरतामियङ्गीः । स्वश्वास्त्वा सुरथा मार्जयेमास्मे क्षत्राणि धारयेरनु द्यून् ॥ इह त्वा भूर्याचरेदुपत्मन्दोषावस्तर्दीदिवांसमनु द्यून् । क्रीडन्तस्त्वा सुमनसः सपेमाभि द्युम्ना तस्थिवांसो जनानाम् ॥ यस्त्वा स्वश्वः सुहिरण्यो अग्न उपयाति वसुमता रथेन । तस्य त्राता भवसि तस्य सखा यस्त आतिथ्यमानुषग्जुजोषत् ॥ महो रुजामि बन्धुता वचोभिस्तन्मा पितुर्गोतमादन्वियाय । त्वन्नो अस्य वचसश्चिकिद्धि होतर्यविष्ठ सुक्रतो दमूनाः ॥ अस्वप्नजस्तरणयः सुशेवा अतन्द्रासोऽवृका अश्रमिष्ठाः । ते पायवः सध्र्यञ्चो निषद्याग्ने तव नः पान्त्वमूर ॥ ये पायवो मामतेयन्ते अग्ने पश्यन्तो अन्धन्दुरितादरक्षन् । ररक्ष तान्सुकृतो विश्ववेदा दिप्सन्त इद्रिपवो नाह देभुः ॥ त्वया वयं सधन्यस्त्वोतास्तव प्रणीत्यश्याम वाजान् । उभा शंसा सूदया सत्यताते नुष्ठुया कृणुह्यह्रयाण ॥ अया ते अग्ने समिधा

विधेम प्रति स्तोमं शस्यमानङ्गृभाय । दहाशसो रक्षसः पाह्यस्मान्द्रुहो निदो मित्रमहो अवद्यात् ॥

उदस्थाद्धनजिदित्यहोरौशनस्य ब्रह्मजज्ञानमिति स्वयम्भुवो ब्रह्मण ऐन्द्राग्नमिति वायोरार्षम् ॥ उदस्थाद्धनजिद्गोजिदश्वजिद्धिरण्यजित्सूनृतया परीवृतः । एतचक्रेण सविता रथेनोर्जो भागम्पृथिवीमेत्यापृणन् ॥ सं वरत्रान्दधातन निराहावङ्कृणोतन । सिञ्चामहा अवतं वयमुद्रिणं विश्वाहादस्तमक्षितम् ॥ ब्रह्म जज्ञानम्प्रथमम्पुरस्ताद्वि सीमतः सुरुचो वेन आवः । स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः ॥ अनाप्ता या वः प्रथमा यस्याङ्कर्माणि कुर्वते । वीरान्नो अत्र मा दभंस्तद्व एतत्पुरो दधे ॥ पर्यू षु प्रधन्व वाजसातये परि वृत्राणि सक्षणिः। द्विषस्तरध्या ऋणया न ईयसे ॥ सहस्रधारेऽव ते समस्वरन्दिवो नाके मधुजिह्वा असश्चतः । तस्य स्पशो न निमिषन्ति भूर्णयः पदेपदे पाशिनः सन्ति सेतवः॥ मलिम्लुचो नामासि त्रयोदशो मास

इन्द्रस्य शर्मासीन्द्रस्य वर्मासीन्द्रस्य वरूथमसि तन्त्वा प्रपद्ये स-गुः साश्वः सपुरुषः ॥ सह यन्मे ऽस्ति तेन स मे शर्म च वर्म च भव गायत्रींल्लोमभिः प्रविशामि त्रिष्टुभन्त्वचा प्रविशामि जगतीम्मांसेन प्रविशाम्यनुष्टुभमस्था प्रविशामि पङ्क्तिं मज्ज्ञा प्रविशामि । ऐन्द्राग्नं वर्म बहुलं यदुग्रं विश्वे देवा नाति विध्य-न्ति शूराः । तन्नस्त्रायतां तन्वः सर्वतो महदायुष्मन्तो जरामु-पगच्छेम जीवाः ॥ अथ वरस्य कन्यापितुश्च कलशपूजनम् ॥ यत्रास्ति माता न पिता न बन्धुः इत्यादि० । तत्सङ्कल्पाद्य० , महागणपतये० । अग्नये पुष्टिपतये प्रजापतये ॥ अर्यम्णे गन्ध-र्वाय त्र्यम्बकाय विवाहोद्वाहदेवताभ्यः ॥ अग्नये वायवे सूर्याय चन्द्रमसे विष्णवे प्रायश्चित्तयागदेवताभ्यः । मेषादिभ्यो द्वाद-शलग्नेभ्यः, अश्विन्यादिभ्यः सप्तविंशतिनक्षत्रेभ्यः, वासुदेवाय०८। पंचायतनदेवताभ्यः, अभयङ्कर्यै भग०, क्षेमङ्कर्यै०, सर्वशत्रुघाति-न्यै, इहराष्ट्राधिपतये भैरवाय, इन्द्राय वज्रहस्तायेत्यादि अनन्ता-

दिभ्योऽष्टाभ्यः कुलनागदेव०, अग्न्यादित्याभ्यामित्यादि, हेरुकादिभ्यो वटुकादिभ्यो धूपदीपसंकल्पात्सिद्धिरस्तु धूपो नमः दीपो नमः ॥ गायत्र्यैनमः ओंभूर्भुवःस्वः० ३ ॥ तत्सदद्य० महागणपतेः०, अग्नेः पुष्टिपतेः प्रजापतेः, अर्यम्णः गन्धर्वस्य त्र्यम्बकस्य विवाहोद्वाहदेवतानां, अग्नेः वायोः सूर्यस्य चन्द्रमसः विष्णोः प्रायश्चित्तयागदेवतानां, मेषादीनां द्वादशलग्नानां, अश्विन्यादीनां सप्तविंशतिनक्षत्राणां वासुदेवस्य ८, भवस्येत्यादि विष्णुपंचायतनदेवतानां, अभयकर्यां:०, इन्द्रस्य वज्रहस्तस्येत्यादि०, आत्मनो०, आत्मोद्वाहनिमित्तं कन्योद्वाहनिमित्तमर्चामहं करिष्ये ओं कुरुष्व ॥ एवमेवासनम् षष्ठ्यन्तैर्नामभिः ॥ महागणपतये इत्यादिभिर्युष्मान्पूजयामि ओं पूजय ॥ महागणपतिं इत्यादि, अग्निं पुष्टिपतिं प्रजापतिं, अर्यमणं गन्धर्वं त्र्यम्बकं विवाहोद्वाहदेवताः, अग्निं वायुं सूर्यं चन्द्रमसं विष्णुं प्रायश्चित्तयागदेवताः, मेषादीनि द्वादशलग्नानि, अश्विन्यादीनि सप्तविंशति नक्षत्राणि, वासु-

देवादीन् विष्णुपञ्चायतनदेवताः, अभयंकरीं०, इन्द्रं सुराधिपतिं वज्रहस्तमित्यादि, हेरुकादीन् वटुकादीनावाहयिष्यामि ओमावाहय, यवान्विकीर्य ॥ शन्नोदेवी० ॥ लाजाश्च० ॥ महागणपतये०, अग्नये पुष्टिपतये० इत्यादि पूर्ववत् सर्वं, पाद्यंनमः ॥ पुनः शन्नोदेवी० ॥ आपः क्षीरं० । महागणपते०, अग्ने पुष्टिपते प्रजापते, अर्यमन् गन्धर्व त्र्यम्बक विवाहोद्वाहदेवताः, अग्ने वायो सूर्य चन्द्रमः विष्णो प्रायश्चित्तयागदेवताः, मेषादीनि द्वादशलग्नानि, अश्विन्यादीनि सप्तविंशति नक्षत्राणि वासुदेवादयः० अभयङ्करि० इन्द्र वज्रहस्त० इत्यादि सर्वं इदं वोऽर्घ्यं नमः ॥ महागणपतये० इत्यादिभिश्चतुर्थ्यन्तैर्नामभिर्गन्धार्घपुष्पाणि धूपदीपादि च दक्षिणान्तं सर्वम् ॥ तद्विष्णोरिति कलशे पुष्पम् ॥

अथ जातीफल सर्वगन्धद्रव्ययुत जलपात्रे सविष्टरे संवःसृजामीतिद्वाभ्यां पुष्पाणां त्रितयं क्षिप्त्वा वराभिषेकमृत्विक् कुर्यात् ॥ सर्वगन्धैरिति—

सर्वगन्धैः फलोत्तरैः सशिरस्कं स्नपयित्वाऽहतेन वाससा प्रच्छाद्य ॥ सावीर्हि देव प्रथमाय पित्रे वर्ष्माणमस्मै वरिमाणमस्मै । अथास्मभ्यं सवितर्वार्याणि दिवे दिव आसुवा भूरि पश्वः ॥ भूतो भूतेषु चरति प्रविष्टः स भूतानामधिपतिर्बभूव । तस्य मृत्योश्चरति राजसूयं स राजा राज्यमनुमन्यतामिदम् ॥ येभिः शिल्पैः पप्रथानामदृंहद्येभिर्द्यामभ्यपिंशत्प्रजापतिः । येभिर्वाचं विश्वरूपेभिरव्ययंस्तेनेममग्न इह वर्चसा समङ्ग्धि ॥ येभिरादित्यस्तपति प्र केतुभिर्येभिः सूर्यो ददृशे चित्रभानुः । येभिर्वाचं पुष्कलेभिरव्ययंस्तेनेममग्न इह वर्चसा समङ्ग्धि ॥ आयम्भातु शवसा पञ्च कृष्टीरिन्द्र इव ज्येष्ठो भवतु प्रजानाम् । अस्मिन्नस्तु पुष्कलं चित्रभान्वायं पृणातु रजसा विमानम् ॥ यत्ते शिल्पं कश्यप रोचनावदिन्द्रियावत्पुष्कलं चित्रभानु । यस्मिन्सूर्या अर्पिताः सप्त साकं तस्मिन्राजानमधि विश्रयेमम् ॥ व्याघ्रो वैय्याघ्रे अधि विक्रमस्व दिशो महीः । विशस्त्वा सर्वा वाञ्छ-

न्त्वापो दिव्याः पयस्वतीः ॥ या आपो दिव्याः पयसा सम्बभूवुर्या अन्तरिक्ष्या उत पार्थिवासः । तासान्त्वा सर्वासां रुचाभिषिञ्चामि वर्चसा ॥ अभि त्वा वर्चसासिचं यज्ञेन पयसा सह । यथासो मित्रवर्धनस्तथा त्वा सविता करत् ॥ इन्द्रं विश्वा अवीवृधन्त्समुद्रव्यचसङ्गिरः । रथीतमं रथीनां वाजानां सत्पतिं पतिम् ॥ अभि प्रेहि वीरयस्वोग्रश्चेत्ता सपत्नहा । आतिष्ठ मित्रवर्धनस्तुभ्यन्देवा अधिब्रुवन् ॥ आतिष्ठ वृत्रहन्रथं युक्ता ते ब्रह्मणा हरी । अर्वाचीनं सु ते मनो ग्रावा कृणोतु वग्नुना ॥ आतिष्ठन्तं परि विश्वे अभूषञ्छ्रियो वसानश्चरति स्वरोचिः । महत्तदस्यासुरस्य नामा विश्वरूपो अमृतानि तस्थौ ॥ अनु त्वेन्द्रो मदत्त्वनु बृहस्पतिरनु सोमो अन्वग्निरावीत् । अनु त्वा विश्वे अवन्तु देवाः सप्त राजानो य उदाभिषिक्ताः ॥ अनु त्वा मित्रावरुणा इहावतामनु द्यावापृथिवी ओषधीभिः । सूर्योऽहोभिरनु त्वावतु चन्द्रमा नक्षत्रैरनु त्वावीत् ॥ द्यौश्च त्वा

पृथिवी च प्रचेतसा यज्ञो बृहद्दक्षिणा त्वा पिपर्तु । अनु स्वधा चिकिते सोमो अग्निरनु त्वावतु सविता सवेन ॥ एना व्याघ्रं परिषस्वजानं सिंहं हिन्वन्ति महते धनाय । मर्मृज्यन्ते द्वीपिनमप्स्वन्तररुक्षन्न (सुभ्व) सुत्वस्तास्थिवांसम् ॥

अपां यो द्रवणे रसस्तमहमस्मा अमुष्मा आमुष्यायणाय तेजसे वर्चसे गृह्णाम्यऽपां य ऊर्मौ रसस्तमहमस्मा अमुष्मा आमुष्यायणायौजसे क्षत्राय गृह्णाम्यऽपां यो मध्ये रसस्तमहमस्मा अमुष्मा आमुष्यायणाय प्रजायै पुष्ट्यै गृह्णाम्यऽपां या यज्ञिया तनूस्तामहमस्मा अमुष्मा आमुष्यायणायायुषे दीर्घायुत्वाय गृह्णामि ॥ रथे अक्षेषु वृषभस्य वाजे वाते पर्जन्ये वरुणस्य शुष्मे । इन्द्रं या देवी सुभगा जजान सेयमागाद्वर्चसा संविदाना ॥ या हस्तिनि द्वीपिनि या हिरण्ये गोष्वश्वेषु पुरुषेष्वन्तः । इन्द्रं या० ॥ सिंहे व्याघ्र उत या पृदाकौ त्विषिरग्नौ ब्राह्मणे सूर्ये या । इन्द्रं या० ॥ या राजन्ये दुन्दुभा आयता-

यामश्वस्य क्रन्दे पुरुषस्य मायौ । इन्द्रं या० ॥

राळसि विराळसि सम्राळसि स्वराळसीन्द्राय त्वा मधुमते मधुमन्तं श्रीणामीन्द्राय त्वौजस्वत ओजस्वन्तं श्रीणामीन्द्राय त्वा पयस्वते पयस्वन्तं श्रीणामीन्द्राय त्वाऽऽयुष्मत आयुष्मन्तं श्रीणामि वर्चोऽसि तन्मे नियच्छ तत्ते नियच्छाम्योजोसि तन्मे नियच्छ तत्ते नियच्छामि पयोऽसि तन्मे नियच्छ तत्ते नियच्छाम्यायुरसि तन्मे नियच्छ तत्ते नियच्छामि ॥

वर्चस्वदस्तु मे मुखं वर्चस्वच्छिरो अस्तु मे । वर्चस्वान्विश्वतः प्रत्यङ्वर्चसा संपिपृग्धि मा ॥ ओजस्वदस्तु मे मुखमोजस्वच्छिरो अस्तु मे । ओजस्वान्विश्वतः प्रत्यङ् ओजसा संपिपृग्धि मा ॥ पयस्वदस्तु मे मुखं पयस्वच्छिरो अस्तु मे । पयस्वान्विश्वतः प्रत्यङ् पयसा संपिपृग्धि मा ॥ आयुष्मदस्तु मे मुखमायुष्मच्छिरो अस्तुमे । आयुष्मान्विश्वतः प्रत्यङ् आयुषा संपिपृग्धि मा ॥ इन्द्रमहङ्गायत्रेण च्छन्दसा त्रिवृता स्तोमेन रथ-

न्तरेण साम्नाग्निना देवतया तेजस्ते वर्च आददेऽसा, इदमहं त्रैष्टु-
भेन च्छन्दसा पञ्चदशेन स्तोमेन बृहता साम्नेन्द्रेण देवतयौज-
स्ते क्षत्रमाददेऽसा, इदमहं जागतेन च्छन्दसा सप्तदशेन स्तोमेन
वैरूपेण साम्ना विश्वैर्देवैर्देवतया प्रजान्ते पुष्टिमाददेऽसा, इदमह-
मानुष्टुभेन च्छन्दसैकविंशेन स्तोमेन वैराजेन साम्ना प्रजापतिना
देवतयायुस्ते दीर्घायुत्वमाददेऽसौ ॥ इममग्न आयुषे
वर्चसे कृधि तिग्ममोजो वरुण संशिशाधि । मातेवास्मा अदिते
शर्म यच्छ विश्वे देवा जरदष्टिर्यथासत् ॥ विश्वकर्मा विश्वदेवो
विश्वजिद्विश्वदर्शतः । ते त्वा घृतस्य धारया श्रैष्ठ्याय समसृष-
त ॥ यतो वातो मनोजवा यतः क्षरन्ति सिन्धवः । तासां त्वा
सर्वासां रुचाभिषिञ्चामि वर्चसा ॥ अभि त्वा वर्चसासिचं यज्ञे-
न पयसा सह । यथासो मित्रवर्धनस्तथा त्वा सविताकरत् ॥
इन्द्रं विश्वा अवीवृधत्समुद्रव्यचसङ्गिरः । रथीतमं रथीनां वाजा-
नां सत्पतिं पतिम् ॥ अपां यो द्रवणे रसस्तेनाहमिममभ्युनासु-

ष्यायणममुष्याः पुत्रन्तेजसे ब्रह्मवर्चसायाभिषिञ्चाम्यपां य ऊर्मौ रसस्तेनाहमिममसुमामुष्यायणममुष्याः पुत्रमोजसे क्षत्त्रायाभिषिञ्चाम्यपां यो मध्ये रसस्तेनाहमिममसुमामुष्यायणममुष्याः पुत्रं प्रजायै पुष्ट्याअभिषिञ्चाम्यपां या यज्ञियास्तनूस्तयाहमिममसुमामुष्यायणममुष्याः पुत्रमायुषे दीर्घायुत्वायाभिषिञ्चामि ॥

निषसाद धृतव्रतो वरुणः पस्त्यास्वा साम्राज्याय सुक्रतुः॥ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामश्विनोर्भैषज्येन तेजसे ब्रह्मवर्चसायाभिषिञ्चामि ॥ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां सरस्वत्या भैषज्येन वीर्यायान्नाद्यायाभिषिञ्चामि । देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामिन्द्रस्येन्द्रियेण बलाय श्रियै यशसेऽभिषिञ्चामि ॥ कोऽसि को नामासि कस्मै त्वा काय त्वा सुश्लोका १ सुमङ्गला २ सत्यराजा ३ न् ॥ राये जातः सहसे वृद्धः क्षत्राणां क्षत्त्रभृत्तमो वयोधाः । महान्महित्वा संस्तम्भे क्षत्रे

राष्ट्रे च जागृहि ॥ नव कृत्व इन्द्रो राजा सविता त्वाभिषिञ्चतु । मित्रो वायुर्बृहस्पतिर्धाता क्षत्रन्दधातु ते ॥

(वरतिलकं) अदितिस्त्वा सुष्वतु राजन्महते क्षत्राय महते ज्यैष्ठ्याय महते राज्याय महते जानराज्याय महते विश्वस्य भुवनस्याधिपत्याय समास्त्वाग्ने ॥ (पुनरभिषेको वरस्य) देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां सरस्वत्या वाचा यन्तुर्यन्त्रेणेममनुमामुष्यायणममुष्याः पुत्रमग्नेः साम्राज्येनाभिषिञ्चामीन्द्रस्य साम्राज्येनाभिषिञ्चामि ॥

(वध्वभिषेकः) चतुःशिखण्डा युवतिः सुपत्नी विनीयमाना महते सौभगाय । घृतन्दुहानामदितिर्जनाय सा मे धुक्ष्व सर्वान्भूतिकामान् ॥ उच्छ्रयस्व वनस्पते वर्ष्मन्पृथिव्या अधि । सुमिती मीयमानो वर्चोधा यज्ञवाहसे ॥ समिद्धस्य श्रयमाणः पुरस्ताद्ब्रह्म वन्वानो अजरं सुवीरम् । आरे अस्मदमतिं बाधमान उच्छ्रयस्व महते सौभगाय ॥ हिङ्कृण्वती वसुपत्नी वसूनां वत्स-

मिच्छन्ती मनसाभ्यागात् । दुहामश्विभ्यां पयो अघ्न्येयं सा वर्धतां महते सौभगाय ॥ (वधूतिलकं) यस्मै त्वं सुकृते जातवेद उ लोकमग्ने कृणवस्योनम् । अश्विनं सुपुत्रिणं वीरवन्तं गोमन्तं रयिन्नषते स्वस्ति ॥ (यजमानाभिषेकः) मक्षू देववतो रथः शूरो वा पृत्सु कासु चित् । देवानां य इन्मनो यजमान इयक्षत्यभीदयज्वनो भुवत् ॥ नकिष्टङ्कर्मणा नशन्न प्रयोशन्न योषति । देवानां य० ॥ न यजमान रिष्यसि न सुन्वान न देवयो । देवानां य० ॥ असदत्र सुवीर्यमुत त्यदाश्वश्व्यम् देवानां य० ॥ धनञ्जयः सहमानः पृतन्युरग्न इषमूर्जं यजमानाय देहि । विश्वाः पृतनाः सहमानः सहोभिरस्मे नो धेहि बहुधा विरूपं यत्प्रजा अनुजीवन्ति कामाः ॥

(यजमानतिलकं) यानि दक्षिणानि च्छर्दींषि तान्युत्तराणि कुर्याद्यजमानलोके वा एतानि यानि दक्षिणानि भ्रातृव्यलोक उत्तराण्युत्तरमेव यजमानमऽयजमानाद्भ्रातृव्यात्करोत्युत्तरो हि

यजमानोऽयजमानात् ॥ इत्यभिषेकमंत्राः समाप्ताः ॥

लग्नवेलायां स्वस्तिरेखां लिखित्वा ॥

शुक्लाम्बरधरं० विघ्नहर्त्तृ० सुमुखश्चैकदन्तश्च० ॥ इत्यादि मंगलं पठेत् ॥ (पञ्चदशी काण्डिका (१) अथ ब्राह्मदेयायाः प्रदानविधिं वक्ष्यामः ॥ (२) शुक्लपक्षस्य पुण्याहे पर्वणि वोदग्ग्रान्दर्भानास्तीर्य तेषूपविशतः प्राङ्मुखः प्रतिग्रहीता सामात्यः प्रत्यङ्मुखः प्रदाता ॥ (३) मध्ये प्रागग्रोदगग्रान्दर्भानास्तीर्य तेषूदकं सन्निधाय व्रीहीन्यवान्वोप्य दक्षिणत उदङ्ङासीन ऋत्विगुपयमनं कारयेत् ॥ (४) समेतेष्वाह ददानीति प्रतिगृह्णामीति त्रिरावेदयते ॥ (५) एतद्वः सत्यमित्युक्त्वा समाना वः सं वो मनांसीति ऋत्विगुभौ वधूवरौ समीक्षमाणो जपति ॥ भगवन्कन्यां ददात्वस्मै भवानिति त्रिर्दातारं प्रचोदयात् ॥ भगवन्कन्यां प्रतिगृह्णात्वस्माद्भवानिति त्रिर्वरम् ॥ (एवं त्रिरध्येत्यासम्)

ओं भगवन्कन्यां ददानि ते ३ । इति (त्रिर्दातारं जल्पयेत) ॥ उदकपूर्वं दत्तायां कन्यायां प्रणवोच्चारणपूर्वं ॥ ओं भगवन्कन्यां प्रतिगृह्णामि ३ ॥ इतित्रिर्वरम् ॥ तुभ्यं दत्ता कुमारी धर्मे चार्थे च कामे च त्वयेयं परिचरणीया। मत्वं प्रतिगृहीता वधूर्धर्मे चार्थे च कामे च मयेयं परिचरणीया ॥ एतद्वः सत्यं ३ ॥ इत्यृत्विक् ॥ एतन्नः सत्यं ३ ॥ इति दातृवरौ प्रतिवदतः । (एवं त्रिर्व्यत्यासम्) ॥ ततो वरस्योत्तरतो गृहीतहस्तायामेव उपविष्टायां वध्वां समाना वः सं वो मनांसीति ऋत्विग्वधूवरौ समीक्षमाणो जपति ॥ (जपादूर्ध्वं वरस्योत्तरत उपवेशयेदित्यन्ये) ।

समाना व आकूतानि समाना हृदयानि वः । समानमस्तु वो मनो यथा वः सुसहासति ॥ सं वो मनांसि सं व्रता समु चित्तान्याकरम् । अमी ये विव्रताः स्थन तान्वः सन्नमयामसि ॥ हस्तौ विमुच्य ॥ (चतुर्विंशी कण्डिका) ॥

(१) षडर्घ्यार्हा भवन्त्याचार्य ऋत्विग्राजा विवाह्यः प्रियः स्ना-

तकइति ॥ (२) अथैनमर्हयन्ति ॥ (३) आदौ च कर्मणः ॥ (४) अर्घ्यमुदकं सौषधं दर्भा इति ॥ (५) कंसे चमसे वा दध्यासिच्य मधु च वर्षीयसा पिधाय विष्टराभ्यां परिगृह्य पाद्यप्रथमैः प्रतिपद्यन्ते ॥ (६) मयि दोहोसि विराजो दोहः पाद्यायै विराजो दोहमशीयेत्याह्रियमाणमनुमन्त्रयते ॥ (पाद्यमर्घ्यं मधुपर्कं च विवाह्य इत्यर्थः) भगवन्विष्टरो विष्टरो विष्टरः, इदमासनमास्यताम् ॥ (७) विष्टरोऽसि मातरि सीदेति विष्टरमास्तीर्य तस्मिन्नुपविशति ॥ (८) विष्टर आसीनायैकैकं त्रिः प्राह॥ (९) नैव भोइत्याह न मार्षेति ॥ (१०) शन्नोदेवीरित्यपोऽभिमन्त्र्य पाद्याभिः प्रक्षालयते ॥ उशनसः काव्यस्य । शन्नोदेवीः०॥ लाजाश्च० भगवन्पाद्यं ३ । मयिदोहोसीतिवरः ॥ भगवन्पाद्यं ददानि ते ३ ॥ भगवन्पाद्यं प्रतिगृह्णामि ३ ॥ पाद्यपात्रे गृहीते सति तद्दक्षिणेन पाणिनाऽदाय सव्ये पाणौ निधाय स्वयं पादावनेनिज्यात् ॥ दक्षिणं पादमवनेनिज इदमहमस्मिन्कुले ब्रह्म-

वर्चसं दधाम्युत्तरं पादमवनेनिज इदमहं मां मयि तेजो वीर्य-
मन्नाद्यं प्रजां पशून्ब्रह्मवर्चसन्दधामि ॥ (११) आपोहिष्ठीयाभि-
रर्घ्यं परिगृह्य । शन्नोदे० । आपःक्षीरं० भगवन्नर्घ्यं ३ । मयिदोहो-
सीतिवरः ॥ भगवन्नर्घ्यं ददानि ते ॥ इति त्रिर्दात्रोक्तः पाद्यपा-
त्रवदर्घ्यपात्रमादाय भगवन्नर्घ्यं प्रतिगृह्णामीतित्रिरुक्त्वाऽऽपोहि-
ष्ठेति तिसृभिः कुशपवित्रेण वरोऽपः क्षिपेत् ॥ आपो हि ष्ठा
मयोभुवइत्यादि० । ततो विष्णवे महाराजाय समालभनं गन्धो
नमः । विष्णुपत्न्यै दुहित्रे लक्ष्म्यै समालभनं० । एवमर्घपुष्पधू-
पदीपादि ॥ यज्ञोपवीतमिति० ॥ विष्णवे महाराजाय यज्ञोप-
वीतं वासो नमः ॥ विष्णुपत्न्यै० वासोनमः ॥ विष्णोर्महारा-
जस्य सपत्नीकस्यार्घ्यदानार्चनविधिः सर्वः परिपूर्णोऽस्त्वित्युक्त्वा
अन्नंनमः २ इत्युदित्वा च ॥ [सावित्राणीति मधुपर्कः ॥ मधुपर्कं
विदुस्त्र्यङ्गं याज्ञिका यज्ञकर्मणि । माक्षिकं च घृतं चैव सुजातं
शोभनं दधि] ॥ भगवन्मधुपर्को मधुपर्को मधुपर्कः ॥ मयिदोहोसी-

त्यादिवरः ॥ भगवन् मधुपर्कं ददानि ते ३ ॥

(इति त्रिराह दाता) । (सावित्राणीति प्रतिग्रहीता) ॥ सावित्राणि सावित्रस्य देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां ॥ भगवन् मधुपर्कं प्रतिगृह्णामीति त्रिः ॥ (प्रतिग्रहीताऽञ्जलिना प्रतिगृह्य सव्ये पाणौ निदधाति) विष्टरोस्यन्तारिक्षमधिविश्रयस्व (इति वर्षिष्ठपात्रस्योपरि स्थितं विष्टर मुत्क्षिप्य विष्टरमवकृष्य, उरुत्वेत्यवसार्य)=(उद्घाट्य)

उरु त्वा वाताय, ॥ (तच्चक्षुरित्यवेक्ष्य) । तच्चक्षुर्देवहितं पुरस्तात् शुक्रमुच्चरत् । पश्येम शरदां शतं जीवेम शरदां शतम् ॥ (पृथिव्यास्त्वेति मधुपर्कपात्रं विष्टरेऽधःस्थिते भूमौ निधाय) पृथिव्यास्त्वानाभौ साधयामि॥(मधु वाता ऋतायते इति तिसृभिः प्रदेशिन्या प्रदक्षिणमालोडयति)॥ नारायणस्यार्षम् । मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः । माध्वीर्नः सन्त्वोषधीः॥ मधुनक्तमुतोषसा मधुमत्पार्थिवं रजः । मधु द्यौरस्तु नः पिता॥

मधुमान्नो वनस्पतिर्मधुमां अस्तु सूर्यः। माध्वीर्गावो भवन्तु नः॥

वसवस्त्वाऽग्निराजानो भक्षयन्तु, पितरस्त्वा यमराजानो भक्षयन्तु, रुद्रास्त्वा सोमराजानो भक्षयन्तु, आदित्यास्त्वा वरुण-राजानो भक्षयन्तु, विश्वे त्वा देवा बृहस्पतिराजानो भक्षयन्त्विति (प्रदक्षिणं प्रतिदिशं प्रतिमन्त्रं पात्रस्यान्तेषु लेपान्निर्माष्टि) ॥ (यन्मधुनो मधव्यस्येति च) ॥ यन्मधुनो मधव्यस्य परमस्यान्नाद्यस्य परममन्नाद्यं रूपं तेनाहं मधुनो मधव्यस्य परमस्यान्नाद्यस्य परमोऽन्नादो मधव्यो भूयासं ॥ अर्च्यै विद्यायै यशोसि श्रियै यशोसि यशसे ब्रह्मणो दीप्तिरसि ॥

(पवित्रंनिधार्य) सत्यश्रीर्यशःश्रीर्मयि श्रीः श्रीः श्रयतामिति ॥ (मधुपर्कस्य चतुः प्राश्नात्यङ्गुष्ठद्वितीयाभिः कनिष्ठया प्रथममेवमनुपूर्वं सर्वाभिस्तदवशिष्टं सुहृदे प्रयच्छति) ॥ भगवन्नाचमनीयमाचमनीयमाचमनीयमित्युक्तेऽमृतोपस्तरणमसीत्यप आचामति ॥ [तस्मा असिपाणिर्गां प्राह १५ ॥

तां शास्ति १६ ॥ ममचामुष्य च पाप्मानं जहि हतो मे पाप्मा पाप्मानं मे हत १७ ॥ ओङ्कुरुतेति १८ ॥ चतुरो नानागोत्रान्ब्राह्मणान्भोजयेत् ॥ एष आद्योपायः १६ ॥ यद्युत्सृजेन्माता रुद्राणामिति जपेत् ॥ माता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः । प्र नु वोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ठ ॥ सूयवसाद्भगवती हि भूया अथो वयं भगवन्तः स्याम । अद्धि तृणमघ्न्ये विश्वदानी पिब शुद्धमुदकमाचरन्ती २० ॥ ओमुत्सृजत तृणान्यत्त्वित्युक्त्वा तामुत्सृष्टां पशुमङ्क्त्वा २१ ॥ नाऽमांसो मधुपर्कः स्यादिति ह विज्ञायते २२ ॥ अपिवा घृतौदन एव स्यात् २३ ॥ मधुपर्के च यज्ञे च पितृदैवतकर्माणि । अत्रैव पशवो हिंस्या नान्यत्र मनुरब्रवीत्] ॥ (इति मधुपर्कविधिः) ॥ (योन्यपोह्त) ॥ (विष्णवे यज्ञोपवीत दक्षिणां दद्यात्) ॥ (गंगव्यस) ॥ (अन्तरा इत्युदकमानीय) । (पञ्चविंशी काण्डिका) अन्तरा

ऋजवः सन्तु पन्था येभिस्सखायो यन्ति नो वरेयम् । समर्यमा सम्भगो नो निनीयात्सञ्जास्पत्यं स्वयममस्तु देवाः ॥ (इत्युदाहारं प्रहिणोति ॥ शमीशाखया सपलाशया पिधायाहरेत् ॥ यदुक्तम् ॥ शमीशाखा पलाशी च मन्त्रश्चोदकपूर्वकम् । चतुर्विधं तु यत्पूतं तच्च गाङ्गोदकं स्मृतम् ॥ एतासामेवापामुदकार्थान्कुर्वीत ॥) (ततः स्नानमण्डपं कन्यां नीत्वा चतुष्पादे भद्रपीठे संस्थाप्य शन्नइति स्नापयेत्) । शन्न आपो धन्वन्याः शन्नः सन्त्वनूप्याः । शन्नः समुद्रिया आपः शमु नः सन्तु कूप्या या इमाः ॥ इत्यऽकेवलाभिरद्भिः स्नाताम् । यदुक्तं । (सर्वौषधीभिस्संयुक्ताः शुष्का आमलकत्वचः । स्नाने माङ्गलिके प्रोक्ता अलक्ष्मीनोदनं हितम्) । (या अकृन्तन्निति वसनहस्तः परिधानार्थं प्रचोदयति ऋत्विक्) । या अकृन्तन्या अवयन्या अतन्वत याश्च देवीरन्तां अभितोऽततन्थ (ददन्त) । तास्त्वा देवीर्जरसा संव्ययन्त्वायुष्यतीदं परिधत्स्व वासः ॥ (इत्यहतं वासः परिधाप्या-

शासानेत्यन्तरतो मौञ्जेन दार्भेण योक्त्रेण वा स्वयंवधूः सन्नह्य-ति ॥ आशासानेति वधूरिमं मन्त्रं वाचनीया ॥) आशासाना सौमनसं प्रजां सौभाग्यं रयिम् । अग्नेरनुव्रता भूत्वा सन्नह्ये सुकृताय कम् ॥ (प्रेतोमुञ्चामीति तिसृभिः स्नानदेशादुदानीय याअकृन्तन्नित्येतयैवोत्तरं च वासः परिधापयति) ॥ प्रेतो मुञ्चामि नामुतः सुबद्धाममुतस्करत् । यथेयमिन्द्र मीढ्वः सुपुत्रा सुभगा सति ॥ पूषा त्वेतो नयतु हस्तगृह्याश्विनौ त्वा प्रवहतां रथेन । गृहान्गच्छ गृहपत्नी यथासो वशिनी त्वं विदथे मा वदासि ॥ माविदन्परिपन्थिनो य आसीदन्ति दम्पती । सुगेभिर्दुर्गमतीतामपद्रान्त्वरातयः ॥ (इत्युदानीयोक्तं वाससः कर्म) [याअकृन्तन्निति०] ॥ आचारिकाणि ॥ ७ ॥ [अस्मिन्नवसरे देशजातिकुलोचितानामाचारिकाणां मङ्गल्यानां कर्मणां कालः । यथा कश्मीरेषु श्वश्रूरन्या वाऽविधवा वधूवरयोरादौ पादाभ्यामारभ्य शिरो यावत्पूजां विधाय पुनः शिरसि मङ्गल्यमालां बध्नाति] ॥

यजमानपत्नीमानीय तीर्थेस्नेयमित्यादि आत्मने नारायणायाधारशक्त्यै धूपदीपसंकल्पात्सिद्धिरस्तु धूपोनमः दीपोनमः । ओंतत्सदद्य० महेश्वरादिभ्यो गौर्यादिभ्यश्च कन्योद्वाहनिमित्ते धूपदीपसंकल्पात्सिद्धिरस्तु धूपोनमः दीपोनमः ॥

महेश्वरस्त्र्यम्बकश्च ईशानः शिव एव च । भवः शर्वश्च रुद्रश्च दक्षिणादिक्रमेण तु इति [वरस्य पादजानुस्कन्धशिरस्सु सप्तसु स्थानेषु श्वश्रूः पुष्पाणि निदध्यात्] यथा–महेश्वराय नमः दक्षिणपादे । त्र्यम्बकाय नमः वामपादे । ईशानाय नमः दक्षिणजानुनि । शिवाय नमः वामजानुनि । भवाय नमः दक्षिणस्कन्धे । शर्वाय नमः वामस्कन्धे । रुद्राय नमः शिरसि ॥ गौरी चैव तु गायत्री सावित्री च सरस्वती । उमा कान्ता भवानी च वामावर्तेन पूजयेत् ॥ यथा–गौर्यै नमः वामपादे । गायत्र्यै नमः दक्षिणपादे । सावित्र्यै नमः वामजानुनि । सरस्वत्यै नमः दक्षिणजानुनि । उमायै नमः वामस्कन्धे । कान्तायै

नमः दक्षिणस्कन्धे । भवान्यै नमः शिरसि ॥ रुद्राय महाराजाय समाल० । रुद्रपत्न्यै दुहित्रे भवान्यै समा० । एवमर्घपुष्पधूपदीपाः ॥ एवं पूजां विधाय शिरसि मंगल्यमालां बध्नीयात् ॥ पुष्पवतीः प्रसूमतीः फलिनीरफला उत । अश्वा इव सजित्वरीर्वीरुधः पारयिष्णवः ॥ रुद्राय महाराजाय मङ्गल्यमाल्यं वासो नमः । एवं रुद्रपत्न्यै भवान्यै मंगल्यमाल्यं वासो नमः । रुद्रस्य महाराजस्य सपत्नीकस्य अर्घ्यदानाद्यर्चनविधिः० ॥ अन्नंनमः २ इतिचोक्त्वा । शन्नोदेवी० रुद्राय महाराजाय अपोशानं० । पुनः शन्नोदेवी रुद्राय महाराजाय दक्षिणायै० । (मंगल्यमाल्यदक्षिणा) नैवेद्यम्–अमृतमस्तु इत्यादि० । (वधूवरयोर्मुखेपि नैवेद्यं समर्प्य शेषांशो वरमातुलाय देयः) ॥ [आचारिकाणि द्रव्याणि वस्त्राण्याभरणानि च । मणिमुक्ताप्रवालानि यथाशक्ति प्रदीयते ॥ गोभूहिरण्यमश्वांश्च वस्त्राणि विविधानि च । अन्यानि चैव दानानि यथाविभवमर्पयेत् ॥ अस्मिन्नवसरेऽलङ्करणस्वदायेषु परस्परं च-

टोपचटिका ग्राह्या] ॥

(तूष्णीं निर्मन्थ्यं श्राष्ट्रात्सान्तपनं यत्र दीप्यमानं वा बहिरग्निमुपसमाधाय सूतकाग्न्यादिवर्जम्) ॥

पात्रं तिला० ॥ अग्निं परिसमुह्य पर्युक्ष्य परिषिच्य ॥ परिस्तीर्य १६ । अग्नये समनमत्० । वायवे सम० सूर्याय सम० वरुणाय सम० साम्ने सम० ब्रह्मणे सम० राज्ञे सम० रथाय सममनमत्० ॥ (उद्वाहेऽक्षतसक्तवो हविः । विवाहे लाजाः) उत्तरतः संस्तीर्णे० ॥ अग्नये पुष्टिपतये प्रजापतये जुष्टं निर्वपामि । [सक्त्वर्थं यवान्निर्वपेत्] । एवं प्रोक्षामि ॥ [अक्षतसक्तूनां प्रेक्षणं न भवति] । पृश्न्याः पयोसीत्यादि ॥ इदंहविः प्रजननं०। आत्मनो० अग्नये पुष्टिपतये प्रजापतये अग्नये वैश्वानराय इदमाज्यमर्पयामि नमः ॥ [वरवधूयजमानानामाज्यदर्शनम्] । (आज्यभागान्तं हुत्वा) । (अपरेणाग्निमऽनो रथं वाऽ-

बस्थाप्य वधूवरौ प्राङ्मुखौ तिष्ठन्तौ योगे योगे इति मंत्रावृत्त्या युनक्ति; कश्यपस्य) । योगे योगे तवस्तरं वाजे वाजे हवामहे सखाय इन्द्रमूतये ॥ (दक्षिणमितरमुत्तरमितरां) । [तूष्णीं विमुच्य ।] खे रथस्य खेऽनसः खे युगस्य शतक्रतो । अपालामिन्द्रस्त्रिष्पूत्वा करोतु सूर्यवर्चसमिति । [हिरण्यं निष्टक्यं दर्भैर्बद्ध्वाऽध्यधि मूर्धनि दक्षिणस्मिन्युगतर्मण्यङ्गिरवचारयते ॥ शन्ते हिरण्यमिति] । शन्ते हिरण्यं शमु सन्त्वापः शन्ते मेथी भवतु शं युगस्य तर्म्म । शन्त आपः शतपवित्रा भवन्त्वेना पत्या तन्वा संसृजस्वेति ॥ [ततो वरस्योत्तरतो वधूमुपवेश्य दक्षिणतः पुमान्भवत्यथ जुहोति ।] अग्नये जनिविदे स्वाहा । सोमाय जनिविदे स्वाहा । गन्धर्वाय जनिविदे स्वाहा । (आयुषः प्राणमिति सन्तनीर्जुहोति) ॥ आयुषः प्राणमित्येकादश नाभेर्भौवनस्य। आयुषः प्राणं सन्तनु स्वाहा इत्यादि० । दिवः स्वरित्यन्तम् ॥ [आकूतमिति त्रयोदशाहुतीर्द्वादशगृहीतेन प्रतिमन्त्रं जयाञ्जुहु-

यादिति लौगाक्षिः] ॥ तेजोसि ४ ॥ (इति त्रिवारम्) ॥ आकूतमाकूतिश्चेत्यादि॰ पृतना अभिष्याम स्वाहा इत्यन्तम् ॥

[चतुर्गृहीतं जुहोत्यभ्यातानैः] । तेजोसि॰ ॥ [अभ्यातानान्देवानाम्] । बृहस्पतिपुरोहिता इत्यादि॰ देवहूत्यामिति यावत् ॥

[ऋताषाडिति द्वादशभिर्वैडन्तैर्हुत्वा [स्रुवेण] । राष्ट्रभृतो राष्ट्रभृतामौपनिषदानामृषीणाम्] ॥ ऋताषाड् ऋतधामाग्निरिति॰। स नो भुवनस्य पते इति त्रयोदशी रथमुखे ॥

अग्निर्भूतानामित्येकविंशतिमाधिपत्यानि जुहोति । अग्निर्भूतानामधिपतिः स मावतु तस्मै स्वाहा । यमः पृथिव्या अधि॰। वायुरन्तरिक्षस्याधि॰ । सूर्यो दिवोऽधिप॰ । चन्द्रमा नक्षत्राणामधि॰ । विष्णुर्दिशामधि॰ । पूषा पथीनामधि॰ । त्वष्टा रूपाणामधि॰ । सविता प्रसवानामधि॰ । इन्द्रो ज्येष्ठानामधि॰ । मित्रः सत्यानामधि॰। वरुणो धर्माणामधि॰। रुद्रः पशूनामधि॰। बृहस्पतिर्ब्रह्मणामधि॰ । ब्राह्मणो वाचामधि॰ । सोम ओषधी-

नामधि० । समुद्रः स्रवत्यानामधि० । अन्नं साम्राज्यानामधिपतिस्तन्मावतु तस्मै स्वाहा ॥ गायत्री छन्दसामधिपत्नी सा मावतु तस्यै स्वाहा । मरुतो गणानामधिपतयस्ते मावन्तु तेभ्यः स्वाहा । पितरः पितामहाः परेऽवरेभ्यस्ते नः पान्तु ते नोऽवन्त्वस्मिन्ब्रह्मण्यस्मिन्कर्मण्यस्मिन् क्षेत्रेऽस्यामाशिष्यस्यां पुरोधायामस्यान्देवहूत्यां स्वाहा ॥ आकूत्यै त्वा स्वाहा । कामाय त्वा स्वाहा । समृद्ध्यै त्वा स्वाहा । [हिरण्यगर्भ इत्यष्टाभिः प्रत्यृचम् ॥] [सरितां काश्यपीनां सरितो यज्ञकीर्तिमिच्छमानानाम्]।

ॐ हिरण्यगर्भः० १ । यः प्राणतो० २ । य ओजोदा०३। येन द्यौरुग्रा० ४ । य इमे द्यावा० ५ । यस्येमे० ६ । आपो ह यन्महती० ७ । आ नः प्रजाञ्जन० ८ ॥ [ॐभूःस्वाहेति महाव्याहृतिभिश्चतसृभिः] ॥ ॐ भूः स्वाहा ॐ भुवः स्वाहा ॐ स्वः स्वाहा । ॐ भूर्भुवः स्वः स्वाहा ॥ [अग्न आयूंषीत्यग्निपावमानीभिस्तिसृभिर्हुत्वा हुत्वा कन्याया मूर्धनि सम्पातानवनयेत्

या ते पतिघ्नीरिति] । (अग्न आयूंषीत्यग्नौ ॥ कूश्मर्षीणाम्) ॥

अग्न आयूंषि पवस आसुवोर्जमिषञ्च नः । आरे बाधस्व दुच्छुनाम् स्वाहा ॥ या ते पतिघ्नी तनूरपतिघ्नीं ते तां करोमि स्वाहा ॥ (इति स्वाहान्तेन वध्वा मूर्धन्यवनयेत्) (एवमुत्तरत्र) ॥ (अग्निर्ऋषिरित्यग्नौ) ॥ अग्निर्ऋषिः पवमानः पाञ्चजन्यः पुरोहितः । तमीमहे महागयम् स्वाहा । (या तेऽपुत्रियेतिमूर्धनि) यातेऽपुत्रिया तनूः पुत्रियान्ते तां करोमि स्वाहा । (अग्ने पवस्वेति अग्नौ ॥) अग्ने पवस्व स्वपा अस्मे वर्चस्सुवीर्यम् । दधद्रयिम्मयि पोषम् स्वाहा ॥ या तेऽपशव्या तनूः पशव्यां ते तां करोमि स्वाहा (इतिमूर्धनि) ॥

प्राक् पाणिग्रहणादक्षतसक्तूनां यागः । अग्निं पुष्टिपतिं प्रजापतिं च यजेत ॥ तेजोसि० ॥ अग्निना रयिमश्नवत्पोषमेव दिवे दिवे । यशसं वीरवत्तमम् स्वाहा ॥ प्रजापते नहि त्वदन्य एता विश्वा जातानि परिता बभूव । यत्कामास्ते जुहुम स्तन्नो

अस्तु वयं स्याम पतयो रयीणाम् स्वाहा ॥

(उदगग्नेर्दर्भेषु प्राचीमवस्थाप्य शुचिः पुरस्तात् प्रत्यङ्मुखः यन्ता) ।' देवस्य ते सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां हस्तं गृह्णामीति (हस्तं गृह्णाति दक्षिणमुत्तानं साङ्गुष्ठं नीचारिक्तमरिक्तेनैवं सव्यं सव्येन) ॥

(गृभ्णामीति चतस्रो वरं वाचयति) ॥ गृभ्णामि ते सुप्रजास्त्वाय हस्तौ मया पत्या जरदष्टिर्यथासत् (सः) । भगो अर्यमा सविता पुरन्धिर्मह्यं त्वादुर्गार्हपत्याय देवाः १ ॥ तां पूषञ् शिवतमामेरयस्व यस्यां बीजं मनुष्या वपन्ति । या न ऊरू उशती विश्रयाते यस्यामुशन्तः प्रहराम शेपम् २ ॥ सोमोऽददद्गन्धर्वाय गन्धर्वोऽददद्ग्नये । रयिं च पुत्रांश्चादादग्निर्मह्यमथो इमाम् ३ ॥ सोमः प्रथमो विविदे गन्धर्वो विविद उत्तरः । तृतीयो अग्निष्टे पतिस्तुरीयोऽहं मनुष्यजः ४ इति ॥

[ततो गाथा वरं वाचयति ॥ सरस्वति प्रेदमवेत्यनुवाकम् ।

उभावित्येके] ॥ सरस्वति प्रेदमव सुभगे वाजिनीवति । यान्त्वा विश्वस्य भूतस्य प्रागायामस्यस्याग्रतः ॥ १ ॥ यान्ते सर्वं समभर- यस्यां विश्वमिदं जगत् । तामद्य गाथां गास्यामि या स्त्रीणामु- त्तमं मनः ॥ २ ॥ य इह पूर्वे जना आसन्पूर्वे पूर्वतरेभ्यः । मू- र्धन्वांस्तेभ्यो गन्धर्वः पुरा देवेभ्य आतपत् ॥ ३ ॥ य एति सर्व- तः प्रागभ्यो दिग्भ्योऽधिपवमानः । मूर्धन्वान्० ॥ ४ ॥ स भगवो न मरिष्यस्यहश्चेदस्मि भेषजम् । मूर्धन्वान्० ॥ ५ ॥ हिरण्यवर्णो वैरूपः स त्वा मन्मनसङ्करोतु । यद्राजा याति समितिं समुद्र- मिव सौभ्रवः ॥ ६ ॥ न वातस्याभि वायते नोद्धातस्याभि धीय- ते । न वातस्य धुरं वहतो नोद्धातस्यापमीयते ॥ ७ ॥ आ स- त्यहरितो रथः सौभ्रवः सुहिरण्ययः । तं वात इदुभ्रजीयत्युद्धातो हढया धुरा ॥ ८ ॥ तवैव राजन्दुन्दुभयस्तव दुन्दुभिरानकः । तव वातोद्धाता अश्वौ तव चैत्ररथं वनम् ॥ ९ ॥ ते शुक्रं शक्र-

१ समभवदित्यपि ॥ २ नेद्धातस्याद्धधीयते ।

स्याविन्दन्पराश्वन्निहितङ्कुहा । मूर्धन्वांस्तेभ्यो गन्धर्वः पुरा जत्रुभ्य आतृदः ॥ १० ॥ हिरण्यवर्णं सुभृतं शोभमानं कन्याया हस्तं परिगृह्य पुण्यम् । सा पुत्रकामा सुभगाय भर्त्रे भव वशीया-न्गिरिवत्स्थिराय ॥ ११ ॥ वैरम्पे मुनिपर्वते गिरौ हरिनसङ्काशे। संकल्परमणेऽमरा उभौ सुमनसौ चरावः ॥ १२ ॥ आर्णिव रथवेष्टसि वने वारिवर्षण्ये । अप्सराः सूर्यवर्चसिनी वशिनी मन्मना भूयाः ॥ १३ ॥ यासा उपरि निष्ठति वने वारिवर्षण्ये । वसुगा सूर्यवर्चसिनी वशिनी मन्मना भूयाः॥१४॥ अश्वत्थक उपरि श्येनो रमणीयतरो नाम । तस्मिन्ह रम्भा रमते शक्र इव परितकम्यायाम् ॥ १५ ॥ आस्यन्दमाना सुभगे निर्गिरिभ्यः सरस्वति । मातेव दुहितृभ्यः कुल्याभ्यो विभजा वसु ॥ १६ ॥ मध्यं तच्छन्दस आहुर्यत्रादधुर्नाम परेति देवाः । अरुणपिशङ्गोऽश्वोऽस्य दक्षिणा यस्तद्वेद स इहागन्तुमर्हति॥१७॥ इषीकवर्णे लेखभ्रूः सुभगे सुस्मिते । मूर्धन्वांस्त्वा गन्धर्वो माम-

भिनियच्छतु ॥ १८ ॥ उभये त्वा देवगन्धर्वाः सध्यञ्चो विहृयामहे । तेषां त्र्यतरान्कामयसे तानभ्येहि सरस्वति ॥ १६ ॥ अभ्यावर्तेऽहन्देवान्गायतः कामयामहे । गायन्तं स्त्रियः कामयन्ते न तथा ब्रह्मवादिनम् ॥ २० ॥ या सा उपरि पर्वत आत्मना रममाणेव । द्यौममृद्धी ह वा असि त्वोन ओजासि शृणोत्विति ॥ २१ ॥ [यदि पृथक्कृत्वं प्रदक्षिणमग्निमानीय तत्रैवोपवेश्य संस्थापयेत् ॥ ततो वरस्य पक्षाद्यजमानानां तिलकं कारयेत् । आशीर्वचांसि ।] तत ऋतुतिथियागादितन्त्रसमाप्तिः ॥

पुनरग्निं परिसमुह्य पर्युक्ष्य परिषिच्य ॥ परिस्तीर्य १६ ॥ इदमर्यम्णे इदं गन्धर्वाय इदं त्र्यम्बकायेति लाजाञ्शमीपर्णमिश्राञ्शूर्पे सपवित्रे तस्मिन्नेवाग्नौ संस्कृत्य चतुरञ्जलिमात्रान्संकल्पयेत् ॥ पृरन्याः पयोसीत्याज्यसंस्कारः । [यजमानस्यैवाज्यद-

---

१ शृणोमीतिपाठान्तरम् ।

र्शनम्] आत्मनो० कन्योद्वाहनिमित्तं अर्यम्णे गन्धर्वाय त्र्यम्ब-
काय अग्नये वैश्वा० इदमाज्यमर्प० ॥ आज्यभागान्तं हुत्वा ।
य इमे द्यावा इति चतस्रः । य इमे द्यावा० । यस्येमे विश्वे० । आ-
पो ह यन्महती० । आ नः प्रजां० । ॐभूःस्वाहेतिमहाव्याहृतयः।
ॐभूः स्वाहा ॐभुवः स्वाहा ॐस्वः स्वाहा ॐभूर्भुवःस्वः स्वा-
हा ॥ (अग्न आयूंषि-इत्यग्निपावमानीभिस्तिसृभिः अग्नौ हुत्वा२
सम्पातांश्च मूर्ध्नि जुहुयात्) ॥ अग्न आयूंषि० इत्यग्नौ ॥ या ते
पतिघ्नी तनूरपतिघ्नीं ते तां करोमि स्वाहा इतिवधूमूर्धनि ॥ अ-
ग्निर्ऋषिः पव० इत्यग्नौ । या तेऽपुत्रिया तनूः पुत्रियां ते तां क-
रोमि स्वाहा इतिमूर्ध्नि ॥ अग्ने पवस्व० इत्यग्नौ ॥ या तेऽपशव्या
तनूः पशव्यां ते तां करोमि स्वाहा इतिमूर्ध्नि ॥ ततोऽग्नये जनि-
विदे स्वाहा । सोमाय जनिविदे स्वाहा । गन्धर्वाय जनिविदे स्वा-
हा ॥ आयुषः प्राणमित्यादि० । तेजोसि इति द्वादशगृहीतेन आ-
कूतंचेत्यादि० ॥ तेजोसि ४ । बृहस्पतिपुरोहिता० इत्यादि । (स्रुवेण)

ऋताषाड् ऋतधामा० इत्यादि० ॥ अग्निर्भूता० । यमःपृथिव्या०। वायुरन्त० । सूर्यो दिवो० । चन्द्रमा नक्ष० । विष्णुर्दिशा० । पूषा प० । त्वष्टा रूपा० । सविता प्रस० । इन्द्रो ज्येष्ठाना० । मित्रः सत्या० । वरुणो ध० । रुद्रः पशूनां० । बृहस्पतिर्ब्रह्म० । ब्राह्मणो वाचा० । सोम ओषधीनां० । समुद्रः स्रवत्यानां० । अन्नं साम्राज्यानामधिपतिस्तन्मावतु तस्मै स्वाहा । गायत्री छन्दसामधिपत्नी सा मावतु तस्यै स्वाहा । मरुतो गणानां अधिपतयस्ते मावन्तु तेभ्यः स्वाहा । पितरः पितामहाः परेऽवरेभ्यस्ते नः पान्तु ते नोऽवन्त्वस्मिन् ब्रह्मण्यस्मिन्कर्मण्यस्मिन् क्षेत्रेऽस्यामाशिष्यस्यां पुरोधायामस्यां देवहूत्यां स्वाहा ॥ आकूत्यै त्वा० । कामाय त्वा० । समृद्धै त्वा० । हिरण्यगर्भः० १ । यः प्राणतो० २ । य ओजोदा० ३ । येन द्यौरुग्रा० ४ । इत्यन्तं जुहुयात् ।

(तत उत्तरेणाग्निं वधूवरावानीय पश्चादग्नेर्दर्भेषूपवेश्य सा-त्वमसीति वरं वाचयति) ॥ सा त्वमस्यमोऽहममोऽहमस्मि सा

त्वम् । ता एहि विवहावहै पुंसे पुत्राय कर्तवे । रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय ॥ (अग्निमभिदक्षिणमानीय उभौ प्राङ्मुखौ अवस्थाप्य एह्यश्मानमिति वरं दक्षिणेन पदा-श्मानमास्थापयति) ॥ एह्यश्मानमातिष्ठाश्मेव त्वं स्थिरो भव । कृण्वन्तु विश्वेदेवा आयुष्टे शरदः शतमिति ॥ (आतिष्ठेममिति वधूम्) । आतिष्ठेममश्मानमश्मेव त्वं स्थिरा भव । प्रमृणीहि दुवस्यवस्सहस्व पृतन्यतः इति । (ततो वध्वा अञ्जलौ ऋत्वि-गाज्यस्योपस्तृणाति । इदं हविरितिलाजान्वरोऽभिमृशति) ।

(लायभोय) इदं हविः प्रजननं मे अस्तु० ॥ (अथा-स्यै शमीपर्णमिश्रांल्लाजानञ्जलिना प्राजापत्यतीर्थेनावपति भ्राता ब्रह्मचारी वा कश्चित् ।) (तानविच्छिन्दती जुहोति अर्यमणन्नु देवमिति वदन्ती वधूः) अर्यमणन्नु देवं कन्या अग्निमयक्षत । सोऽस्मान्देवो अर्यमा प्रेतो मुञ्चातु नामुष्य गृहेभ्यः स्वाहा ॥ (अमुष्येति वरस्य षष्ठ्यन्तं नाम गृह्णाति वधूः ।)

(अग्निर्मा जनिमानिति वरं वाचयति गुरुः ॥) अग्निर्मा जनिमाननया जनिमन्तं करोतु । जीवपत्निर्भूयासम् ॥ (इयंनारीति सर्वत्रानुषजति) । इयं नार्युपब्रूते तोकमान्यावपन्तिका । दीर्घायुरस्तु मे पतिरेधन्तां ज्ञातयो मम ॥ इति ॥

(एवं द्विरुत्तरं पर्ययणे पर्ययणे [प्रदक्षिणमावृत्य] लाजाहोमो यजमानं चाश्मानं चास्थापयति ।) एह्यश्मानमातिष्ठाश्मेव त्वं स्थिरो भव । कृण्वन्तु विश्वेदेवा आयुष्टे शरदः शतम् । आतिष्ठेममश्मानमश्मेव त्वं स्थिरा भव । प्रमृणीहि दुवस्यवः सहस्व पृतन्यतः ॥ (गन्धर्वमितिवदन्ती वधूर्लाजाञ्जुहोति) । गन्धर्व पतिवेदनं कन्या अग्निमयक्षत । सोऽस्मान्देवो गन्धर्वः प्रेतो मुञ्चातु मामुष्य गृहेभ्यः स्वाहा ॥ [इति द्वितीयो होमः]॥ (सोमो मा ज्ञातिमानिति वरं वाचयति गुरुः) ॥ सोमो मा ज्ञातिमाननया ज्ञातिमन्तं करोतु । जीवपत्निर्भूयासमियं नारीति सानुषङ्गः ॥ इयं नार्युपब्रूते तोकमान्यावपन्तिका । दीर्घायु-

रस्तु मे पतिरेधन्तां ज्ञातयो मम ॥ प्रदक्षिणमावृत्य एह्यश्मानमातिष्ठेति पूर्ववदेव ॥ त्र्यम्बकमिति वधूः ॥ त्र्यम्बकं त्यजामहे सुगन्धि पतिपोषणम् । उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामुष्य गृहेभ्यः स्वाहा ॥ (इति तृतीयो होमः)॥ पूषामेति वरं वाचयति गुरुः ॥ पूषा मा पशुमाननया पशुमन्तं करोतु । जीवपत्निर्भूयासमियन्नारीति सानुषङ्गः । इयं नार्युपब्रूते तोक्मान्यावपन्तिका । दीर्घायुरस्तु मे पतिरेधन्तां ज्ञातयो मम॥

(वधूवरौ चोपवेश्य) मारुता वातहोमाश्च लाजाहोमाश्च नित्यशः । आसीनेन न होतव्या आघारो दक्षिणस्तथा ॥ [शुक्रज्योतिश्च चित्रज्योतिश्चेत्यादयश्चमस्थानके मारुतहोमाः । ततः समुद्रो नभस्वानार्द्रदानः शम्भुरित्यादयो वातहोमाः ॥ ऊर्ध्वो अध्वरो दिविस्पृगित्याघारो नाम यज्ञः] ॥ तत ऋतुतिथियागादि येन रक्षसि दाशुष इत्यन्तम् ॥ सावित्राणि० अर्यम्णे गन्धर्वाय त्र्यम्बकाय नमो नै० ॥ इळामग्ने० इति शूर्पेण ॥ (शिष्टान् स्विष्टकृते

जुहोति शूर्पेण कर्ता) (वरोदक्षिणाम्, अथवा वरो दक्षिणा) [वरं गां तु विजानीयाच्चतुर्वर्षामिति श्रुतिः । दक्षिणानां विशिष्टं तु वरं तमपरेऽब्रुवन्] ॥ त्वन्नोअग्ने०, इत्यादि० । मानोज्योतिरितिसप्तांते ॥ (तूष्णीं हस्तौ विमुच्य) । (वि ते मुञ्चामीति होमकर्ता वध्वाः सन्नहनं विमुच्यमानमनुमन्त्रयते मन्त्रलिङ्गात्) ॥ वि ते मुञ्चामि रशनां वि रश्मीन्वि योक्त्राणि परिचर्तनानि । धत्त्वायास्मभ्यं द्रविणेह भद्रं प्र मा ब्रूताद्भागदां देवताभ्यः ॥ तत उत्तरतोऽग्नेर्दर्भेषु प्राचीं प्रक्रामयत्येकमिषे, द्वे ऊर्जे, त्रीणि रायस्पोषाय, चत्वारि मयोभवाय, पञ्च प्रजाभ्यः, षडृतुभ्यः, दीर्घायुत्वाय सप्तमं, "सखा सप्तपदा भव सुमृळीका सरस्वति मा ते व्योम सन्दृशे (शि) विष्णुस्त्वान्वेतु,, इत्येवं सप्तमं पदं यावदनुषङ्गः । (तच्चक्षुरित्यादित्यमुपस्थापयति)। तच्चक्षुर्देवहितं पुरस्तात्० ॥ (नोदकेन नवा वाचा कन्यायाः पतिरुच्यते । पाणिग्रहणसंस्कारात्पतित्वं सप्तमे पदे ॥)

(अस्तमितेऽग्निम्) (रात्रौ विवाहे तद्वत्तुरिति अग्निमुपस्थापयेत् इत्यर्थः) ॥ जीवन्तीं पश्यसि, पश्यामि ॥ ध्रुवं पश्यसि, पश्यामि ॥ स्वस्त्यात्रेयं पश्यसि, पश्यामि ॥ अरुन्धतीं पश्यसि, पश्यामि (एतेषां पश्यसीत्याह ऋत्विक्, पश्यामीति वधूः प्रत्याह) ॥ सुमङ्गलीरियं वधूरिमां समेत्य पश्यत । सौभाग्यमस्यै दत्त्वायाऽथास्तं विपरेतनेति वीक्षिताननुमंत्रयते ॥ [उदुत्तममिति प्रागुदीचीमावसथं यतीमनुमंत्रयते । यतो वा स्यात् ॥] उदुत्तममारोहन्ती व्यस्यन्तीव पृतन्यतः । मूर्धानं पत्युरारोह प्रजया च विराड्भव ॥ इमां त्वमिन्द्र मीढ्वः सुपुत्रां सुभगां कृणु । दशास्यां पुत्रानाधेहि पतिमेकादशङ्कृधि ॥ सम्राज्ञी श्वशुरे भव सम्राज्ञी श्वश्र्वां भव । ननान्दरि सम्राज्ञी भव सम्राज्ञी अधिदेवृषु ॥ स्नुषाणां श्वशुराणां च प्रजायाश्च धनस्य च । पतीनां देवराणां च सजातानां विराड्भव ॥ (ततो जयवार्तिकपारणानि अर्थात् वध्वा भिक्षापात्रे दध्यक्षोटयुक्ते वरयजमानद्वयरूप्य-

कार्पणम् ॥) (पंचमस्थानं) ॥ [तदनु सूर्यवर्गान्पठित्वा ब्राह्मणपूजनं कुर्यात्] ॥

सत्येन सप्तचत्वारिंशत्साविश्रीसूर्यात्मदैवतमानुष्टुभं पञ्चभिः सोममस्तौत्पराभिः स्वविवाहं सप्तदश्यान्देवान्परया सोमार्कौ परया चन्द्रमसं परा नृणां विवाहमन्त्राशीःप्राया नवोनवस्तिस्रोऽन्त्यरा गृभ्णामीति द्वे द्वे यदश्विनापूषाघोरचक्षुरिति त्रिष्टुभस्तृष्टमुरोबृहती पूर्वापरमिह प्रियमानःप्रजां जगत्यः ॥ संसृष्टमिति विज्ञेयाः सौर्याः पञ्चाशतमृचः । अध्येयास्ता विवाहेषु नायुग्भिर्वेदपारगैः ॥ संसृष्टन्धनमुभयं समाकृतमस्मभ्यन्धत्तां वरुणश्च मन्युः । भियन्दधाना हृदयेषु शत्रवः पराजितासो अपनिलयन्ताम् ॥ १ ॥ सत्येनोत्तभिता भूमिः सूर्येणोत्तभिता द्यौः । ऋतेनादित्यास्तिष्ठन्ति दिवि सोमो अधिश्रितः ॥ २ ॥ सोमेनादित्या बलिनः सोमेन पृथिवी मही । अथो नक्षत्राणामेषामुपस्थे सोम आहितः ॥ ३ ॥ सोमं मन्यते पपिवान्यत्संपिंशन्त्योषधिम् । सोमं

यं ब्रह्माणो विदुर्न तस्याश्नाति कश्चन ॥ ४ ॥ आच्छद्विधानैर्गुपि-
तो बार्हतैः सोम रक्षितः । ग्राभ्णामिच्छृण्वन्तिष्ठसि न ते अ-
श्नाति पार्थिवः ॥ ५ ॥ यत्त्वा देव प्रपिवन्ति तत आप्यायसे
पुनः । वायुः सोमस्य रक्षिता समानां मास आकृतिः ॥ ६ ॥
रैभ्यासीदनुदेयी नाराशंसी न्योचनी । सूर्याया भद्रमिद्वासो गा-
थयैति परिष्कृता ॥ ७ ॥ चित्तिरा उपबर्हणञ्चक्षुरा अभ्यञ्जनम् ।
द्यौर्भूमिः कोश आसीद्यदयात्सूर्या पतिम् ॥ ८ ॥ स्तोमा आ-
सन्प्रतिधयः कुरीरञ्छन्द ओपशः । सूर्याया अश्विना वराग्निरा-
सीत्पुरोगवः ॥ ९ ॥ सोमो वधूयुरभवदश्विनास्तामुभा वरा ।
सूर्यां यत्पत्ये शंसन्तीम्मनसा सवितादद्‌दात् ॥ १० ॥ मनो अ-
स्या अन आसीद् द्यौरासीदुत च्छदिः । शुक्रावनड्वाहावास्तां य-
दयात्सूर्या गृहम् ॥ ११ ॥ ऋक्सामाभ्यामभिहितौ गावौ ते सा-
मनावितः । श्रोत्रे ते चक्रे आस्तान्दिवि पन्थाश्चराचरः ॥ १२ ॥

---

१ पार्थिवः । २ सोम ।

शुची ते चक्रे यात्या व्यानो अक्ष आहतः । अनो मनस्मयं सू-
र्या रोहत्प्रयती पतिम् ॥ १३ ॥ सूर्याया वहतुः प्रागात्सविता
यमवासृजत् । मघासु हन्यन्ते गावोर्जुन्योपर्युह्यते ॥ १४ ॥
यदश्विना पृच्छमानावयातंत्रिचक्रेण वहतुं सूर्यायाः । विश्वे दे-
वा अनु तद्वामजानन्पुत्रः पितेरावषृणीत पूषा ॥ १५ ॥ यद-
यातं शुभस्पती वरेयं सूर्यामुप । क्वैकं चक्रं वामाऽऽसीत्क दे-
ष्ट्राय तस्थथुः ॥ १६ ॥ द्वे ते चक्रे सूर्ये ब्रह्माण ऋतुथा विदुः।
अथैकं चक्रं यद्गुहा तदद्धातय इद्विदुः ॥ १७॥ सूर्यायै देवेभ्यो
मित्राय वरुणाय च । ये भूतस्य प्रचेतस इदन्तेभ्योऽकरन्नमः॥
१८ ॥ पूर्वापरञ्चरतो माययैतौ शिशू क्रीडन्तौ परि यातो अध्व-
रम् । विश्वान्यन्यो भुवनाभिचष्ट ऋतूंरन्यो विदधज्जायते पुनः
॥ १९ ॥ नवो नवो भवति जायमानोऽह्नाङ्केतुरुषसामेत्यग्रम् ।

---

१ मघासु हन्यन्ते गावः फल्गुनीषु व्युह्यते । २ पितरमवृणीत । ३ तस्थतुः ।
४ (विश्वान्यो भुवनाविचष्ट) ।

भागन्देवेभ्यो विदधात्यायन्प्र चन्द्रमास्तिरतेदीर्घमायुः ॥ २० ॥
सुकिंशुकं शल्मलिं विश्वरूपं हिरण्यवर्णं सुवृतं सुचक्रम् । आरो-
ह सूर्ये अमृतस्य लोकं स्योनम्पत्ये वहतुङ्कृणुष्व ॥ २१ ॥ उदी-
र्ष्वातः पतिवती ह्येषा विश्वावसुर्नमसा गीर्भिरीडे । अन्यामि-
च्छ पितृषदं व्यक्तां स ते भागो जनुषा तस्य विद्धि ॥ २२ ॥
उदीर्ष्वातो विश्वावसो नमसेळामहे त्वा । अन्यामिच्छ प्रफर्व्यं
सञ्जायां पत्यां सृज ॥ २३ ॥ अनृक्षरा ऋजवः सन्तु पन्थायेभिः
सखायो यन्ति नो वरेयम् । समर्यमा सं भगो नो निनीया-
त्सञ्जास्पत्यं स्वयममस्तु देवाः ॥ २४ ॥ प्र त्वा मुञ्चामि वरुण-
स्य पाशाद्येन त्वाबध्नात्सविता सुशेवाः । ऋतस्य योनौ सुकृ-
तस्य लोके रिष्टान्त्वा सह पत्या दधामि ॥ २५ ॥ प्रेतो मुञ्चा-
मि नामुतः सुबद्धाममुतस्करत् । यथेयमिन्द्र मीढ्वः सुपुत्रा सु-
भगा सति ॥ २६ ॥ पूषा त्वेतो नयतु हस्तगृह्याश्विना त्वा

१ वहतुं । २ पन्थानो ।

प्र वहतां रथेन । गृहान्गच्छ गृहपत्नी यथासो वशिनी त्वं विद-
थमा वदासि ॥ २७ ॥ इह प्रियं प्रजया ते समृध्यतामस्मिन्गृ-
हे गार्हपत्याय जागृहि । एना पत्या तन्वं सं सृजस्वाथाजिव्रि
विदथमा वदाथः ॥ २८ ॥ नीललोहितं भवति कृत्या सक्तिर्व्य-
ज्यते । एधन्ते अस्या ज्ञातयः पतिर्बन्धेषु बध्यते ॥ २९ ॥ परा
देहि शामुल्यं ब्रह्मभ्यो वि भजा वसु । कृत्यैषा पद्वती भूत्वा
जाया विशते पतिम् ॥ ३० ॥ अश्रीरातनूर्भवति रुशती पापया-
ऽमुया । पतिर्यद्वध्वो वाससा स्वमङ्गमभिधित्सते ॥ ३१ ॥ ये
वध्वश्चन्द्रं वहतुं यक्ष्मा यन्ति जनामनु । पुनस्तान्यज्ञिया देवा
नयन्तु यत आगताः ॥ ३२ ॥ मा विदन्परिपन्थिनो य आसी-
दन्ति दम्पती । सुगेभिर्दुर्गमतीतामप द्रान्त्वरातयः ॥ ३३ ॥
सुमङ्गलीरियं वधूरिमां समेत पश्यत । सौभाग्यमस्यै दत्त्वा य-
थास्तं विपरेतन ॥ ३४ ॥ तृष्टमेतत्कटुकमेतदपाष्ठवद्विषवन्नैतदत्तवे।

---

१ स्वाथ जिर्विर्विदथमा वदासि । २ अश्लीला ।

सूर्यां यो ब्रह्मा विद्यात्स इद्वाधूयमर्हति ॥ ३५ ॥ आशसनं वि-
शसनमथो अध्य विकर्तनम् । सूर्यायाः पश्य रूपाणि तानि [1]ब्र-
ह्मोत शुम्भति ॥ ३६ ॥ गृभ्णामि ते सौभगत्वाय हस्तौ मया
पत्या जरदष्टिर्यथासत् । भगो अर्यमा सविता पुरन्धिर्मह्यं त्वा-
दुर्गार्हपत्याय देवाः ॥ ३७ ॥ तां पूषञ्छिवतमामेरयस्व यस्यां
बीजं मनुष्या वपन्ति । या न ऊरू उशती वि[2]श्रयाति यस्या-
मुशन्तः प्रहराम शेपम् ॥ ३८ ॥ तुभ्यमग्रे पर्यवहन्त्सूर्यां वह-
तुना सह । पुन[3]ः पतिभ्यो जायान्दा अग्ने प्रजया सह ॥ ३९ ॥
पुनः पत्नीमग्निरदादायुषा सह वर्चसा । दीर्घायुरस्या यः पति
र्जीवाति शरदः शतम् ॥ ४० ॥ सोमः प्रथमो विविदे गन्धर्वो
विविद उत्तरः । तृतीयो अग्निष्टे पतिस्तुरीयस्ते मनुष्यजः[4] ॥
४१ ॥ सोमोऽददद्गन्धर्वाय गन्धर्वोऽददद्ग्नये । रयिञ्च पुत्रांश्चा-
दादग्निर्मह्यमथो इमाम् ॥ ४२ ॥ इहैव स्तम्मा वि यौष्टं विश्व-

१ ब्रह्मा तु शुन्धति । २ याते । ३ सनः । ४ जाः ।

मायुर्व्यश्नुतम् । क्रीडन्तौ पुत्रैर्नप्तृभिर्मोदमानौ स्वे गृहे ॥ ४३ ॥
आ वां प्रजाञ्जनयतु प्रजापतिराजरसाय समनक्त्वर्यमा । अदुर्मङ्ग-
ली पतिलोकमाविश[2] शन्नो भव द्विपदे शञ्चतुष्पदे ॥ ४४ ॥
अघोरचक्षुरपतिघ्न्यधिशिवा पशुभ्यः सुमनाः सुवर्चाः । वीरसू-
र्देवृकामा स्योना शन्नो भव द्विपदे शञ्चतुष्पदे ॥ ४५ ॥ इमा-
न्त्वमिन्द्र मीढ्वः सुपुत्रां सुभगाङ्कृणु । दशास्यां पुत्रानाधेहि प-
तिमेकादशङ्कृधि ॥ ४६ ॥ सम्राज्ञी श्वशुरे भव सम्राज्ञी श्वश्र्वां
भव । ननान्दरि सम्राज्ञी भव सम्राज्ञी अधिदेवृषु ॥ ४७ ॥ स-
मञ्जन्तु विश्वे देवाः समापो हृदयानि नौ । सम्मातरिश्वा स-
न्धाता समुदेष्ट्री दधातु नौ ॥ ४८ ॥ ध्रुवोऽधिपुष्यामयि मह्यन्त्वा
दाद्बृहस्पतिः । मया पत्या प्रजावती सञ्जीव शरदः शतम् ॥
४९ ॥ विहिसोतोरऽसृक्षत नेन्द्रन्देवममंसत । यत्रामदद्वृषाक
पिरऽर्यः पुष्टेषु मत्सखा विश्वस्मादिन्द्र उत्तरः ॥ ५० ॥ नमो

१ रह्वोरात्राभ्यां । २ माविशेमं ।

ब्रह्मणे इतिच परिधानीयांस्त्रिरुक्त्वा सूर्यवर्गं समाप्य कन्यापितरं ब्राह्मणपूजनं कारयेत् ॥

गायत्र्यै नमः ओंभूर्भुवःस्वस्तत्स० ३ ॥ ओंतत्सद्य० अग्नेर्यविष्ठस्येत्यादीनां तथाऽग्नेः पुष्टिपतेः प्रजापतेरर्यम्णो गन्धर्वस्य त्र्यम्बकस्य विवाहोद्वाहदेवतानां आत्मनो वाङ्मनः० कन्योद्वाहनिमित्तमर्चामहं करिष्ये ओंकुरुष्व ॥ इत्यादि सर्वं दक्षिणान्तं कार्यम् । अच्छिद्रं ॥ आश्रावितं० इत्यादि सर्वं । विमुच्य । नयामि ॥

अथाग्निं परिसमुह्य पर्युक्ष्य परिषिच्य परिस्तीर्य ॥ आदौपंच० ॥ १६ ॥ नास्ति निर्वपणम् । पृश्न्याः पयो० । आज्यदर्शनं वधूवरयोः । आत्मनो वाङ्म० अग्नये वायवे सूर्याय चन्द्रमसे विष्णवे प्रायश्चित्तयागदेवताभ्यः इदमाज्यं० ॥ आज्यभागान्तं हुत्वा ॥ [उत्तरपराज्जी स्तृणात्याशयनीयात्तया प्रविशत्यऽध्याहिताग्निं सोदकं सौषधमावसथं प्रतिपद्यते । रो-

हिरण्या मूलेन वा यद्वा पुण्योक्तमपरेणाग्निमानडुहे रोहिते चर्मण्युपवेश्यापिवा दर्भेष्वेव । जयप्रभृतिभिर्हुत्वा ॥] [अग्निरैतु प्रथम इत्याद्यैः पञ्चदश स्रुवेणाज्याहुतीर्वरो वध्वा सहोपविश्य जुहोति । आयुषमिति पञ्चदशी ॥] अग्निरैतु प्रथमो देवतानां सोऽस्याः प्रजां नयतु सर्वमायुः । तदयं राजा वरुणोऽनुमन्यतां यथेयं स्त्री पौत्रमघन्निरुन्ध्यात्स्वाहा ॥ १ ॥ अग्निरिमां त्रायतां गार्हपत्यः सोऽस्याः प्रजां मुञ्चतु मृत्युपाशात् । अरिक्तोपस्था जीवतामस्तु माता पौत्रमानन्दमभिविबुध्यतामियं स्वाहा ॥२॥ मा ते गृहे निशि घोर उत्थादन्यत्र त्वद्रुदत्यः संविशन्तु । जीवपुत्रा पतिलोके विराज पश्यन्ती प्रजां सुमनस्यमानां स्वाहा ॥ ३ ॥ मा ते कुमारः स्तनधः प्रमायि मा त्वं विकेश्युर आवधिष्ठाः । स्तनन्धयन्ते सविताभिरक्षत्वा वाससः परिधानाद्बृहस्पतिर्विश्वेदेवा अभिरक्षन्तु नित्यं स्वाहा ॥ ४ ॥ अग्ने प्रायश्चित्ते त्वन्देवानां प्रायश्चित्तिरसि यास्यां भृशा तमूस्तामस्या ना-

शय स्वाहा ॥ ५ ॥ (एवं) वायो प्रायश्चित्ते० ॥ ६ ॥ सूर्य प्रायश्चित्ते० ॥ ७ ॥ चन्द्र प्रा० ॥ ८ ॥ विष्णो प्रा० ॥ ९ ॥ विष्णो प्रा० ॥ १० ॥ चन्द्र प्रा० ॥ ११ ॥ सूर्य प्रा० ॥ १२ ॥ वायो प्रा० ॥ १३ ॥ अग्ने प्रा० ॥ १४ ॥ त्र्यायुष्यं जमदग्नेः कश्यपस्य त्र्यायुषम् । यद्देवानां त्र्यायुषं तन्मे अस्तु त्र्यायुषम् ॥ १५ ॥ (आज्यस्यैकदेशे दध्यासिच्य दधिक्राव्ण इति त्रिर्दधि भक्षयित्वा) । (वधूमितिदेवपालः । स्वयमपि प्राश्येत्यन्ये) । नारायणस्यार्षम् ॥ दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः । सुरभि नो मुखा करत्प्र ण आयूंषि तारिषत् ॥

[माणवकाय वध्वा उत्सङ्गे स्थिताय वर इळामग्न इति फलानि प्रददाति] ॥ इळामग्ने इति विश्वामित्रस्य ॥ इळामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध । स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥ (ततो वैश्वदेव्याग्नेय्या वा चतुर्गृहीतेन प्रधानम्) ॥ तेजोसि० ॥ विहव्यस्या-

ङ्गिरसस्य ॥ ये के च ज्मा० ॥ तत ऋतुतिथियागादितन्त्रसमाप्तिः ॥ तदनु ब्राह्मणपूजनं कुर्यात् ॥ गायत्र्यै नमः ॐभूर्भुवःस्वस्तत्सवितुः ३ ॥ अद्य तावत्० अग्नेर्यविष्ठस्य० । अग्नेः वायोः सूर्यस्य चन्द्रमसः विष्णोः प्रायश्चित्तदेवतानां आत्मनोवाङ्मनः० आत्मोद्वाहनिमित्तमर्चामहं करिष्ये । ॐकुरुष्व ॥ इत्यादि दक्षिणान्तं कृत्वा पूर्ववदच्छिद्रं च विधाय आश्रावितमिति पूर्णां दद्यात् विमुच्य नयामि ॥

अग्निं परिसमुह्य पर्युक्ष्य परिषिच्य ॥ चातुष्कोष्टैः स्तरैः परिस्तीर्य ॥ (तूष्णीमुपचरितं स्थालीपाकं श्रपयित्वा तस्याग्निमिष्ट्वा प्रजापतिं च शेषं प्राश्नीतः) ॥ चरुं शृतमभिघार्योदगुद्वास्य अग्नये स्वाहा प्रजापतये स्वाहा ॥ अग्निं विमुच्य ॥ नयामि ॥ धर्म देहि० ॥ क्षेत्रेशबलिः ॥ योऽस्मिन्निवसतीति० ॥

अन्नमेव विवननमन्नं संवननं स्मृतम् । अन्नं पशूनां प्राणो-

ऽन्नं (अन्नं) ज्येष्ठं भिषक्स्मृतम् ॥ अन्नमयेन मणिना प्राणसूत्रेण पृश्निना । सिनोमि सत्यग्रन्थिना हृदयं च मनश्चते ॥ सह वाचा मनो अस्तु सह चित्तं सह व्रतम् । चक्रमिवानडुहः पदं मामेवान्वेतु ते मनः ॥ मां चैव पश्य सूर्यं च मा चान्येषु मनःकृथाः । चाक्रवाकं संवननं—ममचामुष्याश्च भूयादिति (वध्वाः षष्ठ्यन्तं नाम ग्राह्यम्) ॥

[ओंसंवत्सरं ब्रह्मचर्यं चरतो द्वादशरात्रीः षड्रातिस्र एकां वाऽनस्संविशतः] ॥

(स्त्र्याह ॥) अपश्यन्त्वा मनसा चेकितानं तपसो जातं तपसो विभूतम् । इह प्रजामिह रयिं रराणः प्रजायस्व प्रजया पुत्रकाम ॥ (पतिः ॥) अपश्यन्त्वा मनसा दीध्यानां स्वायान्तनू ऋत्व्यै नाधमानाम् । उप मामुच्चा युवतिर्बभूयाः प्रजायस्व प्रजया पुत्रकामे ॥ (स्त्री ॥) प्रजापते तन्वम्मे जुषस्व त्वष्टर्देवेभिस्सहसा न इन्द्रः । विश्वैर्देवैर्यज्ञियैस्संविदानः पुंसां बहूनां मातरस्स्याम ॥ (पतिः ॥) अहङ्गर्भमादधामोषधीष्वहं विश्वेषु भुव-

नेष्वन्तः । अहम्प्रजा अजनयं पृथिव्यामहञ्जनिभ्यो अवरीषु पुत्रानिनि स्त्र्यादि-व्यत्यासञ्जपतः । [एवमेवतौ प्रजाकामौ संविशतः ॥ करदितिभसदमभिमृशति ॥ भसदित्युपरिजननम् ॥ बृहदितिजातम् ॥] ज्योत्कारं क्रमते चैव स्वस्तिना परिपठ्यते । विप्रेण ह्याशिषं कुर्याद्विष्णुर्वचनमब्रवीत् ॥ विष्णुर्वा त्रिपुरान्तको भवतु वा ब्रह्मा सुरेन्द्रोऽथवा भानुर्वा शशलक्षणोऽथ भगवान्बुद्धोऽथ सिद्धोऽथवा । रागद्वेषविषार्त्तिमोहरहितस्सत्त्वानुकम्पोद्यतो यस्सर्वैस्सह संस्कृतो गुणगणैस्तस्मै नमः सर्वदा ॥ १ ॥ प्रसन्नमूर्तिः स्थिरमन्त्रविग्रहः समग्रशक्तिर्जगदेकबान्धवः । उमापतिः खण्डशशाङ्कशेखरो जयत्यनाथार्तिहरो महेश्वरः॥ २ ॥ गायत्री ब्रह्मणो यद्वल्लक्ष्मीर्दैत्यरिपोर्यथा । उमा यथा महेशस्य तथा त्वं भव भर्तरि ॥ ३ ॥ सुवर्चला यथार्कस्य यथा चन्द्रस्य रोहिणी । मदनस्य रतिर्यद्वत्तथा त्वं भव भर्तरि ॥ ४ ॥ सुदक्षिणा दिलीपस्य वसन्तस्य धृतिर्यथा । अरुन्धती वसिष्ठस्य

तथा त्वं० ॥ ५ ॥ रामस्य च यथा सीता विनता कश्यपस्य च।
पावकस्य यथा स्वाहा तथा त्वं० ॥ ६ ॥ उषा यथाऽनिरुद्धस्य द-
मयन्ती नलस्य च । सती च ऋतुपर्णस्य तथा त्वं० ॥ ७ ॥ य-
था गौरी महेशस्य यथा स्वर्गपतेश्शची । यथा श्रीः श्रीधरस्यैव
तथा त्वं० ॥ ८ ॥ पुलोमजा यथेन्द्रस्य यथागस्त्यस्य रोहिणी ।
देवकी वसुदेवस्य तथा त्वं० ॥ ९ ॥ शन्तनोश्च यथा गङ्गा सु-
भद्रा ह्यर्जुनस्य च । धृतराष्ट्रस्य गान्धारी तथा त्वं० ॥ १० ॥
धनपुत्रवती साध्वी सततं भर्तृवल्लभा । मनोज्ञा ज्ञानसहिता
तिष्ठ त्वं शरदां शतम् ॥ ११ ॥ यथेन्द्राणी हरिहये स्वाहा चैव
विभावसौ । रोहिणी च यथा चन्द्रे दमयन्ती यथा नले ॥१२॥
यथा वैश्रवणे भद्रा वसिष्ठे वाप्यरुन्धती।यथा नारायणे लक्ष्मी-
स्तथा त्वं भव भर्तरि ॥ १३ ॥ जीवसूर्वीरसूर्भद्रा बहुसौख्यस-
मन्विता । सुभगा भोगसंपन्ना यज्ञपत्नी मनोव्रता ॥ १४ ॥ अ-
तिथीनागतान्साधून्बालान्वृद्धान्गुरूनपि । पूजयन्त्या यथान्यायं

शश्वद्गच्छन्तु ते समाः ॥ १५ ॥ पृथिव्यां यानि रत्नानि गुणव-
न्ति गुणान्विते । तान्याप्नुहि त्वं कल्याणि सुखिनी शरदां श-
तम् ॥ १६ ॥ लक्ष्मीर्यथा सकलदेवगणारिशत्रौ गौरी यथा प-
शुपतौ च शची सुरेन्द्रे । गायत्र्यपीह परमेष्ठिनि नित्यरक्ता तद्व-
द्भव त्वमपि भर्तरि नित्यरक्ता ॥ १७ ॥ सीता यथा दशरथस्य
सुते प्रवीरे प्रीतिर्यथा स्तुतिकरे च रतिश्च कामे । सूर्येऽनुरक्तहृ-
दयाथ सुवर्चला सा तद्वद्भव त्वमपि० ॥ १८ ॥ सा रोहिणी
निगदिता च यथा शशाङ्के नित्यं यमेऽप्यथ यमी च यथानुरक्ता।
हंसावली नृपसुता कमलाकरे वा तद्वद्भव० ॥ १९ ॥ बाणाख्य-
दैत्यतनया च यथानिरुद्धे यद्वन्नले नरपतौ दमयन्त्यपीह । स्वा-
हा यथा हुतभुजीह सदानुरक्ता तद्वद्भव० ॥ २० ॥ सुदक्षिणा
चापि नृपे दिलीपे ह्यरुन्धती चापि मुनौ वसिष्ठे । गाढानुरक्ता
भवतीह यद्वत्तद्वद्भव० ॥ २१ ॥ यद्वल्लक्ष्मीमधुमथनयोः पद्मि-
नीसूर्ययोर्वा यद्वन्नित्यं रजनिशशिनोः पत्त्रिणोश्चक्रनाम्नोः । गाढ-

प्रेम्णो भवति शिवयोः सुप्रसिद्धिश्च यद्वज्जायापत्योर्भवतु युव-
योस्तद्वदेवात्र लोके ॥ २२ ॥ अतिरमणीयाकृत्योस्समवयसोः प्रो-
ल्लसत्प्रेम्णोः । वधूवरयोर्नूनं पाणिग्रहणं शिवायास्तु ॥ २३ ॥
यन्मङ्गलं शैलसुताविवाहे हरस्य दत्तं कमलासनेन । तन्मङ्गलं
देव विवाहकाले ददामि ते देवमुनिप्रणीतम् ॥ २४ ॥ पद्मामा-
धवयोर्नगेन्द्रतनयानागेन्द्रकेयूरयोः स्वाहापावकयोरमर्त्यतटिनीक-
ल्लोलिनीनाथयोः । पौलोमीपुरुहूतयो रतिरतिप्राणेशयोः प्रेमवद्द-
म्पत्योर्युवयोश्चिरं भवतु तत्सौभाग्यभाग्योदयः ॥ २५ ॥ अक्षतौ-
षधितिलाश्च शाद्वला धूपदीपकुसुमानि चन्दनम् । माक्षिकं दधि
सशर्करं पयो मङ्गलं ददतु वोऽभिषेकजम् ॥ २६ ॥ धातृकेशव-
शिवास्सुपूजिताः षण्मुखोऽथ मदनो विनायकः । अश्विनौ धन-
पतिर्विभावसुर्मङ्गलं० ॥ २७ ॥ शक्रवह्नियमनैर्ऋताप्पतिमातरिश्व-
नरवाहनादयः । शम्भुपद्मजहलायुधास्सुरा मङ्गलं० ॥ २८ ॥ अ-
त्रिकश्यपवसिष्ठगौतमा व्यासगालव पुलस्त्यकौशिकाः । गाधि-

नन्दनकणादशौनका मङ्गलं० ॥ २९ ॥ सूर्यसोमकुजचन्द्रनन्दना जीवशुक्रशनिराहुकेतवः । पङ्क्तिरूपघटजौ च ये ग्रहा मङ्गलं० ॥ ३० ॥ मेषगोमिथुनकर्कटास्तथा सिंहकन्यतुलकीटधन्विनः । मार्गकुम्भजलजास्तु राशयो मङ्गलं० ॥ ३१ ॥ मार्गपौषतपफाल्गुना मधुराधशुक्रशुचयस्तथा नभाः । भाद्र आश्वयुजकार्तिकावमी मङ्गलं० ॥ ३२ ॥ मेरुमन्दरहिमाद्रिरैवता विन्ध्यसह्यमलयाख्यदुर्दुराः । गन्धमादनशिवालया अमी मङ्गलं० ॥ ३३ ॥ तार्क्ष्यजैमिनिजटायुजम्पलाश्चित्रसेनद्विजहंसदुर्दुराः । सम्पतिश्चिरदशवायसोऽरुणो मंगलं० ॥ ३४ ॥ क्षारसिन्धुरसनीरसागराः क्षीरसैन्धवगुडास्तथा घृताः । क्षौद्रदुग्धसहिता महार्णवा मङ्गलं० ॥ ३५ ॥ शेषतक्षकमलाहिवासुकि–शङ्खपालफणिपद्मपुष्कराः । मानसो विमलनीलनागराड् मङ्गलं० ॥ ३६ ॥ रावणश्च बलिदानवो मयः कालकूटवहनो विभीषणः । बाणकंसयवना महाबला मंगलं० ॥ ३७ ॥ रामलक्ष्मणदिलीपभार्गवास्सत्यकेतुनल-

भीष्मपाण्डवाः । धर्मदत्तशिविवैन्यकश्यपा मङ्गलं० ॥ ३८ ॥ जानकी सह सुतैररुन्धती मालती शशिमती सुदक्षिणा । द्रौपदी च दमयन्त्यथोर्मिला मङ्गलं० ॥ ३९ ॥ जाह्नवी शशिभवा गोदावरी नर्मदा च यमुना विपाशिका । गण्डकी मधुमती सरस्वती मङ्गलं० ॥ ४० ॥ पार्वती च कमला शची रतिस्सत्यवत्यपि च रोहिणी तथा । कौशिकी च विनताथ देवकी मङ्गलं० ॥ ४१ ॥ स्वर्धेनुर्वृषभो हरस्सुरवधू रम्भाथ कल्पद्रुमो नक्षत्रं तिथिवासरौ क्षणमथो लग्नं मुहूर्तं शुभम् । खं वायुः शशिभास्करौ च धरणिस्तोयं च वह्निः पुमानित्येवं परमेश्वरप्रकृतयः कुर्वन्तु वां मङ्गलम् ॥ ४२ ॥ यावद् द्वीपे तरङ्गैर्वहति सुरनदी जाह्नवी पुण्यतोया यावदाकाशमार्गे तपति दिनकरो भास्करो लोकपालः ॥ यावद्ब्रह्मा च विष्णुः सुरपतिसहितो वर्तते मेरुशृङ्गे तावत्त्वं मर्त्यलोके निजकुलसहितो भुंक्ष्व लक्ष्मीं समग्राम् ॥ ४३ ॥ ब्रह्मा वेदपतिः शिवः पशुपतिः शक्रः सुराणां पतिर्विष्णुर्यज्ञपती रविर्ग्र-

हपतिर्धर्मः पितॄणां पतिः ॥ प्राणो देहपतिः सदागतिरयं ज्योतिष्पतिश्चन्द्रमाः सर्वे ते पतयः कुवेरसहिताः कुर्वन्तु वां मङ्गलम् ॥ ४४ ॥ याः स्कन्दस्य जगाद तारकजये देवः स्वयम्भूः स्वयं स्वःसाम्राज्यमहोत्सवेऽपिच शचीकान्तस्य वाचस्पतिः । ताभिस्तेऽद्य विरिञ्चिवक्त्रसरसीहंसीभिराशास्महे वैदीभिश्च सदा विवाहसमये मंत्रोक्तिभिर्मङ्गलम् ॥ ४५ ॥ ब्रह्मा हंसाधिरूढो मुनिगणसहितो वेदवित् सृष्टिकर्ता विष्णुः श्रीशक्तिधर्ता गरुडरथयुतः शार्ङ्गचक्रादिहस्तः । रुद्रश्चन्द्रार्धमौलिर्वृषभवरगतो धौतधूलीसिताङ्ग आयुःश्रीशक्तिवीर्यं ददतु तव गृहे पुत्रपौत्रादिसौख्यम् ॥ ४६ ॥ लक्ष्मीः कौस्तुभपारिजातकतरू धान्वन्तरिश्चन्द्रमा धेनुः कामदुघा सुरासुरगजो रम्भाथ देवाङ्गना । अश्वः सप्तमुखस्तथा हरिधनुः शङ्खो विषं चामृतं रत्नानीति चतुर्दश प्रतिदिनं कुर्वन्तु वां मङ्गलम् ॥ ४७ ॥ आदित्योऽग्नियुतः शशी सवरुणो भौमः कुमारान्वितः । सौम्यो विष्णुयुतो गुरुः समघवा

देव्या युतो भार्गवः । सब्रह्मा रविजो गणेश्वरयुतो राहुर्ध्वजः सेश्वरो मङ्गल्यं सततं हरार्चनरताः कुर्वन्तु सर्वे ग्रहाः ॥ ४८ ॥ दीर्घायुर्भव जीव वत्सरशतं नश्यन्तु सर्वापदः स्वास्थ्यं संभज मुञ्च चञ्चलधियं लक्ष्म्येकनाथो भव । किं ब्रूमो भृगुगौतमात्रिकपिल व्यासादिभिर्भाषितं यद्रामस्य पुराभिषेकसमये तच्चास्तु ते मङ्गलम् ॥ ४६ ॥ अयुष्मान्भव पुत्रवान्भव भव श्रीमान्यशस्वी भव प्रज्ञावान्भव भूरिभूतिकरुणादानैकनिष्ठो भव । तेजस्वी भव वैरिदर्पदहनव्यापारदक्षो भव श्रीशम्भोर्भव पादपूजनरतः सर्वोपकारी भव ॥ ५० ॥ आयुर्बलं विपुलमस्तु सुखित्वमस्तु सौभाग्यमस्तु विशदा तव कीर्तिरस्तु । श्रीरस्तु धर्ममतिरस्तु रिपुक्षयोऽस्तु सन्तानवृद्धिरभिवाञ्छितसिद्धिरस्तु॥५१॥ यावदिन्द्रादयो देवा यावच्चन्द्रदिवाकरौ । यावद्रामकथा लोके भूयात्तावत् स्थितिस्तव ॥ ५२ ॥ सुरार्चनेन दानेन साधूनां सङ्गमेन च । आशीर्वादेन विप्राणामपमृत्युर्विनश्यतु ॥ ५३ ॥ मं-

न्नार्थाः सफलाः सन्तु पूर्णाः सन्तु मनोरथाः । शत्रूणां बुद्धिनाशोऽस्तु मित्राणामुदयस्तव ॥ ५४ ॥ मार्कण्डेयमुनेः स्वर्गवैद्ययोः स्वर्पतेः समम् । आयुरारोग्यमैश्वर्यमेतत्त्रितयमस्तु ते ॥५५॥

जीव त्वं शरदां शतम् ॥

कन्दर्पकोटिकमनीयमनोहरश्रीप्राग्भारभास्वर सुरासुरसेविताङ्घ्रे । पूर्णेन्दुबिम्बवदनाशरणार्तिहारिन् त्वां प्रार्थयेऽत्र भगवन्दिश मङ्गलानि ॥ १ ॥ सौवर्णवर्णललिताम्बरकान्तिकान्तः कौमोदकीकमलकम्बुरथाङ्गपाणिः । निस्तन्द्रचन्द्रवदनः कुटिलालको वां नारायणो दिशतु मङ्गलमिन्दिरेशः ॥ २ ॥ योगीन्द्रमृग्यचरणाम्बुजपूतपृष्ठ-श्रीवैनतेयमधिरुह्य विहारशाली । श्रीवत्सलाञ्छन उदारघनोपमो वां श्रेयः परं दिशतु निर्मलहारहारी ॥ ३ ॥ देदीप्यमानमुकुटाङ्गदकुण्डलांशु-दीप्तगलोज्ज्वलमनोरमकौस्तुभाच्च । भ्राजिष्णुमूर्तिरतुलायतलोचनो वां विश्वेश्वरो दिशतु भद्रमदभ्रभद्रः ॥ ४ ॥ क्षीराब्धिमन्दिरगतः सुकुमारतल्पीभूताहिराज-

शयनीयरमाश्रिताङ्घ्रिः । श्रीपद्मनाभ उरुकीर्तिरनुत्तरो वां विश्व-
म्भरः श्रियमुदारतमां बिभर्तु ॥ ५ ॥ गर्भस्थमार्जुनिसुतं कुल-
तन्तुमेकं द्रौण्यस्त्रदग्धमजितान्तकपूजिताङ्घ्रिः । योऽजीवयत्प्रिय-
तमार्जुनभक्तिनिघ्नः कृष्णः स वां च भगवानवतादजस्रम् ॥ ६ ॥
यत्पत्पवित्रभुवनत्रयपावनीं तां गङ्गां शिवोऽप्यवहितोऽवहदुत्त-
माङ्गे । यत्पादधूलिपुनरात्तमनुष्यदेहा–हल्या बभूव स हरिर्हर-
तादघं वाम् ॥ ७ ॥ यो द्रौपदीममितनत्तरुपारदुःखां तान्पाण्ड-
वांश्च पुरुघोरविपत्तिदग्धान् । तत्रे त्वरान्वित इवातितरां स कृ-
ष्णः कष्टं त्रिकष्टहरणस्मरणो ह्रियाद्वाम् ॥ ८ ॥ दुर्ग्राहवक्त्रप-
तिताङ्घ्रिमहागजेन्द्रं योऽमूमुचद् द्रुतमपारकृपानिधानः । सर्वेश्व-
रेश्वर उपात्तसुदर्शनो वां मुक्तिं क्रियात्स भगवान्भवघोरपाशात्
॥ ९ ॥ दुष्पारदुर्गतिमहोदधिमध्यमग्नं रङ्कं सतीर्थ्यमनुतप्तमन-
न्यभक्तम् । यः श्रीसुदामसुहृदं हरिरुज्जहार श्वःश्रेयसं दिशतु
वां त्रिजगत्पतिः सः ॥ १० ॥ ह्रीणां रजःप्लुततनुं द्रुपदस्य पुत्रीं

दीनां द्विषत्परिवृतां सदसोऽन्तरे ताम् । योऽनन्तदिव्यवसनैस्त्व-
रयोद्दधार कृष्णः स वां शरणमस्तु शरण्यधुर्यः ॥ ११ ॥ यस्या-
स्ति विश्वमखिलं कृपया स्थितं सन्मात्रः स चैष भगवानखिले-
ष्टदायी । आयुर्निरामयमनन्तसमृद्धिपूर्णं नारायणो दिशतु मंग-
लमंगलो वाम् ॥ १२ ॥ स्निग्धात्कृपातिशयपूर्णकटाक्षलेशाद् य-
स्य स्वतन्त्रमरणा जितकालकदयाः । व्यासादयो भुवि चरन्ति
चिरायुषौ वां सेशः करोतु कुलविस्तृतिकीर्तिमन्तौ ॥ १३ ॥ य-
न्नामसंस्मृतिरपीष्टविधायिनीत्वात् स्वःशाखिदर्पमखिलं दिवि चू-
र्णयन्ती । सोऽयं परात्परतरः पुरुषः पुराणः कामं प्रपूरयतु वां
सकलं दुरापम् ॥ १४ ॥ यत्कीर्तनं कलिमलघ्नमपारघोर-दुःखा-
मयाधिशमने प्रलयाग्निकल्पम् । कीर्तिं सुधानिधिसुधाङ्ककलाव-
दातां दिश्यात्स वां शशिकलाभरणार्चिताङ्घ्रिः ॥ १५ ॥ संसार-
दुर्गतिहरं भवतापतप्तनिर्वाणदं त्रिजगतां दुरितार्तिहारि । यो-
गीन्द्रचिन्त्यभगवच्चरणारविन्द-द्वन्द्वं सदास्तु भवतारणकारणं नः

॥ १६ ॥ यं सत्स्वरूपमचलं सकलेष्टपूर्त-दानादिकर्मसु शुभेषु सुदक्षिणेषु । श्रद्धालवः प्रतिभुवं फलदं च मत्वा-सक्ता भवन्ति स ममास्तु सुकर्मसिद्ध्यै ॥ १७ ॥ त्वय्यर्पितं भगवति श्रुतिगीतकीर्ते ! कन्यात्मकं वितरणं विधिनोपपन्नम् । भूयात्कुलद्वयसुखोदयबीजमेतद्दातुर्ग्रहीतुरपि मङ्गलमस्त्वनेन ॥ १८ ॥ आनन्दकन्द मुरमर्दन दीनबन्धो श्रीनन्दनन्दन मुकुन्द सुरेन्द्रवन्द्य । श्रीश्यामसुन्दर परात्पर यादवेन्द्र कारुण्यसिन्धुरसि नोऽनुगृहाण कृष्ण ॥ १९ ॥ हे कृष्ण हे यदुपते शरणागतानां त्राणप्रवीण वसुदेवकुलावतंस । हे देवकीहृदयनन्दन कंसशत्रो श्रीनाथ रक्ष करुणार्द्रदृशा सदा नः ॥ २० ॥

कलशाच्छिद्रं० गायत्र्यै नमः ॐभूर्भुवःस्वः ३ ॥ अद्यताव-त्० । महागणपतेः० अग्नेः पुष्टिपतेः प्रजापतेः । अर्यम्णः गन्धर्वस्य त्र्यम्बकस्य विवाहोद्वाहदेवतानां अग्नेः वायोः सूर्यस्य च-

न्द्रमसः विष्णोः प्रायश्चित्तदेवतानां मेषादीनां द्वादशलग्नानां अश्विन्यादीनां सप्तविंशतिनक्षत्राणां वासुदेवादीनां विष्णुपञ्चायतनदेवतानां अभयङ्कर्याः० इहराष्ट्राधिपतेर्भैरवस्य इन्द्रस्य वज्रहस्तस्य इत्यादि हेरुकादीनां वटुकादीनां आत्मनो० आत्मोद्वाहनिमित्तं कन्योद्वाहनिमित्तं पूजनं अच्छिद्रं सम्पूर्णमस्तु एवमस्तु। एतांभ्योदेव० यथोदकं नमः० । आज्ञा मे दीयतां० । क्षमध्वं० । नमो ब्रह्मणे इति तर्पणम् ॥ उदकलशमुपनिधाय स्वस्त्ययनं वाचयति । उत्तिष्ठ ब्रह्मणस्पते० इत्यादि । मन्त्रार्थाः सफलाः० ॥

इति ब्राह्म विवाहविधिः सम्पूर्णः ॥

अरालकुन्तलं वर्हावतंसं मारमोहनम् ।
राधाश्लिष्टं घनश्यामं श्रीकृष्णं शरणं श्रये ॥
अतसीकुसुमोपमेयकान्तिर्यमुनाकूलकदम्बमध्यवर्ती ।
नवगोपवधूदुकूलशाली वनमाली वितनोतु मङ्गलानि ॥